184623

UNIVERSAL
LIBRARY
OU_184623
UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY
Call No. S 349.546 / 553M Accession No. S 11188
Author शास्त्री, पी. पी. एस्. (संपा.)
Title श्रीमन्महाभारतम्. Vol. XVIII
This book should be returned on or before the date last marked below. 1933

# THE
# MAHĀBHĀRATA

**(Southern Recension)**

**Critically Edited by**

**P. P. S. SASTRI, B. A. (OXON), M.A.,**

*Professor of Sanskrit, Presidency College, Madras,*

*Editor, Descriptive Catalogue of Sanskrit Manuscripts in the Tanjore Palace Library.*

---

**Vol. XVIII—Āsvamedika, Āsramavasika, Mousala, Mahaprasthanika and Swargarohana Parvans**

---

PUBLISHED BY

V. RAMASWAMY SASTRULU & SONS

292, ESPLANADE, MADRAS.

---

*All Rights Reserved.*

to Svargarohana complete; Date of
scription—1796 A. D.

Printed at
The 'VAVILLA' PRESS,
Tondiarpet, Madras.—1933.

॥ श्रीरस्तु ॥

# ॥ श्रीमन्महाभारतम् ॥

तत्र

आश्वमेधिक, आश्रमवासिक, मौसल,

महाप्रस्थानिक, स्वर्गारोहण, रूपपञ्चपर्वात्मकम्

सम्पुटमिदम्

मद्रपुरराजकीयकलाशालासंस्कृताध्यापकैः

बि. ए. (आक्सन्) एम्. ए. (मद्रास्) इत्यादिविरुदाङ्कितैः

पि. पि. सुब्रह्मण्यशास्त्रिभिः

दाक्षिणात्यशाखानुसारेण सविमर्शं संशोधितम्

धर्मे चार्थे च कामे च  मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्

स्वर्ग-५-४४ ॥

चेन्नपुर्यां
वाविळ्ळ मुद्रणालये
मुद्रितम्
१९३३.

Checked 1962

# INTRODUCTION.

## I

In the preparation of this volume for the Press, the following Manuscripts, fully representative of the Southern Recension, were utilised:—

अ—represents the Principal Text printed. The Manuscript belongs to Mr. Krishnaswami Sastrigal, Sub-Registrar, Tanjore District. Its description is as follows:—Substance—palm-leaf; Size—$19\frac{3}{4} \times 2$ inches; Leaves—155; Lines—9 to a page; Script-Telugu; Aśvamedhika to Svargārohaṇa complete; Date of transcription. 1608 A. D.

क—is used for additional readings, etc. This belong to Brahma Sri Krishna Sastrigal, Pala Pauranikar, Trivandrum. Its description as follows:—Subtance—palm-leaf; S $17\frac{3}{4} \times 2\frac{1}{4}$ inches; Leaves—241; Lines—1 11 to a page; Script-Grantha; Aśvamed to Svargārohaṇa complete; Date of t scription—1796 A. D.

through the kindness of Sir C.P. Ramaswami-Iyer, K.C.I.E., Legal and Constitutional Adviser to the State. Its description is as follows:—Substance—palm-leaf; Size—18¾ × 2⅜ inches; Leaves—175; Lines—9 to a page; Script-Malayalam; Āśvamedhika to Svargārohaṇa complete, except for the last two sheets.

ग—is used for additional readings, etc. The Manuscript belongs to the Government Oriental Manuscripts Library, Madras, and is described under No. 1953 in the first part of Vol. IV of the Descriptive Catalogue. Its description is as follows:—Substance—palm-leaf; Size—15¾ × 1⅜ inches; Leaves—fol. 208 a; Lines 7 to a page; Scrip-Telugu; Āśvamedhika and Āśramavāsika complete; Date of Transcription—28—11—1726 A.D.

used for additional readings, etc. The Manuscript was procured for us by Mr. K. K. Lakshminarayana Iyer of Kadayam Village in the Tinnevelly District from Mr. Natesa Iyer Its description is as follows:—(1) leaf: Size—15¾ × 1⅝ i

Size—$13\frac{3}{4} \times 1\frac{3}{4}$ inches; Leaves-56; Lines 10-11 to a page; Script-Grantha. Date of transcription—1826 A.D.

ব—is used for additional readings etc., from page 384. The Manuscript belongs to the Adyar Library, Madras. Its description is as follows:—Substance-palm-leaf; Size—$19\frac{5}{8} \times 2\frac{1}{4}$ inches; Leaves–70; Lines 10-12 to a page. Script–Telugu; Āśvamedhika Parvan complete. Date of transcription—23rd February 1558 A.D.

## II

From the Anukramaṇikādhyāya of the Ādi Parvan, it can be gathered that, according to the Southern Recension, the Aśvamedhika Parvan should contain 133 chapters and 4,420 stanzas, whereas, according to the Northern Recension, the number of chapters is 103, and that of the stanzas is only 3,320. (See the tables appended to the Introductions to Vols. I and II). In our edition of the Text, we have 124 chapters and 4,613½ stanzas. The main reason for such a large decrease in the number of chapters and that of stanzas in the Northern Recension is the conspicuous omission in this Recension of the concluding portion of the अनुगीतापर्व called the वैष्णवधर्मशास्त्र forming chapters 101-124 of the our printed Text, and numbering as many as 1,707 stanzas. The Vaiṣṇavadharma Śāstra section is an important portion of this Parvan, which is found in all Manuscripts of the Southern Recension, whereas all Manuscripts representative of the Northern Recension omit it. The Vaiṣṇavadharma Śāstrā seems to go back to a long antiquity, according to the Mahābhārata tradition. The great Sāyana in his Parāśaramādhaviya (Bombay Sanskrit Series, Vol. I Part I pp. 108-110) quotes from this section. Vādirāja, the author of the Lakṣālaṅkāra, culls *pratikas* from this section.

That the Vaiṣṇavadharma Śāstra section formed an essential part of the Āśvamedhika Parvan, according to the Southern Recension, is also evident from the fact that the Anukramaṇikādhyāya, while giving detailed enumeration of the contents of each Parvan, mentions " वैष्णवं धर्ममेव च specifically under this Parvan (see footnote 2, pp. 69 of Vol. I).

Acording to the Southern Recension, the Āśramavāsika Parvan should consist of 42 chapters and 1,906 stanzas; whereas, according to the Northern Recension, the number of chapters remains the same, though the number of stanzas is only 1,506. In our edition of the Text, the number of chapters is only 42, whereas the number of stanzas comes only to 1,108½. It is significant that, according to Nannaya, the number of stanzas need be 1,106 only, a figure which very closely approximates to that of our text.

The next Parvan is the Mausala Parvan which consists of eight chapters, according to both Recensions, as well as our printed text. The number of stanzas in this Parvan should be 320, according to the Northern Recension, and 300, according to the Southern Recension. It is only 300 according to our edition as well.

The seventeenth Parvan is the Mahāprasthānika Parvan, which consists of three chapters, according to both Recensions. The number of stanzas should be 320, according to the Northern Recension, whereas, according to the Southern Recension, it should be only 120. In our edition of the text, we have only 115½ stanzas.

The eighteenth and last Parvan of the Mahābhārata is the Svargārohaṇa Parvan,—which consists of five chapters, according to both Recensions. According to the Northern Recension, the number of stanzas should be 209, whereas, according to the Southern Recension, it should be only 200. In our edition of the text also, it contains only 200 stanzas.

We have shown in appropriate places in the body of the text, the deviations of the several manuscripts in their scheme of chapters, wherever they occur. However, to illustrate the divergences at a glance, a concordance exhibiting the scheme of chapters in the Northern Recension, according to the Poona Edition with Bhāvadipa, the Mixed Recension, according to the Kumbakonam Edition and the Southern Recension, according to the text printed herein, is appended.

# CONCORDANCE.

## ĀŚVAMEDHIKA PARVAN.

| Poona Edition with Bhavadipa Chapter. | Kumbakonam Edition Chapter. | Southern Recension Chapter. | Poona Edition with Bhavadipa Chapter. | Kumbakonam Edition Chapter. | Southern Recension Chapter. |
|---|---|---|---|---|---|
| 1 | 1 | 1 | 32 | 33 | 35 |
| 2 | 2 | 2 | 33 | 34 | 36 |
| 3 | 3 | 3 | 34 | 35 | 37 |
| 4 | 4 | 4 | 35 | 36 | 38 |
| 5 | 5 | 5 | 36 | 37 | 39 |
| 6 | 6 | 6 | 37 | 38 | 40 |
| 7 | 7 | 7 | 38 | 39 | 41 |
| 8 | 8 | 8 | 39 | 40 | 42 |
| 9 | 9 | 9 | 40 | 41 (1–13) | 43 |
| 10 | 10 | 10 | 41 | ,, (14–18) | 44 |
| 11 | 11 | 11 | 42 | 42 | 45 |
| 12 | 12 | 12 | 43 | 43 | 46 |
| 13 | 13 | 13 | 44 | 44 | 47 |
| 14 | 14 | 14 | 45 | 45 | 48 |
| Omitted. | 15 | 15 | 46 | 46 | 49 |
| 15 | 16 | 16 | 47 | 47 | 50 |
| 16 | 17 | 17 | 48 | 48 | 51 |
| 17 | 18 | 18 | 49 | 49 | 52 |
| 18 | 19 | 19 | 50 | 50 | 53 |
| 19 (1–53) | 20 (1–50) | 20 | 51 | 51 | 54 |
| ,, (54–66) | ,, (51–66) | 21 | 52 | 52 | 55 |
| 20 | 21 | 22 | 53 | 53 | 56 |
| 21 | 22 | 23 | 54 | 54 | 57 |
| 22 (1–12) | 23 (1–12) | 24 | 55 | 55 | 58 |
| ,, (13–22) | ,, (13–29) | 25 | 56 | 56 | 59 |
| 23 | 24 | 26 | 57 | 57 | 60 |
| 24 | 25 | 27 | 58 | 58 | 61 |
| 25 | 26 | 28 | 59 | 59 | 62 |
| 26 | 27 | 29 | 60 | 60 | 63 |
| 27 | 28 | 30 | 61 | 61 | 64 |
| 28 | 29 | 31 | 62 | 62 | 65 |
| 29 | 30 | 32 | 63 | 63 | 66 |
| 30 | 31 | 33 | 64 | 64 | 67 |
| 31 | 32 | 34 | 65 | 65 | 68 |

| Poona Edition with Bhavadipa Chapter. | Kumbakonam Edition Chapter. | Southern Recension Chapter. | Poona Edition with Bhavadipa Chapter. | Kumbakonam Edition Chapter. | Southern Recension Chapter. |
|---|---|---|---|---|---|
| 66 | 66 | 69 | 90(23-120) | 92 | 97 |
| 67 | 67 | 70 | 91 | 93 | 98 |
| 68 | 68 | 71 | 92 (1–38) | 94 | 99 |
| 69 | 69 | 72 | ,, (39–53) | 95 | 100 |
| 70 | 70 | 73 | Omitted. | 96 | 101 |
| 71 | 71 | 74 | ,, | 97 | 102 |
| 72 | 72 | 75 | ,, | 98 | 103 |
| 73 | 73 | 76 | ,, | 99 | 104 |
| 74 | 74 | 77 | ,, | 100 | 105 |
| 75 | 75 | 78 | ,, | 101 | 106 |
| 76 | 76 | 79 | ,, | 102 | 107 |
| 77 | 77 | 80 | ,, | 103 | 108 |
| 78 | 78 | 81 | ,, | 104 | 109 |
| 79 | 79 | 82 | ,, | 105 | 110 |
| 80 (1–18) | 80 (1–18) | 83 | ,, | 106 | 111 |
| ,, (19–40) | ,, (19–40) | 84 | ,, | 107 | 112 |
| ,, (41–61) | 81 | 85 | ,, | 108 | 113 |
| 81 | 82 | 86 | ,, | 109 | 114 |
| 82 | 83 | 87 | ,, | 110 | 115 |
| 83 | 84 | 88 | ,, | 111 | 116 |
| 84 | 85 | 89 | ,, | 112 | 117 |
| 85 (1–26) | 86 (1–26) | 90 | ,, | 113 | 118 |
| ,, (27–42) | ,, (27–42) | 91 | ,, | 114 (1–9) | 119 |
| 86 | 87 | 92 | ,, | ,, (10–52) | 120 |
| 87 | 88 | 93 | ,, | 115 | 121 |
| 88 | 89 | 94 | ,, | 116 | 122 |
| 89 | 90 | 95 | ,, | 117 | 123 |
| 90 (1–22) | 91 | 96 | ,, | 118 | 124 |

## ĀŚRAMAVĀSIKA PARVAN.

| | | | | | |
|---|---|---|---|---|---|
| 1 | 1 | 1 | 4 | 5 | 6 |
| 2 | 2 | 2 | 5 | 6 | 7 |
| 3 (1–15½) | 3 (1–17) | 3 | 6 | 7 | 8 |
| ,,(16½-40) | ,, (18–40) | 4 | 7 | 8 | 9 |
| ,, (41–87) | 4 | 5 | 8 | 9 | 10 |

| Poona Edition with Bhavadipa Chapter. | Kumbakonam Edition Chapter. | Southern Recension Chapter. | Poona Edition with Bhavadipa Chapter. | Kumbakonam Edition Chapter. | Southern Recension Chapter. |
|---|---|---|---|---|---|
| 9 | 10 | 11 | 25 | 27 | 28 |
| 10 | 11 | 12 | 26 | 28 | 29 |
| 11 | 12 | 13 | 27 | 29 | 30 |
| 12 | 13 | 14 | 28 | 30 | 31 |
| 13 | 14 | 15 | 29 (1–34) | 31 (1–37) | 32 |
| 14 | 15 | 16 | ,, (35–52) | ,, (38–56) | 33 |
| 15 | 16 | 17 | 30 | 32 | 34 |
| 16 | 17 | 18 | 31 | 33 | 35 |
| 17 | 18 | 19 | 32 | 34 | 36 |
| 18 | 19 | 20 | 33 | 35 | 37 |
| 19 | 20 | 21 | 34 | 36 | 38 |
| 20 (1–22) | 21 | 22 | 35 | 37 | 39 |
| ,, (23–38) | 22 | 23 | 36 | 38 | 40 |
| 21 | 23 | 24 | 37 | 39 | 41 |
| 22 | 24 | 25 | 38 | 40 | 42 (1–20½) |
| 23 | 25 | 26 | 39 | 41 | ,,(21½–47½) |
| 24 | 26 | 27 | | | |

## MAUSALA PARVAN.

| | | | | | |
|---|---|---|---|---|---|
| 1 (1–11) | 1 | 1 (1–12) | 5 | 6 | 5 |
| ,, (12–31) | 2 | ,, 13–31½) | 6 | 7 | 6 |
| 2 | 3 | 2 | 7 | 8 | 7 |
| 3 | 4 | 3 | 8 | 9 | 8 |
| 4 | 5 | 4 | | | |

## MĀHAPRASTHĀNIKA PARVAN.

| | | | | | |
|---|---|---|---|---|---|
| 1 | 1 | 1 | 3 | 3 | 3 |
| 2 | 2 | 2 | | | |

## SVARGĀROHANA PARVAN.

| | | | | | |
|---|---|---|---|---|---|
| 1 | 1 | 1 | 4 | 4 | 4 |
| 2 | 2 | 2 | 5 | 5 | 5 |
| 3 | 3 | 3 | | | |

## III

It will be observed that the Āśvamedhika Parvan consists of two sub-Parvans—the Āśvamedha Parvan and the Anugītā Parvan. From an examination of the contents of these two sub-Parvans, it will be noticed that any direct reference to the horse-sacrifice, etc. occurs only after the end of the Anugītā proper, *i.e.*, from the fifty-fifth chapter onwards, (see foot-note to p. 215). Thus, from the point of view of the subject-matter, the Anugītā Parvan really consists of three sections—Anugītā proper, from chapter 17 to chapter 54, Āśvamedha Parvaśeṣa, from chapter 55 to chapter 100, and the Vaiṣṇavadharmaśāstra, from chapter 101 to chapter 124. This classification is clearly brought out in the Table of Contents in Sanskrit, prefixed to this volume.

## IV

We have already referred to the fact that the number of Adhyāyās in the Āśvamedhika Parvan according to our printed Text comes only to 124, whereas it should be 133 according to the enumeration of the Anukramaṇikādhyāya of the Southern Recension. A careful examination of the Text suggests that, even in our present edition, nine more chapters could easily be obtained by a more rational division of chapters, if manuscript evidence is set aside and if rational considerations of chapter-formation alone are taken into account. In eight of the existing chapters, two or more different sets of subject-matter are brought together under one chapter by the manuscripts, though, for a rational division according to subject-matter, each set of ideas should have been given under a separate chapter. Such instances occur in the following chapters:—

| | | | | | |
|---|---|---|---|---|---|
| 1 | Chapter | 102— | stanzas | 1—39 | 1 |
| | | | ,, | 40—48 | 2 |
| 2 | ,, | 104— | ,, | 1—40 | 3 |
| | | | ,, | 41—65 | 4 |
| 3 | ,, | 109— | ,, | I—17½ | 5 |
| | | | ,, | 18½-95½ | 6 |
| | ,, | | ,, | 96½-121½ | 7 |

| | | | | | |
|---|---|---|---|---|---|
| 4 | ,, | 111— | ,, | 1—73 | 8 |
| | | | ,, | 74—113 | 9 |
| 5 | ,, | 112— | ,, | 1—9 | 10 |
| | | | ,, | 10—37½ | 11 |
| 6 | ,, | 114— | ,, | 1—25½ | 12 |
| | | | ,, | 26½–39½ | 13 |
| 7 | ,, | 115— | ,, | 1—35½ | 14 |
| | | | ,, | 36–67½ | 15 |
| 8 | ,, | 121— | ,, | 1—47½ | 16 |
| | | | ,, | 48½–70½ | 17 |

If the above classification of assigning a separate chapter to each set of ideas is given effect to, nine more chapters will result, thus bringing the total number of chapters for the Āśvamedhika Parvan to the declared number 133. We have not carried out the above suggestion in our edition of the text, as we have been scrupulously following only the evidences of the Mss. material and as our editorial maxim has always been नामूलं लिख्यते किञ्चित्.

Th Presidency College,
Madras.
10—5—1933.

P. P. S. SASTRI.

॥ श्रीरस्तु ॥

# महाभारतस्य आश्वमेधिकपर्व

तत्र

## ॥ विषयानुक्रमणिका ॥

### अश्वमेधपर्व


| अध्यायः | | पृष्ठम् |
|---|---|---|
| १ | धृतराष्ट्रेण गङ्गायां भीष्मायोदकदानानन्तरं बन्धुशोकविषण्णं युधिष्ठिरं प्रति समाश्वासनम् ... | १ |
| | धृतराष्ट्रेण युधिष्ठिरं प्रति स्वस्य विदुरवचनानादरेण एतादृशानर्थप्राप्तिकथनम् ... | २ |
| २ | युधिष्ठिरस्य धृतराष्ट्रेण समाश्वासनेऽपि तूष्णीमवस्थानेन पुनः कृष्णेन परिसान्त्वनम् ... | ४ |
| | युधिष्ठिरे पुनर्भीष्मद्रोणकर्णमारणानुस्मरणविषादेनारण्यगमनाय कृष्णानुज्ञानमाकाङ्क्षमाणे पुनस्तस्य व्यासेन समाश्वासनम् ... | ५ |
| ३ | व्यासेन युधिष्ठिराय पुरुषकर्मणामीश्वरप्रेरणायत्ततया दोषानापादकत्वं कथयित्वा दोषाभ्युपगमनेऽपि पापापनोदनायाश्वमेधादिविधानम् ... | ७ |
| | युधिष्ठिरेण व्यासाय अश्वमेधाहरणाय तावद्द्रव्याभावनिवेदनम् ... | ८ |
| | व्यासेन युधिष्ठिरस्य हिमालये विद्यमानमरुत्तयागावशिष्टद्रव्यानयनेनाश्वमेधकरणचोदना ... | ९ |
| ४ | व्यासेन युधिष्ठिराय संवर्तमरुत्तीयोपाख्यानकथनारम्भः ... | १० |
| | व्यासेन युधिष्ठिराय मरुत्तस्य वंशपरम्पराकथनम् ... | ११ |
| | व्यासेन युधिष्ठिराय अविक्षितः करन्धम इति नामप्राप्तिकथनम् ... | १२ |

| अध्यायः | | पुटम् |
|---|---|---|
| | मरुत्तेन राज्ञा हिमवदुत्तरपार्श्वे सौवर्णैरेव कुण्डभाण्डा-द्युपकरणैर्यज्ञारम्भः ... | १३ |
| ५ | अङ्गिरसः पुत्रेण संवर्तेनाकारणवैरिणः स्वाग्रजन्मनः बृहस्पतेरुपद्रवासहनेन सर्वस्वत्यागपूर्वकमरण्य-प्रवेशः ... | १५ |
| | इन्द्रेण स्वातिशायिनि मरुत्ते राजनि स्पर्धया बृहस्पति-साविध्येन ततोऽप्यतिशयलिप्सया मरुत्तपुरो-हितस्य बृहस्पतेर्भेदोपायेन वशीकरणम् ... | १६ |
| | बृहस्पतिनेन्द्राय स्वेन मरुत्तस्ययाजनप्रतिज्ञानम् ... | १७ |
| ६ | बृहस्पतिना इन्द्रे स्वेन मरुत्तस्ययाजनप्रतिज्ञानश्रवणा-मर्षिणा मरुत्तेन स्वयाजनप्रार्थने तत्प्रत्याख्यानम् ... | १८ |
| | मरुत्तस्य बृहस्पतिसकाशात् प्रतिनिवर्तने मध्येमार्गं नारदेन समागमः ... | १९ |
| | मरुत्तेन नारदचोदनया वाराणसीद्वारे स्वेन स्थापित-कुणपावलोकनेन पलायमानस्य संवर्तस्यानुगमनम्... | २० |
| | संवर्तेन मरुत्तस्य निवर्तनाय पांसुकर्दमष्ठीवनादिप्रक्षेपे-ऽप्यनिवर्तमानं तमवलोक्य विजने न्यग्रोधमूले समुपवेशः ... | २२ |
| ७ | संवर्तमरुत्तसंवादः ... | २३ |
| | संवर्तेन मरुत्ताय समयबन्धनपूर्वकं याजनप्रतिज्ञानम् ... | २५ |
| ८ | संवर्तेन मरुत्ताय हिमवत्सन्निहिते मुञ्जवति गिरौ महा-देवस्य सन्निधानेन स्वोक्तस्तोत्रेण तं स्तुत्वा तत्प्र-सादनेन यागाय तत्रत्यबहुसुवर्णाहरणचोदना ... | २७ |
| | मरुत्तेन महादेवं प्रसाद्य बहुद्रव्याहरणेन शिल्पिभिः यागोपयोगिभाण्डनिर्माणम् ... | ३२ |
| | इन्द्रेण संवर्तस्य मरुत्ताय यागकरणप्रतिज्ञाश्रवणनिर्वि-ण्णस्य बृहस्पतेस्समीपं प्रत्यागमनम् ... | ,, |
| ९ | बृहस्पतिना इन्द्राय स्वानुजेन संवर्तेन मरुत्तस्य याजन-विघटनचोदना ... | ३४ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | इन्द्रप्रेरितेनाग्निना मरुत्तमेत्य याजनाय बृहस्पतिस्वीकरणरूपेन्द्रसन्देशकथनम् ... | ३५ |
| | मरुत्तेनाग्न्युक्तेन्द्रसन्देशप्रत्याख्यानम् ... | ३६ |
| | अग्निना पुनरिन्द्रमेत्य मरुत्तेन स्वसन्देशापरिग्रहनिवेदनम् ... | ३८ |
| | इन्द्रेण पुनर्मरुत्ते स्वसन्देशनिवेदनचोदनम् ... | ३९ |
| | मरुत्तसंवर्तविषये अग्नीन्द्रसंवादः ... | ,, |
| | संवर्ततपोभयादग्निना मरुत्ते इन्द्रसन्देशनिवेदनानङ्गीकरणम् ... | ४२ |
| १० | इन्द्रेण धृतराष्ट्रनामगन्धर्वराजमुखाद् याजनाय बृहस्पतिवरणं चोदितेनापि मरुत्तेन तदनङ्गीकारे इन्द्रस्य मरुत्तयज्ञविघाताय साटोपं यज्ञवाटं प्रत्यागमनम् ... | ४३ |
| | संवर्तेन मरुत्तप्रार्थनया विद्याबलेनेन्द्रादीनां स्तम्भनम् ... | ४५ |
| | इन्द्रेण संवर्तानुवर्तनेन सभानिर्मापणादिना यज्ञं निर्वर्त्य देवैस्सह हविर्ग्रहणम् ... | ४८ |
| | व्यासेन युधिष्ठिराय मरुत्तयज्ञप्रवृत्तिप्रकारं कथयित्वा तच्छिष्टद्रव्याहरणेनाश्वमेधकरणविधानम् ... | ५१ |
| ११ | कृष्णेन युधिष्ठिराय शरीरस्थशत्रुजयार्थमिन्द्रवृत्रासुरयुद्धप्रकारकथनम् ... | ५२ |
| १२ | कृष्णेन युधिष्ठिराय शारीरमानसभेदेन व्याधेर्द्वैविध्यमभिधाय तत्परिहारोपायकथनम् ... | ५५ |
| १३ | कृष्णेन युधिष्ठिराय अहङ्कारममकारनिवृत्तेरावश्यकत्वकथनम् — | ५७ |
| | कामस्य शक्तिकथनेन दुर्जयत्वमुक्त्वा तज्जयोपायकथनम् ... | ५९ |
| १४ | व्यासनारदकृष्णादिभिर्बन्धुजननिधनपरिशोचिनो युधिष्ठिरस्य समाश्वासनेन ऋषीणां तत्रैवान्तर्धानम् ... | ६१ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | युधिष्ठिरेण भीष्मादीनामौर्ध्वदैहिकं कृत्वा हास्तिन-नगरप्रवेशः ... | ६३ |
| १५ | युधिष्ठिरस्य प्रजापालनकाले प्रजादीनामभ्युदयप्रकार-वर्णनम् ... | ६४ |
| १६ | कृष्णार्जुनयोः कुरुविजयानन्तरं हास्तिनपुरे विहार-वर्णनम् ... | ६८ |
| | कृष्णेनार्जुनाय युधिष्ठिरे स्वस्य निजनगरजिगमिषा-निवेदनार्थोक्तिः ... | ६९ |


## अनुगीतापर्व


| | | |
|---|---|---|
| १७ | अर्जुनेन कृष्णमुद्दिश्य पूर्वोपदिष्टगीतार्थस्य विस्मरण-मुक्त्वा पुनस्तदुपदेशप्रार्थना ... | ७२ |
| | कृष्णेनार्जुनाय स्वस्मै ब्राह्मणोक्तसिद्धकाश्यपसंवा-दानुवादः ... | ७३ |
| १८ | ब्राह्मणेन कृष्णाय प्राणिनां जननमरणादिप्रतिपादक-सिद्धकाश्यपसंवादानुवादः ... | ७८ |
| १९ | ब्राह्मणेन कृष्णाय जीवस्य गर्भप्रवेशादिप्रतिपादक-सिद्धकाश्यपसंवादानुवादः ... | ८४ |
| २० | कृष्णेनार्जुनाय मोक्षसाधनादिप्रतिपादकसिद्धकाश्यप-संवादानुवादः ... | ८९ |
| | कृष्णेनार्जुनाय योगशास्त्रोपदेशः ... | ९१ |
| २१ | कृष्णेनार्जुनायानुगीताया रहस्यत्वोक्तिः ... | ९५ |
| २२ | सङ्क्षेपेण परमात्मस्वरूपकथनम् ... | ९८ |
| | कृष्णेनार्जुनाय भूतप्राणादिसृष्ट्यादिप्रतिपादक ब्राह्मण-दम्पतिसंवादानुवादः ... | ९९ |
| २३ | कृष्णेनार्जुनाय गर्भोत्पत्तिक्रमस्य वाङ्मनसयोरुत्पत्ति-क्रमस्य तयोश्श्रेष्ठत्वाश्रेष्ठत्वयोः प्रतिपादकब्राह्मण-दम्पतिसंवादानुवादः ... | १०१ |

अध्यायः पृष्ठम्

२४ कृष्णेनार्जुनाय घ्राणादीन्द्रियाणां पृथग्गुणप्रतिपादक-ब्राह्मणदम्पतिसंवादानुवादः ... १०५

२५ कृष्णेनार्जुनाय मनसो बाह्येन्द्रियाणां च विवादप्रतिपादकसंवादानुवादः ... १०७

२६ कृष्णेनार्जुनाय प्राणापानादीनां स्वस्वश्रैष्ठ्यविषयविवादादिप्रतिपादक ब्राह्मणदम्पतिसंवादानुवादः ... १०९

२७ कृष्णेनार्जुनाय ब्राह्मणेन ब्राह्मणीं प्रत्युक्तप्राणापानादिसृष्ट्यादिप्रतिपादकनारददेवतसंवादानुवादः ... ११४

२८ कृष्णेनार्जुनाय कर्तृकर्मादिप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः ... ११७

२९ कृष्णेनार्जुनाय हृष्छ्मश्रुस्य परब्रह्मोपदेशे देवर्षिपन्नगादीनां स्वस्वयोग्यतानुसारेण नानार्थावगमप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः ... ११९

३० कृष्णेनार्जुनाय विद्याब्रह्मणोररण्यत्वरूपणपरब्राह्मणदम्पतिसंवादानुवादः ... १२२

३१ कृष्णेनार्जुनाय यागीयहिंसाया अधर्म्यत्वाभावप्रतिपादकाध्वर्युयतिसंवादानुवादः ... १२६

३२ ब्राह्मणेन स्वभार्यां प्रति हिंसाया अकर्तव्यत्वे महर्षिवचसां प्रमाणीकरणोपयोगितया परशुरामचरित्रकथनारम्भः ... १३०

कार्तवीर्यार्जुनेन दर्पात् समुद्रस्यास्त्रैरर्दनेन समुद्रेणापि परशुरामसुहृद्यार्जुनस्य गमनचोदनम् ... १३१

परशुरामेण कार्तवीर्यार्जुनस्य हननम् ... १३२

कार्तवीर्यार्जुनानुयायिभिर्जमदग्नेर्हननम् ... ,,

परशुरामेण स्वपितृहननक्रुद्धेन त्रिस्सप्तकृत्वः सर्वक्षत्रियहनने तत्पितृभी रामस्य परिसान्त्वनप्रयतनम् ... १३३

३३ परशुरामाय तत्पितृभिः क्षत्रियवधान्निवर्तनाय अलर्काख्यराजोपाख्यानकथनम् ... १३४

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | परशुरामेणाल्पकंराजोपाख्यानश्रवणाद्धिंसातो निवृत्त्य तपश्चरणम् ... | १३८ |
| ३४ | ब्राह्मणेन स्वभार्यां प्रति कामक्रोधादिपरित्यागपूर्वक-भगवदवबोधस्य परमपुरुषार्थसाधनतावबोधका-म्बरीषगीतगाथाकथनम् ... | १३९ |
| ३५ | ब्राह्मणेन स्वभार्यायै ममतावर्जनस्य पुरुषार्थसाधन-तायां दृष्टान्ततया ब्राह्मणजनकसंवादानुवादः ... | १४० |
| ३६ | ब्राह्मणेन स्वभार्यायै स्वमाहात्म्यप्रकाशनम् ... | १४४ |
| ३७ | कृष्णेनार्जुनाय ब्राह्मणीब्राह्मणशब्दनिर्दिष्टयोः क्रमेण बुद्धिमनस्त्वकथनम् ... | १४५ |
| ३८ | कृष्णेनार्जुनाय परब्रह्मस्वरूपतत्प्राप्तिसाधनादिप्रतिपादक-गुरुशिष्यसंवादानुवादः ... | १४७ |
| ३९ | ब्रह्मणा काश्यपादिमहर्षीन् प्रति तमोगुणकार्यनिरूपणम् | १५३ |
| ४० | ब्रह्मणा महर्षीन् प्रति रजोगुणकार्यनिरूपणम् ... | १५७ |
| ४१ | ब्रह्मणा महर्षीनुद्दिश्य सत्वगुणकार्यनिरूपणम् ... | १६० |
| ४२ | ब्रह्मणा महर्षीनुद्दिश्य सत्वादिगुणत्रयनिरूपणम् ... | १६२ |
| ४३ | ब्रह्मणा महर्षीनुद्दिश्य महत्तत्त्वनिरूपणम् ... | १६५ |
| ४४ | ब्रह्मणा महर्षीनुद्दिश्य अहङ्कारतत्त्वनिरूपणम् ... | १६७ |
| ४५ | ब्रह्मणा महर्षिभ्यः अहङ्कारतत्त्वान्महाभूतादिसृष्टिप्रकार-कथनम् ... | १६८ |
| | परमात्मदर्शनोपायतत्फलकथनम् ... | १७३ |
| ४६ | ब्रह्मणा महर्षिभ्यो मनुष्येषु क्षत्रियाणां रजोगुणकार्यबल-प्रधानतया तेषां सत्वप्रधानब्राह्मणरक्षणस्य कर्तव्य-त्वकथनप्रसङ्गेन तत्तज्जातिश्रेष्ठवस्तुकथनम् ... | १७६ |
| | ब्रह्मणा महर्षिभ्योऽहिंसादिरूपधर्मादिप्रतिपादनम् ... | १७८ |
| ४७ | ब्रह्मणा महर्षीनुद्दिश्य स्वस्वजातिषु श्रेष्ठवस्तूनि प्रतिपाद्य ज्ञानस्याविनाशित्वकथनेन तस्यैव श्रेयस्साधनत्वोक्तिः | १८१ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| ४८ | ब्रह्मणा महर्षिभ्यश्शरीरस्य कालचक्रवत् स्थित्या हेयत्व-ज्ञानेन समीचीनगतिप्राप्तिमभिधाय गृहस्थधर्मा-नुष्ठानस्य श्रेयस्साधनत्वोक्तिः ... | १८४ |
| ४९ | ब्रह्मचारिवनस्थधर्मान् निरूप्य तदनुष्ठानस्य श्रेयस्सा-धनत्वोक्तिः ... | १८७ |
| | सन्न्यासिधर्मनिरूपणम् ... | १८९ |
| ५० | सन्न्यासज्ञानतपसां परमपुरुषार्थसाधनत्वोक्तिः ... | १९४ |
| ५१ | ब्रह्मणा महर्षिभ्यो योगिनां चातुर्विद्यादिकथनपूर्वकं मुमुक्षुवेद्यनानार्थकथनम् ... | १९६ |
| ५२ | महर्षिभिर्ब्रह्माणं प्रति धर्मविषये नानाविधवादिविप्रति-पत्तिमभिधाय तत्प्रयुक्तस्वीयसंशयनिवर्तनप्रार्थना | १९८ |
| ५३ | ब्रह्मणा महर्षीनुद्दिश्य धर्मप्रदर्शनपूर्वकं तदनुष्ठानसहकृत-ज्ञानस्यैव दृष्टान्तप्रदर्शनेन परमपुरुषार्थसाधनत्वोक्तिः | २०१ |
| | क्षेत्रक्षेत्रज्ञसम्बन्धकथनम् ... | २०२ |
| | मूलप्रकृतिप्रभृति पृथिव्यादिभूतगुणादिप्रतिपादनम् ... | २०५ |
| ५४ | क्षेत्रस्वरूपज्ञानस्यावश्यकत्वकथनम् ... | २०८ |
| | तपः प्रशंसनम् ... | २१० |
| | कृष्णेनार्जुनाय मुक्त्युपायप्रतिपादकगुरुशिष्यसंवादानु-वादं समाप्य स्वस्य निजनगरव्रिगमिषानिवेदनम् | २११ |
| | अर्जुनेन कृष्णं प्रति युधिष्ठिराभ्यनुज्ञानसम्पादनपूर्वक-गमनानुज्ञानम् ... | २१४ |


॥ अनुगीता समाप्ता ॥

## अश्वमेधपर्वशेषः


| | | |
|---|---|---|
| ५५ | अनुगीतोपदेशानन्तरं कृष्णार्जुनाभ्यां हास्तिनपुरमुद्दि-श्य प्रस्थानम् ... | २१५ |
| | अर्जुनेन कृष्णं स्तुत्वा व्यासनारदादिभ्यः स्वस्य कृष्ण-याथात्म्याधिगमनिवेदनम् ... | २१६ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| ५५ | कृष्णस्यार्जुनेन सह हास्तिनपुरमेत्य धृतराष्ट्रादिभ्यः पादाभिवादनम् ... | २१८ |
| | कृष्णस्य युधिष्ठिरानुमत्या सुभद्रामानीय सात्यकिना सह द्वारकां प्रति प्रस्थानम् ... | २२० |
| ५६ | कृष्णस्य हास्तिनपुराद् द्वारकागमनकाले मध्येमार्गमुदङ्केन सह संवादः ... | २२४ |
| | उदङ्केन कौरवादिविनाशे कृष्णोपेक्षाया एव हेतुत्वधिया कृष्णाय शापदानोद्यमः ... | २२५ |
| | कृष्णस्य उदङ्काय स्वमाहात्म्यकथनाय तस्यानुनयः ... | २२७ |
| ५७ | कृष्णेनोदङ्काय स्वमाहात्म्यं प्रकाश्य कुरूणां स्ववचनातिक्रमणादिरूपस्वापराधेनैव निधनोक्तिः ... | २२८ |
| ५८ | कृष्णेनोदङ्कप्रार्थनया तस्मै विश्वरूपप्रदर्शनम् ... | २३१ |
| | उदङ्केन कृष्णस्य विश्वरूपदर्शनेन स्तुतिः ... | २३२ |
| | कृष्णेनोदङ्काय पिपासाकाले जललाभरूपवरदानम् ... | २३३ |
| | कृष्णेनोदङ्कायामृतदानं चोदितेनेन्द्रेण कदाचिद्वनमध्ये पिपासुमुदङ्कं प्रति चण्डालरूपेण जलस्वीकारप्रार्थने उदङ्केन चण्डालत्वबुद्ध्या तदधिक्षेपः ... | ,, |
| | उदङ्कदर्शनकाल एव चण्डालवेषस्येन्द्रस्य तिरोधानेन परितप्यमानमुदङ्कं प्रति तत्र सन्निहितेन कृष्णेन इन्द्रकृतवञ्चनां निवेद्य मरुप्रदेशे पिपासाकाले उदङ्कमेघा इति ख्याता मेघाः प्रादुर्भविष्यन्तीति वरदानम् ... | २३४ |
| ५९ | उदङ्कोपाख्यानस्य जनमेजयाय वैशम्पायनेन कथनारम्भः | २३६ |
| | उदङ्ककृतपरिचर्याविशेषतुष्टेन गौतमेन तस्मै प्रीत्यतिशयेन चिरादपि गृहगमनार्थानुज्ञानम् ... | २३७ |
| | उदङ्केन कदाचन गौतमशासनेन काष्ठभाराहरणे काष्ठलग्नजरापलितनिजकेशावलोकनेन परिदेवनम् ... | ,, |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | उदङ्केन गुरवे निजरोदनकारणनिवेदने गुरुणा तस्मै यौवनं प्रदाय निजकन्याया दानम् ... | २३८ |
| | उदङ्केन गुरुदक्षिणायै गुरुपत्नीप्रार्थने तया निर्बन्धकुपितया सौदासपत्नीविधृतकुण्डलाहरणाय प्रेरणेन सौदाससमीपगमनम् ... | २४० |
| ६० | सौदासेनोदङ्कभक्षणोद्यमे उदङ्केन पुनः प्रत्यागमनं प्रतिज्ञाय सौदासं प्रति गुरुपत्न्यर्थं कुण्डलयाचनम् ... | २४१ |
| | उदङ्केन सौदासवचसा तत्पत्न्याः कुण्डलयाचने तया तस्मै मणिकुण्डलमहिमादिकमुक्त्वा राज्ञाभिज्ञानानयनचोदना ... | २४४ |
| ६१ | उदङ्केन सौदासं प्रति अभिज्ञानयाचने तेन तस्य दानम्... | २४६ |
| | उदङ्केन छलेन स्वप्रत्यागमनाय सौदासस्य प्रश्नः ... | २४७ |
| | सौदासेनोदङ्काय अनागमनमेव तव श्रेय इत्युक्तिः ... | २४८ |
| | उदङ्केनाभिज्ञाननिवेदनेन मदयन्तीतः कुण्डले परिगृह्य प्रतिनिवर्तनम् ... | ,, |
| | उदङ्केन क्षुधाविष्टेन मध्येमार्गं बिल्वतरुमारुह्य शाखायां कृष्णाजिनस्थे कुण्डले आसज्ज्य अवस्थाने विशीर्णबन्धनस्य कृष्णाजिनस्य महीं पतनम् ... | ,, |
| | उदङ्काहृतमणिकुण्डले उरगवरेण केनचित् अपहृत्य नागलोकगमनम् ... | २४९ |
| | उदङ्केनेन्द्रसाहाय्याद्भूविदारणेन नागलोकं गत्वा तक्षाश्ववचसा तदपानदेशधमनम् ... | २५० |
| | उदङ्कायाश्वापानधमनजातधूमपटलपीडितैस्सर्पैः कुण्डलप्रत्यर्पणम् ... | २५२ |
| | उदङ्केन गुरुपत्न्यै कुण्डलप्रदानम् ... | २५३ |
| ६२ | कृष्णेनोदङ्काय वरदानात् परं द्वारकागमने मध्ये रैवतकपर्वतप्रवेशः ... | २५४ |
| | रैवतकोत्सववर्णनम् ... | ,, |
| | कृष्णेन स्वभवनमागत्य मातापित्रोरभिवादनम् ... | २५६ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| ६३ | कृष्णेन वसुदेवं प्रति कुरुपाण्डवयुद्धप्रकारकथनम् ... | २५७ |
| ६४ | कृष्णेन सभार्यां वसुदेवायाभिमन्युनिधनाकथनेन सुभद्रया कृष्णं प्रत्यभिमन्युनिधनं परिचोद्य शोकाद्भुवि पतनम् ... | २६२ |
| | वसुदेवस्याभिमन्युमरणेन विलापः ... | २६३ |
| | कृष्णेन वसुदेवस्य परिसान्त्वनम् ... | २६४ |
| ६५ | वसुदेवादिभिरभिमन्यवे श्राद्धदानम् ... | २६७ |
| | व्यासेन हास्तिनपुरमेत्य कुन्त्युत्तरादिस्त्रियः परिसान्त्व्य युधिष्ठिरमश्वमेधकरणाय सज्जीव्य पुनरन्तर्धानम् ... | २६८ |
| ६६ | युधिष्ठिरेण व्यासाज्ञया भीमादिभिस्सहालोच्य यज्ञार्थं धनाहरणाय भ्रात्रादिभिस्सह हिमवत्पार्श्वं प्रति प्रस्थानम् | २७० |
| ६७ | युधिष्ठिरेण हिमवद्गिरिमेत्य सेनानिवेशनम् ... | २७४ |
| | युधिष्ठिरस्य हिमालये ब्राह्मणचोदनया तैस्सहोपवासादिव्रताचरणपूर्वकं निशायापनम् ... | २७५ |
| ६८ | युधिष्ठिरेण विधिवन्नानाबलिहरणादिना सपरिचरमहेश्वरपरितोषणेन विविधकनकभाण्डाहरणेन पुनर्नगराय प्रत्यागमनम् ... | २७७ |
| ६९ | कृष्णेन बलरामसुभद्रादिभिस्सह यज्ञार्थं हास्तिनपुरं प्रत्यागमनम् ... | २८० |
| | परीक्षित उत्तरायां हास्तिनपुरे जननम् ... | २८१ |
| | परीक्षितोऽश्वत्थाम्नेण दाहाजननकाल एव शवभूतस्य उज्जीवनाय कुन्त्यादिभिःश्रीकृष्णप्रार्थना ... | ,, |
| ७० | सुभद्रया श्रीकृष्णस्य माहात्म्यं संस्तूय परीक्षिदुज्जीवनप्रार्थना | २८४ |
| ७१ | कृष्णस्य परीक्षित्सूतिकागृहप्रवेशः ... | २८६ |
| | उत्तरया सूतिकागृहे कृष्णसमीपे बहुधा विलप्य पुत्रोज्जीवनप्रार्थना ... | २८८ |
| ७२ | उत्तरया पुनर्बहुधा विलापः ... | २८९ |
| | कृष्णेन सशपथं संस्पर्शनेन परीक्षितस्समुज्जीवनम् ... | २९१ |
| ७३ | कृष्णेनाभिमन्युसुतस्य सञ्जीवनेन सर्वेषां सन्तोषः ... | २९३ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | कृष्णेनाभिमन्युसुतस्य पदप्रवृत्तिनिमित्तकथनपूर्वकं नामकरणम् ... | २९४ |
| | युधिष्ठिरादीनां हिमालयात् स्वर्णभारानयनेन हास्तिनपुरं प्रत्यागमनश्रवणेन नागरिकैर्नगरस्यालङ्कारः ... | ,, |
| ७४ | युधिष्ठिरादीनां कृष्णादिभिः प्रत्युद्गमनेन स्वर्णभारान् पुरस्कृत्य हास्तिनपुरप्रवेशः ... | २९६ |
| | व्यासेन हास्तिनपुरमेत्य युधिष्ठिरायाश्वमेधं प्रशस्य तत्करणविधानम् ... | २९७ |
| | युधिष्ठिरेणाश्वमेधे कृष्णस्य दीक्षास्वीकरणप्रार्थने कृष्णेन युधिष्ठिरस्यैव दीक्षास्वीकारविधानम् ... | २९८ |
| ७५ | व्यासेन युधिष्ठिरस्य पृथिवीसञ्चाराय मेध्याश्वोत्सर्जनचोदना | ३०० |
| | अर्जुनस्य व्यासानुमत्या मेध्याश्वरक्षणे सन्दिश्य नियोजनम् | ३०१ |
| ७६ | युधिष्ठिरस्याश्वमेधदीक्षा ... | ३०४ |
| | अर्जुनेन युधिष्ठिरनियोगाद् ब्राह्मणैः क्षत्रियैश्च सह प्रथममुत्तरदिश्यश्वसञ्चारणेन रक्षणाय तदनुसरणम् ... | ३०५ |
| ७७ | अर्जुनेन त्रैगर्तानां पराजयः ... | ३०७ |
| ७८ | अर्जुनेन प्राग्ज्योतिषपुरमेत्याश्वरक्षणाय भगदत्तसुतेन वज्रदत्तेन सहायोधनम् ... | ३१२ |
| ७९ | अर्जुनेन भगदत्तात्मजपराजयः ... | ३१४ |
| ८० | अर्जुनेनाश्वानुसरणवशात् सिन्धुदेशं गत्वा सैन्धवैस्सह महदायोधनम् ... | ३१८ |
| | अर्जुनस्य सैन्धवैर्बाणगणैर्विदारणेन मोहगमनेन देवर्ष्यादिभिर्जपादिना तस्य तेजोदीपनम् ... | ३१९ |
| | अर्जुनस्य सैन्धवैस्सह पुनर्युद्धम् ... | ३२१ |
| ८१ | अर्जुनेन सैन्धवानां पराजयः ... | ३२२ |
| | अर्जुनागमनश्रवणमात्रेण जयद्रथसुते मृते दुश्शलायास्वसुतमादाय शमायार्जुनाभिसरणम् ... | ३२५ |
| | अर्जुनेन दुश्शलाप्रार्थनया तस्यां बहुमानेन युद्धादुपरमः | ३२६ |
| | अर्जुनस्य पुनरश्वमेधाश्वानुसरणम् ... | ३२७ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| ८२ | अर्जुनस्य मणलूरुपुरगमनम् ... | ३२८ |
| | अर्जुनेन बभ्रुवाहनस्य पितृभक्त्या विनयेनागतस्य क्षत्र-धर्मपरित्यागजरोषादुपालम्भः ... | ३२९ |
| | बभ्रुवाहनस्यार्जुनकृतमुपालम्भमसहमानया उलूप्या नागलोकादेत्य तस्यार्जुनेन सह युद्धप्रोत्साहनम् ... | ,, |
| | बभ्रुवाहनस्यार्जुनेन सह युद्धम् ... | ३३१ |
| | बभ्रुवाहनेन स्वशरगाढाभिघातेन निपतिते पार्थे पितृ-मारणशोकेन मोहाधिगमः ... | ३३२ |
| | चित्राङ्गदया पतिपुत्रयोर्मोहश्रवणेन रणाजिरमागत्य विलापः ... | ३३३ |
| ८३ | चित्राङ्गदाया मोहाधिगमः ... | ,, |
| | चित्राङ्गदायास्संज्ञोपलम्भेन उलूपीं प्रत्युपालम्भगर्भ-वचनम् ... | ३३४ |
| | चित्राङ्गदाया अर्जुनमुद्दिश्य विलापः ... | ३३५ |
| ८४ | बभ्रुवाहनेन चिरात् संज्ञां प्राप्य आत्मानमुलूपीं चोपा-लभ्य प्रायोपवेशनम् ... | ३३६ |
| ८५ | बभ्रुवाहने प्रायोपविष्टे उलूप्या स्मारणमात्रसन्निहित-सञ्जीवनमणिनाऽर्जुनस्य समुद्बोधनम् ... | ३३९ |
| | अर्जुनस्य नागलोकस्थसञ्जीवनमणिस्पर्शेन संज्ञामुप-लभ्य बभ्रुवाहनं प्रति चित्राङ्गदादीनां रणाङ्गणा-गमनकारणप्रश्नः ... | ३४० |
| | बभ्रुवाहनेनार्जुनं प्रति उलूप्याः प्रश्नकरणचोदना ... | ३४२ |
| | अर्जुनेन उलूप्याः स्त्रीणामपि समराङ्गणागमनकारणप्रश्नः | ,, |
| ८६ | उलूप्याऽर्जुनाय चित्राङ्गदादीनां समराङ्गणागमने कार-णाभिधानम् ... | ३४३ |
| | उलूप्याऽर्जुनाय बभ्रुवाहनेन समरेऽर्जुनस्य पराजये कारणकथनम् ... | ,, |

| अध्यायः | | पृष्ठम |
|---|---|---|
| | बभ्रुवाहनार्जुनसंवादः ... | ३४५ |
| ८७ | अर्जुनेनाश्वानुसरणवशान्मगधदेशगमनम् ... | ३४७ |
| | जरासन्धपौत्रस्य मेघसन्धेः पराजयपूर्वकं तत्र तत्र म्लेच्छादिपराजयः ... | ३४८ |
| ८८ | अर्जुनस्याश्वानुगमनेन दक्षिणदेशगमने तत्र चेदीशितुः शिशुपालात्मजस्य पूजापरिग्रहः ... | ३५१ |
| | अर्जुनस्याश्वानुगमने काशिकोसलादिदेशाधिपतिजयेन द्वारकां गत्वा तत्र वसुदेवेन समागत्य गान्धारदेशगमनम् ... | ,, |
| ८९ | अर्जुनेन शकुनितनयं पराजित्य तत्सेनावमर्दनम् ... | ३५३ |
| | शकुनिभार्ययाऽर्जुनेन स्वसुतवधसम्भावनया रणाङ्गणमेत्यार्जुनस्य प्रसादनम् ... | ३५५ |
| | अर्जुनेन गान्धारीगौरवात् शकुनितनयसमाश्वासनम् ... | ३५६ |
| ९० | अर्जुनस्य चारमुखात् तुरगसञ्चारणेन पुनर्नगरं प्रत्यागमनश्रवणहृष्टस्य युधिष्ठिरस्य निदेशान्नीलेन यज्ञशालादिनिर्मापणम् ... | ३५७ |
| | अश्वमेधयज्ञाय नानादेशेभ्यः ब्राह्मणक्षत्रियाद्यानयनं तेषां यथार्हं पूजनं च ... | ३५९ |
| ९१ | अश्वमेधसमृद्धिवर्णनम् ... | ३६० |
| ९२ | कृष्णेन बलरामादिभिस्सह युधिष्ठिराश्वमेधाय हास्तिनपुरायागमनम् ... | ३६३ |
| | कृष्णेन युधिष्ठिराय नानादेशेभ्य आगमिष्यतां राज्ञामप्रमादेन यथोचितपूजाया मणलूरादागमिष्यतो बभ्रुवाहनस्य सम्माननस्य च कर्तव्यताप्रतिपादकार्जुनसन्देशनिवेदनम् ... | ३६४ |
| ९३ | युधिष्ठिरेण पाण्डवेभ्यश्चतुर्भ्योऽर्जुनस्यैव विशेषतो युद्धपरिक्लेशादिसूचकशारीरलक्षणप्रश्ने कृष्णेन तं प्रति तत्कथनम् ... | ३६६ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | अर्जुनस्य मेघ्याश्वेन सह पुनर्नगरं प्रत्यागमनम् ... | ३६७ |
| ९४ | बभ्रुवाहनेनोलूपीचित्राङ्गदाभ्यां सह यागदिदृक्षया हास्तिनपुरागमनम् ... | ३६९ |
| | युधिष्ठिरेण व्यासाज्ञया ऋत्विग्भिस्सहाश्वमेधोपक्रमः ... | ३७१ |
| | अश्वमेधप्रक्रियावर्णनम् ... | ३७२ |
| ९५ | युधिष्ठिरेणाश्वमेधसमापनम् ... | ३७५ |
| | युधिष्ठिरेण ऋत्विग्भ्यो दक्षिणादानम् ... | ३७६ |
| | व्यासेन युधिष्ठिरदत्तयागदक्षिणायाः कुन्त्यै प्रीत्या दानम् | ३७८ |
| | युधिष्ठिरेण राज्ञां यथोचितं सम्माननेन स्वस्वदेशान् प्रति प्रस्थापनम् ... | ३७९ |
| ९६ | नकुलाख्यानकथनारम्भः ... | ३८० |
| | अश्वमेधावसाने बिलाच्चिस्सृतेन कनकपार्श्वेन केन चिन्नकुलेन सदस्यान् प्रति उञ्छवृत्तिब्राह्मणस्य सक्तुप्रस्थदानं प्रशस्य युधिष्ठिराश्वमेधगर्हणम् ... | ३८१ |
| | युधिष्ठिराश्वमेधसदस्यचोदनया नकुलेन उञ्छवृत्तिब्राह्मणस्य सक्तुप्रस्थदानकथनोपक्रमः ... | ३८२ |
| ९७ | नकुलेन युधिष्ठिरयागसदस्यब्राह्मणेभ्यस्सकुटुम्बस्योञ्छवृत्तेर्ब्राह्मणस्य धर्मपुरुषाय सक्तुप्रस्थदानेन स्वर्गगमनमभिधाय तेनैव स्वस्यापि शरीरार्धं काञ्चनीकृतं युधिष्ठिरयज्ञेन नाहं तथा कृत इत्युक्त्वा नकुलस्य तत्रैवान्तर्धानम् ... | ३८३ |
| ९८ | जनमेजयेन वैशम्पायनं प्रति नकुलस्य यज्ञनिन्दाकारणप्रश्नः ... | ३९५ |
| | यज्ञस्य पशुहिंसाहेतुत्वेन स्वर्गस्य सत्यदानतपोभिरेव सिध्या यज्ञस्य नातिप्रशस्ततरत्वमिति नकुलाभिप्रायवर्णनम् ... | ३९६ |
| ९९ | वैशम्पायनेन जनमेजयाय पशुहिंसां विनैव दानध्यानादिभिरेव यज्ञफलसंसिद्धौ दृष्टान्ततयाऽगस्त्ययज्ञप्रकारकथनम् ... | ४०० |

अध्यायः पृष्ठम्

१०० नकुलस्य जमदग्निक्रोधरूपत्वस्य पितृदेवताशापान्नकुलत्वप्राप्तेर्युधिष्ठिरयागे धर्मक्षेपेण निजरूपप्राप्तेश्च कथनम् ... ४०५

वैष्णवधर्मशास्त्रम्

१०१ युधिष्ठिरेण कृष्णस्य वैष्णवधर्मान् प्रशस्य तत्कथनप्रार्थना ४०७
वैष्णवधर्मशुश्रूषया वसिष्ठादिभिः कृष्णसमीपोपसर्पणम् ४०९
युधिष्ठिरेण कृष्णायानेकेषां धर्माणां श्रवणमुक्त्वा सर्वेभ्यो धर्मेभ्यस्तन्मुखोद्गतस्य धर्मस्य श्रैष्ठ्यात् कथनप्रार्थना ,,
कृष्णेन युधिष्ठिरादिभ्यो वैष्णवधर्मप्रशंसनं विधाय स्वमहिमानुबोधनम् ... ४११

१०२ कृष्णयुधिष्ठिरयोर्धर्मसंवादं भाविनं ज्ञात्वा देवब्रह्मर्ष्यादीनामागमनम् ... ४१७
युधिष्ठिरेण श्रीकृष्णस्य चतुर्णां वर्णानां यमालये केनापराधेन बन्ध इति प्रश्नः ... ४१८
वर्णचतुष्टयधर्मनिरूपणम् ... ४१९
शुभाशुभयोस्सदृष्टान्तप्रदर्शनं वृद्धिक्षयनिरूपणम् ... ४२२

१०३ जन्मदानजीवितानां वैयर्थ्यापादकाधर्मकथनम् ... ४२३
दानकालतत्फलानुभवकालकथनम् ... ४२८
सात्विकराजसतामसदानकथनं तेषां गतिनिरूपणं च ४२९
भगवद्भक्तपूजनकथनम् ... ४३१
अष्टाक्षरमन्त्रजपविधानम् ... ,,
दैवे कर्मणि ब्राह्मणपरीक्षानिषेधः ... ४३२
ब्राह्मणावमाननिषेधः ... ,,
ब्राह्मणप्रशंसनम् ... ४३३
भगवद्भक्तप्रशंसनम् ... ४३४

१०४ बीजयोन्योश्शुक्रशुद्धिनिरूपणम् ... ४३५
गायत्रीमहिमानुवर्णनम् ... ४३८

| अध्यायः | | | पृष्ठम् |
|---|---|---|---|
| | ब्राह्मणपूजने भगवत्पूजनं भवतीति कथनम् | ... | ४४० |
| | ब्राह्मणावमन्तॄणां नरकयातनानुवर्णनम् | ... | ४४१ |
| १०५ | यमलोकस्य मनुष्यलोकस्य च दूरकथनम् | ... | ४४४ |
| | दुष्कृतिनां यमलोकप्राप्तिकथनम् | ... | ४४५ |
| | सुकृतिनां यमलोकप्राप्तिप्रकारकथनम् | ... | ४५१ |
| १०६ | तोयान्नदानफलकथनम् | ... | ४५९ |
| | तोयान्नयोरदाने नरकफलकथनम् | ... | ४६५ |
| | अतिथिपूजनकथनम् | ... | ४६६ |
| | अतिथ्यपूजने दोषकथनम् | ... | ,, |
| | अतिथिपूजनफलकथनम् | ... | ४६९ |
| १०७ | भूदानफलकथनम् | ... | ४७० |
| | भूमेर्गोकर्णमात्रायाः परिमाणप्रतिपादनम् | ... | ४७३ |
| | भूमिहरणे दोषवचनम् | ... | ४७५ |
| | कन्यादानफलोक्तिः | ... | ४७६ |
| | सुवर्णादीनामनेकेषां दानानां फलप्रतिपादनम् | ... | ४७७ |
| | तिलदानोक्तिः | ... | ,, |
| | गोदानकीर्तनम् | ... | ४७८ |
| | शूद्रान्नविरतब्राह्मणस्य पात्रत्वसङ्कीर्तनम् | ... | ४७९ |
| १०८ | वृषभगृहशय्यादिदानप्रशंसनम् | ... | ४८१ |
| | भगवदालयनिर्माणतत्प्रतिष्ठार्चनादिफलप्रशंसनम् | ... | ४८६ |
| | अनेकदानधर्मफलप्रतिपादनम् | ... | ,, |
| | व्रतनियमफलकथनम् | ... | ४९१ |
| १०९ | मरणप्रकारशंसनम् | ... | ४९७ |
| | पञ्चमहायज्ञनिरूपणम् | ... | ,, |
| | स्नानविधिनिरूपणम् | ... | ४९९ |
| | वस्त्रधारणविधिः | ... | ५०१ |
| | माध्याह्निकनिरूपणम् | ... | ५०२ |
| | देवर्षिपितृतर्पणम् | ... | ५०३ |
| | ज्ञानवस्त्रनिष्पीडनम् | ... | ५०४ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| १०९ ब्रह्मयज्ञकथनम् | ... | ५०५ |
| भगवत्पूजायोग्यायोग्यपुष्पविवेचनम् | ... | ५०६ |
| भगवदाराधनक्रमस्य सङ्क्षेपेणोक्तिः | ... | ५०७ |
| भागवतलक्षणनिरूपणम् | ... | ५०८ |
| ११० कपिलाधेनुप्रशंसनम् | ... | ५१२ |
| कपिलाया विभागं दशधेति प्रतिपाद्य तद्दानप्रशंसनम् | ... | ५१७ |
| कपिलवृषभवाहनप्रकारः | ... | ५१८ |
| १११ कपिलादानप्रशंसनम् | ... | ५२३ |
| कपिलाया ब्रह्मणाऽग्निकुण्डमध्यात् सृष्टिः | ... | ५२६ |
| कपिलायै सर्वैर्देवैर्वरदानम् | ... | ५२७ |
| कपिलायां सर्वासां देवतानामवस्थानम् | ... | ५२९ |
| दैवपित्र्यकालकथनम् | ... | ५३२ |
| पित्र्ये वर्ज्यब्राह्मणनिरूपणम् | ... | ,, |
| नरकगामिप्राणिप्रतिपादनम् | ... | ५३४ |
| स्वर्गगामिसुकृतिशंसनम् | ... | ५३५ |
| ११२ ब्रह्महत्यातुल्यफलकदुष्कृतकथनम् | ... | ५३७ |
| अन्नदानप्रशंसनम् | ... | ५३८ |
| अभोज्यान्नानां पापिनां लक्षणनिरूपणम् | ... | ,, |
| दानफलकथनम् | ... | ५४० |
| धर्मनाशप्रकारशंसनम् | ... | ,, |
| धर्मप्रशंसनम् | ... | ५४१ |
| ११३ धर्मशौचलक्षणम् | ... | ५४२ |
| यतिमहिमानुवर्णनम् | ... | ५४३ |
| अग्निमहिमानुवर्णनम् | ... | ,, |
| दानपात्रब्राह्मणलक्षणकथनम् | ... | ५४४ |
| अन्नदानप्रशंसनम् | ... | ५४५ |
| ११४ भोजनविधिप्रतिपादनम् | ... | ५४८ |
| गोग्रासदानप्रकारकथनम् | ... | ५५१ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| ११४ | तिलान् प्रशस्य तेषामिक्षूणां च ब्राह्मणेन स्वयं यन्त्रे निपीडनप्रतिषेधः ... | ५५२ |
| ११५ | आपद्धर्मनिरूपणम् ... | ५५३ |
| | प्रशस्ताप्रशस्तब्राह्मणलक्षणवचनम् ... | ५५४ |
| | श्राद्धकालनिरूपणम् ... | ५५६ |
| | मनुप्रोक्तधर्मसारसमुच्चयोक्तिः ... | ५५८ |
| | ब्राह्मण्यसिद्धिप्रकारकथनम् ... | ५६० |
| | गुर्वाचार्योपाध्यायलक्षणकथनम् ... | ५६१ |
| ११६ | अग्निसृष्टिप्रकारः ... | ५६३ |
| | अग्निशब्दप्रवृत्तिनिमित्तम् ... | ,, |
| | आहवनीयादिविभागमुक्त्वा तत्तन्नामनिर्वचनम् ... | ५६४ |
| | यज्ञाग्निहोत्रप्रशंसनम् ... | ५६७ |
| | आधानकालः ... | ५६८ |
| ११७ | चान्द्रायणविधिं प्रतिपाद्य तदाचरणफलकथनम् ... | ५७५ |
| ११८ | एकभुक्तव्रताचरणस्य कार्तिकादिद्वादशमासेषु कर्तव्यतायास्तत्फलस्य च प्रतिपादनम् ... | ५८१ |
| ११९ | एकभक्तव्रताचरणस्य एकसंवत्सरपर्यन्तानुष्ठितस्य फलोक्तिः | ५८८ |
| १२० | मार्गशीर्षादिद्वादशद्वादशीषु केशवादिभगवन्मूर्त्युपासनं कृत्वा व्रताचरणस्य फलप्रशंसनम् ... | ५८९ |
| १२० | भगवत्पञ्चमीस्वरूपकथनम् ... | ५९० |
| | भगवत्पञ्चम्यामुपवासविधानम् ... | ,, |
| | युधिष्ठिरकृतकृष्णस्तवनम् ... | ५९३ |
| | कृष्णद्वादश्यां भगवदर्चनफलकथनम् ... | ५९४ |
| १२१ | विषुवादिपुण्यकालमहिमानमनुवर्ण्य तेषु दानफलकथनम् | ५९५ |
| | गायत्रीजपमाहात्म्यप्रतिपादनम् ... | ५९८ |
| | अश्वत्थमाहात्म्यशंसनम् ... | ५९९ |
| | नानाधर्मकथनम् ... | ,, |
| | शिंशुमाराकृतिनिरूपणम् ... | ६०२ |

| अध्यायः | | | पृष्ठम् |
|---|---|---|---|
| | पञ्चगव्यविधानम् | ... | ६०२ |
| १२२ | ब्राह्मणानां भावशुद्धावेव साफल्यप्रतिपादनम् | ... | ६०४ |
| | विकर्मसु स्थितानां ब्राह्मणानां वैफल्यकथनम् | ... | ६०५ |
| | भगवद्भक्तश्रैष्ठ्यप्रतिपादनम् | ... | ६०६ |
| | भगवन्मूर्त्यर्चनप्रशंसनम् | ... | ६०७ |
| १२३ | भक्तिरहितशूद्रार्चनाया अस्वीकारः | ... | ६०८ |
| | अश्वत्थगोब्राह्मणमहिमानुवर्णनम् | ... | ,, |
| | ब्राह्मण्यभ्रंशकरदुष्कर्मप्रतिपादनम् | ... | ६०९ |
| १२४ | पाखण्डविधिप्रकारकथनम् | ... | ६१० |
| | तीर्थाटनासमर्थानां तत्प्रतिनिधितीर्थानुवर्णनम् | ... | ६११ |
| | शूद्रजन्मस्वरूपं प्रतिपाद्य तस्य कर्तव्यधर्मनिरूपणम् | ... | ६१२ |
| | भगवद्भक्तलक्षणं कथयित्वा तत्प्रशंसनम् | ... | ६१३ |
| | भगवतस्सर्वोत्तमत्वकथनम् | ... | ६१५ |
| | वैष्णवधर्मशास्त्रश्रवणफलकथनम् | ... | ,, |
| | देवर्ष्यादीनां श्रीकृष्णमभ्यर्च्य गमनम् | ... | ६१६ |
| | कृष्णस्य युधिष्ठिरादीनामभ्य दारुकोपनीतरथमारुह्य द्वारकागमनम् | ... | ,, |


आश्वमेधिकपर्वविषयानुक्रमणिका समाप्ता.

॥ श्रीरस्तु ॥

# महाभारतस्य आश्रमवासिकपर्व

तत्र

# ॥ विषयानुक्रमणिका ॥

## आश्रमवासपर्व


| अध्यायः | | पुटम् |
|---|---|---|
| १ | युधिष्ठिरेण धृतराष्ट्रानुमत्या राज्यपरिपालनम् ... | १ |
| | कुन्तीद्रौपद्यादिभिर्गान्धार्या श्वश्रूवद्वर्तनम् ... | २ |
| | युधिष्ठिरशासनेन भीमवर्जमर्जुनादिभिः धृतराष्ट्रानुवर्तनम् | ४ |
| २ | युधिष्ठिरेणामात्यानां नागराणां च धृतराष्ट्रानुवर्तनमनुशास्य भ्रातृभिस्सहाप्रमादेन तत्परितोषणम् ... | ५ |
| ३ | धृतराष्ट्रस्य भीमसेनपरुषभाषणश्रवणान्निर्वेदमुपगम्य गान्धार्या सह वनगमनाध्यवसायः ... | ९ |
| ४ | धृतराष्ट्रेण सकलपौरानयनेन तेभ्यः स्वस्य वनगमनाध्यवसायनिवेदनम् ... | ११ |
| | धृतराष्ट्रेण युधिष्ठिरं प्रति स्वस्य वनगमनाभ्यनुज्ञानप्रार्थना | १३ |
| ५ | युधिष्ठिरेण धृतराष्ट्रानुशोचनपूर्वकं तत्प्रतिषेधने धृतराष्ट्रस्य मोहः ... | १४ |
| | युधिष्ठिरेण धृतराष्ट्रस्य स्वहस्तेन संस्पर्शः ... | १७ |
| | युधिष्ठिरेण धृतराष्ट्रस्याहारस्वीकरणप्रार्थना ... | २० |
| | धृतराष्ट्रस्य वनगमनाभ्यनुज्ञादानाय युधिष्ठिरानुनयाय व्यासागमनम् ... | ,, |
| ६ | व्यासेन सहेतूपन्यासं युधिष्ठिरं धृतराष्ट्रस्य वनगमनाभ्यनुज्ञानं नियम्य स्वाश्रमगमनम् ... | २१ |
| | युधिष्ठिरेण धृतराष्ट्रस्य कृच्छ्रेण वनगमनाभ्यनुज्ञानम् ... | २२ |
| ७ | धृतराष्ट्रेण युधिष्ठिराय वनगमनकाले राजनीत्युपदेशः ... | २३ |
| ८ | धृतराष्ट्रेण युधिष्ठिराय राजनीतिकथनम् ... | २९ |
| ९ | राजनीतिकथनम् ... | ३२ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| १० | धृतराष्ट्रस्य युधिष्ठिराय राजनीत्युपदेशानन्तरं विश्रमाय गान्धारीगृहप्रवेशः ... | ३५ |
| | धृतराष्ट्रस्य गान्धार्या कदा वनगमनमिति प्रश्नः ... | ३६ |
| | धृतराष्ट्रेण युधिष्ठिरद्वारा सकलपौरजनानयनेन स्वस्य तेभ्यो वनजिगमिषां निवेद्य तदभ्यनुज्ञानप्रार्थना ... | ३७ |
| ११ | धृतराष्ट्रेण पैरान् प्रति दुर्योधनपक्षपातेन स्वकृतापनयक्षमापणम् | ३८ |
| | युधिष्ठिरस्य धृतराष्ट्रेण पौरेषु न्यासत्वेन समर्पणं कृत्वा स्वस्य वनगमनाभ्यनुज्ञानप्रार्थना ... | ३९ |
| १२ | पारजनैरशाकल्यब्राह्मणमुखेन धृतराष्ट्रं समाश्वास्य कृच्छ्रेण वनगमनाभ्यनुज्ञानम् ... | ४१ |
| १३ | धृतराष्ट्रेण भीष्मदुर्योधनादीनां श्राद्धदानाय विदुरमुखाद् युधिष्ठिरं प्रति धनयाचनम् ... | ४७ |
| | धृतराष्ट्रधनयाचनश्रवणेन भीमस्य कोपे अर्जुनेन तस्यानुनयः | ४८ |
| | भीमस्यार्जुनाय धृतराष्ट्रापनयानुस्मारणं कृत्वा धृतराष्ट्राय धनदानानङ्गीकरणम् ... | ४९ |
| १४ | भीमेन दुर्योधनादिभ्यः श्राद्धदानायधनदानानङ्गीकारे युधिष्ठिरेण विदुरमुद्दिश्य धृतराष्ट्राय निजगृहकोशाद्धनदाननिवेदनकथनम् ... | ५१ |
| १५ | विदुरेण धृतराष्ट्राय युधिष्ठिरेण भीष्मादीनां श्राद्धदानाय धनदानाङ्गीकरणनिवेदनम् ... | ५२ |
| १६ | धृतराष्ट्रेण भीष्मदुर्योधनाद्युद्देश्यकश्राद्धे धनवस्त्राद्दिना ब्राह्मणसन्तर्पणम् ... | ५४ |
| १७ | धृतराष्ट्रेण कुन्तीस्कन्धावसक्तहस्ताया गान्धार्या अंसावलम्बनेन सशोकैः पौरैः पाण्डवैश्चानुगम्यमानेन सता वनं प्रति प्रस्थानम् ... | ५७ |
| १८ | धृतराष्ट्रस्य वनप्रस्थानसमये विदुरसञ्जयाभ्यामपि वनवासाय तेन सह प्रस्थानम् ... | ५९ |
| | कुन्त्या वनगमनस्य युधिष्ठिरादिभिर्बहुधा प्रतिषेधनेऽपि तान् समाश्वास्य गान्धार्या सह वनप्रस्थानम् . ... | ६० |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| १९ | कुन्त्या स्वस्य वनगमनाध्यवसायेन विषीदतो युधिष्ठिरादीन् प्रति सहेतूपन्यासं समाश्वासनम् ... | ६४ |
| २० | कुन्त्या कृच्छ्रेण प्रतिनिवर्तितैर्युधिष्ठिरादिभिः कृच्छ्रात् पुनर्नगरं प्रत्यागमनम् ... | ६७ |
| | धृतराष्ट्रेण गान्धारीमुखेन कुन्तीनिवर्तनोपाये कृतेऽपि कुन्त्या तदनङ्गीकारः ... | ,, |
| | धृतराष्ट्रेण विदुरादिभिस्सह वनमेत्य गङ्गातीरे सन्ध्योपास्त्यादिना रात्रियापनम् ... | ६८ |
| २१ | धृतराष्ट्रेण विदुरादिभिस्सह गङ्गातीरात् कुरुक्षेत्रमेत्य तत्र शतयूपाश्रमे व्यासाज्ञया तदुपदिष्टविधिना तपश्चरणम् ... | ७० |
| २२ | धृतराष्ट्रदिदृक्षया नारदपर्वतादिभिश्शतयूपाश्रमागमनम् | ७२ |
| | नारदेन धृतराष्ट्राय शतयूपाश्रमस्य सहस्रचित्यादिराजर्षीणां स्वर्गप्रापकत्वमभिधाय विदुरादिभिस्सह धृतराष्ट्रस्य भविष्यत्सिद्धिकथनम् ... | ७३ |
| २३ | शतयूपपृष्टेन नारदेन तं प्रति धृतराष्ट्रस्य गान्धार्या सह वत्सरत्रयादूर्ध्वं कुबेरलोकप्राप्तिकथनम् ... | ७६ |
| २४ | युधिष्ठिरादीनां कुन्ती धृतराष्ट्रादि प्रव्रजन शोकेनाभिमन्यु प्रभृतिबन्धुजनानुस्मरणशोकेन च स्वस्वव्यापारेष्वप्यनादरणम् ... | ७८ |
| २५ | युधिष्ठिरेण वनस्थकुन्तीधृतराष्ट्रादिदिदृक्षया द्रौपद्यादिभिः पौरैर्भ्रातृभिश्च सह वनाय प्रस्थानम् ... | ८० |
| २६ | युधिष्ठिरेण नानायानारूढैः पौरैर्भ्रातृभिश्च सह धृतराष्ट्रादिदिदृक्षया शतयूपाश्रमवनप्रवेशः ... | ८४ |
| २७ | युधिष्ठिरादिभिश्शतयूपाश्रमे धृतराष्ट्रादीनदृष्ट्वा तत्रत्येभ्यो यमुनां गत इति श्रुत्वा तत्र गत्वा स्वस्वनामानि सङ्कीर्त्य तत्पादाभिवादनम् ... | ८६ |
| | धृतराष्ट्रेण स्वावस्थादर्शनेन शोचतां पाण्डवानां समाश्वासनम् | ८८ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| २८ | सञ्जयेन तापसान् प्रति युधिष्ठिरादीनां द्रौपद्यादिस्त्रीणां चाङ्गुलिनिर्देशेन नामनिर्देशः ... | ८९ |
| २९ | धृतराष्ट्रयुधिष्ठिरादीनां परस्परकुशलप्रश्नादिपूर्वकं संल्लापः ... | ९३ |
| | युधिष्ठिरेण धृतराष्ट्रं प्रति विदुरः क्वेति प्रश्ने तत्त्वेन केनचिदृच्छया धृतराष्ट्रमुपसर्पतो विदुरस्य जनावलोकनेन प्रतिनिवर्तमानस्य प्रदर्शनम् ... | ९५ |
| | युधिष्ठिरेणाश्रमपदे विदुरानुधावनेन तत्समीपगमनम् ... | ,, |
| | विदुरस्य योगात् स्वशरीरत्यागेन युधिष्ठिरशरीरे प्रवेशः... | ९६ |
| | विदुरस्य युधिष्ठिरेण मन्त्रपूर्वकसंस्कारः कर्तव्यः उत केवलदाहो वेति संशये अशरीरिवाचा संस्कार करणम् ... | ९७ |
| | युधिष्ठिरेण धृतराष्ट्रादिषु विदुरस्य स्वशरीरप्रवेशरूपाद्भुतनिवेदनम् ... | ,, |
| | युधिष्ठिरादीनां धृतराष्ट्राश्रमे रात्रौ फलमूलादिना कालयापनम् ... | ,, |
| ३० | युधिष्ठिरेण धृतराष्ट्रानुज्ञया भ्रात्रादिभिस्सह महर्षीणामाश्रमदर्शनम् ... | ९८ |
| | युधिष्ठिरादीनां शतयूपादिभिस्सशिष्येण व्यासेन च परिवृतस्य धृतराष्ट्रस्याश्रमं प्रत्यागमनम् ... | १०० |
| ३१ | व्यासेन धृतराष्ट्राय कुशलादिप्रश्नपूर्वकं विदुरस्य वास्तवस्वरूपादिप्रतिपादनम् ... | १०१ |
| | व्यासेन धृतराष्ट्राय इतरमहर्षिदुष्करधृतराष्ट्राभीष्टाश्चर्यकर्मकरणप्रतिज्ञानम् ... | १०४ |


## पुत्रदर्शनपर्व


| | | |
|---|---|---|
| ३२ | युधिष्ठिरे धृतराष्ट्राश्रमे भ्रात्रादिभिस्सैन्येन च मासमेकं निवसति व्यासधृतराष्ट्रौ परिवार्य नारदादिभिर्गान्धार्यादिभिः पाण्डवैश्च समुपवेशनम् ... | १०५ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | व्यासेन धृतराष्ट्राय स्वतपोबलेनाभीष्टसम्पादनशंसनम् | १०७ |
| | धृतराष्ट्रेण व्यासाय स्वस्य बन्धुजनमरणजनितदुःखनिवेदनम् | १०८ |
| ३३ | गान्धार्या व्यासाय धृतराष्ट्रस्य पुत्रदिदृक्षानिवेदनम् ... | ११० |
| | व्यासेन कुन्त्या अभीष्टनिवेदनचोदना ... | १११ |
| ३४ | कुन्त्या व्यासं प्रति स्वस्यां दुर्वासःप्रसादेन सूर्यात् कर्ण-स्योत्पत्तिं कथयित्वा स्वस्यास्तद्दिदृक्षानिवेदनम् ... | ११२ |
| | व्यासेन कुन्त्यास्सहेतूपन्यासं सूर्यात् कर्णजननप्रयु-क्तदोषशङ्कानिरसनम् ... | ११४ |
| ३५ | व्यासेन गान्धारीं प्रति समरहतानां दुर्योधनादीनां सर्वेषां रात्रौ प्रदर्शने प्रतिज्ञाय धृतराष्ट्रादीनां विशिष्य गन्धर्वांशत्वकथनम् ... | ११५ |
| | धृतराष्ट्रादिभिर्व्यासवचनाद्गङ्गातीरमेत्य बन्धुदर्शनौत्क-ण्ठ्येन कृच्छ्रादहर्यापनम् ... | ११८ |
| ३६ | व्यासेन निशायां गङ्गाजलावगाहनेन समाह्वाने पुरा समरे निहतैः कुरुपाण्डवोभयपक्षीयैस्सर्वैः स्वस्वा-भरणायुधवाहनादिभिस्सह सलिलादुद्गम्य तीरोत्तरणम् | ११९ |
| | धृतराष्ट्रेण व्यासप्रसादलब्धदिव्यचक्षुषा दुर्योधनादीनां सर्वेषां दर्शनम् ... | १२१ |
| ३७ | धृतराष्ट्रयुधिष्ठिरादिभिर्व्यासप्रसादादागतैर्हतपूर्व-बन्धुभिस्सह संल्लापादिना तस्यां रात्रौ सुखविहरणम् | १२२ |
| | दुर्योधनादीनां हतानां व्यासप्रसादादागतानां पुनर्गङ्गा-यामेव यथागतं स्वस्वलोकप्राप्तिः ... | १२३ |
| | व्यासेन दुर्योधनादिपत्नीनां गङ्गाजलावगाहनेन स्वस्व-पतिलोकप्रापणम् ... | १२४ |
| | पुनर्दर्शनपर्वश्रवणफलकथनम् ... | १२५ |
| ३८ | त्यक्तदेहानामपि कुरुपाण्डवपक्षीयाणां कथं पुनरागम-नमिति जनमेजयप्रश्नस्य वैशम्पायनेन सोप-पत्तिकमुत्तरदानम् ... | १२६ |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| ३९ | जनमेजयेन परोक्षित्प्रदर्शने प्रार्थिते व्यासेन परीक्षित-शमीकमहर्षेः शृङ्गिणश्च प्रदर्शनम् ... | १२८ |
| | जनमेजयेनावभृथस्नानानन्तरमास्तीकं सम्पूज्य वैशम्पायनं प्रति कथावशेषकथनप्रार्थना ... | १३० |
| ४० | धृतराष्ट्रेण पुत्रदर्शनानन्तरं युधिष्ठिरादिभिस्सह पुनः स्वाश्रमं प्रत्यागमनम् ... | १३१ |
| | व्यासेन धृतराष्ट्रं प्रति युधिष्ठिरादीनां नगरप्रस्थापनचोदना | १३२ |
| | युधिष्ठिरे पुनर्नगरजिगमिषाशून्ये सति धृतराष्ट्रस्य कुन्तीगान्धार्योश्च निदेशनिर्बन्धेन तस्य पुनस्सर्वैस्सह हास्तिनपुरगमनम् ... | १३३ |

## नारदागमनपर्व

| | | |
|---|---|---|
| ४१ | नारदेन कदाचन हास्तिनपुरमेत्य पाण्डवेभ्यो धृतराष्ट्रादीनां स्वर्गप्राप्तिनिवेदनम् ... | १३८ |
| | धृतराष्ट्रे गान्धारीकुन्तीसञ्जयैस्सह गङ्गायामाप्लुत्य स्वाश्रममागच्छति सति मध्येमार्गं दावाग्निना तत्परिवेष्टनम् | १४० |
| | धृतराष्ट्रेण सञ्जयं प्रति अग्नितो दूरापसरणं विधाय कुन्तीगान्धारीभ्यां सह वह्नौ प्रवेशनम् ... | १४१ |
| ४१ | सञ्जयस्य धृतराष्ट्रदेहत्यागकाले दावाग्नितोऽपसृत्य हिमवत्पर्वतगमनम् ... | १४२ |
| ४२ | युधिष्ठिरेण भ्रात्रादिभिस्सह धृतराष्ट्रादिनिधनश्रवणेन सकरुणं परिदेवनपूर्वकं सति संस्कृताग्नौ तेषां वृथाग्निना दाहं प्रत्यनुशोचनम् ... | १४४ |
| | नारदेन युधिष्ठिराय धृतराष्ट्रादिदाहकाग्नेर्मन्त्रपूतत्वकथनम् | १४६ |
| | युधिष्ठिरेण युयुत्सुपुरस्कारेण गान्धारीधृतराष्ट्रयोरुदकं प्रदाय कुन्त्याश्च विधिवच्छ्राद्धदानम् ... | १४७ |
| | युधिष्ठिरस्य धृतराष्ट्रादिभ्य उदकदानानन्तरं निजनगरे प्रजापालनेन भ्रात्रादिभिस्सह सुखविहारः ... | १४९ |

आश्रमवासिकपर्वविषयानुक्रमणिका समाप्ता

॥ श्रीरस्तु ॥

# महाभारतस्य मौसलपर्व

तत्र

# ॥ विषयानुक्रमणिका ॥

## मौसलपर्व


| अध्यायः | | पुटम् |
|---|---|---|
| १ | युधिष्ठिरेण हास्तिननगरे प्रजापालनकाले षट्त्रिंशे वत्सरे ऽशुभसूचकोत्पातदर्शनम् ... | १ |
| | बलरामश्रीकृष्णादीनां सर्वेषां यादवानां च मौसलप्रहारेण निश्शेषनिधनश्रवणम् ... | २ |
| | वैशम्पायनेन जनमेजयं प्रति यादवानां मौसलेन निधनप्रकारकथनारम्भः ... | ३ |
| | विश्वामित्रादिमहर्षिषु कदाचन द्वारकामागतेषु कैश्चन यादवैस्साम्बस्य स्त्रीवेषपरिकल्पनेन मुनीन् प्रति गर्भिणीयं किं रूपमपत्यं प्रसविष्यतीति प्रश्नः ... | ,, |
| | यादवकुलविनाशकं मुसलं प्रसविष्यतीति महर्षिभिश्शापदानम् | ४ |
| | साम्बेन यादवकुलविनाशके मुसले प्रसूते राज्ञाज्ञया तस्य चूर्णीकरणेन समुद्रे प्रक्षेपणम् ... | ५ |
| २ | द्वारकायां नानोत्पातप्रादुर्भावः ... | ,, |
| | कृष्णेन उत्पातानामनेकेषां दर्शनेन गान्धारीशापदानानुस्मरणेन च तस्य सत्यताचिकीर्षया भटैः सर्ववृष्ण्यादीनां तीर्थयात्रोद्घोषणम् ... | ७ |
| ३ | द्वारकायां वृष्ण्यन्धकादिभिरनर्थसूचकदुस्स्वप्नानुभवः ... | ८ |
| | कृष्णाज्ञया द्वारकावासिनां सस्त्रीबालवृद्धानां प्रभासक्षेत्रगमनम् | १० |
| | यादवानां प्रभासक्षेत्रे नृत्तगानादिमहोत्सवमनुभूय मद्यादिपानम् ... | ,, |
| | उद्धवगमनम् ... | ,, |

| अध्यायः | | पृष्ठम् |
|---|---|---|
| | सात्यकिना सभायां स्यमन्तकमणिहरणादिममर्षाण्युद्घाटय कृतवर्मगर्हणम् ... | ११ |
| | सात्यकिना स्यमन्तकमणिवृत्तान्तश्रवणखिन्नसत्यभामामनःप्रसादनाय खड्गेन कृतवर्मणः शिरश्छेदनम् ... | १२ |
| | कृतवर्मसात्यकिपक्षीयैर्मौसलतृणैः परस्परप्रहारेण परस्परमारणम् ... | ,, |
| ४ | यादवेषु सर्वेषु निहतेषु बभ्रुदारुकाभ्यां सह बलभद्रमन्वेषमाणेन कृष्णेन वने वृक्षाश्रितस्य तस्य दर्शनम् | १४ |
| | कृष्णेन सर्वयादवनिधननिवेदनाय पाण्डवान् प्रति दारुकप्रेषणम् ... | १५ |
| | बभ्रोः स्त्रीरक्षणार्थं कृष्णेन प्रेषितस्य मध्येमार्गं केनचिद्वधः | ,, |
| | कृष्णस्य पुनर्द्वारकां प्रविश्य स्त्रियो वसुदेवसात्कृत्य यावदर्जुनागमनं रक्षणीया इत्युक्त्वा पुनर्बलरामसमीपागमनम् ... | १६ |
| | बलभद्रेण योगात् सर्पशरीरस्वीकारेण समुद्रप्रवेशः ... | १७ |
| | कृष्णेन शरीरत्यागाय योगेन शयनम् ... | १९ |
| | व्याधेन मृगबुद्ध्या कृष्णस्य पादतले सायकेन गाढवेधनम् | २० |
| | व्याधस्य कृष्णसमीपमेत्य पश्चात्तापेन तस्य प्रणामः ... | ,, |
| | कृष्णस्य देवैः स्वर्गप्रापणम् ... | ,, |
| | कृष्णेन शरीरं त्यक्त्वा स्वर्गगमनेन देवैः पुष्पवर्षणपूर्वकंस्तुत्या प्रत्युद्रव्यमानेन सता निजपरमधामप्रवेशः | २१ |
| | कृष्णस्य निर्याणकाले देवेन्द्रं प्रति भूमौ निजदिव्यरूपपूजनविधानम् ... | २२ |
| ५ | दारुकेण हास्तिनपुरमेत्य पाण्डवेषु सर्वयादवक्षयनिवेदनम् | २३ |
| | अर्जुनेन द्वारकामेत्य रुक्मिण्यादिपरिसान्त्वनपूर्वकं वसुदेवगृहं प्रति गमनम् ... | २४ |
| ६ | वसुदेवेन स्वगृहमागतायार्जुनाय यादवक्षयनिदानं निवेद्य कृष्णानुस्मरणेन परिशोचनम् ... | २५ |

| अध्यायः | | पुटम् |
|---|---|---|
| | वसुदेवेनार्जुनाय कृष्णवचनं निवेद्य राज्यस्त्रीधनादिकं समर्प्य स्वेन स्वप्राणत्यजनप्रतिज्ञानम् | ... २७ |
| ७ | अर्जुनेन वसुदेवं समाश्वास्य सकलपौरेभ्यः नातिचिरादेव द्वारकायास्समुद्रेण समाप्लावनं निवेद्य सर्वेषामिन्द्रप्रस्थं प्रति प्रयाणसन्नाहसञ्चोदना | ... २९ |
| | वसुदेवं परेद्यवि योगेन शरीरं त्यक्तवन्तं पत्नीभिस्सह संस्कृत्य रामकृष्णशरीरयोर्दाहनम् | ... ३० |
| | वज्रार्जुनपुरस्कारेण सकलपौरजने इन्द्रप्रस्थं प्रति पुरः पुरः प्रयाते समुद्रेण पश्चाद्भागे पौरजनमुक्ततत्तद्भागस्य कृष्णमन्दिरं विना स्वजलेन समाक्रमणम् | ... ३३ |
| | अर्जुनेन मध्येमार्गं चोरापहृतावशिष्टयादवकलत्रादिभिस्सह स्वदेशमेत्य युधिष्ठिराज्ञया वज्रस्येन्द्रप्रस्थराज्येऽभिषेचनम् | ... ३४ |
| | सात्यकिपुत्रादीनां तत्र तत्र राज्येऽभिषेचनम् | ... ३७ |
| | रुक्मिण्यादिभिः काभिश्चनाग्निप्रवेशः | ... ,, |
| | सत्यभामादिभिः काभिश्चन तपसे वनगमनम् | ... ,, |
| ८ | अर्जुनेन व्यासाश्रमे व्यासस्य दर्शनम् | ... ३८ |
| | अर्जुनेन व्यासाय द्वारकावृत्तान्तनिवेदनम् | ... ३९ |
| | व्यासेनार्जुनाय युधिष्ठिरादीनामपि स्वर्गगमनसूचनम् | ... ४२ |
| | अर्जुनेन हास्तिनपुरमेत्य युधिष्ठिराय व्यासोक्तस्य निवेदनम् | ... ४३ |


मौसलपर्वविषयानुक्रमणिका समाप्ता.

॥ श्रीरस्तु ॥

# महाभारतस्य महाप्रस्थानिकपर्व

तत्र

## ॥ विषयानुक्रमणिका ॥

### महाप्रस्थानपर्व


| अध्यायः | | पुटम् |
|---|---|---|
| १ | युधिष्ठिरेण वृष्णीनां मौसलमाहवं निशम्य महाप्रस्थानाय भ्रातृभिस्सहालोच्य युयुत्सौ राज्यभारं निवेश्य परीक्षितो राज्येऽभिषेचनम् | ... १ |
| | युधिष्ठिरेण सुभद्राया एवं कर्तव्यमिति शासनम् | ... २ |
| | युधिष्ठिरेण वासुदेवादीनां श्राद्धदानम् | ... ३ |
| | युधिष्ठिरेण कृपमभ्यर्च्य परीक्षितस्तस्मै शिष्यत्वेन प्रतिपादनम् | ,, |
| | युधिष्ठिरेण महाप्रस्थानाय पौरैरननुमतावपि प्रस्थाननिश्चयः | ,, |
| | महाप्रस्थानकाले वास्तुविक्रयणविषये वास्तुस्वामिक्रेतृराजानां युगपत् तद्धनेच्छोदयः | ... ४ |
| | वास्तुविक्रयणेऽक्रमेण विवादे कलियुगं प्राप्तमितिनिश्चित्य युधिष्ठिरेण भ्रातृभिर्द्रौपद्या च सह आभरणान्युत्सृज्य वल्कलानि धृत्वा शुना सह गृहात् प्रस्थानम् | ... ,, |
| | अर्जुनेन मध्येमार्गमग्निवचसा सनिषङ्गस्य गाण्डीवस्य वरुणोद्देशेन समुद्रे प्रक्षेपणम् | ... ६ |
| २ | पाण्डवेषु महाप्रस्थाने मेरुगिरिं गच्छत्सु द्रौपद्यादीनां कानिष्ठ्यक्रमेण योगभ्रंशाद् भूमौ पतनम् | ... ८ |
| | भीमेन युधिष्ठिरस्य क्रमेण द्रौपद्यादिपतनकारणप्रश्नेयुधिष्ठिरेण तेषां पतने प्रत्येकं हेतुकथनम् | ... ,, |
| | महाप्रस्थाने युधिष्ठिरस्य शुनैकेन केवलमनुगमनम् | ... ११ |

| अध्यायः | | पुटम् |
|---|---|---|
| ३ | शुना सह महाप्रस्थानं गच्छन्तं युधिष्ठिरं प्रति इन्द्रेण स्वर्गगमनाय निजरथारोहणचोदना ... | १२ |
| | युधिष्ठिरेण मध्येमार्गं मेरोः पतितानां स्वभ्रातृादीनां शोकेन भ्रातृादिभिर्विना स्वर्गगमनानादरोक्त्या इन्द्रेण तत्समाधानम् ... | ,, |
| | युधिष्ठिरस्य शुना विना स्वस्य स्वर्गगमनाय रथारोहण तिरस्कारः ... | १३ |
| | इन्द्रेण युधिष्ठिरं प्रति बहुधा शुनस्त्यागः कर्तव्य इत्युक्तावपि युधिष्ठिरस्याश्रितपक्षपातेन त्यागानङ्गीकरणम् | ,, |
| | यमेन शुनकरूपं विहाय स्वस्वरूपेण सप्रत्यभिज्ञानं युधिष्ठिरप्रशंसनम् ... | १५ |
| | युधिष्ठिरस्य यमेन्द्रादिभी रथेन स्वर्गप्रापणम् ... | १६ |
| | युधिष्ठिरस्य स्वर्गे नारदेन प्रशंसनम् ... | ,, |
| | युधिष्ठिरस्य स्वर्गे स्वभ्रातृाद्यदर्शनेन इन्द्रं प्रति भ्रातृादीन् विना स्वस्य स्वर्गेऽप्यरुचिं कथयित्वा स्वभ्रातृादिसमीपगमनेच्छानिवेदनम् ... | १७ |


महाप्रस्थानिकपर्वविषयानुक्रमणिका समाप्ता.

॥ श्रीरस्तु ॥

# महाभारतस्य स्वर्गारोहणपर्व

तत्र

## ॥ विषयानुक्रमणिका ॥

### स्वर्गारोहणपर्व


| अध्यायः | | पुटम् |
|---|---|---|
| १ | युधिष्ठिरेण स्वर्गे महासमुच्छ्रयेण शोभमानस्य दुर्योधनस्य दर्शनम् ... | २ |
| | युधिष्ठिरेण स्वर्गे दुर्योधनोत्कर्षासहिष्णुतया तदीयदोषोद्घाटनेन दुर्योधनेन सह स्वस्य स्वर्गवासानभिरुचिं निवेद्य नारदं प्रति स्वस्य भ्रात्रादिदिदृक्षानिवेदनम् ... | ३ |
| २ | स्वर्गे कर्णादिबन्धुजनानपश्यता युधिष्ठिरेण देवान् प्रतियत्न कुत्रापि बन्धुजनैस्सहैव स्वस्य निवासेच्छानिवेदनम् ... | ५ |
| | युधिष्ठिरस्य बन्धुजनप्रदर्शनाय देवैश्चोदितेन देवदूतेनतस्य नरकप्रदेशप्रापणम् ... | ६ |
| | युधिष्ठिरेण दुर्दर्शनरकदर्शनासहिष्णुतया देवदूतेन सह प्रतिनिवर्तने श्रुतपूर्वकण्ठध्वनिश्रवणम् ... | ७ |
| | युधिष्ठिरेण नरके के यूयमिति पृष्टैस्तैस्स्वेषां कर्णभीमादित्वकथनम् ... | ९ |
| | युधिष्ठिरेण नरके देवदूतं प्रति इन्द्रे स्वस्य तत्समीपं प्रत्यनागमननिवेदनचोदना ... | १० |
| | देवदूतेनेन्द्रे युधिष्ठिरचिकीर्षितनिवेदनम् ... | ११ |

३ युधिष्ठिरस्य नरक एवावस्थानपरीक्षां यमेन्द्रादिषु कृतवत्सु तस्य तत्रैव स्थित्या परितुष्टेषु युधिष्ठिरसमीपमागतेषु तदृष्टनरकादीनां क्षणेनान्तर्धानम् ... ११
इन्द्रेण युधिष्ठिरस्य नरकदर्शनकारणं भीमादीनां नरकप्राप्तिकारणं च प्रतिपाद्य आकाशगङ्गायां स्नानेन युधिष्ठिरस्य मानुषभावविगमप्रतिपादनम् ... १२
यमेन युधिष्ठिरं प्रति सप्रशंसनं तदृष्टनरकस्य परीक्षणायेन्द्रमायासृष्टत्वकथनम् ... १५
युधिष्ठिरेण गङ्गायामवगाहनान्मानुषशरीरं परित्यज्य दिव्यशरीरं परिगृह्य देवैस्सह भ्रात्राद्यधिष्ठितदिव्यस्थानगमनम् ... १६
४ युधिष्ठिरेण स्वर्गे निवसतां कृष्णकर्णादीनां दर्शनम् ... १७
इन्द्रेण युधिष्ठिराय भीमादीनां तत्तत्स्थानगतानां पृथक्पृथक् प्रदर्शनम् ... ,,
५ वैशम्पायनेन जनमेजयं प्रति भीष्मद्रोणादीनां स्वस्वसुकृतफलत्वेन स्वर्गभोगानन्तरं स्वैस्स्वैरंशिभिः सहैक्यप्राप्तिकथनम् ... २०
जनमेजयेन यज्ञान्ते सबहुमानमास्तिकं सम्प्रेष्य तक्षशिलातो हास्तिननगरमेत्य प्रजापालनपूर्वकं सुखनिवासः २३
सूतेन शौनकादीन् प्रति जनमेजयाय वैशम्पायनोक्तभारतकथाकथनं परिसमाप्य भारतमाहिमप्रशंसनम् २४

॥ स्वर्गारोहणपर्वविषयानुक्रमणिका समाप्ता ॥

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ १४ ॥ आश्वमेधिकपर्व ॥ १४ ॥

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ आश्वमेधिकपर्व ॥

(अश्वमेधपर्व)

### ॥ प्रथमोऽध्यायः ॥

गङ्गायां भीष्मायोदकदानानन्तरं बन्धुशोकविषण्णं युधिष्ठिरंप्रति धृतराष्ट्रेण समाश्वासनम् ॥ १ ॥ तथा धृतराष्ट्रेण विदुरवचनानादरेण स्वस्यैतादृशामर्थप्राप्तिकथनम् ॥ २ ॥

वैशम्पायनः—

[1]कृतोदकस्तु राजानं धृतराष्ट्रं युधिष्ठिरः ।
पुरस्कृत्य महाबाहुर् उत्ततारकुलेन्द्रियः ॥ १

उत्तीर्य तु महीपालो बाष्पव्याकुललोचनः ।
पपात तीरे गङ्गाया व्याधविद्ध इव द्विपः ॥ २

तं सीदमानं जग्राह भीमः कृष्णेन चोदितः ।
मैवमित्यब्रवीच्चैनं कृष्णः परबलार्दनः ॥ ३

तमार्तं पतितं भूमौ श्वसन्तं च पुनः पुनः ।

1. अ-ख—सार्धश्लोकचतुष्टयं न दृश्यते ।

दृदृशुः पाण्डवा राजन् धर्मपुत्रं युधिष्ठिरम् ॥ ४
तं दृष्ट्वा दीनमनसं गतसत्वं जनेश्वरम् ।
भूयश्शोकसमाविष्टाः पाण्डवास्समुपाविशन् ॥ ५
राजा च धृतराष्ट्रस्तम् [1]उपासीनं महाभुजम् ।
वाक्यमाह महाबुद्धिर् महाबुद्धिं जनेश्वरम् ॥ ६

धृतराष्ट्रः—

उत्तिष्ठ नरशार्दूल कुरु कार्यमनन्तरम् ।
क्षत्रधर्मेण कौरव्य जितेयमवनिस्त्वया ॥ ७
तां भुङ्क्ष्व भ्रातृभिस्सार्धं सुहृद्भिश्च जनेश्वर ।
न शोचितव्यं पश्यामि त्वया धर्मभृतां वर ॥ ८
शोचितव्यं मया चैव गान्धार्या च महामते ।
ययोः पुत्रशतं नष्टं स्वप्नलब्धं धनं यथा ॥ ९
अश्रुत्वा हित[2]कामस्य विदुरस्य महात्मनः ।
वाक्यानि सुमहार्थानि परितप्तोऽस्मि दुर्मतिः ॥ १०
उक्तवानेष मां पूर्वं धर्मात्मा दिव्यदर्शनः ॥ १०॥

विदुरः—

दुर्योधनापराधेन कुलं ते विनशिष्यति ॥ ११
स्वस्ति चेदिच्छसे कामं कुलस्य कुरु मे वचः ।
बध्यतामेष दुष्टात्मा मन्दो राजा सुयोधनः ॥ १२
कर्णश्च शकुनिश्चैव मैनं पश्यतु कर्हिचित् ।

1. क—तथा दीनो। 2. ख-घ—कार्यस्य।

दूतसम्पातमप्येषाम् अप्रमत्तो निवारय ॥ १३
अभिषेचय राजानं धर्मात्मानं युधिष्ठिरम् ।
स पालयिष्यति वशी धर्मेण [1]पृथिवीमिमाम् ॥ १४
अथ नेच्छसि राजानं कुन्तीपुत्रं युधिष्ठिरम् ।
विनाशमुपयास्यन्ति तव पुत्रा न संशयः ॥ १५
[2]मेढीभूतं स्वयं राज्यं प्रतिगृह्णीष्व [3]पार्थिव ॥ १५॥
समं सर्वेषु भूतेषु वर्तमानं नराधिप ।
अनुजीवन्तु सर्वे त्वां ज्ञातयो ज्ञातिवर्धन ॥ १६॥

धृतराष्ट्रः—

एवं ब्रुवति कौन्तेय विदुरे [4]दीर्घदर्शिनि ।
[5]दुर्योधनमहं पापम् अनुवृत्तो वृथामतिः ॥ १७॥
अश्रुत्वैवास्य धीरस्य वाक्यानि मधुराणि च ।
फलं प्राप्य महद्दुःखं निमग्नश्शोकसागरे ॥ १८॥
वृद्धौ हि तेऽम्बापितरौ पश्यावां दुःखितौ नृप ।
न शोचितव्यं भवता पश्यामीह [6]जनाधिप ॥ १९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥
॥ ९१ ॥ अश्वमेधपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[ अस्मिन्नध्याये १९॥ श्लोकाः ]

---

1. ख-घ—वसुधा ।
2. ख-क—मेधीभूतः ।
3. ख-घ—भूमिप ।
4. ख-घ—धर्मदर्शने ।
5. क-ख—दुर्योधनम्महापाप मनुवर्ते वृथामतिः ।
6. ख-घ—नराधिप ।

## ॥ द्वितीयोऽध्यायः ॥

धृतराष्ट्रेण समाश्वासनेऽपि तूष्णीं तिष्ठतो युधिष्ठिरस्य कृष्णेन परिसान्त्वनम् ॥ १ ॥ पुनर्भीष्मद्रोणकर्णमारणानुस्मरणविषादेनारण्यगमनाय कृष्णानुज्ञानमाकाङ्क्षमाणस्य युधिष्ठिरस्य व्यासेन परिसान्त्वनम् ॥ २ ॥

वैशम्पायनः—

एवमुक्तस्तु राजाऽसौ धृतराष्ट्रेण धीमता ।
तूष्णीं बभूव मेधावी तमुवाचाथ केशवः ॥ १

श्रीभगवान्—

अतीव मनसा शोको ध्रियमाणो नराधिप ।
[1]सन्तापयति चैतस्य पूर्वप्रेतान् पितामहान् ॥ २

यजस्व विविधैर्यज्ञैर् बहुभिश्चाप्तदक्षिणैः ।
देवांस्तर्पय सोमेन स्वधया च पितॄनपि ॥ ३

अतिथीनन्नपानेन कामैरन्यैरकिञ्चनान् ॥ ३॥

त्वद्विधस्य महाबुद्धे नैतद्व्योपपद्यते ।
विदितं वेदितव्यं ते कर्तव्यमपि ते कृतम् ॥ ४॥

श्रुताश्च राजधर्मास्ते भीष्माद्भागीरथीसुतात् ।
कृष्णद्वैपायनाच्चापि नारदाद्विदुरात् तथा ॥ ५॥

[2]नेमामर्हसि मूढानां वृत्तिं त्वमनुवर्तितुम् ।

1. अ—इतः-अर्धसप्तकं नोपलभ्यते। 2. ब—इदमर्धं नास्ति।

पितृपैतामहं वृत्तम् आस्थाय धुरमुद्वह ॥ ६॥

[1]युक्तं हि यशसा क्षात्रं स्वर्गं प्राप्तुमसंशयम् ।
न हि कश्चन शूराणां निहतोऽत्र पराङ्मुखः ॥ ७॥

त्यज शोकं महाराज भवितव्यं हि तत् तथा ।
न शक्यास्ते पुनर्द्रष्टुं त्वया येऽस्मिन् रणे हताः ॥ ८॥

वैशम्पायनः—

एतावदुक्त्वा गोविन्दो धर्मराजं युधिष्ठिरम् ।
विरराम महातेजास् [2]तमुवाच युधिष्ठिरः ॥ ९॥

युधिष्ठिरः—

गोविन्द मयि या प्रीतिस् तव सा विदिता मम ।
सौहृदेन तथा प्रेम्णा सदा मामनुकम्पसे ॥ १०॥
प्रियं तु मे स्यात् सुमहत् कृतं चक्रगदाधर ॥ ११
श्रीमन् प्रीतेन मनसा सर्वयादवनन्दन ।
यदि मामनुजानीयाद् भवान् गन्तुं तपोवनम् ॥ १२
कृतकृत्यो भविष्यामि इति मे निश्चिता मतिः ॥ १२॥
न हि शान्तिं प्रपश्यामि घातयित्वा पितामहम् ।
[3]नृशंसः पुरुषव्याघ्रं गुरुं वीर्यबलान्वितम् ॥ १३॥
[4]कर्णं च पुरुषव्याघ्रं सङ्ग्रामेष्वपलायिनम् ॥ १४

---

1. अ—अर्धद्वयं नास्ति। 2. ख-घ—तं राजा प्रत्यभाषत ।
3. अ-ख-घ—इदमर्धं न दृश्यते। 4. क—इदमर्धं नोपलभ्यते।

कर्मणा येन मुच्येयं तस्मात् पापादरिन्दम ।
कर्म तत् त्वं विधत्स्वेह न हि शुध्यति मे मनः ॥ १५

वैशम्पायनः—

तमेवंवादिनं व्यासस् ततः प्रोवाच धर्मवित् ।
सान्त्वयन् सुमहातेजाः [1]वेदवेदाङ्गतत्त्ववित् ॥ १६

व्यासः—

सुकृता ते मतिस्तात पुनर्बाल्येन मुह्यसि ।
किमाकाशे वयं सर्वे प्रलपामो मुहुर्मुहुः ॥ १७
विदिताः क्षत्रधर्मास्ते येषां युद्धेन जीविका ॥ १७॥
[2]यथा च वै त्वं नृपते शोकबन्धाद्विमोक्ष्यसे ।
मोक्षधर्माश्च निखिला यथावत् संश्रुतास्त्वया ॥ १८॥
यथा वै कामजां मायां परित्यक्तुं त्वमर्हसि ।
[3]तथा तु कुर्वन् नृपतिर् नानुबन्धेन युज्यते ॥ १९॥
असकृच्चैव सन्देहाश् छिन्नास्ते कामजा मया ।
अश्रद्दधानो दुर्मेधा लुप्तस्मृतिरसि ध्रुवम् ॥ २०॥
मैवं भूस्त्वं न ते युक्तम् इदमज्ञानमीदृशम् ॥ २१
प्रायश्चित्तानि सर्वाणि विदितानि च [4]तेऽनघ ।
युद्धधर्माश्च ते सर्वे दानधर्माश्च ते श्रुताः ॥ २२

1. ख-घ—शुभं वचनमर्थवित् । 2. अ-क—इदमर्धं न दृश्यते ।
3. अ-ख—इदमर्धं नोपलभ्यते । 4. ख-घ—ते नृप ।

स कथं सर्वधर्मज्ञस् सर्वागमविशारदः ।
परिमुह्यसि भूयस्त्वम् अज्ञानाᵗ¹दिव भारत ॥ २३

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

॥ ९१ ॥ अश्वमेधपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

[अस्मिन्नध्याये २३ श्लोकाः]

## ॥ तृतीयोऽध्यायः ॥

व्यासेन युधिष्ठिरं प्रति पुरुषकर्मणामीश्वरप्रेरणायत्ततया दोषाणा-
पादकत्वकथनपूर्वकं तदभ्युपगमेनापि पापापनोदनायाश्वमेधादिविधानम्॥
१ ॥ युधिष्ठिरेण स्वस्य तावद्व्याभावनिवेदने व्यासेन तं प्रति हिमवति
गिरौ विद्यमानमरुत्तयागावशिष्टद्रव्यानयनेनाश्वमेधकरणचोदना ॥ २ ॥

व्यासः—

युधिष्ठिर तव प्रज्ञा न सम्यगिति मे मतिः ।
²न हि कश्चित् स्वयं मर्त्यस् स्ववशः कुरुते क्रियाम् ॥ (१)
ईश्वरेण च युक्तोऽयं साध्वसाधु च मानवः ।
करोत्यसुकरं कर्म तत्र का परिदेवना ॥ (२)
आत्मानं मन्यसे पार्थ पापकर्माणमन्ततः ।
शृणु तत्र यथा पापम् अपकृष्येत भारत ॥ (३)
तपोभिः क्रतुभिश्चैव दानेन च युधिष्ठिर ।

1. ख-घ—दिह । क—देव । 2. अ—अर्धचतुष्टयं नास्ति ।

तरन्ति नित्यं पुरुषा ये स्म पापानि कुर्वते ॥ ४
[1]यज्ञेन तपसा चैव दानेन च नराधिप ।
पूयन्ते राजशार्दूल नरा दुष्कृतकारिणः ॥ ५
असुराश्च सुराश्चैव पुण्यहेतोर्मखक्रियाम् ।
सहसैवानुवर्तन्ते तस्माद्यज्ञः परायणम् ॥ ६
यज्ञैरेव महात्मानो बभूवुरधिकास्सुराः ।
ततो देवाः क्रियावन्तो दानवानभ्यधर्षयन् ॥ ७
राजसूयाश्वमेधौ च सर्वमेधं च भारत ।
नरमेधं च नृपते त्वमाहर युधिष्ठिर ॥ ८
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।
बहुकामान्नवित्तेन रामो दाशरथिर्यथा ॥ ९
यथा हि भरतो राजा दौष्यन्तिः पृथिवीपतिः ।
शाकुन्तलो महावीर्यस् तव पूर्वपितामहः ॥ १०

युधिष्ठिरः—

असंशयं वाजिमेधः पावयेत् पृथिवीमपि ।
अभिप्रायस्तु मे कश्चित् तं त्वं श्रोतुमिहार्हसि ॥ ११
इमं ज्ञातिवधं कृत्वा सुमहान्तं द्विजोत्तम ।
अहमाराधयिष्यामि कथं शोकपरायणः ॥ १२
[2]दानमल्पं न शक्ष्यामि दातुं वित्तं च नास्ति मे ॥ १२॥

1. अ-ख—आत्मानं मन्यसे पार्थ पापकर्माणमात्मना । [अधिकः पाठः]
2. क—इतः-अर्धपञ्चकं नास्ति ।

न चापलादिना दीनान् उत्सहे वसु याचितुम् ।
तथैवाद्रविणान् कृच्छ्रे वर्तमानान् नृपात्मजान् ॥ १३॥
स्वयं विनाश्य पृथिवीं राज्यार्थे द्विजसत्तम ।
करमाहारयिष्यामि कथं शोकपरायणान् ॥ १४॥
[1]दुर्योधनापराधेन वसुधायां नराधिपाः ।
प्रनष्टा योधयित्वाऽस्मान् अकीर्त्या मुनिसत्तम ॥ १५॥
दुर्योधनेन पृथिवी क्षपिता वित्तकारणात् ।
कोशश्चापि विशीर्णोऽयं धार्तराष्ट्रस्य दुर्मतेः ॥ १६॥
पृथिवी दक्षिणा चात्र वाजिमेधे महाक्रतौ ।
विद्वद्भिः [2]परिदृष्टोऽयं विशिष्टो विधिपर्ययः ॥ १७॥
न च प्रतिनिधिं कर्तुं चिकीर्षामि तपोधन ।
अत्र मे भगवन् सम्यक् साचिव्यं कर्तुमर्हसि ॥ १८॥

**वैशम्पायनः—**

एवमुक्तस्तु पार्थेन कृष्णद्वैपायनस्तदा ।
मुहूर्तमभिसञ्चिन्त्य धर्मराजानमब्रवीत् ॥ १९॥

**व्यासः—**

विद्यते द्रविणं पार्थ गिरौ हिमवति स्थितम् ।
उत्सृष्टं ब्राह्मणैर्यज्ञे मरुत्तस्य महीपतेः ॥ २०॥
तदानयस्व कौन्तेय पर्याप्तं ते भविष्यति ॥ २१

1. ब—श्लोकोऽयं नास्ति 2. ख—परितुष्टोऽयं विशिष्टोऽपि विपर्ययम् ।

युधिष्ठिरः—

कथं यज्ञे मरुत्तस्य द्रविणं तत् समाहितम् ।
कस्मिंश्च काले स नृपो बभूव वदतांवर ॥ २२

व्यासः—

यदि शुश्रूषसे पार्थ शृणु कारन्धमं नृपम् ।
[1]यस्मिन् काले महावीर्यस् स राजाऽऽसीन्महाधनः* ॥ २३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

॥ ९१ ॥ अश्वमेधपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[ अस्मिन्नध्याये २३ श्लोकाः ]

---

## ॥ चतुर्थोऽध्यायः ॥

व्यासेन युधिष्ठिरं प्रति संवर्तमरुत्तीयोपाख्यानकथनारम्भः ॥ १ ॥ मरुत्तेन राज्ञा हिमवदुत्तरपार्श्वे सौवर्णैरेव कुण्डभाण्डाद्युपकरणैर्यज्ञारम्भः ॥ २ ॥

---

युधिष्ठिरः—

[2]शुश्रूषे तस्य धर्मज्ञ राजर्षेः परिकीर्तनम् ।
द्वैपायन मरुत्तस्य कथां ब्रूहि मेऽनघ ॥ १

---

1. अ—नास्तीदमर्धम् ।　　2. अ—अर्धनवकं नोपलभ्यते ।
* अ-क—नाध्यायसमाप्तिर्दृश्यते ।

व्यासः—

आसीत् कृतयुगे पूर्वं मनुर्दण्डधरः प्रभुः ।
तस्य पुत्रो महेष्वासः प्रजातिरभवन्नृपः ॥ २

प्रजातेरभवत् पुत्रः क्षुत इत्यभिविश्रुतः ।
क्षुतस्य पुत्र इक्ष्वाकुर् महीपालोऽभवत् प्रभुः ॥ ३

तस्य पुत्रशतं राजन्नासीत् परमधार्मिकम् ।
तांस्तु सर्वान् महीपालान् इक्ष्वाकुरकरोत् प्रभुः ॥ ४

तेषां ज्येष्ठस्तु विंशोऽभूत् प्रतिमानं धनुष्मताम् ।
विंशस्य पुत्रः कल्याणो विविंशो नाम भारत ॥ ५

विविंशस्य सुता राजन् बभूवुर्दश पञ्च च ।
सर्वे धनुषि विक्रान्ता ब्रह्मण्यास्सत्यवादिनः ॥ ६

दानधर्मरतास्सन्तः प्रजाहितचिकीर्षवः ॥ ६॥

तेषां ज्येष्ठः खनीनेत्रस् स तान् सर्वानपीडयत् ॥ ७

खनीनेत्रस्तु विक्रान्तो जित्वा [1]राज्यमकण्टकम् ।
नाशक्नोद् रक्षितुं राज्यं नानुरञ्जन्ति तं प्रजाः ॥ ८

तमपाहाय तद्राज्ये तस्य पुत्रं सुवर्चसम् ।
अभ्यषिञ्चन्त राजेन्द्र मुदिता ह्यभवंस्तदा ॥ ९

स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तथा ।

1. ख-घ—राज्यं वसूनि च। *अ—अत्रैवाध्यायसमाप्तिर्दृश्यते।

नियतो वर्तयामास प्रजाहितचिकीर्षया ॥ १०

ब्रह्मण्यस्सत्यवादी च शुचिश्शमदमान्वितः ॥ १०॥

प्रजास्तं चान्वरज्यन्त धर्मनित्यं मनस्विनम् ॥ ११

तस्यापि धर्मवृत्तस्य व्यशीर्यत् कोशवाहनम् ।
तं क्षीणकोशं सामन्तास् समन्तात् पर्यपीडयन् ॥ १२

स पीड्यमानो बहुभिः क्षीणकोशाश्ववाहनः ।
आर्तिमार्च्छत् परां राजा सह भृत्यैः पुरेण च ॥ १३

न चैनं परिहर्तुं ते शक्नुवन् परिसङ्क्षये ।
सम्यग्वृत्तो हि राजाऽसौ धर्मनित्यो युधिष्ठिर ॥ १४

यदा तु परमामार्तिं गतोऽसौ सपुरो नृपः ।
ततः प्रदध्मौ स करं प्रादुरासीत् ततो बलम् ॥ १५

ततस्तानजयत् सर्वान् [1]प्रतिसीमान् नराधिपान् ।
एतस्मात् कारणाद्राजन् विश्रुतस्स करन्धमः ॥ १६

पुत्रस्त्रेतायुगमुखेऽभवदावीक्षिसंज्ञकः ।
इन्द्रादनवमश्श्रीमान् देवैरपि सुदुर्जयः ॥ १७

[2-3]कारन्धम इति ख्यातो बभूव जगतीपतिः ॥ १७॥
तस्य सर्वे महीपाला वर्तन्ते स्म वशे तदा ।

---

1. क—प्रभीतांस्तान् । ख—प्रासीमान्तान् ।
2. घ—नास्तीदमर्धम् । 3. क-ख—इतः अर्धपद्यकं नास्ति ।

स हि सम्राडभूत् तेषां वृत्तेन च बलेन च ॥ १८॥
अविक्षिदेव धर्मात्मा शौर्येणेन्द्रसमोऽभवत् ।
यज्ञशीलो कर्मरतो धृतिमान् संयतेन्द्रियः ॥ १९॥
तेजसाऽऽदित्यसदृशः क्षमया पृथिवीसमः ।
बृहस्पतिसमो बुद्ध्या हिमवानिव सुस्थिरः ॥ २०॥
कर्मणा मनसा वाचा दमेन प्रशमेन च ।
मनांस्याराधयामास प्रजानां स महीपतिः ॥ २१॥
य ईजे हयमेधानां शतेन विधिवत् प्रभुः ।
याजयामास यं विद्वान् स्वयमेवाङ्गिराः प्रभुः ॥ २२॥
तस्य पुत्रोऽतिचक्राम पितरं गुणवत्तया ।
मरुत्तो नाम धर्मज्ञश् चक्रवर्ती महायशाः ॥ २३॥
नागायुतसमप्राणस् साक्षाद्विष्णुरिवापरः ॥ २४
स यक्ष्यमाणो धर्मात्मा शातकुम्भमयान्युत ।
कारयामास शुभ्राणि भाजनानि सहस्रशः ॥ २५
मेरुं पर्वतमासाद्य हिमवत्पार्श्व उत्तरे ।
काञ्चनस्सुमहान् पादस् तत्र कर्म चकार सः ॥ २६
ततः कुण्डानि पात्र्यश्च पिठराण्यासनानि च ।
चक्रुस्सुवर्णकर्तारस् तेषां सङ्ख्या न विद्यते ॥ २७
तस्यैव च समीपे तु यज्ञवाटो बभूव ह ॥ २७॥

ईजे तत्र स धर्मात्मा विधिवत् पृथिवीपतिः ।
मरुत्तस्सहितैस्सर्वैः प्रजापालैर्नराधिपः ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

॥ ९१ ॥ अश्वमेधपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

[ अस्मिन्नध्याये २८॥ श्लोकाः ]

## ॥ पञ्चमोऽध्यायः ॥

अङ्गिरसः पुत्रेण संवर्तेनाकारणवैरिणः स्वाग्रजन्मनो बृहस्पतेरुपद्रवासहनेन सर्वस्वत्यागपूर्वकमरण्यप्रवेशः ॥ १ ॥ इन्द्रेण स्वातिशायिनि मरुत्ते राजनि स्पर्धया बृहस्पतिसाचिव्येन ततोऽप्यतिशयलिप्सया मरुत्तपुरोहितस्य बृहस्पतेर्भेदोपायेन वशीकरणम् ॥ २ ॥ बृहस्पतिनेन्द्रं प्रति मरुत्तस्य स्वेनायाजनप्रतिज्ञानम् ॥ ३ ॥

युधिष्ठिरः—

कथंवीर्यस्समभवत् स राजा ददतां वरः ।
कथं च जातरूपेण समायुज्यत वै नृपः ॥ १
क च तत् साम्प्रतं द्रव्यं भगवन्नवतिष्ठते ।
कथं च शक्यमस्माभिस् तदवाप्तुं तपोधन ॥ २

व्यासः—

असुराश्चैव देवाश्च दक्षस्यासन् प्रजापतेः ।
अपत्यं बहुलं तात तेऽस्पर्धन्त परस्परम् ॥ ३
तथैवाङ्गिरसः पुत्रौ पितृतुल्यौ बभूवतुः ।

बृहस्पतिर्बृहत्तेजास् संवर्तश्च तपोधनः ॥ ४
तावपि स्पर्धिनौ राजन् पृथगास्तां परस्परम् ।
बृहस्पतिस्तु संवर्तं बाधते स्म पुनः पुनः ॥ ५
स बाध्यमानस्सततं भ्रात्रा ज्येष्ठेन भारत ।
अर्थानुत्सृज्य दिग्वासा वने वासमरोचयत् ॥ ६
वासवोऽप्यसुरान् सर्वान् विजित्य च निपात्य च ।
इन्द्रत्वं प्राप्य लोकेषु ततो वव्रे पुरोहितम् ॥ ७
पुत्रमङ्गिरसो ज्येष्ठं विप्रज्येष्ठं बृहस्पतिम् ॥ ७॥
याज्यस्त्वाङ्गिरसः पूर्वम् आसीद्राजा करन्धमः ।
वीर्येणाप्रतिमो लोके वृत्तेन च बलेन च ॥ ८॥
शतक्रतुरिवौजस्वी धर्मात्मा संशितव्रतः ॥ ९
[1]वाहनं यस्य योधाश्च द्रव्याणि विविधानि च ।
शयनानि च मुख्यानि महार्हाणि च सर्वशः ॥ १०
ध्यानादेवाभवन् राजन् मुखवातेन सर्वशः ॥ १०॥
स गुणैः पार्थिवान् सर्वान् वशे चक्रे नराधिपः ।
सञ्जीव्य कालमिष्टं च सशरीरो दिवं गतः ॥ ११॥
बभूव तस्य पुत्रस्तु ययातिरिव धर्मवित् ।
अविक्षिन्नाम शत्रुघ्नो यो वशे कृतवान् महीम् ॥ १२॥
विक्रमेण गुणैश्चैव पितेवासीत् स पार्थिवः ॥ १३

1. अ— अर्धश्लोकं न दृश्यते ।

तस्य वासवतुल्योऽभून्मरुत्तो नाम वीर्यवान् ।
पुत्रस्तमनुरक्ताऽभूत् पृथिवी सागराम्बरा ॥ १४

स्पर्धते सततं यस्माद् देवराजेन पार्थिवः ।
वासवोऽपि मरुत्तेन स्पर्धते पाण्डुनन्दन ॥ १५

शुचिस्स् गुणवानासीन्मरुत्तः पृथिवीपतिः ।
यजमानोऽपि यं शक्रो निर्विशेषयति स्म ह ॥ १६

सोऽशक्नुवन् विशेषाय समाहूय बृहस्पतिम् ।
उवाचेदं वचो देवैस् सहितो हरिवाहनः ॥ १७

इन्द्रः—

बृहस्पते मरुत्तस्य मा स्म कार्षीः कदाचन ।
दैवं कर्माथ पित्र्यं च कर्तासि मम चेत् प्रियम् ॥ १८
अहं हि त्रिषु लोकेषु सुराणां च बृहस्पते ।
इन्द्रत्वं प्राप्तवानेको मरुत्तस्तु महीपतिः ॥ १९

कथं ह्यमर्त्यं ब्रह्मंस्त्वं याजयित्वा सुराधिपम् ।
याजयेर्मृत्युसंयुक्तं मरुत्तमविशङ्कया ॥ २०
मां वा वृणीष्व भद्रं ते मरुत्तं वा महीपतिम् ।
परित्यज्य मरुत्तं वा यथाजोषं भजस्व माम् ॥ २१

व्यासः—

एवमुक्तस्स कौरव्य देवराज्ञा बृहस्पतिः ।
मुहूर्तमपि सञ्चिन्त्य देवराजानमब्रवीत् ॥ २२

बृहस्पतिः—

त्वं भूतानामधिपतिस् त्वयि लोका[1]स्समाहिताः ।
नमुचेर्विश्वरूपस्य निहन्ता त्वं बलस्य च ॥ २३

त्वमाजहार्षीर्देवानाम् एकवीर्यश्रियं पराम् ।
त्वं बिभर्षि भुवं द्यां च सदैव बलसूदन ॥ २४

पौरोहित्यमहं कृत्वा तव देव सुरेश्वर ।
याजयेयं कथं मर्त्यं मरुत्तं पाकशासन ॥ २५

समाश्वसिहि देवेश नाहं मर्त्याय कर्हिचित् ।
यहीष्यामि सुवं यज्ञे शृणु चेदं वचो मम ॥ २६

हिरण्यरेता नोष्णस्यात् परिवर्तेत मेदिनी ।
भासं च नो रविः कुर्यान्मत्सत्यं विचलेद्यदि ॥ २७

व्यासः—

बृहस्पतिवचश्श्रुत्वा शक्रो विगतमत्सरः ।
प्रशस्यैनं विवेशाथ स्वमेव भवनं तदा ॥ २८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

॥ ९१ ॥ अश्वमेधपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

[ अस्मिन्नध्याये २८ श्लोकाः ]

---

1. ख-घ—:प्रतिष्ठिताः । क—स्सनातनाः ।

## ॥ षष्ठोऽध्यायः ॥

बृहस्पतिना इन्द्रे स्वेन मरुत्तस्यायाजनप्रतिज्ञानश्रवणामर्षिणा मरुत्तेन स्वयाजनप्रार्थने तत्प्रत्याख्यानम् ॥ १ ॥ ततः प्रतिनिवृत्तस्य मरुत्तस्य मध्येमार्गं नारदसमागमः ॥ २ ॥ नारदचोदनया मरुत्तेन वाराणसीद्वारे स्वेन स्थापितकुणपावलोकनेन पलायमानं संवर्तं प्रत्यनुगमनम् ॥ ३ ॥ संवर्तेन राज्ञः प्रतिनिवर्तनाय पांसुकर्दमप्रक्षेपेऽप्यनिवर्तमानं तमवलोक्य विजने न्यग्रोधमूले समुपवेशः ॥ ४ ॥

व्यासः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
बृहस्पतेश्च संवादं मरुत्तस्य च धीमतः ॥ १

देवराजस्य समयं कृतमाङ्गिरसेन ह ।
श्रुत्वा मरुत्तो नृपतिर् मन्युमाहारयत् तदा ॥ २

सङ्कल्प्य मनसा यज्ञं करन्धमसुतात्मजः ।
बृहस्पतिमुपागम्य वाग्मी वचनमब्रवीत् ॥ ३

मरुत्तः—

भगवन् यन्मया पूर्वम् अधिगम्य तपोधन ।
कृताभिसन्धिर्यज्ञाय भवतो वचनाद्गुरोः ॥ ४

तदहं यष्टुमिच्छामि सम्भारास्सम्भृताश्च मे ।
[1]याज्योऽस्मि भवतस्साधो तं प्रापुहि विधत्स्व च ॥ ५

1. क—नासीदमर्धम् ।

बृहस्पतिः—

[1]न कामये याजयितुं त्वामहं पृथिवीपते ।
वृतोऽस्मि देवराजेन प्रतिज्ञातं च तस्य मे ॥ ६

मरुत्तः—

[2]पित्र्यमस्मि तव क्षेत्रं बहु मन्ये च ते भृशम् ।
न चास्म्ययाज्यतां प्राप्तो भजमानं भजस्व माम् ॥ ७

बृहस्पतिः—

अमर्त्यं याजयित्वाऽहं याजयिष्ये न मानुषम् ।
मरुत्त गच्छ वा मा वा निवृत्तो[3]ऽस्म्यद्य याजनात् ॥ ८
न त्वां याजयितास्म्यद्य वृणु [4]चान्यं यमिच्छसि ।
उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति ॥ ९

व्यासः—

एवमुक्तस्तु नृपतिर् मरुत्तो व्रीडितोऽभवत् ।
प्रत्यागच्छत् सुसंविग्नो ददर्श पथि नारदम् ॥ १०
देवर्षिणा समागम्य नारदेन स पार्थिवः ।
विधिवत् प्राञ्जलिस्तस्थौ तथैनं नारदोऽब्रवीत् ॥ ११

नारदः—

राजर्षे नातिहृष्टोऽसि कच्चित् क्षेमं तवानघ ।

---

1. अ-क-ङ—अर्धद्वयं न दृश्यते । 2. अ-ङ—अर्धद्वयं नास्ति ।
3. क—ऽयाज्ययाजनात् ।
4. क—शृणु चान्यं यदिच्छसि । ख—वृणु त्वं यमिहेच्छसि ।

क्व गतोऽसि कुतो वेदम् अप्रीतिस्थानमागतम् ॥　१२

श्रोतव्यं चेन्मया राजन् ब्रूहि मे पार्थिवर्षभ ।
व्यपनेष्यामि ते मन्युं सर्वयत्नैर्नराधिप ॥　१३

व्यासः—

एवमुक्तो मरुत्तस्तु नारदेन महर्षिणा ।
विप्रलम्भमुपाध्यायात् सर्वमेव न्यवेदयत् ॥　१४

मरुत्तः—

गतोऽस्म्यङ्गिरसः पुत्रं देवाचार्यं बृहस्पतिम् ।
यज्ञार्थमृत्विजं प्रष्टुं स च मां नाभ्यनन्दत ॥　१५

प्रत्याख्यातश्च तेनाहं जीवितं नाद्य कामये ।
परित्यक्तश्च गुरुणा दूषितश्चास्मि नारद ॥　१६

व्यासः—

एवमुक्तस्तु राज्ञा स नारदः प्रत्युवाच ह ।
आविक्षितं महाराज वाचा सञ्जीवयन्निव ॥　१७

नारदः—

राजन्नाङ्गिरसः पुत्रस् संवर्तो नाम धार्मिकः ।
चङ्क्रमीति दिशस्सर्वा दिग्वासा मोहयन् प्रजाः ॥　१८

तं गच्छ यदि याज्यं त्वां न वाञ्छति बृहस्पतिः ।
प्रसन्नस्त्वां महातेजास् संवर्तो याजयिष्यति ॥　१९

मरुत्तः—

सञ्जीवितोऽहं भवता वाक्येनानेन नारद ।
पश्येयं क्व नु संवर्तं शंस मे वदतां वर ॥ २०

कथं च तस्मै वर्तेयं कथं मां न परित्यजेत् ।
प्रत्याख्यातो हि तेनापि नाहं जीवितुमुत्सहे ॥ २१

नारदः—

उन्मत्तवेषं बिभ्रत् स चङ्क्रमीति यथासुखम् ।
वाराणसीं तु नगरीम् अभीक्ष्णमुपसेवते ॥ २२

तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित् ।
तं दृष्ट्वा यो निवर्तेत स संवर्तो महीपते ॥ २३

तं पृष्ठतोऽनुगच्छेथा यत्र गच्छेत् स वीर्यवान् ।
तमेकान्ते समासाद्य प्राञ्जलिश्शरणं व्रज ॥ २४

पृच्छेत् त्वां यदि केनाहं तवाख्यात इति स्म ह ।
ब्रूयास्त्वं नारदेनेति [1]संज्ञप्त इति शत्रुहन् ॥ २५

[2]स चेत् त्वामनुयुञ्जीत ममानुगमनेप्सया ।
शंसेथा वह्निमारूढं मामपि त्वमशङ्कया ॥ २६

व्यासः—

स तथेति प्रतिश्रुत्य पूजयित्वा च नारदम् ।

---

1. अ-संज्ञाप्त । क—सन्तृप्त ।
2. ख—स चेन्मा ।

अभ्यनुज्ञाप्य राजर्षिर् ययौ वाराणसीं पुरीम् ॥ २७

तत्र गत्वा यथोक्तं स पुर्या द्वारे महायशाः ।
कुणपं स्थापयामास नारदस्य वचस्स्मरन् ॥ २८

यौगपद्येन विप्रस्स पुरीद्वारं समाविशत् ।
ततस्स कुणपं दृष्ट्वा सहसा संन्यवर्तत ॥ २९

स तं निवृत्तमालोक्य प्राञ्जलिः पृष्ठतोऽन्वगात् ।
आविक्षितो महीपालस् संवर्तमुपवीक्षितुम् ॥ ३०

स चैनं विजने दृष्ट्वा पांसुभिः कर्दमेन च ।
श्लेष्मणा चैव राजानं ष्ठीवनैश्च समाकिरत् ॥ ३१

स तथा पीड्यमानोऽपि संवर्तेन महीपतिः ।
अन्वगादेव तमृषिं प्राञ्जलिस्सम्प्रसादयन् ॥ ३२

ततो निवृत्य संवर्तः परिश्रान्त उपाविशत् ।
शीतलच्छायमासाद्य न्यग्रोधं बहुशाखिनम् ॥ ३३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आश्वमेधिकपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

॥ ५१ ॥ अश्वमेधपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

[ अस्मिन्नध्याये ३३ श्लोकाः ]

## ॥ सप्तमोऽध्यायः ॥

संवर्तमरुत्तसंवादः ॥ १ ॥ संवर्तेन समयबन्धनपूर्वकं मरुत्तं प्रति याजनप्रतिज्ञानम् ॥ २ ॥

संवर्तः—

कथमस्मि त्वया ज्ञातः केन वा कथितोऽस्मि ते ।
एतदाचक्ष्व मे सत्यं जीवितं चेत् प्रियं तव ॥ १

सत्यं ते ब्रुवतस्सर्वे सम्पत्स्यन्ते मनोरथाः ।
मिथ्या प्रब्रुवतो मूर्धा सप्तधा ते फलिष्यति ॥ २

मरुत्तः—

नारदेन भवान् मह्यम्[1] आख्यातो गच्छता पथि ।
गुरुपुत्रो ममेति त्वं ततो मे प्रीतिरुत्तमा ॥ ३

संवर्तः—

[2]सत्यमेतद्ब्रुवानाह स मां जानाति सत्तम ।
कथयस्वैतदेवं मे क्व नु सम्प्रति नारदः ॥ ४

मरुत्तः—

[3]भवन्तं कथयित्वा तु मम देवर्षिसत्तमः ।
ततो मामभ्यनुज्ञाय प्रविष्टो हव्यवाहनम् ॥ ५

1. ब—श्रुतोऽसि मरुत्तं पथि । क—आख्यातो ह्यग्रतः पथि ।
ख—अटता पथि कुत्रचित् । 2. अ—अर्धद्वयं नास्ति ।
3. अ—नास्तीदमर्धम् ।

[1]याजनीयोऽहमधुना भवता मधुसत्तम ॥ ५॥

व्यासः—

श्रुत्वा तु पार्थिवस्यैतत् संवर्तः परया मुदा ।
एतावदहमप्येवं कुर्यामिति तमब्रवीत् ॥ ६॥

[2]ततस्संवर्त उन्मत्तो वाचा निर्भर्त्सयन्निव ।
रूक्षया ब्राह्मणो राजन् पुनः पुनरथाब्रवीत् ॥ ७॥

संवर्तः—

[3]मदप्रधानेन मया स्वचित्तवशवर्तिना ।
एवं विकृतरूपेण कथं याजितुमिच्छसि ॥ ८॥

भ्राता मम समर्थश्च वासवेन च सत्कृतः ।
वर्तते याजने चैव तेन कर्माणि कारय ॥ ९॥

[4]गार्हस्थ्यं चैव याज्याश्च सर्वा गृह्याश्च देवताः ।
पूर्वजेन ममाक्षिप्तं शरीरं वर्जितं त्विदम् ॥ १०॥

नाहं तेनाननुज्ञातस् त्वामाविक्षित कर्हिचित् ।
याजयेयं कथञ्चिद्वै स मे पूज्यतमो गुरुः ॥ ११॥

स त्वं बृहस्पतिं गच्छ तमनुज्ञाप्य [5]मां व्रज ।
ततोऽहं याजयिष्ये त्वां यदि यष्टुमिहेच्छसि ॥ १२॥

---

1. अ—कोश एकस्मिन्नेवेदमर्धमस्ति ।
2. ख-घ—ततो मरुत्तमुन्मत्तो ।
3. ख-घ—पादयानेन तु । क—मधुप्रयोगदानेन सचित्तपरिवर्तिना ।
4. अ—अर्धद्वयं न दृश्यते । 5. ख-घ—वा व्रज । क—चाग्रजम् ।

मरुत्तः—

[1]बृहस्पतिं गतः पूर्वम् अहं संवर्त तच्छृणु ।
न मां कामयते याज्यं मुनिर्वासववारितः ॥ १३॥

अमरं वासवं याज्यं महर्षे मा स्म मानुषम् ।
याजयेथा मरुत्तं त्वं मर्त्यधर्माणमित्युत ॥ १४॥

स्पर्धते हि मया विप्र सदा हि स हि वासवः ।
एवमस्त्विति चाप्युक्तो भ्रात्रा ते बलवृत्रहा ॥ १५॥

स मामधिगतं प्रेम्णा याज्यत्वे न बुभूषति ।
देवराजं समाश्रित्य तद्विद्धि मुनिपुङ्गव ॥ १६॥

सोऽहमिच्छामि भवता सर्वस्वेनापि याजितुम् ।
तं कामयेऽतिक्रमितुं वासवं त्वत्कृतैर्गुणैः ॥ १७॥

न हि मे वर्तते बुद्धिर् गन्तुं ब्रह्मन् बृहस्पतिम् ।
प्रत्याख्यातो हि तेनास्मि तथाऽनपकृते सति ॥ १८॥

संवर्तः—

चिकीर्षसि यथाकामं सर्वमेतत् त्वयि ध्रुवम् ।
यदि सर्वानभिप्रायान् कर्तासि मम पार्थिव ॥ १९॥

याज्यमानं मया हि त्वां बृहस्पतिपुरन्दरौ ।
द्विषेतां समभिक्रुद्धावेतदेकं समर्थयेः ॥ २०॥

स्थैर्यमत्र कथं मे स्यात् स त्वं निस्संशयं कुरु ।

---

1. अ—नव श्लोका न सन्ति।

कुपितस्त्वां न हीदानीं भस्म कुर्यां सबान्धवम् ॥ २१॥

मरुत्तः—

यावत् तपेत् सहस्रांशुस् तिष्ठेरंश्चापि पर्वताः ।
तावल्लोकान्न लभेयं त्यजेयं सङ्गतं यदि ॥ २२॥

[1]मा वाऽपि शुभबुद्धित्वं लभेयमिह कर्हिचित् ।
भोगेषु [2]सम्यग्भोगांश्च त्यजेयं सङ्गतं यदि ॥ २३॥

संवर्तः—

आविक्षित शुभा बुद्धिर् ध्रियतां सर्वकर्मसु ।
याजनं हि ममाप्येवं वर्तते त्वयि पार्थिव ॥ २४॥

संविधास्ये च ते राजन्नक्षयं द्रव्यमुत्तमम् ।
येन देवान् सगन्धर्वांञ् शक्रं चाभिभविष्यसि ॥ २५॥

न तु मे वर्तते बुद्धिर् धने नान्येषु वा पुनः ।
धर्मं चिकीर्षे विप्रियं भ्रातुरिन्द्रस्य चोभयोः ॥ २६॥

गमयिष्यामि चेन्द्रेण समतामपि ते ध्रुवम् ।
प्रियं च ते करिष्यामि सत्यमेतद्ब्रवीमि ते ॥ २७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
॥ ९१ ॥ अश्वमेधपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
[ अस्मिन्नध्याये २७॥ श्लोकाः ]

---

1. अ—यं चापि शुभबुद्धित्वं । क—भूश्चाविशुद्धबुद्धित्वं लब्धेय।
2. ख—सम्यगज्ञानात्।

## ॥ अष्टमोऽध्यायः ॥

संवर्तेन मरुत्तं प्रति हिमवत्सन्निहिते मुञ्जवति गिरौ महादेवस्य निवासकथनपूर्वकं स्वोक्तस्तोत्रेण स्तुत्वा तत्प्रसादनेन यागाय तत्तत्यबहुसुवर्णाहरणचोदना ॥ १ ॥ संवर्तेन तदाहरणेन शिल्पिभिर्यागोपयोगिभाण्डनिर्माणम् ॥ २ ॥ इन्द्रेण तच्छ्रवणनिर्विण्णस्य बृहस्पतेः समीपे प्रत्यागमनम् ॥ ३ ॥

संवर्तः—

मेरौ हिमवतः पृष्ठे मुञ्जवान् नाम पर्वतः ।
तप्यते यत्र [1]भगवांस् तपो नित्यमुमापतिः ॥ १

वनस्पतीनां मूलेषु शृङ्गेषु शिखरेषु च ।
गुहासु शैलराजस्य यथाकामं यथासुखम् ॥ २

उमासहायो भगवान् यत्र नित्यं महेश्वरः ।
आस्ते शूली महातेजा नानाभूतसमावृतः ॥ ३

तत्र रुद्राश्च साध्याश्च विश्वे च वसवस्तथा ।
यमश्च वरुणश्चैव कुबेरश्च सहानुगः ॥ ४

भूतानि च पिशाचाश्च नासत्यावपि चाश्विनौ ।
गन्धर्वाप्सरसश्चैव यक्षा देवर्षयस्तथा ॥ ५

आदित्या मरुतश्चैव यातुधानाश्च सर्वशः ।

1. क—भगवानास्ते । ख—तत्र भगवान् ।

उपासते महात्मानं बहुरूपमुमापतिम् ॥ ६

रमते भगवांस्तत्र कुबेरानुचरैस्सह ।
विकृतैर्विकृताकारैः क्रीडद्भिः पृथिवीपते ॥ ७

श्रिया ज्वलन् दृश्यते वै बालादित्यसमद्युतिः ॥ ७॥

न रूपं दृश्यते तस्य संस्थानं वा कथञ्चन ।
निर्देष्टुं प्राणिभिः कैश्चित् प्राकृतैर्मांसलोचनैः ॥ ८॥

नोष्णं न शिशिरं तत्र न वायुर्न च भास्करः ।
न जरा क्षुत्पिपासे वा न मृत्युर्न भयं नृप ॥ ९॥

तस्य शैलस्य पार्श्वेषु सर्वेषु जयतां वर ।
धातवो जातरूपस्य रश्मयस्सवितुर्यथा ॥ १०॥

रक्ष्यन्ते ते कुबेरस्य सहायैरुद्यतायुधैः ।
[1]चिकीर्षद्भिः प्रियं राजन् कुबेरस्य महात्मनः ॥ ११॥

तत्र गत्वा त्वमन्वास्य महायोगेश्वरं शिवम् ।
कुरु प्रणामं राजर्षे भक्त्या परमया युतः ॥ १२॥

तस्मै भगवते कृत्वा नमश्शर्वाय वेधसे ।
एभिस्तं नामभिर्देवं सर्वविद्याधरं स्तुहि ॥ १३॥

"रुद्राय शितिकण्ठाय सुरूपाय सुवर्चसे ।
कपर्दिने करालाय हर्यक्ष्णे वरदाय च ॥ १४॥

1. अ—अर्धश्लोकं नास्ति ।

त्र्यक्षे पूष्णो दन्तभिदे वामनाय शिवाय च ।
[1]याम्यायाव्यक्तकेशाय शर्वाणीशङ्कराय च ॥ १५॥

क्षेम्याय हरिनेत्राय स्थाणवे पुरुषाय च ।
हरिकेशाय मुण्डाय क्रोधायोत्तरणाय च ॥ १६॥

भास्वराय सुतीर्थाय देवदेवाय रंहसे ।
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे ॥ १७॥

गिरिशाय प्रशान्ताय यतये चीरवाससे ।
बिल्वदण्डाय [2]सिद्धाय सर्वदण्डधराय च ॥ १८॥

मृगव्याधाय महते धन्विने [3]च भवाय च ।
पराय सौम्यवक्त्राय स्रुवहस्ताय [4]वर्षिणे ॥ १९॥

हिरण्यबाहवे राजन्नुग्राय पतये दिशाम् ।
पशूनां पतये चैव भूतानां पतये नमः ॥ २०॥

वृषाय मातृभक्ताय सेनान्यै मध्यमाय च ॥ २१

[5]अभिवक्त्राय पतये सर्वदेवमयाय च ।
अजाय कृष्णनेत्राय विरूपाक्षाय चैव ह ॥ २२

तीक्ष्णदंष्ट्राय तीक्ष्णाय वैश्वानरमुखाय च ।

---

1. क—नास्तीदमर्धम् । 2. क—शिष्टाय सर्पदण्ड ।
3. अ-क—भार्गवाय च ।
4. ख-घ—चर्त्विजे । क—पशुहस्ताय वर्षिणे ।
5. घ—इदमर्धं नास्ति

[1]महाद्युतेरनङ्गस्य सर्वकायप्रमाथिने ॥ २३

तथा रुद्राधिपतये पृथवे कृत्तिवाससे ।
कपालमालिने नित्यं सुवर्णमकुटाय च ॥ २४

महादेवाय कृष्णाय त्र्यम्बकायानघाय च ॥ २४॥

क्रोधनायानृशंसाय मृत्यवे बाहुशालिने ।
दण्डिने दृप्ततपसे तथैवाक्रूरकर्मणे ॥ २५॥

सहस्रशिरसे चैव सहस्रचरणाय च ।
विरूपाय सुरूपाय बहुरूपाय दंष्ट्रिणे ॥ २६॥

पिनाकिनं महादेवं महाभोगिनमव्ययम् ।
त्रिशूलपाणिं वरदं त्र्यम्बकं भुवनेश्वरम् ॥ २७॥

त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ।
प्रभवं सर्वभूतानां धातारं धरणीधरम् ॥ २८॥

ईशानं शङ्करं सर्वं शिवं विश्वेश्वरं भवम् ।
उमापतिं पशुपतिं विश्वरूपं महेश्वरम् ॥ २९॥

विरूपाक्षं दशभुजं विष्यन्दं गोवृषध्वजम् ।
उग्रं स्थाणुं शिवं घोरं शर्वं गौरीशमीश्वरम् ॥ ३०॥

शितिकण्ठमजं शुभ्रं पृथुं पृथुहरं [2]शिवम् ।

---

1. अ-क—महात्मने चानङ्गाय सर्वाङ्गाय प्रमाथिने ।
2. ख—परम् । घ—वरं । क—विभुहरं हरम् ।

विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३१॥
प्रणम्य शिरसा देवम् अनङ्गाङ्गहरं हरम् ।
शरण्यं शरणं यामि महादेवं चतुर्मुखम् ॥ ३२॥
विरोचमानं वपुषा दिव्याभरणभूषितम् ।
अनाद्यन्तमजं शम्भुं सर्वव्यापिनमीश्वरम् ॥ ३३॥
निस्त्रैगुण्यं निरुद्वेगं निर्मलं निधिमोजसाम् ।
प्रणम्य प्राञ्जलिश्शर्वं प्रयामि शरणं हरम् ॥ ३४॥
सम्मान्यं निश्चलं नित्यम् अकारणमलेपनम् ।
अध्यात्मवेदमासाद्य प्रयामि शरणं मुहुः ॥ ३५॥
यस्य नित्यं विदुस्स्थानं मोक्षमध्यात्मचिन्तकाः ।
योगिनस्तत्वमार्गस्थाः कैवल्यं पदमक्षरम् ॥ ३६॥
यं विदुस्सङ्गनिर्मुक्तास् सामान्यं समदर्शिनः ।
तं प्रपद्ये जगद्योनिम् अयोनिं निर्गुणात्मकम् ॥ ३७॥
असृजद्यस्तु भूरादीन् सप्त लोकान् सनातनान् ।
स्थितस्सत्योपरि स्थाणुं तं प्रपद्ये सनातनम् ॥ ३८॥
भक्तानां सुलभं तं हि दुर्लभं दूरपातिनाम् ।
अदूरस्थममुं देवं प्रकृतेः परतस्स्थितम् ॥ ३९॥
नमामि सर्वलोकस्थं व्रजामि शरणं शिवम् " ॥ ४०
एवं कृत्वा नमस्तस्मै महादेवाय शम्भवे ।
महात्मने क्षितिपते तत् सुवर्णमवाप्स्यसि ॥ ४१

लभन्ते गाणपत्यं च तदेकाग्रा हि मानवाः ।
किं पुनस्स्वर्णभाण्डानि तस्मात् त्वं गच्छ मा चिरम् ॥ ४२
महत्तरं हि ते लाभं हस्त्यश्वोष्ट्रादिभिस्सह ।
सुवर्णमाहरिष्यन्तस् तत्र गच्छन्तु ते नराः ॥ ४३

व्यासः—

इत्युक्तस्तु वचस्तस्य चक्रे कारन्धमात्मजः ।
गङ्गाधरं नमस्कृत्य लब्धवान् धनमुत्तमम् ॥ ४४
कुबेर इव तत् प्राप्य महादेवप्रसादतः ।
ततोऽतिमानुषं सर्वं चक्रे यज्ञस्य संविधिम् ॥ ४५
सौवर्णानि च भाण्डानि सञ्चक्रुस्तस्य शिल्पिनः ।
शालाश्च सर्वसम्भारास् ततस्संवर्तशासनात् ॥ ४६
बृहस्पतिस्तु तां श्रुत्वा मरुत्तस्य महीपतेः ।
[1]समृद्धिमिति देवेभ्यस् सन्तापमकरोद्भृशम् ॥ ४७
सन्तप्यमानो वैवर्ण्यं कृशत्वं चागमत् परम् ।
भविष्यति हि मे शत्रुस् संवर्तो वसुमानिति ॥ ४८
तं श्रुत्वा भृशसन्तप्तं देवराजो बृहस्पतिम् ।
अभिगम्यामरघृतः प्रोवाचेदं वचस्तदा ॥ ४९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि संवर्तमरुत्तीयोऽष्टमोऽध्यायः ॥ ८ ॥
॥ ९१ ॥ अश्वमेधपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[ अस्मिन्नध्याये ४९ श्लोकाः ]

---

1. ख-च—समृद्धिमधिदेवस्य । क—समिद्धमिति देवेभ्यः सन्ताप ।

## ॥ नवमोऽध्यायः ॥

बृहस्पतिना इन्द्रं प्रति स्वानुजेन संवर्तेन मरुत्तस्य याजनकथनपूर्वकं तद्विघटनचोदना ॥ १ ॥ अग्निना मरुत्तमेत्य याजनाय बृहस्पतिस्वीकरण-रूपेन्द्रसन्देशकथनम् ॥ २ ॥ तथा पुनरिन्द्रमेत्य मरुत्तेन स्वसन्देशापरि-ग्रहणनिवेदनम् ॥ ३ ॥ तथा इन्द्रेण पुनर्मरुत्ते स्वसन्देशनिवेदनचोदने संवर्ततपोभयात् तदनङ्गीकरणम् ॥ ४ ॥

इन्द्रः—

कच्चित् सुखं स्वपिषि त्वं बृहस्पते
कच्चिन्मनोज्ञाः परिचारकास्ते ।
कच्चिद्देवानां सुखकामोऽसि विप्र
कच्चिद्देवास्त्वां सुभृशं पालयन्ति ॥ १

बृहस्पतिः—

सुखं शयेऽहं शयने महेन्द्र
तथा मनोज्ञाः परिचारका मे ।
तथा देवानां सुखकामोऽस्मि शक्र
देवाश्च मां सुभृशं पालयन्ति ॥ २

इन्द्रः—

कुतो दुःखं मानसं देहजं वा
पाण्डुर्विवर्णश्च कुतस्त्वमद्य ।
आचक्ष्व मे तद् द्विजवर्य याव-
न्निहन्मि सर्वांस्तव दुःखकर्तॄन् ॥ ३

बृहस्पतिः—

मरुत्तमाहुर्मघवन् यक्ष्यमाणं
महायज्ञेनोत्तमदक्षिणेन ।
तं संवर्तो याजयतीति मे श्रुतं
तदिच्छामि नस्स न तं याजयेत ॥ ४

इन्द्रः—

सर्वान् कामाननुजानासि विप्र
त्वं देवानां मन्त्रयसे पुरोधाः ।
उभौ च ते जन्ममृत्यू व्यतीतौ
किं संवर्तस्तव कर्ताऽद्य विप्र ॥ ५

बृहस्पतिः—

देवैस्सह त्वमसुरान् सम्प्रणुद्य
जिघांससे चाप्युत सानुबन्धान् ।
यं यं समृद्धं पश्यसि यत्र तत्र
दुःखं सपत्नेषु समृद्धभावः ॥ ६

अतोऽस्मि देवेन्द्र विवर्णरूपस्
[1]सपत्नो मे वर्धते तन्निशम्य ।
सर्वोपायैर्मघवंस्त्वं नियच्छ
संवर्तं वा पार्थिवं वा मरुत्तम् ॥ ७

1. क—सपत्नता ।

इन्द्रः—

एहि गच्छ प्रहितो जातवेदो
बृहस्पतिं परिदातुं मरुत्ते ।
अयं वै त्वां याजयिता बृहस्पतिस्
तथाऽमरं चैव करिष्यतीति ॥ ८

अग्निः—

अहं गच्छामि तव शक्राद्य दूतो
बृहस्पतिं परिदातुं मरुत्ते ।
वाचं सत्यां ते पुरुहूत कर्तुं
बृहस्पतेश्चापचितिं चिकीर्षन् ॥ ९

व्यासः—

ततः प्रायाद्धूमकेतुर्महात्मा
वनस्पतीन् वीरुधश्चावमृद्नन् ।
[1]कामाद्धिमान्ते परिवर्धमानः
[2]काष्ठामृतौ मातरिश्वेव मृद्नन् ॥ १०

मरुत्तः—

आश्चर्यमद्य पश्यामि रूपिणं वह्निमागतम् ।
आसनं सलिलं पाद्यं गां चोपानय वै मुने ॥ ११

अग्निः—

आसनं सलिलं पाद्यं प्रतिनन्दामि तेऽनघ ।

1. अ—नास्तीदमर्धम् । 2. अ-क—कृष्णभ्यथो ।

इन्द्रेण तु समादिष्टं विद्धि मां दूतमागतम् ॥ १२

मरुत्तः—

कच्चिच्छ्रीमान् देवराजस्सुखी[1]नः
कच्चिच्चास्माभिः प्रीयते धूमकेतो ।
कच्चिद्देवाश्चास्य वशे यथावत्
तद्ब्रूहि त्वं मम कात्स्न्र्येन देव ॥ १३

अग्निः—

शक्रो भृशं स सुखी पार्थिवेन्द्र
प्रीतिं चेच्छ[2]त्यजरां देवराजः ।
देवाश्च सर्वे वशगास्तस्य राजन्
सन्देशं तु शृणु मे देवराज्ञः ॥ १४

यदर्थं वै प्राहिणोत् त्वत्सकाशं
बृहस्पतिं परिदातुं मरुत्ते ।
अयं गुरुर्याजयतां नृप त्वां
मर्त्यं [3]सन्तममरं त्वां करोतु ॥ १५

मरुत्तः—

संवर्तो मे याजयिता द्विजोत्तमो
बृहस्पतेरञ्जलिरेष तस्य ।

---

1. अ-स्यात् । ख—वा ।
2. अ-त्यजत्वं । क—त्यजितो ।
3. ख-ब—सन्तममरं त्वां करोमि । क—सन्तममरत्वं करोति ।

नासौ देवं याजयित्वा महेन्द्रं
मर्त्यं सन्तं याजयन्नद्य शोभेत् ॥ १६

अग्निः—

[1]ये ये लोका देवलोके महान्तस्
सम्प्राप्स्यसे देवराजप्रसादात् ।
त्वां चेदसौ याजयेद्वै बृहस्पतिर्
नूनं स्वर्गं त्वं जयेः कीर्तियुक्तः ॥ १७

तथा लोका मानुषा ये च दिव्याः
प्रजापतेश्चापि ये वै महान्तः ।
एते च ते देवराज्यं च कृत्स्नं
बृहस्पतिश्चेद्याजयेत् त्वां नरेन्द्र ॥ १८

संवर्तः—

मा सौम्य त्वं पुनरागाः कथञ्चिद्
बृहस्पतिं परिदातुं मरुत्ते ।
मा त्वा धक्ष्ये चक्षुषा दारुणेन
सङ्क्रुद्धोऽहं पावक तन्निबोध ॥ १९

व्यासः—

ततो देवानागमद्धूमकेतुर्
दाहाद्भीतो [2]व्यथितोऽश्वत्थपर्णवत् ।

1. ख-घ—ये ये देवा देवलोके । 2. क—व्याधितोऽशुद्धवर्णः ।

तं वै दृष्ट्वा प्राह शक्रो महात्मा
बृहस्पतेस्सन्निधौ हव्यवाहम् ॥ २०

इन्द्रः—
यत् त्वं गतः प्रहितो जातवेदो
बृहस्पतिं परिदातुं मरुत्ते ।
तत् किं प्राह स नृपो यक्ष्यमाणः
कच्चिद्वचः प्रतिगृह्णाति तच्च ॥ २१

अग्निः—
न ते वाक्यं रोचयते मरुत्तो
बृहस्पतेरञ्जलिं प्राहिणो[1]त् सः ।
संवर्तो मां याजयितेत्यभीक्ष्णम्
पुनः पुनस्स मया प्रोच्यमानः ॥ २२

उवाचेदं मानुषा ये च दिव्याः
प्रजापतेर्ये च लोका महान्तः ।
तांश्चेल्लभेयं संविदं तेन कृत्वा
तथाऽपि नेच्छेयमिति प्रतीतः ॥ २३

इन्द्रः—
पुनर्भवान् पार्थिवं [2]त्वं समेत्य
वाक्यं मदीयं [3]प्रापयस्वार्थयुक्तम् ।

---

1. क—द् यः । 2. घ—तं । क—तं त्वमेत्य
3. क—प्रापयितार्थयुक्तम् । ख—प्रापयेदर्थयुक्तम् ।

पुनर्यदुक्तो न करिष्यते वचस्
ततो वज्रं सम्प्रहर्तास्मि तस्मै ॥ २४

अग्निः—

गन्धर्वराड् यात्वयं तत्र दूतो
बिभेम्यहं वासव तत्र गन्तुम् ।
संरब्धो मामुक्तवांस्तीक्ष्णरोषस्
संवर्तो वाक्यं चरितब्रह्मचर्यः ॥ २५

यद्यागच्छेः पुनरेवं कथञ्चिद्
बृहस्पतिं परिदातुं मरुत्ते ।
दहेयं त्वां चक्षुषा दारुणेन
सङ्क्रुद्ध इत्येतदवेहि शक्र ॥ २६

इन्द्रः—

त्वमेवान्यान् दहसे जातवेदो
न च त्वदन्यो विद्यते भस्मकर्ता ।
त्वत्संस्पर्शात् सर्वलोको बिभेति
न श्रद्धेयं भाषसे हव्यवाह ॥ २७

अग्निः—

दिवं देवेन्द्र पृथिवीं च सर्वां
संवेष्टयेस्त्वं स्वबलेनैव शक्र ।
एवंविधस्येह स यस्तवासौ
कथं वृत्रस्त्रिदिवं प्राग्जहार ॥ २८

इन्द्रः—

[1]न दण्डकान्न शकान्नो कलिङ्गा-
न्न कारूशात् सोमं प्रपिबामि वह्ने ।
न दुर्बलायावसृजामि वज्रं
[2]को मेऽसुखाय प्रहरेन्मनुष्यः ॥ २९

प्रव्राजयन् कालकेयान् पृथिव्याम्
अपाकर्षन् दानवानन्तरिक्षात् ।
[3]दिवः प्रभावादयमन्तमानयं
को मेऽसुखाय प्रहरेताद्य मर्त्यः ॥ ३०

अग्निः—

यत्र शर्यातिं च्यवनो याजयिष्यन्
सहाश्विभ्यां सोममेकोऽप्यगृह्णात् ।
न त्वं क्रुद्धः प्रत्यषेधीः पुरस्ताच्
छर्यातियज्ञं स्मर तं महेन्द्र ॥ ३१

वज्रं गृहीत्वा च पुरन्दर त्वं
सम्प्रहार्षीश्च्यवनस्यातिघोरम् ।

---

1. क-ख-न दण्डकान्न शकान्नो कलिङ्गान्नकारूशात् सोमं प्रपिबामि वह्ने ।
न दुर्बलाय विसृजामि वज्रं को मे सुखी यः प्रहरन्मनुष्यः ।
प्रव्राजयं
2. घ—को मां सुखाय प्रहरन् मनुष्यः ।
3. क—दिवः प्रह्लादमधमं तमोऽनयं को मे सुखी यः प्रहरेताद्य मर्त्यः ।
ख—नास्तीदमर्धम्

स ते विप्रस्सह वज्रेण बाहुम्
अपागृह्णात् तपसा जातमन्युः ॥ ३२

ततो रोषात् सर्वतो घोररूपं
[1]सपन्नं ते जनयामास विप्रः ।
मधुनामानमसुरं विश्वरूपं
यं त्वं दृष्ट्वा चक्षुषी संन्यमील्यः ॥ ३३

हनुरेका जगतीस्था तथैका
दिवं गता महतो दानवस्य ।
सहस्रं दन्तानां शतयोजनानां
सुतीक्ष्णानां घोररूपं बभूव ॥ ३४

[2]वृत्तास्स्थूला राजतस्तम्भवर्णा
दंष्ट्राश्चतस्रो द्वे शते योजनानाम् ।
स त्वां दन्तान् विदशन्नभ्यधावज्
जिघांसया शूलमुद्यम्य घोरम् ॥ ३५

तं नापश्यस्त्वं तदा घोररूपं
सर्वे त्वदन्ये ददृशुर्दर्शनीयम् ।
यस्माद्भीतः प्राञ्जलिस्त्वं महर्षिं
गच्छेऽशीघ्रं शरणं दानवघ्न ॥ ३६

1. अ—संहर्तं । 2. क—वृत्ताश्शूला रजत ।

क्षात्रादेव ब्रह्मबलं गरीयो
न ब्रह्मतः किञ्चिदन्यद्गरीयः ।
सोऽहं जानन् ब्रह्मतेजो यथाव-
न्न संवर्तं गन्तुमिच्छामि शक्र ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि नवमोऽध्यायः ॥ ९ ॥
॥ ९१ ॥ अश्वमेधपर्वणि नवमोऽध्यायः ॥ ९ ॥
[ अस्मिन्नध्याये ३७ श्लोकाः ]

## ॥ दशमोऽध्यायः ॥

इन्द्रेण गन्धर्वमुखाद् याज्ञनाथ बृहस्पतिवरणं चोदितेनापि मरुत्तेन तदनङ्गीकारे यज्ञविघाताय साटोपं यज्ञवाटं प्रत्यागमनम् ॥ १ ॥ संवर्तेन मरुत्तप्रार्थनया विद्याबलेनेन्द्रादीनां संस्तम्भनम् ॥ २ ॥ ततः संवर्तानुवर्तिनेन्द्रेण सभानिर्मापणादिना यज्ञनिर्वर्तनपूर्वकं देवैः सह हविर्ग्रहणम् ॥ ३ ॥ व्यासेनैवं युधिष्ठिरं प्रति मरुत्तयज्ञप्रवृत्तिप्रकारकथनपूर्वकं तच्छिष्टद्रव्याहरणेनाश्वमेधकरणविधानम् ॥ ४ ॥

इन्द्रः—
एवमेतद्ब्रह्मबलं गरीयो
न ब्रह्मतः किञ्चिदन्यद्गरीयः ।
आविक्षितस्येह बलं न मृष्ये
वज्रमस्मै प्रहरिष्यामि घोरम् ॥ १

धृतराष्ट्र गच्छ प्रहितो मरुत्तं
संवर्तेन संहितं तं वदस्व ।
बृहस्पतिं त्वमुपशिक्षस्व राजन्
वज्रं वा ते प्रहरिष्यामि घोरम् ॥ २

व्यासः—
ततो गत्वा धृतराष्ट्रो नरेन्द्रं
प्रोवाचेदं वचनाद् वासवस्य ॥ २॥

धृतराष्ट्रः—
गन्धर्व मां धृतराष्ट्रं निबोध
त्वामागतं वक्तुकामं नरेन्द्र ।
ऐन्द्रं वाक्यं शृणु मे राजसिंह
यत् प्राह लोकाधिपतिर्महात्मा ॥ ३॥

बृहस्पतिं याजकं त्वं वृणीष्व
वज्रं वा ते प्रहरिष्यामि घोरम् ।
वचश्चेदेतन्न करिष्यसे मे
प्राहैतदेतावदचिन्त्यकर्मा ॥ ४॥

बृहस्पतिं याजयितुं न चेच्छेद्
वज्रं तस्मै प्रहरिष्यामि घोरम् ॥ ५

मरुत्तः—
त्वं चैव तद्वेत्थ पुरुहूतश्च साध्या
विश्वे देवा वसवश्चाश्विनौ च ।

मित्रद्रोहे निष्कृतिर्वै यथेह
नास्तीति लोकेषु सदैव वादः ॥ ६

बृहस्पतिर्योजयिता महेन्द्रं
देवं श्रेष्ठं वज्रभृतां वरिष्ठम् ।
संवर्तो मां याजयिताऽद्य राजन्
न ते वाक्यं तस्य वा रोचयामि ॥ ७

धृतराष्ट्रः—

घोरो नादश्श्रूयते वासवस्य
नभस्तले गर्जतो राजसिंह ।
व्यक्तं वज्रं मोक्ष्यते ते महेन्द्रः
क्षेमं राजंश्चिन्त्यतामेष कालः ॥ ८

व्यासः—

इत्येवमुक्तो धृतराष्ट्रेण राजन्
श्रुत्वा नादं नदतो वासवस्य ।
तपोनित्यं ब्रह्मविदां वरिष्ठं
संवर्तं तं ज्ञापयामास कार्यम् ॥ ९

मरुत्तः—

पश्यात्मानं प्लवमानं त्वमाराद्
[1]अदूरतो देवराजं त्वमद्य ।

1. अ-ख-घ—अथवा दूरं तेन न दृश्यतेऽद्य ।

प्रपद्येऽहं शर्म विप्रेन्द्र भूयः
प्रयच्छ तस्मादभयं विप्रमुख्य ॥ १०

अयमायाति वै वज्री दिशो विद्योतयन् दश ।
[1]अमानुषेण नादेन सदस्यान् भीषयन्निव ॥ ११

संवर्तः—

भयं शक्राद्येतु ते राजसिंह
प्रणोत्स्येऽहं भयमेतत् सुघोरम् ।
संस्तम्भिन्या विद्यया [2]वज्रमेव
मा भैस्त्वमस्माद्भव चापि प्रतीतः ॥ १२

अहं संस्तम्भयिष्यामि मा भैस्त्वं शक्रतो नृप ।
सर्वेषामेव देवानां क्षपितान्यायुधानि मे ॥ १३

दिशो वज्रं व्रजताद् वायुरेतु
वर्षं भूत्वा वर्षतात् काननेषु ।
आपः प्लवन्त्वन्तरिक्षाद्दृढा च
सौदामिनी विद्यते मा बिभेस्त्वम् ॥ १४

[3]अधो वह्निर्यातु वा सर्वशस्ते
कामाद्वर्षं वर्षतु कामतो वा ।

---

1. ख-घ—तस्य सेनानिनादेन सदस्यास्त्रासिता हि मे ।
2. अ-ख-घ—क्षिप्रमेव ।
3. अ-घ—अधो वह्निस्थास्यतु सर्वशोऽपि

वज्रं तथा स्थापयिता च वायुः
महाघोरं प्लवमानं जलौघैः ॥ १५

मरुत्तः—

घोरश्शब्दश्श्रूयते वै महास्वनो
वज्रस्यैष संहितो मारुतेन ।
आत्माऽपि मे प्रव्यथते मुहुर्मुहुर्
न मे स्वास्थ्यं जायते ह्यद्य विप्र ॥ १६

संवर्तः—

वज्रादुग्राद्येतु भयं तवाद्य
वातो भूत्वा हन्मि नरेन्द्र वज्रम् ।
भयं त्यक्त्वा वरमन्यं वृणीष्व
कं ते कामं तपसा [1]योजयामि ॥ १७

मरुत्तः—

इन्द्रस्साक्षात् [2]सहसाऽभ्येतु विप्र
हविर्विद्वन् प्रतिगृह्णातु चैव ।
स्वं स्वं हविश्चैव जुषन्तु देवास्
सुतं सोमं प्रतिगृह्णन्तु चैव ॥ १८

संवर्तः—

अयमिन्द्रो हरिभिर्याति राजन्
देवैस्सर्वैस्सहितैस्सोमपीथी ।

1. ख-घ—साधयामि। 2. ख-घ—स्वयमागत्य यज्ञे ।

मन्त्राहूतो यज्ञमिमं मयाऽद्य
पश्यस्वैनं मन्त्रविस्रस्तकायम् ॥ १९

व्यासः—
ततो देवैस्सहितो देवराजो
रथे युक्त्वा तान् हरीन् वाजिमुख्यान् ।
आयाद्यज्ञमथ राज्ञः पिपासुर्
[1]आविक्षितस्याप्रमेयस्य सोमम् ॥ २०

तमायान्तं सहितं देवसङ्घैः
प्रत्युद्ययौ सपुरोधा मरुत्तः ।
चक्रे पूजां देवराजाय चाग्र्यां
यथाशास्त्रं विधिवत् प्रीयमाणः ॥ २१

संवर्तः—
सुस्वागतं ते पुरुहूतेह विद्वन्
[2]यज्ञोऽप्ययं सन्निहिते त्वयीन्द्र ।
शोशुभ्यते बलवृत्रघ्न भूयः
पिबस्व सोमं [3]सुखमुद्यतं मया ॥ २२

मरुत्तः—
शिवेन मां पश्य नमश्च तेऽस्तु
प्राप्तो यज्ञस्सफलं जीवितं मे ।

---

1. क—आविक्षितस्याप्रमेयस्य काममम् ।
2. क—यज्ञश्चायं स्वस्ति हुतस्त्वदिन्द्र ।
3. अ-ख-घ—सुतं मया मरुत्तः ।

अयं यज्ञं कुरुते मे सुरेन्द्र
बृहस्पतेरवरो जन्मना च ॥ २३

इन्द्रः—

जानामि ते गुरुमेतं तपोधनं
बृहस्पतेरनुजं तिग्मतेजसम् ।
[1]यस्याह्वानादागतोऽहं नरेन्द्र
प्रीतिर्मेऽद्य त्वयि मन्युः प्रणष्टः ॥ २४

संवर्तः—

यदि प्रीतस्त्वमसि वै देवराज
तस्मात् स्वयं शाधि यज्ञे विधानम् ।
स्वयं [2]सर्वान् कुरु मार्गान् नरेन्द्र
जानात्वयं सर्वलोकश्च देव ॥ २५

व्यासः—

एवमुक्तस्त्वाङ्गिरसेन शक्रस्
स व्यादिदेश स्वयमेव देवान् ॥ २५॥

इन्द्रः—

सभाः क्रियन्तामावसथाश्च मुख्यास्
सहस्रशश्चित्रभौमास्समृद्धाः ॥ २६

---

1. क—यस्याभ्याशादागतो मे नरेन्द्र ।
2. क—सर्वान् कुरु मूर्तानरेन्द्र जानात्वयं सर्वलोकांश्च ।
ख-घ—सर्वान् कुरुवर्गान् ।

कृत्तास्थूणाः कुरुतारोहणानि
गन्धर्वाणामप्सरसां च शीघ्रम् ।
येषु नृत्यन्त्यप्सरसस्सहस्रशस्
स्वर्गोद्देशः क्रियतां यज्ञवाटः ॥ २७

व्यासः—

इत्युक्तास्ते चक्रुराशु प्रतीता
[1]दिवौकसश्शक्रवाक्यान्नरेन्द्र ।
ततो वाक्यं प्राह [2]राजानमिन्द्रः
प्रीतो राजन् पूजयानो मरुत्तम् ॥ २८

इन्द्रः—

एष त्वाऽहमिह राजन् समेत्य
ये चाप्यन्ये तव पूर्वे नरेन्द्राः ।
सर्वाश्चान्या देवताः श्रीयमाणा
हविस्त्वत्तः प्रतिगृह्णन्तु राजन् ॥ २९

आग्नेयं वै लोहितमालभन्तां
वैश्वदेवं बहुरूपं च राजन् ।
नीलं चोक्षाणं मेध्यमद्यालभन्तां
विलोभ्य च्छित्त्वा मत्प्रतिष्ठां द्विजेन्द्राः ॥ ३०

1. क—दीक्षाकरा । 2. क—राजानमेत्य ।

व्यासः—

ततो यज्ञो ववृधे तस्य राज्ञो
यत्र देवास्स्वयमन्नानि जह्रुः ।
यस्मिन् शक्रो ब्राह्मणैः पूज्यमानस्
सदस्योऽभूद्धरिवान् देवराजः ॥ ३१

ततस्संवर्तश्चित्यगतो महात्मा
यथा वह्निः प्रज्वलितो द्वितीयः ।
हवींष्युच्चैराह्वयन् देवसङ्घान्
जुहावाग्नौ मन्त्रवत् सुप्रणीते ॥ ३२

ततः पीत्वा बलभित् सोममग्र्यं
ये चाप्यन्ये सोमपा वै दिवौकसः ।
सर्वेऽनुज्ञाताः प्रययुः पार्थिवेन
यथाजोषं तर्पिताः प्रीयमाणाः ॥ ३३

ततो राजा जातरूपस्य राशिं
पदे पदे कारयामास हृष्टः ।
[1]द्विजातिभ्यो विसृजन् भूरि वित्तं
रराज वित्तेश इवारिहन्ता ॥ ३४

1. क—द्विजातीनां निस्सृजन्।

ततो वित्तं [1]विधिवत् सन्निधाय
यथोत्साहं कारयित्वा च कोशम् ।
अनुज्ञातो गुरुणा सन्निवृत्त्य
शशास गामखिलां सागरान्ताम् ॥ ३५

एवङ्गुणस्सम्बभूवेह राजा
यस्य क्रतौ तत् सुबर्णं प्रभूतम् ।
तत् त्वं समादाय नरेन्द्र वित्तं
यजस्व देवांस्तपनीयैर्विधानैः ॥ ३६

वैशम्पायनः—

ततो राजा पाण्डवो हृष्टरूपश्
श्रुत्वा वाक्यं सत्यवत्यास्सुतस्य ।
मनश्चक्रे तेन वित्तेन यष्टुं
ततोऽमात्यैर्मन्त्रयामास भूयः ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि दशमोऽध्यायः ॥ १० ॥

॥ ९१ ॥ अश्वमेधपर्वणि दशमोऽध्यायः ॥ १० ॥

[ अस्मिन्नध्याये ३७ श्लोकाः ]

---

1. अ-क्ष-ञ—विविधं ।

## ॥ एकादशोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति शरीरस्थशत्रुजयार्थं इन्द्रवृत्रासुरयुद्धप्रकारकथनम् ॥ १ ॥

वैशम्पायनः—

इत्युक्ते नृपतौ तस्मिन् व्यासेनाद्भुतकर्मणा ।
वासुदेवो महातेजास् ततो वचनमाददे ॥ १

तं नृपं दीनमनसं निहतज्ञातिपबान्धवम् ।
उपप्लुतमिवादित्यं सधूममिव पावकम् ॥ २

[1]विषण्णमनसं पार्थं ज्ञात्वा वृष्णिकुलोद्वहः ।
आश्वासयन् धर्मसुतं [2]प्रवक्तुमुपचक्रमे ॥ ३

श्रीभगवान्—

सर्वं जिह्मं मृत्युपदम् आर्जवं ब्रह्मणः पदम् ।
एतावान् ज्ञानविषयः किं प्रलापः करिष्यति ॥ ४
नैव तेऽनुष्ठितं कर्म नैव ते शत्रवो जिताः ।
कथं शत्रुं शरीरस्थम् आत्मनो नावबुध्यसे ॥ ५
अत्र ते वर्तयिष्यामि यथाधर्मं यथाश्रुतम् ।
इन्द्रस्य सह वृत्रेण यथा युद्धमवर्तत ॥ ६
वृत्रेण पृथिवी व्याप्ता पुरा किल नराधिप ॥ ६॥

1. ख—निर्विण्ण। 2. ख-घ—ततो वचनमब्रवीत्।

दृष्ट्वा च पृथिवीं व्याप्तां गन्धस्य विषये हृते ।
धराहरणनिर्गन्धो विषयस्समपद्यत ॥ ७॥

[1]शतक्रतुश्चुकोपाथ गन्धस्य विषये हृते ।
वृत्रस्य यततः क्रुद्धो घोरं वज्रमवासृजत् ॥ ८॥

स वध्यमानो वज्रेण सुभृशं भूरितेजसा ।
विवेश सहसाऽम्भांसि जग्राह विषयं ततः ॥ ९॥

व्याप्ते चाम्भसि वृत्रेण रसस्य विषये हृते ।
[2]शतक्रतुरभिक्रुद्धस् तत्र वज्रमवासृजत् ॥ १०॥

[3]स वध्यमानो वज्रेण सलिले भूरितेजसा ।
विवेश सहसा ज्योतिर् जग्राह विषयं ततः ॥ ११॥

व्याप्ते ज्योतिषि वृत्रेण रूपस्य विषये हृते ।
शतक्रतुरभिक्रुद्धस् तत्र वज्रमवासृजत् ॥ १२॥

स वध्यमानो वज्रेण सुभृशं भूरितेजसा ।
विवेश सहसा वायुं जग्राह विषयं ततः ॥ १३॥

व्याप्ते वायौ च वृत्रेण स्पर्शस्य विषये हृते ।
शतक्रतुरभिक्रुद्धस् तत्र वज्रमवासृजत् ॥ १४॥

स वध्यमानो वज्रेण तस्मिन्नमिततेजसा ।

---

1. ख-घ—शतक्रतुश्च चुक्रोध । 2. क—अर्धार्धं नास्ति ।
3. ख—नास्तीदमर्धम् ।

[1]विवेश सहसाऽऽकाशं जग्राह विषयं ततः ॥ १५॥

आकाशे वृत्रभूतेऽथ शब्दस्य विषये हृते ।
शतक्रतुरभिक्रुद्धस् तत्र वज्रमवासृजत् ॥ १६॥

स वध्यमानो वज्रेण तस्मादमिततेजसा ।
[2]विवेश सहसा शक्रं जग्राह विषयं ततः ॥ १७॥

तस्य वृत्रगृहीतस्य मोहस्समं[3]भवन्महान् ।
रथन्तरेण तं साम्ना वसिष्ठः प्रत्यबोधयत् ॥ १८॥

ततो वृत्रं शरीरस्थं जग्राह भरतर्षभ ।
शतक्रतुरदृश्येन [4]वज्रेणेतीह नश्श्रुतम् ॥ १९॥

इदं धर्मरहस्यं तु शक्रेणोक्तं महर्षिषु ।
ऋषिभिश्च मम प्रोक्तं तन्निबोध नराधिप ॥ २०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि एकादशोऽध्यायः ॥ ११ ॥

॥ ९१ ॥ अश्वमेधपर्वणि एकादशोऽध्यायः ॥ ११ ॥

[ अस्मिन्नध्याये २०॥ श्लोकाः ॥

---

1. क-ङ—हृतश्लोकद्वयं नास्ति
2. ख-ङ—अभिदुद्राव तं ।
3. ख-ङ—भवत् तदा ।
4. क—वज्रेण म्यहनद्धृतम् । ख—वज्रेणेति हि ।

## ॥ द्वादशोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति शारीरमानसभेदेन व्याधेर्द्वैविध्याभिधानपूर्वकं तत्परिहारोपायकथनम् ॥ १ ॥

श्रीभगवान्—

द्विविधो जायते व्याधिश् शारीरो मानसस्तथा ।
परस्परं तयोर्जन्म निर्द्वन्द्वं [1]नोपलभ्यते ॥ १

शरीराज्जायते व्याधिश् शारीरो नात्र संशयः ।
मानसो जायते व्याधिः मनस्येवेति निश्चयः ॥ २

शीतोष्णे चैव वायुश्च गुणा राजन् शरीरजाः ।
तेषां गुणानां साम्यं चेत् तदाहुस्स्वस्थलक्षणम् ॥ ३

उष्णेन [2]बाध्यते शीतं शीतेनोष्णं च [2]बाध्यते ॥ ३॥

[3]सत्वं रजस्तमश्चेति त्रयस्त्वात्मगुणास्स्मृताः ।
तेषां गुणानां साम्यं चेत् तदाहुस्स्वस्थलक्षणम् ॥ ४॥

तेषामन्यतमोत्सेके विधानमुपदिश्यते ।
हर्षेण बाध्यते शोको हर्षश्शोकेन बाध्यते ॥ ५॥

कश्चिद्दुःखे वर्तमानस् सुखस्य स्मर्तु[4]मर्हति ।
कश्चित् सुखे वर्तमानो दुःखस्य स्मर्तुमर्हति ॥ ६॥

1. क—नोपपद्यते । 2. ख—वध्यते ।
3. क—सत्वं रजस्तम इति त्रयस्त्वात्मगुणा मताः
4. ख-घ—मिच्छति । क—मर्हसि ।

स त्वं न दुःखी दुःखस्य न सुखी त्वं सुखस्य च ।
स्मर्तु[1]मर्हसि कौन्तेय दैवं हि बलवत्तरम् ॥ ७॥
अथवा ते स्वभावोऽयं येन पार्थावकृष्यसे ॥ ८

दृष्ट्वा सभागतां कृष्णाम् एकवस्त्रां रजस्वलाम् ।
मिषतां पाण्डवेयानां [2]न तत् संस्मर्तुमर्हसि ॥ ९

प्रव्राजनं च नगराद् अजिनैश्च विवासनम् ।
महारण्यनिवासं च न तस्य स्मर्तुमर्हसि ॥ १०

जटासुरात् परिक्लेशं चित्रसेनेन चाहवम् ।
सैन्धवाच्च परिक्लेशं न तस्य स्मर्तुमिच्छसि ॥ ११

पुनरज्ञातचर्यायां कीचकेन [3]पदा वधम् ।
याज्ञसेन्यास्तथा पार्थ न तस्य स्मर्तुमिच्छसि ॥ १२

यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिन्दम ।
[4]मनसैकेन बोद्धव्यं तत् ते युद्धमुपस्थितम् ॥ १३

[5]तस्मादभ्युपगन्तव्यं युद्धाय भरतर्षभ ।

---

1. अ-ख-घ—मिच्छसि ।
2. क—स्मर्तुं तत् त्वमिहार्हसि । ख—न तत् संस्मर्तुमिच्छसि ।
3. क—पराभवम् ।
4. क—मन्येऽहं केन योद्धव्यं न ते । ख—मनसैकेन योद्धव्यं ।
5. घ—इतश्लोकचतुष्टयं नास्ति । क—अर्धद्वयं नास्ति ।
ख—अर्धचतुष्टयं नास्ति ।

परमव्यक्तरूपस्य परं युक्त्वा स्वकर्मभिः ॥ १४

[1]यच्च ते वशगैः कार्यं न मित्रैर्न च सैनिकैः ।
आत्मनैकेन [2]कर्तव्यं तत् ते युद्धमुपस्थितम् ॥ १५

तस्मिन्ननिर्जिते युद्धे कामवस्थां गमिष्यसि ।
एतज्ज्ञात्वा तु कौन्तेय कृतकृत्यो भविष्यसि ॥ १६

एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिम् ।
पितृपैतामहे [3]वृत्ते शाधि राज्यं यथोचितम् ॥ १७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
॥ ९१ ॥ अश्वमेधपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
[ अस्मिन्नध्याये १७ श्लोकाः ।

---

## ॥ त्रयोदशोऽध्यायः ॥

कामस्य शक्तिकथनेन दुर्जयत्वकथनपूर्वकं तज्जयोपायकथनम् ॥ १ ॥

श्रीभगवान्—

न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत ।
शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा ॥ १

बाह्यद्रव्यविमुक्तस्य शारीरेषु च [4]गृध्यतः ।

---

1. क—यच्च नैव शरैः कार्यं न मित्रैर्न च सैनिकैः।
2. क—योद्धव्यं तत् ते । 3. ख-घ—राज्ये। 4. ख-घ—गृह्णतः ।

यो धर्मो यत् सुखं चैव द्विषतामस्तु तत् तव ॥ २

द्व्यक्षरस्तु भवेन्मृत्युस् त्र्यक्षरं [1]ब्रह्म शाश्वतम् ।
ममेति द्व्यक्षरो मृत्युर् न ममेति च शाश्वतम् ॥ ३

जन्ममृत्यू ततो राजन्नात्मन्येव व्यवस्थितौ ।
अदृश्यमानौ भूतानि योधयेतामसंशयम् ॥ ४

अविनाशोऽस्य तत्त्वस्य नियतो यदि भारत ।
[2]हत्वा शरीरं भूतानाम् अहिंसा प्रतिपद्यते ॥ ५

लब्ध्वाऽपि पृथिवीं सर्वां सहस्थावरजङ्गमाम् ।
ममत्वं यस्य नैव स्यात् किं तया स करिष्यति ॥ ६

अथवा वसतः पार्थ वने वन्येन जीवतः ।
ममता यस्य वित्तेषु मृत्योरास्ये स वर्तते ॥ ७

बाह्यान्तराणां शत्रूणां स्वभावं पश्य भारत ।
योऽनुपश्यति तद्भूतं मुच्यते स महाभयात् ॥ ८

कामात्मानं न प्रशंसन्ति [3]सर्वे
न चाकामात् काचिदस्ति प्रवृत्तिः ।
दानं हि वेदाध्ययनं तपश्च
कामेन कर्माणि च वैदिकानि ॥ ९

---

1. अ-क—धर्म । 2. ख-घ—जित्वा ।
3. लोके ।

व्रतं यज्ञान् नियमान् ध्यानयोगान्
कामेन यो नारभते विदित्वा ।
[1]यदव्ययं कामयते स धर्मो
योऽयं धर्मो नियमस्तस्य मूलम् ॥ १०

अत्र गाथाः कामगीताः कीर्तयन्ति पुराविदः ।
शृणु सङ्कीर्त्यमानास्ता निखिलेन नराधिप ॥ ११

कामः--

नाहं शक्योऽनुपायेन हन्तुं भूतेन केनचित् ॥ ११॥
यो मां प्रयतते हन्तुं ज्ञात्वा प्रहरणे बलम् ।
तस्य तस्मिन् प्रहरणे पुनः प्रादुर्भवाम्यहम् ॥ १२॥
यो मां प्रयतते हन्तुं यज्ञैर्विविधदक्षिणैः ।
जङ्गमेष्विव कर्मात्मा पुनः प्रादुर्भवाम्यहम् ॥ १३॥
यो मां प्रयतते हन्तुं वेदैर्वेदाङ्गसाधकैः ।
स्थावरेष्विव शान्तात्मा [2]पुनः प्रादुर्भवाम्यहम् ॥ १४॥
यो मां प्रयतते हन्तुं धृत्या सत्यपराक्रमः ।
भावो भवामि तस्याहं स च मां नावबुध्यते ॥ १५॥
यो मां प्रयतते हन्तुं तपसा संशितव्रतः ।
ततस्तपसि तस्याथ पुनः प्रादुर्भवाम्यहम् ॥ १६॥

1. अ—यदप्ययं । क—यदि व्ययं । 2. ख—तस्य ।

यो मां प्रयतते हन्तुं मोक्षमास्थाय पण्डितः ।
तस्य मोक्षमतिस्थस्य नृत्यामि च हसामि च ॥ १७॥
अवध्यस्सर्वभूतानाम् अहमेकस्सनातनः ॥ १८

श्रीभगवान्—

तस्मात् त्वमपि तं कामं यज्ञैर्विविधदक्षिणैः ।
धर्मं कुरु महाराज तत्र ते न भविष्यति ॥ १९

[1]यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।
अन्यैश्च विविधैर्यज्ञैस् समृद्धैराप्तदक्षिणैः ॥ २०
[2]धर्मं कुरु महाराज तत्र ते न भविष्यति ॥ २०॥

मा ते व्यथा भून्निहतान् बन्धून् वीक्ष्य पुनः पुनः ।
न शक्यास्ते पुनर्द्रष्टुं हता येऽस्मिन् रणाजिरे ॥ २१॥

स त्वमिष्ट्वा महायज्ञैस् समृद्धैराप्तदक्षिणैः ।
लोके कीर्तिं परां प्राप्य गतिमग्र्यां गमिष्यसि ॥ २२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

॥ ९१ ॥ अश्वमेधपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

[ अस्मिन्नध्याये २२॥ श्लोकाः ]

---

1. क—नास्त्ययं श्लोकः
2. ख-घ—नास्तीदमर्धम्

## ॥ चतुर्दशोऽध्यायः ॥

व्यासनारदकृष्णादिभिर्बन्धुनिधनपरिशोचिनो युधिष्ठिरस्य समाश्वासनेन ऋषीणां तत्रैवान्तर्धानम् ॥ १ ॥ युधिष्ठिरेण भीष्मादीनामौर्ध्वदैहिकं कृत्वा हास्तिननगरप्रवेशः ॥ २ ॥

वैशम्पायनः—

एवं बहुविधैर्वाक्यैर् मुनिभि[1]स्तैस्तपोधनैः ।
समाश्वस्तस्तु राजर्षिर् हतबन्धुर्युधिष्ठिरः ॥ १

सोऽनुनीतो भगवता विष्टरश्रवसा स्वयम् ।
द्वैपायनेन [2]कृष्णेन देवस्थानेन [3]चैव हि ॥ २

नारदेनाथ भीमेन नकुलेन च पार्थिव ।
कृष्णया सहदेवेन विजयेन च धीमता ॥ ३

अन्यैश्च पुरुषव्याघ्रैर् ब्राह्मणैश्शास्त्रदृष्टिभिः ।
व्यजहाच्छोकजं दुःखं सन्तापं चैव मानसम् ॥ ४
अर्चयामास देवांश्च ब्राह्मणांश्च युधिष्ठिरः ॥ ४॥

कृत्वा च प्रेतकार्याणि सर्वेषां कुरुनन्दनः ।
अन्वशासत धर्मात्मा पृथिवीं सागराम्बराम् ॥ ५॥

प्रशान्तचेताः कौरव्यस् स्वराज्यं प्राप्य केवलम् ।

---

1. ख-घ—स्तैर्महात्मभिः । 2. ख-घ—व्यासेन ।
3. क—चाभिभूः । ख—चाभिभो ।

व्यासं च नारदं चैव तांश्चान्यानब्रवीन्नृपः ॥ ६॥

युधिष्ठिरः—

आश्वासितोऽहं [1]प्राग्वृद्धैर् भवद्भिर्मुनिपुङ्गवैः ।
न स्तोकमपि नः किञ्चिद् व्यलीकमिह विद्यते ॥ ७॥

अर्थश्च सुमहान् प्राप्तो येन यक्ष्यामि देवताः ।
पुरस्कृत्येह भवतस् समानेष्याम्यतो मखम् ॥ ८॥

हिमवन्तं त्वया गुप्ता गमिष्यामः पितामह ।
बह्वाश्चर्यो हि देशस्स श्रूयते द्विजसत्तम ॥ ९॥

तथा भगवता चित्रं कल्याणं बहु भाषितम् ।
देवर्षिणा नारदेन देवस्थानेन चैव ह ॥ १०॥

नाभागधेयः पुरुषः कश्चिदेवंविधान् [2]गुरून् ।
लभते व्यसनं प्राप्य सुहृदस्साधुसम्मतान् ॥ ११॥

वैशम्पायनः—

एवमुक्तास्तु ते राज्ञा सर्व एव महर्षयः ।
अभ्यनुज्ञाप्य राजानं तथोभौ कृष्ण[3]फल्गुनौ ॥ १२॥

पश्यतामेव सर्वेषां तत्रैवादर्शनं ययुः ॥ १३
ततो धर्मसुतो राजा तत्रैवोपाविशत् प्रभुः ।
एवं नातिमहान् कालस् स तेषामत्यवर्तत ॥ १४

1. क-ख—भगवन् पूर्वदृष्टैर्महर्षिभिः ।
2. क—बहून् । 3. ख-घ—पाण्डवौ ।

कुर्वतां शौचकर्माणि भीष्मस्य निधने तथा ।
महादानानि विप्रेभ्यो ददतामौर्ध्वदैहिकम् ॥ १५
भीष्मकर्णपुरोगाणां कुरूणां कुरुनन्दन ।
सहितो धृतराष्ट्रेण स ददावौर्ध्वदैहिकम् ॥ १६
ततो दत्त्वा बहु धनं विप्रेभ्यः पाण्डुनन्दनः ।
धृतराष्ट्रं पुरस्कृत्य विवेश गजसाह्वयम् ॥ १७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
॥ ९१ ॥ अश्वमेधपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
[ अस्मिन्नध्याये १७ श्लोकाः ]

---

## ॥ पञ्चदशोऽध्यायः ॥

वैशम्पायनेन जनमेजयं प्रति युधिष्ठिरस्य प्रजापालनकाले प्रजादीनामभ्युदयप्रकारवर्णनम् ॥ १ ॥

---

वैशम्पायनः—

स समाश्वास्य पितरं प्रज्ञाचक्षुषमीश्वरम् ।
अन्वशासत धर्मात्मा पृथिवीं भ्रातृभिस्सह ॥ १
यथा मनुर्महाराजो रामो दाशरथिर्यथा ।
तथा भरतसिंहोऽपि पालयामास मेदिनीम् ॥ २

नाधर्म्यमभवत् तत्र सर्वो धर्मरुचिर्जनः ।
बभूव नरशार्दूल यथा कृतयुगे तथा ॥ ३

कलिमासन्नमाविष्टं [1]निवास्य नृपनन्दनः ।
भ्रातृभिस्सहितो धीमान् [2]बभौ धर्मबलोद्धतः ॥ ४

ववर्ष भगवान् देवः काले देशे [3]यथेप्सितम् ।
निरामयं जगदभूत् क्षुत्पिपासे न किञ्चन ॥ ५

आधिर्नास्ति मनुष्याणां व्यसने नाभवन्मतिः ।
ब्राह्मणप्रमुखा वर्णास् ते स्वधर्मोत्तरा[4]श्शिवाः ॥ ६

धर्मस्सत्यप्रधानश्च सत्यं सद्विषयान्वितम् ॥ ६॥
[5]धर्मासनस्थस्साद्विस्स स्त्रीबालातुरवृद्धकान् ।
[6]वर्णाश्रमान् पूर्वकृतान् सकलान् रक्षणोद्यतः ॥ ७॥
अवृत्तिवृत्तिदानाद्यैर् [7]यज्ञार्थैर्दापितैरपि ॥
आमुष्मिकं भयं नास्ति ऐहिकं कृतमेव तु ॥ ८॥
स्वर्गलोकोपमो लोकस् तदा तस्मिन प्रशासति ।
बभूव सुखमेकाग्रं तद्विशिष्टतरं परम् ॥ ९॥

---

1. घ—निवार्य । 2. ख-घ—ययौ ।
3. ख-व—यथाविधि । 4. क—शुभाः ।
5. अ—नास्तीदमर्धम्
6. ख—वर्णश्रमान् पूर्वकृतान् नाकाले रक्षणोद्यतः ।
7. अ-क—यज्ञाद्यैर्व्याधितैरपि ।

नार्यः पतिव्रतास्सर्वा रूपवत्यस्स्वलङ्कृताः ।
यथोक्तवृत्तास्स्वगुणैर् बभूवुः प्रीतिहेतवः ॥ १०॥

पुमांसः पुण्यशीलाढ्यास् स्वं स्वं धर्ममनुव्रताः ।
सुखिनस्सूक्ष्ममप्येनो न कुर्वन्ति कदाचन ॥ ११॥

सर्वे नराश्च नार्यश्च सततं प्रियवादिनः ।
अजिह्मनसश्शुक्ला बभूवुश्श्रमवर्जिताः ॥ १२॥

भूषिताः कुण्डलैर्हारैः कटकैः कटिसूत्रकैः ।
सुवाससस्सुगन्धाढ्याः प्रायशः पृथिवीतले ॥ १३॥

सर्वे ब्रह्मविदो विप्रास् सर्वत्र परिनिष्ठिताः ।
वलीपलितहीनास्तु सुखिनो दीर्घ[1]जीविनः ॥ १४॥

इच्छा न जायतेऽन्यत्र वर्णेषु च न सङ्करः ।
मनुष्याणां महाराज मर्यादासु व्यवस्थिताः ॥ १५॥

तस्मिञ् शासति राजेन्द्रे मृगव्यालसरीसृपाः ।
अन्योन्यमपि चान्येषु न बाधन्ते कदाचन ॥ १६॥

[2]गावस्सुक्षीरभूयिष्ठास् सुधालधिमुखोदराः ।
अपीडिताः कर्षकाद्यैर् हृतव्याधितवत्सकाः ॥ १७॥

अवन्ध्यकाला मनुजाः पुरुषार्थेषु च क्रमात् ।
विषयेष्वनिषिद्धेषु वेदशास्त्रेषु चोद्यताः ॥ १८॥

---

1. क—दर्शिनः 2. अ—नास्तीदमर्धम्

सुवृत्ता वृषभाः पुष्टास् सुस्वभावास्सुखोदयाः ॥ १९

अतीव मधुरश्शब्दस् स्पर्शश्चातिसुखं रसम् ।
रूपं दृष्टिक्षमं रम्यं मनोज्ञं गन्धवद्बभौ ॥ २०

धर्मार्थकामसंयुक्तं मोक्षाभ्युदयसाधनम् ।
प्रह्लादजननं पुण्यं सम्बभूवाथ मानसम् ॥ २१

स्थावरा बहुपुष्पाढ्याः फलच्छायावहास्तथा ।
सुस्पर्शा विषहीनाश्च सुपत्रत्वक्प्ररोहिणः ॥ २२

मनोनुकूलास्सर्वेषां चेष्टा भूतापवर्जिताः ।
तथा बभूव राजर्षिस् तद्वृत्तमभवद्भुवि ॥ २३

सर्वलक्षणसम्पन्नाः पाण्डवा धर्मचारिणः ।
ज्येष्ठानुवर्तिनस्सर्वे बभूवुः प्रियदर्शनाः ॥ २४

सिंहोरस्का जितक्रोधास् तेजोबलसमन्विताः ।
आजानुबाहवस्सर्वे दानशीला जितेन्द्रियाः ॥ २५

तेषु शासत्सु धरणीम् ऋतवस्स्वगुणैर्बभुः ।
सुखोदयाय वर्तन्ते ग्रहास्तारागणैस्सह ॥ २६

मही सस्यप्रबहुला सर्वरत्नगुणोदया ।
कामधुग्धेनुवद्भोगान् फलति स्म सहस्रधा ॥ २७

मन्वादिभिः कृताः पूर्वं मर्यादा मानवेषु याः ॥ २७॥

[1]अनतिक्रम्य तास्सर्वाः कुलेषु समयानि च ।
अन्वशासन्त राजानो धर्मपुत्रप्रियङ्कराः ॥ २८॥

महाकुलानि धर्मिष्ठा वर्धयन्तो विशेषतः ।
मनुप्रणीतया वृत्त्या तेऽन्वशासन् वसुन्धराम् ॥ २९॥

राजवृत्तिर्हि सा शश्वद् धर्मिष्ठाऽभून्महीतले ।
प्रायो लोकमतिस्तात राजवृत्तानुगामिनी ॥ ३०॥

एवं भरतवर्षं स्वं राजा स्वर्गे सुरेन्द्रवत् ।
शशास विष्णुना सार्धं गुप्तो गाण्डीवधन्वना ॥ ३१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

॥ ९१ ॥ अश्वमेधपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

[ अस्मिन्नध्याये ३१॥ श्लोकाः ]

---

## ॥ षोडशोऽध्यायः ॥

वैशम्पायनेन कुरुविजयानन्तरं हास्तिनपुरे कृष्णार्जुनविहारप्रकारवर्णनम् ॥१॥ कृष्णेनार्जुनं प्रति युधिष्ठिरे स्वस्य निजनगरजिगमिषानिवेदनचोदना ॥ २ ॥

---

जनमेजयः—

विजिते पाण्डवेयैस्तु प्रशान्ते च द्विजोत्तम ।
राष्ट्रे किं चक्रतुर्वीरौ वासुदेवधनञ्जयौ ॥ १

---

1. ख-घ—इतश्श्लोकद्वयं नास्ति

वैशम्पायनः—

[1]विजिते पाण्डवै राजन् प्रशान्ते च विशाम्पतौ ।
राष्ट्रे बभूवतुर्हृष्टौ वासुदेवधनञ्जयौ ॥ २
विजह्रते मुदा युक्तौ दिवि देवेश्वराविव ॥ २॥
तौ वनेषु विचित्रेषु पर्वतानां च सानुषु ।
शैलेषु [2]गह्वरारण्ये पल्वलेषु नदीषु च ॥ ३॥
चङ्क्रम्यमाणौ संहृष्टावश्विनाविव नन्दने ।
इन्द्रप्रस्थे महात्मानौ रेमाते कृष्णपाण्डवौ ॥ ४॥
प्रविश्य तां सभां रम्यां विजह्रते च भारत ॥ ५
तत्र युद्धकथाश्चित्राः परिक्लेशांश्च भारत ।
कथायोगे कथायोगे कथयामासतुस्सदा ॥ ६
[3]ऋषीणां देवतानां च वंशान् व्याहरतां तदा ।
प्रीयमाणौ महात्मानौ पुराणाद्यृषिसत्तमौ ॥ ७
मधुरास्तु कथाश्चित्राश् चित्रार्थपदनिश्चयाः ।
निश्चयज्ञस्स पार्थाय कथयामास केशवः ॥ ८
पुत्रशोकाभिसन्तप्तं ज्ञातीनां च सहस्रशः ।
कथाभिरशमयामास पार्थं शौरिर्जनार्दनः ॥ ९

1. अ-घ—अर्धद्वयं न दृश्यते
2. ख-घ—रमणीयेषु । क—च रम्येषु ।
3. घ—नास्तीदमर्धम्

स तमाश्वास्य विधिवद् विधानज्ञो महातपाः ।
अपहृत्यात्मनो भारं विशश्राम ससात्वतः ॥ १०

ततः कथान्ते गोविन्दो गुडाकेशमुवाच ह ।
सान्त्वयन् श्लक्ष्णया वाचा हेतुयुक्तमिदं वचः ॥ ११

श्रीभगवान्—

विजितेयं धरा कृत्स्ना सव्यसाचिन् परन्तप ।
त्वद्बाहुबलमाश्रित्य राज्ञा धर्मसुतेन ह ॥ १२

असपत्नां महीं भुङ्क्ते धर्मराजो युधिष्ठिरः ।
भीमसेनप्रतापेन यमयोश्च नरोत्तम ॥ १३

धर्मेण राज्ञा धर्मज्ञ प्राप्तं राज्यमकण्टकम् ।
धर्मेण निहतस्सङ्ख्ये स च राजा सुयोधनः ॥ १४

अधर्मरुचयो लुब्धास् सदा चाप्रियवादिनः ।
धार्तराष्ट्रा दुरात्मानस् सानुबन्धा निपातिताः ॥ १५

प्रशान्तामखिलां पार्थ पृथिवीं पृथिवीपतिः ।
भुङ्क्ते धर्मसुतो राजा त्वया गुप्तः कुरूद्वह ॥ १६

रमे चाहं त्वया सार्धम् अरण्येष्विह पाण्डव ।
किमु यत्र जनोऽयं वै पृथा चामित्रकर्शन ॥ १७

यत्र धर्मसुतो राजा यत्र भीमो महाबलः ।
यत्र माद्रवतीपुत्रौ रतिस्तत्र परा मम ॥ १८

तथैव स्वर्ग[1]कल्पेषु सभोद्देशेषु भारत ।
रमणीयेषु पुण्येषु सहितस्य त्वयाऽनघ ॥ १९

कालो महांस्त्वतीतो मे शूरपुत्रमपश्यतः ।
बलदेवं च कौरव्य तथाऽन्यान् वृष्णिपुङ्गवान् ॥ २०

सोऽहं गन्तुमभीप्सामि पुरीं द्वारवतीं प्रति ।
रोचतां गमनं तुभ्यं ममापि भरतर्षभ ॥ २१

उक्तो बहुविधं राजा तत्र तत्र युधिष्ठिरः ।
सह भीष्मेण यद्युक्तम् अस्माभिश्शोककर्शितः ॥ २२

शिष्टो युधिष्ठिरोऽस्माभिश् शास्ता सन्नपि पाण्डवः ।
तेन तच्च वचस्सम्यग् गृहीतं सुमहात्मना ॥ २३

धर्मपुत्रे हि धर्मज्ञे कृतज्ञे सत्यवादिनि ।
सत्यं धर्मो मतिश्चाग्र्या स्थितिश्च सततं स्थितौ ॥ २४

तद्वत्वा तं महात्मानं यदि ते रोचतेऽर्जुन ।
अस्मद्गमनसंयुक्तं वचो ब्रूहि जनाधिपम् ॥ २५

न हि तस्याप्रियं कुर्या प्राणत्यागेऽप्युपस्थिते ।
कुतो गन्तुं महाबाहो पुरीं द्वारवतीं प्रति ॥ २६

सर्वमेतद्हं पार्थ त्वत्प्रीतिहितकाम्यया ।
ब्रवीमि सत्यं कौरव्य न मिथ्यैतत् कथञ्चन ॥ २७

1. क—लोकेषु सल्लोकेषु च भारत ।

[1]प्रयोजनं च निर्वृत्तम् इह वासेन मेऽर्जुन ।
[2]धार्तराष्ट्रो हतो राजा सबलस्सपदानुगः ॥ २८

पृथिवी च वशे तात धर्मपुत्रस्य धीमतः ।
स्थिता समुद्रवसना सशैलवनकानना ॥ २९
[3]चिता रत्नैर्बहुविधैः कुरुराजस्य पाण्डव ॥ २९॥
धर्मेण राजा धर्मज्ञः पातु सर्वां वसुन्धराम् ।
उपास्यमानो मुनिभिस् सिद्धैश्चापि महात्मभिः ॥ ३०॥
संस्तूयमानस्सततं वन्दिभिर्भरतर्षभ ॥ ३१
त्वं मया सह गत्वाऽद्य राजानं कुरुवर्धनम् ।
आपृच्छ कुरुशार्दूलं गमनं द्वारकां प्रति ॥ ३२

इदं शरीरं वसु यच्च मे गृहे
निवेदितं पार्थ सदा युधिष्ठिरे ।
प्रियश्च मान्यश्च हि मे युधिष्ठिरस्
सदा कुरूणामधिपो महामतिः ॥ ३३

प्रयोजनं चापि विवासकारणे
न विद्यते मे त्वदृते महाभुजे ।
स्थिता हि पृथ्वी तव पार्थ शासने
गुरोस्सुवृत्तस्य युधिष्ठिरस्य हि ॥ ३४

---

1. अ—इदमर्धं न दृश्यते 2. क—धर्मेण राजा धर्मज्ञस् सबल ।
3. क—धार्तराष्ट्रो हतो राजा सबलस्सपदानुगः । (अधिकः पाठः)

इतीदमुक्तस्स तदा महात्मना
जनार्दनेनामितविक्रमोऽर्जुनः ।
तथेति कृच्छ्रादिव वाचमीरयन्
जनार्दनं सम्प्रतिपूज्य पार्थिवः ॥ ३५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षोडशोऽध्यायः ॥ १६ ॥
॥ ९१ ॥ अश्वमेधपर्वणि षोडशोऽध्यायः ॥ १६ ॥
[ अस्मिन्नध्याये ३५ श्लोकाः ]
[ अश्वमेधपर्व समाप्तम् ]

---

## ॥ सप्तदशोऽध्यायः ॥

[ अनुगीतापर्व ]

अर्जुनेन कृष्णं प्रति पूर्वोपदिष्टगीतार्थस्य विस्मरणोक्त्या पुनस्तदुपदेशप्रार्थना ॥ १ ॥ कृष्णेनार्जुनं प्रति स्वस्मै ब्राह्मणोक्तसिद्धकाश्यपसंवादानुवादः ॥ २ ॥

---

जनमेजयः—

सभायां वसतोस्तस्यां निहत्यारीन् महात्मनोः ।
केशवार्जुनयोः का नु कथा समभवद् द्विज ॥ १

वैशम्पायनः—

कृष्णेन सहितः पार्थस् स्वराज्यं प्राप्य केवलम् ।
तस्यां सभायां रम्यायां विजहार मुदा युतः ॥ २

ततः कञ्चित् सभोद्देशं स्वर्गोद्देशोपमं नृप ।
यदृच्छया तौ मुदितौ जग्मतुस्स्वजनावृतौ ॥ ३
तत्र प्रतीतः कृष्णेन सहितः पाण्डवोऽर्जुनः ।
निरीक्ष्य तां सभां रम्याम् इदं वचनमब्रवीत् ॥ ४

अर्जुनः—

विदितं मे महाबाहो सङ्ग्रामे समुपस्थिते ।
माहात्म्यं देवकी[1]पुत्र तत्त्व ते रूपमैश्वरम् ॥ ५
यत्तु तद्भवता प्रोक्तं तदा केशव सौहृदात् ।
तत् सर्वं पुरुषव्याघ्र नष्टं मे व्यग्रचेतसः ॥ ६
मम कौतूहलं त्वस्ति तेष्वर्थेषु पुनः प्रभो ।
भवांस्तु द्वारकां गन्ता न चिरादिव केशव ॥ ७

वैशम्पायनः—

एवमुक्तस्ततः कृष्णः फल्गुनं प्रत्यभाषत ।
परिष्वज्य महातेजा वचनं वदतां वरः ॥ ८

श्रीभगवान्—

श्रावितस्त्वं मया गुह्यं ज्ञापितश्च सनातनम् ।
धर्मस्वरूपिणं पार्थ सर्वलोकांश्च शाश्वतान् ॥ ९
अबुद्ध्या यन्न गृह्णीथास् तन्मे सुमहदप्रियम् ।
नूनमश्रद्दधानोऽसि दुर्मेधाश्चासि पाण्डव ॥ १०

1: अ-ख-घ—मातस् ।

स हि धर्मस्सुपर्याप्तो ब्रह्मणः पदवेदने ।
न शक्यं तन्मया भूयस् तथा वक्तुमशेषतः ॥ ११

परं हि ब्रह्म कथितं योगयुक्तेन तन्मया ।
इतिहासं तु वक्ष्यामि तस्मिन्नर्थे पुरातनम् ॥ १२

[1]यथा तां बुद्धिमास्थाय गतिमग्र्यां गमिष्यसि ।
शृणु धर्मभृतां श्रेष्ठ गदतस्सर्वमेव मे ॥ १३

आगच्छद्ब्राह्मणः कश्चित् स्वर्गलोकादरिन्दम ।
ब्रह्मलोकाच्च दुर्धर्षस् सोऽस्माभिः पूजितोऽवसत् ॥ १४

परिपृष्टश्च स तदा यदाह द्विजसत्तमः ।
दिव्येन विधिना पार्थ तच्छृणुष्वाविचारयन् ॥ १५

ब्राह्मणः—

मोक्षधर्मं समाश्रित्य कृष्ण यन्माऽनुपृच्छसि ।
भूतानामनुकम्पार्थं [2]मन्मोहच्छेदनं प्रभो ॥ १६

तत् तेऽहं सम्प्रवक्ष्यामि [3]यथावन्मधुसूदन ।
शृणुष्वावाहितो भूत्वा गदतो मम माधव ॥ १७

कश्चिद्विप्रस्तपोयुक्तः काश्यपो [4]नाम धर्मवित् ।

---

1. अ—इदमर्धं न दृश्यते
2. ख-घ—यन्मोहच्छेदकारकम् । क—यन्मोहावेदनं प्रभो ।
3. घ—यन्मोहच्छेदकारणम् । ख—यन्मोहच्छेदकं प्रभो ।
4. ख-घ—धर्मवित्तमः ।

आससाद द्विजं कञ्चिद् [1]धर्माणामागमागमम् ॥ १८

गतागमं सुबहुशो ज्ञानविज्ञानपारगम् ।
लोकतत्त्वार्थकुशलं ज्ञातारं सुखदुःखयोः ॥ १९

जातिस्मरणतत्त्वज्ञं कोविदं पापपुण्ययोः ।
द्रष्टारमुच्चनीचानां कर्मभिर्देहिनां गतिम् ॥ २०

चरन्तं मुक्तवत् सिद्धं प्रशान्तं संयतेन्द्रियम् ।
दीप्यमानं श्रिया ब्राह्म्या क्रममाणं च सर्वशः ॥ २१

अन्तर्धानगतिज्ञं च श्रुत्वा तत्त्वेन काश्यपः ।
तथैवान्तर्हितैस्सिद्धैर् यान्तं चानुचरैस्सह ॥ २२

सम्भाषमाणमेकान्ते समासीनं च तैस्सह ।
यदृच्छया च गच्छन्तम् असक्तं पवनं यथा ॥ २३

तं समासाद्य मेधावी स तदा द्विजसत्तमः ।
चरणौ धर्मकामो वै स तस्य सुसमाहितः ॥ २४
प्रतिपेदे यथान्यायं भक्त्या परमया युतः ॥ २४॥

विस्मितश्चाद्भुतं दृष्ट्वा काश्यपस्तं द्विजोत्तमम् ।
[2]परिचारेण महता गुरुं वै पर्यतोषयत् ॥ २५॥

1. ख—धर्मात्मानं गतागमम्। क—धर्माणामागमं गतम्।
ख—धर्माणामागतागमम्।
2. ख-घ—अर्धमिदं नास्ति।

[1]उपसन्नश्च धर्मात्मा श्रुतचारित्रसंयुतः ।
भावेनातोषयत् तं वै गुरुवृत्तिं [2]समाश्रितः ॥ २६॥
तस्मै तुष्टस्स शिष्याय यत् प्रसन्नोऽब्रवीद्गुरुः ।
सिद्धिं परामभिप्रेक्ष्य शृणु तन्मे जनार्दन ॥ २७॥

सिद्धः—

विविधैः कर्मभिस्तात पुण्ययोगैश्च केवलैः ।
गच्छन्तीह गतिं मर्त्या [3]देवलोके च वा स्थितिम् ॥ २८॥
न क्वचित् सुखमत्यन्तं न क्वचिच्छाश्वती स्थितिः ।
स्थानाच्च महतो भ्रंशो दुःखलब्धात् पुनः पुनः ॥ २९॥
अशुभा गतयः प्राप्ताः [4]कष्टा मे पापसेवनात् ।
काममन्युपरीतेन तृष्णया मोहितेन च ॥ ३०॥
पुनः पुनश्च मरणं जन्म चैव पुनः पुनः ।
आहारा विविधा भुक्ताः पीता नानाविधास्स्तनाः ॥ ३१॥
मातरो विविधा दृष्टाः पितरश्च पृथग्विधाः ।
सुखानि च विचित्राणि दुःखानि च मयाऽनघ ॥ ३२॥
प्रियैर्विवासो बहुशस् संवासश्चाप्रियैस्सह ।

---

1. ख-घ—उपसन्नश्च तुष्टात्मा श्रुत्वा चारित्रसंयुतः ।
क—स प्रसन्नश्च धर्मात्मा श्रुतचारित्रसंयुतः ।
2. ख-घ—समास्थितः । क—भावेनातोषयत्तं वै गुरुवृत्तिं समास्थितः ।
3. ख-घ—इह लोकेऽपि च स्थितम् ।
4. ख-घ—दुष्टा । क—कष्टं मे ।

धननाशश्च सम्प्राप्तो [1]लब्ध्वा दुःखेन तद्धनम् ॥ ३३॥
अवमानास्सुकष्टाश्च परतस्त्वजनात् तथा ।
शारीरा मानसाश्चापि वेदना [2]भृशदारुणाः ॥ ३४॥
[3]प्राप्ता विमाननाश्चोग्रा वधं बन्धाश्च दारुणाः ।
पतनं निरये चैव यातनाश्च यमक्षये ॥ ३५॥
जरा रोगाश्च सततं व्यसनानि च भूरिशः ।
लोकेऽस्मिन्ननुभूतानि द्वन्द्वजानि भृशं मया ॥ ३६॥
[4]ततः कदाचिन्निर्वेदान्निकारान्निकृतेन च ।
लोकतन्त्रं परित्यक्तं दुःखार्तेन भृशं मया ॥ ३७॥
ततस्सिद्धिरियं प्राप्ता प्रसादादात्मनो मया ॥ ३८
नाहं पुनरिहागन्ता लोकानालोकयाम्यहम् ॥ ३८॥
[5]आसिद्धेराप्रजासर्गाद् आत्मनोऽपि गतीश्शुभाः ।
उपलब्धा द्विजश्रेष्ठ तथेयं सिद्धिरुत्तमा ॥ ३९॥
इतः परं गमिष्यामि ततः परतरं महत् ।
ब्रह्मणः पदमव्यग्रं मा तेऽभूदत्र संशयः ॥ ४०॥
नाहं पुनरिहागन्ता मर्त्यलोकं द्विजोत्तम ।
प्रीतोऽस्मि ते महा[6]प्राज्ञ ब्रूहि किं करवाणि ते ॥ ४१॥

1. अ-क—लब्धं ।
2. क—बहु ।
3. क—इदमर्धं नास्ति ।
4. अ—अर्धद्वयं न दृश्यते ।
5. अ—अर्धद्वयं नोपलभ्यते ।
6. अ-क—ब्रह्मन् ।

[1]यदीप्सुरुपसम्पन्नं तस्य कालोऽयमागतः ।
अभिजाने च तदहं [2]यदर्थं मां त्वमागतः ॥ ४२॥

[3]अचिरात्तु गमिष्यामि येनाहं त्वामचूचुदम् ॥ ४३
भृशं प्रीतोऽस्मि भवतश् चारित्रेऽथ विचक्षण ।
परिपृच्छ यावद्भवतो भाषे यद्यत् तवेप्सितम् ॥ ४४
बहु मन्ये च बुद्धिं ते भृशं सम्पूजयामि च ।
येनाहं भवता बुद्धो मेधावी ह्यसि काश्यप ॥ ४५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
॥ ९२ ॥ अनुगीतापर्वणि प्रथमोऽध्यायः ॥ १ ॥
[ अस्मिन्नध्याये ४५ श्लोकाः ]

## ॥ अष्टादशोऽध्यायः ॥

ब्राह्मणेन कृष्णं प्रति प्राणिनां जननमरणादिप्रतिपादकसिद्धकाश्यप-संवादानुवादः ॥ १ ॥

ब्राह्मणः—

ततस्तस्योपसङ्गृह्य पादौ [4]स द्विजसत्तमः ।
[5]प्रश्नांश्चैतान् स धर्मात्मा प्राह धर्मभृतां वरः ॥ १

1. घ—यदीप्सुरिह सम्प्राप्तः । क-ख—यदीप्सुरुपसम्पन्नः ।
2. घ—येनाहं त्वामचूचुदम् ।
3. घ—अर्धमिदं नास्ति ख—अचिराच्च गमिष्येऽहं ।
4. ख-घ—प्रश्नान् सुदुर्वचान् । 5. ख-घ—पप्रच्छ तांश्च सर्वान् वै ।

काश्यपः—

कथं शरीराच्चयवते कथं चैवोपपद्यते ।
[1]कथं कष्टाच्च संसारात् संसारी परिमुच्यते ॥ २

आत्मानं वा कथं युक्तं तच्छरीरं विमुच्यते ।
शरीरे तच्च निर्मुक्तो कथमन्यत् प्रपद्यते ॥ ३

कथं शुभाशुभे चायं [2]कर्मणी स्वकृते नरः ।
उपभुङ्क्ते क्व वा कर्म विदेहस्योपतिष्ठति ॥ ४

ब्राह्मणः—

एवं सञ्चोदितस्सिद्धः प्रश्नांस्तान् प्रत्यभाषत ।
आनुपूर्व्येण वार्ष्णेय [3]यथा तन्मे वचश्शृणु ॥ ५

सिद्धः—

अस्मिन्नेवाशु फलदा आयुष्यास्तु क्रियास्स्मृताः ।
आयुःकृत्यकराणीह यानि कर्माणि सेवते ॥ ६

शरीरग्रहणेऽन्यस्मिंस् तेषु क्षीणेषु सर्वशः ।
आयुःक्षयपरीतात्मा विपरीतानि सेवते ॥ ७

बुद्धिर्व्यावर्तते चास्य विनाशे प्रत्युपस्थिते ॥ ७॥

सत्त्वं बलं च [4]कालं चाप्यविदित्वाऽऽत्मनस्तथा ।
अतिवेलमुपाश्नाति तैर्विरुद्धान्यनात्मवान् ॥ ८॥

---

1. घ—इतः अर्धश्लोकं नास्ति 2. ख-घ—कर्माणि कुरुते नरः ।
3. ख-घ—यथावत्ते तथा शृणु । 4. ख-घ—कार्यं च ।

यदाऽयमतिकष्टानि सर्वाण्युपनिषेवते ।
अत्यर्थमपि वा भुङ्क्ते न वा भुङ्क्ते कदाचन ॥ ९॥
दुष्टान्नं विषमान्नं वा [1]सात्वतेन विरोधि च ।
गुरु वाऽपि समं भुङ्क्ते नातिजीर्णेऽपि वा पुनः ॥ १०॥
व्यायाममतिमात्रं च व्यवायं वोपसेवते ।
सततं कर्मलोभाद्वा प्राप्तवेगविधारणम् ॥ ११॥
रसानुयुक्तमन्नं वा दिवा स्वप्नं निषेवते ।
अपक्वान्नं गते काले स्वयं दोषान् प्रकोपयेत् ॥ १२॥
स्वदोषकोपनाद्रोगं लभते मरणान्तिकम् ॥ १३
अथ चेद्बन्धनादीनि परीतानि व्यवस्यति ।
तस्य तैः कारणैर्जन्तोश् शरीराच्च्यवते यथा ॥ १४
जीवितं प्रोच्यमानं तद् यथावदुपधारय ॥ १४॥
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ।
शरीरमनुपर्येत्य सर्वान् प्राणान् रुणद्धि च ॥ १५॥
अत्यर्थं बलवानूष्मा शरीरे परिकोपितः ।
भिनत्ति [2]जीवस्थानानि तानि मर्माणि विद्धि च ॥ १६॥
ततस्सवेदनस्सद्यो जीवः प्रच्यवते क्षरन् ।
शरीरं त्यजते जन्तुश् छिद्यमानेषु मर्मसु ॥ १७॥

1. घ—सातत्येन । क—सान्ततेन ।
2. ख-घ—कोपस्थानानि । क—छिनस्ति जीवस्थानानि ।

वेदनाभिः परीतात्मा तद्विद्धि द्विजसत्तम ॥ १८

जन्ममरणसंविग्नास् सततं सर्वजन्तवः ।
दृश्यन्ते सन्त्यजन्तश्च शरीराणि द्विजर्षभ ॥ १९

गर्भसङ्क्रमणे चापि गर्भाणामपसर्पणे ।
तादृशीमेव लभते वेदनां मानवः पुनः ॥ २०

भिन्नसन्धिरथ क्लेदम् अद्भिस्स लभते नरः ॥ २०॥

यथा पञ्चसु भूतेषु संश्रितत्वं निगच्छति ।
श्लेष्मा प्रकुपितः काये तीव्रवायुसमीरितः ॥ २१॥

यस्य पञ्चसु भूतेषु प्राणापानौ व्यवस्थितौ ।
स गच्छत्यूर्ध्वगो वायुः कृच्छ्रान्मुक्त्वा शरीरिणम् ॥ २२॥

शरीरं च जहात्येव निरुच्छ्वासश्च दृश्यते ॥ २३

स निरूष्मा निरुच्छ्वासो निश्श्रीको गतचेतनः ।
कर्मणा सम्परित्यक्तो मृत इत्युच्यते नरः ॥ २४

स्रोतोभिर्यैर्विजानाति त्विन्द्रियार्थान् शरीरभृत् ।
तैरेव नाभिजानाति प्राणमाहारसम्भवम् ॥ २५

तत्रैव कुरुते काये यस्स जीवन् सनातनः ॥ २५॥

तेषां यद्यद्भवेन्मुक्तं सन्निपाते क्वचित् क्वचित् ।
तत्तन्मर्म विजानीहि शास्त्रदुष्टं हि तत् तथा ॥ २६॥

तेषु मर्मसु भिन्नेषु ततस्स समुदीरयन् ।

आविश्य हृदयं जन्तोस् सत्त्वं चाशु रुणद्धि वै ॥ २७॥
ततस्सचेतनो धातुर् नाभिजानाति किञ्चन ॥ २८
तमसा संवृतज्ञानस् संवृतेष्वथ मर्मसु ।
स जीवो निरधिष्ठानश् चाल्यते मातरिश्वना ॥ २९
ततस्स तं महोच्छ्वासं भृशमुच्छ्वस्य दारुणम ।
निष्क्रामन् कम्पयत्याशु तच्छरीरमचेतनम् ॥ ३०
स जीवः प्रच्युतः कायात् कर्मभिस्स्वैस्समावृतः ।
अङ्कितस्स्वैश्शुभैः पुण्यैः पापैर्वाऽप्युपपद्यते ॥ ३१
ब्राह्मणा ज्ञानसम्पन्ना यथाव[1]च्छ्रुतनिश्चयाः ।
इतरं कृतपुण्यं वा तं विजानन्ति लक्षणैः ॥ ३२
यथाऽन्धकारे खद्योतं दीप्यमानं ततस्ततः ।
चक्षुष्मन्तः प्रपश्यन्ति तथा तं ज्ञानचक्षुषः ॥ ३३
पश्यन्त्येवंविधास्सिद्धा जीवं दिव्येन चक्षुषा ।
क्षरन्तं जायमानं च योनिं चानुप्रवेशितम् ॥ ३४
तस्य स्थानानि दृष्टानि [2]विविधानीह शास्त्रतः ।
कर्मभूमिरियं भूमिर् यत्र तिष्ठन्ति जन्तवः ॥ ३५
इतश्शुभाशुभं कृत्वा लभन्ते [3]कर्म देहिनः ।
इहैवोच्चावचान् भोगान् प्राप्नुवन्ति स्वकर्मभिः ॥ ३६

1. ब—च्छ्रुद्ध । क—च्छ्रुति ।
2. ख-घ—त्रिविधानीह । 3. ख-घ—सर्वं ।

इहैवाशुभकर्मा तु कर्मभिर्निरयं गतः ।
[1]अवाक् स निरये पापो मानवः पात्यते भृशम् ॥ ३७
तस्मात् सुदुर्लभो मोक्ष आत्मा रक्ष्यो भृशं ततः ॥ ३७॥
ऊर्ध्वं तु जन्तवो गत्वा येषु स्थानेष्ववस्थिताः ।
कीर्त्यमानानि तानीह तत्त्वतस्सन्निबोध मे ॥ ३८॥
तच्छ्रुत्वा नैष्ठिकीं बुद्धिं बुद्ध्येथाः कर्मनिश्चयात् ॥ ३९
[2]तारारूपाणि सर्वाणि यत्रैतच्चन्द्रमण्डलम् ।
[3]यच्च विभ्राजते लोके स्वभासा सूर्यमण्डलम् ॥ ४०
स्थानान्येतानि जानीहि नराणां पुण्यकर्मणाम् ॥ ४०॥
कर्मक्षयाच्च तेभ्यो हि च्यवन्ते वै पुनः पुनः ।
तत्रापि च विशेषोऽस्ति दिवि नीचोच्चमध्यमः ॥ ४१॥
न तत्राप्यस्ति सन्तोषो दृष्ट्वा दीप्तां परश्रियम् ।
इत्येता गतयस्सर्वा [4]पृथक् ते समुदीरिताः ॥ ४२॥
उपपत्तिं तु गर्भस्य वक्ष्याम्यहमतः परम् ।
यथावत् तां निगदतश् शृणुष्वावहितो द्विज ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आश्वमेधिकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[ अस्मिन्नध्याये ४३॥ श्लोकाः ]

---

1. घ—अवाक्य निरये । क—अवाक् स निरये पापो मानवः पच्यते । ख—अवाक् स निरये पापो मानवश्च्यवते ।
2. ख-घ—नानारूपाणि ' 3. अ—अर्धद्वयं नास्ति ।
4. क—पृथगेव समीरिताः ।

## ॥ एकोनविंशोऽध्यायः ॥

ब्राह्मणेन कृष्णं प्रति जीवस्य गर्भप्रवेशादिप्रतिपादककाश्यपसिद्धसंवादानुवादः ॥ १ ॥

ब्राह्मणः—

शुभानामशुभानां च नेह नाशोऽस्ति कर्मणाम् ।
प्राप्य प्राप्य तु पच्यन्ते क्षेत्रं क्षेत्रं तथा तथा ॥ १

[1]यथा प्रसूयमानस्तु समादद्यात् फलं बहु ।
तथा स्याद्विपुलं पुण्यं शुद्धेन मनसा कृतम् ॥ २

[2]पापं चापि तथैव स्यात् पापेन मनसा कृतम् ।
पुरोधाय मनो [3]हीह कर्मण्यात्मा प्रवर्तते ॥ ३

यथा कर्मसमाविष्टः काममन्युसमावृतः ।
नरो गर्भं प्रविशति तत्रापि शृणु चोत्तरम् ॥ ४

[4]शुक्रं शोणितसंयुक्तं स्त्रिया गर्भाशयं गतम् ।
[5]क्षेत्रधर्ममवाप्नोति शुभं वा यदि वाऽशुभम् ॥ ५

सौक्ष्म्यादव्यक्तभावाच्च न स कचन सज्जति ।

---

1. अ—प्रसूयमानस्तु फली समादद्यात् फलं बहु ।
   ख-घ--फलं दद्यात् फलं बहु ।
2. ख-घ—अर्धमिदं नास्ति क—पापं त्वपि ।
3. ख—पीह कर्मण्या । घ—कर्माण्यात्मा । क—हिंसां कर्माण्यात्मा ।
4. ख—शुक्रं शोणितसंस्पृष्टं ।
   क--शुक्रशोणितसंहृष्टं प्रियागर्भाशयं गतम् ।
5. ख-घ—क्षेत्रं कर्मजमाप्नोति

सम्प्राप्य ब्रह्मणः कार्यं तस्मात् तद्ब्रह्म शाश्वतम् ॥ ६

तद्बीजं सर्वजन्तूनां तेन जीवन्ति जन्तवः ॥ ६॥

स जीव[1]स्सर्वजन्तूनां गर्भमाविश्य भागशः ।
[2]स याति तेजसा सम्यक् प्राणस्थानेष्ववस्थितः ॥ ७॥

ततस्स्पन्दयतेऽङ्गानि स गर्भश्चेतनान्वितः ॥ ८

[3]यथा लोहितविष्यन्दो निषिक्तो बिम्बविग्रहम् ।
उपैति तद्वज्जानीहि गर्भे जीवप्रवेशनम् ॥ ९

लोहपिण्डं यथा वह्निस् [4]स प्रविश्यातितापयेत् ।
तथा त्वमपि जानीहि गर्भे जीवोपपादनम् ॥ १०

यथा च दीपश्शरणं दीप्यमानः प्रकाशयेत् ।
एवमेव शरीराणि प्रकाशयति चेतना ॥ ११

यद्यच्च कुरुते कर्म शुभं वा यदि वाऽशुभम् ।
पूर्वदेहकृतं सर्वम् अवश्यमुपभुज्यते ॥ १२

ततस्तु क्षीयते चैव पुनश्चान्यत् प्रचीयते ।
यावत् तु मोक्षयोगस्थं धर्मं नैवावबुध्यते ॥ १३

---

1. ख-घ—स्सर्वगात्राणि गर्भस्याविश्य सर्वशः ।
क—स्सर्वभूतानां गर्भमाविश्य ·
2. ख-घ—तथाऽतितेजसा सद्यः । क—तथाऽपि तेजसा सम्यक् ।
3. क-ख—यथा हि लोहविष्यन्दो ।
4. क-घ—प्रविशत्यतितापयन् । ख—प्रविशत्यतितापनम्

तत् ते धर्मं प्रवक्ष्यामि सुखी भवति येन वै ।
आवर्तमानो जातीषु यथाऽन्योन्यासु सत्तम ॥ १४

दानं व्रतं ब्रह्मचर्यं यथोक्तव्रतधारणम् ।
दमः प्रशान्तता चैव भूतानां चानुकम्पनम् ॥ १५

संयमश्चानृशंस्यं च परस्वादानवर्जनम् ।
व्यलीकानामकरणं भूतानामनुकम्पनम् ॥ १६

मातापित्रोश्च शुश्रूषा देवतातिथिपूजनम् ।
गुरुपूजा घृणा शौचं नित्यमिन्द्रियसंयमः ॥ १७

प्रवर्तनं शुभानां च तत् सतां व्रतमुच्यते ॥
ततो धर्मः प्रभवति यः प्रजाः पाति शाश्वतम् ॥ १८

[1]सद्भिराचरितो धर्मस् सदाचारे प्रतिष्ठितः ।
उभयार्थो भवत्येव स्वर्गार्थो मोक्षदस्तथा ॥ १९

एवं सत्सु सदा पश्येत् तत्र ह्येषा ध्रुवा स्थितिः ।
आचारो धर्ममाचष्टे [2]यस्मिन् सन्तो व्यवस्थिताः ॥ २०

तेषु तद्धर्मनिक्षिप्तो यस्स धर्मस्सनातनः ।
यस्तं समभिपद्येत न स दुर्गतिमाप्नुयात् ॥ २१

अतो नियम्यते लोकः प्रमुह्यन् धर्मवर्त्मसु ।
यस्तु योगी च मुक्तश्च स वै तेभ्यो विशिष्यते ॥ २२

1. अ-क—अर्धद्वयं न दृश्यते । 2. ख-घ—यस्मिन् धर्मो व्यवस्थितः

वर्तमानस्य धर्मेण पुरुषस्य यथा तथा ।
संसारतारणं यस्य कालेन महता भवेत् ॥ २३

एवं पूर्वकृतं कर्म सर्वो जन्तुर्निषेवते ।
सर्वं तत् कारणं येन निकृतोऽयमिहागतः ॥ २४

शरीरग्रहणं चास्य केन पूर्वं प्रकल्पितम् ।
इत्येवं संशये लोके तच्च वक्ष्याम्यतः परम् ॥ २५

शरीरमात्मनः कृत्वा [1]सर्वलोकपितामहः ।
त्रैलोक्यमसृजद्ब्रह्मा कृत्स्नं स्थावरजङ्गमम् ॥ २६

ततः प्रधानमसृजच् चेतनानां शरीरिणाम् ।
मया सर्वमिदं व्याप्तं यां लोके परमां विदुः ॥ २७

इह तत् क्षरमित्युक्तं परं त्वमृतमक्षरम् ।
त्रयाणां मिथुनं सर्वम् एकैकस्य पृथक् पृथक् ॥ २८

असृजत् [2]सर्वभूतानां पूर्वसृष्टिं [3]प्रजापतिः ।
स्थावराणां च बीजानि इत्येषा पौर्विकी श्रुतिः ॥ २९

तस्य कालपरीणामम् अकरोत् स पितामहः ।
भूतेषु परिवृत्तिं च पुनरावृत्तिमेव च ॥ ३०

यथाऽत्र कश्चिन्मेधावी [4]दृष्ट्वा कर्म तु पूर्वकम् ।

---

1. क—सर्वभूतपितामहः ।
2. अ—सर्वभूतानि पूर्वसृष्टः । 3. ख-घ—पितामहः ।
4. क—यथा तु+दुष्टात्मा पूर्वजां मतिम् । ख—दुष्टात्मापूर्वजन्मनि ।

यत् प्रवक्ष्यामि तत् सर्वं यथावदुपपद्यते ॥ ३१

सुखं दुःखं यथा सम्यग् अनित्ये यः प्रपश्यति ।
कायं चामेध्य[1]सङ्घातं विनाशं कर्मसंहितम् ॥ ३२

यच्च किञ्चित् सुखं दृष्टं तच्च दुःखमिति स्मरन् ।
संसारसागरं घोरं तरिष्यति सुदुस्तरम् ॥ ३३

जनीमरणरोगैश्च समाविष्टः प्रधानवित् ।
चेतनावत्सु चैतन्यं समं भूतेषु पश्यति ॥ ३४

निर्विद्यते स्वतः कश्चिन्मार्गमाणः परं पदम् ।
तस्योपदेशं वक्ष्यामि याथातथ्येन सत्तम ॥ ३५

शाश्वतस्याव्ययस्याथ पदस्य ज्ञानमुत्तमम् ।
प्रोच्यमानं मया विप्र निबोधेदमशेषतः ॥ ३६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

॥ ९२ ॥ अनुगीतापर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[ अस्मिन्नध्याये ३६ श्लोकाः ]

---

1. क—संस्थानं ।

## ॥ विंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति मोक्षसाधनादिप्रतिपादकसिद्धकाश्यपसंवादरूपानुगीतोपदेशः ॥ १ ॥

ब्राह्मणः—

यस्मादेकान्तमासीनस् तूष्णीं किञ्चिदचिन्तयन् ।
पूर्वं पूर्वं परित्यज्य स [1]निरारम्भको भवेत् ॥ १

सर्वमित्रस्सर्वसहस् [2]समरक्तो जितेन्द्रियः ।
व्यपेतभयमन्युश्च कामहा मुच्यते नरः ॥ २

आत्मवत् सर्वभूतेषु यश्चरेन्नियतश्शुचिः ।
नित्यमेव यथान्यायं यश्चरेन्नियतेन्द्रियः ॥ ३

अमानी निरभीमानस् सर्वतो मुक्त एव सः ॥ ३॥

जीवितं मरणं चोभे सुखदुःखे तथैव च ।
[3]लाभालाभौ प्रियद्वेष्यौ यस्य साम्येन वर्तते ॥ ४॥

[4]कञ्चिन्न तु स्पृहायेत नाभिजानाति किञ्चन ।
निर्द्वन्द्वो वीतरागात्मा सर्वतो मुक्त एव सः ॥ ५॥

1. ख-घ—निरालम्बनो ।
2. अ—सहलाभो क—सम एको ।
3. अ-क—लाभालाभे प्रियं द्वेष्यं यस्समत्वेऽनुवर्तते ।
4. ख-घ—किञ्चिन्न तु प्रहायेत ·

[1]अनमित्रो न बद्धश्चाप्यनपत्यश्च यः क्वचित् ।
त्यक्तधर्मार्थकामश्च निराकाङ्क्षी स मुच्यते ॥ ६॥

[2]नैव धर्मी न चाधर्मी पूर्वोपचितहा च यः ।
[3]क्षीणधातुः प्रशान्तश्च निर्द्वन्द्वस्स विमुच्यते ॥ ७॥

अकर्मा चाविकाङ्क्षश्च पश्यञ्जगदशाश्वतम् ।
अस्वस्थमवशं नित्यं जन्मसंसारमोहितम् ॥ ८॥

वैराग्यबुद्धिस्सततं तापदोषव्यपेक्षकः ।
आत्मबन्धविनिर्मोक्षं स करोत्यचिरादिव ॥ ९॥

अगन्धरसमस्पर्शम् अशब्दमपरिग्रहम् ।
अरूपमनभिज्ञेयं दृष्ट्वाऽऽत्मानं विमुच्यते ॥ १०॥

पञ्चभूतगुणैर्भिन्नम् अमूर्तिमविलेपनम् ।
अगुणं गुणभोक्तारं यः पश्यति स मुच्यते ॥ ११॥

विहाय सर्वसङ्कल्पान् बुद्ध्या शारीरमानसान् ।
शनैर्निर्वाणमाप्नोति निरिन्धन इवानलः ॥ १२॥

[4]विमुक्तस्सर्वसंस्कारैस् ततो ब्रह्म सनातनम् ।

---

1. अ—अनिमित्तोऽनिबन्धश्च अनपत्यश्च ।
   क—अनिमित्तो विबन्धुश्च अनमित्तश्च ।
2. ख-घ—अधर्मिदं नास्ति
3. घ—धातुक्षयप्रशान्तश्च । क—क्षीणधातुप्रशान्तश्च ।
   ख—धातुक्षयः प्रशान्तानि
4. अ—नास्तीदमर्धम् ।

परमाप्नोति वै शान्तो ह्यचलं दिव्यमक्षरम् ॥ १३॥
अतः परं प्रवक्ष्यामि योगशास्त्रमनुत्तमम् ।
यज्ज्ञात्वा सिद्धमात्मानं लोके पश्यन्ति योगिनः ॥ १४॥
तस्योपदेशं वक्ष्यामि यथावत् तन्निबोध मे ।
यैर्योगैर्भावयन् नित्यं पश्यत्यात्मानमात्मनि ॥ १५॥
इन्द्रियाण्युपसंहृत्य मन आत्मनि धारयेत् ।
तीव्रं तप्त्वा तपः पूर्वं ततो योक्तुमुपक्रमेत् ॥ १६॥
तपस्वी [1]नित्यसङ्कल्पो दम्भाहङ्कारवर्जितः ।
मनीषी मनसा [2]विप्रः पश्यत्यात्मानमात्मनि ॥ १७॥
न चेच्छक्नोत्ययं साधुर् योक्तुमात्मानमात्मनि ।
[3]तत एकान्तशीलस्सन् पश्यत्यात्मानमात्मनि ॥ १८॥
[4]संयतस्सततं युक्त आत्मवान् नियतेन्द्रियः ।
यथाऽयमात्मन्यात्मानं साधु युक्तः प्रपश्यति ॥ १९॥
यथा हि पुरुषं स्वप्ने दृष्ट्वा पश्यत्यसाविति ।
तथारूपमिवात्मानं साधु युक्तः प्रपश्यति ॥ २०॥
इषीकां वा यथा मुञ्जात् कश्चिन्निर्हृत्य दर्शयेत् ।
योगी निविष्टमात्मानं तथा सम्पश्यते तनौ ॥ २१॥

उपनिष

1. ख-घ—यक्त
2. क—विप्र
3. अ—नास्तीदमर्धम् ।
4. क—अर्धचतुष्टयं नास्ति

मुञ्जं शरीरं तस्याहुर् इषीकामात्मनि श्रिताम् ।
एतन्निदर्शनं प्रोक्तं योगविद्भिरनुत्तमम् ॥ २२॥

यदा हि युक्तमात्मानं सम्यक् पश्यति देहभृत् ।
[1]तदाऽस्य केशवे भक्तिस् त्रैलोक्यस्यापि यः प्रभुः ॥ २३॥

अन्या अन्याश्च तनवो यथेष्टं प्रतिपद्यते ।
विनिर्भिद्य जरां मृत्युं न हृष्यति न शोचति ॥ २४॥

देवानामपि देवत्वं युक्तः कारयते वशी ।
ब्रह्म चाव्ययमाप्नोति हित्वा देहमशाश्वतम् ॥ २५॥

विनश्यत्स्वपि लोकेषु न भयं तस्य जायते ।
क्लिश्यमानेषु भूतेषु न स क्लिश्यति केनचित् ॥ २६॥

दुःखशोकमलैर्घोरैस् सङ्क्लेशसमुद्भवैः ।
न विचाल्येत युक्तात्मा निस्पृहश्शान्तमानसः ॥ २७॥

नैनं शस्त्राणि विध्यन्ते न मृत्युश्चास्य विद्यते ।
नातस्सुखतरं किञ्चिल्लोके कचन विद्यते ॥ २८॥

सम्यग्युक्तो यदाऽऽत्मानम् आत्मन्येव प्रपश्यति ।
तदैव न स्पृहयति साक्षादपि मरुत्पतेः ॥ २९॥

निर्वेदस्तु न गन्तव्यो युञ्जानेन कथञ्चन ॥ ३०
योगमेकान्तशीलस्तु यथा विन्दति तच्छृणु ॥ ३०॥

1. अ—तथा स्वने शते (?) कश्चित् । ख—तदा स्वनं गतः कश्चित् ।

दृष्टपूर्वां दिशं ध्यात्वा यस्मिन् सन्निवसेत् पुरे ।
पुरस्याभ्यन्तरे तस्य मनश्चार्यं न बाह्यतः ॥ ३१॥

पुरस्याभ्यन्तरे तिष्ठन् यस्मिन्नावसथे वसेत् ।
तस्मिन्नावसथे चार्यं न बाह्याभ्यन्तरे मनः ॥ ३२॥

प्रचिन्त्यावसथं कृत्स्नं यस्मिन् कायेऽवतिष्ठते ।
तस्मिन् काये मनश्चार्यं न कथञ्चन बाह्यतः ॥ ३३॥

सन्नियम्येन्द्रियग्रामं निर्घोषे निर्जने शुभे ।
कायमभ्यन्तरे कृत्स्नम् एकाग्रः परिचिन्तयेत् ॥ ३४॥

दन्तांस्तालु च जिह्वां च गलं ग्रीवां तथैव च ।
हृदयं चिन्तयेच्चापि तथा हृदयबन्धनम् ॥ ३५॥

इत्युक्तस्स मया शिष्यो मेधावी मधुसूदन ।
पप्रच्छ पुनरेवेमं मोक्षधर्मं सुदुर्वचम् ॥ ३६॥

शिष्यः—

भुक्तं भुक्तं कथमिदं अन्नं कोष्ठे विपच्यते ।
कथं रसत्वं व्रजति शोणितं जायते कथम् ॥ ३७॥

कथं मांसं च मेदश्च स्नाय्वस्थीनि च पोषयेत् ।
कथमेतानि सर्वाणि शरीराणि शरीरिणाम् ॥ ३८॥

वर्धन्ते वर्धमानस्य वर्धते च कथं बलम् ।
निरासनं निष्कसनं मलानां च पृथक् पृथक् ॥ ३९॥

कुतो वायुः प्रश्वसिति उच्छ्वसित्यपि वा पुनः ।

कथं देहमधिष्ठाय तिष्ठत्यात्माऽयमात्मनि ॥ ४०॥
जीवः कार्यं वहति चेच् चेष्टमानः कलेबरम् ।
किंवर्णः कीदृशश्चैव निवेशयति वै मनः ॥ ४१॥
याथातथ्येन भगवन् वक्तुमर्हसि मेऽनघ ॥ ४२

ब्राह्मणः—

इति सम्परिपृष्टोऽहं तेन विप्रेण माधव ।
प्रत्यब्रवं महाप्राज्ञ यथाश्रुतमरिन्दम ॥ ४३
यथा श्वगोष्ठे प्रक्षिप्य नष्टे भाण्डमना भवेत् ॥ ४३॥
तथा स्वकायं प्रक्षिप्य मनोद्वारैरनिश्चलैः ।
आत्मानं तत्र मार्गेत प्रमादं परिवर्जयेत् ॥ ४४॥
एवं सततमुद्युक्तः प्रीतात्मा नचिरात् स च ।
आसादयति तद्ब्रह्म यदृष्ट्वा स्यात् प्रधानवित् ॥ ४५॥
न त्वसौ चक्षुषा ग्राह्यो न च सर्वैरपीन्द्रियैः ।
मनसा तु प्रदीपेन महानात्मा प्रदृश्यते ॥ ४६॥
सर्वतः पादपाणिं तं सर्वतोक्षिशिरोमुखम् ।
जीवो निष्क्रान्तमात्मानं शरीरात् सम्प्रपश्यति ॥ ४७॥
स तमुत्सृज्य देहं तत् प्रध्यायद्ब्रह्म केवलम् ।
आत्मानमालोकयति मनसा प्रहसन्निव ॥ ४८॥
इदं सर्वं रहस्यं ते मयोक्तं द्विजसत्तम ।
आपृच्छे साधयिष्यामि गच्छ विप्र यथासुखम् ॥ ४९॥

इत्युक्तस्स तदा कृष्ण मया शिष्यो महातपाः ।
अगच्छद्वै यथाकामं ब्राह्मणश्छिन्नसंशयः ॥* ५०॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि विंशोऽध्यायः ॥ २० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये ५०॥ श्लोकाः]

## ॥ एकविंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति अनुगीताया रहस्यत्वोक्तिः ॥ १ ॥

श्रीभगवान्—

इत्युक्त्वा स तदा पार्थं वाक्यं मां द्विजपुङ्गवः ।
मोक्षधर्माश्रितं सम्यक् तत्रैवान्तरधीयत ॥ १

कच्चिदेतत् त्वया पार्थ श्रुतमेकाग्रचेतसा ।
तदाऽपि हि रथस्थस्त्वं श्रुतवानेतदेव हि ॥ २

नैतत् पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः ।
[1]नरेणाकृतसङ्गेनाविदग्धेनाकृतात्मना ॥
सरहस्यमिदं प्रोक्तं देवानां भरतर्षभ ॥ ३

* अ-ख-घ—कोशेषु नाध्यायसमाप्तिर्दृश्यते ।
1. ख-घ—नरेण कृतसंज्ञेन विदग्धेन कृतात्मना ।
क—नरेणाकृतसङ्गेनाविदग्धेन कृतात्मना ।

कच्चिन्नेदं श्रुतं पार्थ मन्ये नान्येन केनचित् ॥ ४

न ह्येतच्छ्रोतुमर्होऽन्यो मनुष्यस्त्वदृतेऽनघ ।
नैतदन्यस्य विज्ञेयं [1]व्यामिश्रेणान्तरात्मना ॥ ५

क्रियावद्भिर्हि कौन्तेय देवलोकस्समावृतः ।
न चैतदिष्टं देवानां मर्त्यैरुपरि वर्तनम् ॥ ६

परा हि सा गतिः पार्थ यत्तद्ब्रह्म सनातनम् ।
यत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी ॥ ७

एवं हि धर्ममास्थाय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास् तेऽपि यान्ति परां गतिम् ॥ ८

किं पुनर्ब्राह्मणाः पार्थ क्षत्रिया वा बहुश्रुताः ।
स्वधर्मरतयो नित्यं ब्रह्मलोकपरायणाः ॥ ९

हेतुमच्चैतदुद्दिष्टम् उपायाश्चास्य साधने ।
[2]सिद्धौ फलं च मोक्षश्च [3]दुःखस्य च विनिर्णयः ॥ १०

अतः परं सुखं त्वन्यत् किं नु स्याद्भरतर्षभ ।
श्रुतवाञ्श्रद्दधानश्च पारगन्ता च पाण्डव ॥ ११

: परित्यज्यते मर्त्यो लोकतन्त्रमसारवत् ।
[2]रुपायैस्त क्षिप्रं परां गतिमवाप्नुते ॥ १२

---

ख-घ—व्यामिश्रेणेति मे मतिः ।
[2] ङ—सिद्धैः 3. ख-घ—सुखस्य च

एतावदेव वक्तव्यं न ते भूयोऽस्ति किञ्चन ।
षण्मासान् नित्ययुक्तस्य योगः पार्थ प्रवर्तते ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
॥ ९२ ॥ अनुगीतापर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[ अस्मिन्नध्याये १३ श्लोकाः ]

## ॥ द्वाविंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति भूतप्राणादिसृष्ट्यादिप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः ॥ १ ॥

श्रीभगवान्—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
दम्पत्योः पार्थ संवादम् अभयं नाम नामतः ॥ १

ब्राह्मणी ब्राह्मणं कञ्चिज् ज्ञानविज्ञानपारगम् ।
दृष्ट्वा विविक्त आसीनं भार्या भर्तारमब्रवीत् ॥ २

ब्राह्मणी—

कं नु लोकं गमिष्यामि त्वामहं पतिमाश्रिता ।
न्यस्तकर्माणमासीनं कीनाशमविचक्षणम् ॥ ३

भार्याः पतिकृताँल्लोकान् आप्नुवन्तीह नश्श्रुतम् ।
त्वामहं पतिमासाद्य कां गमिष्यामि वै गतिम् ॥ ४

श्रीभगवान्—

एवमुक्तस्स शान्तात्मा तामुवाच हसन्निव ॥ ४॥

ब्राह्मणः—

सुभगे नाभ्यसूयामि वाक्यस्यास्य तवानघे ॥ ५

ग्राह्यं दृश्यं तथा श्राव्यं यदिदं कर्म विद्यते ।
एतदेव व्यवस्यन्ति कर्म कर्मेति कर्मिणः ॥ ६

मोहमेव निगच्छन्ति कर्मिणो ज्ञानवर्जिताः ।
नैष्कर्म्यं न च लोकेऽस्मिन् मौर्ख्यमित्युपलभ्यते ॥ ७

कर्मणा मनसा वाचा शुभं वा यदि वाऽशुभम् ।
जन्मादि मूर्तिभेदानां कर्म भूतेषु वर्तते ॥ ८

[1]रक्षोभिर्वध्यमानेषु दृश्यद्रव्येषु कर्मसु ।
आत्मस्थमात्मना तेन दृष्टमायतनं मया ॥ ९

यत्र तद्ब्रह्म निर्द्वन्द्वं यत्र सोमस्सहाग्निना ।
व्यवायं कुरुते नित्यं [2]धीरो भूतानि धारयन् ॥ १०

यत्र ब्रह्मादयो युक्तास् तदक्षरमुपासते ।
विद्वांसस्सुव्रता यत्र शान्तात्मानो जितेन्द्रियाः ॥ ११

घ्राणेन न तदाघ्रेयं न चास्वाद्यं च जिह्वया ।
निश्चक्षुर्दर्शनं च तदस्पृश्यं मनसा त्ववगम्यते ॥ १२

1. क-ख-ङ-रक्षोभिर्भिद्यमानेषु तेषु कर्मसु निश्चयैः ।
2. क-ङ—हरो ।

चक्षुषा न विषह्यं च यत् किञ्चिच्छ्रवणात् परम् ।
अगन्धरसमस्पर्शम् अरूपं शब्दवर्जितम् ॥ १३
[1]यतः प्रवर्तते तन्त्रं यत्र च प्रतितिष्ठति ॥ १३॥
[2]प्राणो[ा]नस्समानश्च व्यानश्चोदान एव च ।
तत एव प्रवर्तन्ते तमेव प्रविशन्ति च ॥ १४॥
समानव्यानयोर्मध्ये प्राणापानौ विचेरतुः ।
तस्मिन् सुप्ते प्रलीयन्ते समानो व्यान एव च ॥ १५॥
अपानप्राणयोर्मध्ये उदानो व्याप्य तिष्ठति ।
तस्माच्छयानं पुरुषं प्राणापानौ न मुञ्चतः ॥ १६॥
प्राणो नोपहते यत्तु तमुदानं प्रचक्षते ।
तस्मात् तपो व्यवस्यन्ति [3]तद्बृहद् ब्रह्मवादिनः ॥ १७॥
तेषामन्योन्यसक्तानां सर्वेषां देहचारिणाम् ।
अग्निर्वैश्वानरो मध्ये सप्तधा [4]विहितोऽन्तरा ॥ (१८॥
घ्राणं जिह्वा च चक्षुश्च त्वक् च श्रोत्रं च पञ्चमम् ।
मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः ॥ (१९॥
घ्रेयं पेयं च दृश्यं च स्पृश्यं श्राव्यं तथैव च ।

1. क-ख—ततः प्रवर्तते तन्त्रं तत्र च प्रतितिष्ठति ।
2. क-ख-घ—इतस्सार्धं श्लोकद्वयं नास्ति
3. अ—तन्नयं ब्रह्मवादिनि ।
4. घ—विहितोऽन्तिकः । क—विहितो हि यः ।

मन्तव्यमवबोद्धव्यं तास्सप्त समिधो मताः ॥ २०॥

घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः ॥ २१॥

घ्रेये पेये च दृश्ये च स्पृश्ये श्राव्ये तथैव च ।
[1]मन्तव्येऽप्यवबोद्धव्ये सुभगे पश्य सर्वदा ॥ २२॥

हवींष्यग्निषु होतारस् सप्तधा सप्त सप्तसु ।
सम्यक् प्रक्षिप्य विद्वांसो जनयन्ति स्वयोनिषु ॥ २३॥

पृथिवी वायुराकाशम् आपो ज्योतिश्च पञ्चमम् ।
मनो बुद्धिश्च सप्तैता योनिरित्येव शब्दिताः ॥ २४॥

हविर्गता गुणास्सर्वे प्रविशन्त्यग्निमुन्मुखम् ।
अन्तर्वासमुषित्वा च जायन्ते स्वासु योनिषु ॥ २५॥

तत्रैव च निरुध्यन्ते प्रलये भूतभावने ।
ततस्सञ्जायते गन्धस् ततस्सञ्जायते रसः ॥ २६॥

ततस्सञ्जायते रूपं ततस्स्पर्शोऽभिजायते ।
ततस्सञ्जायते शब्दस् संशयस्तत्र जायते ॥ २७॥

ततस्सञ्जायते निष्ठा जन्मैतत् सप्तधा विदुः ॥ २८

1. क-ख-घ—अर्धमिदं नास्ति

अनेनैव प्रकारेण प्रगृहीताः पुरातनैः ।
पूर्णाहुतिभिरापूर्णास् [1]तेऽभिपूर्यन्ति तेजसा ॥ २९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
॥ ९२ ॥ अनुगीतापर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[ अस्मिन्नध्याये २९ श्लोकाः ]

## ॥ त्रयोविंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति दशेन्द्रियगुणादिप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः ॥ १ ॥

ब्राह्मणः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
[2]निबोध दशहोतॄणां विधानमिह यादृशम् ॥ १
सर्वमेवात्र विज्ञाय चित्तज्ञानमवेक्षताम् ॥ १॥
रेतश्शरीरभोक्ता यो विज्ञाता तु शरीरभृत् ।
शरीरभृद्गार्हपत्यस् तस्मादग्निः प्रणीयते ॥ २॥
ततश्चाहवनीयस्तु तस्मिन् सांविक्षिप्यते हविः ।

1. क-ख—तैः पूर्यन्ते हि तेजनाः ।
2. अ—इन्द्रियाणां च संवादं मनसश्चैव भामिनि ।
[ अधिकः पाठः अनन्वितश्च ]

ततो वाचस्पतिर्ज्ञेे मनसा पर्यवेक्षते ॥ ३॥

[1]रूपं भवति वै [2]वक्त्रं तदनुद्रवते मनः ॥ ४

ब्राह्मणी—

कस्माद्वागभवत् पूर्वं कस्मात् पश्चान्मनोऽभवत् ।
मनसा चिन्तितं [3]पूर्वं वाक्यं समभिपद्यते ॥ ५

केन विज्ञानयोगेन मतिश्चित्तं समाप्लुता ।
समुन्नीता नाधिगच्छेत् को वैनां प्रतिषेधति ॥ ६

ब्राह्मणः—

तन्मनस्थः पतिर्भूत्वा [4]तस्मात् प्रेष्यं निबोधति ।
तां मतिं मनसः प्राहुर् मनस्तस्मादवेक्षते ॥ ७

प्रश्नं तु मां वाङ्मनसोर् यस्मात् त्वमनुपृच्छसि ।
तस्मात् ते वर्तयिष्यामि तयोरेव समाह्वयम् ॥ ८

उभे वाङ्मनसी गत्वा भूतात्मानमपृच्छताम् ।
आवयोश्श्रेष्ठमाचक्ष्व च्छिन्धि नौ संशयं विभो ॥ ९

मन इत्येव [5]भगवांस् तदा प्राह सरस्वतीम् ।
अहं वै कामधुक् तुभ्यम् इति तं प्राह वागथ ॥ १०

---

1. क-ख—इदमर्धं न दृश्यते । 2. क-ख-घ—व्यक्तं ।
3. क-ख-घ—वाक्यं सदा समभिपद्यते
4. ख—तस्मात् प्रेक्ष्यमनारतः । तस्मात् प्रेक्ष्यति मानताम् ।
क—तन्मतस्थपतिर्भूत्वा तस्मात् प्रेक्ष्यतमानतम् ।
5. ख-घ—भगवांस्तां त्वयाऽऽह । क—भगवांस्ततस्तद्धि ।

प्रजापतिः—

स्थावरं जङ्गमं चैव विद्धि युभे मनसी मम ।
स्थावरं मत्सकाशे वै जङ्गमं विषये तव ॥ ११

यत्तु ते विषयं गच्छन् मन्त्रो वर्णस्स्वरोऽपि वा ।
तन्मनो जङ्गमं नाम तस्मादपि गरीयसी ॥ १२

[1]तस्माद्भवितुमर्हामि स्वयमभ्येत्य शोभने ।
तस्मादुच्छ्वासमासाद्य [2]प्रवक्ष्यामि सरस्वतीम् ॥ १३

प्राणापानान्तरे [3]यस्माद् आवां नित्यं प्रतिष्ठिताम् ।
[4]प्रीयमाणं महाभागे विना प्राणमपानिति ॥ १४

प्रजापतिमुपाधावत् प्रसीद भगवन्निति ॥ १४॥

ततः प्राणः प्रादुरभूद् वाचमाप्याययन्नपि ।
तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित् ॥ १५॥

घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते ।
तयोरपि च घोषिण्या निर्घोषैव गरीयसी ॥ १६॥

गौरिव प्रस्रवत्येषा रसमुत्तमशालिनी ।
सततं स्यन्दिनी ह्येषा शाश्वता ब्रह्मवादिनी ॥ १७॥

दिव्या दिव्यप्रभावेण भारती गौश्शुचिस्मिता ।

---

1. क-ख-ङ—यस्मादिदं तु मा वोचः ।
2. क-ख—न वक्ष्यति सरस्वती ।
3. क-ख—तस्माद्वाग्वै यत्र प्रतिष्ठिता ।
4. क-ख—प्रेर्यमाणा महाभागे विना प्राणमपानती ।

एतयोरन्तरं पश्य सूक्ष्मयोस्स्यन्दमानयोः ॥ १८॥

ब्राह्मणी—

अनुत्पन्नेषु वाक्येषु चोद्यमाना सिसृक्षया ।
किं नु पूर्वं ततो देवी व्याजहार सरस्वती ॥ १९॥

ब्राह्मणः—

प्राणो न वा संश्रयते शरीरे
प्राणादपानं प्रतिपद्यते तु ।
उदानभूता च विसृज्य देहं
व्यानेन सर्वां दिवमावृणोति ॥ २०॥

ततस्समाने प्रतितिष्ठति स्वयं
इत्येव पूर्वं प्रजजल्प वागपि ।
तस्मान्मनस्स्थावरत्वाद्विशिष्टं
तथा देवी जङ्गमत्वाद्विशिष्टा ॥ २१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥

॥ ९२ ॥ अनुगीतापर्वणि सप्तमोऽध्यायः ॥ ७ ॥

[ अस्मिन्नध्याये २१॥ श्लोकाः ]

---

## ॥ चतुर्विंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति पृथग्घ्राणादीन्द्रियगुणप्रतिपादकब्राह्मणदम्पति संवादानुवादः ॥ १ ॥

ब्राह्मणः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
सुभगे सप्तहोतॄणां विधानमिह यादृशम् ॥ १

घ्राणं चक्षुश्च जिह्वा च त्वक् श्रोत्रं चैव पञ्चमम् ।
मनो बुद्धिश्च सप्तैते होतारः पृथगाश्रिताः ॥ २

[1]सूक्ष्मेऽवकाशे सन्तप्ते न पश्यन्तीतरेतरम् ।
एतद्वै सप्तहोतृत्वं स्वभावाद्विद्धि शोभने ॥ ३

ब्राह्मणी—

[2]सूक्ष्मेऽवकाशे सन्तप्ते कथं [3]नान्योन्यदर्शिनः ।
कथंस्वभावाद्भगवन्नेतदाचक्ष्व मे विभो ॥ ४

ब्राह्मणः—

गुणज्ञानमभिज्ञानं गुणज्ञानमभिज्ञता ।
परस्परगुणानेते न विजानन्ति कर्हिचित् ॥ ५

---

1. ख—सूक्ष्मावकाशे तिष्ठन्ति ।
   क—सन्तस्ते कथं नान्योन्यदर्शनम् ।
2. ख—सूक्ष्मेऽवकाशे सन्तस्ते कथं नान्यो ।
3. अ-क—चान्योन्यदर्शिनः ।

जिह्वा चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च ।
न गन्धानधिगच्छन्ति घ्राणस्तानधिगच्छति ॥ ६

[1]घ्राणं चक्षुश्च जिह्वा च श्रोत्रं बुद्धिर्मनस्तथा ।
न स्पर्शानधिगच्छन्ति त्वक् च तानधिगच्छति ॥ ७

घ्राणं जिह्वा च चक्षुश्च त्वङ्मनो बुद्धिरेव च ।
न शब्दानधिगच्छन्ति श्रोत्रं तानधिगच्छति ॥ ८

घ्राणं जिह्वा च चक्षुश्च श्रोत्रं त्वग् बुद्धिरेव च ।
संशयान नाधिगच्छन्ति मनस्तानधिगच्छति ॥ ९

घ्राणं जिह्वा च चक्षुश्च श्रोत्रं त्वङ्मन एव च ।
न निष्ठामधिगच्छन्ति बुद्धिस्तामधिगच्छति* ॥ १०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[ अस्मिन्नध्याये १० श्लोकाः ]

---

1. अ—श्लोकचतुष्टयं न दृश्यते
* अ-ख-घ—कोशेषु नाडाध्यायसमाप्तिर्दृश्यते

## ॥ पञ्चविंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति मनसो बाह्येन्द्रियाणां च विवादप्रतिपादक-ब्राह्मणदम्पतिसंवादानुवादः ॥ १ ॥

मनः—

नाघ्राति मन्दते घ्राणो रसं जिह्वा न बुध्यते ।
रूपं चक्षुर्न गृह्णाति त्वक् स्पर्शं नावबुध्यते ॥ १

न श्रोत्रं शृणुयाच्छब्दं मया हीनं कदाचन ।
प्रवरं सर्वभूतानाम् अहमस्मि सनातनम् ॥ २

अगाराणीव शून्यानि शान्तार्चिष इवाग्नयः ।
इन्द्रियाणि न भासन्ते मया हीनानि नित्यशः ॥ ३

काष्ठानीवार्धशुष्काणि यतमानैरपीन्द्रियैः ।
गुणार्थान् नाधिगच्छन्ति मन्दते सर्वजन्तवः ॥ ४

इन्द्रियाणि—

एवमेतद्भवेत् सत्यं यथैतन्मन्यते भवान् ।
ऋतेऽस्मानस्मदर्थांस्त्वं भोगान् भुञ्जीत चेद्भवान् ॥ ५

यद्यस्मासु प्रलीनेषु तर्पणं प्राणधारणम् ।
भोगान् [1]भुङ्क्ते रसान् वेत्ति यथैतन्मन्यते भवान् ॥ ६

1. क-ख—भुङ्क्षे रसान् वेत्सि यथैतन्मन्यसे तथा ।

अथवाऽप्यप्रलीनेषु तिष्ठत्सु विषयेषु च ।
यदि सङ्कल्पमात्रेण [1]भुङ्क्ते भोगांस्तथाऽर्थवत् ॥ ७

अथ चेन्मन्यसे बुद्धिम् अस्मदर्थेषु सर्वदा ।
घ्राणेन रूपमादत्स्व रसमादत्स्व चक्षुषा ॥ ८

श्रोत्रेण गन्धानादत्स्व [2]स्पर्शमादत्स्व जिह्वया ।
त्वचा च शब्दमादत्स्व बुद्ध्या स्पर्शमथापि च ॥ ९

बलवन्तो नीयमाना नियमा दुर्बलीयसाम् ।
भोगानपूर्वानादत्स्व नोच्छिष्टं भोक्तुमर्हसि ॥ १०

[3.4]यथा हि शिष्यश्शास्तारं श्रुत्यर्थमनुधावति ।
ततश्श्रुतमुपादाय श्रुतार्थमुपतिष्ठति ॥ ११

विषयानेवमस्माभिर् दर्शितानभिमन्यसे ।
अनागतानतीतांश्च स्वप्ने जागरणे तथा ॥ १२

वैमनस्यं गतानां च जन्तूनामल्पचेतसाम् ।
अस्मदर्थे कृते कार्ये दृश्यते प्राणधारणम् ॥ १३

बहूनपि हि सङ्कल्पान् कृत्वा स्वप्नानुपास्य च ।
बुभुक्षया भिद्यमानो विषयानेव धावति ॥ १४

---

1. क-ख—भुङ्क्ते भोगांस्तथाऽऽर्तवत् ।
2. क-ख—निष्ठामादत्स्व जिह्वया ।
3. क-ख—अस्माभिर्दर्शितानेव विषयानभिमन्यसे । [अधिकः पाठः]
4. क-ख-घ—शासितारं यथा शिष्यश् श्रुतार्थमभिधावति ।

अथागमं द्वारमिव प्रविश्य
सङ्कल्पभोगे विषयानविन्दन् ।
प्राणक्षये शान्तिमुपैति नित्यं
दारुक्षयेऽग्निर्ज्वलितो यथैव ॥ १५

[1]कामं तु नष्टेषु गुणेषु सङ्गः
कामं तु नान्योन्यगुणोपलब्धिः ।
ऋते त्वस्मान् नास्ति तवोपलब्धिस्
त्वामप्यृतेऽस्मान् भजते न हर्षः ॥ १६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
॥ ९२ ॥ अनुगीतापर्वणि नवमोऽध्यायः ॥ ९ ॥
[ अस्मिन्नध्याये १६ श्लोकाः ]

---

## ॥ षड्विंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति प्राणापानादीनां स्वस्वश्रैष्ठ्यविषयाविवदादिप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः ॥ १ ॥

---

ब्राह्मणः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
सुभगे पञ्चहोतॄणां विधानमिह यादृशम् ॥ १

---

1. क-ख—कामस्तु न स्वेषु गुणेषु सङ्गः काम्यश्च नान्योन्यगुणोपालब्धिः

प्राणापानावुदानश्च समानो व्यान एव च ।
पञ्चहोतॄनथैतान् वै परं भावं विदुर्बुधाः ॥ २

ब्राह्मणी—

स्वभावात् सप्त होतार इति ते पूर्विका मतिः ।
यथा वै पञ्च होतारः परो भावस्तथोच्यताम् ॥ ३

ब्राह्मणः—

प्राणेन सम्भृतो वायुर् अपाने जायते ततः ।
अपाने सम्भृतो वायुस् ततो व्यानः प्रवर्तते ॥ ४

[1]तेऽपृच्छन्त पुरो गत्वा पूर्वजातं प्रजापतिम् ।
यो नो ज्येष्ठस्तदाचक्ष्व स नश्श्रेष्ठो भविष्यति ॥ ५

प्रजापतिः—

यस्मिन् प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
यस्मिन् प्रवृत्ते च पुनश्चरन्ति
स वश्श्रेयान् गच्छत यत्र कामः ॥ ६

प्राणः—

मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मा प्रलीनम् ॥ ७

ब्राह्मणः—

प्राणः प्रालीयत ततः पुनश्च प्रचचार सः ।

---

क-ख-च—तेऽभ्यपृच्छन् पुरा ।

समानश्चाप्युदानश्च वचोऽब्रूतां पुनश्शुभे ॥ ८

समानोदानौ—

न त्वं सर्वमिदं प्राप्य तिष्ठस्युत यथा वयम् ।
न त्वं श्रेष्ठो हि नः प्राण अपानो हि वशे तव ॥ ९

ब्राह्मणः—

प्रचचार ततः प्राणस् ततोऽपानोऽभ्यभाषत ॥ ९॥

अपानः—

मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मा प्रलीनम् ॥ १०॥

ब्राह्मणः—

व्यानश्च तमुदानश्च भाषमाणमथोचतुः ।

व्यानोदानौ—

अपान न त्वं श्रेष्ठो नः प्राणो हि वशगस्तव ॥ ११॥

ब्राह्मणः—

अपानः प्रचचाराथ व्यानस्तं पुनरब्रवीत् ॥ १२

व्यानः—

श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥ १२॥

मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मा प्रलीनम् ॥ १३॥

ब्राह्मणः—
प्रालीयत ततो व्यानः पुनश्च प्रचचार ह ।
प्राणापानावुदानश्च समानश्च तमब्रुवन् ॥ १४॥

प्राणापानोदानसमानाः—
न त्वं श्रेष्ठोऽसि नो व्यान समानो हि वशे तव ॥ १५

ब्राह्मणः—
प्रचचार ततो व्यानस् समानस्तमथाब्रवीत् ॥ १५॥

समानः—
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥ १६
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मा प्रलीनम् ॥ १७

ब्राह्मणः—
ततस्समानः प्रालिल्ये पुनश्च प्रचचार ह ।
प्राणापानावुदानश्च व्यानश्चैव तमब्रुवन् ॥ १८

प्राणापानव्यानोदानाः—
न त्वं समान श्रेष्ठोऽसि [1]व्यान एव वशे तव ॥ १८॥

ब्राह्मणः—
[2]समानः प्रचचाराथ उदानस्तमुवाच ह ।

उदानः—
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना ॥ १९॥
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।

1. क-ख-घ—उदानो हि । 2. क-ख-घ—नास्तीदमर्धम् ।

मयि प्रवृत्ते च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मा प्रलीनम् ॥ २०॥

ब्राह्मणः—
[1]ततः प्रालीयतोदानः पुनश्च प्रचचार ह ।
प्राणापानौ समानश्च व्यानश्चैव तमब्रुवन् ॥ २१॥

प्राणापानव्यानसमानाः—
उदान न त्वं श्रेष्ठोऽसि [2]व्यान एव वशे तव ॥ २२

ब्राह्मणः—
[3]ततस्तानब्रवीत् सर्वान् स्मयमानः प्रजापतिः ॥ २२॥

ब्रह्मा—
सर्वे श्रेष्ठा न वा श्रेष्ठास् सर्वे [4]चान्योन्यरक्षिणः ।
सर्वे स्वविषये श्रेष्ठास् सर्वे चान्योन्य[5]चारिणः ॥ २३॥

ब्राह्मणः—
इति तानब्रवीत् सर्वान् समवेतान् प्रजापतिः ॥ २४

ब्रह्मा—
एकस्थिरश्चराश्चान्ये विशेषाः पञ्च वायवः ।
एक एव [6]च सर्वात्मा बहुधाऽप्युपचीयते ॥ २५
परस्परस्य सुहृदो भावयन्तः परस्परम् ।
स्वस्ति व्रजत भद्रं वो धारयध्वं परस्परम् ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
॥ ९२ ॥ अनुगीतापर्वणि दशमोऽध्यायः ॥ १० ॥
[ अस्मिन्नध्याये २६ श्लोकाः ]

---

1. क-ख-घ—नास्तीदमर्धम् । 2. क-ख-घ—समानो हि
3. क-ख-घ—अत्रैवं पठ्यते ।
" ततोदानः प्रलीयाशु समानः पुनरब्रवीत् " इति ।
4. क-ख-घ—च सहधर्मिणः । 5. क-ख-घ—रक्षिणः ।
6. क-ख—ममैवात्मा ।

## ॥ सप्तविंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति ब्राह्मणेन ब्राह्मणीं प्रत्युक्तसृष्ट्यादिप्रतिपादकनारददेवतमसंवादानुवादः ॥ १ ॥

ब्राह्मणः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
नारदस्य च संवादम् ऋषेर्देवतमस्य च ॥ १

देवतमः—

जन्तोस्सञ्जायमानस्य किं नु पूर्वं प्रवर्तते ।
प्राणोऽपानस्समानो वा व्यानो वोदान एव च ॥ २

नारदः—

येनायं सृज्यते जन्तुस् ततोऽन्यः पूर्वमेति तम् ।
प्राणद्वन्द्वं च विज्ञेयं [1]तिर्यगूर्ध्वं गतं च यत् ॥ ३

देवतमः—

केनायं सृज्यते जन्तुः कश्चान्यः पूर्वमेति तम् ।
प्राणद्वन्द्वं च मे ब्रूहि तिर्यगूर्ध्वं च [2]निश्चयात् ॥ ४

नारदः—

सङ्कल्पाज्जायते हर्षश् शब्दादपि च जायते ।
[3]रसात् सञ्जायते चापि रूपादपि च जायते ॥ ५

1. क-ख—तिर्यगं चोर्ध्वगं च यत् । 2. क-ख—निश्चितम् ।
3. अ—इदमर्धं नोपलभ्यते ।

स्पर्शात् सञ्जायते चापि गन्धादपि च जायते ।
एतद्रूपमुदानस्य हर्षो मिथुनमन्तरा ॥ ६

कामात् सञ्जायते शुक्रः कामात् सञ्जायते रजः ।
समानव्यानजनिते समाने शुक्रशोणिते ॥ ७

शुक्राच्छोणितसंसृष्टात् पूर्वं प्राणः प्रवर्तते ।
प्राणेन विकृते शुक्रे ततोऽपानः प्रवर्तते ॥ ८

शुक्रात् सञ्जायते चापि रसादपि च जायते ।
प्राणापानाविमौ द्वन्द्वम् अर्वाक् चोर्ध्वं च गच्छतः ॥ ९
व्यानस्समानश्चैवोभौ वह्निश्चैव प्रवर्तते ॥ ९॥

अग्निर्वै देवतास्सर्वा इति [1]वेदानुशासनम् ।
सञ्जायते ब्राह्मणेषु ज्ञानं बुद्धिसमन्वितम् ॥ १०॥

सत्त्वं रूपं तमो रूपं [2]रज एव सुरेतसः ।
सत्त्वं सञ्जायते तस्य यत्र प्रक्षिप्यते हविः ॥ ११॥

हविस्समानो व्यानश्च इति यज्ञविदो विदुः ।
प्राणापानावाज्यभागौ तयोर्मध्ये हुताशनः ॥ १२॥

एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १३
[3]निर्द्वन्द्वमिति यत्त्वेतत् तन्मे निगदतश्शृणु ॥ १३॥

---

1. क-ख—वेदस्य शासनम् ।
2. घ—रसो भस्म सरेतसः । क-ख—तमोरूपं रजो भस्म सुरेतसः ।
3. अ—अर्धसप्तकं न दृश्यते ।

अहोरात्रमिदं द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १४॥
उभे चैवायने द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १५॥
उभे सत्यानृते द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १६॥
उभे शुभाशुभे द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १७॥
[1]सच्चासच्चैव तद्द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १८॥
पूर्वं समानो व्यानोऽथ व्यस्यते[2] किं न कर्मकृत् ।
[3]तृतीयं तु समानेन पुनरेव व्यवस्यते ॥ १९॥
शान्त्यर्थं [4]वामदेव्यं च शास्ति ब्रह्म सनातनम् ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥* २०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तर्विंशोऽध्यायः ॥ २७ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकादशोऽध्यायः ॥ ११ ॥
[ अस्मिन्नध्याये २०॥ श्लोकाः ॥

---

1. क—अर्धद्वयं नोपलभ्यते ।
2. क—तेन कर्मकृत् । ख—व्यस्यते न च कर्मकृत् ।
3. क-घ—द्वितीयस्तु समानस्य । ख—द्वितीयस्तु समानेन ।
4. अ—वामदेवं च शान्ति ब्रह्म । क—वामदेव्यं च शास्त्रब्रह्म ।
* अ—कोशे नात्राध्यायसमाप्तिर्दृश्यते ।

## ॥ अष्टाविंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति कर्तृकर्मादिप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः ॥ १ ॥

ब्राह्मणः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
चातुर्होत्रविधानस्य विधानमिह यादृशम् ॥ १

तस्य सर्वस्य विधिवद् विधानमुपदेक्ष्यते ।
शृणु मे गदतो भद्रे रहस्यमिदमुत्तमम् ॥ २

करणं कर्म कर्ता च मोक्ष इत्येव भामिनि ।
चत्वार एते होतारो यैरिदं जगदावृतम् ॥ ३

होतॄणां साधनं चैव शृणु सर्वं समासतः ॥ ३॥

घ्राणं जिह्वा च चक्षुश्च त्वक् श्रोत्रं च पञ्चमम् ।
मनो बुद्धिश्च सप्तैते ज्ञेयाः करणहेतवः ॥ ४॥

गन्धो रसश्च रूपं च स्पर्शश्शब्दश्च पञ्चमः ।
मन्तव्यमवबोद्धव्यं सप्तैते कर्महेतवः ॥ ५॥

घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च सप्तैते विज्ञेयाः कर्तृहेतवः ॥ ६॥

स्वगुणान् भक्षयन्त्येते गुणवन्तश्शुभाशुभान् ।

[1]अहं तु निर्गुणोऽत्रेति सन्तैते मोक्षहेतवः ॥ ७॥

विदुषां बुध्यमानानां स्वं स्वं स्थानं यथाविधि ।
गुणास्ते देवता भूत्वा सततं भुञ्जते हविः ॥ ८॥

अदन् ह्यविद्वानन्नानि ममत्वेनोपहन्यते ।
[2]आत्मार्थे पाचयन्नित्यं ममत्वेनोपहन्यते ॥ ९॥

अभक्ष्यभक्षणं चैव अन्नपानं च हन्ति तम् ।
स चान्नं हन्ति तच्चान्नं स बुध्वा हन्यते बुधः ॥ १०॥

[3]अत्ता ह्यन्नमिदं विद्वान पुनर्जनयतीश्वरः ।
स चान्नाज्जायते तस्मिन् सूक्ष्मो नाम व्यतिक्रमः ॥ ११॥

मनसा मन्यते यच्च यच्च बुद्ध्या निरुध्यते ।
श्रोत्रेण श्रूयते यच्च चक्षुषा यच्च दृश्यते ॥ १२॥

स्पर्शेन स्पृश्यते यच्च घ्राणेनाघ्रायते च यत् ॥ १३
मनष्षष्ठानि संयन्य हवींष्येतानि सर्वशः ।
गुणवत् पावक इव दीप्यते हव्यवाहनः ॥ १४
योगयज्ञः प्रवृत्तो मे ज्ञानं ब्रह्म मनोभवः ॥ १४॥
प्राणस्तोत्रोऽपानशस्त्रस् सर्वत्यागश्च दक्षिणा ॥ १५
कर्ताऽनुमन्ता ब्रह्मात्मा कर्ताऽध्वर्युः क्रतुस्तुतिः ।

---

1. अ—असन्तो निर्गुणोऽत्रेति । 2. क—नास्तीदमर्धम् ।
3. ब—मध्यमन्नमविद्वान् हि । क-ख—अधमन्नमविद्वान् हि ।

कृतः प्रशास्ता तच्छस्त्रम् अपवर्गोऽस्य दक्षिणा ॥ १६

ऋचश्चाप्यत्र शंसन्ति नारायणविदो जनाः ।
नारायणाय देवाय [1]यदबध्नात् पशून् पुनः ॥ १७

तत्र सामानि गायन्ति तानि चाहुर्निदर्शनम् ॥ १७॥

देवं नारायणं भीरु सर्वात्मानं निबोध मे ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्वादशोऽध्यायः ॥ १२ ॥
[ अस्मिन्नध्याये १८ श्लोकाः ]

## ॥ एकोनत्रिंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति प्रजापतिना एकेनैव शब्देन परब्रह्मोपदेशे देवर्ष्यादीनां स्वस्वयोग्यतानुसारेण नानार्थावगमप्रतिपादकब्राह्मणदम्पति-संवादानुवादः ॥ १ ॥

ब्राह्मणः—

[2]एकश्शास्ता न द्वितीयोऽस्ति कश्चित्
यो हृच्छयस्तमहमनुब्रवीमि ।

1. क-ख—यदबन्धन् पशून् पुरा ।
2. अ—एकश्शास्ता न द्वितीयोऽस्ति शास्ता
यथा नियुक्तोऽस्मि तथा चरामि ।
हृत्येष तिष्ठन् पुरुषं शास्ति शास्ता
तेनानुयुक्तः प्रवणादिवोदकम् ॥ [पाठान्तरम् ]

तेनैव युक्तः प्रवणादिवोदकं
यथा नियुक्तोऽस्मि तथा वहामि ॥ १
एको गुरुर्नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तेनानुशिष्टा गुरुणा तथैव
पराभूता दानवास्सर्व एव ॥ २
एको बन्धुर्नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तेनानुशिष्टा बान्धवा बन्धुमन्तस्
सप्तर्षयश्चैव दिवि प्रभान्ति ॥ ३
एकश्श्रोता नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तस्मिन् गुरौ गुरुवासं निरुष्य
शक्रो गतस्सर्वलोकामरत्वम् ॥ ४
एको द्वेष्टा नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनु ब्रवीमि ।
तेनानुशिष्टा गुरुणा सदैव
लोके द्विष्टाः पन्नगास्सर्व एव ॥ ५
अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
प्रजापतेः पन्नगानां देवर्षीणां च संविदम् ॥ ६

देवर्षयश्च नागाश्चाप्यसुराश्च प्रजापतिम् ।
पर्यपृच्छन्नुपासीनाश् श्रेयो नः प्रोच्यतामिति ॥ ७

तेषां प्रोवाच भगवाञ् श्रेयस्समनुपृच्छताम् ।
ओमित्येकाक्षरं ब्रह्म ते श्रुत्वा प्राद्रवन् दिशः ॥ ८

तेषां [1]प्रद्रवमाणानाम् उपदेशार्थमात्मनः ।
सर्पाणां [2]दर्शने भावः प्रवृत्तः पूर्वमेव तु ॥ ९

असुराणां प्रवृत्तस्तु दर्पो भावस्स्वभावतः ।
दानं देवा व्यवसिता दममेव महर्षयः ॥ १०

एकं वक्तारमासाद्य शब्देनैकेन संस्कृताः ।
नाना व्यवसितास्सर्वे धर्मं देवर्षिदानवाः ॥ ११

शृणोम्येवं प्रोच्यमानं गृह्णाति च यथातथम् ।
पृच्छतस्तावतो भूयो गुरोरन्योऽनुमन्यते ॥ १२

तस्य चानुमते कर्म ततः पश्चात् प्रवर्तते ।
गुरुर्बन्धुश्च शास्ता च द्वेष्टा च हृदये स्थितः ॥ १३

पापेन विचरँल्लोके पापचारी भवत्ययम् ।
शुभेन विचरँल्लोके शुभचारी भवत्युत ॥ १४

कामचारी तु कामेन य इन्द्रियसुखे रतः ।

---

1. क-ख-घ - प्रद्रवतामेवमुपदेशं च शृण्वताम् ।
2 क-ख—दर्शने भावं प्रवृत्तं ।

[1]व्रतचारी सदैवैष य इन्द्रियजये रतः ॥ १५

अपेतव्रतकर्मा तु केवलं ब्रह्मणि श्रितः ।
ब्रह्मभूतश्चरँल्लोके ब्रह्मचारी भवत्ययम् ॥ १६

ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्मसंस्तरः ।
आपो ब्रह्म गुरुर्ब्रह्म स ब्रह्मणि समाहितः ॥ १७

एतदेतादृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः ।
विदित्वा चान्वपद्यन्त क्षेत्रज्ञेनानुदर्शिना* ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
[ अस्मिन्नध्याये १८ श्लोकाः ]

---

## ॥ त्रिंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति विद्याब्रह्मणोररण्यत्वरूपणपरब्राह्मणदम्पति-संवादानुवादः ॥ १ ॥

---

ब्राह्मणः—

सङ्कल्पदंशमशकं शोकहर्षहिमातपम् ।
मोहान्धकारतिमिरं लोभव्यालसरीसृपम् ॥ १

---

1. अ—इदमर्धं नास्ति
*अ—कोशे नाध्यायसमाप्तिर्दृश्यते ।

विषयैकान्त्यमध्वानं कामक्रोधनिरोधकम् ।
तदतीत्य महादुर्गं प्रविष्टोऽस्मि महद्वनम् ॥ २

ब्राह्मणी—

क तद्वनं महाप्राज्ञ के वृक्षास्सरितश्च काः ।
कियन्तः पर्वताश्चैव कियत्यध्वनि तद्वनम् ॥ ३

ब्राह्मणः—

न मन्दस्य पृथग्भावः किञ्चिद्दूरतरं ततः ।
तस्माद्भूस्वतरं नास्ति न ततोऽन्यद् बृहत्तरम् ॥ ४
नास्ति तस्माद्दुःखतरं नास्त्यन्यत् तत्समं सुखम् ॥ ४॥
न तत् प्रविश्य शोचन्ति न प्रहृष्यन्ति च द्विजाः ।
न च बिभ्यति केभ्यश्चिन्नैभ्यो बिभ्यति केचन ॥ ५॥

तस्मिन् वने सप्त महाद्रुमा हि
फलानि सप्तातिथयश्च सप्त ।
सप्तर्षयस्सप्त समिद्धुतानि
वृक्षाश्च सप्तैतदरण्यरूपम् ॥ ६॥

पञ्चवर्णानि दिव्यानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥ ७॥
[1]सुरभीण्येकवर्णानि पुष्पाणि च फलानि च ।

1. अ—चतुर्वर्णानि दिव्यानि । ख—बहून्यव्यक्तवर्णानि ।
क—शङ्कराणि त्रिवर्णानि ।

सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥ ८॥

[1]शङ्कराणि त्रिवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥ ९॥

एको ह्यग्निस्सुमना ब्राह्मणोऽत्र
पञ्चेन्द्रियाणि समिधश्चात्र सन्ति ।
तेभ्यो वृक्षास्सप्त भवन्ति दीक्षा
गणाः फलान्यतिथयः फलाशाः ॥ १०॥

आतिथ्यं प्रतिगृह्णन्ति तत्र सप्त महर्षयः ।
अर्चितेषु प्रलीनेषु तेष्वन्यद्रोचते वनम् ॥ ११॥

प्रज्ञावृक्षं मोक्षफलं शान्तिच्छायासमन्वितम् ।
ज्ञानाश्रयं तृप्तितोयम् अन्तः क्षेत्रज्ञभास्करम् ॥ २१॥

येऽधिगच्छन्ति तत् सन्तस् तेषां नास्ति पुनर्भवः ।
ऊर्ध्वं चाधश्च तिर्यक् च तस्य नान्तोऽधिगम्यते ॥ १३॥

सप्त स्त्रियस्तत्र वसन्ति सत्यास्
त्ववाङ्मुखा भानुमत्यो जनित्र्यः ।

---

1. क-घ—बहून्यव्यक्तवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥
ङ-ञ—चतुर्वर्णानि दिव्यानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥
[इत्यधिकः पाठः]

ऊर्ध्वं रसानाददते प्रजाभ्यस्
सर्वान् यथा सर्वमतीत्य ताश्च ॥ १४॥
तत्रैव प्रतितिष्ठन्ति पुनस्तत्रोदयन्ति च ।
ते च सप्तर्षयस्सिद्धा वसिष्ठप्रमुखैस्त्विह ॥ १५॥
यशो वर्चो भगश्चौजो विजयस्सिद्धतेजसी ।
एवमेवानुवर्तन्ते सप्त ज्योतींषि भास्करम् ॥ १६॥
ऋषयः पर्वताश्चैव सन्ति तत्र समासतः ।
नद्यश्च परितो वारि वहन्त्यो ब्रह्मसम्भवम् ॥ १७॥
नदीनां सङ्गमस्तत्र वैतानस्समुपह्वरे ।
स्वात्मतृप्ता यतो यान्ति साक्षाद्दान्ताः पितामहम् ॥ १८॥
कृशाङ्गास्सुव्रताश्शान्तास् तपसा दग्धकिल्बिषाः ।
आत्मन्यात्मानमावेश्य ब्राह्मणास्तमुपासते ॥ २९॥
ऋचमप्यत्र शंसन्ति विद्यारण्यविदो जनाः ।
तदरण्यमभिप्रेत्य कथा कथमजायत ॥ २०॥
एतदेवेदृशं दिव्यम् अरण्यं ब्राह्मणा विदुः ।
विदित्वा चानुतिष्ठन्ति क्षेत्रज्ञेनानुदर्शिना ॥* २१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
[ अस्मिन्नध्याये २१॥ श्लोकाः ।

* अ—कोशे नाऽध्यायसमाप्तिर्दृश्यते ॥

## ॥ एकत्रिंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति यागीयहिंसाया अधर्म्यत्वाभावप्रतिपादकाध्वर्यु-यतिसंवादानुवादः ॥ १ ॥

ब्राह्मणः—

गन्धान् न जिघ्रामि रसान् न वेद्मि
रूपं न पश्यामि न च स्पृशामि ।
न चापि शब्दान् विविधान् शृणोमि
न चापि सङ्कल्पमुपैमि किञ्चित् ॥ १

अर्थानिष्टान् कामयते स्वभावस्
सर्वान् द्वेष्यान् द्वेष्टि चैव स्वभावः ।
कामद्वेषावुद्भवतस्स्वभावात्
प्राणापानौ जन्तुदेहादिवैत्य ॥ २

तेभ्यश्चान्यांस्तेष्वनन्यांश्च भावान्
भूतात्मानं लक्षयेऽहं शरीरे ।
तस्मिंस्तिष्ठन् नास्ति शक्तः कथञ्चित्
कामक्रोधाभ्यां जरया मृत्युना च ॥ ३

[1]अकामयानस्य च सर्वकामान्
अविद्विषाणस्य च सर्वदोषान् ।

1. ब—अनिश्चितश्चैव हि । क-ख—अनिच्छतश्चैव हि ।

न मे स्वभावेषु भवन्ति लेपास्
तोयस्य बिन्दोरिव पुष्करेषु ॥ ४
नित्यस्य [1]चैतस्य भवन्त्यनित्या
निरीक्षमाणस्य बहून् स्वभावान् ।
न सज्जते कर्मसु भोगजालं
दिवीव सूर्यस्य मयूखजालम् ॥ ५

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
अध्वर्युयतिसंवादं तं निबोध यशस्विनि ॥ ६
प्रोक्ष्यमाणं पशुं दृष्ट्वा यज्ञकर्मण्यथाब्रवीत् ।
यतिरध्वर्युमासीनो हिंसेयमिति कुत्सयन् ॥ ७
तमध्वर्युः प्रत्युवाच नायं छागो विनश्यति ।
श्रेयसा योक्ष्यते जन्तुर् यज्ञस्तुतिरियं तथा ॥ ८
यो ह्यस्य पार्थिवो भावः पृथिवीं स गमिष्यति ।
यदस्य वारिजं किञ्चिद् अपस्तत् प्रतिपद्यते ॥ ९
सूर्यं चक्षुर्दिशं श्रोत्रे प्राणोऽस्य दिवमेव तु ।
आगमे वर्तमानस्य [2]न मे दोषोऽस्ति कश्चन ॥ १०

यतिः—
प्राणैर्वियोगे च्छागस्य यदि श्रेयः प्रपश्यसि ।

---

1. क—चैतस्य भवन्त्यनित्या निरीक्ष्यमाणस्य बहुस्वभावान्।
ख—नित्यं हि चैतस्य भवन्ति नित्या निरीक्षमाणस्यं बहुस्वभावान् ।
2. क-ख—दोषो नास्तीति ।

छागार्थे वर्तते यज्ञो भवतः किं प्रयोजनम् ॥ ११

अनु त्वां मन्यते माता पिता भूत्वा सखाऽपि च ।
मन्त्रमस्यैवमुन्नीय [1]परिवर्ते विशेषतः ॥ १२

य एवमनुमन्येरंस् तान् भवान् प्रष्टुमर्हति ।
तेषामनुमतिं श्रुत्वा शक्या कर्तुं विचारणा ॥ १३

अध्वर्युः—

प्राणा अप्यस्य च्छागस्य प्रापितास्ते स्वयोनिषु ।
शरीरं केवलं शिष्टं निश्चेष्टमिति मे मतिः ॥ १४

यतिः—

इन्धनस्य तु तुल्येन शरीरेण विचेतसा ।
हिंसां निर्वेष्टुकामानाम् इन्धनः पशुसंज्ञितः ॥ १५

अध्वर्युः—

अहिंसा सर्वभूतानाम् इति वृद्धानुशासनम् ।
[2]यदहिंस्रं भवेत् कर्म तत् कार्यमिति विद्महे ॥ १६

अहिंसेति प्रतिज्ञेयं यदि वक्ष्याम्यतः परम् ।
शक्यं बहुविधं वक्तुं भवतः कार्यदूषणम् ॥ १७

अहिंसा सर्वभूतानां अस्मभ्यं रोचते सदा ।
प्रत्यक्षतस्साधयामो न परोक्षमुपास्महे ॥ १८

---

1. ख—परमन्तं । क-ख—परवन्तं ।
2. क—यदि + न कार्यमिति वेद्मयहम् ।
ख—यदि + तत्त्व वचर्यमिति वेद्मयहम् ।

अध्वर्युः—

भूमेर्गन्धगुणान् भुङ्क्षे पिबस्यापोमयान् रसान् ।
ज्योतिषामीक्षसे रूपं स्पृशस्यनिलजान् गुणान् ॥ १९

शृणोष्याकाशजं शब्दं मनसा मन्यसे मतिम् ।
सर्वाण्येतानि भूतानि प्राणा इति च मन्यसे ॥ २०

प्राणेऽपाने च नित्यं हि हिंसायां वर्तते भवान् ।
नास्ति चेष्टा विना हिंसां किं वा त्वं मन्यसे द्विज ॥ २१

यतिः—

अक्षरं च क्षरं चैव द्वैधीभावो यतात्मनाम् ।
अक्षरं तत्र सद्भावस् स्वभावः क्षर उच्यते ॥ २२

प्राणो जिह्वा मनस्सत्त्वं स्वभावो राजसो गुणः ॥ २२॥

भावैरेतैर्वियुक्तस्य निर्द्वन्द्वस्य निराशिषः ।
समस्य सर्वभूतेषु निर्ममस्य जितात्मनः ॥ २३॥

समन्तात् परिमुक्तस्य न भयं विद्यते क्वचित् ॥ २४

अध्वर्युः—

सद्भिरेवेह संवासः कार्यो मतिमतां वर ।
भवता कथितं श्रुत्वा प्रतिभाति मतिर्मम ॥ २५

भगवन् भगवद्बुद्ध्या प्रतिबुद्धो ब्रवीम्यहम् ।
मतं मन्तुं क्रतुं कर्तुं नापराधोऽस्ति मे द्विज ॥ २६

ब्राह्मणः—

उपपत्त्या यतिस्तूष्णीं वर्तमानस्ततः परम् ।
अध्वर्युरपि निर्मोहः प्रचचार महामखे ॥ २७

एवमेतादृशं मोक्षं सुसूक्ष्मं ब्राह्मणा विदुः ।
विदित्वा चानुतिष्ठन्ति क्षेत्रज्ञेनानुदर्शिना ॥* २८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
॥ ९२ ॥ अनुगीतापर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
[ अस्मिन्नध्याये २८ श्लोकाः ]

## ॥ द्वात्रिंशोऽध्यायः ॥

ब्राह्मणेन स्वभार्यां प्रति हिंसाया अकर्तव्यत्वे महर्षिवचसां प्रमाणीकरणोपयोगितया परशुरामचरितकथनारम्भः ॥ १ ॥ रामेण कार्तवीर्ये निहते तदनुयायिभिर्जमदग्नेर्हननम् ॥ २ ॥ ततः क्रुद्धेन रामेण निस्सप्तकृत्वः सर्वक्षत्रियहनने तत्पितृभी रामस्य परिसान्त्वनप्रयतनम् ॥ ३ ॥

ब्राह्मणः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
कार्तवीर्यस्य संवादं समुद्रस्य च भामिनि ॥ १

कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।
येन सागरपर्यन्ता धनुषा निर्जिता मही ॥ २

* अ—कोशे नात्राध्यायसमाप्तिर्दृश्यते ॥

स कदाचित् समुद्रान्ते विचरन् बलदर्पितः ।
अवाकिरच्छरशतैस् समुद्रमिति नश्श्रुतम् ॥ ३

तं समुद्रो नमस्कृत्य कृताञ्जलिरुवाच ह ॥ ३॥

समुद्रः—

मा मुञ्च वीर नाराचान् ब्रूहि किं करवाणि ते ॥ ४

मदाश्रयाणि भूतानि त्वदुत्सृष्टैर्महेषुभिः ।
वध्यन्ते राजशार्दूल एभ्यो देह्यभयं प्रभो ॥ ५

अर्जुनः—

मत्समो यदि सङ्ग्रामे शरासनधरः क्वचित् ।
विद्यते तं समाचक्ष्व यस्समो हि महामृधे ॥ ६

समुद्रः—

महर्षिर्जमदग्निस्ते यदि राजन् परिश्रुतः ।
तस्य पुत्रस्त्वातिथ्यं यथावत् कर्तुमर्हति ॥ ७

ब्राह्मणः—

ततस्स राजा प्रययौ क्रोधेन महताऽन्वितः ।
स तमाश्रममागम्य राममेवान्वपद्यत ॥ ८

स रामप्रतिकूलानि चकार सह बन्धुभिः ।
आयासं जनयामास रामस्य च महात्मनः ॥ ९

ततस्तेजः प्रजज्वाल रामस्यामिततेजसः ।
प्रदहन् रिपुसैन्यानि तदा कमललोचने ॥ १०

ततः परशुमादाय स तं बाहुसहस्रिणम् ।
चिच्छेद सहसा रामो बहुशाखमिव द्रुमम् ॥ ११

तं हतं पतितं दृष्ट्वा समेतास्सर्वबान्धवाः ।
असीनादाय शक्तीश्च भार्गवं पर्यवारयन् ॥ १२

स रामो रथमारुह्य धनुरादाय सत्वरः ।
विसृजन् शरवर्षाणि व्यधमत् पार्थिवं बलम् ॥ १३

ततस्तु क्षत्रियाः केचिज् जमदग्निं निहत्य च ।
विविशुर्गिरिदुर्गाणि मृगास्सिंहार्दिता इव ॥ १४

[1]तेषां स्वविहितं कर्म [2]तद्भयान्नानुतिष्ठताम् ।
प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात् ॥ १५

त एते द्रमिळाः काचाः पुण्ड्राश्च शबरैस्सह ।
वृषलत्वं परिगता व्युत्थानात् क्षत्रधर्मतः ॥ १६

ततस्तु हतवीरासु क्षत्रियासु पुनः पुनः ।
द्विजैरुत्पादितं क्षत्रं [3]न्यकृन्तज्जमदग्निजः ॥ १७

एकविंशतिके याते रामं वागशरीरिणी ।
दिव्या प्रोवाच मधुरा सर्वलोकपरिश्रुता ॥ १८
राम राम निवर्तस्व कं गुणं त्वत्र पश्यसि ।

1. क—तेषां त्वयि हितं कर्म तद्भवान्नानु ।
2. ख—तद्भावान्नानु (?) घ—तद्भवान्नानु—
3. क—निकृतं जामदग्निना । ख—निकृत्तं जमदग्निना ।

क्षत्रबन्धूनिमान् प्राणैर् वियोज्य च पुनः पुनः ॥ १९

तथैव तं महात्मानम् ऋचीकप्रमुखास्तथा ।
पितामहा महाभाग निवर्तस्वेत्यथाब्रुवन् ॥ २०

पितुर्वधममृष्यंश्च रामः प्रोवाच तानृषीन् ।
नार्हन्तीह भवन्तो मां निवारयितुमित्युत ॥ २१

पितरः—

नार्हसि क्षत्रबन्धूंस्त्वं निहन्तुं जयकाङ्क्षया ।
न हि युक्तं त्वया हन्तुं ब्राह्मणेन सता नृपान् ॥* २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ ९२ ॥ अनुगीतापर्वणि षोडशोऽध्यायः ॥ १६ ॥

[ अस्मिन्नध्याये २२ श्लोकाः ]

## ॥ त्रयस्त्रिंशोऽध्यायः ॥

परशुरामं प्रति तत्पितृभिः क्षत्रियवधान्निवर्तनायालर्कोपाख्यानकथनम् ॥ १ ॥ रामेण तच्छ्रवणाद्धिंसातो निवृत्य तपश्चरणम् ॥ २ ॥

पितरः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
[1]श्रुत्वा च तत् तथा कार्यं भवता द्विजसत्तम ॥ १

* अ—कोशे नाऽध्यायसमाप्तिः ॥ 1. अ—नास्तीदमर्धम्

अलर्को नाम राजर्षिर् अभवत् सुमहातपाः ।
धर्मज्ञस्सत्यसन्धश्च महात्मा सुमहाव्रतः ॥ २

स सागरान्तां [1]धनुषा विनिर्जित्य महीमिमाम् ।
कृत्वा सुदुष्करं कर्म मनस्सूक्ष्मे समादधे ॥ ३

स्थितस्य वृक्षमूलेऽथ तस्य चिन्ता बभूव ह ।
उत्सृज्य सुमहद्राज्यं सूक्ष्मं प्रति महामते ॥ ४

अलर्कः—

मनसो मे बलं जातं मनो जित्वा ध्रुवो जयः ।
[2]अन्यत्र बाणान् दास्यामि शत्रुभिः परिवारितः ॥ ५

यदिदं [3]चापलात् कर्म सर्वमेतद्विकर्षति ।
मनः प्रति सुतीक्ष्णाग्रान् अहं मोक्ष्यामि सायकान् ॥ ६

मनः—

नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ ७

अन्यान् बाणान् [4]समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ ७॥

पितरः—

तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ॥ ८

---

1. क-ख—वसुधां । 2. ख—अर्धाष्टकं नास्ति
3. घ—चाफलं मुक्तिः । क—चापलं मूर्ते ।
4. क-घ—प्रतीक्षस्व ।

अलर्कः—
आघ्राय सुबहून् गन्धांस् तानेव प्रति गृध्यति ।
तस्माद् घ्राणं प्रति शरान् प्रतिमोक्ष्याम्यहं शितान् ॥ ९

घ्राणः—
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति [1]भिन्नमर्मा मरिष्यसि ॥ १०
अन्यान् बाणान् समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ १०॥

अलर्कः—
इयं स्वादून् रसान् भुक्त्वा तानेव प्रति गृध्यति ।
तस्माज्जिह्वां प्रति शरान् प्रतिमोक्ष्याम्यहं शितान् ॥ ११॥

जिह्वा—
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति ततो हास्यसि जीवितम् ॥ १२॥
अन्यान् बाणान् समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ १३

अलर्कः—
स्पृष्ट्वा त्वग् विविधान् स्पर्शांस् तानेव प्रति गृध्यति ।
तस्मात् तान् सूदयिष्येऽहं विविधैः कङ्कपत्रिभिः ॥ १४

त्वक्—
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति ततो हास्यसि जीवितम् ॥ १५
अन्यान् बाणान् समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ १५॥

---

1. ख—ततो हास्यसि जीवितम् ।

अलर्कः—
श्रुत्वा वै विविधाञ्छब्दांस् तानेव प्रति गृध्यति ।
तस्माच्छ्रोत्रं प्रति शरान् मोक्षयिष्याम्यहं शितान् ॥ १६॥

श्रोत्रम्—
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति ततो हास्यसि जीवितम् ॥ १७॥
अन्यान् बाणान् प्रतीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ १८

अलर्कः—
दृष्ट्वैव विविधान् भावांस् तानेव प्रति गृध्यति ।
तस्माच्चक्षुः प्रति शरान् मोक्षयिष्याम्यहं शितान् ॥ १९

चक्षुः—
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ २०
अन्यान् बाणान् समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ २०॥

अलर्कः—
इयं निष्ठा बहुविधाः प्रज्ञया त्वध्यवस्यति ।
तस्माद्बुद्धिं प्रति शरान् प्रतिमोक्ष्याम्यहं शितान् ॥ २१॥

बुद्धिः—
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।

तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ २२॥
अन्यान् बाणान् समीक्षस्व यैस्त्वं मां सूदयिष्यसि ॥ २३

पितरः—

ततोऽलर्कस्तपो घोरम् आस्थाय तु सुदुष्करम् ।
नाभ्यगच्छत् परं शक्त्या बाणमेतेषु सप्तसु ॥ २४
सुसमाहितचेतास्तु सततं चिन्तयत् प्रभुः ॥ २४॥
स विचिन्त्य चिरं कालम् अलर्को द्विजसत्तम ।
नाध्यगच्छत् परं श्रेयो योगान्मतिमतां वरः ॥ २५॥
स एकाग्रं मनः कृत्वा निश्चलो योगमास्थितः ।
इन्द्रियाणि जघानाशु बाणेनैकेन वीर्यवान् ॥ २६॥
योगेनात्मानमाविश्य स सिद्धिं परमां ययौ ।
विस्मितश्चापि राजर्षिर् इमां गाथां जगाद ह ॥ २७॥

अलर्कः—

अहो [2]कष्टं यदस्माभिः पूर्वं राज्यमनुष्ठितम् ।
अतः पश्चान्मया ज्ञातं योगान्नास्ति परं सुखम् ॥ २८॥

पितरः—

इति त्वमपि जानीहि राम मा क्षत्रियान् वधीः ।
तपो घोरमुपातिष्ठ ततश्श्रेयोऽभिपत्स्यसे ॥ २९॥

---

1. ध—नष्टं

ब्राह्मणः—

इत्युक्तः पितृभिस्सोऽथ तपो घोरं समास्थितः ।
जामदग्न्यो महाभागे सिद्धिं च परमां गतः ॥ ३०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[ अस्मिन्नध्याये ३०॥ श्लोकाः ]

## ॥ चतुस्त्रिंशोऽध्यायः ॥

ब्राह्मणेन स्वभार्यां प्रति कामक्रोधादिपरित्यागपूर्वकं भगवदवबोधस्य परमपुरुषार्थसाधनतावबोधकाम्बरीषगीतगाथाकथनम् ॥ १ ॥

ब्राह्मणः—

त्रयो वै रिपवो लोके नव चैव गुणा मताः ।
हर्षस्तम्भोऽतिमानश्च त्रयस्ते सात्विका गुणाः ॥ १
शोकः क्रोधोऽभिसंरम्भो राजसास्ते गुणास्स्मृताः ।
स्वप्नस्तन्द्री च मोहश्च त्रयस्ते तामसा गुणाः ॥ २
एतान् निकृत्य धृतिमान् बाणसङ्घैरतन्द्रितः ।
जित्वा परानुत्सहते प्रशान्तस्त्याजितेन्द्रियः ॥ ३
अत्र गाथाः कीर्तयन्ति पुराकल्पविदो जनाः ।
अम्बरीषेण या गीता राज्ञा राज्यं प्रशासता ॥ ४

समुदीर्णेषु दुष्टेषु वध्यमानेषु सर्वशः ।
जग्राह तरसा राज्यम् अम्बरीष इति श्रुतिः ॥ ५

सन्निगृह्य महादोषान् साधून् समभिपूज्य च ।
जगाम महतीं सिद्धिं गाथाश्चेमा जगाद ह ॥ ६

अम्बरीषः—

भूयिष्ठं मे जिता दोषा निहतास्सर्वशत्रवः ।
एको दोषोऽवशिष्टस्तु वध्येष्वनिहतो मया ॥ ७

येन युक्तो जन्तुरयं तृष्णामेवाधिगच्छति ।
तृषार्त इव निम्नानि परिधावति नित्यदा ॥ ८

अकार्यमपि येनेह प्रयुक्तस्सेवते नरः ।
तं लोभमसिभिस्तीक्ष्णैर् निकृत्य सुखमेधते ॥ ९

लोभाद्धि जायते तृष्णा ततश्चित्तं प्रसज्यते ।
स लिप्समानो लभते भूयिष्ठं राजसान् गुणान् ॥ १०

[1]तदवाप्तौ तु लभते भूयिष्ठं तामसान् गुणान् ॥ १०॥

स तैर्गुणै[2]स्संहतदेहबन्धनः
पुनः पुनर्जायति कर्म चेहते ।
जन्मक्षये भिन्नविकीर्णदेहो
पुनर्मृत्युं गच्छति जन्मनि स्वे ॥ ११॥

1. अ—नास्तीदमर्धम् ।
2. क-ङ—संक्षत । ख—स ङ ं ं ।

तस्मादेनं सम्यगवेक्ष्य मोहं
निगृह्य मृत्याऽऽत्मनि राज्यमिच्छेत् ।
एतद्राज्यं नान्यदस्तीति विद्याद्
यस्त्वेकराजा विदितो मयैकः ॥ १२॥

ब्राह्मणः—

इति राज्ञाऽम्बरीषेण गाथा गीता यशस्विना ।
आधिराज्यं पुरस्कृत्य लोभमेकं निकृन्तता ॥* १३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
[ अस्मिन्नध्याये १३॥ श्लोकाः ]

## ॥ पञ्चत्रिंशोऽध्यायः ॥

ब्राह्मणेन स्वभार्यां प्रति ममतावर्जनस्य पुरुषार्थसाधनतायां दृष्टान्ततया ब्राह्मणजनकसंवादानुवादः ॥ १ ॥

ब्राह्मणः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
ब्राह्मणस्य च संवादं जनकस्य च भामिनि ॥ १

ब्राह्मणं जनको राजा क्षान्तं कस्मिंश्चिदागसि ।
विषये मे न वस्तव्यम् इति [1]शिक्षार्थमब्रवीत् ॥ २

* अ—कोशे नास्त्यध्यायसमाप्तिः ॥
1. अ—शिष्यस्तमब्रवीत् । क-ख—शिष्यार्थ ।

इत्युक्तः प्रत्युवाचाथ ब्राह्मणो राजसत्तमम् ॥ २॥

ब्राह्मणः—

आचक्ष्व विषयान् राजन् यान यांस्तव वशे स्थितान् ।
सोऽन्यस्य विषये राज्ञो वस्तुमिच्छाम्यहं विभो ॥ ३॥
वचस्ते कर्तुमिच्छामि यथाशास्त्रं महीपते ॥ ४

ब्राह्मणः—

इत्युक्तस्तु तदा राजा ब्राह्मणेन यशस्विना ।
मुहुरुष्णं च निश्श्वस्य न स तं प्रत्यभाषत ॥ ५

तमासीनं ध्यायमानं राजानममितौजसम् ।
कश्मलं सहसाऽगच्छद् भानुमन्तमिव ग्रहः ॥ ६

तमाश्वास्य ततो राजा व्यपेते कश्मले तदा ।
ततो मुहूर्तादिव तं ब्राह्मणं वाक्यमब्रवीत् ॥ ७

जनकः—

पितृपैतामहे राज्ये वश्ये जनपदे सति ।
विषयं नाधिगच्छामि विचिन्वन् पृथिवीमिमाम् ॥ ८

नाध्यगच्छं यदा पृथ्व्यां मिथिला मार्गिता मया ।
नाध्यगच्छं यदा तस्यां स्वाः प्रजा मार्गिता मया ॥ ९

नाध्यगच्छं यथा तासु ततो मे कश्मलोऽभवत् ।
ततो मे कश्मलस्यान्ते मतिः पुनरुपस्थिता ॥ १०

यया न विषयं मन्ये सर्वो वा विषयो मम ।
आत्माऽपि चायं न मम सर्वा वा पृथिवी मम ॥ ११
उष्यतां यावदुत्साहो भुज्यतां यावदिष्यते ॥ ११॥

ब्राह्मणः—

पितृपैतामहे राज्ये वइये जनपदे सति ।
ब्रूहि कां बुद्धिमास्थाय ममत्वं वर्जितं त्वया ॥ १२॥
कां वै बुद्धिं विनिश्चित्य सर्वो वै विषयस्तव ।
[1]नावैषि विषयं येन सर्वो वा विषयस्तव ॥ १३॥

जनकः—

अन्तवन्त इहारम्भा विदितास्सर्वकर्मसु ।
नाध्यगच्छमहं यस्मान्ममेदमिति यद्भवेत् ॥ १४॥
कस्येदमिति कश्चायम् इति वेदवचस्तथा ।
नाध्यगच्छमहं बुद्ध्या ममेदमिति यद्भवेत् ॥ १५॥
एतां बुद्धिं विनिश्चित्य ममत्वं वर्जितं मया ॥ १६
शृणु बुद्धिं तु यां श्रुत्वा सर्वस्तु विषयो मम ॥ १६॥
नाहमात्मार्थमिच्छामि गन्धान् घ्राणगतानपि ।
तस्मान्मे निर्जिता भूमिर् वशे तिष्ठति नित्यशः ॥ १७॥
नाहमात्मार्थमिच्छामि रसानास्येऽपि वर्तते ।

1. अ—नास्तीदमर्थम्

आपो मे निर्जितास्तस्माद् वशे तिष्ठन्ति नित्यशः ॥ १८॥

नाहमात्मार्थमिच्छामि रूपं ज्योतिस्तु चक्षुषि ।
तस्मान्मे निर्जितं ज्योतिर् वशे तिष्ठति नित्यशः ॥ १९॥

नाहमात्मार्थमिच्छामि शब्दाञ् श्रोत्रगतानपि ।
आकाशं मे जितं तस्माद् वशे तिष्ठति नित्यशः ॥ २०॥

नाहमात्मार्थमिच्छामि मनो नित्यं मनोन्तरे ।
मनो मे निर्जितं तस्माद् वशे तिष्ठति नित्यशः ॥ २१॥

देवेभ्यश्च पितृभ्यश्च भूतेभ्योऽतिथिभिस्सह ।
भुक्त्यर्थं सर्व एवेमे समारम्भा भवन्ति वै ॥ २२॥

ब्राह्मणः—

ततः प्रहस्य जनकं ब्राह्मणः पुनरब्रवीत् ।
त्वज्जिज्ञासार्थमद्येह विद्धि मां धर्ममागतम् ॥ २३॥

त्वमस्य ब्रह्मनाभस्य बुद्धावप्यनिवर्ततः ।
सत्वनेमिनिरूढस्य चक्रस्यैकः प्रवर्तकः ॥ २४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आश्वमेधिकपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ ९२ ॥ अनुगीतापर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

[ अस्मिन्नध्याये २४॥ श्लोकाः ]

## ॥ षट्त्रिंशोऽध्यायः ॥

ब्राह्मणेन ब्राह्मणीं प्रति स्वमाहात्म्यप्रकाशनम् ॥ १ ॥

ब्राह्मणः—

नाहं तथा भीरु चरामि लोके
यथा त्वं मां [1]तर्कयसे स्वबुद्ध्या ।
विप्रोऽस्मि मुक्तोऽस्मि वनेचरोऽस्मि
गृहस्थधर्मा ब्रह्मचारी तथाऽस्मि ॥ १

नाहमस्मि यथा मां त्वम् ईक्षसे चक्षुषा शुभे ।
मया व्याप्तमिदं सर्वं यत् किञ्चिज्जगतीगतम् ॥ २

ये केचिदिह वै लोके जङ्गमास्स्थावराश्च ह ।
तेषामन्तर्गतं विद्धि दारूणामिव पावकम् ॥ ३

राज्यं पृथिव्यां सर्वस्याम् अथवा यत् त्रिविष्टपे ।
तन्मे बुद्धिरियं वेत्ति बुद्धिरेव [2]धनं मम ॥ ४

एकः पन्था ब्राह्मणानां येन गच्छन्ति तद्विदः ।
गृहेषु वनवासेषु गुरुवासेषु भिक्षुषु ॥ ५

लिङ्गैर्बहुभिरव्यग्रैर् एका बुद्धिरुपास्यते ।
नानालिङ्गाश्रमस्थानां येषां बुद्धिश्शमात्मिका ॥ ६

1. ब—वर्जयसे ।
2. ख-ब—सुनिश्चितम् । क—धनं मतम् ।

ते भावमेकमायान्ति सरितस्सागरं यथा ॥ ६॥
बुद्ध्या[1]ऽयं गम्यते मार्गश् शरीरेण न गम्यते ।
आद्यन्तवन्ति कर्माणि शरीरं कर्मबन्धनम् ॥ ७॥
तस्मान्मे सुभगे नास्ति परलोककृतं भयम् ।
मद्भावभावनिरता ममैवात्मानमेष्यसि* ॥ ८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥
॥ ९२ ॥ अनुगीतापर्वणि विंशोऽध्यायः ॥ २० ॥
[ अस्मिन्नध्याये ८॥ श्लोकाः ]

---

## ॥ सप्तत्रिंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति ब्राह्मणीब्राह्मणशब्दनिर्दिष्टयोः क्रमेण बुद्धिमनस्त्वकथनम् ॥ १ ॥

---

ब्राह्मणी—

नेदमल्पात्मना शक्यं वेदितुं नाकृतात्मना ।
बहु चाल्पं च संक्षिप्तं विस्मितं च मनो मम ॥ १
उपायं तु मम ब्रूहि येनैषा लभ्यते मतिः ।
तन्मन्ये कारणतमं यत एषा प्रवर्तते ॥ २

---

1. क-ख—यो गम्य ।
*अ—कोशे नाम्नाध्यायसमाप्तिर्दृश्यते॥

ब्राह्मणः—

अरणीं [1]ब्राह्मणीं विद्धि गुरुरस्योत्तरारणिः ।
तपश्श्रुतेऽथ मथिते ज्ञानाग्निर्जायते ततः ॥ ३

ब्राह्मणी—

यदिदं ब्रह्मणो लिङ्गं क्षेत्रज्ञ इति संज्ञितम् ।
ग्रहीतुं येन तच्छक्यं लक्षणं तस्य तद्वद ॥ ४

ब्राह्मणः—

अलिङ्गो निर्गुणश्चैव कारणं नास्य [2]विद्महे ।
उपायं तु प्रवक्ष्यामि येन गृध्येत मानवः ॥ ५
सम्यगप्युपदिष्टस्य अमृतस्येव तृप्यसे ॥ ५॥
कर्मभुग्बुद्धिपूर्वस्याज् ज्ञानलिङ्गैरधिष्ठितः ॥ ६
इदं कार्यमिदं नेति न मोक्षेषूपदिश्यते ।
पश्यतश्शृण्वतो बुद्धिर् आत्मनैवोपजायते ॥ ७
यावन्त इव शक्येरंस् तावतोंशान् प्रकल्पयेत् ।
व्यक्तानव्यक्तरूपांश्च शतशोऽथ सहस्रशः ॥ ८
सर्वानुमानयुक्तांश्च सर्वान् प्रत्यक्षहेतुकान् ॥ ८॥
यतः परं न विद्येत तर्ह्याकाशं भविष्यति ॥ ९

श्रीभगवान्—

ततस्तु तस्या ब्राह्मण्या मतिः क्षेत्रज्ञसंशये ।

---

1. क-ख—ब्राह्मणं । 2. ख-ब—विद्यते ।

क्षेत्रज्ञादेव परतः क्षेत्रज्ञोऽन्यः प्रवर्तते ॥ १०

अर्जुनः—

[1]क नु सा ब्राह्मणी क्षुण्णा क चासौ ब्राह्मणर्षभः ।
यथा सिद्धिरियं प्राप्ता तावुभौ वद मेऽच्युत ॥ ११

श्रीभगवान्—

मनो मे ब्राह्मणं विद्धि बुद्धिं मे ब्राह्मणीमथ ।
क्षेत्रज्ञ इति यश्चोक्तस् सोऽहमेव धनञ्जय ॥* १२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम
आश्वमेधिकपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकविंशोऽध्यायः ॥ २१ ॥
[ अस्मिन्नध्याये १२ श्लोकाः ]

---

## ॥ अष्टात्रिंशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति परब्रह्मस्वरूपतत्प्राप्तिसाधनादिप्रतिपादकगुरु-शिष्यसंवादानुवादः ॥ १ ॥

---

अर्जुनः—

ब्रह्म यत् परमं वेद्यं तन्मे व्याख्यातुमर्हसि ।
भवतो हि प्रसादेन सुसूक्ष्मे रमते मतिः ॥ १

---

1. अ—श्लोकद्वयं नास्ति
* अ—कोशे नाष्टाध्यायसमाप्तिर्दृश्यते ॥

श्रीभगवान्—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह ॥ २

कश्चिद् ब्राह्मणमासीनम् आचार्यं संशितव्रतम् ।
शिष्यः पप्रच्छ मेधावी किंस्विच्छ्रेयः परन्तप ॥ ३

भगवन्तं प्रपन्नोऽहं निश्रेयसपरायणः ।
याचे त्वां शिरसा विप्र यद् ब्रूयां तद्विचक्ष्व मे ॥ ४

श्रीभगवान्—

तमेवंवादिनं पार्थ शिष्यं गुरुरुवाच ह ॥ ४॥

गुरुः—

कथयस्व प्रवक्ष्यामि यत्र ते संशयो द्विज ॥ ५

श्रीभगवान्—

इत्युक्तस्स कुरुश्रेष्ठ गुरुणा गुरुवत्सलः ।
प्राञ्जलिः परिपप्रच्छ यत् तच्छृणु महामते ॥ ६

शिष्यः—

कुतश्चाहं कुतश्च त्वं तत् सर्वं ब्रूहि यत् परम् ।
कुतो जातानि भूतानि चराणि स्थावराणि च ॥ ७

केन जीवन्ति जातानि तेषामायुः किमात्मकम् ।
किं सत्यं किं तपो विप्र के गुणास्सद्भिरीरिताः ॥ ८

के पन्थानश्शिवास्सन्ति सुकृतं किं च दुष्कृतम् ॥ ८॥

एतान् मे भगवन् प्रश्नान् याथातथ्येन सत्तम ।
वक्तुमर्हसि विप्रर्षे यथावदिह तत्त्वतः ॥ ९॥

श्रीभगवान्—

तस्मै सम्प्रतिपन्नाय यथावत् परिपृच्छते ।
शिष्याय गुणयुक्ताय शान्ताय प्रियवर्तिने ॥ १०॥
छायाभूताय दान्ताय यतये ब्रह्मचारिणे ।
तान् प्रश्नानब्रवीत् पार्थ मेधावी सुदृढव्रतः ॥ ११॥
गुरुः कुरुकुलश्रेष्ठ सम्यक् सर्वा[1]नशेषतः ॥ १२

गुरुः—

ब्रह्मप्रोक्तमिदं धर्मम् ऋषिप्रवरसेवितम् ।
वेदविद्यासमावाप्तं तत्त्वभूतार्थभावनम् ॥ १३
भूतभव्यभविष्यादिधर्मकामार्थनिश्चयम् ।
सिद्धसङ्घपरिज्ञातं पुराकल्पं सनातनम् ॥ १४
प्रवक्ष्यामि महाप्राज्ञ परमुत्तममद्य ते ॥ १४॥
बुद्ध्वा यदिह संसिद्धा भवन्तीह मनीषिणः ॥ १५
उपागम्यर्षयः पूर्वं जिज्ञासन्तः परस्परम् ॥ १५॥
बृहस्पतिर्भरद्वाजो गौतमो भार्गवस्तथा ।
वसिष्ठः [2]कश्यपश्चैव विश्वामित्रोऽत्रिरेव च ॥ १६॥
मार्गान् सर्वान् परिक्रम्य परिश्रान्तास्स्वकर्मभिः ॥ १७

1. क-ख—नरिन्दम । 2. क-ख—काश्यप ।

ऋषिमाङ्गिरसं वृद्धं पुरस्कृत्य तु ते द्विजाः ।
ददृशुर्ब्रह्मभवने ब्रह्माणं वीतकल्मषम् ॥ १८

तं प्रणम्य महात्मानं सुखासीनं महर्षयः ।
पप्रच्छुर्विनयोपेता नैश्रेयसमिदं परम् ॥ १९

ऋषयः—

कथं कर्म कृतं साधु कथं मुच्येत किल्बिषात् ।
के नो मार्गादिशवाश्च स्युः किं सत्यं किं च दुष्कृतम् ॥ २०

कौ वेमौ कर्मपन्थानौ महत्त्वं केन विन्दति ।
निरयं चापवर्गं च भूतानां प्रभवाप्ययौ ॥ २१

गुरुः—

इत्युक्तस्स मुनिश्रेष्ठैर् यदाह प्रपितामहः ।
तत् तेऽहं सम्प्रवक्ष्यामि शृणु शिष्य यथातथम् ॥ २२

ब्रह्मा—

सत्याद्भूतानि जातानि चराणि स्थावराणि च ।
तपसा तानि जीवन्ति जीवितं तद्धि [1]सुव्रतम् ॥ २३
स्वां योनिं पुनरागम्य वर्तन्ते येन कर्मणा ॥ २३॥
[2]सत्यं हि गुणसंयुक्तं नियतं पञ्चलक्षणम् ॥ २४
ब्रह्म सत्यं तपस्सत्यं सत्यं चैव प्रजापतिः ।
सत्याद्भूतानि जातानि भूतं सत्यमयं महत् ॥ २५
तस्मात् सत्याश्रया विप्रा नित्यं योगपरायणाः ।
अतीतक्रोधसन्तापा नियता धर्मसेतवः ॥ २६

1. क—सुव्रत । ख—सुव्रताः । 2 अ—श्लोकद्वयं न दृश्यते ।

अन्योन्यनियतान् वैद्यान् धर्मसेतुप्रवर्तकान् ।
तानहं सम्प्रवक्ष्यामि शाश्वताँल्लोकभावानान् ॥ २७

चातुर्वैद्यांस्तथा वर्णान् आश्रमांश्च पृथक् पृथक् ।
धर्ममेकं चतुष्पादं नित्यमाहुर्मनीषिणः ॥ २८

पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः ।
नित्यं ब्रह्मविदामिष्टं गतं पूर्वमहर्षिभिः ॥ २९

गदतस्तु ममाद्येह पन्थानं दुर्विदं परम् ।
निबोधत महाभागा निखिलेन परं पदम् ॥ ३०

ब्रह्मचारिकमेवाहुर् आश्रमं परमं पदम् ।
द्वितीयं गार्हपत्यं तु वानप्रस्थमतः परम् ॥ ३१

ततः परं तु विज्ञेयम् अध्यात्मं परमं पदम् ॥ ३१॥

ज्योतिराकाशमादित्यो वायुरिन्द्रः प्रजापतिः ।
नोपैति यावदध्यात्मं [1]तावदेतान् न पश्यति ॥ ३२॥

तस्य रूपं प्रवक्ष्यामि पुरस्तात् तं निबोधत ॥ ३३

फलमूलाशनवतां मुनीनां वसतां वने ।
वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्यते ॥ ३४

सर्वेषामेव वर्णानां गृहस्थोऽयं विशिष्यते ।
श्रद्धालक्षणमित्येवं धर्मं धीराः प्रचक्षते ॥ ३५

1. क-ख—तावदेनं न ।

[1-2]अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना ।
विषयस्थानि सर्वाणि वर्तमानानि भागशः ॥ ३६

महानात्मा तथाऽव्यक्तम् अहङ्कारस्तथैव च ।
इन्द्रियाणि दशैकं च महाभूतानि पञ्च च ॥ ३७

विशेषाः पञ्चभूतानाम् इत्येषा वैदिकी श्रुतिः ।
चतुर्विंशतिरेषा वै तत्त्वानां सम्प्रकीर्तिता ॥ ३८

तत्त्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ ॥
स धीरस्सर्वभूतेषु न मोहमधिगच्छति ॥ ३९

तत्त्वानि यो वेदयते यथातथं
गुणांश्च सर्वानखिलां च देवताम् ।
विधूतपाप्मा हि विमुच्य बन्धनं
स सर्वलोकानमलस्समश्नुते* ॥ ४०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
[ अस्मिन्नध्याये ४० श्लोकाः ]

---

1. अ—नैष्ठिकोऽथ यतिर्वाऽपि विभक्तो ब्रह्मचारिणः ।
सदेवयानाः पन्थानः पन्थानः परिकीर्तिताः ॥
सद्भिरध्यासिता धीरैः कर्मभिर्धर्मसेतवः ।
एतेषां पृथगध्यास्ते यो धर्मं संशितव्रतः ॥
नक्षत्रं पश्यति भूतानां सर्गं हि प्रभवाप्ययौ ॥
[अधिकः पाठः. अनन्वितश्च]

2. क-ख-घ—वाङ्मनः कायपूर्वं तत् ।

*अ—कोशे नास्याध्यायसमाप्तिर्दृश्यते ॥

## ॥ एकोनचत्वारिंशोऽध्यायः ॥

ब्रह्मणा काश्यपादिमहर्षीन् प्रति तमोगुणकार्यनिरूपणम् ॥ १ ॥

ब्रह्मा—

तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम् ।
नवद्वारं पुरं विद्यात् त्रिगुणं पञ्चधातुकम् ॥ १

एकादशपरिक्षेपं मनोव्याकरणात्मकम् ।
बुद्धिस्वामिकमित्येतत् परमेकादशाद् भवेत् ॥ २

त्रीणि स्रोतांसि यान्यस्मिन्नाप्यायन्ते पुनः पुनः ।
प्रणाड्यस्तिस्र एतेषां प्रवर्न्तते गुणात्मिकाः ॥ ३

तमो रजस्तथा सत्वं गुणानेतान् प्रचक्षते ।
अन्योन्यमिथुनास्सर्वे तथाऽन्योन्यानुजीविनः ॥ ४

[1]अन्योन्याश्रयिणश्चैव तथाऽन्योन्यानुवर्तिनः ।
अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्चधातवः ॥ ५

तमसो मिथुनं सत्वं सत्वस्य मिथुनं रजः ।
रजसश्चापि सत्वं स्यात् सत्वस्य मिथुनं तमः ॥ ६

नियम्यते तमो यत्र रजस्तत्र प्रवर्तते ।
नियम्यते [2]रजो यत्र सत्वं तत्र प्रवर्तते ॥ ७

1. अ—नास्तीदमर्धम् । 2. क-ख—यदा सत्वं तमस्तत्र प्रवर्तते ।

नैशात्मकं तमो विद्यात् त्रिगुणं मोहसंज्ञितम् ।
अधर्मलक्षणं चैव नियतं पापकर्मसु ॥ ८

प्रकृत्यात्मकमेवाभूद् रजः पर्यायकारणम् ।
[1]प्रवृत्तं सर्वभूतेषु पश्यत्युत्पत्तिलक्षणम् ॥ ९

एतेषां गुणतत्त्वं हि [2]वक्ष्यते प्राप्तहेतुभिः ।
समासव्यासयुक्तानि तत्त्वतस्तानि वित्त मे ॥ १०

सम्मोहो मनसस्त्यागः कर्मणामविनिर्णयः ।
[3]स्वप्नस्तम्भो भयं लोभश् शोकस्सुकृतदूषणम् ॥ ११

विस्मृतिश्चाविवेकश्च नास्तिक्यं भिन्नवृत्तिता ।
निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता ॥ १२

अकृते कृतमानित्वम् अज्ञाने ज्ञानमानिता ।
अमैत्री विकृतो भावो ह्यश्रद्धा गूढभावना ॥ १३

अनार्जनमसंज्ञत्वं कर्म पापमचेतना ।
गुरुत्वं सन्नभावत्वम् [4]अशीतत्वमवाग्गतिः ॥ १४

सर्व एते गुणाश्चैव तामसाः परिकीर्तिताः ॥ १४॥
ये चान्ये नियता भावा लोकेऽस्मिन् मूढसंज्ञिताः ।
तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः ॥ १५॥

---

1. अ—सत्त्वे तु । 2. क-ख-घ—वक्ष्यते हेत्वहेतुभिः ।
3. क-ख—दर्पस्तम्भौ भयं लोभश् शोक । 4. क-ख-घ—असितत्व ।

परिवादकथा नित्यं देवब्राह्मणवैरिता ।
अत्यागश्चातिमानश्च मोहो मन्युस्तथाऽक्षमा ॥ १६॥
मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते ॥ १७
[1]वृथाऽऽरम्भा हि ये केचिद् वृथा दानानि यानि च ।
वृथा भक्षणमित्येतत् तामसं वृत्तमिष्यते ॥ १८
अतिवादोऽतितिक्षा च मात्सर्यमतिमानिता ।
अश्रद्दधानता चैव तामसं वृत्तमिष्यते ॥ १९
एवंविधास्तु ये केचिल्लोकेऽस्मिन् पापकर्मिणः ।
मनुष्या भिन्नमर्यादास् ते सर्वे तामसा जनाः ॥ २०
तेषां योनिं प्रवक्ष्यामि [2]नियतां पापकर्मिणाम् ॥ २०॥
अवाङ्निरयभागा वै तिर्यङ्निरयगामिनः ॥ २१
स्थावराणि च भूतानि पशवो वाहनानि च ।
क्रव्यादा दन्दशूकाश्च कृमिकीटविहङ्गमाः ॥ २२
अपरे जन्तवो ये च सर्वे चापि चतुष्पदाः ।
उन्मत्ता बधिरा मूका ये चान्ये पापरोगिणः ॥ २३
मग्नास्तमसि दुर्वृत्तास् स्वकर्मकृतलक्षणाः ।
अवाक्स्रोतस इत्येते मग्नास्तमसि तामसाः ॥ २४
तेषामुत्कर्षमुद्रेकं वक्ष्याम्यहमतः परम् ।

1. ख—अर्धद्वयं नास्ति 2. क-ख—नियमं पापकर्मणाम् ।

यथा ते सुकृतां लोकाँल्लभन्ते पुण्यकर्मणाम् ॥ २५

अन्यथा प्रतिपन्नास्तु विवृद्धा ये च कर्मसु ॥ २५॥

स्वकर्मनिरतानां च ब्राह्मणानां शुभैषिणाम् ।

संस्कारेणोर्ध्वमायान्ति यतमानास्सलोकताम् ॥ २६॥

स्वर्गं गच्छन्ति देवानाम् इत्येषा वैदिकी श्रुतिः ॥ २७

अन्यथा प्रतिपन्नास्तु विबुद्धास्स्वेषु कर्मसु ।

पुनरावृत्तिधर्माणस् ते भवन्तीह मानुषाः ॥ २८

पापयोनिं समापन्नाश् चण्डाला [1]वृकचूचुकाः ।

वर्णान् पर्यायतश्चैव प्राप्नुवन्त्युत्तरोत्तरम् ॥ २९

शूद्रयोनिमतिक्रम्य ये चान्ये तामसा गुणाः ।

स्रोतोमध्ये समागम्य वर्तन्ते तामसा गुणाः ॥ ३०

अभिष्वङ्गस्तु कामेषु महामोह इति स्मृतः ।

ऋषयो मुनयो देवा मुह्यन्त्यत्र सुखेप्सवः ॥ ३१

तमोमोहो महामोहस् तामिस्रो ह्यन्धसंज्ञितः ।

मरणं त्वन्धतामिस्रस् तामिस्रः क्रोध उच्यते ॥ ३२

भावतो गुणतश्चैव योनितश्चैव तत्त्वतः ।

सर्वमेतत् तमो विप्राः कीर्तितं वो यथाविधि ॥ ३३

को न्वेतद्बुध्यते साधु को न्वेतत् साधु पश्यति ।

---

1. क-ख-घ—मूकचूचुपाः।

अतत्त्वे तत्त्वदर्शी यस् तमसस्तच्च लक्षणम् ॥ ३४

तमोगुणा वो बहवोऽनुकीर्तिता
यथावदुक्तं च तमः परावरम् ।
नरो हि यो वेद गुणानिमान् सदा
स तामसैस्सर्वगुणैर्विमुच्यते ॥ ३५

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥
[अस्मिन्नध्याये ३५ श्लोकाः]

---

## ॥ चत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति रजोगुणकार्यनिरूपणम् ॥ १ ॥

ब्रह्मा—

रजोऽहं वः प्रवक्ष्यामि याथातथ्येन सत्तमाः ।
निबोधत महाभागा गुणवृत्तं च सर्वशः ॥ १

सङ्कल्पो रूपमायासस् सुखदुःखे हिमातपौ ।
ऐश्वर्यं निग्रहस्सिद्धिर् हेतुवादोऽरतिः क्षमा ॥ २

बलं शौर्यं मदो रोषो व्यायामकलहावपि ।
ईर्ष्येप्सा पैशुनं युद्धं ममत्वं परिपालनम् ॥ ३

वधबन्धपरि[1]क्लेशाः क्रयो विक्रय एव च ।
निकृन्त च्छिन्धि भिन्धीति परमर्मावकर्तनम् ॥ ४
उग्रं दारुणमाक्रोशः परवित्तानुरागिता ।
लोकचिन्ता विचिन्ता च मत्सरः परि[2]भाषणम् ॥ ५
वृथाशास्त्रं मृषावादो विकल्पपरिभाषणम् ।
निन्दा स्तुतिः प्रशंसा च प्रतापः परितर्पणम् ॥ ६
परिचर्या च शुश्रूषा सेवा तृष्णा व्यपाश्रयः ।
[3]व्यूहो नयः प्रमादश्च परितापः परिग्रहः ॥ ७
संस्कारा ये च लोकेऽस्मिन् प्रवर्तन्ते वृथा पृथक् ।
नृषु नारीषु भूतेषु द्रव्येषु शरणेषु च ॥ ८
सन्तापोऽप्रत्ययश्चैव व्रतानि नियमाश्च ये ।
प्रमदा शीलयुक्ता च सततं मे भवत्विति ॥ ९
स्वधाकारो नमस्कारस् स्वाहाकारो वषट्क्रिया ।
याजनाध्यापने चोभे तथैवाहुः प्रतिग्रहम् ॥ १०
[4]इदं मे स्यादिदं मे स्यात् स्नेहो गुणसमुद्भवः ॥ १०॥
अभिद्रोहस्तथा माया निकृतिर्मान एव च ।
[5]स्तेयं हि सम्परीवादः [6]परितापः प्रजागरः ॥ ११॥

---

1. क-ख-घ—क्लेशात् क्रियो विक्रम एव च । 2. क-ख—भावनः ।
3. क-घ—व्यूढो । ख—व्यूढो नयप्रवादश्च ।
4. क-ख-घ—प्रतिग्रहमिदं मे स्यात् स्नेहो गुणसमुद्भवः । [पाठान्तरम् ]
5. क-ख—स्तेयं हिंसाः परीवादः परहिंसा । 6. घ—परहिंसा ।

दम्भो दर्पोऽथ रागश्च भक्तिः प्रीतिः प्रमोदनम् ।
द्यूतं च जनवादश्च सम्बन्धास्स्त्रीकृताश्च ये ॥ १२॥
नृत्तवादित्रगीतानि प्रसङ्गा ये च किञ्चन ।
सर्व एते गुणा विप्रा राजसास्सम्प्रकीर्तिताः ॥ १३॥
भूतभव्यभविष्याणां भूतानां [1]भुवि भावनाः ।
त्रिवर्गनिरता नित्यं धर्मोऽर्थः काम इत्यपि ॥ १४॥
कामवृत्ताः प्रमोदन्ते सर्वकामसमृद्धिभिः ।
अर्वाक्स्रोतस इत्येते ते जना राजसास्स्मृताः ॥ १५॥
अस्मिँल्लोके प्रमोदन्ते जायमानाः पुनः पुनः ॥ १६
[2]प्रेत्यभाविकमिच्छन्ति ऐहलौकिकमेव च ।
दानानि प्रतिगृह्णन्ति तृप्यन्त्यथ च जुह्वति ॥ १७
रजोगुणा वो बहुधाऽनुकीर्तिता
यथावदुक्तं गुणवृत्तमेव च ।
नरो हि यो वेद गुणानिमान् सदा
स राजसैस्सर्वगुणैर्विमुच्यते ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ ५२ ॥ अनुगीतापर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥
[ अस्मिन्नध्याये १८ श्लोकाः ]

---

1. अ—भूतभावनः ।
2. क-ख—प्रेत्यभावकमिच्छन्त ऐहिकं लोकमेव च ।

## ॥ एकचत्वारिंशोऽध्यायः* ॥

ब्रह्मणा महर्षीन् प्रति सत्त्वगुणकार्यनिरूपणम् ॥ १ ॥

ब्रह्मा—

अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमम् ।
सर्वभूतहितं लोके सतां [1]धर्ममनिन्दितम् ॥ १

आनन्दः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च ।
अकार्पण्यमसंरम्भस् सन्तोषश्श्रद्दधानता ॥ २

क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
अक्रोधश्चानसूया च शौचं दाक्ष्यं पराक्रमः ॥ ३

मुधा ज्ञानं मुधा वृत्तं मुधा सेवा मुधा श्रमः ।
एवं यो युक्तधर्मस्स्यात् सोऽमुत्रानन्त्यमश्नुते ॥ ४

निर्ममो निरहङ्कारो निराशी[2]स्सर्वतस्समः ।
अकामहत इत्येष सतां धर्मस्सनातनः ॥ ५

विस्रम्भो ह्रीस्तितिक्षा च त्यागश्शौचमतन्द्रिता ।
आनृशंस्यमसम्मोहो दया भूतेष्वपैशुनम् ॥ ६

हर्षस्तुष्टिर्विस्मयश्च विनयस्साधुवृत्तिता ।

---

* अ—कोशे नास्त्ययमध्यायः ॥
1. क-ख—धर्ममनुष्ठितम् । 2. क-ख—स्सर्वसम्मतः ।

शान्तिः कर्मविशुद्धिश्च शुभा बुद्धिर्विमोहनम् ॥ ७

उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वशः ।
निर्ममत्व[1]मनाशीर्त्वम् अपरिक्षतधर्मता ॥ ८

मुधा दानं मुधा यज्ञो मुधाऽधीतं मुधा व्रतम् ।
मुधा प्रतिग्रहश्चैव मुधा धर्मो मुधा तपः ॥ ९

एवंवृत्तास्तु ये केचिल्लोकेऽस्मिन् सत्वसंश्रयाः ।
ब्राह्मणा ब्रह्मयोनिस्थास् ते धीरास्साधुदर्शिनः ॥ १०

जित्वा सर्वाणि पापानि निश्शोका ह्यजरामराः ।
दिव्यं प्राप्य तु ते धीराः कुर्वते वै ततस्तनूः ॥ ११

ईशित्वं च वशित्वं च लघुत्वं चाणुता तथा ।
विकुर्वन्तो महात्मानो देवास्त्रिदिवगा इव ॥ १२

ऊर्ध्वस्रोतस इत्येते देवा वैकारिकास्स्मृताः ।
विकुर्वन्तः प्रकृत्या वै दिवं प्राप्तास्ततस्ततः ॥ १३

यद्यदिच्छन्ति तत् सर्वं भजन्ते विभजन्ति च ॥ १३॥

इत्येतत् सात्विकं वृत्तं कथितं वो द्विजर्षभाः ।
एतद्विज्ञाय विधिवल् लभते यद्यदिच्छति ॥ १४॥

प्रकीर्तितास्सत्त्वगुणा विशेषतो
यथावदुक्तं गुणवृत्तमेव च ।

---

3. क—अनाशित्वमुपरिक्रीत ।

नरस्तु यो वेद गुणानिमान् सदा
गुणान् स भुङ्क्ते न गुणैस्तु भुज्यते ॥ १५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

॥ ५२ ॥ अनुगीतापर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥

[ अस्मिन्नध्याये १५॥ श्लोकाः ]

---

## ॥ द्विचत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति सत्त्वादिगुणत्रयनिरूपणम् ॥ १ ॥

ब्रह्मा—

न वै शक्या मया वक्तुं पृथक्त्वेनैव सर्वशः ।
अविच्छिन्नानि दृश्यन्ते रजस्सत्त्वं तमस्तथा ॥ १

अन्योन्येनानुरज्यन्ते त्वन्योन्येनानुजीविनः ।
अन्यो[1]न्यापाश्रयास्सर्वे तथाऽन्योन्यानुवर्तिनः ॥ २

[2]यावत् सत्त्वं रजस्तावद् वर्तते नात्र संशयः ।
यावत् तमश्च सत्त्वं च रजस्तावदिहोच्यते ॥ ३

संहत्य कुर्वते यात्रां सहितास्सङ्गचारिणः ।
सङ्घातवृत्तयो ह्येते वर्तन्ते हेत्वहेतुभिः ॥ ४

1. क-ख—न्यस्याश्रया । 2. क-ख-घ—यावत् सत्त्वं तमस्तावद् ।

उद्रेकव्यतिरिक्तानां तेषामन्योन्यवर्तिनाम् ।
वर्तते यद्यथाऽन्यूनं व्यतिरिक्तं च सर्वशः ॥ ५

व्यतिरिक्तं तमो यत्र तिर्यग्भावगतं भवेत् ।
अल्पं तत्र रजो ज्ञेयं सत्वमल्पतरं तथा ॥ ६

उद्रिक्तं तु रजो यत्र मध्यस्रोतोगतं भवेत् ।
अल्पं तत्र तमो ज्ञेयं सत्वं चाल्पतरं ततः ॥ ७

[1]उद्रिक्तं तु यदा सत्वम् ऊर्ध्वस्रोतोगतं भवेत् ।
अल्पं तत्र तमो ज्ञेयं रजश्चाल्पतरं तथा ॥ ८

सत्वं वैकारिकी योनिर् इन्द्रियाणां प्रकाशिका ।
न हि सत्वात् परो भावः कश्चिदन्यो विधीयते ॥ ९

ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणसंयुक्ता यान्त्यधस्तामसा जनाः ॥ १०

तमश्शूद्रे रजः क्षत्रे ब्राह्मणे सत्वमुत्तमम् ।
इत्येवं त्रिषु वर्णेषु विवर्तन्ते गुणाश्रयः ॥ ११

दूराद्[2]पि च दृश्यन्ते सहितास्सङ्गचारिणः ।
तमस्सत्वं रजश्चैव पृथक्त्वं नानुशुश्रुम ॥ १२

दृष्ट्वा चादित्यमुद्यन्तं कुचोराणां भयं भवेत् ।
अध्वगाः परितप्येरंस् तृष्णार्ता दुःखभागिनः ॥ १३

1. अ—अर्धद्वयं नास्ति । 2. क-ख—दपीह ।

आदित्यस्सत्वमुद्दिष्टः कुचोरास्तु यथा तमः ।
परितापोऽध्वगानां च राजसो गुण उच्यते ॥ १४

प्रकाशस्सत्वमादित्यस् सन्तापो राजसो गुणः ।
उपप्लवस्तु विज्ञेयस् तामसस्तस्य पर्वसु ॥ १५

एवं ज्योतिष्षु सर्वेषु [1]प्रवर्तन्ते गुणास्त्रयः ।
पर्यायेण च वर्तन्ते तत्र तत्र तथा तथा ॥ १६

स्थावरेषु च भूतेषु तिर्यग्भावगतं तमः ।
राजसास्तु विवर्धन्ते स्नेहभावात्तु सात्विकाः ॥ १७

अहस्त्रिधा तु विज्ञेयं त्रिधा रात्रिर्विधीयते ।
मासार्धमासवर्षाणि ऋतव[2]स्सन्धयस्तथा ॥ १८

त्रिधा दानानि दीयन्ते त्रिधा यज्ञः प्रवर्तते ।
त्रिधा लोकास्त्रिधा देवास् त्रिधा [3]विद्यास्त्रिधा गतिः ॥ १९

भूतं भव्यं भविष्यं च धर्मोऽर्थः काम इत्यपि ।
प्राणापानावुदानश्चाप्येत एव त्रयो गुणाः ॥ २०

यत् किञ्चिदिह वै लोके सर्वमेष्वेव तु त्रिषु ।
त्रयो गुणाः प्रवर्तन्ते ह्यव्यक्ता नित्यमेव तु ॥ २१

सत्वं रजस्तमश्चैव गुणसर्गस्सनातनः ।

---

1. क-ख-घ—निवर्तन्ते । 2. अ-घ—ष्षड्विधा ।
3. क-ख-घ—सिद्धिः ।

तदव्यक्तं शिवं नित्यम् अजं योनिं सनातनम् ॥ २२
प्रकृतिर्विकाराः प्रलयं प्रधानं [1]प्रभवाप्ययम् ।
अनुद्रिक्तमनूनं च व्यक्तमप्यचलं ध्रुवम् ॥ २३
सदसच्चैव तत् सर्वम् अव्यक्तं [2]त्रिगुणं स्मृतम् ।
ज्ञेयानि नामधेयानि नरैरध्यात्म[3]चिन्तकैः ॥ २४

अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्वाणि गतीश्च केवलाः ।
[4]विमुक्तदेहः प्रविभागतत्त्ववित्
स मुच्यते सर्वगुणैर्निरामयः ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ ९२ ॥ अनुगीतापर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
[ अस्मिन्नध्याये २५ श्लोकाः ]

## ॥ त्रिचत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति महत्तत्त्वनिरूपणम् ॥ १ ॥

ब्रह्मा—

अव्यक्तात् पूर्वमुत्पन्नो महानात्मा महामतिः ।
अनिर्गुणानां सर्वेषां प्रथमस्सर्ग उच्यते ॥ १

1. क—प्रलयाप्ययौ । ख—प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ ।
2. क-ख-घ—निर्गुणं । 3. क-ख—वित्तमैः ।
4. क-ख—विमुच्य देहं ।

महानात्मा मतिर्विष्णुर् विभुश्शम्भुश्च वीर्यवान् ।
बुद्धिः प्रज्ञोपलब्धिश्च संवित् ख्यातिर्धृतिस्स्मृतिः ॥ २

पर्यायवाचकैश्शब्दैर् महानात्मा विभाव्यते ॥ २॥
तज्ज्ञानाद् ब्राह्मणो विद्वान् [1]प्रमोहं नैव गच्छति ॥ ३

सर्वतःपाणिपादं च सर्वतोक्षिशिरोमुखम् ।
सर्वतश्श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ ४

[2]महान् प्रभाभिः पुरुषस् सर्वस्य हृदि संश्रितः ।
अणिमा लघिमा प्राप्तिर् ईशानो ज्योतिरव्ययः ॥ ५

ये तु बुद्धिमतां लोके सन्यासनिरताश्च ये ।
ध्यानिनो नित्ययोगाश्च सत्यसन्धा जितेन्द्रियाः ॥ ६

ज्ञानवन्तश्च ये केचिद् अलुब्धा जितमन्यवः ।
प्रसन्नमनसो धीरा निर्मला निरहङ्कृताः ॥ ७

विमुक्तास्सर्व एवैते महत्त्वमुपयान्ति वै ॥ ७॥

आत्मनो महतो वेद यः पुण्यां गतिमुत्तमाम् ।
स धीरस्सर्वलोकेषु न मोहमधिगच्छति ॥ ८॥

विष्णुरेवादिसर्गेषु स्वयम्भूर्भवति प्रभुः ॥ ९

---

1. क-ख-ङ—न च मोहं निगच्छति ।
2. क-ङ—महाप्रभावश्चित्पुरुषस् सर्वं व्याप्य स तिष्ठति ।
ख—इदमर्धं नास्ति

एवं हि यो वेद गुहाशयं प्रभुं
नवं पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान् बुद्धिमतीत्य तिष्ठति ॥* १०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
[ अस्मिन्नध्याये १० श्लोकाः ]

## ॥ चतुश्चत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति अहङ्कारतत्त्वनिरूपणम् ॥ १ ॥

य उत्पन्नो महान् पूर्वम् अहङ्कारस्स उच्यते ।
[1]अहमित्येव सम्भूतो द्वितीयस्सर्ग उच्यते ॥ १

अहङ्कारश्च भूतादिर् वैकारिक इति स्मृतः ।
तैजसश्चेतना धातुः प्रजासर्गः प्रजापतिः ॥ २

देवानां प्रभवो देवो मनसश्च त्रिलोककृत् ।
अहमित्येव तत् सर्वम् [2]अभिमन्ता स उच्यते ॥ ३

* अ-क-ख-घ—कोशेषु नात्राध्यायसमाप्तिर्दृश्यते ।
1. क-ख-घ—नास्तीदमर्धम् ॥
2. क-घ—अभिसत्मा । ख—अभिसत्ता ।

अध्यात्म[1]ज्ञानिनां तेषां मुनीनां भावितात्मनाम् ।
स्वाध्याय[2]व्रतसिद्धानाम् एष लोकस्सनातनः ॥ ४

[3]अहङ्कारेणाहरतो गुणानिमान्
भूतादिरेवं सृजते स भूतकृत् ।
वैकारिकस्सर्वमिदं विचेष्टते
स्वतेजसा रञ्जयते जगत् तथा ॥ ५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
[ अस्मिन्नध्याये ५ श्लोकाः ]

## ॥ पञ्चचत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रत्यहङ्कारतत्त्वाद्भूतादिसृष्टिप्रकारकथनम् ॥ १ ॥

ब्रह्मा—

अहङ्कारात् प्रसूतानि महाभूतानि पञ्च वै ।
पृथिवी वायुराकाशम् आपो ज्योतिश्च पञ्चमम् ॥ १

तेषु भूतानि मुह्यन्ति महाभूतेषु पञ्चसु ।
शब्दस्पर्शनरूपेषु रसगन्धक्रियासु च ॥ २

1. क-ख—ज्ञाननित्यानां ।
2. ख-घ—क्रतुनित्यानां । क—कृतनित्यानां ।
3. ख-घ—अहं चकारो लभते गुणानिमान् ?। क—अहंकारणकरभते(?)

महाभूतविकारान्ते प्रलये प्रत्युपस्थिते ।
सर्वप्राणभृतां धीरा महदुत्पद्यते भयम् ॥ ३

यद् यस्माज्जायते भूतं तत्र तत् प्रविलीयते।
लीयन्ते प्रतिलोमानि जायन्ते चोत्तरोत्तरम् ॥ ४

ततः प्रलीने सर्वस्मिन् भूते स्थावरजङ्गमे ।
स्मृतिमन्तस्ततो धीरा न लीयन्ते कथञ्चन ॥ ५

शब्दस्स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
क्रियाः कारणयुक्तास्युर् अनित्या मोहसंज्ञिताः ॥ ६

लोकप्रजनसंयुक्ता निर्विशेषा ह्यकिञ्चनाः ।
मांसशोणितसङ्घाता अन्योन्यस्योपजीविनः ॥ ७

बहिरात्मान इत्येते क्रूराः कृपणवृत्तयः ॥ ७॥

प्राणापानावुदानश्च समानो व्यान एव च ।
अन्तरात्मेति चाप्येते नियताः पञ्च वायवः ॥ ८॥

वाङ्मनोबुद्धिरित्येभिस् सार्धमष्टात्मकं जगत् ॥ ९

त्वग्घ्राणश्रोत्रचक्षूंषि रसनं वाक् च संयताः ।
विशुद्धं च मनो यस्य बुद्धिश्चाव्यभिचारिणी ॥ १०

अष्टौ यस्याप्रमेयो ह्येते [1]दहन्त्येवं क्रियास्सदा ।
स तद्ब्रह्म शुभं याति यस्माद्भूयो न विद्यते ॥ ११

1. क-ख-घ—न दहन्ति मनस्सदा।

एकादश च यान्याहुर् इन्द्रियाणि विशेषतः ।
अहङ्कारात् प्रसूतानि तानि वक्ष्याम्यहं द्विजाः॥ १२

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पादौ पायुरुपस्थं च हस्तौ वाग् दशमी भवेत् ॥ १३

[1]इन्द्रियग्राम इत्येतन्मन एकादशं भवेत् ।
एतद्ग्रामं जयेत् पूर्वं ततो ब्रह्म प्रकाशते ॥ १४

बुद्धीन्द्रियाणि पञ्चाहुः पञ्च कर्मेन्द्रियाणि च ।
श्रोत्रादीनि तु पञ्चाहुर् बुद्धियुक्तानि तत्त्वतः ॥ १५

अविशेषाणि चान्यानि कर्मयुक्तानि तानि तु ।
उभयत्र मनो ज्ञेयं बुद्धिस्तु द्वादशी भवेत् ॥ १६

इत्युक्तानीन्द्रियाण्येतान्येकादश तथा क्रमात् ।
[2]मन्यन्ते कृतमित्येव विजित्यैतानि पण्डिताः ॥ १७

त्रीणि स्थानानि भूतानां चतुर्थं नोपपद्यते ।
स्थलमापस्तथाऽऽकाशं जन्म चापि चतुर्विधम् ॥ १८

अण्डजोद्भिज्जसंस्वेदजरायुजमथापि च ।
चतुर्धा जन्म इत्येतद् भूतग्रामस्य वक्ष्यते ॥ १९

अचराण्यपि भूतानि खेचराणि तथैव च ।

---

1. ब—नास्तीदमर्धम्।
2. क-ख-ब—मन्यते कृत इत्येव विन्दन् वै मनसि स्थितः।

अण्डजानि विजानीयात् सर्वांश्चैव सरीसृपान् ॥ २०
स्वेदजाः कृमयः प्रोक्ता जन्तवश्च तथाविधाः ।
जन्म द्वितीयमित्येतज् जघन्यतरमुच्यते ॥ २१
भित्त्वा तु पृथिवीं यानि जायन्ते कालपर्ययात् ।
उद्भिज्जानीति तान्याहुर् भूतानि द्विजसत्तमाः ॥ २२
द्विपादबहुपादानि तिर्यग्गतमतीनि च ।
जरायुजानि भूतानि वितितान्यपि सत्तमाः ॥ २३
विविधानीह विज्ञेया ब्रह्म योनिस्सनातनम् ।
तपः कर्म च यत् पुण्यम् इत्येष विदुषां नयः ॥ २४
द्विविधं कर्म विज्ञेयम् इज्या दानं च तन्मखे ।
ज्ञानं स्वाध्यायजननम् इति वृद्धानुशासनम् ॥ २५
एतद्यो वेद विधिवत् स मुक्तस्स्याद्विजर्षभाः ।
विमुक्तस्सर्वपापेभ्य इति चैव निबोधत ॥ २६
आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममिष्यते ।
अधिभूतं तथा शब्दो दिशश्चात्राधिदैवतम् ॥ २७
[1]द्वितीयं मारुतं भूतं त्वगध्यात्मं च विश्रुतम् ।
स्पष्टव्यमधिभूतं तु विद्युत् तत्राधिदैवतम् ॥ २८
तृतीयं ज्योतिरित्याहुश् चक्षुरध्यात्ममिष्यते ।

1. ख—इतः द्वादशार्धानि न सन्ति ।

अधिभूतं ततो रूपं सूर्यस्तत्राधिदैवतम् ॥ २९

[1]चतुर्थमापो विज्ञेयं जिह्वा चाध्यात्ममिष्यते ।
अधिभूतं रसश्चात्र सोमस्तत्राधिदैवतम् ॥ ३०

पृथिवी पञ्चमं भूतं घ्राणमध्यात्ममिष्यते ।
अधिभूतं ततो गन्धो वायुस्तत्राधिदैवतम् ॥ ३१

एषु पञ्चसु भूतेषु चतुष्टयविधिस्स्मृतः ॥ ३१॥
अतः परं प्रवक्ष्यामि सर्वं त्रिविधमिन्द्रियम् ॥ ३२

पादावध्यात्ममित्याहुर् ब्राह्मणास्तत्त्वदर्शिनः ।
अधिभूतं तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ॥ ३३

[2]अवाग्गतिरपानश्च पायुरध्यात्ममिष्यते ।
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम् ॥ ३४

प्रजनस्सर्वभूतानाम् उपस्थोऽध्यात्ममिष्यते ।
अधिभूतं तथा शुक्रं दैवतं च प्रजापतिः ॥ ३५

हस्तावध्यात्ममित्याहुर् अध्यात्मविदुषो जनाः ।
अधिभूतं तु कर्माणि शक्रस्तत्राधिदैवतम् ॥ ३६

वैश्वदेवं मनः पूर्वं वागध्यात्ममिहोच्यते ।
वक्तव्यमधिभूतं च वह्निस्तत्राधिदैवतम् ॥ ३७

अध्यात्मं मन इत्याहुः पञ्चभूतानुकारकम् ।

---

1. घ—इतः श्लोकद्वयं नास्ति 2. अ—अर्धद्वयं नोपलभ्यते ।

अधिभूतं च मन्तव्यं चन्द्रमाश्चाधिदैवतम् ॥ ३८
अध्यात्मं बुद्धिरित्याहुष् षडिन्द्रियविचारिणी ।
अधिभूतं [1]च विज्ञेयं महत् तत्राधिदैवतम् ॥ ३९
यथावदध्यात्मविधिर् एष वः कीर्तितो मया ।
ज्ञानमस्य हि धर्मज्ञाः प्राप्तं बुद्धिमतामिह ॥ ४०
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि पञ्च च ।
सर्वाण्येतानि सन्धाय मनसा सम्प्रधारयेत् ॥ ४१
क्षीणे मनसि सर्वस्मिन् न जन्मसुखमिष्यते ।
ज्ञानसम्पन्नसत्त्वानां तत् सुखं विदुषां हितम् ॥ ४२
अतः परं प्रवक्ष्यामि सूक्ष्मभावकरं शिवम् ।
निवृत्तं सर्वभूतेषु मृदुना दारुणेन वा ॥ ४३
गुणागुणमनासङ्गम् एकचर्यमनन्तरम् ।
एतद्ब्राह्मणजं वृत्तम् आहुरेकपदं सुखम् ॥ ४४
विद्वान् कूर्म इवाङ्गानि कामान् संहृत्य सर्वशः ।
विरजास्सर्वतो मुक्तो यो नरस्स सुखी सदा ॥ ४५
कामानात्मनि संयम्य क्षीणतृष्णस्समाहितः ।
सर्वभूतसुहृन्मैत्रो ब्रह्मभूयाय कल्पते ॥ ४६
इन्द्रियाणां निरोधेन सर्वेषां विषयैषिणाम् ।

---

1. अ-ब—तु विज्ञेयम् अहस्सत्ता ।

मुने[1]र्जनपदत्यागाद् अध्यात्माग्निस्समिध्यते ॥ ४७
यथाऽग्निरिन्धनैरिद्धो महाज्योतिः प्रकाशते ।
तथेन्द्रियनिरोधेन महानात्मा प्रकाशते ॥ ४८
यदा पश्यति भूतानि प्रसन्नात्माऽऽत्मनो हृदि ।
स्वयञ्ज्योतिस्तदा सूक्ष्मात् सूक्ष्ममाप्नोत्यनुत्तमम् ॥ ४९
अग्नी रूपं [2]रसं स्रोतो वातस्स्पर्शनमेव च ।
मही [3]गन्धधरा घ्राणम् आकाशश्श्रवणं तथा ॥ ५०
दृश्यमादित्यमेवाहुर् अध्यात्मविदुषो जनाः ॥ ५०॥
रोगशोकसमाविष्टं पञ्चस्रोतस्समावृतम् ।
पञ्चभूतसमायुक्तं नवद्वारं द्विजोत्तमाः ॥ ५१॥
रजस्वलमथादृश्यं त्रिगुणं [4]सप्तधातुकम् ।
संसर्गाभिरतं मूढं शरीरमिति धारणा ॥ ५२॥
दुश्चरं जीवलोकेऽस्मिन् सत्वं प्रति समाश्रितम् ।
एतदेव हि लोकेऽस्मिन् कालचक्रं प्रवर्तते ॥ ५३॥
एतन्महार्णवं घोरम् अगाधं मोहसंज्ञितम् ।
विसृजन् सङ्क्षिपंश्चैव मोहयन् स्वापयञ्जगत् ॥ ५४॥
कामक्रोधौ भयं मोहम् अभिद्रोहमथानृतम् ।
इन्द्रियाणां निरोधेन सदा त्यजति दुस्त्यजान् ॥ ५५॥

1. क-ख—र्जातपरित्या । 2. क—मनः । ख—अजः ।
3. क-ख—पङ्कधरा घ्राणमाकाशं । 4. क-ख—सप्तधात्मकम् ।

यस्यैते निर्जिता लोके त्रिगुणाः पञ्च धातवः ।
व्योम्नि तस्य परं स्थानम् अनन्त[1]मुपलभ्यते ॥ ५६॥
कालकूलामपारान्तां मनस्स्रोतोभयावहाम् ।
नदीं दुर्गह्रदां तीर्णः कामक्रोधावुभौ जयेत् ॥ ५७॥
[2]सर्वदोषविनिर्मुक्तस् ततः पश्यति तत् परम् ।
मनो मनसि सन्धाय पश्यत्यात्मानमात्मनि ॥ ५८॥
[3]सर्ववित् सर्वभूतेषु द्रक्ष्यत्यात्मानमात्मनि ॥ ५९
एकधा बहुधा चैव विकुर्वाणस्ततस्ततः ।
ध्रुवं पश्यति रूपाणि दीपाद्दीपशतं यथा ॥ ६०
स वै विष्णुश्च रुद्रश्च इन्द्राग्नी च प्रजापतिः ।
स हि धाता विधाता च स प्रभुस्सर्वतोमुखः ॥ ६१
हृदयं सर्वभूतानां महानात्मा प्रकाशते ॥ ६१॥

तं विप्रसङ्घाश्च सुरासुराश्च
यक्षाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव सदा स्तुवन्ति ॥ ६२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥
[ अस्मिन्ध्याये ६२॥ श्लोकाः ]

---

1. अ—मथ लक्ष्यते । 2. ख—स सर्वदोषनिर्मुक्तस्तपः ।
3. अ—इदमर्धं न दृश्यते ।

## ॥ षट्चत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति मनुष्येषु क्षत्रियाणां रजोगुणकार्यबलप्रधानतया तेषां सत्वप्रधानब्राह्मणरक्षणस्य कर्तव्यत्वकथनप्रसङ्गेन तत्तज्जातिश्रेष्ठवस्तुकथनम् ॥ १ ॥ तथाऽहिंसादिधर्मादिप्रतिपादनम् ॥ २ ॥

ब्रह्मा—

मनुष्याणां तु राजन्यः क्षत्रियो मध्यमो गुणः ।
कुञ्जरो वाहनानां तु सिंहश्चारण्यवासिनाम् ॥ १
अविः पशूनां सर्वेषाम् आखुश्च बिलवासिनाम् ।
गवां गोवृषभश्चैव स्त्रीणां पुरुष एव च ॥ २
न्यग्रोधो जम्बुवृक्षश्च पिप्पलश्शाल्मलिस्तथा ।
शिंशुपा मेषशृङ्गश्च तथा कीचकवेणवः ॥ ३
एते द्रुमाणामधिका लोकेऽस्मिन् नात्र संशयः ॥ ३॥
हिमवान् पारियात्रश्च सह्यो विन्ध्यस्त्रिकूटवान् ।
श्वेतो नीलश्च भासश्च [1]राष्ट्रवांश्चैव पर्वतः ॥ ४॥
शुभस्कन्धो महेन्द्रश्च माल्यवान् पर्वतस्तथा ।
एते पर्वतराजानो गणानां मरुतस्तथा ॥ ५॥
सूर्यो ग्रहाणामधिपो नक्षत्राणां च चन्द्रमाः ।
यमः पितॄणामधिपस् सरितामथ सागरः ॥ ६॥
अम्भसां वरुणो राजा सत्त्वानां मित्र उच्यते ॥ ७

1. क-ख—काष्ठवांश्चैव पर्वतः ।

[1]अर्कोऽधिपतिरुष्णानां ज्योतिषामिन्दुरुच्यते ।
अग्निर्भूतपतिर्नित्यं ब्राह्मणानां बृहस्पतिः ॥ ८

ओषधीनां पतिस्सोमो विष्णुर्बलवतां वरः ।
त्वष्टाऽधिराजो रूपाणां पशूनामीश्वरश्शिवः ॥ ९

दक्षिणानां तथा यज्ञो [2]वेदानां साम एव च ।
दिशामुदीची विप्राणां सोमो राजा प्रतापवान् ॥ १०

कुबेरस्सर्वयक्षाणां देवतानां पुरन्दरः ।
एष भूताधिकस्सर्गः प्रजानां च प्रजापतिः ॥ ११

सर्वेषामेव भूतानाम् अहं ब्रह्ममयो महान् ।
भूतं परतरं मत्तो विष्णोर्वाऽपि न विद्यते ॥ १२

राजाधिराजस्सर्वेषां विष्णुर्ब्रह्ममयो महान् ।
ईश्वरं तं विजानीमस् स विभुस्स प्रजापतिः ॥ १३

नरकिन्नरयक्षाणां गन्धर्वोरगरक्षसाम् ।
देवदानवनागानां सर्वेषामीश्वरो हि सः ॥ १४

भद्रादेवानुयातानां सर्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्वती [3]त्रिधा ॥ १५

उमां देवीं विजानीत नारीणामुत्तमां शुभाम् ।

---

1. अ—इदमर्धं नोपलभ्यते । 2. क-ख-घ—वेदानामृच ।
3. क—तु या । ख-घ—ति या ।

रतीनां वसुमत्यस्तु स्त्रीणामप्सरसस्तथा ॥ १६

धर्मकामाश्च राजानो ब्राह्मणा धर्मलक्षणाः ।
तस्माद्राजा द्विजातीनां प्रयतेतेह रक्षणे ॥ १७

राज्ञां हि विषये येषाम् अवसीदन्ति साधवः ।
हीनास्ते स्वगुणैस्सर्वैः [1]प्रेत्यावाङ्मार्गगामिनः ॥ १८

राज्ञां तु विषये येषां साधवः परिरक्षिताः ।
तेऽस्मिँल्लोके प्रमोदन्ते प्रेत्य चानन्त्यमेव च ॥ १९

प्राप्नुवन्ति महात्मान इति वित्त द्विजर्षभाः ॥ १९॥
अत ऊर्ध्वं प्रवक्ष्यामि नियतं धर्मलक्षणम् ॥ २०

अहिंसालक्षणो धर्मो हिंसा चाधर्मलक्षणा ।
प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः ॥ २१

शब्दलक्षणमाकाशं वायुस्तु स्पर्शलक्षणः ।
ज्योतिषां लक्षणं रूपम् आपश्च रसलक्षणाः ॥ २२

धरणी सर्वभूतानां पृथिवी गन्धलक्षणा ।
स्वरव्यञ्जनसंस्कारा भारती सत्यलक्षणा ॥ २३

मनसो लक्षणं चिन्ता तथोक्ता बुद्धिरन्वयात् ।
मनसा चिन्तयानोऽर्थान् बुद्ध्या चैव व्यवस्यति ॥ २४

बुद्धिर्हि व्यवसायेन लक्ष्यते नात्र संशयः ।

---

1. क—प्रेत्यवामात्य । ख--प्रेत्यवामार्गकामिनः ।

लक्षणं महतो ध्यानम् अव्यक्तं साम्यलक्षणम् ॥ २५

[1]प्रवृत्तिलक्षणो योगो ज्ञानं सन्न्यासलक्षणम् ।
तस्माज्ज्ञानं पुरस्कृत्य सन्न्यसेदिह बुद्धिमान् ॥ २६

सन्न्यासी ज्ञानसंयुक्तः प्राप्नोति परमां गतिम् ।
अतीतद्वन्द्वमभ्येति तमोमृत्युजरातिगम् ॥ २७

धर्मलक्षणसंयुक्तम् उक्तं वो विधिवत् तथा ॥ २७॥

गुणानां ग्रहणं सम्यग् [2]वक्ष्याम्यहमतः परम् ॥ २८

पार्थिवो यस्तु गन्धो वै घ्राणेनैव स गृह्यते ।
घ्राणस्थश्च तथा वायुर् गन्धज्ञाने विधीयते ॥ २९

अबाश्रयो रसो नित्यं जिह्वया स तु गृह्यते ।
जिह्वास्थश्च तथा सोमो रसज्ञाने विधीयते ॥ ३०

[3]ज्योतिषश्च गुणो रूपं चक्षुषा तच्च गृह्यते ।
चक्षुस्थश्च तथाऽऽदित्यो रूपज्ञाने विधीयते ॥ ३१

वायव्यश्च तथा स्पर्शस् त्वचा प्रज्ञायते च सः ।
त्वक्स्थश्चैव तथा वायुस् स्पर्शज्ञाने विधीयते ॥ ३२

आकाशस्य गुणो घोषश् श्रोत्रेण स तु गृह्यते ।
श्रोत्रस्थाश्च दिशस्सर्वाश् शब्दज्ञाने प्रकीर्तिताः ॥ ३३

---

1. अ—इदमर्धं नास्ति 2. क-ख—वक्ष्ये तु महतः ।
3. घ—इतः श्लोकद्वयं नास्ति ।

मनसस्तु गुणश्चिन्ता प्रज्ञया सा तु गृह्यते ।
हृदिस्थश्चेतनाधातुर् मनोज्ञाने विधीयते ॥ ३४

बुद्धिरध्यवसायेन ध्यानेन च महांस्तथा ।
निश्चित्य ग्रहणं नित्यम् अव्यक्तं नात्र संशयः ॥ ३५

[1]अलिङ्गग्रहणो नित्यः क्षेत्रज्ञो निर्गुणात्मकः ।
तस्मादलिङ्गः क्षेत्रज्ञः केवलं ज्ञानलक्षणः ॥ ३६

अव्यक्तं क्षेत्रमुद्दिष्टं गुणानां प्रभवाप्ययः ।
सदा पश्याम्यहं लीनं [2]सृज्यमानमचेतनम् ॥ ३७

[3]पुरुषस्तद्विजानीते तस्मात् क्षेत्रज्ञ उच्यते ।
गुणवृत्तं तथा कृत्स्नं क्षेत्रज्ञः परिपश्यति ॥ ३८

आदिमध्यावसानं तं सृज्यमानमचेतनम् ।
न गुणा विदुरात्मानं सृज्यमानाः पुनः पुनः ॥ ३९

न सत्यं वेत्ति वै काश्चित् क्षेत्रज्ञस्त्वेव वेत्ति वै ।
गुणानां गुणभूतानां यत् परं परतो महत् ॥ ४०

तस्माद्गुणांश्च तत्त्वं च परित्यज्येह तत्त्ववित् ।
क्षीणदोषो गुणान् हित्वा क्षेत्रज्ञं प्रविशत्यथ ॥ ४१

---

1. ब—नास्तीदमर्धम् ॥
2. अ—विजानामि शृणोमि च ।
3. ब—इतः श्लोकद्वयं नास्ति क—अर्धत्रयं नास्ति

निर्द्वन्द्वो निर्नमस्कारो निस्स्वधाकार एव च ।
अचलश्चानिकेतश्च क्षेत्रज्ञस्स परो भुवि ॥* ४२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

॥ ९२ ॥ अनुगीतापर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
[ अस्मिन्नध्याये ४२ श्लोकाः ]

---

## ॥ सप्तचत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति स्वस्वजातिषु श्रेष्ठत्वस्तुतिपादनपूर्वकं ज्ञानस्याविनाशित्वकथनेन तस्यैव श्रेयस्साधनत्वोक्तिः ॥ १ ॥

---

ब्रह्मा—

यदादिमध्यपर्यन्तं ग्रहणोपायमेव च ।
नामलक्षणसंयुक्तं सर्वं वक्ष्यामि तत्त्वतः ॥ १

अहः पूर्वं ततो रात्रिर् मासश्शुक्लादयस्स्मृताः ।
ऋविष्ठादीनि चर्क्षाणि ऋतवश्शिशिरादयः ॥ २

भूमिरादिस्तु गन्धानां रसानामाप एव च ।
रूपाणामादिरग्निस्तु स्पर्शादिर्वायुरुच्यते ॥ ३

शब्दस्यादिस्तथाऽऽकाशम् एष भूतगुणोत्तरः ॥ ३॥

---

* अ—कोशे नास्त्यध्यायसमाप्तिर्दृश्यते ।

अतः परं प्रवक्ष्यामि भूतानामादिमुत्तमम् ॥ ४

आदित्यो ज्योतिषामादिर् अग्निर्भूतादिरुच्यते ।
सावित्री सर्वविद्यानां देवतानां प्रजापतिः ॥ ५
ओङ्कारस्सर्ववेदानां वचसां प्राण उच्यते ।
इत्यस्मिन् निधनं लोके सर्वं सावित्र्यनूच्यते ॥ ६
गायत्री च्छन्दसामादिः पशूनामज उच्यते ।
[1]गावश्चतुष्पदामादिर् मनुष्याणां द्विजातयः ॥ ७
श्येनश्च पक्षिणामादिर् यज्ञानां हुतमुत्तमम् ।
प्रसर्पिणां तु सर्वेषां ज्येष्ठस्सर्पो द्विजोत्तमाः ॥ ८
कृतमादिर्युगानां च सर्वेषां नात्र संशयः ।
हिरण्यं सर्वरत्नानाम् ओषधीनां यवास्तथा ॥ ९
सर्वेषां भक्ष्यभोज्यानाम् अन्नं परममुच्यते ।
द्रवाणां चैव सर्वेषां पेयानामाप उत्तमाः ॥ १०
स्थावराणां च भूतानां सर्वेषामविशेषतः ।
ब्रह्मघृक्षस्सदा पुण्यः प्लक्षः प्रथमजस्स्मृतः ॥ ११
अहं प्रजापतीनां च सर्वेषां नात्र संशयः ।
मम विष्णुरचिन्त्यात्मा स्वयम्भूरिति संस्मृतः ॥ १२
पर्वतानां महामेरुस् सर्वेषामग्रजस्स्मृतः ।
दिशां चोपदिशां चोर्ध्वं दिग्जाता प्रथमा तथा ॥ १३

1. अ—इदमर्धं न दृश्यते ।

तथा गङ्गा नदीनां तु सर्वासामग्रजा स्मृता ।
सरसां सोदपानानां सर्वेषां सागरस्स्मृतः ॥ १४
देवदानवभूतानां पिशाचोरगरक्षसाम् ।
नरकिन्नरयक्षाणां सर्वेषामीश्वरः प्रभुः ॥ १५
आदिर्विश्वस्य जगतो विष्णुर्ब्रह्ममयो महान् ।
[1]भूतं परतरं तस्मात् त्रैलोक्ये नेह विद्यते ॥ १६
आश्रमाणां च सर्वेषां गार्हस्थ्यं नात्र संशयः ।
लोकानामादिरव्यक्तस् सर्वस्यान्तस्तथैव च ॥ १७
अहान्यस्तमयान्तानि उदयान्ता च शर्वरी ।
सुखस्यान्तं तथा दुःखं दुःखस्यान्तं तथा सुखम् ॥ १८
सर्वे क्षयान्ता निचयाः पतनान्तास्समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ १९
सर्वं कृतं विनाशान्तं जातस्य मरणं ध्रुवम् ।
अशाश्वतं हि लोकेऽस्मिन् सदा स्थावरजङ्गमम् ॥ २०
इष्टं दत्तं तपोऽधीतं व्रतानि नियमाश्च ये ।
सर्वमेतद्विनाशान्तं ज्ञानस्यान्तो न विद्यते ॥ २१
तस्माज्ज्ञानेन शुद्धेन प्रसन्नात्मा समाहितः ।
निर्ममो निरहङ्कारो मुच्यते सर्वपाप्मभिः ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
[ अस्मिन्नध्याये २२ श्लोकाः ]

---

1. अ—ततः परतरं नास्ति त्रिषु लोकेषु विद्यते ।

## ॥ अष्टचत्वारिंशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति शरीरस्य कालचक्रवत् सर्वनाशकत्वोक्तिपूर्वकं गृहस्थधर्मानुष्ठानस्य श्रेयस्साधनत्वोक्तिः ॥ १ ॥

ब्रह्मा—

बुद्ध्याधारं जनस्तम्भम् इन्द्रियाणामवर्धनम् ।
महाभूताविष्कम्भं निमेषपरिवेषणम् ॥ १

जराशोकसमाविष्टं व्याधिव्यसनपञ्जरम् ।
देशकालविचारीदं श्रमव्यायामनिस्स्वनम् ॥ २

अहोरात्रपरिक्षेपं शीतोष्णपरिमण्डलम् ।
सुखदुःखसमश्लेषं क्षुत्पिपासावकीलनम् ॥ ३

छायातपविलेखं च निमेषोन्मेषविह्वलम् ।
शोकमोहजराकीर्णं वर्तमानमचेतनम् ॥ ४

मासार्धमासगुणितं विषमं लोकसञ्चरम् ।
तमोनियतपङ्कं च रजोवेगप्रवर्तकम् ॥ ५

सत्त्वालङ्कारदीप्तं च गुणसङ्घातमण्डलम् ।
सारविग्रहनाभीकं शोकसङ्घातवर्तकम् ॥ ६

क्रियाकारणसंयुक्तं रागविस्तारमायतम् ।
लोभेप्सापरसङ्घात [1]विविक्तज्ञानसम्भवम् ॥ ७

1. क—विद्धिचिन्ता । ख—विचिन्ताज्ञान ।

भयमोहपरीवारं भूतसम्मोहकारकम् ।
आनन्दप्रीतिचारं च कामक्रोधपरिग्रहम् ॥ ८

महदादिविशेषान्तम् असक्तं प्रभवाप्ययम् ।
मनोजवनमश्रान्तं कालचक्रं प्रवर्तते ॥ ९

एतद्वन्द्वसमायुक्तं कालचक्रमचेतनम् ।
विसृजन् संक्षिपंश्चापि बोधयन् स्वापयञ् जगत् ॥ १०

कालचक्रप्रवृत्तिं च निवृत्तिं चैव तत्त्वतः ।
यस्तु वेद नरो नित्यं न स भूतेषु मुह्यति ॥ ११

विमुक्तस्सर्वसङ्क्लेशैस् सर्वद्वन्द्वातिगो मुनिः ।
विमुक्तस्सर्वपापेभ्यः प्राप्नोति परमां गतिम् ॥ १२

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्तास् सर्वे गार्हस्थ्यमूलकाः ॥ १३

यः कश्चिदिह लोके च ह्याश्रमस्सम्प्रकीर्तितः ।
तस्यान्तगमनं ज्ञेयं कीर्तिरेषा सनातनी ॥ १४

संस्कारैस्संकृतः पूर्वं यथावच्चरितव्रतः ।
जातौ गुणविशिष्टायां समावर्तेत वेदवित् ॥ १५

स्वदारनिरतो दान्तश् शिष्टाचारो जितेन्द्रियः ।
पञ्चभिश्च महायज्ञैश् श्रद्दधानो यजेदिह ॥ १६

देवतातिथिशिष्टाशी निरतो वेदकर्मसु ।

इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥ १७

न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य गोचरः ॥ १८

नित्यं यज्ञोपवीती स्याच् छुक्लवासाश्शुचिव्रतः ।
नियतो दमदानाभ्यां सदा शिष्टैश्च संवदन् ॥ १९

जितशिश्नोदरो मैत्रश् शिष्टाचारसमाहितः ।
वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् ॥ २०

त्रीणि धारयते नित्यं कमण्डलुमतन्द्रितः ॥ २०॥

एकमाचमनार्थाय एकं वै पादधावनम् ।
एकं शौचविधानार्थम् इत्येतत् त्रितयं तथा ॥ २१॥

[1]अधीत्याध्यापनं कुर्यात् तथा यजनयाजने ।
दानं प्रतिग्रहं चैव षड्गुणां वृत्तिमाचरेत् ॥ २२॥

त्रीणि कर्माणि यानीह ब्राह्मणानां तु जीविकाः ।
याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥ २३॥

अवशेषाणि चान्यानि त्रीणि कर्माणि यान्युत ।
दानमध्ययनं यज्ञो धर्मयुक्तानि तानि तु ॥ २४॥

तेष्वप्रमादं कुर्वीत त्रिषु कर्मसु कर्मवित् ।
दान्तो मैत्रः क्षमायुक्तस् सर्वभूतेषु वै मुनिः ॥ २५॥

1. क-ख-घ—अतीत्याध्ययनं कुर्यात् ।

सर्वमेतद्यथाशक्ति विप्रो निर्वर्तयेच्छुचिः ।
एवं युक्तो जयेत् स्वर्गं गृहस्थस्संशितव्रतः* ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
[ अस्मिन्नध्याये २६॥ श्लोकाः ]

## ॥ एकोनपञ्चाशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति ब्रह्मचारिवनस्थधर्मनिरूपणपूर्वकं तदनुष्ठानस्य श्रेयस्साधनत्वोक्तिः ॥ १ ॥ सन्न्यासिधर्मनिरूपणं च ॥ २ ॥

ब्रह्मा—

एवमेतेन मार्गेण पूर्वोक्तेन यथाविधि ।
अधीतवान् यथाशक्ति तथैव ब्रह्मचर्यवान् ॥ १

स्वधर्मनिरतो विद्वान् सर्वेन्द्रियजयतो मुनिः ।
गुरोः प्रियहिते युक्तस् सत्यधर्मपरश्शुचिः ॥ २

गुरुणा समनुज्ञातो भुञ्जीतान्नमकुत्सयन् ।
हविष्यभैक्ष्यभुग्वाऽपि स्थानासनविहारवान् ॥ ३

द्विकालमग्निं जुहुयाच् छुचिर्भूत्वा समाहितः ।
धारयेत सदा दण्डं बैल्वं पालाशमेव वा ॥ ४

* अ—कोशे नास्त्यध्यायसमाप्तिर्दृश्यते ॥

क्षौमं कार्पासिकं वाऽपि मृगाजिनमथापि वा ।
सर्वकाषायरक्तं स्याद् वासो वाऽपि द्विजस्य ह ॥ ५

मेखला च भवेन्मौञ्जी जटी नित्योदकी तथा ।
यज्ञोपवीती स्वाध्यायी अलुप्तनियमव्रतः ॥ ६

पूताभिस्सपवित्राभिर् अद्भिर्दैवततर्पणम् ।
भावेन नियमं कुर्वन् ब्रह्मचारी प्रशस्यते ॥ ७

एवं युक्तो जयेत् स्वर्गम् ऊर्ध्वरेतास्समाहितः ।
न संसरति जातीषु परमं स्थानमाश्रितः ॥ ८

संस्कृतस्सर्वसंस्कारैस् तथैव ब्रह्मचर्यवान् ।
ग्रामान्निष्क्रम्य चारण्यं मुनिः प्रव्रजितो वसेत् ॥ ९

चर्मवल्कलसंवीतस् सायं प्रातरुपस्पृशेत् ।
अरण्यगोचरो नित्यं न ग्रामं प्रविशेत् पुनः ॥ १०

अर्चयन्नतिथीन् काले दत्त्वा चापि प्रतिश्रयम् ।
फलपत्रचयैर्वन्यैश् श्यामाकेन च वर्तयन् ॥ ११

स नित्यमुदकं वायुं सर्वं वाऽन्यं तथा तृणम् ।
प्राश्नीयादानुपूर्व्येण यथादीक्षमतन्द्रितः ॥ १२

आमूलफलशाकाद्यैर् अर्चेदतिथिमागतम् ।
यद्भक्षस्स्यात् ततो दद्याद् भिक्षां नित्यमतन्द्रितः ॥ १३

देवतातिथिपूजां च कृत्वा भुञ्जीत वाग्यतः ।

अस्कन्दितमनाश्चैव लघ्वाशी देवताश्रयः ॥ १४

दान्तो मैत्रः क्षमायुक्तः केशश्मश्रूणि धारयेत् ।
जुह्वन् स्वाध्यायशीलश्च सत्यधर्मपरायणः ॥ १५

त्यक्तदेहस्सदा दक्षो वने नित्यं समाहितः ।
एवं युक्तो व्रजेत् स्वर्गं वानप्रस्थो जितेन्द्रियः ॥ १६

गृहस्थो ब्रह्मचारी च वानप्रस्थोऽपि वा पुनः ।
य इच्छेन्मोक्षमादातुम् उत्तमां वृत्तिमाव्रजेत् ॥ १७

अभयं सर्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेत् ।
[1]सर्वभूतहितो मैत्रस् सर्वेन्द्रिययतो मुनिः ॥ १८

अयाचितमसङ्क्लृप्तम् उपपन्नं यदृच्छया ।
जोषयेत सदा भोज्यं ग्रासमागतमस्पृहः ॥ १९

यात्रामात्रं च भुञ्जीत केवलं प्राणयात्रिकम् ।
धर्मलब्धं तथाऽइनीयान्न काममनुवर्तयेत् ॥ २०

ग्रासादाच्छादनादन्यन्न गृह्णीयात् कदाचन ।
यावदाहारयेत् तावत् प्रतिगृह्णीत नान्यथा ॥ २१

परेभ्यो न प्रतिग्राह्यं न चादेयं कथञ्चन ।
दद्यात्तु सर्वभूतानां संविभागं समाचरेत् ॥ २२

नाददीत परस्वानि न गृह्णीयान्न याचयेत् ।

---

1. अ—अर्धद्वयं नास्ति

न किञ्चिद्विषयं भुक्त्वा तस्मै संस्पृहयेत् पुनः ॥ २३

मृदमापस्तथा स्नानं पत्रं पुष्पं फलानि च ।
असंवृतानि गृह्णीयात् प्रवृत्तानि ह कार्यवान् ॥ २४

न शिल्पजीविकां जीवेद् [1]द्विरन्नं नैव कारयेत् ।
[2]न द्वेष्टा नोपदेष्टा च भवेद्धर्मपुरस्कृतः ॥ २५

[3]श्रद्धापूतानि भुञ्जीत निमित्तानि विवर्जयेत् ।
मुधावृत्तिरसक्तिश्च सर्वभूतैरसंवृतः ॥ २६

कृत्वा मौनं चरेद्भैक्ष्यं विधूमे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भैक्ष्यं लिप्सेत मोक्षवित् ॥ २७

न लाभे च प्रहृष्येत नालाभे विमना भवेत् ।
मात्राशी कालमाकाङ्क्षंश् चरेद्भैक्ष्यं समाहितः ॥ २८

लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः ।
अभिपूजितलाभाद्धि विजुगुप्सेत पण्डितः ॥ २९

शुक्तान्यम्लानि तिक्तानि कषायकटुकानि च ।
नास्वादयीत भुञ्जानो रसांश्च मधुरांस्तथा ॥ ३०

यात्रामात्रं च भुञ्जीत केवलं प्राणधारणम् ।
असंरोधेन भूतानां वृत्तिं लिप्सेत मोक्षवित् ॥ ३१

---

1. क-ख-घ—दुरन्नं कामयेच्च च ।
2. क—सर्वेषां नोपदेष्टाच । 3. क—शुद्धभूतानि ।

न चान्यमनुवीक्षेत भिक्षमाणः कथञ्चन ।
न सन्निकाशयेद्धर्मं विविक्ते विरजाश्चरेत् ॥ ३२

शून्यागारमरण्यं वा वृक्षमूलं नदीं तथा ।
[1]प्रतिश्रयार्थं सेवेत पार्वतीं वा पुनर्गुहाम् ॥ ३३

ग्रामैकरात्रिको ग्रीष्मे वर्षास्वेकत्र वा वसेत् ।
अध्वा सूर्येण निर्दिष्टः कीटवच्च चरेन्महीम् ॥ ३४

दयार्थं चैव भूतानां समीक्ष्य पृथिवीं चरेत् ।
सञ्चयांश्च न कुर्वीत स्नेहभागं च वर्जयेत् ॥ ३५

पूतेन चाम्भसा नित्यं कार्यं कुर्वीत मन्त्रवित् ।
उपस्पृशेदुद्धृताभिर् अद्भिश्चैव नरोत्तमः ॥ ३६

अहिंसा ब्रह्मचर्यं च सत्यमार्जवमेव च ।
अक्रोधश्चानसूया च दमो नित्यमपैशुनम् ॥ ३७

अष्टस्वेतेषु युक्तस्याद् व्रतेषु नियतेन्द्रियः ॥ ३७॥

अपाप्मानं शठं वृत्तम् अजिह्मं नित्यमाचरेत् ॥ ३८

आशीर्युक्तानि कर्माणि हिंसायुक्तानि यानि च ।
कालसङ्गृहधर्मं च नैव कुर्यान्न कारयेत् ॥ ३९

सर्वानेतानतिक्रम्य लघुमात्रपरिग्रहः ।
समस्सर्वेषु भूतेषु स्थावरेषु चरेषु च ॥ ४०

---

1. क—प्रतिरात्रं हि ।

परं नोद्वेजयेत् कञ्चिन्न च कस्माच्चिदुद्विजेत् ।
विश्वस्तस्सर्वभूतानाम् ऐकाग्र्यं मोक्ष उच्यते ॥ ४१

अनागतं च न ध्यायेन्नातीतमनुचिन्तयेत् ।
वर्तमानमुपेक्षेत कालकाङ्क्षी समाहितः ॥ ४२

न चक्षुषा न मनसा न वाचा दूषयेत् क्वचित् ।
न प्रत्यक्षं परोक्षं वा किञ्चिद्दुष्टं समाचरेत् ॥ ४३

इन्द्रियाण्युपसंहृत्य कूर्मोऽङ्गानीव सर्वशः ।
क्षीणेन्द्रियमनोबुद्धिर् निरीक्षेत जितेन्द्रियः ॥ ४४

निर्द्वन्द्वो निर्नमस्कारो निस्स्वाहाकार एव च ।
निर्ममो निरहङ्कारो निर्योगक्षेम एव च ॥ ४५

निराशीस्सर्वभूतेषु निरासङ्गो निराश्रयः ।
सर्वज्ञस्सर्वतोमुक्तो मुच्यते नात्र संशयः ॥ ४६

अपादपाणिपृष्ठं तद् अशिरस्कमनूदरम् ।
प्रहीणगुणकर्माणं केवलं विमलं स्थिरम् ॥ ४७

अगन्धरसमस्पर्शम् अरूपाशब्दमेव च ।
[1]अनस्थिमनसृङ्मज्जम् अमांसमपि चैव ह ॥ ४८

अचिन्त्यमव्ययं [2]दिव्यं कूटस्थमपि नित्यदा ।
सर्वभूतस्थमात्मानं ये पश्यन्ति न ते मृताः ॥ ४९

1. अ-घ—अन्यगास्थसृजामांसं गोमांसमिति चैव ह ॥
2. क-ख—नित्यं हृदिस्थमपि सर्वदा । घ—हृदिस्थ।

न तत्र क्रमते बुद्धिर् नेन्द्रियाणि न देवताः ।
वेदा यज्ञाश्च लोकाश्च न तपो न पराक्रमः ॥ ५०

यत्र ज्ञानवतां प्राप्तिर् अलिङ्गग्रहणे स्मृता ॥ ५०॥
तस्मादलिङ्गो धर्मज्ञो धर्मवृत्तमनुव्रतः ।
गूढधर्माश्रितो विद्वान् अज्ञातचरितं चरेत् ॥ ५१॥

अमूढो मूढरूपेण चरेद्धर्ममदूषयन् ॥ ५२

यथैनमवमन्येरन् परे सततमेव हि ।
तथावृत्तश्चरेद्धर्मं सतां [1]धर्ममदूषयन् ॥ ५३

योऽप्येवं वृत्तसम्पन्नस् स मुनिश्रेष्ठ उच्यते ॥ ५३॥

इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्च च ।
मनो बुद्धिमथात्मानम् अव्यक्तं पुरुषं तथा ॥ ५४॥

सर्वमेतत् प्रसङ्ख्याय सम्यक् सम्पूज्य निर्मलः ।
ततस्स्वर्गमवाप्नोति विमुक्तस्सर्वबन्धनैः ॥ ५५॥

एतदेवान्तवेलायां परिसङ्ख्याय तत्त्ववित् ।
ध्यायेदेकान्तमास्थाय मुच्यतेऽथ निराश्रयः ॥ ५६॥

निर्मुक्तस्सर्वसङ्गेभ्यो वायुराकाशगो यथा ॥
क्षीणशोको निरातङ्कः प्राप्नोति परमां गतिम् ॥* ५७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
[ अस्मिन्नध्याये ५७॥ श्लोकाः ]

---

1. क-घ—धर्मांविदूषयन् । * अ—कोशे नास्त्यध्यायसमाप्तिरुपलभ्यते।

## ॥ पञ्चाशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति सन्न्यासज्ञानतपसां परमपुरुषार्थसाधनत्वोक्तिः ॥ १ ॥

ब्रह्मा—

सन्न्यासं तप इत्याहुर् वृद्धा निश्चितदर्शिनः ।
ब्राह्मणा ब्रह्मयोनिस्था ज्ञानं ब्रह्म परं विदुः ॥ १

अतिदूरात्मकं ब्रह्म वेदविद्याव्यपाश्रयम् ।
निर्द्वन्द्वं निर्गुणं नित्यम् अचिन्त्यं गुह्यमुत्तमम् ॥ २

ध्यानेन तपसा चैव धीराः पश्यन्ति तत् पदम् ।
निर्मुक्ततमसः पूता व्युत्क्रान्तरजसोऽमलाः ॥ ३

तपसा क्षेममध्वानं गच्छन्तीति मनीषिणः ।
सन्न्यासनिरता नित्यं ये च ब्रह्मविदो जनाः ॥ ४

तपः प्रदीप इत्याहुर् आचारो धर्मसाधकः ।
ज्ञानं त्वेव परं विद्यास् सन्न्यासं तप उत्तमम् ॥ ५

यस्तु वेद निराबाधं ज्ञानं तत्त्वविनिश्चयात् ।
सर्वभूतस्थमात्मानं स सर्वं[1] विदिहोच्यते ॥ ६

यो विद्वान् सहवासं च विवासं चैव पश्यति ।
तथैवैकत्वनानात्वे स दुःखात् परिमुच्यते ॥ ७

1. क-ख-घ—गतिरिष्यते ।

यो न कामयते किञ्चिन्न किञ्चिदिति मन्यते ।
इह लोकस्थ एवैष ब्रह्मभूयाय कल्पते ॥ ८

प्रधानगुणतत्त्वज्ञस् सर्वभूतविधानवित् ।
निर्ममो निरहङ्कारो मुच्यते नात्र संशयः ॥ ९

[1]निर्द्वन्द्वो निर्नमस्कारो निस्स्वधाकार एव च ।
निर्द्वन्द्वं निर्गुणं नित्यं प्रशमेनैव गच्छति ॥ १०

हित्वा गुणमयं सर्वं कर्म जन्तुश्शुभाशुभम् ।
उभे सत्यानृते हित्वा मुच्यते नात्र संशयः ॥ ११

अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियान्तरकोटरः ॥ १२

महाभूतविशाखश्च विशेषप्रतिशाखवान् ।
सदापर्णस्सदापुष्पश् शुभाशुभफलोदयः ॥ १३

आजीव्यस्सर्वभूतानां ब्रह्मवृक्षस्सनातनः ॥ १३॥

एनं छित्त्वा च हित्वा च ज्ञानेन परमासिना ।
भित्त्वा चामरतां प्राप्य जह्याद्वै मृत्युजन्मनी ॥ १४॥

निर्ममो निरहङ्कारो मुच्यते नात्र संशयः ॥ १५

द्वावेतौ पक्षिणौ नित्यौ सङ्ख्येयौ चाप्यचेतनौ ।
एताभ्यां तु परो यस्स चेतनावानिति स्मृतः ॥ १६

---

1. घ—इतः श्लोकद्वयं नास्ति

अचेतनस्सत्वसङ्घातयुक्तस्
सत्त्वात् परं चेतयतेऽन्तरात्मा ।
स क्षेत्रज्ञस्सत्वसङ्घातबुद्धिर्
गुणाधिको मुच्यते मृत्युपाशात् ॥ १७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
[ अस्मिन्नध्याये १७ श्लोकाः ]

---

## ॥ एकपञ्चाशोऽध्यायः ॥

---

ब्रह्मणा महर्षीन् प्रति योगिनां चातुर्विध्यादिकथनपूर्वकं मुमुक्षुवेद्य-नानार्थकथनम् ॥ १ ॥

---

ब्रह्मा—

केचिद्ब्रह्ममयं वृक्षं केचिद्ब्रह्ममयं वनम् ।
केचित् पुरुषमव्यक्तं केचित् परमनामयम् ॥ १

मन्यन्ते सर्वमप्येतद् अव्यक्तप्रभवाप्ययम् ॥ १॥

उच्छ्वासमात्रमपि चेद् योऽन्तकाले समो भवेत् ।
आत्मानमुपसंयम्य सोऽमृतत्वाय कल्पते ॥ २॥

निमेषमात्रमपि च पश्यत्यात्मानमात्मनि ।
गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम् ॥ ३॥

प्राणायामैरथ प्राणान् संयम्य च पुनः पुनः ।
दशद्वादशभिर्वाऽपि चतुर्विंशात् परं तु तत् ॥ ४॥

एवं पूर्वं प्रसन्नात्मा लभते यद्यदिच्छति ।
अव्यक्तात् [1]सत्वमुद्रिक्तम् अमृतत्वाय कल्पते ॥ ५॥

सत्वात् परतरं नान्यत् प्रशंसन्तीह तद्विदः ।
अनुमानाद्विजानीमः पुरुषं सत्वमाश्रितम् ॥ ६॥

न शक्यमन्यथा गन्तुं पुरुषं तमथो द्विजाः ॥ ७

क्षमा धृतिरहिंसा च सन्तोषस्सत्यमार्जवम् ।
ज्ञानं त्यागोऽथ सन्न्यासस् सात्विकं व्रतमिष्यते ॥ ८

एतेनैवानुमानेन मन्यन्तेऽथ मनीषिणः ।
सत्वं च पुरुषश्चैव तत्र नास्ति विचारणा ॥ ९

आहुरेके महात्मानो ये ज्ञानेषु प्रतिष्ठिताः ।
क्षेत्रज्ञसत्वयोरैक्यम् इत्येतन्नोपपद्यते ॥ १०

पृथग्भूतं ततो नित्यम् इत्येतदविचारितम् ।
पृथग्भावश्च विज्ञेयस् सहजश्चापि तत्त्वतः ॥ ११

तथा चैकत्वनानात्वम् इष्यते विदुषां नयः ।
मशकोदुम्बरस्यैक्यं पृथक्त्वमपि दृश्यते ॥ १२

मत्स्योदके यथैव स्याद् अप्सु योगस्तथाऽनयोः ।

---

1 क-ख—तत् सर्मुद्रिक्तं । घ—समनुद्रिक्तं ।

ज्ञानं सन्न्यासमित्येके स्वभावं भूतचिन्तकाः ॥ ११॥

एवं ह्युत्थापिते धर्मे बहुधा वै प्रधावति ।
निश्चयं नाधिगच्छामश् श्रेयः किमिति सत्तम ॥ १२॥

इदं श्रेय इदं श्रेय इत्येवं प्रस्थिता जनाः ।
यो हि यस्मिन् रतो धर्मे स तं पूजयते सदा ॥ १३॥

तत्र नो विहिता प्रज्ञा मनश्च बहुलीकृतम् ।
एतदाख्यातमिच्छामश् श्रेयः किमिति सत्तम ॥ १४॥

अतः परं च यद्गुह्यं तद्भवान् वक्तुमर्हति ।
सत्वक्षेत्रज्ञयोश्चापि सम्बन्धः केन हेतुना ॥ १५॥

गुरुः—

एवमापृच्छतां तेषां भगवाँल्लोकभावनः ।
तेभ्यश्शशंस धर्मात्मा याथातथ्येन बुद्धिमान् ॥ १६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
॥ ५२ ॥ अनुगीतापर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥
[ अस्मिन्नध्याये १६॥ श्लोकाः ॥

---

## ॥ त्रिपञ्चाशोऽध्यायः ॥

ब्रह्मणा महर्षीन् प्रति धर्मप्रदर्शनपूर्वकं तदनुष्ठानसहकृतज्ञानस्यैव दृष्टान्तप्रदर्शनेन परमपुरुषार्थसाधनत्वोक्तिः ॥ १ ॥ तथा क्षेत्रक्षेत्रज्ञसम्बन्धकथनम् ॥ २ ॥ तथा पृथिव्यादिभूतगुणादिप्रतिपादनम् ॥ ३ ॥

ब्रह्मा—

हन्त वस्सम्प्रवक्ष्यामि यन्मां पृच्छथ सत्तमाः ।
समस्तामिह तत्त्वेन श्रुत्वा चैवावधार्यताम् ॥ १

अहिंसा सर्वभूतानाम् एतत् कृत्यतमं मतम् ।
एतत् पदमनुद्विग्नं वरिष्ठं धर्मलक्षणम् ॥ २

ज्ञानं निश्श्रेयसं प्राहुर् वृद्धा निश्चयदर्शनाः ।
तस्माज्ज्ञानेन शुद्धेन मुच्यते सर्वपातकैः ॥ ३

हिंसापराश्च लोके ये ये च नास्तिकवृत्तयः ।
लोभमोहसमायुक्तास् ते वै निरयगामिनः ॥ ४

आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः ।
तेऽस्मिँल्लोके प्रमोदन्ते जायमानाः पुनः पुनः ॥ ५

कुर्वते ये तु कर्माणि श्रद्दधाना विपश्चितः ।
अनाशीर्योगसंयुक्तास् [1]ते धीरास्साधुदर्शिनः ॥ ६

1. क-ख—ते वै निर्वाणगामिनः ।

अतः परं प्रवक्ष्यामि सत्वक्षेत्रज्ञयोर्यथा ।
संयोगो विप्रयोगश्च तन्निबोधत सत्तमाः ॥ ७

[1]विषयो विषयित्वं च सम्बन्धोऽयमिहोच्यते ।
विषयी पुरुषो नित्यं सत्वं च विषयस्स्मृतः ॥ ८

व्याख्यातं पूर्वकल्पेन मशकोदुम्बरौ यथा ।
भुज्यमानं न जानीते नित्यं सत्वमचेतनम् ॥ ९

ज्ञात्वैव तु विजानीते यो भुङ्क्ते यच्च भुज्यते ।
अनित्यं द्वन्द्वसंयुक्तं सत्वमाहुर्गुणात्मकम् ॥ १०

निर्द्वन्द्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः ।
समासज्ञानतत्त्वे च यथा सर्वत्र दृश्यते ॥ ११

न सज्जते सदा सत्वम् आपः पुष्करपर्णवत् ।
सर्वैरपि गुणैर्विद्वान् व्यतिषक्तो न लिप्यते ॥ १२

जलबिन्दुर्यथा लोलः पद्मिनीपत्रसंस्थितः ।
एवमेवाप्यसंयुक्तः [2]पुरुषस्स्यान्न संशयः ॥ १३

द्रव्यमात्रमभूत् सत्वं [3]पुरुषस्येति निश्चयः ।
यथा द्रव्यं च कर्ता च संयोगोऽप्यनयोस्तथा ॥ १४

यथा प्रदीपमादाय कश्चित् तमसि गच्छति ।

---

1. क-ख—विषये विषयत्वं च ।
2. क-ख—पुरुषश्च न संशयः । 3. क-ख—पुरुषश्चेति ।

तथा सत्त्वप्रदीपेन गच्छन्ति परमैषिणः ॥ १५

[1]यावद्द्रव्यं गुणस्तावत् प्रदीपस्सम्प्रकाशते ।
क्षीणे द्रव्ये गुणे ज्योतिर् अन्तर्धानाय गच्छति ॥ १६

व्यक्तस्सत्वगुणस्त्वेवं पुरुषो व्यक्तमुच्यते ॥ १६॥

एतद्विप्रा विजानीत हन्त भूयो ब्रवीमि वः ॥ १७

[2]सहस्रेणापि दुर्मेधा न बुद्धिमधिगच्छति ।
चतुर्थेनाप्यथांशेन बुद्धिमान् सुखमेधते ॥ १८

एवं धर्मस्य विज्ञेयं संसाधनमुपायतः ।
उपायज्ञो हि मेधावी सुखमत्यन्तमश्नुते ॥ १९

[3]यथाऽध्वानमपाथेयः प्रपन्नो मानवः क्वचित् ।
क्लेशेन याति महता विनश्यत्यन्तराऽपि वा ॥ २०

तथा कर्मसु विज्ञेयं फलं भवति वा न वा ।
पुरुषस्यात्मनिश्श्रेयश् शुभाशुभनिदर्शनम् ॥ २१

[4]यथा च दीर्घमध्वानं पद्भ्यामेव प्रवर्तते ।
अदृष्टपूर्वं सहसा तत्त्वदर्शनवर्जितः ॥ २२

---

1. क-ख—यावद्द्रव्यगुणास्तावत् सत्त्वतस्स । घ—सत्त्वतस्स ।
2. क-ख—सहस्रशोऽपि दुर्मेधा निवृत्तिं ना ।
3. ख—यथा यानमपाहाय अशक्तो । क—यथाह्वानमपाहाय अशक्तो ।
4. क-ख—यथावद्दीर्घमध्वानं पद्भ्यां गन्तुं न विद्यते ।
घ—पद्भ्यां गन्तुं न शक्यते ।

[1]तमेव च यथाऽध्वानं रथेनैवाशुगामिना ।
यायादश्वप्रयुक्तेन तथा बुद्धिमतां गतिः ॥ २३

उच्चं पर्वतमारुह्य नान्ववेक्षेत भूगतम् ।
रथेन रथिनं पश्येत् क्लिश्यमानमचेतनम् ॥ २४

यावद्रथपथस्तावद् रथेन स तु गच्छति ।
क्षीणे रथपदे प्राज्ञो रथमुत्सृज्य गच्छति ॥ २५

एवं गच्छति मेधावी तत्त्वज्ञो मोक्षमार्गवित् ।
समाज्ञाय महाबुद्धिर् उत्तरादुत्तरोत्तरम् ॥ २६

यथा महार्णवं घोरम् अप्लवस्सम्प्रगाहते ।
बाहुभ्यामेव सम्मोहाद् वधमिच्छत्यसंशयम् ॥ २७

नावा यायी यथा प्राज्ञो विभागज्ञस्तरित्रवान् ।
अश्रान्तस्सलिलं गाहेत् क्षिप्रं सन्तरते ध्रुवम् ॥ २८

तीर्णो गच्छेत् परं पारं नावमुत्सृज्य निर्ममः ।
व्याख्यातं पूर्वकल्पेन यथा रथपदातिनोः ॥ २९

स्नेहात् सम्मोहमापन्नो नावि दाशो यथा तथा ।

---

1. क-ख—ऋषयः—

तत्र नो विहिता प्रज्ञा मनश्च बहुलीकृतम् ।
एतदाख्यातुमिच्छामश् श्रेयः किमिति सत्तम ॥

ब्रह्मा—

अतः परं च यद्गुह्यं तद्विधूमविवर्जितम् । [ अधिकः पाठः ]

ममत्वेनाभिभूतस्संस् तत्रैव परिवर्तते । ३०

नावं न शक्यमारुह्य स्थले विपरिधावितुम् ।
तथैव रथमारुह्य नाप्सु चर्या विधीयते ॥ ३१

एवं कर्मकृतं वृत्तं विविधस्थं पृथक् पृथक् ।
यथा कर्मकृतं लोके तथा तदुपपद्यते ॥ ३२

यन्नैव गन्धि नो रस्यं न रूपस्पर्शशब्दवत् ।
मन्यते न मनो बुद्ध्या तत् प्रधानं प्रचक्षते ॥ ३३

तत्र प्रधानमव्यक्तम् अव्यक्तस्य गुणो महान् ।
महान् प्रधानभूतस्य गुणोऽहङ्कार एव च ॥ ३४

अहङ्कारात् प्रधानस्य [1]महाभूतकृतो गुणः ।
पृथक्त्वेन च भूतानां विषया वै गुणास्स्मृताः ॥ ३५

बीजधर्मं यथाऽव्यक्तं तथैव प्रसवात्मकम् ।
बीजधर्मी महानात्मा प्रसवश्चेति नश्श्रुतम् ॥ ३६

बीजधर्मी त्वहङ्कारः प्रसवश्च पुनः पुनः ।
तथैव बीजधर्माणि महाभूतानि पञ्च वै ॥ ३७

बीजधर्मिण इत्याहुः प्रसवं च न कुर्वते ।
[2]विशेषाः पञ्चभूतानां तेषां वित्त विशेषणम् ॥ ३८

1. क-ख—भूतान्येवमतो गुणाः ।
2. क-ख—विशेषतः पञ्चभूतास्तेषां चित्तविशेषणा ।

तत्रैकगुणमाकाशं द्विगुणो वायुरुच्यते ।
त्रिगुणं ज्योतिरित्याहुर् आपश्चापि चतुर्गुणाः ॥ ३९

पृथ्वी पञ्चगुणा ज्ञेया तत्र स्थावरजङ्गमाः ।
सर्वभूतकरी देवी शुभाशुभनिदर्शना ॥ ४०

शब्दस्स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
एते पञ्च गुणा भूमेर् विज्ञेया द्विजसत्तमाः ॥ ४१

पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः ।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून् गुणान् ॥ ४२

इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा ।
निर्हारी संहतस्स्निग्धो रूक्षो विशद एव च ॥ ४३

एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत ॥ ४३॥

शब्दस्स्पर्शस्तथा रूपं रसश्चापां गुणास्स्मृताः ॥ ४४

रसज्ञानं तु वक्ष्यामि रसस्तु बहुधा स्मृतः ।
मधुरोऽम्लः कटुस्तिक्तः कषायो लवणस्तथा ॥ ४५

एवं षड्विधविस्तारो रसो वारिसमुद्भवः ॥ ४५॥

शब्दस्स्पर्शस्तथा रूपं त्रिगुणं ज्योतिरुच्यते ॥ ४६

ज्योतिषश्च गुणो रूपं रूपं च बहुधा स्मृतम् ।
शुक्लं कृष्णं तथा रक्तं नीलं पीतारुणं तथा ॥ ४७

ह्रस्वं दीर्घं तथा स्थूलं चतुरश्राणुवृत्तकम् ।

एवं द्वादशविस्तारं ज्योतिषां रूपमिष्यते ॥ ४८

विज्ञेयं ब्राह्मणैर्नित्यं धर्मज्ञैस्सत्यवादिभिः ॥ ४८॥
शब्दस्पर्शौ च विज्ञेयौ द्विगुणो वायुरुच्यते ॥ ४९

वायोश्चापि गुणस्स्पर्शस् स्पर्शश्च बहुधा स्मृतः ॥ ४९॥

[1]उष्णश्शीतस्सुखो दुःखस् स्निग्धो विशद एव च ।
कठिनश्चिक्कणश्श्लक्ष्णः पिच्छिलो दारुणो मृदुः ॥ ५०॥

एवं द्वादशविस्तारो वायव्यो गुण उच्यते ।
विधिवद्ब्राह्मणैस्सिद्धैर् धर्मज्ञैस्तत्त्वदर्शिभिः ॥ ५१॥

तत्रैकगुण आकाशश् शब्द इत्येव स स्मृतः ॥ ५२
तस्य शब्दस्य वक्ष्यामि विस्तरेण बहून् गुणान् ॥ ५२॥

षड्जर्षभस्सगान्धारो मध्यमः पञ्चमस्स्मृतः ।
[2]अतः परं तु विज्ञेयो निषादो धैवतस्तथा ॥ ५३॥

इष्टश्चानिष्टशब्दश्च संहतः प्रतिभानवान् ।
एवं बहुविधो ज्ञेयश् शब्द आकाशसम्भवः ॥ ५४॥

आकाशमुत्तमं भूतम् अहङ्कारस्ततः परः ।
अहङ्कारात् परा बुद्धिर् बुद्धेरात्मा ततः परः ॥ ५५॥

---

1. अ—अर्धपञ्चकं न दृश्यते ।
2. अ—इदमर्धं नोपलभ्यते

तस्मात्तु परमव्यक्तम् अव्यक्तात् पुरुषः परः ॥ ५६
परावरज्ञो भूतानां यं प्राप्यानन्त्यमश्नुते ॥* ५६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
॥ ५२ ॥ अनुगीतापर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
[ अस्मिन्नध्याये ५६॥ श्लोकाः ]

---

## ॥ चतुःपञ्चाशोऽध्यायः ॥

कृष्णेनार्जुनं प्रति मुक्त्युपायप्रतिपादकगुरुशिष्यसंवादानुवादसमापनपूर्वकं स्वस्य निजनगरजिगमिषानिवेदनम् ॥ १ ॥ अर्जुनेन तं प्रति युधिष्ठिराभ्यनुज्ञानसम्पादनपूर्वकगमनानुज्ञानम् ॥ २ ॥

---

ब्रह्मा—

भूतानामथ पञ्चानां सर्वेषामीश्वरं मनः ।
नियमे च विसर्गे च भूतानां मन एव च ॥ १

अधिष्ठातृ मनो नित्यं भूतानां महतां तथा ;
बुद्धिमैश्वर्यमाचष्टे क्षेत्रज्ञस्सर्वमुच्यते ॥ २

इन्द्रियाणि मनो युङ्क्ते सदश्वानिव सारथिः ।
इन्द्रियाणि मनो बुद्धिः क्षेत्रज्ञे युज्यते सदा ॥ ३

भूतबुद्धिसमायुक्तं बुद्धिसंयमनं रथम् ।

---

* अ—नास्याध्यायसमाप्तिर्दृश्यते ।

समारुह्य स भूतात्मा समन्तात् परिधावति ॥ ४

[1]इन्द्रियग्रामसंयुक्तो मनस्सारथिरेव च ।
बुद्धिसंयमनो नित्यं महान् ब्रह्ममयो रथः ॥ ५

एवं यो वेत्ति विद्वान् वै सदा ब्रह्ममयं रथम् ।
स धीरस्सर्वलोकेषु न मोहमधिगच्छति ॥ ६

अव्यक्तादिविशेषान्तं चरस्थावरसङ्कुलम् ।
चन्द्रसूर्यप्रभालोकं ग्रहनक्षत्रमण्डितम् ॥ ७

नदीपर्वतजालैश्च सर्वतः परिभूषितम् ।
विविधाभिस्तथाऽद्भिश्च सततं समलङ्कृतम् ॥ ८

अजितं सर्वभूतानां सर्वप्राणभृतां गतिः ।
एतद्ब्रह्मपदं नित्यं क्षेत्रज्ञो यत्र तिष्ठति ॥ ९

लोकेऽस्मिन् यानि भूतानि स्थावराणि चराणि च ।
तान्येवाग्रे प्रलीयन्ते पश्चाद्भूतकृता गुणाः ॥ १०

गुणेभ्यः पञ्च भूतानि एष भूतसमुच्छ्रयः ॥ १०॥

देवा मनुष्या गन्धर्वाः पिशाचोरगराक्षसाः ।
सर्वे स्वभावतस्सृष्टा न क्रियाभ्यो न कारणात् ॥ ११॥

एते विश्वसृजो विप्रा जायन्तीह पुनः पुनः ॥ १२

---

1. ख-घ—बुद्धिमैश्वर्यमाचष्टे क्षेत्रज्ञस्सर्वमुच्यते ।
ख—अधिष्ठाता मनो नित्यं महान् ब्रह्ममयो रथः ।
इन्द्रियाणि मनो युङ्क्ते दशाश्वानिव सारथिः ॥[अधिकः पाठः]

तेभ्यः प्रसूतास्तेष्वेव महाभूतेषु पञ्चसु ।
प्रलीयन्ते यथाकालम् ऊर्मयस्सागरे यथा ॥ १३

विश्वसृग्भ्यश्च भूतेभ्यो महाभूतानि गच्छति ।
भूतेभ्यश्चापि पञ्चभ्यो मुक्तो गच्छेत् परां गतिम् ॥ १४

प्रजापतिरिदं सर्वं तपसैवासृजत् प्रभुः ।
तथैव देवानृषयस् तपसा प्रतिपेदिरे ॥ १५

तपसश्चानुपूर्व्येण फलमूलाशिनस्तथा ।
त्रैलोक्यं तपसा सिद्धाः पश्यन्तीह समाहिताः ॥ १६

औषधान्यगदादीनि नानाविद्याश्च सर्वशः ।
तपसैव प्रसिद्ध्यन्ति तपोमूलं हि साधनम् ॥ १७

यद्दुरापं दुराम्नायं दुराधर्षं दुरन्वयम् ।
तत् सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ १८

सुरापो ब्रह्महा स्तेनो भ्रूणहा गुरुतल्पगः ।
तपसैव सुतप्तेन मुच्यते किल्बिषात् ततः ॥ १९

मनुष्याः पितरो देवाः पशवो मृगपक्षिणः ।
यानि चान्यानि भूतानि चराणि स्थावराणि च ॥ २०

तपःपरायणा नित्यं सिद्ध्यन्ते तपसा सदा ॥ २०॥

तथैव तपसा देवा महाभागा दिवं गताः ॥ २१

आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः ।

अहङ्कारसमायुक्तास् ते सकाशे प्रजापतेः ॥ २२

ध्यानयोगेन शुद्धेन निर्ममा निरहङ्कृताः ।
आप्नुवन्ति महात्मानो महान्तं लोकमुत्तमम् ॥ २३

[1]ध्यानयोगमुपागम्य प्रसन्नमतयस्सदा ।
[2]सुखोपचयमव्यक्तं प्रविशन्त्यात्मवित्तमाः ॥ २४

ध्यानयोगादुपागम्य निर्ममा निरहङ्कृताः ।
अव्यक्तं प्रविशन्तीह महतां लोकमुत्तमम् ॥ २५

अव्यक्तादेव सम्भूतस् समयज्ञो गतः पुनः ।
तमोरजोभ्यां निर्मुक्तस् सत्वमास्थाय केवलम् ॥ २६

विमुक्तस्सर्वपापेभ्यस् सर्वं त्यजति सर्वशः ॥ २६॥

क्षेत्रज्ञ इति तं विद्याद् यस्तं वेद स वेदवित् ॥ २७

चित्तं चित्तादुपागम्य मुनिरासीत संयतः ।
तच्चित्तस्तन्मना भूत्वा ग्राह्यमेतत् सनातनम् ॥ २८

अव्यक्तादिविशेषान्तम् अविद्यालक्षणं स्मृतम् ।
निबोधत यथा हीनं गुणैर्लक्षणमित्युत ॥ २९

---

1. घ--अव्यक्तादेव सम्भूतास् समयज्ञा गताः पुनः ।
तमोरजोभ्यां निर्मुक्तास् सत्त्वमास्थाय केवलम् ॥
ध्यानयोगादुपागम्य निर्ममा निरहङ्कृताः ।
विमुक्तस्सर्वपापेभ्यस् सर्वं त्यजति निष्कलम् ॥ [ इति पठ्यते ॥
2. क-ख—सुखोपायनमव्यक्तं प्रविशन्त्यात्मवत्तया । [ पाठान्तरम् ]

द्व्यक्षरस्तु भवेन्मृत्युस् त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति हि भवेन्मृत्युर् न ममेति हि शाश्वतम् ॥ ३०

कर्म केचित् प्रशंसन्ति मन्दबुद्धिरता नराः ।
ये तु बुद्ध्या महात्मानो न प्रशंसन्ति कर्म ते ॥ ३१

कर्मणा जायते जन्तुर् मूर्तिमान् षोडशात्मकः ।
पुरुषं [1]व्रजते विद्या तद्ब्राह्ममृताशिनम् ॥ ३२

[2]तस्मात् कर्मसु निस्स्नेहा ये केचित् पारदर्शिनः ।
विद्यामयोऽयं पुरुषो न तु कर्ममयस्स्मृतः ॥ ३३

अपूर्वममृतं नित्यं य एनमभिचारिणम् ।
य एनं विन्दते त्मानम् अमेयमविनाशिनम् ॥ ३४

अग्राह्यो ह्यमृतो भवति स एभिः कारणैर्ध्रुवम् ॥ ३४॥

अपोह्य सर्वसङ्कल्पान् संयम्यात्मानमात्मनि ।
स तद्ब्रह्म शुभं वेत्ति यस्माद्भूयो न विद्यते ॥ ३५॥

प्रसादेन च सत्वस्य प्रसादं समवाप्नुयात् ।
लक्षणं हि प्रसादस्य यथा स्यात् स्वप्रदर्शनम् ॥ ३६॥

गतिरेषा तु मुक्तानां ये ज्ञानपरिनिष्ठिताः ।
[3]प्रवृत्तयश्च यास्सर्वाः पश्यन्ति परिणामजाः ॥ ३७॥

---

1. क-ख—सृजते विद्यादग्राह्यमविनाशिनम् ।
2. अ—अर्धचतुष्टयं न दृश्यते । 3. क-ख—अवृत्तयश्च ।

एषा गतिरसक्तानाम् एष धर्मस्सनातनः ।
एषा ज्ञानवतां प्राप्तिर् एतद्वृत्तमनिन्दितम् ॥ ३८॥

[1]समेन सर्वभूतेषु निस्पृहेण निराशिषा ।
शक्या गतिरियं गन्तुं सर्वत्र समदर्शिना ॥ ३९॥

एतद्वस्सर्वमाख्यातं मया विप्रर्षिसत्तमाः ।
एवमाचरत क्षिप्रं ततस्सिद्धिमवाप्स्यथ ॥ ४०॥

गुरुः—

इत्युक्ता गुरुणा ते तु ब्राह्मणा मुनयस्तथा ।
कृतवन्तो महात्मानस् ततो लोकमवाप्नुवन् ॥ ४१॥

त्वमप्येवं महाभाग यथोक्तं ब्रह्मणो वचः ।
सम्यगाचर शुद्धात्मंस् ततस्सिद्धिमवाप्स्यसि ॥ ४२॥

श्रीभगवान्—

इत्युक्तस्स तदा शिष्यो गुरुणा धर्ममुत्तमम् ।
चकार सर्वं कौन्तेय ततो मोक्षमवाप्तवान् ॥ ४३॥

कृतकृत्यश्च स तदा शिष्यः कुरुकुलोद्वह ।
तत् पदं समनुप्राप्तो यत्र गत्वा न शोचति[2] ॥ ४४॥

---

1. क-ख-घ—निस्सङ्गेनैव तत् सर्वं निराशित्वादलेपनात् ।
[ अधिकः पाठः ]

2. अ—त्वमप्येतन्महाभाग यथोक्तं ब्रह्मणो वचः ।
सम्यगाचर शुद्धात्मंस् ततस्सिद्धिमवाप्स्यसि ॥ [अधिकः पाठः]

अर्जुनः—

को न्वसौ ब्राह्मणः कृष्ण कश्च शिष्यो जनार्दन ।
ज्ञातव्यं चेन्मयैतद्वै तन्ममाचक्ष्व मे विभो ॥ ४५॥

श्रीभगवान्—

अहं गुरुर्महाबाहो मनश्शिष्यो हि विद्धि मे ।
त्वत्प्रीत्या सर्वमेतद्वै कथितं ते धनञ्जय ॥ ४६॥

मयि चेदस्ति ते भक्तिर् नित्यं कुरुकुलोद्वह ।
अध्यात्ममेतच्छ्रुत्वा त्वं सम्यगाचर सुव्रत ॥ ४७॥

ततस्त्वं सम्यगाचारो धर्मेऽस्मिन् कुरुनन्दन ।
सर्वपापविशुद्धात्मा मोक्षं प्राप्स्यसि केवलम् ॥ ४८॥

पूर्वमप्येतदेवोक्तं युद्धकाल उपस्थिते ।
मया तव महाबाहो तस्मादत्र मनः कुरु ॥ ४९॥

मया तु भरतश्रेष्ठ चिरदृष्टः पिता विभो ।
तमहं द्रष्टुमिच्छामि सम्मते तव फल्गुन ॥ ५०॥

वैशम्पायनः—

इत्युक्तवचनं कृष्णं प्रत्युवाच धनञ्जयः ॥ ५१

अर्जुनः—

यदिष्टं कुरु सर्वस्यापीश्वरोऽस्मान् प्रपालय ॥ ५१॥

नमस्ते सर्वलोकात्मन् नारायण परात् पर ।
मनोमलात् तपोऽशक्यं कर्म चाविद्यया तथा ॥ ५२॥

दानमप्यर्थदोषेण नाम तस्मात् कलौ स्मरेत् ॥ ५३

यदि गन्तुं कृता बुद्धिर् वासुदेव नमोऽस्तु ते ।
गच्छावो नगरं कृष्ण गजसाह्वयमद्य वै ॥ ५४

समेत्य तत्र राजानं धर्मात्मानं युधिष्ठिरम् ।
समनुज्ञाप्य दुर्धर्षं स्वां पुरीं यातुमर्हसि* ॥ ५५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
॥ ५२ ॥ अनुगीतापर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
[ अस्मिन्नध्याये ५५ श्लोकाः ]

---

## ॥ पञ्चपञ्चाशोऽध्यायः ॥

अनुगीतोपदेशानन्तरं कृष्णार्जुनाभ्यां हास्तिनपुरं प्रति प्रस्थानम् ॥ १ ॥ तत्र मध्येमार्गमर्जुनेन कृष्णं प्रति स्तुतिपूर्वकं व्यासनारदादिभ्यः स्वस्य कृष्णयाथात्म्यावगतिनिवेदनम् ॥ २ ॥ ततः कृष्णेन सहार्जुनेन हास्तिनपुरमेत्य धृतराष्ट्रादिभ्यः पादाभिवादनम् ॥ ३ ॥ ततो युधिष्ठिरानुमत्या सुभद्रामानीय सह सात्यकिना द्वारकां प्रति प्रस्थानम् ॥ ४ ॥

---

वैशम्पायनः—

ततो ह्यचोदयत् कृष्णो युज्यतामिति दारुकम् ।
मुहूर्तादिव चाचष्ट युक्तमित्येव दारुकः ॥ १

तथैव चानुयात्राणि चोदयामास पाण्डवः ॥ १॥

---

* अ-क-ख-घ—कोशेषु अत्र अनुगीता समाप्ता इति दृश्यते ॥

अर्जुनः—

[1]सन्नह्यध्वं प्रयास्यामो नगरं गजसाह्वयम् ॥ २

वैशम्पायनः—

इत्युक्तास्सैनिकास्ते तु सज्जीभूता विशाम्पते ।
[2]आचख्युस्सज्जमित्येवं पार्थायामिततेजसे ॥ ३

ततस्तौ रथमास्थाय प्रयातौ कृष्णपाण्डवौ ।
तौ कुर्वाणौ कथाश्चित्राः प्रीयमाणौ विशाम्पते ॥ ४

रथस्थं तं महातेजा वासुदेवं धनञ्जयः ।
पुनरेवाब्रवीद्वाक्यम् इदं भरतसत्तम ॥ ५

अर्जुनः—

त्वत्प्रसादाज्जयं प्राप्तो राजा वृष्णिकुलोद्वह ।
निहताश्शत्रवश्चापि प्राप्तं राज्यमकण्टकम् ॥ ६

नाथवन्तश्च भवता पाण्डवा मधुसूदन ।
भवन्तं प्लवमासाद्य तीर्णास्स्म कुरुसागरम् ॥ ७

भक्तांस्त्वमाश्रितानस्मान् पालयामुत्र चेह च ॥ ७॥

विश्वकर्मन् नमस्तेऽस्तु विश्वात्मन् विश्वसम्भव ।
यथाऽहं त्वां विजानामि तथा हि भगवान् मम ॥ ८॥

त्वत्तेजस्सम्भवो नित्यं हुताशो मधुसूदन ।

---

1. क—सज्जध्वं विप्रयास्यामो । ख—सज्जध्वमथ यास्यामो ।
2. घ—इतः सार्धः श्लोको नास्ति ।

[1]रतिः क्रीडामयी तुभ्यं माया ते रोदसी विभो ॥ ९॥
त्वयि सर्वमिदं विश्वं यदिदं स्थाणुजङ्गमम् ॥ १०
त्वं हि सर्वं विकुरुषे भूतग्रामं सनातनम् ।
पृथिवीं चान्तरिक्षं च तथा स्थावरजङ्गमम् ॥ ११
हसितं [2]तेऽमला ज्योत्स्ना ऋतव[3]श्चेन्द्रियाणि च ।
प्राणो वायुस्सततगः क्रोधो मृत्युस्सनातनः ॥ १२
प्रसादे चापि पद्मा श्रीर् नित्यं तव महामते ।
रतिस्तुष्टिर्धृतिः क्षान्तिस् त्वयि चेदं चराचरम् ॥ १३
त्वमेव हि युगान्तेषु निधनं प्रोच्यतेऽनघ ॥ १३॥
सुदीर्घेणापि कालेन न ते शक्या गुणा मया ।
आत्मा च परमो वक्तुं नमस्ते नलिनेक्षण ॥ १४॥
विदितो मे सुदुर्धर्ष नारदाद्देवलात् तथा ।
कृष्णद्वैपायनाच्चैव तथा कुरुपितामहात् ॥ १५॥
त्वयि सर्वं समासक्तं त्वमेवैको जनार्दनः ॥ १६
[4]यच्चानुग्रहसंयुक्तम् एतदुक्तं त्वयाऽनघ ।
एतत् सर्वमहं सम्यक् करिष्यामि जनार्दन ॥ १७
इदं चाद्भुत[5]मव्यग्रं कृतमस्मत्प्रियेप्सया ।

---

1. क—रात्रिः । ख—रविः क्रीडामयस्तुभ्यमायातो ।
2. क-ख—ते महज्ज्योत्स्ना ऋतवश्चेन्द्रियाणि च ।
3. अ-घ—श्चाद्वयस्तथा ।
4. घ—श्लोकोऽयं नास्ति
5. क-ख—मत्यर्थं ।

यत् पापा निहतास्सङ्ख्ये कौरव्या धृतराष्ट्रजाः ॥ १८
त्वया दग्धं हि तत् सैन्यं मया [1]विजितमाहवे ।
भवता तत् कृतं कर्म येनावाप्तो जयो मया ॥ १९
दुर्योधनस्य सङ्ग्रामे तव बुद्धिपराक्रमैः ।
कर्णस्य च वधोपायो यथावत् सम्प्रदर्शितः ॥ २०
सैन्धवस्य च पापस्य भूरिश्रवस एव च ॥ २०॥
तस्मात् त्वमेव सञ्चिन्त्य हितं कुरु यथा तथा ॥ २१
अहं च प्रीयमाणोऽस्मि त्वया देवकिनन्दन ।
यदुक्तं तत् करिष्यामि न हि मेऽस्ति विचारणा ॥ २२
राजानं च समासाद्य धर्मात्मानं युधिष्ठिरम् ।
चोदयिष्यामि धर्मज्ञ गमनार्थं तवानघ ॥ २३
रुचितं हि ममाप्येतद् द्वारकागमनं प्रति ॥ २३॥
द्रष्टासि नचिरादेव मातुलं मधुसूदन ।
बलदेवं च दुर्धर्षं तथाऽन्यान् वृष्णिपुङ्गवान् ॥ २४॥

वैशम्पायनः—

एवं सम्भाषमाणौ तौ प्राप्तौ वारणसाह्वयम् ।
तथा विविशतुश्चोभौ सम्प्रहृष्टजनाकुलम् ॥ २५॥
तौ गत्वा धृतराष्ट्रस्य गृहं शक्रगृहोपमम् ।

1. क-ख-घ—विज्ञातमाहवे ।

दृष्टवन्तौ महाराज धृतराष्ट्रं जनेश्वरम् ॥ २६॥
विदुरं च महाबुद्धिं राजानं च युधिष्ठिरम् ।
भीमसेनं च दुर्धर्षं माद्रीपुत्रौ च पाण्डवौ ॥ २७॥
धृतराष्ट्रमुपासीनं युयुत्सुं चापराजितम् ।
गान्धारीं च महाप्राज्ञां पृथां कृष्णां च भामिनीम् ॥ २८॥
सुभद्रां चापि तास्सर्वा भरतानां स्त्रियस्तथा ।
दृष्टवन्तौ स्थितास्सर्वा गान्धारीं परिवार्य ते ॥ २९॥
ततस्समेत्य राजानं धृतराष्ट्रमरिन्दमौ ।
निवेद्य नामधेये स्वे वन्देतां चरणौ ततः ॥ ३०॥
गान्धार्याश्च पृथायाश्च धर्मराजस्य धीमता ।
भीमस्य च ववन्दाते तथा पादौ महात्मनः ॥ ३१॥
क्षत्तारं चाभिसम्पूज्य पृष्ट्वा कुशलमव्ययम् ।
परिष्वज्य महात्मानं वैश्यापुत्रं महारथम् ॥ ३२॥
तैस्सार्धं नृपतिं वृद्धं उपासाते ततस्तु तौ ॥ ३३
ततो निशि महाराजो धृतराष्ट्रो जनेश्वरान् ।
जनार्दनं च मेधावी व्यसर्जयत वै गृहान् ॥ ३४
[1]तेऽनुज्ञाता नृपतिना ययुस्स्वं स्वं निवेशनम् ।
[2]धनञ्जयगृहानेव ययौ कृष्णस्तु वीर्यवान् ॥ ३५

1. घ—तेऽनुज्ञाता नृपतिना कृतसर्वाह्निकक्रियौ ।
2. घ—इतश्श्लोकद्वयं नास्ति

तत्रार्चितो यथान्यायं सर्वकामैरुपस्थितः ।
कृष्णस्सुष्वाप मेधावी धनञ्जयसहायवान् ॥ ३६

प्रभातायां तु शर्वर्यां कृतसर्वाह्निकक्रियौ ।
धर्मराजस्य भवनं जग्मतुः परमार्चितौ ॥ ३७
यत्रास्ते तु सहामात्यो धर्मराजो महामनाः ॥ ३७॥

ततस्तु तत् प्रविश्याथ ददृशाते महाबलौ ।
धर्मराजं तमासीनं देवराजमिवाश्विनौ ॥ ३८॥

तौ समासाद्य राजानं वार्ष्णेयकुरुपुङ्गवौ ।
निषीदतुरनुज्ञातौ प्रीयमाणेन तेन वै ॥ ३९॥

ततस्स राजा मेधावी विवक्षू प्रेक्ष्य तावुभौ ।
प्रोवाच वदतां श्रेष्ठौ वचनं राजसत्तमः ॥ ४०॥

युधिष्ठिरः—

विवक्षू हि युवां मन्ये वीरौ यदुकुरूद्वहौ ।
ब्रूतं कर्तास्मि सर्वं वां न चिरान्मा विचार्यताम् ॥ ४१॥

वैशम्पायनः—

इत्युक्तः फल्गुनस्तत्र धर्मराजानमब्रवीत् ।
विनीतवदुपागम्य वाक्यं वाक्यविशारदः ॥ ४२॥

अर्जुनः—

अयं चिरोषितो राजन् वासुदेवः प्रतापवान् ।
भवन्तं समनुज्ञाप्य पितरं द्रष्टुमिच्छति ॥ ४३॥

स गच्छत्वभ्यनुज्ञातो भवता यदि मन्यसे ।
आनर्तनगरं वीरस् तदनुज्ञातुमर्हसि ॥ ४४॥

युधिष्ठिरः—

पुण्डरीकाक्ष भद्रं ते गच्छ त्वं मधुसूदन ।
पुरीं द्वारवतीमद्य द्रष्टुं शूरसुतं विभुम् ॥ ४५॥

रोचते मे महाबाहो गमनं तव केशव ।
मातुलश्चिरदृष्टस्ते त्वया देवी च देवकी ॥ ४६॥

मातुलं वसुदेवं त्वं बलदेवं च माधव ।
[1]पूजयेथा महाप्राज्ञ मद्वाक्येन यथार्हतः ॥ ४७॥

स्मरेथाश्चापि मां नित्यं भीमं च बलिनां वरम् ।
फल्गुनं नकुलं चैव सहदेवं च माधव ॥ ४८॥

आनर्तानवलोक्य त्वं पितरं च महाभुजम् ।
वृष्णींश्च पुनरागच्छेर् हयमेधे ममानघ ॥ ४९॥

सङ्गच्छ रत्नान्यादाय विविधानि वसूनि च ।
यच्चाप्यन्यन्मनोज्ञं ते तच्चाप्यादत्स्व सात्वत ॥ ५०॥

इयं हि वसुधा सर्वा प्रसादात् तव माधव ।
अस्मानुपागता वीर निहताश्चापि शत्रवः ॥ ५१॥

स्वर्गापवर्गविषयं त्वद्भक्तानां न दुर्लभम् ।
संसारगहने चेद्धपापाग्नेः प्रशमाम्बुद ॥ ५२॥

---

1. ब—इतः सार्धश्लोको नास्ति

वैशम्पायनः—

एवं ब्रुवति कौरव्ये धर्मराजे युधिष्ठिरे ।
वासुदेवः परः पुंसाम् इदं वचनमब्रवीत् ॥ ५३॥

श्रीभगवान्—

तवैव रत्नानि धनं च केवलं
धरा च कृत्स्ना च महाभुजाद्य वै ।
यदस्ति चान्यद्द्रविणं गृहेषु मे
त्वमेव तस्येश्वर नित्यमीशिषे ॥ ५४॥

वैशम्पायनः—

तथेत्यथोक्तः प्रतिपूजितस्तदा
गदाग्रजो धर्मसुतेन वीर्यवान् ।
पितृष्वसारं त्वभिवाद्य सात्यकिं
सम्पूजयंश्चाप्यगमत् प्रदक्षिणम् ॥ ५५॥

तया स सम्यक् प्रतिपूजितस्तदा
तथैव सर्वैर्विदुरादिभिस्ततः ।
विनिर्ययौ नागपुराद्गदाग्रजो
रथेन दिव्येन चतुर्युजा हरिः ॥ ५६॥

रथे सुभद्रामधिरोप्य भामिनीं
युधिष्ठिरस्यानुमते जनार्दनः ।

पितृष्वसुश्चापि जनार्दनस्तदा
विनिर्ययौ पौरजनाभिसत्कृतः ॥ ५७॥

तमन्वगाद्वानरवर्यकेतनस्
ससात्यकी माद्रवतीसुतावपि ।
अगाधबुद्धिर्विदुरश्च माधवं
स्वयं च भीमो गजराजविक्रमः ॥ ५८॥

निवर्त्य वैतान् कुरुराष्ट्रवर्धनांस्
ततश्च सर्वान् विदुरं च वीर्यवान् ।
जनार्दनो दारुकमाह सत्वरः
प्रचोदयाश्वानिति सात्यकिं तदा ॥ ५९॥

ततो ययौ शत्रुगणावमर्दनश्
शिनिप्रवीरानुगतो जनार्दनः ।
यथा निहत्यारिगणं शतक्रतुर्
दिवं तथाऽऽनर्तपुरीं प्रतापवान् ॥ ६०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
॥ ५२ ॥ अनुगीतापर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
[ अस्मिन्नध्याये ६०॥ श्लोकाः ]

## ॥ षट्पञ्चाशोऽध्यायः ॥

कुरुपुराद् द्वारकां गच्छता कृष्णेन मध्येमार्गं दृष्टेनोदङ्केन सह संवादः॥ १ ॥ तथा कौरवादिविनाशे स्वोपेक्षाया हेतुत्वधिया स्वं प्रति शापदानो द्यतोदङ्कपरिसान्त्वनाय तं प्रति तत्त्वकथनोपक्रमः ॥ २ ॥

वैशम्पायनः—

तथा प्रयान्तं वार्ष्णेयं द्वारकां भरतर्षभाः ।
परिष्वज्य न्यवर्तन्त सानुयात्राः परन्तपाः ॥ १

पुनः पुनश्च वार्ष्णेयं पर्यष्वजत फल्गुनः ।
आचक्षुर्विषयादेनं ददर्श स पुनः पुनः ॥ २

कृच्छ्रेणैव च तां पार्थो गोविन्दे विनिवेशिताम् ।
सञ्जहार ततो दृष्टिं कृष्णश्चाप्यपराजितः ॥ ३

तत्र प्रयाणे यान्यासन् निमित्तानि महात्मनः ।
बहून्यद्भुतरूपाणि तानि मे गदतश्शृणु ॥ ४

वायुर्वेगेन महता रथस्य पुरतो ववौ ।
कुर्वन् निश्शर्करं मार्गं विरजस्कमकण्टकम् ॥ ५

ववर्ष वासवश्चैव तोयं शुचि सुगन्धि च ।
दिव्यानि चैव पुष्पाणि पुरतश्शार्ङ्गधन्वनः ॥ ६

सम्प्रयातो महाबाहुस् समेषु मरुधन्वसु ।
आगच्छन्तमपश्यद्वै उदङ्कं नाम नामतः ॥ ७

महर्षिं सिद्धतपसं त्रिषु लोकेषु विश्रुतम् ।
[1]स तं सम्पूज्य तेजस्वी मुनिं कमललोचनः ॥ ८
पूजितस्तेन च तदा पर्यपृच्छदनामयम् ॥ ८॥

स पृष्टः कुशलं तेन सम्पूज्य मधुसूदनम् ।
उदङ्को ब्राह्मणश्रेष्ठस् [2]ततः पप्रच्छ माधवम् ॥ ९॥

उदङ्कः—
कच्चिच्छौरे त्वया गत्वा कुरुपाण्डवसद्म तत् ।
कृतं सौभ्रात्रममलं तन्मे व्याख्यातुमर्हसि ॥ १०॥

अपि सन्धाय तान् वीरान् उपावृत्तोऽसि केशव ।
सम्बन्धिनस्सुदयितान् सततं वृष्णिपुङ्गव ॥ ११॥

कच्चित् पाण्डुसुताः पञ्च धृतराष्ट्रस्य चात्मजाः ।
लोकेषु विहरिष्यन्ति त्वया सह परन्तपाः ॥ १२॥

[3]स्वराष्ट्रेषु च राजानः कच्चित् प्राप्स्यन्ति वै सुखम् ।
कौरवेषु प्रशान्तेषु त्वया नाथेन माधव ॥ १३॥

या मे सम्भावना तात त्वयि नित्यमवर्तत ।
अपि सा सफला कृष्ण कृता ते भारतान् प्रति ॥ १४॥

श्रीभगवान्—
कृतो यत्नो मया ब्रह्मन् सौशाम्ये कौरवान् प्रति ।

---

1. क-ख—ददर्शाथ मुनिश्रेष्ठमुदङ्कमिति विश्रुतम् ।
[अधिकः पाठः अनन्वितश्च]
2. क-ख-घ—पप्रच्छ मधुसूदनम् । 3. क-ख—स्वेषु देशेषु ।

न चाशक्यन्त सन्धातुम् अधर्मरुचयो मया ॥ १५॥
ततस्ते निधनं प्राप्तास् सर्वे ससुतबान्धवाः ॥ १६
न दिष्टमप्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ।
महर्षे विदितं नूनं सर्वमेतत् तवानघ ॥ १७
अत्यक्रामन् वचो मह्यं भीष्मस्य विदुरस्य च ।
ततो यमक्षयं जग्मुस् समासाद्येतरेतरम् ॥ १८
पञ्चैव पाण्डवाश्शिष्टा हतामित्रा हतात्मजाः ।
धार्तराष्ट्राश्च निहतास् सर्वे ससुतबान्धवाः ॥ १९

वैशम्पायनः—

इत्युक्तवचने कृष्णे भृशं क्रोधसमन्वितः ।
उदङ्कः प्रत्युवाचेदं क्रोधादुद्वृत्य लोचने ॥ २०

उदङ्कः—

यस्माच्छक्तेन ते कृष्ण न त्राताः कुरुपाण्डवाः ।
सम्बन्धिनः प्रियास्तस्माच् छप्स्येऽहं त्वां न संशयः ॥ २१
न च वै प्रसभं यस्मात् ते निगृह्य निवर्तिताः ।
तस्मान्मन्युपरीतस्त्वां शप्स्यामि मधुसूदन ॥ २२
त्वया शक्तेन हि सता मिथ्याचारेण माधव ।
प्रमापिताः कुरुश्रेष्ठा यत् त्वया समुपेक्षिताः ॥ २३

श्रीभगवान्—

शृणु मे विस्तरेणेदं यद्वक्ष्ये भृगुनन्दन ।

गृहाणानुनयं चैव तपस्वी ह्यसि भार्गव ॥ २४

श्रुत्वा तु मे तदध्यात्मं मुञ्चेथाश्शापमद्य वै ।
न च मां तपसाऽल्पेन शक्नोति शपितुं भवान् ॥ २५

न च ते तपसो नाशम् इच्छामि तपतां वर ।
तपस्ते सुमहत् तप्तं गुरवश्चापि तोषिताः ॥ २६

कौमारं ब्रह्मचर्यं ते जानामि द्विजसत्तम ।
दुःखार्जितस्य तपसस् तस्मान्नेच्छामि ते व्ययम् ॥ २७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
॥ ५२ ॥ अनुगीतापर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
[ अस्मिन्नध्याये २७ श्लोकाः ]

---

## ॥ सप्तपञ्चाशोऽध्यायः ॥

कृष्णेनोदङ्कं प्रति स्वमाहात्म्यप्रकाशनपूर्वकं कुरूणां स्ववचनातिक्रमणादिरूपस्वापराधेनैव निधनोक्तिः ॥ १ ॥

---

उदङ्कः—

ब्रूहि केशव तत्त्वेन त्वं मेऽध्यात्ममनिन्दितम् ।
श्रुत्वा श्रेयो विधास्यामि न शापं ते जनार्दन ॥ १

श्रीभगवान्—

तमो रजश्च सत्त्वं च विद्धि भावान् मदाश्रयान् ।

स्थितिसृष्टिलयाध्यक्षो विष्णुब्रह्मेशसंज्ञितः ॥ २

कदाचित् तमसा [1]रुद्रो विष्णुस्सत्वगुणे स्थितः ।
रजस्यपि [2]तथा ब्रह्मा स्वगुणान्यगुणावुभौ ॥ ३

प्रणवात्मा च शब्दादि त्रिगुणात्मा चराचरम् ।
तथा रुद्रान् वसून् वाऽपि विद्धि मत्प्रभवान् द्विज ॥ ४

मयि सर्वाणि भूतानि सर्वभूतेषु चाप्यहम् ।
स्थित इत्यभिजानीहि मा ते भूदत्र संशयः ॥ ५

तथा दैत्यगणान् सर्वान् यक्षगन्धर्वराक्षसान् ।
विबुधाप्सरसश्चैव विद्धि मत्प्रभवान् द्विज ॥ ६

सदसच्चैव यत् प्राहुर् अव्यक्तं व्यक्तमेव च ।
अक्षरं च क्षरं चैव सर्वमेतन्मदाश्रयम् ॥ ७

ये चाश्रमेषु वै धर्माश् चतुर्षु विहिता मुने ।
दैवतानि च कर्माणि विद्धि सर्वान् गुणात्मकान् ॥ ८

असच्च सच्चैव च यद् विश्वं सदसतः परम् ।
ततः परतरं नास्ति देवदेवात् सनातनात् ॥ ९

ओङ्कारप्रभवान् वेदान् विद्धि मां त्वं भृगूद्वह ।

---

1. क-ख—रौद्रो ।
2. ख-घ—तथाऽन्यौ स्यात् गुणादन्यगुणानुभौ ।
क—तथा ब्रह्मन् स्वगुणान्यगुणावुभौ ।

तथैव यूपं सोमं च त्रिदशाप्यायनं मखे ॥ १०
होतारमपि हव्यं च विद्धि मां भृगुनन्दन ।
अध्वर्युः कल्पकृच्चापि हविः परमसंस्कृतम् ॥ ११
उद्गाता चापि मां स्तौति गीतघोषैर्महाध्वरे ॥ ११॥
प्रायश्चित्तेषु मां ब्रह्मञ् शान्तिमङ्गलवाचकाः ।
स्तुवन्ति विश्वकर्माणं सततं द्विजसत्तमाः ॥ १२॥
विद्धि मेऽद्य सुतं धर्मम् अग्रजं द्विजसत्तम ।
मानसं दयितं विप्र सर्वभूतगुणात्मकम् ॥ १३॥
अहाहं वर्तमानैश्च निवृत्तैश्चापि मानवैः ।
बहुधा जायमानो वै वर्तेय द्विजसत्तम ॥ १४॥
लोकसंरक्षणार्थाय धर्मसंस्थापनाय च ।
तैस्तैर्वेषैश्च रूपैश्च त्रिषु लोकेषु भार्गव ॥ १५॥
अहं विष्णुरहं ब्रह्मा [1]शक्रोऽहं प्रभवाप्ययः ।
भूतग्रामस्य सर्वस्य स्रष्टा संहार एव च ॥ १६॥
अधर्मे वर्तमानानां सर्वेषामहमच्युतः ।
धर्मस्य सेतुं बध्नामि चलिते चलिते युगे ॥ १७॥
तास्ता योनीः प्रविश्याहं प्रजानां हितकाम्यया ॥ १८
यदा त्वहं देवयोनौ वर्ते भृगुकुलोद्वह ।

1. क-ख-घ—शर्व शक्रो भवाप्ययौ ।

तदाऽहं देववत् सर्वम् आचरामि न संशयः ॥ १९

यदा गन्धर्वयोनौ तु वर्तेऽहं भृगुनन्दन ।
तदा गन्धर्ववच्चेष्टास् सर्वाश्चेष्टामि भार्गव ॥ २०

नागयोनौ यदा [1]वर्ते तदा चेष्टा तु नागवत् ।
यक्षराक्षसयोनौ तु [2]तथावृत्तिश्चराम्यहम् ॥ २१

मानुष्ये वर्तमाने तु कृपणं याचिता मया ।
न च ते जातसम्मोहा वचो गृह्णन्ति मे हितम् ॥ २२

भयं च महदुद्दिश्य त्रासिताः कुरवो मया ।
क्रुद्धेन भूत्वा तु पुनर् यथावदभिगर्हिताः ॥ २३

तेऽधर्मेणेह संयुक्ताः परीताः कालधर्मणा ।
धर्मेण निहता युद्धे गतास्स्वर्गं न संशयः ॥ २४

लोकेषु पाण्डवाः ख्यातिं गमिष्यन्ति द्विजोत्तम ।
एतत् ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥

॥ ९२ ॥ अनुगीतापर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

[ अस्मिन्नध्याये २५ श्लोकाः ]

---

1. अ-घ—चैव तदा वर्तामि नागवत् ।
2. अ-घ—यथावद्विचराम्यहम् ।

## ॥ अष्टपञ्चाशोऽध्यायः ॥

कृष्णेनोदङ्काय विश्वरूपप्रदर्शनपूर्वकं पिपासाकाले जललाभरूपवरदानम् ॥ १ ॥ कृष्णेनोदङ्कायामृतदानं चोदितेनेन्द्रेण कदाचिद्वनमध्ये पिपासुमुदङ्कं प्रति चण्डालवेषेण जलस्वीकारप्रार्थने उदङ्केन चण्डालत्वबुद्ध्या तदधिक्षेपः ॥२ ॥ पश्चात् तस्य तिरोधानेन परितप्यमानमुदङ्कं प्रति तत्र सन्निहितेन कृष्णेनेन्द्रकृतवज्रनानिवेदनपूर्वकं मरुप्रदेशे जललाभरूपवरदानम् ॥ ३ ॥

उदङ्कः—

अभिजानामि जगतः कर्तारं त्वां जनार्दन ।
नूनं भवत्प्रसादोऽयम् इति मे नात्र संशयः ॥ १

चित्तं च सुप्रसन्नं मे त्वद्भावगतमच्युत ।
विनिवृत्तश्च मे शाप इति विद्धि यदूत्तम ॥ २

यदि त्वनुग्रहं कञ्चित् त्वत्तोऽर्होऽहं जनार्दन ।
द्रष्टुमिच्छामि ते रूपं वैष्णवं मां निदर्शय ॥ ३

वैशम्पायनः—

ततस्स तस्मै प्रीतात्मा दर्शयामास तद्वपुः ।
शाश्वतं वैष्णवं धीमान् यद्ददर्श धनञ्जयः ॥ ४

स ददर्श महात्मानं विश्वरूपं महाभुजम् ।
विस्मयं च ययौ विप्रस् तद् दृष्ट्वा रूपमैश्वरम् ॥ ५

उदङ्कः—

नमो नमस्ते सर्वात्मन् नारायण परात् पर ।

परमात्मन् पद्मनाभ पुण्डरीकाक्ष माधव ॥ ६
हिरण्यगर्भरूपाय संसारोत्तारणाय च ।
पुरुषाय पुराणाय चान्तर्यामाय ते नमः ॥ ७
अविद्यातिमिरादित्यं भवव्याधिमहौषधिम् ।
संसारार्णवपारं त्वां प्रणमामि गतिर्भव ॥ ८
सर्ववेदैकवेद्याय सर्वदेवमयाय च ।
वासुदेवाय नित्याय नमो भक्तप्रियाय ते ॥ ९
दयया दुःखमोहान्मां समुद्धर्तुमिहार्हसि ।
कर्मभिर्बहुभिः पापैर् बद्धं पाहि जनार्दन ॥ १०
विश्वरूप नमस्तेऽस्तु यस्य ते रूपमैश्वरम् ॥ १०॥
पद्भ्यां ते पृथिवी व्याप्ता शिरसा चावृतं नभः ॥ ११
द्यावापृथिव्योर्यन्मध्यं जठरेण तदावृतम् ।
भुजाभ्यामावृताश्चाशास् त्वमिदं सर्वमच्युत ॥ १२
संहरस्व पुनर्देव रूपमक्षय्यमुत्तमम् ।
पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वतम् ॥ १३

वैशम्पायनः—

तमुवाच प्रसन्नात्मा गोविन्दो जनमेजय ।
वरं वृणीष्वेति तदा तमुदङ्कोऽब्रवीदिदम् ॥ १४

उदङ्कः—

पर्याप्त एष एवाद्य वरस्त्वत्तो महाद्युते ।

यत् ते रूपमिदं कृष्ण पश्यामि प्रभवाप्ययम् ॥ १५

वैशम्पायनः—

तमब्रवीत् पुनः कृष्णो मा त्वमत्र विचारय ।
अवश्यमेतत् कर्तव्यम् अमोघं दर्शनं मम ॥ १६

उदङ्कः—

अवश्यं करणीयं चेद् यदेवं मन्यसे विभो ।
[1]तोयमिच्छामि यत्रेष्टं मरुष्वेतद्धि दुर्लभम् ॥ १७

वैशम्पायनः—

ततस्संहृत्य तत् तेजः प्रोवाचोदङ्कमीश्वरः ।
एष्टव्ये सति चिन्त्योऽहम् इत्युक्त्वा द्वारकां ययौ ॥ १८

ततः कदाचिद्भगवान् उदङ्कस्तोयकाङ्क्षया ।
तृषितः परिचक्राम मरौ सस्मार चाच्युतम् ॥ १९

ततो दिग्वाससं धीमान् मातङ्गं मलपङ्किनम् ।
अपश्यत मरौ तस्मिञ् श्वगणैः परिवारितम् ॥ २०

भीषणं बद्धनिस्त्रिंशं बाणकार्मुकधारिणम् ।
तस्याधस्स्रोतसोऽपश्यद् वारि भूरि द्विजोत्तमः ॥ २१

स्मरन्तं स च तं प्राह मातङ्गः प्रहसन्निव ॥ २१॥

मातङ्गः—

एह्युदङ्क प्रतीच्छस्व मत्तो वारि भृगूद्वह ।

---

1. ब—नास्तीदमर्धम् ।

कृपा हि मे सुमहती त्वां [1]दृष्ट्वा तृट्समन्वितम् ॥ २२॥

वैशम्पायनः—

इत्युक्तस्तेन स मुनिस् तत् तोयं नाभ्यनन्दत ।
चुकोप च स तं धीमान् वाग्भिरुग्राभिरच्युतम् ॥ २३॥

पुनः पुनश्च मातङ्गः पिबस्वेति तमब्रवीत् ।
न चापिबत् स च क्रोधात् क्षुभितेनान्तरात्मना ॥ २४॥

स तथा निश्चयात् तेन प्रत्याख्यातो महामनाः ।
श्वभिस्सह महाराज तत्रैवान्तरधीयत ॥ २५॥

उदङ्कस्तं तथा दृष्ट्वा ततो व्रीडितमानसः ।
मेने प्रलब्धमात्मानं कृष्णेनामिततेजसा ॥ २६॥

अथ तेनैव मार्गेण शङ्खचक्रगदाधरः ।
आजगाम महाबाहुर् उदङ्कश्चैनमब्रवीत् ॥ २७॥

उदङ्कः—

[2]न युक्तं तादृशं दातुं त्वया पुरुषसत्तम ।
सलिलं विप्रमुख्येभ्यो मातङ्गस्रोतसा विभो ॥ २८॥

वैशम्पायनः—

इत्युक्तवचनं तं तु महाबुद्धिर्जनार्दनः ।
उदङ्कं श्लक्ष्णया वाचा सान्त्वयन्निदमब्रवीत् ॥ २९॥

1. घ—दृष्ट्वाऽत्र क्षमान्वितम्। 2. अ—नास्तीतः अर्धचतुष्टयम्

श्रीभगवान्—

यादृशेनैव रूपेण योग्यं दातुमनेन वै ।
तादृशं खलु ते दत्तं त्वं तु तन्नावबुध्यसे ॥ ३०॥
मया त्वदर्थमुक्तो हि वज्रपाणिः पुरन्दरः ।
उदङ्कायामृतं देहि तोयरूपमिति प्रभुः ॥ ३१॥
स मामुवाच देवेन्द्रो न मर्त्योऽमर्त्यतां व्रजेत् ।
अन्यमस्मै वरं देहीत्यसकृद् भृगुनन्दन ॥ ३२॥
अमृतं देयमित्येव मयोक्तस्स शचीपतिः ।
स मां प्रसाद्य देवेन्द्रः पुनरेवेदमब्रवीत् ॥ ३३॥

देवेन्द्रः—

यदि देयमवश्यं चेन्मातङ्गोऽहं महाद्युते ।
भूत्वाऽमृतं प्रदास्यामि भार्गवाय महात्मने ॥ ३४॥
यद्येतत् प्रतिगृह्णाति भार्गवोऽमृतमद्य वै ।
प्रदातुमेष गच्छामि भार्गवायामृतं विभो ॥ ३५॥
प्रत्याख्यातस्त्वहं तेन न दास्यामीति भार्गव ॥ ३६

श्रीभगवान्—

स तथा [1]समयं कृत्वा तेन रूपेण वासवः ।
उपस्थितस्त्वया चापि प्रत्याख्यातोऽमृतं ददत् ॥ ३७
चाण्डालरूपी भगवान् सुमहांस्ते व्यतिक्रमः ॥ ३७॥
यत्तु शक्यं मया कर्तुं भूय एव तवेप्सितम् ।

1. क-ख—तेन रूपेण वासवस्समुपस्थितः ।

तोयेप्सां तव दुर्धर्षां करिष्ये सफलामहम् ॥ ३८॥
येष्वहस्सु तव ब्रह्मन् सलिलेप्सा भविष्यति ।
तदा मरौ भविष्यन्ति जलपूर्णाः पयोधराः ॥ ३९॥
रसवच्च प्रदास्यन्ति तोयं ते भृगुनन्दन ।
उदङ्कमेघा इत्युक्ताः ख्यातिं यास्यन्ति चापि ते ॥ ४०॥

वैशम्पायनः—

इत्युक्तः प्रीतिमान् विप्रः कृष्णेन स बभूव ह ।
अद्याप्युदङ्कमेघाश्च मरौ [1]वर्षन्ति भारत ॥ ४१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥
[ अस्मिन्नध्याये ४१॥ श्लोकाः ]

## ॥ एकोनषष्टितमोऽध्यायः ॥

वैशम्पायनेन जनमेजयं प्रत्युदङ्कोपाख्यानकथनारम्भः ॥ १॥ उदङ्क-कृतपरिचर्याविशेषतुष्टेन गौतमेन तस्मै प्रीत्यतिशयेन चिरादपि गृहगमनायानुज्ञानम् ॥ २॥ कदाचन गुरुशासनेन काष्ठभारमाहृतवतोदङ्केन काष्ठलग्नजरापलितनिजकेशावलोकनेन परिदेवनम् ॥ ३ ॥ ततस्तदवबोधितनिजरोदनहेतुना गुरुणा तस्मै निजतनयाप्रतिपादनम् ॥ ४ ॥ ततस्तेन गुरुपत्नीनिदेशेन कुण्डलयाचनाय सौदासं प्रति गमनम् ॥ ५ ॥

जनमेजयः—

उदङ्कः केन तपसा संयुक्तस्स महातपाः ।
यश्शापं दातुकामोऽभूद् विष्णवे प्रभविष्णवे ॥ १

1. क-ख—वर्तन्ति ।

वैशम्पायनः—

उदङ्को महता युक्तस् तपसा जनमेजय ।
गुरुभक्तस्स तेजस्वी नान्यत् किञ्चिदपूजयत् ॥ २

सर्वेषामृषिपुत्राणाम् एष चासीन्मनोरथः ।
औदङ्कीं गुरुवृत्तिं वै प्राप्नुयामेति भारत ॥ ३

गौतमस्य तु [1]शिष्याणां बहूनां जनमेजय ।
उदङ्केऽभ्यधिका प्रीतिस् स्नेहश्चैवाभवत् तदा ॥ ४

स तस्य दमशौचाभ्यां [2]विक्रान्तेन च कर्मणा ।
सम्यक् चैवोपचारेण गौतमः प्रीतिमानभूत् ॥ ५

अथ शिष्यसहस्राणि समनुज्ञाय गौतमः ।
उदङ्कं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत ॥ ६

तं क्रमेण जरा तात परिरेभे महामुनिम् ।
न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः ॥ ७

ततः कदाचिद्राजेन्द्र काष्ठान्यानयितुं ययौ ।
उदङ्कः काष्ठभारं तु महान्तं समुपानयत् ॥ ८

स तद्भाराभिभूतात्मा काष्ठभारमरिन्दम ।
निष्पिपेष क्षितौ राजन् परिश्रान्तो बुभुक्षितः ॥ ९

तस्य काष्ठे विलग्नाऽभूज् जटा रूप्यसमप्रभा ।

---

1. क-ख-घ—पुत्राणां । 2. क-ख—विज्ञातेन च ।

ततः काष्ठैस्सह तदा पपात धरणीतले ॥ १०

ततस्स भारनिष्पिष्टः [1]क्षुधाविष्टश्च भार्गवः ।
दृष्ट्वा तां वयसोऽवस्थां रुरोदार्तस्वरं तदा ॥ ११

ततो गुरुसुता तस्य पद्मपत्रायतेक्षणा ।
जग्राहाश्रूणि सुश्रोणी तपोयुक्तस्य धीमतः ॥ १२
पितुर्नियोगाद्धर्मज्ञा शिरसाऽवनता तदा ॥ १२॥

तस्या [2]निपेततुर्दग्धौ करौ तैरश्रुबिन्दुभिः ।
न हि तानश्रुपातान् वै शक्ता धारयितुं मही ॥ १३॥
गौतमस्त्वब्रवीद्विप्रम् उदङ्कं [3]प्रीतमानसः ॥ १४

गौतमः—

कस्मात् तात तवाद्येह शोकोत्तरमिदं मनः ।
स स्वैरं ब्रूहि विप्रर्षे श्रोतुमिच्छामि ते वचः ॥ १५

उदङ्कः—

भवद्व्रतेन मनसा भवत्प्रियचिकीर्षया ।
भवद्भक्तिगतेनेह भवद्भावानुगेन च ॥ १६
जरेयं नावबुद्धा मे नाभिज्ञातं सुखं च मे ।
शतवर्षोषितं हि त्वं न मामभ्यनुजज्ञिवान् ॥ १७
भवता ह्यभ्यनुज्ञाताश् शिष्याः प्रत्यवरा मम ।

---

1. क-ख—क्षुधार्तस्स भृगूद्वहः ।
2. क-ख—निपेतुर्निर्दग्धौ करौ तस्या ।
3. क-घ—विप्रसत्तमः । ख—मुनिसत्तमः ।

उपपन्ना द्विजश्रेष्ठ शतशोऽथ सहस्रशः ॥ १८

गौतमः—

त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव ।
व्यतिक्रामन्महान् कालो नावबुद्धो द्विजर्षभ ॥ १९

किं त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव ।
अनुज्ञां प्राप्य मत्तस्त्वं स्वगृहान् गच्छ मा चिरम् ॥ २०

उदङ्कः—

गुर्वर्थं किं प्रयच्छामि ब्रूहि त्वं द्विजसत्तम ।
किमुपाहृत्य गच्छेयम् अनुज्ञातस्त्वया विभो ॥ २१

गौतमः—

दक्षिणा परितोषो वै गुरूणां सद्भिरुच्यते ।
तव ह्याचरतो धर्मं तुष्टोऽहं वै न संशयः ॥ २२

इत्थं हि परितुष्टं मां विजानीहि भृगूद्वह ॥ २२॥

युवा षोडशवर्षो हि तदद्य त्वं भविष्यसि ।
ददानि पत्नीं कन्यां च स्वां ते दुहितरं द्विज ॥ २३॥

एतामृते हि नान्या वै त्वत्तेजोऽर्हति सेवितुम् ॥ २४

वैशम्पायनः—

ततस्तां प्रतिजग्राह युवा भूत्वा तपस्विनीम् ।
गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत् ॥ २५

उदङ्कः—

किं भवत्यै प्रयच्छामि गुर्वर्थं विनियुङ्क्ष्व माम् ।
प्रियं हि तव काङ्क्षामि प्राणैरपि धनैरपि ॥ २६

यद्दुर्लभं हि लोकेऽस्मिन् रत्नमत्यद्भुतं भवेत् ।
तदानयेयं तपसा न हि मेऽत्रास्ति संशयः ॥ २७

अहल्या—

[1]परितुष्टाऽस्मि ते विप्र नित्यं भगवता सह ।
पर्याप्तमेतद्भद्रं ते गच्छ तात यथेप्सितम् ॥ २८

वैशम्पायनः—

उदङ्कस्तु महाराज पुनरेवाब्रवीद्वचः ॥ २८॥

उदङ्कः—

आज्ञापयस्व मां मातः किं कर्तव्यं प्रियं तव ॥ २९

अहल्या—

सौदासपत्न्या विधृते दिव्ये ये मणिकुण्डले ।
ते ममानय भद्रं ते गुर्वर्थस्स कृतो भवेत् ॥ ३०

वैशम्पायनः—

स तथेति प्रतिश्रुत्य जगाम जनमेजय ।
गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा ॥ ३१

स जगाम ततश्शीघ्रम् उदङ्को ब्राह्मणर्षभः ।

---

1. क-ख-घ—इतः श्लोकद्वयं नास्ति

सौदासं पुरुषादं वै भिक्षितुं मणिकुण्डले ॥ ३२
गौतमस्त्वब्रवीत् पत्नीम् उदङ्को नात्र दृश्यते ।
इति पृष्ट्वा तमाचष्ट कुण्डलार्थं गतं तु वै ॥ ३३
ततः प्रोवाच पत्नीं स न ते सम्यगिदं कृतम् ।
शप्तस्स पार्थिवो नूनं ब्राह्मणं तं हनिष्यति ॥ ३४

अहल्या—

अजानन्त्या नियुक्तस्स भगवन् ब्राह्मणोऽद्य वै ।
भवत्प्रसादान्न भयं किञ्चित् तस्य भविष्यति ॥ ३५

वैशम्पायनः—

इत्युक्तः प्राह तां पत्नीम् एवमस्त्विति गौतमः ।
उदङ्कोऽपि वने शून्ये राजानं तं ददर्श ह ॥ ३६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
[ अस्मिन्नध्याये ३६ श्लोकाः ]

## ॥ षष्टितमोऽध्यायः ॥

शापाद्राक्षसत्वं गतेन सौदासेनोदङ्कभक्षणोद्यमे उदङ्केन पुनः प्रत्यागमनप्रतिज्ञापूर्वकं तं प्रति कुण्डलयाचनम् ॥ १ ॥ उदङ्केन सौदासवचसा तत्पत्नीं प्रति कुण्डलयाचने तया तं प्रति मणिकुण्डलमहिमादिकथनपूर्वकं राजाभिज्ञानानयनचोदना ॥ २ ॥

वैशम्पायनः—

स तं दृष्ट्वा तथाभूतं राजानं घोरदर्शनम् ।
दीर्घश्मश्रुधरं नृणां शोणितेन समुक्षितम् ॥ १

चकार न व्यथां विप्रो राजा त्वेनमथाब्रवीत् ।
प्रत्युत्थाय महातेजा भयकर्ता यमोपमः ॥ २

सौदासः—

दिष्ट्या त्वमसि कल्याण षष्ठे काले ममान्तिकम् ।
भक्ष्यं मृगयमाणस्य सम्प्राप्तो द्विजसत्तम ॥ ३
[1]न च शक्यस्त्वमुत्सृष्टुं क्षुधितस्य ममाद्य वै ॥ ३॥

उदङ्कः—

[2]राजन् गुर्वर्थिनं विद्धि चरन्तं मामिहागतम् ।
न च गुर्वर्थमुद्युक्तं हिंस्यमाहुर्मनीषिणः ॥ ४॥

सौदासः—

षष्ठे काले ममाहारो विहितो द्विजसत्तम ।
न शक्यस्त्वं समुत्सृष्टुं क्षुधितेन मयाऽद्य वै ॥ ५॥

उदङ्कः—

एवमस्तु महाराज समयः क्रियतां तु वै ।
गुर्वर्थमभिनिर्वर्त्य पुनरेष्यामि ते वशम् ॥ ६॥
[3]संश्रुतश्च मया योऽर्थो गुरवे राजसत्तम ।
त्वदधीनस्स राजेन्द्र तं त्वा भिक्षे नरेश्वर ॥ ७॥
[4]ददासि विप्रमुख्येभ्यस् त्वं हि रत्नानि नित्यदा ।

1. क-ख-घ—नास्तीदमर्धम्
2. अ—श्लोकद्वयं न दृश्यते ।
3. ख—अयं श्लोको नास्ति
4. अ—अर्धपञ्चकं नास्ति

दाता च त्वं नरव्याघ्र पात्रभूतः क्षितावहम् ॥ ८॥
पात्रं प्रतिग्रहे चापि विद्धि मां नृपसत्तम ॥ ९
उपाहृत्य गुरोरर्थं त्वदायत्तमरिन्दम ।
समयेनेह राजेन्द्र पुनरेष्यामि ते वशम् ॥ १०
सत्यं ते प्रतिजानामि नात्र मिथ्या कथञ्चन ।
अनृतं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यथा ॥ ११

सौदासः—

यद्यस्मासु तवायत्तो गुर्वर्थः कृत एव सः ।
यदि चास्ति प्रतिग्राह्यं साम्प्रतं तद्ब्रवीहि मे ॥ १२

उदङ्कः—

प्रतिग्राह्यो वरो मे त्वं सदैव पुरुषर्षभ ।
सोऽहं त्वामनु सम्प्राप्तो भिक्षितुं मणिकुण्डले ॥ १३

सौदासः—

पत्न्यास्त्वं मम विप्रर्षे रुचिरे मणिकुण्डले ।
वरयस्वेदमन्यन्मे तं ते दास्यामि सुव्रत ॥ १४

उदङ्कः—

अलं ते व्यपदेशेन प्रमाणं यदि ते वयम् ।
प्रयच्छ कुण्डले मे त्वं सत्यवाग् भव वै विभो ॥ १५

वैशम्पायनः—

[1]इत्युक्तस्त्वब्रवीद्राजा तमुदङ्कं वचस्तदा ॥ १५॥

1. अ—अर्धाष्टकं नास्ति

सौदासः—
गच्छ मद्वचनाद्देवीं ब्रूहि देहीति सत्तम ॥ १६
सैवमुक्ता त्वया नूनं मद्वाक्येन शुचिव्रता ।
[1]प्रदास्यति द्विजश्रेष्ठ कुण्डले ते न संशयः ॥ १७

उदङ्कः—
क्व पत्नी भवतश्शक्या मया द्रष्टुं नरेश्वर ।
स्वयं वाऽपि भवान् पत्नीं किमर्थं नोपसर्पति ॥ १८

सौदासः—
द्रक्ष्यते भवता साऽद्य कस्मिंश्चिद्वननिर्झरे ।
षष्ठे काले न हि मया सा शक्या द्रष्टुमद्य वै ॥ १९

वैशम्पायनः—
उदङ्कस्तु तथेत्युक्त्वा जगाम भरतर्षभ ।
[2]मदयन्तीं च तां दृष्ट्वा [3]ज्ञापयत् स्वं प्रयोजनम् ॥ २०
सौदासवचनं श्रुत्वा ततस्सा पृथुलोचना ।
प्रत्युवाच महाबुद्धिम् उदङ्कं जनमेजय ॥ २१

मदयन्ती—
एवमेतन्महाब्रह्मन् नानृतं भाषसेऽनघ ।
अभिज्ञानं तु किञ्चिन्मे त्वमानेतुमिहार्हसि ॥ २२
इमे हि दिव्ये मणिकुण्डले शुभे
देवाश्च यक्षाश्च महोरगाश्च ।

1. ब—अर्धत्रयं नास्ति
2. क—कोशे सर्वत्र दमयन्ती इति वर्तते ।

तैस्तैरुपायैरपहर्तुकामाश्
छिद्रेषु नित्यं परितर्कयन्ते ॥ २३
निक्षिप्तमेतद्भुवि पन्नगास्तु
रत्नं समासाद्य परामृशेयुः ।
यक्षास्तथोच्छिष्टधृतं सुराश्च
निद्रावशं त्वां परिधर्षयेयुः ॥ २४
छिद्रेष्वेतेषु च सदा धृष्यसे च द्विजर्षभ ।
देवराक्षसयक्षाणाम् अप्रमत्तेन धार्यते ॥ २५
एते दिवाऽपि भासेते रात्रौ च द्विजसत्तम।
नक्तं नक्षत्रतारााणां प्रभामाक्षिप्य वर्तते ॥ २६
एते ह्यामुच्य भगवन् क्षुत्पिपासाभयं कुतः ।
विषाग्निश्वापदेभ्यश्च भयं जातु न विद्यते ॥ २७
ह्रस्वेन चैते आमुक्ते भवतो ह्रस्वके सदा ।
अनुरूपेण चामुक्ते तत्प्रमाणे [1]तथैव ते ॥ २८
एवंविधे ममाप्येते कुण्डले परमार्चिते ।
त्रिषु लोकेषु विख्याते तदभिज्ञानमानय ॥ २९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
[ अस्मिन्नध्याये २९ श्लोकाः ]

---

1. अ-ब—ऽभिजायते ।

## ॥ एकषष्टितमोऽध्यायः ॥

उदङ्केनाभिज्ञाननिवेदनेन मदयन्तीतः कुण्डलग्रहणपूर्वकं प्रतिनिवर्तनम् ॥ १ ॥ मध्येमार्गं क्षुधाविष्टेन तेन बिल्वतरुमारुह्य शाखायां कुण्डलासञ्जनपूर्वकं फलपातनाय शाखाचालनम् ॥ २ ॥ तत्र पतत्फलघट्टनेन कुण्डलयोरधःपतने केनचिदुरगवरेण तदपहृत्य नागलोकगमनम् ॥ ३ ॥ तत इन्द्रसाहाय्याद्भूविदारणेन नागलोकं गतेनोदङ्केन तत्साश्ववचसा तदपानदेशधमने तन्निर्गतधूमपटलनिरुद्धैः सर्पैरुदङ्काय कुण्डलप्रत्यर्पणम् ॥ ४ ॥ तत उदङ्केन गुरुपत्न्यै कुण्डलप्रदानम् ॥ ५ ॥

---

वैशम्पायनः—

स मित्रसहमासाद्य त्वभिज्ञानमयाचत ।
तस्मै ददावभिज्ञानं स चेक्ष्वाकुवरस्तदा ॥ १

सौदासः—

न चैवैषा गतिः क्षेम्या न चान्या विद्यते गतिः ।
एतन्मतं ममाज्ञाय प्रयच्छ मणिकुण्डले ॥ २

वैशम्पायनः—

इत्युक्तस्तामुदङ्कस्तु भर्तुर्वाक्यमथाब्रवीत् ।
श्रुत्वा तु सा ततः प्रादात् तस्मै ते मणिकुण्डले ॥ ३
अवाप्य कुण्डले ते तु राजानं पुनरब्रवीत् ॥ ३॥

उदङ्कः—

किमेतद्ब्रूह्यवचनं श्रोतुमिच्छामि ते वचः ॥ ४

सौदासः—

प्रजातिसर्गाद्विप्रान् वै क्षत्रियाः पूजयन्ति ह ।
विप्रेभ्यश्चापि बहवो दोषाः प्रादुर्भवन्ति नः ॥ ५

सोऽहं द्विजेभ्यः प्रणतो विप्राद्दोषमवाप्तवान् ।
गतिमन्यां न पश्यामि मदयन्तीसहायवान् ॥ ६

न चान्यामपि पश्यामि गतिं गतिमतां वर ।
स्वर्गद्वारस्य गमने स्थाने चेह द्विजोत्तम ॥ ७

न हि राज्ञा विशेषेण विरुद्धेन द्विजातिभिः ।
शक्यं त्रिलोके संस्थातुं प्रेत्य वा सुखमेधितुम् ॥ ८

तदिष्टेन मयैवैते दत्ते स्वे मणिकुण्डले ।
यः कृतस्तेऽद्य समयस् सफलं तं कुरुष्व मे ॥ ९

उदङ्कः—

राजंस्तथैव कर्तास्मि पुनरेष्यामि ते वशम् ।
प्रश्नं च कञ्चित् प्रष्टुं त्वां व्यवसिष्ये परन्तप ॥ १०

सौदासः—

ब्रूहि विप्र यथाकामं प्रतिवक्तास्मि ते वचः ।
छेत्तास्मि संशयं तेऽहं न मेऽत्रास्ति विचारणा ॥ ११

उदङ्कः—

प्राहुर्वाक्सङ्गमं मित्रं धर्मनैपुण्यदर्शिनः ।
मित्रेषु यश्च विषमस् स्तेन इत्येव तं विदुः ॥ १२

स भवान् मित्रतामद्य सम्प्राप्तो मम पार्थिव ।
स मे बुद्धिं प्रयच्छ त्वं युक्तां बुद्धिमतां वर ॥ १३

अवाप्तार्थोऽहमद्यास्मि भवांश्च पुरुषादकः ।
भवत्सकाशमागन्तुं क्षमं मम न वेति वै ॥ १४

सौदासः—

समं चेदिह वक्तव्यं मया द्विजवरोत्तम ।
मत्समीपं द्विजश्रेष्ठ [1]नागन्तव्यं कथञ्चन ॥ १५

तवैव तु प्रपश्यामि श्रेयो भृगुकुलोद्वह ।
[2]आगच्छतो हि ते विप्र भवेन्मृत्युरसंशयः ॥ १६

वैशम्पायनः—

इत्युक्तस्स तदा राज्ञा क्षमं बुद्धिसमाहितम् ।
समनुज्ञाप्य राजानम् अहल्यां प्रति जग्मिवान् ॥ १७

गृहीत्वा कुण्डले दिव्ये गुरुपत्न्याः प्रियङ्करः ।
जवेन महता प्रायाद् गौतमस्याश्रमं प्रति ॥ १८

यथा तथा रक्षणं च मदयन्त्याऽभिभाषितम् ।
तथा ते कुण्डले बद्ध्वा तदा कृष्णाजिनेन तत् ॥ १९

स कस्मिंश्चित् क्षुधाऽऽविष्टः फलभारावनामितम् ।
बिल्वं ददर्श तस्मिंश्चाप्यारुरोह क्षुधाऽन्वितः ॥ २०

---

1. क-ख—न गन्तव्यं ।
2. क-घ—आगन्तव्यं । ख—अगन्तव्यं ।

शाखास्वासज्य तस्यैव कृष्णाजिनमरिन्दम ॥ २०॥
यस्मिंस्ते कुण्डले बद्धे तदा द्विजवरेण वै ।
विशीर्णबन्धने तस्मिन् गते कृष्णाजिने महीम् ॥ २१॥
अपश्यद्भुजगः कश्चित् ते तत्र मणिकुण्डले ॥ २२
ऐरावतकुलोद्भूतश् शीघ्रो भूत्वा तदा स वै ।
विगृह्यास्येन वल्मीकं विवेशाथ सकुण्डलः ॥ २३
ह्रियमाणे स दृष्ट्वा तु कुण्डले पन्नगेन तु ।
पपात वृक्षात् सोद्वेगो दुःखात् परमकोपनः ॥ २४
स दण्डकाष्ठमादाय वल्मीकं न्यखनत् तदा ।
[1]अहानि त्रिंशदव्यग्रः पञ्च चान्यानि भारत ॥ २५
क्रोधामर्षाभितप्ताङ्गस् ततो वै द्विजसत्तमः ॥ २५॥
तस्य वेगमसह्यं तम् असहन्ती वसुन्धरा ।
दण्डकाष्ठाभिनुन्नाङ्गी चचाल भृशमातुरा ॥ २६॥
ततः खनत एवास्य विप्रर्षेर्धरणीतलम् ।
नागलोकस्य पन्थानं कामयानस्य निश्चयात् ॥ २७॥
रथेन हरियुक्तेन तं देशमभिजग्मिवान् ।
वज्रपाणिर्महातेजा ददर्शाथ द्विजोत्तमम् ॥ २८॥
स तत्र ब्राह्मणो भूत्वा तस्य दुःखेन दुःखितः ।

1. क-ख—नास्तीदमर्धम्

उदङ्कमब्रवीत् तात नैतच्छक्यं त्वयेति वै ॥ २९॥

इतोऽस्ति नागलोको वै योजनानि सहस्रशः ।
न दण्डकाष्ठसाध्यं च मन्ये कार्यमिदं तव ॥ ३०॥

उदङ्कः—

नागलोकाद्यदि ब्रह्मन् न शक्ये कुण्डले मया ।
प्राप्तुं प्राणान् विमोक्ष्यामि पश्यतस्ते द्विजोत्तम ॥ ३१॥

वैशम्पायनः—

यदा स नाशकत् तस्य निश्चयं कर्तुमन्यथा ।
वज्रपाणिस्तदा दण्डं वज्रास्त्रेण युयोज ह ॥ ३२॥

ततो वज्रप्रहारैस्तैर् दार्यमाणा वसुन्धरा ।
नागलोकस्य पन्थानम् अकरोज्जनमेजय ॥ ३३॥

स तेन मार्गेण तदा नागलोकं विवेश ह ॥ ३४
ददर्श नागलोकं च योजनानि सहस्रशः ॥ ३४॥

प्राकारनिचयैर्दिव्यैर् मणिमुक्ताद्यलङ्कृतैः ।
[1]उपपन्नं महाभाग शतकुम्भमयैस्तथा ॥ ३४॥

वापीस्स्फटिक[2]सोपाना नदीश्च विमलोदकाः ।
ददर्श वृक्षांश्च बहून् नानाद्विजगणायुतान् ॥ ३६॥

नागलोकस्य विवरं स ददर्श भृगूद्वहः ।

---

1. अ—शातकुम्भमयैश्चैव राजतैश्च सहस्रशः ॥ [ अधिकः पाठः]
2. क-ख-घ—सङ्काशास् सोपानविमलोदकाः ।

पञ्चयोजनविस्तारम् आयतं [1]शतयोजनम् ॥ ३७॥

नागलोकमुदङ्कस्तु प्रेक्ष्य दीनोऽभवत् तदा ।
निराशश्चाभवत् तत्र कुण्डलाहरणे ततः ॥ ३८॥

तत्र प्रोवाच तुरगस् तं कृष्णश्वेतवालधिः ।
ताम्रास्यनेत्रः कौरव्य प्रज्वलन्निव तेजसा ॥ ३९॥

अश्वः—
धम ह्यपानमेतन्मे ततस्त्वं विप्र लप्स्यसे ।
ऐरावतसुतेनेह तवानीते हि कुण्डले ॥ ४०॥

मा जुगुप्सां कृथाः पुत्र त्वमत्रार्थे कथञ्चन ।
आसेवितस्त्वयैतद्धि गौतमस्याश्रमे तदा ॥ ४१॥

उदङ्कः—
कथं भवन्तं जानीयाम् उपाध्यायाश्रमं प्रति ।
तन्मया चीर्णपूर्वं च श्रोतुमिच्छामि तत्त्वतः ॥ ४२॥

अश्वः—
गुरोर्गुरुं मां जानीहि ज्वलितं जातवेदसम् ॥ ४३

त्वया ह्यहं सदा वत्स गुरोरर्थे तपोधन ।
सततं पूजितो विप्र शुचिना भृगुसत्तम ॥ ४४
ततश्श्रेयो विधास्यामि तवैव कुरु मा चिरम् ॥ ४४॥

वैशम्पायनः—
इत्युक्तस्स तथाऽकार्षीद् उदङ्कश्चित्रभानुना ।

---

1. क-ख-घ—दश।

घृतार्चिः प्रीतिमांश्चापि प्रजज्वाल दिधक्षया ॥ ४५॥

ततोऽस्य रोमकूपेभ्यो ध्मायमानस्य भारत ।
घनः प्रादुरभूद्धूमो नागलोकभयावहः ॥ ४६॥

तेन धूमेन सहसा वर्धमानेन भारत ।
नागलोके महाराज न प्राज्ञायत किञ्चन ॥ ४७॥

हाहाकृतमभूत् सर्वम् ऐरावतनिवेशनम् ।
वासुकिप्रमुखानां च नागानां जनमेजय ॥ ४८॥

न प्राकाशन्त वेश्मानि धूमरुद्धानि सर्वशः ।
नीहारसंवृतानीव वनानि गिरयस्तदा ॥ ४९॥

ते धूमरक्तनयना वह्नितेजोभितापिताः ।
आजग्मुर्निश्चयं ज्ञातुं भार्गवस्यातितेजसः ॥ ५०॥

श्रुत्वा तु निश्चयं तस्य महर्षेस्तिग्मतेजसः ।
सम्भ्रान्तमनसस्सर्वे पूजां चक्रुर्यथाविधि ॥ ५१॥

सर्वे प्राञ्जलयो नागा बालवृद्धपुरोगमाः ।
शिरोभिः प्रणिपत्योचुः प्रसीद भगवन्निति ॥ ५२॥

प्रसाद्य ब्राह्मणं ते तु पाद्यमर्घ्यं निवेद्य च ।
प्रायच्छत् कुण्डले दिव्ये [1]पन्नगाः परमार्चिते ॥ ५३॥

[2]ततस्स पूजितो नागैस् तदोदङ्कः प्रतापवान् ।

1. अ—गुरुपत्न्यै तवानघ। 2. अ—अर्धचतुष्टयं नास्ति

अग्निं प्रदक्षिणं कृत्वा जगाम गुरुसद्म तत् ॥ ५४॥

स गत्वा त्वरितो राजन् गौतमस्य निवेशनम् ।
प्रायच्छत् कुण्डले दिव्ये गुरुपत्न्यास्तदाऽनघ ॥ ५५॥

एवं लोकद्वयं तेन विप्रेण जनमेजय ।
परिक्रम्याहृते दिव्ये ततस्ते मणिकुण्डले ॥ ५६॥

एवंप्रभावस्स मुनिर् उदङ्को भरतर्षभ ।
[1]परेण तपसा युक्तो यन्मां त्वं परिपृच्छसि ॥ ५७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥

॥ ५२ ॥ अनुगीतापर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

[ अस्मिन्नध्याये ५७॥ श्लोकाः ]

---

## ॥ द्विषष्टितमोऽध्यायः ॥

उदङ्काय वरदानात् परं द्वारकामागच्छता कृष्णेन मध्ये रैवतकप्रवेशः ॥ १ ॥ रैवतकोत्सववर्णनम् ॥ २॥ ततः कृष्णेन स्वभवनमेत्य मातापित्रोरभिवादनम् ॥ ३ ॥

---

जनमेजयः—

उदङ्काय वरं दत्त्वा गोविन्दो द्विजसत्तम ।
अत ऊर्ध्वं महाबाहुः किं चकार महायशाः ॥ १

1. अ—इदमर्धं नास्ति

वैशम्पायनः—

[1]दत्त्वा वरमुदङ्काय प्रायात् सात्यकिना सह ।
द्वारकामेव गोविन्दश् शीघ्रवेगैर्हयोत्तमैः ॥ २

स सरांसि नदीश्चैव वनानि विविधानि च ।
अतिक्रम्याससादाथ रम्यां द्वारवतीं पुरीम् ॥ ३

वर्तमाने महाराज महे रैवतकस्य तु ।
उपायात् पुण्डरीकाक्षो युयुधानानुगस्तथा ॥ ४

अलङ्कृतस्तु स गिरिर् नानारूपैर्विचित्रकैः ।
बभौ रुक्ममयैः कोशैस् सर्वत्र पुरुषर्षभ ॥ ५

काञ्चनस्रग्भिरव्याभिस् सुमनोभिस्तथैव च ।
वासोभिश्च महाशैलः कल्पवृक्षैश्च सर्वशः ॥ ६

दीपवृक्षैश्च सौवर्णैर् अभीक्ष्णमभिशोभितः ।
गुहानिर्झरभागेषु दीपभूतो बभूव ह ॥ ७

पताकाभिश्च चित्राभिः सङ्घट्टाभिस्समन्ततः ।
पुंभिस्स्त्रीभिश्च सम्पूर्णः प्रगीत इव चाभवत् ॥ ८

अतीव प्रेक्षणीयोऽभू[2]न्मेरुर्मुनिगणैरिव ॥ ८॥

मत्तानां हृष्टरूपाणां स्त्रीणां पुंसां च भारत ।

---

1. घ—इतः श्लोकद्वयं नास्ति
2. घ—न्मेरुः स्वर । क-ख—न्मरुत्सुरगणैरिव ।

गायतां पर्वतेन्द्रस्य दिविस्पृगिव निस्स्वनः ॥ ९॥

[1]मत्तप्रमत्तसम्मत्तक्ष्वेडिताकृष्टसङ्कुलः ॥ १०

तथा किलकिलाशब्दैर् भूरभूत् सुमनोरमा ॥ १०॥

[2]विपणापणवान् रम्यो भक्ष्यभोज्यविहारवान् ।

वस्त्रमाल्योत्करयुतो वीणावेणुमृदङ्गवान् ॥ ११॥

सुरामैरेयमिश्रेण भक्ष्यभोज्येन चैव हि ।

दीनान्धकृपणादिभ्यो दीयमानेन चानिशम् ॥ १२॥

बभौ परमकल्याणो महस्तस्य महागिरेः ॥ १३

पुण्यावसथवान् वीरैः पुण्यकृद्भिर्निषेवितः ।

विहारो वृष्णिवीराणां बभौ रैवतकस्य च ॥ १४

स तथा वेश्मसङ्कीर्णो देवलोक इवाबभौ ।

तदा च कृष्ण[3]सान्निध्यान्मुदा देवगणैर्युतः ॥ १५

स्तुवन्त्यन्तर्हिता देवा गन्धर्वाश्च सहर्षिभिः ॥ १५॥

देवगन्धर्वाः—

साधकस्सर्वधर्माणाम् असुराणां विनाशकः ।

त्वं स्रष्टा सृज्यमाधारं कारणं धर्मवेदवित् ॥ १६॥

---

1. क-ख—प्रमत्तमत्तसम्मत्तक्ष्वेलितोत्कृष्टसङ्कुला ।
2. अ—अर्धचतुष्टयं नास्ति
3. क-ख-घ—सान्निध्यमासाद्य भरतर्षभ ।

त्वया [1]यत् क्रियते देव न जानीमोऽत्र मायया ॥ १७

केवलं त्वाऽभिजानीमश् शरणं परमेश्वरम् ।
ब्रह्मादीनां च गोविन्द सान्निध्यं शरणं नमः ॥ १८

वैशम्पायनः—

इति स्तुते मानुषैश्च पूजिते देवकीसुते ।
[2]शक्रसद्मप्रतीकाशो बभूव स हि शैलराट् ॥ १९

ततस्सम्पूज्यमानस्स विवेश भवनं शुभम् ।
गोविन्दस्सात्यकिश्चापि जग्मतुर्भवनं [3]स्वकम् ॥ २०

विवेश च स हृष्टात्मा चिरकालप्रवासकः ।
कृत्वा नसुकरं कर्म दानवेष्विव वासवः ॥ २१

उपायान्तं तु वार्ष्णेयं भोजवृष्ण्यन्धकास्तदा ।
अभ्यगच्छन्महात्मानं देवा इव शतक्रतुम् ॥ २२

स तानभ्यर्च्य मेधावी पृष्ट्वा च कुशलं तदा ।
अभ्यवादयत प्रीतः पितरं मातरं तदा ॥ २३

ताभ्यां च सम्परिष्वक्तस् सान्त्वितस्स महाभुजः ।
उपोपविष्टस्तैस्सर्वैर् वृष्णिभिः परिवारितः ॥ २४

1. क-ख—ऽयं क्रियते
2. क-ख-घ—नास्तीदमर्धद्वयम् ।
3. क-ख—शुभम् ।

स विश्रान्तो महातेजाः कृतपादावसेचनः ।
कथयामास तं कृत्स्नं पृष्टः पित्रा महाहवम् ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥
॥ ९२ ॥ अनुगीतापर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
[ अस्मिन्नध्याये २५ श्लोकाः ]

## ॥ त्रिषष्टितमोऽध्यायः ॥

कृष्णेन वसुदेवादीन् प्रति कुरुपाण्डवयुद्धप्रकारकथनम् ॥ १ ॥

वसुदेवः—

श्रुतवानस्मि वार्ष्णेय सङ्ग्रामं परमाद्भुतम् ।
नराणां वदतां पुत्र कथोद्घातेषु नित्यशः ॥ १

त्वं तु प्रत्यक्षदर्शी च कार्यज्ञश्च महाभुज ।
तस्मात् प्रब्रूहि सङ्ग्रामं याथातथ्येन मेऽनघ ॥ २

कथं तदभवद्युद्धं पाण्डवानां महात्मनाम् ।
भीष्मकर्णकृपद्रोणशल्यादिभिरनुत्तमम् ॥ ३

अन्येषां क्षत्रियाणां च कृतास्त्राणामनेकशः ।
नानावेषाकृतिमतां नानादेशनिवासिनाम् ॥ ४

वैशम्पायनः—

इत्युक्तः पुण्डरीकाक्षः पित्रा मातुस्तथाऽन्तिके ।
शशंस कुरुवीराणां सङ्ग्रामे निधनं यथा ॥ ५

श्रीभगवान्—

अत्यद्भुतानि कर्माणि क्षत्रियाणां महात्मनाम् ।
बहुलत्वान्न सङ्ख्यातुं [1]शक्योन्यैरदगणैरपि ॥ ६

प्राधान्यतस्तु गदतस् समासेनैव मे शृणु ।
कर्माणि कुरुवीराणां यथावदमरद्युते ॥ ७

भीष्मस्सेनापतिरभूद् एकादशचमूपतिः ।
कौरव्यः कौरवेयाणां देवानामिव पावकिः ॥ ८

शिखण्डी पाण्डुपुत्राणां नेता सप्तचमूपतिः ।
बभूव रक्षितो नित्यं धीमता सव्यसाचिना ॥ ९

[2]तेषां तदभवद्युद्धं दशाहानि महात्मनाम् ।
कुरूणां पाण्डवेयानां सुमहद्रोमहर्षणम् ॥ १०

[3]अयुध्यमानं गाङ्गेयं शिखण्डी तं महाद्युतिम् ।
जघान बहुभिर्बाणैस् सह गाण्डीवधन्वना ॥ ११

अकरोत् स ततः कालं शरतल्पगतो मुनिः ।

---

1. ख—शक्यं नाब्दगणैरपि । अ-घ—शक्योवर्षशतैरपि ।
2. घ—इतः श्लोकद्वयं नास्ति
3. अ-घ—ततश्शिखण्डी गाङ्गेयं अयुध्यत महाहवे । [अधिकः पाठः]

अयनं दक्षिणं हित्वा सम्प्राप्ते चोत्तरायणे ॥ १२
ततस्सेनापतिरभूद् द्रोणो ब्रह्मविदां वरः ।
विप्रेन्द्रः कौरवेन्द्रस्य काव्यो दैत्यपतेरिव ॥ १३
अक्षौहिणीभिश्शिष्टाभिर् नवभिर्द्विजसत्तमः ।
संवृतस्समरश्लाघी गुप्तः [1]कृपसुतादिभिः ॥ १४
धृष्टद्युम्नस्त्वभून्नेता पाण्डवानां महास्त्रवित् ।
गुप्तो भीमेन मेधावी मित्रेण वरुणो यथा ॥ १५
पाण्डुसेनापरिवृतो द्रोणप्रेप्सुर्महामनाः ।
पितुर्निकारान् संस्मृत्य रणे कर्माकरोन्महत् ॥ १६
तस्मिंस्ते पृथिवीपाला द्रोणपार्षतसङ्गमे ।
नानादेशागता वीराः प्रायशो निधनं गताः ॥ १७
दिनानि पञ्च तद्युद्धम् अभूत् परमदारुणम् ।
ततो द्रोणः परिश्रान्तो धृष्टद्युम्नवशं गतः ॥ १८
ततस्सेनापतिरभूत् कर्णो दौर्योधने बले ।
अक्षौहिणीभिश्शिष्टाभिर् वृतः पञ्चभिराहवे ॥ १९
तिस्रस्तु पाण्डुपुत्राणां शिष्टा बीभत्सुपालिताः ।
हतप्रवीरभूयिष्ठा बभूवुः पर्यवस्थिताः ॥ २०
[2]ततः पार्थं समासाद्य पतङ्ग इव पावकम् ।

1. क-ख-घ--कचवृषादिभिः । 2. अ-अर्धपञ्चकं नास्ति

स द्वितीयेऽहनि तदा फल्गुनेन निपातितः ॥ २१

हते कर्णे तु कौरव्या निरुत्साहा हतौजसः ।
अक्षौहिणीभिस्तिसृभिर् मद्रेशं पर्यवारयन् ॥ २२

हतवाहनभूयिष्ठाः पाण्डवास्तु युधिष्ठिरम् ।
अक्षौहिण्या निरुत्साहाश् शिष्टया पर्यवारयन् ॥ २३

अवधीन्मद्रराजानं कुरुराजो युधिष्ठिरः ।
तस्मिंस्तदाऽर्धदिवसे कृत्वा कर्म सुदुष्करम् ॥ २४

हते शल्ये तु शकुनिं सहदेवः प्रतापवान् ।
[1]आहर्तारं कलेस्तस्य जघानामित्रकर्शनः ॥ २५

निहते शकुनौ राजा धार्तराष्ट्रस्सुदुर्मनाः ।
अपाक्रामद्गदापाणिर् हतभूयिष्ठसैनिकः ॥ २६

तमन्वधावत् सङ्क्रुद्धो भीमसेनः प्रतापवान् ।
ह्रदे द्वैपायने चैव सलिलस्थं ददर्श सः ॥ २७

ततश्शिष्टेन सैन्येन समन्तात् पर्यवारयत् ।
उपोपविविशुर्हृष्टा ह्रदस्थं पञ्च पाण्डवाः ॥ २८

विगाह्य सलिलं त्वाशु वाग्बाणैर्भृशविक्षतः ।
उत्थाय स गदापाणिर् युद्धाय समुपस्थितः ॥ २९

ततस्स निहतो राजा धार्तराष्ट्रो महामृधे ।

---

1. घ—नास्तीदमर्धम्

भीमसेनेन विक्रम्य पश्यतां पृथिवीक्षिताम् ॥ ३०

ततस्तत् पाण्डवं सैन्यं संसुप्तं शिबिरे निशि ।
निहतं द्रोणपुत्रेण पितुर्वधममृष्यता ॥ ३१

हतपुत्रा हतबला हतमित्रा मया सह ।
युयुधानद्वितीयेन पञ्च शिष्टास्तु पाण्डवाः ॥ ३२

सहैव कृपभोजाभ्यां द्रौणिर्युद्धादमुच्यत ।
युयुत्सुश्चापि कौरव्यो मुक्तः पाण्डवसंश्रयात् ॥ ३३

निहते कौरवेन्द्रे च सानुबन्धे सुयोधने ।
विदुरस्सञ्जयश्चैव धर्मराजमुपस्थितौ ॥ ३४

एवं तदभवद्युद्धम् अहान्यष्टादश प्रभो ।
यत्र ते पृथिवीपाला निहतास्स्वर्गमावसन् ॥ ३५

वैशम्पायनः—

शृण्वतां तु तथा तेषां कथां तां रोमहर्षणीम् ।
दुःखामर्षपरिक्लेशो धृष्णीनामभवत् तदा ॥ ३६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

॥ ९२ ॥ अनुगीतापर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

[ अस्मिन्नध्याये ३६ श्लोकाः ]

## ॥ चतुष्षष्टितमोऽध्यायः ॥

कृष्णेन सभार्यां वसुदेवं प्रति अभिमन्युनिधनाकथने सुभद्रया तं प्रति तत्कथनचोदनापूर्वकं शोकान्मोहावेशेन भुवि निपतनम् ॥ १ ॥ ततः कृष्णेन वसुदेवपरिसान्त्वनम् ॥ २ ॥

वैशम्पायनः—

कथयन्नेव तु तदा वासुदेवः प्रतापवान् ।
महाभारतयुद्धं तत् कथान्ते पितुरग्रतः ॥ १

अभिमन्योर्वधं वीरस् सोऽत्यक्रामत भारत ।
अप्रियं वसुदेवस्य मा भूदिति महामनाः ॥ २

मा दौहित्रवधं श्रुत्वा वसुदेवो महात्ययम् ।
दुःखशोकाभिसन्तप्तो भवेदिति महाद्युतिः ॥ ३

सुभद्रा तु तमुत्क्रान्तम् आत्मजस्य वधं रणे ।
आचक्ष्व कृष्ण सौभद्रवधमित्यपतद्भुवि ॥ ४

तामपश्यन्निपतितां वसुदेवः क्षितौ तदा ।
तथैव च पपातोर्व्यां सोऽपि दुःखेन मूर्छितः ॥ ५

ततस्स दौहित्रवधाद् दुःखशोकसमन्वितः ।
वसुदेवो महाराज कृष्णं वाक्यमथाब्रवीत् ॥ ६

वसुदेवः—

ननु त्वं पुण्डरीकाक्ष सत्यवाग् भुवि विश्रुतः ।

यद्दौहित्रवधं मेऽद्य न ख्यापयसि शत्रुहन् ॥ ७

त्वद्भागिनेयनिधनं तत्त्वेनाचक्ष्व मे विभो ।
सदृशाक्षस्तव कथं शत्रुभिर्निहतो रणे ॥ ८

दुष्करं बत वार्ष्णेय कालेऽप्राप्ते नृभिस्सदा ।
यत्र मे हृदयं दुःखाच् छतधा न विदीर्यते ॥ ९

किमब्रवीत् त्वां सङ्ग्रामे सुभद्रां मातरं प्रति ।
मां चापि पुण्डरीकाक्ष चपलाक्षः प्रियो मम ॥ १०

आहवं प्रष्ठतः कृत्वा कच्चिन्न निहतः परैः ।
कच्चिद्दुःखेन गोविन्द तेनाजौ विमुखः कृतः ॥ ११

स हि कृष्ण महातेजाश् श्लाघमानो ममाग्रतः ।
बालभावेन विजयम् आत्मनोऽकथयत् प्रभुः ॥ १२

कच्चिन्न निकृतो बाणैर् द्रोणकर्णकृपादिभिः ।
धरण्यां निहतश्शेते तन्ममाचक्ष्व केशव ॥ १३

स हि भीष्मं तथा द्रोणं कर्णं च रथिनां वरम् ।
स्पर्धते स्म रणे नित्यं दुहितुः पुत्रको मम ॥ १४

एवंविधं बहु तदा विलपन्तं सुदुःखितम् ।
पितरं दुःखिततरो गोविन्दो वाक्यमब्रवीत् ॥ १५

श्रीभगवान्—

न तेन विकृतं वक्त्रं कृतं सङ्ग्राममूर्धनि ।

न पृष्ठतः कृतश्चापि सङ्ग्रामस्तेन दुस्तरः ॥ १६

निहत्य पृथिवीपालान् शतशोऽथ सहस्रशः ।
वेदितो द्रोणकर्णाभ्यां दौःशासनिवशं गतः ॥ १७

एको ह्येकेन सततं युध्यमानो यदि प्रभो ।
स हि शक्यो न सङ्ग्रामे निहन्तुमपि वज्रिणा ॥ १८

समाहूते तु सङ्ग्रामे पार्थे संशप्तकैस्तदा ।
परिवार्य तु सङ्क्रुद्धैस् स द्रोणादिभिराहवे ॥ १९

ततःशत्रुक्षयं कृत्वा सुमहान्तं रणे पितः ।
दौहित्रस्तव वार्ष्णेय दौःशासनिवशं गतः ॥ २०

व्यक्तं च स गतस्स्वर्गं जहि शोकं महामते ।
न हि व्यसनमासाद्य सीदेयुस्सुनराः क्वचित् ॥ २१

द्रोणकर्णप्रभृतयो येन प्रतिसमाहिताः ।
रणे महेन्द्रप्रतिमस् स कथं नाप्नुयादिवम् ॥ २२

स शोकं जहि दुर्धर्ष मा च मन्युवशं गमः ।
शस्त्रपूतां हि स गतिं गतः परमदुर्जयः ॥ २३

तस्मिंस्तु निहते पुत्रे सुभद्रेयं स्वसा मम ।
दुःखार्ता च पृथां प्राप्य कुररीव ननाद ह ॥ २४

द्रौपदीं च समासाद्य पर्यपृच्छत् सुदुःखिता ॥ २४॥

सुभद्रा—

आर्ये क्व दारकास्सर्वे द्रष्टुमिच्छामि तानहम् ॥ २५

श्रीभगवान्—

अस्यास्तु वचनं श्रुत्वा सर्वास्ताः कुरुयोषितः ।
भुजाभ्यां परिगृह्यैनां चुक्रुशुः परमार्तवत् ॥ २६

उत्तरां चाब्रवीद्भद्रां भद्रे भर्ता क्व ते गतः ।
क्षिप्रमागमनं मह्यं तस्य त्वं वेदयस्व ह ॥ २७

[1]ननु नाम स वैराटि श्रुत्वा वै मद्रिरः पुरा ।
भवनान्निष्पतत्याशु कस्मान्नाभ्येति ते पतिः ॥ २८

अभिमन्यो कुशलिनो मातुलास्ते महारथाः ।
कुशलं चाब्रुवन् सर्वे त्वां युयुत्सुमुपागतम् ॥ २९

आचक्ष्व मेऽद्य सङ्ग्रामं यथापूर्वमरिन्दम ।
कस्मादेवं विलपतीं नाद्य वै प्रतिभाषसे ॥ ३०

एवमादि तु वार्ष्णेय्यास् तदाऽस्याः परिदेवितम् ।
श्रुत्वा पृथा सुदुःखार्ता शनैर्वाक्यमथाब्रवीत् ॥ ३१

पृथा—

सुभद्रे वासुदेवेन तथा सात्यकिना रणे ।
पित्रा च पालितो बालस् स गतः कालधर्मणा ॥ ३२

---

1. क—ननु नन्नस्मि वैराटि श्रुत्वा मम गिरस्सदा ।
ख—मानस्य मम गिरस्सदा ।

ईदृशो मर्त्यभावोऽयं मा शुचो यदुनन्दिनि ।
पुत्रो हि तव दुर्धर्षस् सम्प्राप्तः परमां गतिम् ॥ ३३

कुले महति जाताऽसि क्षत्रियाणां महात्मनाम् ।
मा शुचश्चपलाक्षि त्वं पुण्डरीकनिभेक्षणम् ॥ ३४

उत्तरां त्वमवेक्षस्व गर्भिणीं मा शुचश्शुभे ।
पुत्रमेषा हि तस्याशु जनयिष्यति भामिनी ॥ ३५

श्रीभगवान्—

एवं तु सान्त्वयित्वैनां कुन्ती यदुकुलोद्वहाम् ।
विहाय शोकं दुर्धर्ष श्राद्धमस्याप्यकल्पयत् ॥ ३६

समनुज्ञाप्य धर्मज्ञं राजानं भीममेव च ।
यमौ यमोपमौ चैव ददौ दानान्यनेकशः ॥ ३७

ततः प्रदाय बह्वीर्गा ब्राह्मणेभ्यो यदूद्वह ।
समहृष्यत वार्ष्णेयी वैराटीं चाब्रवीदिदम् ॥ ३८

कुन्ती—

वैराटि नेह सन्तापस् त्वया कार्यो यशस्विनि ।
भर्तारं प्रति सुश्रोणि गर्भस्थं रक्ष मे शिशुम् ॥ ३९

श्रीभगवान्—

एवमुक्त्वा ततः कुन्ती विरराम महाद्युते ।
तामनुज्ञाप्य चेहेमां सुभद्रां पुनरानयम् ॥ ४०

एवं स निधनं प्राप्तो दौहित्रस्तव मानद ।
सन्तापं त्यज दुर्धर्ष मा च शोके मनः कृथाः ॥ ४१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
[ अस्मिन्नध्याये ४१ श्लोकाः ]

---

## ॥ पञ्चषष्टितमोऽध्यायः ॥

वसुदेवादिभिरभिमन्यवे श्राद्धदानम् ॥ १ ॥ व्यासेन हास्तिनपुरमेत्य उत्तरादिपरिसान्त्वनपूर्वकं युधिष्ठिरं प्रत्यश्वमेधसञ्चोदनेन पुनरन्तर्धानम् ॥ २ ॥

---

वैशम्पायनः—

एतच्छ्रुत्वा तु पुत्रस्य वचःशूरात्मजस्तदा ।
विहाय शोकं धर्मात्मा ददौ श्राद्धमनुत्तमम् ॥ १
तथैव वासुदेवोऽपि स्वस्रीयस्य महात्मनः ।
दयितस्य पितुर्नित्यम् अकरोदौर्ध्वदैहिकम् ॥ २
षष्टिं शतसहस्राणि ब्राह्मणानां महाभुज ।
विधिवद्भोजयामास भोज्यं सर्वगुणान्वितम् ॥ ३
आच्छाद्य च महाबाहुर् धनतृष्णामपानुदत् ।
ब्राह्मणानां तदा कृष्णस् तदभूद्रोमहर्षणम् ॥ ४
सुवर्णं चैव गाश्चैव शयनाच्छादनं तथा ।

दीयमानं तदा विप्राः प्रभूतमिति चाब्रुवन् ॥ ५
वासुदेवोऽथ दाशार्हो बलदेवस्ससात्यकिः ।
अभिमन्योस्तदा श्राद्धम् अकुर्वन् सत्यविक्रमाः ॥ ६
अतीव दुःखसन्तप्ता न शमं चोपलेभिरे ॥ ६॥
तथैव पाण्डवा [1]धीरा नगरे नागसाह्वये ।
नोपागच्छंस्तथा शान्तिम् अभिमन्युविनाकृताः ॥ ७॥

सुबहूनि च राजेन्द्र दिवसानि विराटजा ।
नाभुङ्क्त पतिशोकार्ता तदभूत् करुणं महत् ॥ ८॥
म्रियमाणे तु तस्मिंस्तु गर्भे कुक्षिस्थ एव च ।
[2]आजगाम तदा व्यासो ज्ञात्वा दिव्येन चक्षुषा ॥ ९॥
आगम्य चाब्रवीद्धीमान् पृथां पृथुललोचनाम् ।
उत्तरां च महातेजाश् शोकस्सन्त्यज्यतामिति ॥ १०॥

व्यासः—

जनिष्यति महातेजाः पुत्रस्तव यशस्विनि ॥ ११॥
प्रभावाद्वासुदेवस्य मम व्याहरणादपि ॥ ११
पाण्डवानामयं चान्ते पालयिष्यति मेदिनीम् ॥ १२

वैशम्पायनः—

धनञ्जयं च सम्प्रेक्ष्य धर्मराजस्य पश्यतः ।
व्यासो वाक्यमुवाचेदं हर्षयन्निव भारत ॥ १३

---

1. ख—धीरा नगरं नागसाह्वयम् ।
2. अ—कुक्षिस्थ एव तस्यास्तु गर्भो वै सम्प्रणश्यति । [ अधिकः पाठः ]

व्यासः—

पौत्रो ध्रुवं महाभागो भविष्यति महामतिः ।
पृथ्वीं सागरपर्यन्तां पालयिष्यति चैव ह ॥ १४
तस्माच्छोकं कुरुश्रेष्ठ जहि त्वमरिमर्दन ।
विचार्यमत्र न हि ते सत्यमेतद्भविष्यति ॥ १५
यच्चापि वृष्णिवीरेण कृष्णेन कुरुनन्दन ।
पुरा चोक्तं तथा भावि मा ते भूदत्र संशयः ॥ १६
विबुधानां गतो लोकान् अक्षयानात्मनिर्जितान् ।
न स शोच्यस्तथा वत्स न चान्यैः कुरुभिस्तथा ॥ १७

वैशम्पायनः—

एवं पितामहेनोक्तो धर्मात्मा स धनञ्जयः ।
त्यक्त्वा शोकं महाराज हृष्टरूपोऽभवत् तदा ॥ १८
पिताऽपि तव धर्मज्ञ गर्भे तस्मिन् महामते ।
अवर्धत यथाकालं शुक्लपक्षे यथा शशी ॥ १९
ततस्सञ्चोदयामास व्यासो धर्मात्मजं नृपम् ।
अश्वमेधं प्रति तदा ततस्सोऽन्तर्हितोऽभवत् ॥ २०
धर्मराजश्च मेधावी श्रुत्वा व्यासस्य तद्वचः ।
वित्तोपनयने तात चकार मतिमान् मतिम् ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥
[ अस्मिन्नध्याये २१ श्लोकाः ]

## ॥ षट्षष्टितमोऽध्यायः ॥

युधिष्ठिरेण व्यासाज्ञया भीमादिभिस्सहालोच्य यज्ञार्थं धनाहरणाय सह भ्रात्रादिभिर्हिमवत्पार्श्वं प्रति प्रस्थानम् ॥ १ ॥

जनमेजयः—

श्रुत्वैतद्वचनं ब्रह्मन् व्यासेनोक्तं महात्मना ।
अश्वमेधं प्रति तदा [1]किं चकार युधिष्ठिरः ॥ १

रत्नं च यन्मरुत्तेन निहितं पृथिवीतले ।
तदवाप्तं कथं चैतत् तन्मे ब्रूहि द्विजोत्तम ॥ २

वैशम्पायनः—

श्रुत्वा द्वैपायनवचो धर्मराजो युधिष्ठिरः ।
भ्रातॄन् सर्वान् समाभाष्य काले वचनमब्रवीत् ॥ ३

अर्जुनं भीमसेनं च माद्रीपुत्रौ यमावपि ॥ ३॥

युधिष्ठिरः—

श्रुतं वो वचनं वीरास् सौहृदाद्यन्महात्मना ।
कुरूणां हितकामेन प्रोक्तं कृष्णेन धीमता ॥ ४॥

तपोवृद्धेन महता सुहृदां भूतिमिच्छता ।
गुरुणा धर्मशीलेन व्यासेनाद्भुतकर्मणा ॥ ५॥

पितामहेन भीष्मेण गोविन्देन च धीमता ।

1. क-ख—नृपतिः प्रचकार ह ।

संस्मृत्य तदहं सम्यक् कर्तुमिच्छामि पाण्डवाः ॥ ६॥
[1]आयत्यां च तदात्वे च सर्वेषां तद्धि नो हितम् ।
अनुबन्धे च कल्याणं यद्वचो ब्रह्मवादिनः ॥ ७॥
इयं हि वसुधा सर्वा क्षीणरत्ना कुरूद्वहाः ।
तच्चाचष्ट बहु व्यासो मरुत्तस्य धनं नृपाः ॥ ८॥
यद्येतद्वो बहुमतं मन्यध्वं वा क्षमं यदि ।
तदानयामहे सर्वे कथं वा भीम मन्यसे ॥ ९॥

वैशम्पायनः—

इत्युक्तवाक्ये नृपतौ तदा कुरुकुलोद्वह ।
भीमसेनो नृपश्रेष्ठं प्राञ्जलिर्वाक्यमब्रवीत् ॥ १०॥

भीमसेनः—

रोचते मे महाबाहो यदिदं भाषितं त्वया ।
व्यासाख्यातस्य वित्तस्य समुपानयनं प्रति ॥ ११॥
तत् प्राप्नुयामहे धर्माद् धनमुद्वीक्षितं प्रभो ।
कृतमेव महाराज भवेदिति मतिर्मम ॥ १२॥
ते वयं प्रणिपातेन गिरीशस्य महात्मनः ।
तदानयाम भद्रं ते तमभ्यर्च्य कपर्दिनम् ॥ १३॥
तं विभुं देवदेवेशं शूलपाणिं त्रिलोचनम् ।

1. अ—अर्धद्वयं नास्ति

अनादिनिधनं शम्भुं नमस्याम महेश्वरम् ॥ १४॥

लोकनाथं गणाध्यक्षं तस्यैवानुचरान् स्थितान् ।
प्रसाद्यार्थमवाप्स्यामो मनो वाग्बुद्धिकर्मभिः ॥ १५॥

रक्षन्ति ये च तद्द्रव्यं किन्नरा रौद्रदर्शनाः ।
ते च वश्या भविष्यन्ति प्रसन्ने वृषभध्वजे ॥ १६॥

स हि देवः प्रसन्नात्मा भक्तानां परमेश्वरः ।
ददात्यमरतां चापि किं पुनः काञ्चनं प्रभुः ॥ १७॥

वनस्थस्य पुरा जिष्णोर् अस्त्रं पाशुपतं महत् ।
रौद्रं ब्रह्मशिरश्चादात् प्रसन्नः किं पुनर्धनम् ॥ १८॥

वयं सर्वे च तद्भक्तास् स चास्माकं प्रसीदति ।
तत्प्रसादाद्वयं राज्यं प्राप्ताः कौरवनन्दन ॥ १९॥

अभिमन्योर्वधे वृत्ते प्रतिज्ञाते धनञ्जये ।
जयद्रथवधार्थाय स्वप्ने लोकगुरुर्निशि ॥ २०॥

प्रसाद्य लब्धवानस्त्रम् अर्जुनस्सहकेशवः ॥ २१

ततः प्रभातां रजनीं फल्गुनस्याग्रतः प्रभुः ।
जघान सैन्यं शूलेन प्रत्यक्षं सव्यसाचिनः ॥ २२

कस्तां सेनां महाराज मनसाऽपि प्रधर्षयेत् ।
द्रोणकर्णमुखैर्युक्तां महेष्वासैः प्रहारिभिः । २३
ऋते देवान्महेष्वासाद् बहुरूपान्महेश्वरात् ॥ २३॥

तस्यैव च प्रसादेन निहताश्शत्रवस्तव ।
अश्वमेधस्य संसिद्धिं स तु सम्पादयिष्यति ॥ २४॥

वैशम्पायनः—

श्रुत्वैवं ब्रुवतस्तस्य वाक्यं भीमस्य पार्थिव ।
प्रीतो धर्मात्मजो राजा बभूवातीव भारत ॥ २५॥
अर्जुनप्रमुखाश्चैव तथेत्येवाब्रुवन् मुदा ॥ २६
कृत्वा तु पाण्डवास्सर्वे रत्नाहरणनिश्चयम् ।
सेनामाज्ञापयामासुर् नक्षत्रेऽहनि पूजिते ॥ २७
ततो ययुः पाण्डुसुता ब्राह्मणान् स्वस्ति वाच्य च ।
[1]अर्चयित्वा सुरश्रेष्ठं पूर्वमेव महेश्वरम् ॥ २८
मोदकैः पायसेनाथ माषापूपैस्तथैव च ।
आराध्य च महात्मानं प्रययुर्मुदिता भृशम् ॥ २९
तेषां प्रयास्यतां तत्र मङ्गलानि शुभान्यथ ।
प्राहुः प्रहृष्टमनसो द्विजाग्र्या नागराश्च ये ॥ ३०
ततः प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च ।
ब्राह्मणानग्निसहितान् प्रययुः पाण्डवर्षभाः ॥ ३१
समनुज्ञाप्य राजानं पुत्रशोकसमाहतम् ।
धृतराष्ट्रं सभार्यं वै पृथां च पृथुलोचनाम् ॥ ३२

1 क-ख-घ—इतः श्लोकद्वयं नास्ति

मूले निक्षिप्य कौरव्यं युयुत्सुं धृतराष्ट्रजम् ॥ ३२॥
सम्पूज्यमानाः पौरैश्च ब्राह्मणैश्च महर्षिभिः ।
प्रययुः पाण्डवा वीरा नियमस्थाश्शुचिव्रताः ॥ ३३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥
॥ ९२ ॥ अनुगीतापर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥
[ अस्मिन्नध्याये ३३॥ श्लोकाः ]

---

## ॥ सप्तषष्टितमोऽध्यायः ॥

युधिष्ठिरेण हिमवद्गिरिमेत्य सेनानिवेशनम् ॥ १ ॥ तत्र ब्राह्मणचोदनया तैस्सहोपवासादिव्रताचरणपूर्वकं निशायापनम् ॥ २ ॥

---

**वैशम्पायनः—**

ततस्ते प्रययुर्हृष्टास् सबलास्सहवाहनाः ।
रथघोषेण महता पूरयन्तो वसुन्धराम् ॥ १
संस्तूयमानास्स्तुतिभिस् सूतमागधवन्दिभिः ।
स्वेन सैन्येन सहिता यथाऽऽदित्यास्स्वरश्मिभिः ॥ २
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
बभौ युधिष्ठिरस्तत्र पौर्णमास्यामिवोडुराट् ॥ ३
जयाशिषः प्रहृष्टास्ते नराणां पथि पार्थिवाः ।

प्रत्यगृह्णन् यथान्यायं यथावद्भरतर्षभ ॥ ४
तथैव सैनिका राजन् राजानमनुयान्ति ये ।
तेषां हलहलाशब्दो दिगन्तं व्याप्य तिष्ठत ॥ ५
स सरांसि नदीश्चैव वनान्युपवनानि च ।
अत्यक्रामन्महाराजो गिरिं चाप्यन्वपद्यत ॥ ६
तस्मिन् देशे च राजेन्द्र यत्र तद्द्रव्यमुत्तमम् ।
चक्रे निवेशनं राजा पाण्डवस्सहसैनिकैः ॥ ७
शिवे देशे समे चैव तदा भरतसत्तम ॥ ७॥
अग्रतो ब्राह्मणान् कृत्वा तपोविद्यादमान्वितान् ।
पुरोहितं च कौरव्य वेदवेदाङ्गपारगम् ॥ ८॥
प्राङ्निवेशात्तु राजानं ब्राह्मणास्सपुरोहिताः ।
कृत्वा शान्तिं यथान्यायं सर्वतः पर्यवारयन् ॥ ९॥
कृत्वा मध्ये च राजानम् अमात्यांश्च यथाविधि ।
षट्पदं नवसंस्थानं निवेशं चक्रिरे जनाः ॥ १०॥
मत्तानां वारणेन्द्राणां निवेशं च यथाविधि ।
कारयित्वा स राजेन्द्रो ब्राह्मणानिदमब्रवीत् ॥ ११॥

युधिष्ठिरः—

अस्मिन् कार्ये द्विजश्रेष्ठा नक्षत्रे दिवसे शुभे ।
यथा भवन्तो मन्यन्ते कर्तुमर्हन्ति तद्विदः ॥ १२॥
न नः कालात्ययो वै स्याद् इहैव परितिष्ठताम् ।

इति निश्चित्य विप्रेन्द्राः क्रियतां यदनन्तरम् ॥ १३॥

**वैशम्पायनः—**

श्रुत्वैतद्वचनं राज्ञो ब्राह्मणास्सपुरोधसः ।
इदमूचुर्वचो हृष्टा धर्मराजप्रियेप्सवः ॥ १४॥

**ब्राह्मणाः—**

अद्यैव नक्षत्रमहश्च पुण्यं
यतामहे श्रेष्ठतमं क्रियासु ।
तपोभि[1]रद्येह वसाम राज-
न्नुपोष्यतां चापि भवद्भिरद्य ॥ १५॥

**वैशम्पायनः—**

श्रुत्वा तु तेषां द्विजसत्तमानां
कृतोपवासा रजनीं नरेन्द्राः ।
ऊषुः प्रतीताः कुशसंस्तरेषु
यथाऽध्वरेषूज्ज्वलिता हव्यवाहाः ॥ १६॥

ततो निशा सा व्यगमन्महात्मनां
संशृण्वतां विप्रसमीरिता गिरः ।
ततः प्रभाते विमले द्विजर्षभा
वचोऽब्रुवन् धर्मसुतं नराधिपम्॥ १७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आश्वमेधिकपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥
[ अस्मिन्नध्याये १७॥ श्लोकाः ]

---

1. क-ख—रद्यैव वसामि ।

## ॥ अष्टषष्टितमोऽध्यायः ॥



युधिष्ठिरेण विधिवन्नानाबलिहरणादिना सपरिचरमहेश्वरपरितोषणेन विविधकनकभाण्डाहरणेन पुनर्नगरं प्रत्यागमनम् ॥ १ ॥

---

ब्राह्मणाः—

क्रियतामुपहारोऽद्य त्र्यम्बकस्य महात्मनः ।
कृत्वोपहारं नृपते ततस्स्वार्थं यतामहे ॥ १

वैशम्पायनः—

तेषां तु वचनं श्रुत्वा ब्राह्मणानां युधिष्ठिरः ।
गिरीशस्य यथान्यायम् उपहारमुपाहरत् ॥ २

आज्येन तर्पयित्वाऽग्निं विधिवत् संस्कृतेन ह ।
मन्त्रसिद्धं चरुं कृत्वा पुरोधाः प्रययौ तदा ॥ ३

स गृहीत्वा सुमनसो मन्त्रपूता जनाधिप ।
मोदकैः पायसेनाथ मांसैश्चोपाहरद्बलिम् ॥ ४

सुमनोभिश्च चित्राभिर् लाजैरुच्चावचैरपि ॥ ४॥

सर्वं स्विष्टकृतं हुत्वा विधिवद्वेदपारगः ।
किङ्कराणां ततः पश्चाच् चकार बलिमुत्तमम् ॥ ५॥

यक्षेन्द्राय कुबेराय माणिभद्राय चैव ह ।
तथाऽन्येषां च यक्षेभ्यो भूताधिपतयश्च ये ॥ ६॥

[1]कृसरेण समांसेन निवापैस्तिलसंयुतैः ।
[2]पितॄणामञ्जलिं कृत्वा पुरोधास्समुपाहरत् ॥ ७॥

ब्राह्मणेभ्यस्सहस्राणि गवां दत्त्वा तु भूमिपः ।
नक्तञ्चरेभ्यो भूतेभ्यो व्यादिदेश बलिं तदा ॥ ८॥

[3]धूपगन्धनिरुद्धं तत् सुमनोभिश्च संवृतम् ।
शुशुभे स्थानमत्यन्तं देवदेवस्य पार्थिव ॥ ९॥

कृत्वा पूजां तु रुद्रस्य गणानां चैव सर्वशः ।
ययौ व्यासं पुरस्कृत्य तत्र रत्ननिधिं प्रति ॥ १०॥

पूजयित्वा धनाध्यक्षं रुद्रं प्रत्यभिवाद्य च ।
सुमनोभिर्विचित्राभिर् अपूपैः कृसरेण च ॥ ११॥

शङ्खादींश्च निधीन् सर्वान् निधिपालांश्च सर्वशः ।
अर्चयित्वा द्विजाग्र्यान् स स्वस्ति संवाच्य वीर्यवान् ॥ १२॥

तेषां पुण्याहघोषेण [4]तेजसा समवस्थितः ।
प्रीतिमान् स कुरुश्रेष्ठः खानयामास तं निधिम् ॥ १३॥

ततः पात्र्यस्सकरका बहुरूपा मनोरमाः ।
शुभ्राणि च शरावाणि कलशा वर्धमानकाः ॥ १४॥

बहूनि च विचित्राणि भाजनानि सहस्रशः ।

---

1. घ—हृतः सार्धः श्लोको नास्ति 2. अ—ओदनं कुम्भशः ।
3. घ—धूमपूजातिरुद्धं । क-ख—धूमपुञ्जनिरुद्धं + संयुतम् ।
4. क-ख—तेजसाऽपि प्रतर्पितः । घ—तेजसाऽपि प्रतर्षतः ।

उद्धारयामास तदा धर्मपुत्रो युधिष्ठिरः ॥ १५॥
तेषां लक्षणमप्यासीन्महान् करपुटस्तथा ।
त्रिलक्षं भाजनं राजंस् [1]त्रितुलार्हं भवन्नृप ॥ १६॥
वाहनं पाण्डुपुत्रस्य तत्रासीत्तु विशाम्पते ।
षष्टिरुष्ट्रसहस्राणि शतानि द्विगुणा हयाः ॥ १७॥
वारणाश्च महाराज सहस्रशतसम्मिताः ।
शकटानि रथाश्चैव तावदेव यथा गजाः ॥ १८॥
खराणां पुरुषाणां च परिसङ्ख्या न विद्यते ॥ १९
एतावद्वित्तमभवद् यदुदध्रे युधिष्ठिरः ॥ १९॥
षोडशाष्टौ [2]चतुर्विंशत्सहस्रं भारलक्षणम् ।
एतेष्वाधाय तद्द्रव्यं पुनरभ्यर्च्य पाण्डवः ॥ २०॥
महादेवं महाराज प्रत्यागच्छद्युधिष्ठिरः ॥ २१
द्वैपायनाभ्यनुज्ञातः पुरस्कृत्य पुरोहितम् ।
गोरुते गोरुते चापि न्यवसत् पुरुषर्षभः ॥ २२
सा पुराभिमुखी राजन् जगाम महती चमूः ।
कृच्छ्राद्विणभारार्ता वाहयन्ती कुरूत्तमान् ॥ २३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
[ अस्मिन्नध्याये २३ श्लोकाः ]

---

1. क—त्रितुलं च भवन्नृप । ख—त्रितुलामभवं प्रपा ।
ङ—त्रितुलामभवन्नृप । 2. क-ख—चतुस्त्रिंशत्सहस्रं ।

## ॥ एकोनसप्ततितमोऽध्यायः ॥

कृष्णेन बलभद्रसुभद्रादिभिस्सह यज्ञार्थं हास्तिनपुरं प्रत्यागमनम् ॥ १ ॥ तत उत्तरायां परीक्षितो जननम् ॥ २ ॥ अश्वत्थामास्त्रेण जननकाल-एव शवभूतस्य तस्योज्जीवनाय कुन्त्यादिभिः श्रीकृष्णं प्रति प्रार्थना ॥ ३ ॥

वैशम्पायनः—

एतस्मिन्नेव काले तु वासुदेवः प्रतापवान् ।
उपायाद्वृष्णिभिस्सार्धं पुरं वारणसाह्वयम् ॥ १

समयं वाजिमेधस्य विदित्वा पुरुषर्षभ ।
यथोक्तो धर्मपुत्रेण प्रव्रजन् स्वपुरीं प्रति ॥ २

रौक्मिणेयेन सहितो युयुधानेन चैव हि ।
चारुदेष्णेन साम्बेन गदेन कृतवर्मणा ॥ ३

सारणेन च वीरेण निशठेनोन्मुखेन च ॥ ३॥

बलदेवं पुरस्कृत्य सुभद्रासहितस्तदा ॥ ४

द्रौपदीमुत्तरां चापि पृथां चाप्यवलोककः ।
समाश्वासयितुं चापि क्षत्रियान् निहतेश्वरान् ॥ ५

तानागतान् समीक्ष्यैव धृतराष्ट्रो महीपतिः ।
प्रत्यगृह्णाद्यथान्यायं विदुरश्च महामनाः ॥ ६

तत्रैव न्यवसत् कृष्णस् सत्कृतः पुरुषर्षभः ।
विदुरेण महातेजास् तथैव च युयुत्सुना ॥ ७

वसत्सु वृष्णिवीरेषु तत्राथ जनमेजय ।
जज्ञे तव पिता राजा परीक्षित् परवीरहा ॥ ८

स तु जातो महाराज ब्रह्मास्त्रेण च पीडितः ।
शवो बभूव निश्चेष्टो हर्षशोकविवर्धनः ॥ ९

हृष्टानां सिंहनादेन [1]जनानां तत्र निस्स्वनः ।
[2]आविवेश दिशस्सर्वाः पुनरेवाप्युपारमत् ॥ १०

ततस्सोऽभित्वरन् कृष्णो विवेशान्तः पुरं तदा ।
युयुधानद्वितीयो वै व्यथितेन्द्रियमानसः ॥ ११

ततस्त्वरितमायान्तीं ददर्श स्वां पितृष्वसाम् ।
[3]क्रोशन्तीमभिधावन्तीं वासुदेवं पुनः पुनः ॥ १२

पृष्ठतो द्रौपदीं चैव सुभद्रां च यशस्विनीम् ।
विक्रोशन्त्यश्च करुणं पाण्डवानां स्त्रियो नृप ॥ १३

ततः कृष्णं समासाद्य कुन्ती राजसुता तदा ।
प्रोवाच राजशार्दूल बाष्पगद्गदया गिरा ॥ १४

कुन्ती—

वासुदेव महाबाहो सुप्रजा देवकी त्वया ।
त्वं नो गतिः प्रतिष्ठा च [4]त्वदायत्तमिदं कुलम् ॥ १५

---

1. क—जानतां । ख—राजानां ।
2. क-ख—आविश्य प्रदिशस्सर्वाः पुनरेवाप्युपारमत् ।
3. घ—नाशीदमर्धम् 4. क-घ—त्वया दत्तमिदं कुलम् ।

यदुप्रवीर योऽयं ते स्वस्रीयस्यात्मजः प्रभो ।
अश्वत्थाम्ना हतो जातस् तमुज्जीवय केशव ॥ १६

त्वया ह्येतत् प्रतिज्ञातम् ऐषीके यदुनन्दन ।
अहं सञ्जीवयिष्यामि मृतं जातमिति प्रभो ॥ १७

सोऽयं जातो मृतस्तात पश्यैनं पुरुषर्षभ ।
उत्तरां च सुभद्रां च द्रौपदीं मां च माधव ॥ १८

धर्मपुत्रं च भीमं च फल्गुनं नकुलं तथा ।
सहदेवं च दुर्धर्षं सर्वांश्च भरतानपि ॥ १९

अस्मिन् प्राणास्समायत्ताः पाण्डवानां ममैव च ।
पाण्डोश्च पिण्डो दाशार्ह तथैव श्वशुरस्य मे ॥ २०

अभिमन्योश्च भद्रं ते प्रियस्य सदृशस्य ते ।
प्रियमुत्पादयाद्य त्वं प्रेतस्यापि जनार्दन ॥ २१

उत्तरा हि पुरोक्तं वै कथयत्यरिसूदन ।
अभिमन्योर्वचः कृष्ण प्रियं तत् ते न संशयः ॥ २२

अब्रवीत् किल दाशार्ह वैराटीमार्जुनिस्तदा ॥ २२॥

**अभिमन्युः—**

मातुलस्य कुलं भद्रे तव पुत्रो [1]गमिष्यति ॥ २३
गत्वा वृष्ण्यन्धककुलं धनुर्वेदं ग्रहीष्यति ।

---

1. क-ख—भविष्यति ।

अस्त्राणि च विचित्राणि नीतिशास्त्रं च केवलं ॥ २४

कुन्ती—

इत्येतत् प्रणयात् तात सौभद्रः परवीरहा ।
कथयामास दुर्धर्षस् तथैवैतन्न संशयः ॥ २५

तास्त्वां वयं प्रणम्येह याचामो मधुसूदन ।
कुलस्यास्य हितार्थं त्वं कुरु कल्याणमुत्तमम् ॥ २६

वैशम्पायनः—

एवमुक्त्वा तु वार्ष्णेयं पृथा पृथुललोचना ।
उद्धृत्य बाहू दुःखार्ता प्रापतद्भुवि विह्वला ॥ २७

अब्रुवंश्च महाराज सर्वास्तास्ताविलेक्षणाः ।
स्वस्रीयो वासुदेवस्य मृतो जात इति प्रभो ॥ २८

एवं गते ततः कुन्तीं पर्यगृह्णाज्जनार्दनः ।
भूमौ निपतितां चैनां सान्त्वयामास भारत ॥ २९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

॥ ९२ ॥ अनुगीतापर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

[ अस्मिन्नध्याये २९ श्लोकाः ]

## ॥ सप्ततितमोऽध्यायः ॥

सुभद्रया श्रीकृष्णं प्रति तन्महिमसंस्तवनपूर्वकं परीक्षिद्जीवन-प्रार्थना ॥ १ ॥

वैशम्पायनः—

उत्थितायां पृथायां तु सुभद्रा भ्रातरं तदा ।
दृष्ट्वा चुक्रोश दुःखार्ता वचनं चेदमब्रवीत् ॥ १

सुभद्रा—

पुण्डरीकाक्ष पश्य त्वं पौत्रं पार्थस्य धीमतः ।
परिक्षीणेषु कुरुषु परिक्षीणं गतायुषम् ॥ २

इषीका द्रोणपुत्रेण भीमसेनार्थमुद्यता ।
सोत्तरायां निपतिता विजये मयि चैव ह ॥ ३

सेयं ज्वलन्ती हृदये मम तिष्ठति केशव ।
यन्न पश्यामि दुर्धर्षम् अहं पुत्रसुतं विभो ॥ ४

किं नु वक्ष्यति धर्मात्मा धर्मपुत्रो युधिष्ठिरः ।
भीमसेनार्जुनौ चोभौ माद्रवत्यास्सुतौ च तौ ॥ ५

श्रुत्वाऽभिमन्योस्तनयं जातं च मृतमेव च ।
मुषिता इव वार्ष्णेय द्रोणपुत्रेण पाण्डवाः ॥ ६

अभिमन्युः प्रियः कृष्ण पितॄणां नात्र संशयः ।
ते श्रुत्वा किं नु वक्ष्यन्ति द्रोणपुत्रास्त्रनिर्जिताः ॥ ७

भविता नः परं दुःखं किं नु मन्ये जनार्दन ।
अभिमन्योस्सुतात् कृष्ण मृताज्जातादरिन्दम ॥ ८

साऽहं प्रसादये कृष्ण त्वामद्य शिरसा नता ।
पृथां च द्रौपदीं चैव मां पश्य पुरुषोत्तम ॥ ९

यदा द्रोणसुतो गर्भान् पाण्डूनां हन्ति माधव ।
त्वया किल पुरा द्रौणिः क्रुद्धेनोक्तोऽरिमर्दन ॥ १०

श्रीभगवान्—

अकामं त्वां करिष्यामि ब्रह्मबन्धो नराधम ।
अहं सञ्जीवयिष्यामि किरीटितनयात्मजम् ॥ ११

सुभद्रा—

इत्येतद्वचनं [1]श्रुत्वा जानानाऽहं बलं तव ।
प्रसादये त्वां दुर्धर्ष [2]जीवतामभिमन्युजः ॥ १२

[3]यद्येतत् त्वं प्रतिश्रुत्य न करोषि वचश्शुभम् ।
सफलं वृष्णिशार्दूल मृतां मामवधारय ॥ १३

अभिमन्योस्सुतो वीर न सञ्जीवति यद्ययम् ।
जीवति त्वयि दुर्धर्ष किं करिष्याम्यहं त्वया ॥ १४

सञ्जीवयैनं दुर्धर्ष मृतं त्वमभिमन्युजम् ।

---

1. क-ख—मत्वा जानाम्यद्य ।
2. क-ख—मृतं त्वमभिमन्युजम् ।
3. क-ख—अर्धपद्यकं नास्ति घ—इतः सार्धःश्लोको नास्ति

सदृशाक्षसुतं वीर सस्यं वर्षास्विवाम्बुदः ॥ १५

त्वं हि केशव धर्मात्मा सत्यवाक् सत्यविक्रमः ।
स तां वाचमृतां कर्तुम् अर्हसि त्वमरिन्दम ॥ १६

इच्छन्नपि हि लोकांस्त्रीन् जीवयेथा मृतानपि ।
किं पुनर्दयितं जातं स्वस्रीयस्यात्मजं मृतम् ॥ १७

प्रभावज्ञाऽस्मि ते कृष्ण तस्मादेतद् ब्रवीमि ते ।
कुरुष्व पाण्डुपुत्राणाम् इमं परमनुग्रहम् ॥ १८

स्वसेति वा महाबाहो हतपुत्रेति वा पुनः ।
प्रपन्ना मामियं वेति दयां कर्तुमिहार्हसि ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
[ अस्मिन्नध्याये १९ श्लोकाः ]

---

## ॥ एकसप्ततितमोऽध्यायः ॥

---

कृष्णस्य परीक्षित्सूतिकागृहप्रवेशः ॥ १ ॥ ततोत्तरया कृष्णसमीपे बहुधा विलापपूर्वकं पुत्रोज्जीवनप्रार्थना ॥ २ ॥

---

वैशम्पायनः—

एवमुक्तस्स राजेन्द्र केशिहा दुःखमूर्च्छितः ।
तथेति ह्वाजहारोच्चैर् हृदयन्निव तं जनम् ॥ १

वाक्येनैतेन सहसा तं जनं पुरुषर्षभः ।
ह्लादयामास स विभुर् घर्मार्थं सलिलैरिव ॥ २

ततस्स प्राविशत् तूर्णं जन्मवेश्म पितुस्तव ।
अर्चितं पुरुषव्याघ्र सितैर्माल्यैर्यथाविधि ॥ ३

अपां कुम्भैस्सुपूर्णैश्च विन्यस्तैस्सर्वतोदिशम् ।
घृतेन तिन्दुकालाजैस् सर्षपैश्च महाभुजः ॥ ४

शस्त्रैश्च विमलैर्न्यस्तैः पावकैश्च समन्ततः ॥ ४॥

वृद्धाभिश्चानुरूपाभिः परिवारार्थमप्युत ।
दक्षैश्च परितो वीर भिषग्भिः कुशलैस्तथा ॥ ५॥

ददर्श च स तेजस्वी रक्षोघ्नान्यपि सर्वशः ।
द्रव्याणि स्थापितानि स्म विधिवत् कुशलैस्तथा ॥ ६॥

जनैर्युक्तं च तद्दृष्ट्वा जन्मवेश्म पितुस्तव ।
हृष्टोऽभवद्धृषीकेशस् साधु साध्विति सोऽब्रवीत् ॥ ७॥

तथा ब्रुवति गोविन्दे प्रहृष्टवदने तदा ।
द्रौपदी त्वरिता गत्वा वैराटीं वाक्यमब्रवीत् ॥ ८॥

**द्रौपदी—**

अयमायाति ते भर्तुर् मातुलो मधुसूदनः ।
पुराणर्षिरचिन्त्यात्मा समीपमपराजितः ॥ ९॥

**वैशम्पायनः—**

सा तु बाष्पकलां वाचं निगृह्याश्रूणि चैव ह ।

सुसंवीता तदा भूत्वा देववत् कृष्णमीक्षति ॥ १०॥
सा तदा दूयमानेन हृदयेन मनस्विनी ।
दृष्ट्वा गोविन्दमायान्तं कृपणं पर्यदेवयत् ॥ ११॥

उत्तरा—

पुण्डरीकाक्ष पश्य त्वं बालाविह विनाकृतौ ।
अभिमन्युं च मां चैव हतौ तुल्यं जनार्दन ॥ १२॥
वार्ष्णेय मधुहन् वीर शिरसा त्वां प्रसादये ।
द्रोणपुत्रास्त्रनिर्दग्धं जीवयैनं जनार्दन ॥ १३॥
यदि स्म धर्मराजेन भीमसेनेन वा पुनः ।
त्वया वा पुण्डरीकाक्ष वाक्यमुक्तमिदं भवेत् ॥ १४॥
अजातानामिषीकेयं जनित्रीं हन्त्विति प्रभो ।
अहमेवं विनष्टा स्यां नेदमेवं गतं भवेत् ॥ १५॥
गर्भस्थस्यास्य बालस्य ब्रह्मास्त्रेण निपातनम् ।
कृत्वा नृशंसं दुर्बुद्धिर् द्रौणिः किं फलमश्नुते ॥ १६॥
सा त्वां प्रणम्य शिरसा याचे शत्रुनिबर्हण ।
प्राणांस्त्यक्ष्यामि गोविन्द नायं जीवति वा यदि ॥ १७॥
अस्मिन् हि बहवः कृष्ण ये ममासन् मनोरथाः ।
ते द्रोणपुत्रेण हताः किं नु जीवामि केशव ॥ १८॥
आसीन्मम मतिः कृष्ण पूर्णोत्सङ्गा जनार्दन ।

अभिवादयिष्ये हृष्टेति तदिदं वितथं कृतम् ॥ १९॥
चपलाक्षस्य दायादे मृतेऽस्मिन् पुरुषर्षभ ।
विफला मे कृताः कृष्ण हृदि सर्वे मनोरथाः ॥ २०॥
चपलाक्षः किलातीव प्रियस्ते मधुसूदन ।
सुतमीक्षस्व तस्यैनं ब्रह्मास्त्रेण निपातितम् ॥ २१॥
[1]कृतघ्नोऽयं नृशंसोऽयं यथाऽस्य जनकस्तथा ।
यः पाण्डवीं श्रियं त्यक्त्वा गतोऽद्य यमसादनम् ॥ २२॥
मया चैतत् प्रतिज्ञातं रणमूर्धनि केशव ।
अभिमन्यौ हते वीर त्वामेष्याम्यचिरादिव ॥ २३॥
तच्च नाकरवं कृष्ण नृशंसा जीवितप्रिया ।
इदानीमागतां तत्र किं नु वक्ष्यति फाल्गुनिः ॥ २४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥
॥ ९२ ॥ अनुगीतापर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
[ अस्मिन्नध्याये २४॥ श्लोकाः ]

## ॥ द्वासप्ततितमोऽध्यायः ॥

कृष्णेन सशपथं संस्पर्शनेन परीक्षितः समुज्जीवनम् ॥ १ ॥

वैशम्पायनः—

एवं विलप्य करुणं सोन्मादेव तपस्विनी ।
उत्तरा न्यपतद्भूमौ कृपणा पुत्रगर्द्धिनी ॥ १

1. क-ख-घ—प्रियस्तोऽयं भवेत् तात ।

तां तु दृष्ट्वा निपतितां हतबन्धुपरिच्छदाम् ।
चुक्रोश कुन्ती दुःखार्ता सर्वाश्च भरतस्त्रियः ॥ २

मुहूर्तमिव तद्राजन् पाण्डवानां निवेशनम् ।
अप्रेक्षणीयमभवद् आर्तस्वरविनादितम् ॥ ३

सा मुहूर्तं च राजेन्द्र पुत्रशोकाभिपीडिता ।
कश्मलाभिहता वीर वैराटी त्वभवत् तदा ॥ ४

प्रतिलभ्य तु सा संज्ञाम् उत्तरा भरतर्षभ ।
अङ्कमारोप्य तं पुत्रम् इदं वचनमब्रवीत् ॥ ५

उत्तरा—

धर्मज्ञस्य सुतस्संस्त्वं न धर्ममवबुध्यसे ।
यस्त्वं वृष्णिप्रवीरस्य कुरुषे नाभिवादनम् ॥ ६

[1]पुत्र गत्वा मम वचो ब्रूयास्त्वं पितरं तव ।
दुर्मरं प्राणिनां वीर कालेऽप्राप्ते कथञ्चन ॥ ७

याऽहं त्वया विहीनाऽद्य हीना पुत्रेण चैव ह ।
मरणं नाधिगच्छामि तव स्वस्ति न किञ्चन ॥ ८

अथवा धर्मराज्ञाऽहम् अनुज्ञाता महाभुज ।
खादयिष्ये विषं तीक्ष्णं प्रवेक्ष्याम्यथवाऽनलम् ॥ ९

अथवा दुर्मरं तात यदिदं मे सहस्रधा ।
पतिपुत्रविहीनाया हृदयं नावदीर्यते ॥ १०

---

1. क-ख-घ—नास्तीदमर्धम् ।

उत्तिष्ठ पुत्र पश्येमां दुःखितां प्रपितामहीम् ।
आर्तामुपप्लुतां दीनां निमग्नां शोकसागरे ॥ ११

आर्यां च पश्य पाञ्चालीं सात्वतीं च तपस्विनीम् ।
मां च पश्य सुदुःखार्तां व्याधविद्धां मृगीमिव ॥ १२

उत्तिष्ठ पश्य वदनं लोकनाथस्य पश्यतः ।
पुण्डरीकविशालाक्षं पुरेव चपलेक्षणम् ॥ १३

वैशम्पायनः—

एवं विलपतीं तां तु दृष्ट्वा निपतितां पुनः ।
उत्तरां तां स्त्रियस्सर्वाः पुनरुत्थापयन्त्युत ॥ १४

उत्थाय च पुनर्धैर्यात् तदा मत्स्यपतेस्सुता ।
प्राञ्जलिः पुण्डरीकाक्षं भूमावेवाभ्यवन्दत ॥ १५

श्रुत्वा तस्यापि विपुलं विलापं पुरुषर्षभः ।
उपस्पृश्य ततः कृष्णो ब्रह्मास्त्रं सञ्जहार तत् ॥ १६

प्रतिजज्ञे स दाशार्हस् तस्य जीवितमच्युतः ।
अब्रवीच्च विशुद्धात्मा सर्वं विश्रावयञ्जगत् ॥ १७

श्रीभगवान्—

न ब्रवीम्युत्तरे मिथ्या सत्यमेतद्भविष्यति ॥
एष सञ्जीवयाम्येनं पश्यतां सर्वदेहिनाम् ॥ १८

नोक्तपूर्वं मया मिथ्या स्वैरेष्वपि कदाचन ।
न च युद्धात् परावृत्तस् तथा सञ्जीवयाम्यहम् ॥ १९

यथा मे दयितो धर्मो ब्राह्मणाश्च विशेषतः ।
अभिमन्योस्सुतो जातो मृतो जीवत्वयं तथा ॥ २०

यथाऽहं नाभिजानामि विजये न कदाचन ।
विरोधं तेन सत्येन मृतो जीवत्वयं शिशुः ॥ २१

यथा सत्यं च धर्मश्च मया नित्यं प्रतिष्ठितौ ।
तथा मृतश्शिशुरयं जीवत्वद्याभिमन्युजः ॥ २२

यथा कंसश्च केशी च धर्मेण निहतौ मया ।
तेन सत्येन बालोऽयं पुनरुज्जीवयामि ह ॥ २३

वैशम्पायनः—

इत्युक्त्वा वासुदेवोऽथ तं बालं भरतर्षभ ।
[1]हस्तेन कमलाभेन ब्रह्मरुद्रार्चितेन च ॥ २४
पस्पर्श पुण्डरीकाक्ष आपादतलमस्तकम् ॥ २४॥

स्पृष्टमात्रस्तु कृष्णेन स बाल अभिमन्युजः ।
शनैश्शनैर्महाराज प्रापद्यत स चेतनाम् ॥ २५॥
[2]शनैश्शनैर्महाराज प्रास्पन्दत सचेतनः ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्वासप्ततितमोऽध्यायः ॥ ७२ ॥
॥ ९२ ॥ अनुगीतापर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
[ अस्मिन्नध्याये २६ श्लोकाः ]

---

1. क-ख-घ—इतः श्लोकद्वयं नास्ति 2. अ—उदमर्धं नास्ति

## ॥ त्रिसप्ततितमोऽध्यायः ॥

कृष्णेनाभिमन्युसुतस्य पदप्रवृत्तिनिमित्तकथनपूर्वकं नामकरणम् ॥ १ ॥ अत्रान्तरे युधिष्ठिरादीनां स्वर्णभारानयनेन हास्तिनपुरं प्रत्यागमन-श्रवणेन कृष्णादिभिस्तत्प्रत्युद्यानम् ॥ २ ॥

वैशम्पायनः—

ब्रह्मास्त्रं तु महाराज कृष्णेन प्रतिसंहृतम् ।
तदा तद्वेद्मि ते पित्रा [1]सर्वतोऽपि विदीपितम् ॥ १

ततो रक्षांसि सर्वाणि नेशुस्त्यक्त्वा गृहं तु तत् ।
अन्तरिक्षे च वागासीत् साधु केशव साध्विति ॥ २

तदस्त्रं ज्वलितं चापि पितामहमगात् तदा ।
ततः प्राणान् पुनर्लेभे पिता तव जनेश्वर ॥ ३

व्यचेष्टत च बालोऽसौ यथोक्तं शौरिणा तदा ।
बभूवुर्मुदिता राजंस् ततस्ता भरतस्त्रियः ॥ ४

ब्राह्मणा वाचयामासुर् गोविन्दस्य च शासनात् ।
ततस्ता मुदितास्सर्वाः प्रशशंसुर्जनार्दनम् ॥ ५

स्त्रियो भरतसिंहानां नावं दृष्ट्वेव पारगाः ॥ ५॥

कुन्ती द्रुपदपुत्री च सुभद्रा चोत्तरा तथा ।

1. ब—सर्वलोकप्रदीपितम् । अ—तेजसा हि विपीडितः ।

स्त्रियश्चान्या नृसिंहानां बभूवुर्हृष्टमानसाः ॥ ६॥

तत्र मल्ला नटा झल्ला रज्जिकास्सौखशायिकाः ।
सूतमागधसङ्घाश्चाप्यस्तुवंस्तं जनार्दनम् ॥ ७॥

[1]कुरुवंशस्तवार्थाभिर् आशीर्भिर्भरतर्षभ ।
सभाजयत संहृष्टो महाराज महाजनः ॥ ८॥

उत्थाय तु यथाकालम् उत्तरा यदुनन्दनम् ।
अभ्यवादयत प्रीता सह पुत्रेण भारत ॥ ९॥

तस्यै कृष्णो ददौ प्रीतो बहुरत्नं विशेषवित् ।
तथैव वृष्णिशार्दूलो नाम चास्याकरोत् प्रभुः ॥ १०॥

पितुस्तव महाराज सत्यसन्धो जनार्दनः ॥ ११

परिक्षीणे कुले यस्माज् जातोऽयमभिमन्युजः ।
परीक्षिदिति नामास्य भवत्वित्यब्रवीत् तदा ॥ १२

सोऽवर्धत यथाकालं पिता तव नराधिप ।
मनःप्रह्लादनश्चासीत् सर्वलोकस्य भारत ॥ १३

मासं जातस्तु ते वीर पिता भवति भारत ।
अथाजग्मुस्सुबहुलं रत्नमादाय पाण्डवाः ॥ १४

मेरुकूटनिभान् भाण्डान् कलशान् भाजनानि च ।
कृताकृतं महद्धैमम् आदाय पुरुषोत्तमाः ॥ १५

---

1. अ—अर्धद्वयं नास्ति

भारार्तैर्वाह्यनैस्तत्र गोरुते गोरुते पथि ।
निवसन्तो ययुर्देवं स्मरन्तः परमेष्ठिनम् ॥ १६

नासीत् तत्र नरः कश्चिद् अभारार्तो नृपं विना ।
भीमादयोऽपि यज्ञार्थं वहन्ते किं पुनर्जनाः ॥ १७

तान् समीपगतान् दृष्ट्वा निर्ययुर्वृष्णिपुङ्गवाः ।
अलञ्चक्रुश्च माल्यौघैर् नगरं नागसाह्वयम् ॥ १८

पताकाभिर्विचित्राभिर् ध्वजैश्च विविधैरपि ।
वेश्मानि समलञ्चक्रुः पौराश्चापि नराधिप ॥ १९

देवतायतनानां च पूजा बहुविधास्तथा ।
सन्दिदेशाथ विदुरः पाण्डुपुत्रप्रियेप्सया ॥ २०

राजमार्गाश्च तत्रासन् सुमनोभिरलङ्कृताः ।
शुशुभे तत् पुरं चापि समुद्रौघनिभस्वनम् ॥ २१

नर्तकैश्चापि नृत्यद्भिर् गायकानां च निस्स्वनैः ।
आसीद्वैश्रवणस्येव निवासस्तत् पुरं तदा ॥ २२

वन्दिभिश्च नरै राजन् स्त्रीसहायैस्सहस्रशः ।
तत्र तत्र विविक्तेषु समन्तादुपशोभितम् ॥ २३

[1]पताका धूयमानाश्च समन्तान्मातरिश्वना ।
अदर्शयन्निव तदा कुरून् वै दक्षिणोत्तरान् ॥ २४

---

1. क-ख-घ—इतः श्लोकद्वयं नास्ति

अघोषयंस्तदा चापि पुरुषा राजमार्गतः ।
सर्वरात्रविहारोऽद्य रत्नाभरणलक्षणः ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
[ अस्मिन्नध्याये २५ श्लोकाः ]

---

## ॥ चतुस्सप्ततितमोऽध्यायः ॥

कृष्णादिभिः प्रत्युद्गम्यमानैर्युधिष्ठिरादिभिः स्वर्णभारपुरस्कारेण हास्तिनपुरप्रवेशः ॥ १ ॥ ततस्तल्लोपागतेन व्यासेन युधिष्ठिरं प्रत्यश्वमेधप्रशंसनपूर्वकं तत्करणविधानम् ॥ २ ॥ युधिष्ठिरेणाश्वमेधे स्वयं दीक्षास्वीकारं प्रार्थितेन कृष्णेन सहेतुकथनं तं प्रत्येव दीक्षास्वीकारविधानम् ॥ ३ ॥

---

वैशम्पायनः—

तान् समीपगतान् श्रुत्वा पाण्डवान् छत्रुकर्शनः ।
वासुदेवस्सहामात्यः प्रत्युद्यातो दिदृक्षया ॥ १
ते समेत्य यथान्यायं पाण्डवा वृष्णिभिस्सह ।
विविशुस्सहिता राजन् पुरं वारणसाह्वयम् ॥ २
महतस्तस्य सैन्यस्य रथनेमिस्वनेन च ।
द्यावापृथिव्यौ खं चैव शब्देनासीत् समावृतम् ॥ ३
ते कोशमग्रतः कृत्वा विविशुस्स्वपुरं तदा ।

पाण्डवाः प्रीतमनसस् सामात्यास्ससुहृद्गणाः ॥ ४

ते समेत्य यथान्यायं धृतराष्ट्रं जनेश्वरम् ।
कीर्तयन्तस्स्वनामानि तस्य पादौ ववन्दिरे ॥ ५

धृतराष्ट्रस्यानुमते गान्धारीं सुबलात्मजाम् ।
कुन्तीं च राजशार्दूल तदा भरतसत्तमाः ॥ ६

विदुरं पूजयित्वा च वैश्यापुत्रं समेत्य च ।
पूज्यमानास्तु ते वीरा व्यराजन्त विशाम्पते ॥ ७

ततस्तत् परमाश्चर्यं विचित्रं महदद्भुतम् ।
शुश्रुवुस्ते महावीराः पितुस्ते जन्म भारत ॥ ८

तदुपश्रुत्य ते कर्म वासुदेवस्य धीमतः ।
पूजार्हं पूजयामासुः कृष्णं देवकिनन्दनम् ॥ ९

ततः कतिपयाहस्सु व्यासस्सत्यवतीसुतः ।
आजगाम महातेजा नगरं नागसाह्वयम् ॥ १०

तस्य सर्वे यथान्यायं पूजां चक्रुः कुरूद्वहाः ।
सह वृष्ण्यन्धकव्याघ्रैर् उपासाञ्चक्रिरे तदा ॥ ११

तत्र नानाविधाकाराः कथास्समनुकीर्त्य वै ।
युधिष्ठिरो धर्मसुतो व्यासं वचनमब्रवीत् ॥ १२

युधिष्ठिरः—

भवत्प्रसादाद्भगवन् यदिदं रत्नमाहृतम् ।

उपयोक्तुं तदिच्छामि वाजिमेधे महाक्रतौ ॥ १३

तदनुज्ञातुमिच्छामि भवता मुनिसत्तम ।
त्वदधीना वयं सर्वे कृष्णेन च महात्मना ॥ १४

व्यासः—

अनुजानामि राजंस्त्वां क्रियतां यदनन्तरम् ।
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ॥ १५

अश्वमेधो हि राजेन्द्र पावनस्सर्वपाप्मनाम् ।
तेनेष्ट्वा त्वं विपाप्मा वै भविता नात्र संशयः ॥ १६

वैशम्पायनः—

इत्युक्तस्स तु धर्मात्मा कुरुराजो युधिष्ठिरः ।
अश्वमेधस्य कौरव्य चकाराहरणे मतिम् ॥ १७

समनुज्ञाप्य तु स तं कृष्णद्वैपायनं नृप ।
वासुदेवमथामन्त्र्य वाग्मी वचनमब्रवीत् ॥ १८

युधिष्ठिरः—

देवकी सुप्रजा देव त्वया पुरुषसत्तम ।
यद्भूयास्त्वं महाबाहो तत् कुर्यामहमच्युत ॥ १९

त्वं गतिस्सर्वभूतानाम् इति मे निश्चिता मतिः ।
त्वत्प्रभावार्जितान् भोगान् अश्नीमो यदुनन्दन ॥ २०

पराक्रमेण बुद्ध्या च तवेयं निर्जिता मही ॥ २०॥

दीक्षयस्व त्वमात्मानं त्वं हि नः परमो गुरुः ।
त्वयीष्टवति धर्मज्ञ विपाप्मा स्यामहं विभो ॥ २१॥

त्वं हि यज्ञोऽक्षरश्शब्दो धर्मज्ञस्त्वं प्रजापतिः ॥ २२

श्रीभगवान्—

त्वमेवैतन्महाबाहो वक्तुमर्हस्यरिन्दम ।
त्वं गतिस्सर्वभूतानाम् इति मे निश्चिता मतिः ॥ २३

त्वं चाद्य कुरुवीराणां धर्मेणाति विराजसे ।
गुरुभूतस्तु मे राजंस् त्वं नो राजा मतो गुरुः ॥ २४

यजस्व वाजिमेधेन प्राप्त एष क्रतुस्त्वया ।
युनक्तु नो भवान् कार्ये यत्र वाञ्छसि भारत ॥ २५

सत्यं ते प्रतिजानामि सर्वं कर्तास्मि तेऽनघ ॥ २५॥

भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ ।
इष्टवन्तो भविष्यन्ति त्वयीष्टवति पार्थिव ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥
॥ ५२ ॥ अनुगीतापर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
[ अस्मिन्नध्याये २६॥ श्लोकाः ]

## ॥ पञ्चसप्ततितमोऽध्यायः ॥

व्यासेन युधिष्ठिरं प्रति पृथिवीसञ्चाराय मेध्याश्वोत्सर्जनचोदना ॥ १ ॥ तथाऽश्वरक्षणेऽर्जुनस्य नियोजनम् ॥ २ ॥

वैशम्पायनः—

एवमुक्तस्तु कृष्णेन धर्मराजो युधिष्ठिरः ।
व्यासमामन्त्र्य मेधावी ततो वचनमब्रवीत् ॥ १

युधिष्ठिरः—

यदा कालं भवान् वेत्ति हयमेधस्य तत्त्वतः ।
दीक्षयस्व तदाऽऽत्मानं त्वदायत्तो हि मे क्रतुः ॥ २

व्यासः—

अहं पैलोऽथ कौन्तेय याज्ञवल्क्यस्तथैव च ।
विधानं यद्यथाकालं तत् कर्तारो न संशयः ॥ ३
चैत्र्यां हि पौर्णमास्यां वै तव दीक्षा भविष्यति ।
सम्भारास्सम्भ्रियन्तां ते यज्ञार्थं पुरुषर्षभ ॥ ४
अश्वविद्याविदश्चैव सूता विप्राश्च तद्विदः ।
मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये ॥ ५
तमुत्सृज यथाशास्त्रं पृथिवीं सागराम्बराम् ।
स पर्येतु यशो [1]दीप्तं तव पार्थिव वर्धयन् ॥ ६

1. क—वाहिं + सत्तम । ख—वाही × सत्तम ।

वैशम्पायनः—

इत्युक्तस्स तथेत्युक्त्वा पाण्डवः पृथिवीपतिः ।
चकार सर्वं राजेन्द्रो यथोक्तं ब्रह्मवादिना ॥ ७

सम्भाराश्चैव राजेन्द्र सर्वे सङ्कल्पिता भवन् ॥ ७॥

स सम्भारान् समाहृत्य नृपो धर्मात्मजस्तदा ।
न्यवेदयदमेयात्मा कृष्णद्वैपायनाय वै ॥ ८॥

ततोऽब्रवीन्महातेजा व्यासो धर्मात्मजं नृपम् ॥ ९

व्यासः—

यथाकालं यथायोगं सज्जास्स्म तव दीक्षणे ॥ ९॥

स्रुक् च कूर्चं च सौवर्णं यच्चान्यदपि कौरव ।
यत्तु योग्यं भवेत् किञ्चित् [1]तद्रौक्मं क्रियतामिह ॥ १०॥

अश्वश्चोत्सृज्यतामद्य पृथ्व्यामथ यथाक्रमम् ।
सुगुप्तश्च चरत्वेष यथाशास्त्रं युधिष्ठिर ॥ ११॥

युधिष्ठिरः—

अयमश्वो यथा ब्रह्मन्नुत्सृष्टः पृथिवीमिमाम् ।
चरिष्यति यथाकामं तत्र सम्यग्विधीयताम् ॥ १२॥

पृथिवीं पर्यटन्तं हि तुरगं कामचारिणम् ।
कः पालयेदिति मुने तद्भवान् वक्तुमर्हति ॥ १३॥

1. क—तद्रौप्यं क्रियतामिति ।

वैशम्पायनः—

इत्युक्तस्य तु राजेन्द्र कृष्णद्वैपायनोऽब्रवीत् ॥ १४

व्यासः—

भीमसेनादवरजश् श्रेष्ठस्सर्वधनुष्मताम् ।
जिष्णुस्साहिष्णु[1]र्धर्मिष्णुस् स एनं पालयिष्यति ॥ १५

शक्तस्य हि महीं जेतुं निवातकवचान्तकः ।
तस्मिन्नस्त्राणि दिव्यानि वर्तन्ते खलु सर्वदा ॥ १६
दिव्यं धनुश्चेषुधी च स एनमनुयास्यति ॥ १६॥

[2]स हि धर्मार्थकुशलस् सर्वविद्याविशारदः ।
यथाशास्त्रं नृपश्रेष्ठ चारयिष्यति ते हयम् ॥ १७॥

राजपुत्रो महाबाहुश् श्यामो राजीवलोचनः ।
अभिमन्योः पिता वीरस् स एनमनुयास्यति ॥ १८॥

भीमसेनोऽपि तेजस्वी कौन्तेयोऽमितविक्रमः ।
समर्थो रक्षितुं राष्ट्रं नकुलश्च विशाम्पते ॥ १९॥

सहदेवस्तु कौरव्य [3]सर्वमन्यत् करिष्यति ।
कुटुम्बतन्त्रं [4]विधिवत् सर्वमेतन्महायशाः ॥ २०॥

---

1. क-ख—:कृष्णश्च ।
2. अ—अर्धचतुष्टयं नास्ति
3. क-ख—स्सुनीतिस्सुमङ्गलमतिः ।
4. क-ख—सुमहत् सर्वमेव ।

वैशम्पायनः—

एतत् सर्वं यथान्यायम् उक्तं कुरुकुलोद्वहः ।
चकार फल्गुनं चापि सन्दिदेश हयं प्रति ॥ २१॥

युधिष्ठिरः—

एह्यर्जुन त्वया वीर हयोऽयं परिपाल्यताम् ।
त्वमर्हो रक्षितुं ह्येनं नान्यः कश्चन मानवः ॥ २२॥

ये चापि त्वां महाबाहो प्रत्युदीयुर्नराधिपाः ।
तैर्विग्रहो यथा न स्यात् तथा कार्यं [1]त्वयाऽनघ ॥ २३॥

आख्यातव्यश्च भवता यज्ञोऽयं मम सर्वशः ।
पार्थिवेभ्यो महाबाहो समये गम्यतामिति ॥ २४॥

वैशम्पायनः—

एवमुक्त्वा स धर्मात्मा भ्रातरं सव्यसाचिनम् ।
भीमं च नकुलं चैव पुरगुप्तौ समादधत् ॥ २५॥

कुटुम्बतन्त्रे च तदा सहदेवं युधां पतिम् ।
अनुमान्य महीपालं धृतराष्ट्रं युधिष्ठिरः ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
[ अस्मिन्नध्याये २६॥ श्लोकाः ]

---

1. क-ख—तथा त्वरन् ।

## ॥ षट्सप्ततितमोऽध्यायः ॥

अर्जुनेन युधिष्ठिरनियोगाद् ब्राह्मणैः क्षत्रियैश्च सह प्रथममुत्तरदिश्यश्वसञ्चारणेन रक्षणाय तदनुसरणम् ॥ १ ॥

वैशम्पायनः—

दीक्षाकाले तु सम्प्राप्ते ततस्ते सुमहर्त्विजः ।
विधिवद्दीक्षयामासुर् अश्वमेधाय पार्थिवम् ॥ १

[1]कृत्वा स पशुमेधांस्तु दीक्षितः पाण्डुनन्दनः ।
धर्मराजो महातेजास् सहर्त्विग्भिर्व्यरोचत ॥ २

हयश्च हयमेधार्थं स्वयं स ब्रह्मवादिना ।
उत्सृष्टश्शास्त्रविधिना व्यासेनामिततेजसा ॥ ३

स राजा धर्मतो राजन् दीक्षितो बिबभौ तदा ।
हेममाली रुक्मकण्ठः प्रदीप्त इव पावकः ॥ ४

[2]कृष्णाजिनी दण्डपाणिः क्षौमवासास्स धर्मजः ।
बिबभौ द्युतिमान् भूयः प्रजापतिरिवाध्वरे ॥ ५

तथैवास्यर्त्विजस्सर्वे तुल्यवेषा विशाम्पते ।
बभूवुरर्जुनश्चैव प्रदीप्त इव पावकः ॥ ६

[3]श्वेताश्वः कपिकेतुश्च ससाराश्वं धनञ्जयः ।

1. क-ख—स कृत्वा पशुबन्धांस्तु दीक्षितः पाण्डवोऽध्वरे ।
2. ख—अर्धचतुष्टयं नास्ति
3. अ—कृष्णसारं ससाराश्वं कपिकेतुं धनञ्जयः ।

[1]विधिवत् पृथिवीपाल धर्मराजस्य शासनात् ॥ ७

विक्षिपन् गाण्डिवं राजन् बद्धगोधाङ्गुलित्रवान् ।
तमश्वं पृथिवीपाल मुदा युक्तस्ससार ह ॥ ८

आकुमारं तदा राज[2]न्नागमत् तत् पुरं विभो ।
द्रष्टुकामं कुरुश्रेष्ठं प्रयास्यन्तं धनञ्जयम् ॥ ९

[3]तेषामन्योन्यसम्मर्दाद् ऊष्मैव समजायत ।
दिदृक्षूणां हयं तं च तं चैव हयसारिणम् ॥ १०

ततश्शब्दो महाराज दशाशाः प्रतिपूरयन् ।
बभूव वीक्षतां नृणां कुन्तीपुत्रं धनञ्जयम् ॥ ११

एष गच्छति कौन्तेयस् तुरगश्चैव दीप्तिमान् ।
समन्वेति महाबाहुस् संस्पृशन् धनुरुत्तमम् ॥ १२

एवं शुश्राव वदतां गिरो जिष्णुरुदारधीः ।
स्वस्ति तेऽस्तु व्रजारिष्टं पुनश्चैहीति भारत ॥ १३

अथापरे मनुष्येन्द्र पुरुषा वाक्यमब्रुवन् ।
नैनं पश्याम सम्मर्दे धनुरेतत् प्रदृश्यते ॥ १४

एतद्धि मेघनिर्ह्रादं विश्रुतं गाण्डिवं धनुः ।

---

1. अ—याज्ञवल्क्यस्सशिष्यश्च कुशलो यज्ञकर्मणि ।
प्रयात्यर्थेन सहितश् शान्त्यर्थं वेदपारगः ॥
अनुजग्मुर्महात्मानं क्षत्रियाश्च विशोऽपि च ॥ [अधिकः पाठः]
2. क-ख—नगरं नागसाह्वयम् । 3. अ-घ—अर्धचतुष्टयं नास्ति

स्वस्ति गच्छत्वरिष्टं वै पन्थानमकुतोभयम् ॥ १४
निवृत्तमेनं द्रक्ष्यामः पुनरेवं च तेऽब्रुवन् ॥ १५॥

[1]एवमादि मनुष्याणाम् अर्जुनो भरतर्षभ ।
शुश्राव मधुरा वाचः पुनः पुनरुदीरिताः ॥ १६॥

याज्ञवल्क्यस्सशिष्यश्च कुशलो यज्ञकर्मणि ।
प्रायात् पार्थेन सहितश् शान्त्यर्थं वेदपारगः ॥ १७॥

ब्राह्मणाश्च महीपाल बहवो वेदपारगाः ।
अनुजग्मुर्महात्मानं क्षत्रियाश्च विशोऽपि च ॥ १८॥

[2]पाण्डवैः पृथिवीमश्वो निर्जितां शस्त्रतेजसा ।
चचार स महाराज यथादेशं च सत्तम ॥ १९॥

यत्र युद्धानि वृत्तानि यान्यासन् पाण्डवस्य ह ।
तानि वक्ष्यामि ते वीर विचित्राणि महान्ति च ॥ २०॥

स हयः पृथिवीं राजन् प्रदक्षिणमरिन्दम ।
ससारोत्तरतः पूर्वं तन्निबोध महीपते ॥ २१॥

अवमृद्नन् स राष्ट्राणि पार्थिवानां हयोत्तमः ॥
शनैस्तथा परियया श्वेताश्वश्च महारथः ॥ २२॥

तत्र सङ्गणना नास्ति राज्ञामयुतशस्तदा ॥ २३

---

1. अ—इदमर्धं नास्ति
2. अ-क—विधिवत् पृथिवीपाल धर्मराजस्य शासनात् ।[ अधिकः पाठः ]

अयुध्यन्त महाराज क्षत्रिया हतबान्धवाः ।
किराता विकृता राजन् बहवो हि धनुर्धराः ॥ २४
म्लेच्छाश्चान्ये विनिकृताः पुरा राजन् महारणे ॥ २४॥
आर्याश्च पृथिवीपालाः प्रहृष्टनरवाहनाः ।
समीयुः पाण्डुपुत्रेण बहवो युद्धदुर्मदाः ॥ २५॥
एवं युद्धानि वृत्तानि तत्र तत्र विशाम्पते ।
अर्जुनस्य महीपालैर् नानादेशनिवासिभिः ॥ २६॥
यानि तूभयतो राजन् प्रवृत्तानि महान्ति च ।
तानि युद्धानि वक्ष्यामि कौन्तेयस्य महात्मनः ॥ २७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥
॥ ९२ ॥ अनुगीतापर्वणि षष्टितमोऽध्यायः ॥ ६० ॥
[ अस्मिन्नध्याये २७॥ श्लोकाः ]

---

## ॥ सप्तसप्ततितमोऽध्यायः ॥

अर्जुनेन त्रैगर्तानां पराजयः ॥ १ ॥

वैशम्पायनः—

त्रिगर्तैरभवद्युद्धं कृतवैरैः किरीटिनः ।
महारथसमाज्ञातैर् हतानां पुत्रनप्तृभिः ॥ १

ते तमाज्ञाय सम्प्राप्तं याज्ञियं तुरगोत्तमम् ।
विषयान्ते ततो वीरा दंशिताः पर्यवारयन् ॥ २

रथिनो बद्धतूणीरास् सदश्वैस्समलङ्कृतैः ।
परिवार्य हयं राजन् ग्रहीतुमुपचक्रमुः ॥ ३

ततः किरीटी सञ्चिन्त्य तेषां राज्ञां चिकीर्षितम् ।
वारयामास तान् सर्वान् सान्त्वपूर्वमरिन्दमः ॥ ४

तमनादृत्य ते सर्वे शरैरभ्यहनंस्तदा ।
तमोरजोभ्यां सञ्छन्नांस् तान् किरीटी न्यवारयत् ॥ ५

अब्रवीच्च ततो जिष्णुः प्रहसन्निव भारत ॥ ५॥

अर्जुनः—

निवर्तध्वमधर्मज्ञाश् श्रेयो जीवितमेव वः ॥ ६

वैशम्पायनः—

स्वयं वीरः प्रयास्यन् वै धर्मराजेन वारितः ।
"अबान्धवा न ते पार्थ हन्तव्याः क्षत्रिया" इति ॥ ७

स तदा तद्वचश्श्रुत्वा धर्मराजस्य धीमतः ।
तान् निवर्तध्वमित्याह न न्यवर्तन्त चापि ते ॥ ८

[1]ततस्त्रिगर्तराजानं सूर्यवर्माणमाहवे ।
वितत्य शरजालेन प्रजहास धनञ्जयः ॥ ९

1. घ—इतः श्लोकचतुष्टयं नास्ति

ततस्ते रथघोषेण खुरनेमिस्वनेन च ।
पूरयन्तो दिशस्सर्वा धनञ्जयमुपाद्रवन् ॥ १०
सूर्यवर्मा ततः पार्थं शराणां नतपर्वणाम् ।
शतान्यमुञ्चद्राजेन्द्र लाघवं त्वभिदर्शयन् ॥ ११
तथा चान्ये महेष्वासा ये तस्यैवानुयायिनः ।
मुमुचुश्शरवर्षाणि धनञ्जयमुपाद्रवन् ॥ १२
तताञ्शिगर्तैर्निर्मुक्तान् बहुभिस्सुबहून्छरान् ।
चिच्छेद पाण्डवो राजंस् ते भूमौ न्यपतंस्तदा ॥ १३
केतुवर्मा तु तेजस्वी तस्यैवावरजो युवा ।
युयुधे भ्रातुरर्थाय पाण्डवेन महात्मना ॥ १४
तमापतन्तं सम्प्रेक्ष्य केतुवर्माणमाहवे ।
अभ्यघ्नन्निशितैर्बाणैर् बीभत्सुः परवीरहा ॥ १५
केतुवर्मण्यभिहते धृतवर्मा महारथः ।
रथेनाशु समावृत्य शरैर्जिष्णुमवाकिरत् ॥ १६
तस्य तां शीघ्रतां ज्ञात्वा तुतोषातीव वीर्यवान् ।
गुडाकेशो महातेजा बालस्य धृतवर्मणः ॥ १७
न सन्दधा[1]नं ददृशे नाददानं च तं तदा ।
किरन्तमेव स शरान् ददृशे पाकशासनिः ॥ १८
स तु तं पूजयामास धृतवर्माणमाहवे ।

1. क-ख—नमद्राक्षीन्नाददानं तथा तदा।

मनसा तु मुहूर्तं वै रणे समभिहर्षयन् ॥ १९
न विव्याध रणे क्रुद्धं कुन्तीपुत्रो हसन्निव ।
सौभद्रस्येव तत् कर्म दृष्ट्वा बालस्य विस्मितः ॥ २०
तं पन्नगमिव क्रुद्धं कुरुवीरस्समयन्निव ।
प्रीतिपूर्वं महाराज न च प्राणैर्व्ययोजयत् ॥ २१
स तथा रक्ष्यमाणो वै पार्थेनामिततेजसा ।
धृतवर्मा शरं तीक्ष्णं मुमोच विजये तदा ॥ २२
स तेन विजयस्तूर्णम् अस्यन् विद्धः करे भृशम् ।
मुमोच गाण्डिवं हस्तात् तत् पपाताथ भूतले ॥ २३
धनुषः पततस्तस्य सव्यसाचिकराद्विभो ।
इन्द्रस्येवायुधस्यासीद् रूपं भरतसत्तम ॥ २४
तस्मिन् निपतिते दिव्ये महाधनुषि पार्थिव ।
जहास सस्वरं राजन् धृतवर्मा महाहवे ॥ २५
ततो रोषान्वितो जिष्णुः प्रमृज्य रुधिरं करात् ।
धनुरादत्त तद्दिव्यं शरवर्षैर्ववर्ष च ॥ २६
ततो हलहलाशब्दो दिविस्पृगभवत् तदा ।
नानाविधानां भूतानां तत् कर्मातीव शंसताम् ॥ २७
ततस्सम्प्रेक्ष्य सङ्क्रुद्धं कालान्तकयमोपमम् ॥
जिष्णुं त्रैगर्तका योधास् त्वरिताः पर्यवारयन् ॥ २८
अभिसृत्य परीप्सार्थं ततस्ते धृतवर्मणः ।

परिवव्रुर्गुडाकेशं तत्राक्रुद्ध्यद्धनञ्जयः ॥ २९
ततो योधाञ्जघानाशु तेषां स दश चाष्ट च ।
महेन्द्रवज्रप्रतिमैर् आयसैर्निशितैश्शरैः ॥ ३०
तांस्तु भग्नान् स सम्प्रेक्ष्य त्वरमाणो धनञ्जयः ।
शरैराशीविषाकारैर् जघान स्वनवद्धसन् ॥ ३१
ते भग्नमनसस्सर्वे त्रैगर्तास्तु महारथाः ।
दिशो विदुद्रुवू राजन् धनञ्जयशरार्दिताः ॥ ३२
हतावशिष्टा हि पुरा पार्थं दृष्टपराक्रमाः ।
तमूचुः पुरुषव्याघ्रं संशप्तकनिषूदनम् ॥ ३३

त्रैगर्ताः—

तव स्म किङ्करास्सर्वे सर्वे च वशगास्तव ।
आज्ञापयस्व नः पार्थ प्रहान् प्रेष्यानिव स्थितान् ॥ ३४
करिष्यामः प्रियं सर्वे तव कौरवनन्दन ॥ ३४॥

वैशम्पायनः—

एतदाज्ञाय वचनं सर्वांस्तानब्रवीत् तदा ॥ ३५

अर्जुनः—

जीवितं रक्षत नृपाश् शासनं गृह्यतां मम ॥ ३५॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

॥ ९२ ॥ अनुगीतापर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥

[अस्मिन्नध्याये ३५॥ श्लोकाः]

## ॥ अष्टसप्ततितमोऽध्यायः ॥

अर्जुनेन प्राग्ज्योतिषपुरमेत्याश्वरक्षणाय भगदत्तसुतेन वज्रदत्तेन सहायोधनम् ॥ १ ॥

वैशम्पायनः—

प्राग्ज्योतिषमथाभ्येत्य व्यचरत् स हयोत्तमः ।
भगदत्तात्मजस्तत्र निर्ययौ रणकर्कशः ॥ १

सहयं पाण्डुपुत्रं तं विषयान्तमुपागतम् ।
युयुधे भरतश्रेष्ठ वज्रदत्तो महीपतिः ॥ २

सोऽभिनिर्याय नगराद् भगदत्तसुतो नृपः ।
अश्वमायान्तमुन्मथ्य नगराभिमुखो ययौ ॥ ३

तमालक्ष्य महाबाहुः कुरूणामृषभस्तदा ।
गाण्डीवं विक्षिपंस्तूर्णं सहसा समुपाद्रवत् ॥ ४

ततो गाण्डीवनिर्मुक्तैर् इषुभिर्मोहितो नृपः ।
हयमुत्सृज्य तं वीरस् ततः पार्थमुपाद्रवत् ॥ ५

पुनः प्रविश्य नगरं दंशितस्तु नृपोत्तमः ।
आरुह्य नागप्रवरं निर्ययौ योद्धुकाङ्क्षया ॥ ६

पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
दोधूयमानेन तदा चामरेण महारथः ॥ ७

ततः पार्थं समासाद्य पाण्डवानां महारथम् ।
आहूतवान् हि कौरव्यं बाल्यान्मोहाच्च संयुगे ॥ ८

स वारणं नगप्रख्यं प्रभिन्नकरटामुखम् ।
प्रेषयामास सङ्क्रुद्धस् ततश्श्वेतहयं प्रति ॥ ९

विक्षरन्तं यथा मेघं परवारणवारणम् ।
शस्त्रवत् कल्पितं सङ्ख्ये [1]विशालं युद्धदुर्मदम् ॥ १०

प्रचोद्यमानस्स गजस् तेन राज्ञा महाबलः ।
तदाऽङ्कुशेन विबभावुत्पतिष्यन्निवाम्बरम् ॥ ११

तमापतन्तं सम्प्रेक्ष्य क्रुद्धो राजन् धनञ्जयः ।
भूमिष्ठो वारणगतं योधयामास भारत ॥ १२

वज्रदत्तस्तु सङ्क्रुद्धो मुमोचाशु धनञ्जये ।
तोमरानग्निसङ्काशाञ् छलभानिव वेगितान् ॥ १३

अर्जुनस्तानसम्प्राप्तान् गाण्डीवप्रेषितैश्शरैः ।
द्विधा त्रिधा च चिच्छेद ख एव खगमैस्तदा ॥ १४

स तान् दृष्ट्वा तदा छिन्नांस् तोमरान् भगदत्तजः ।
इषूनसक्तांस्त्वरितः प्राहिणोत् पाण्डवं प्रति ॥ १५

ततोऽर्जुनस्तूर्णतरं रुक्मपुङ्खानजिह्मगान् ।
प्रेषयामास सङ्क्रुद्धो भगदत्तात्मजं प्रति ॥ १६

---

1. क—निस्सहं । ख-घ—विस्सहं ।

स तैर्विद्धो महातेजा वज्रदत्तो महाहवे ।
भृशं हतः पपातोर्व्यां न त्वेनमजहात् स्मृतिः ॥ १७

ततस्स पुनरारुह्य वारणप्रवरं रणे ।
अभ्यगं प्रेषयामास जयार्थी विजयं प्रति ॥ १८

तस्मै बाणांस्ततो जिष्णुर् निर्मुक्ताशीविषोपमान् ।
प्रेषयामास सङ्क्रुद्धो ज्वलितानिव पावकान् ॥ १९

स तैर्विद्धो महाभागो विस्रवन् रुधिरं बभौ ।
हिमवानिव शैलेन्द्रो बहुप्रस्रवणस्तदा । २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥
[ अस्मिन्नध्याये २० श्लोकाः ]

## ॥ एकोनाशीतितमोऽध्यायः ॥

अर्जुनेन भगदत्तात्मजपराजयः ॥ १ ॥

वैशम्पायनः—

एवं त्रिरात्रमभवत् तद्युद्धं भरतर्षभ ।
अर्जुनस्य नरेन्द्रेण वृत्रेणेव शतक्रतोः ॥ १

ततश्चतुर्थे दिवसे वज्रदत्तो महाबलः ।

जहास सस्वनं हासं वाक्यं चेदमथाब्रवीत् ॥ २

वज्रदत्तः—

अर्जुनार्जुन तिष्ठ त्वं न मे जीवन् विमोक्ष्यसे ।
त्वां निहत्य करिष्यामि पितुस्तोयं यथाविधि ॥ ३

त्वया वृद्धो मम पिता भगदत्तः पितुस्सखा ।
हतो वृद्धोऽपचायित्वा शिशुं मामद्य योधय ॥ ४

वैशम्पायनः—

इत्येवमुक्त्वा सङ्क्रुद्धो वज्रदत्तो नराधिपः ।
प्रेषयामास कौरव्य वारणं पाण्डवं प्रति ॥ ५

स प्रेष्यमाणो नागेन्द्रो वज्रदत्तेन धीमता ।
उत्पतिष्यन्निवाकाशे ह्यभिदुद्राव पाण्डवम् ॥ ६

अग्रहस्तप्रयुक्तेन शीकरेण स फल्गुनम् ।
[1]समुक्षत महाराज शैलं नील इवाम्बुदः ॥ ७

स तेन प्रेषितो राज्ञा मेघवद्विनदन् मुहुः ।
मुखाडम्बरघोषेण समाद्रवत फल्गुनम् ॥ ८

स नृत्यन्निव नागेन्द्रो वज्रदत्तप्रचोदितः ।
आससाद द्रुतं राजन् कौरवाणां महारथम् ॥ ९

तमापतन्तं सम्प्रेक्ष्य वज्रदत्तस्य वारणम् ।

1. क—इदमादि अर्धत्रयं नास्ति

गाण्डीवमाश्रित्य बली न ह्यकम्पत शत्रुहा ॥ १०

चुक्रोध बलवच्चापि पाण्डवस्तस्य भूपतेः ।
[1]कार्यविघ्नमनुस्मृत्य पूर्ववैरं च भारत ॥ ११

ततस्तु वारणं क्रुद्धश् शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥ १२

स नागप्रवरो वीर्याद् अर्जुनेन निवारितः ।
तस्थौ शरैर्विनुन्नाङ्गश् श्वाविच्छललितो यथा ॥ १३

निवारितं गजं दृष्ट्वा भगदत्तात्मजो नृपः ।
उत्ससर्ज शितान् बाणान् अर्जुने क्रोधमूर्छितः ॥ १४

अर्जुनस्तु महाराजश् शरैश्शरविघातिभिः ।
वारयामास तान् बाणांस् तदद्भुतमिवाभवत् ॥ १५

ततः पुनरपि क्रुद्धो राजा प्राग्ज्योतिषाधिपः ।
प्रेषयामास नागेन्द्रं बलवत् पर्वतोपमम् ॥ १६

तमापतन्तं सम्प्रेक्ष्य बलवान् पाकशासनिः ।
नाराचमग्निसङ्काशं प्राहिणोद्वारणं प्रति ॥ १७

तेन तद्वारणो राजन् मर्मण्यभिहतो भृशम् ।
पपात भूमौ सहसा वज्राहत इवाचलः ॥ १८

स पतञ्शुशुभे नागो धनञ्जयशराहतः ।

---

1. क-ख—कार्यं संस्मृत्य पूर्वं वै पूर्ववैरं च।

विशन्निव महाशैलो महीं वज्रप्रपीडितः ॥ १९
तस्मिन् निपतिते नागे वज्रदत्तस्य पाण्डवः ।
तं न भेतव्यमित्याह ततो भूमिगतं नृपम् ॥ २०

अर्जुनः—

"अब्रवीच्च महातेजाः प्रस्थितं मां युधिष्ठिरः ।
राजानस्ते न हन्तव्यास् तान् मोचय कथञ्चन ॥ २१
सर्वमेतन्नरव्याघ्र भवत्वेतावता कृतम् ।
योधाश्चापि न हन्तव्या कथञ्चन रणे त्वया ॥ २२
वक्तव्याश्चापि राजानस् सर्वैस्सह सुहृज्जनैः ।
युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम्" ॥ २३
इति भ्रातृवचश्श्रुत्वा न हन्मि त्वां नराधिप ।
उत्तिष्ठ न भयं तेऽस्ति स्वस्तिमान् भव पार्थिव ॥ २४
आगच्छेस्त्वं महाराज परां चैत्रीमुपस्थिताम् ।
तदाऽश्वमेधो भविता धर्मराजस्य धीमतः ॥ २५

वैशम्पायनः—

एवमुक्तस्स राजा तु भगदत्तात्मजस्तदा ।
तथेत्येवाब्रवीद्वाक्यं पाण्डवेनाभिनिर्जितः ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
[ अस्मिन्नध्याये २६ श्लोकाः ॥

---

## ॥ अशीतितमोऽध्यायः ॥



अश्वानुसरणवशात् सिन्धुदेशं गतेनार्जुनेन सैन्धवैस्सह महदायोधनम् ॥ १ ॥ बाणगणावकीर्णस्यार्जुनस्य कराद्गाण्डीवस्याधःपतने देवर्ष्यादिभिर्जपादिना तस्य तेजोदीपनम् ॥ २ ॥ ततः पुनरर्जुनस्य तैस्सहायोधनम् ॥ ३ ॥

---

वैशम्पायनः—

जित्वा प्रसाद्य राजानं भगदत्तसुतं तदा ।
विसृज्य याते तुरगे सैन्धवान् प्रति भारत ॥ १

सैन्धवैरभवद्युद्धं ततस्तस्य किरीटिनः ।
हतशेषैर्महायुद्धे हतानां च सुतैरपि ॥ २

तेऽवतीर्णमुपश्रुत्य विषयं श्वेतवाहनम् ।
प्रत्युद्ययुरमृष्यन्तो राजानः पाण्डवर्षभम् ॥ ३

अश्ववन्तं परामृश्य विषयान्ते विगाहितम् ।
न भयं चक्रिरे पार्थाद् भीमसेनादनन्तरात् ॥ ४

तेऽविदूराद्धनुष्पाणिं याज्ञियस्य हयस्य च ।
बीभत्सुं प्रत्यपश्यन्त पदातिं प्रत्युपस्थितम् ॥ ५

ततस्ते तं महावीर्यं राजानः पर्यवारयन् ।
जिगीषन्तो नरव्याघ्राः पूर्वं विनिकृता युधि ॥ ६

ते नामान्यथ गोत्राणि [1]कर्माणि विविधानि च ।
[2]कीर्तयन्तस्तदा पार्थं शरवर्षैरवाकिरन् ॥ ७

ते किरन्तश्शरांस्तीक्ष्णान् वारणेन्द्रनिवारणान् ।
रणे जयमभीप्सन्तः कौन्तेयं पर्यवारयन् ॥ ८

ते समीक्ष्य तु तं वीरम् उग्रकर्माणमाहवे ।
सर्वे युयुधिरे वीरा रथस्थास्तं पदातिनम् ॥ ९

ते तमाजघ्निरे वीरा निवातकवचान्तकम् ।
संशप्तकनिहन्तारं हन्तारं सैन्धवस्य च ॥ १०

ततो रथसहस्रेण गजानामयुतेन च ।
कोष्ठकीकृत्य कौन्तेयं सम्प्रस्थितमवारयन् ॥ ११

संस्मरन्तो वधं वीरास् सिन्धुराजस्य धीमतः ।
जयद्रथस्य कौरव्य समरे सव्यसाचिना ॥ १२

ततः पर्जन्यवत् सर्वे शरवृष्टिमवासृजन् ।
तैः कीर्णश्शुशुभे पार्थो रविर्मेघान्तरे यथा ॥ १३

स शरैस्समवच्छन्नो ददृशे पाण्डवर्षभः ।
पङ्क्तिरान्तरसञ्चारी शकुन्त इव भारत ॥ १४

ततो हाहाकृतं सर्वं कौन्तेये शरपीडिते ।
त्रैलोक्यमभवत् सर्वं रविश्चासीद्रजोरुणः ॥ १५

1. क-ख—श्रावयन्तः पुनः पुनः । 2. क-ख—कर्माणि च तदा ।

ततो ववौ महाराज मारुतो रोमहर्षणः ।
राहुरग्रसदादित्यं युगपत् सोममेव च ॥ १६

उल्काश्च जज्ञिरे सूर्यं कीर्यमाणास्समन्ततः ।
वेपथुश्चाभवद्राजन् कैलासस्य महागिरेः ॥ १७

मुमुचुश्चास्रमत्युष्णं दुःखशोकसमन्विताः ।
सप्तर्षयो जातभयास् तथा देवर्षयोऽपि च ॥ १८

शशश्चाशु विनिर्भिद्य मण्डलं शशिनोऽगमत् ।
विपरीतस्तथाऽऽकाशस् तस्मिन्नुत्पातलक्षणे ॥ १९

[1]रासभारुणसङ्काशा धनुष्मन्तस्सविद्युतः ।
आवृत्य गगनं मेघा मुमुचुर्मांसशोणितम् ॥ २०

एवमासीत् तदा वीरे शरवर्षाभिसंवृते ।
लोकेऽस्मिन् भरतश्रेष्ठ तदद्भुतमिवाभवत् ॥ २१

तस्य तेनाभिकीर्णेन शरजालेन सर्वतः ।
मोहात् पपात गाण्डीवम् आवापश्च करादपि ॥ २२

तस्मिन् मोहमनुप्राप्ते शरजालं महत्तरम् ।
सैन्धवा मुमुचुस्तूर्णं गतसत्वे महारथे ॥ २३

ततो मोहसमापन्नं ज्ञात्वा पार्थं दिवौकसः ।
सर्वे वित्रस्तमनसस् सर्वे शान्तिपरास्थिताः ॥ २४

---

1. क-ख-घ—सहस्रारुणसङ्काशाः ।

ततो देवर्षयस्सर्वे तथा सप्तर्षयोऽपि च ।
ब्रह्मर्षयश्च विजयं जेपुः पार्थस्य धीमतः ॥ २५
ततः प्रदीपिते देवैः पार्थतेजसि पार्थिव ।
तस्थावचलवद्धीमान् सङ्ग्रामे परमास्त्रवित् ॥ २६
विचकर्ष धनुर्दिव्यं ततः कौरवनन्दनः ।
वज्रस्येवेह शब्दोऽभून्महांस्तस्य पुनः पुनः ॥ २७
ततस्स शरवर्षाणि प्रत्यमित्रान् प्रति प्रभुः ।
ववर्ष च तथा पार्थो वर्षाणीव पुरन्दरः ॥ २८
ततस्ते सैन्धवा योधास् सर्व एव सराजकाः ।
नाट्टश्यन्त शरैः कीर्णाश् शलभैरिव पादपाः ॥ २९
तस्य शब्देन वित्रेसुर् भयार्ताश्च विदुद्रुवुः ।
मुमुचुश्चाश्रु शोकार्ता निकृत्ताश्चापि सैन्धवाः ॥ ३०
तांस्तु सर्वान् नरश्रेष्ठस् सर्वतो विचरद्बली ।
अलातचक्रवद्राजञ् शरजालैस्समर्पयन् ॥ ३१
[1]तमिन्द्रजालप्रतिमं बाणजालमभित्रहा ।
व्यसृजद् दिक्षु सर्वासु महेन्द्र इव सर्वतः ॥ ३२
[2]मेघजालनिभं सैन्यं विदार्य स रविप्रभः ।
विबभौ कौरवश्रेष्ठश् शरदीव दिवाकरः ॥ ३३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
[ अस्मिन्नध्याये ३३ श्लोकाः ]

---

1. क-ख—तं दृष्ट्वाऽप्रतिमं बाणं । 2. क-ख—फल्गुनो निहतं ।

## ॥ एकाशीतितमोऽध्यायः ॥

अर्जुनागमनश्रवणमात्रेण जयद्रथसुते मृते दुश्शलया तत्सुतमानीयार्जुनं प्रत्यभियानम् ॥ १ ॥ ततोऽर्जुनेन दुश्शलाप्रार्थनया तस्यां बहुमानेन च युद्धादुपरमः ॥ २ ॥

वैशम्पायनः—

ततो गाण्डीवभृच्छूरो युद्धाय समुपस्थितः ।
विबभौ युधि दुर्धर्षो हिमवानचलो यथा ॥ १

ततस्सैन्धवयोधास्ते पुनरेव व्यवस्थिताः ।
विमुञ्चन्तस्सुसंरब्धाश् शरवर्षाणि भारत ॥ २

तान् प्रसह्य महावीर्यः पुनरेव व्यवस्थितान् ।
ततः प्रोवाच कौन्ते[1]यो मुमूर्षूञ्श्लक्ष्णया गिरा ॥ ३

अर्जुनः—

युध्यध्वं परया शक्त्या यतध्वं च वधे मम ।
कुरुध्वं सर्वकार्याणि महद्वो भयमागतम् ॥ ४

एष योत्स्यामि वस्सर्वान् निवार्य शरवागुराम् ।
तिष्ठध्वं युद्धमनसो दर्पान् विनयितास्मि वः ॥ ५

वैशम्पायनः—

एतावदुक्त्वा कौरव्यो रोषाद्गाण्डीवभृत् तदा ।

1. क-ख—यस् तांस्तदा ।

न तताप वचस्स्मृत्वा भ्रातुर्ज्येष्ठस्य भारत ॥ ६

न हन्तव्या रणे तात क्षत्रिया विजिगीषवः ।
जेतव्याश्चेति यत् प्रोक्तं धर्मराज्ञा महात्मना ॥ ७

चिन्तयामास च तदा फल्गुनः पुरुषर्षभः ॥ ७॥

[1]इत्युक्तोऽहं नरेन्द्रेण न हन्तव्या नृपा इति ।
कथं तन्न मृषेह स्याद् धर्मराजवचश्शुभम् ॥ ८॥

न हन्तव्याश्च राजानो राज्ञश्चाज्ञा कृता भवेत् ॥ ९

इति सञ्चिन्त्य तु तदा भ्रातुः प्रियहिते रतः ।
प्रोवाच वाक्यं धर्मज्ञस् सैन्धवान् युद्धदुर्मदान् ॥ १०

अर्जुनः—

बालांस्त्रियो वा युद्धेषु न हिंसे समुपस्थितान् ॥ १०॥
यश्च वक्ष्यति सङ्ग्रामे तवास्मीति पराजितः ।
एतच्छ्रुत्वा वचो मह्यं कुरुध्वं हितमात्मनः ॥ ११॥
अतोऽन्यथा कृच्छ्रगता भविष्यथ मयाऽर्दिताः ॥ १२

वैशम्पायनः—

एवमुक्त्वा तु तान् वीरान् युयुधे नरपुङ्गवः ।
अत्वरावानसंरब्धस् संरब्धैर्विजिगीषुभिः ॥ १३
ततश्शतसहस्राणि शराणां नतपर्वणाम् ।

1. अ—अर्धचतुष्टयं नास्ति

मुमुचुस्सैन्धवा राजंस् तदा गाण्डीवधन्विनि ॥ १४

स तानापततः क्रूरान् आशीविषविषोपमान् ।
चिच्छेद निशितैर्बाणैर् अन्तरिक्षे धनञ्जयः ॥ १५

छित्त्वा तु तानाशु जवान् कङ्कपत्राञ्शिलाशितान् ।
एकैकमेष दशभिर् बिभेद समरे शरैः ॥ १६

ततः प्रासांश्च शक्तीश्च पुनरेव धनञ्जये ।
जयद्रथं हतं स्मृत्वा चिक्षिपुस्सैन्धवा नृप ॥ १७

तेषां किरीटी सङ्कल्पं मोघं चक्रे महामनाः ।
सर्वांस्तानन्तरा च्छित्त्वा मुदा चुक्रोश पाण्डवः ॥ १८

तथैवापततां तेषां योधानां जयगृद्धिनाम् ।
शिरांसि पातयामास भल्लैस्सन्नतपर्वभिः ॥ १९

तेषां विद्रवतां चैव पुनरेव च धावताम् ।
निवृत्तानां च शब्दोऽभूत् पूर्णस्येव महोदधेः ॥ २०

ते वध्यमाना हि तदा पार्थेनामिततेजसा ।
यथोत्साहं यथाशक्ति योधयामासुरर्जुनम् ॥ २१

ततस्ते फल्गुनेनाजौ शरैस्सन्नतपर्वभिः ।
कृता विसंज्ञा भूयिष्ठाः क्लान्तवाहनसैनिकाः ॥ २२

तांस्तु सर्वान् परिग्लानान् विदित्वा धृतराष्ट्रजा ;

[1]दुश्शला बालमादाय नप्तारं प्रययौ तदा ॥ २३
महारथ[2]सुतं वीरं रथेनानुगतं तदा ॥ २३॥
शान्त्यर्थं सर्वयोधानाम् अभ्यगच्छद्धि पाण्डवम् ॥ २४
सा धनञ्जयमासाद्य मुमोचार्तस्वरं तदा ।
धनञ्जयोऽपि तां दृष्ट्वा धनुर्विससृजे तदा ॥ २५
समुत्सृष्टधनुः पार्थो विधिवद्भगिनीं तदा ।
प्राह किं करवाणीति सा च तं वाक्यमब्रवीत् ॥ २६

दुश्शला—

एष ते भरतश्रेष्ठ स्वस्रीयस्यात्मजश्शिशुः ।
अभिवादयते वीर तं पश्य भरतर्षभ ॥ २७

वैशम्पायनः—

इत्युक्तस्तस्य पितरं स पप्रच्छार्जुनस्तदा ।
क्वासाविति ततो राजन् दुश्शला वाक्यमब्रवीत् ॥ २८

दुश्शला—

पितृशोकाभिसन्तप्तो विषादार्तोऽस्य वै पिता ।
पञ्चत्वमगमद्वीरो यथा तन्मे निशामय ॥ २९
स पूर्वं पितरं श्रुत्वा हतं युद्धे त्वयाऽनघ ।
त्वामागतं च संश्रुत्वा युद्धाय हयसारिणम् ॥ ३०
पितुश्च मृत्युदुःखार्तो जहौ प्राणान् धनञ्जय ॥ ३०॥

---

1. ख—इतः श्लोकद्वयं नास्ति
2. क-ख—सुतं वीरं रथेनागसं तदा ।

प्राप्तो बीभत्सुरित्येव नाम श्रुत्वैव तेऽनघ ।
विषादार्तः पपातोर्व्यां ममार च ममात्मजः ॥ ३१॥

तं दृष्ट्वाऽहं निपतितं ततस्तस्यात्मजं विभो ।
गृहीत्वा समनुप्राप्ता त्वामद्य शरणैषिणी ॥ ३२॥

वैशम्पायनः—

इत्युक्त्वाऽऽर्तस्वरं सा तु मुमोच धृतराष्ट्रजा ।
दीना दीनं स्थितं पार्थम् अब्रवीच्चाप्यधोमुखम् ॥ ३३॥

दुश्शला—

स्वसारं मामवेक्षस्व स्वस्रीयात्मजमेव च ।
कर्तुमर्हसि धर्मज्ञ दयां मयि कुरूद्वह ॥ ३४॥

विस्मृत्य कुरुराजानं तं च मन्दं जयद्रथम् ॥ ३५

अभिमन्योर्यथा जातः परीक्षित् परवीरहा ।
तथाऽयं सुरथाज्जातो मम पौत्रो महाभुज॥ ३६

तमादाय नरव्याघ्र प्राप्ताऽस्म्यद्य तवान्तिकम् ।
शमार्थं सर्वयोधानां शृणु चेदं वचो मम ॥ ३७

आगतोऽयं महाबाहो तस्य मन्दस्य पुत्रकः ।
[1]प्रसादमस्य बालस्य तस्मात् त्वं कर्तुमर्हसि ॥ ३८

एष प्रसाद्य शिरसा मया सार्धमरिन्दम ।
याचते त्वां महाबाहो शमं गच्छ धनञ्जय ॥ ३९

1. अ—अर्धमयं नास्ति

[1]बालस्य हतबन्धोश्च पार्थ किञ्चिदजानतः ।
प्रसादं कुरु धर्मज्ञ मा त्वं मन्युवशं गमः ॥ ४०
तमनार्यं नृशंसं च विस्मृत्यास्य पितामहम् ।
आगस्कारिणमत्यर्थं प्रसादं कर्तुमर्हसि ॥ ४१

वैशम्पायनः—

एवं ब्रुवत्यां करुणं दुःशलायां धनञ्जयः ।
संस्मृत्य देवीं गान्धारीं धृतराष्ट्रं जनेश्वरम् ॥ ४२
प्रोवाच पुत्रशोकार्तः क्षत्रधर्मं विगर्हयन् ॥ ४२॥

अर्जुनः—

धिक् तं दुर्योधनं क्षुद्रं राज्यलुब्धं च मानिनम् ।
यत्कृते बान्धवास्सर्वे मया नीता यमक्षयम् ॥ ४३॥

वैशम्पायनः—

[2]इत्युक्त्वा बहु सान्त्वादि प्रसादमकरोज्जयः ।
परिष्वज्य च तां प्रीतो विससर्ज गृहान् प्रति ॥ ४४॥
दुःशला चापि तान् सर्वान् निवार्य महतो रणात् ।
सम्पूज्य पार्थं प्रययौ गृहान् प्रति शुभानना ॥ ४५॥
ततस्सैन्धवकान् योधान् निर्जित्य स नरर्षभः ॥ ४६
[3]पुनरेवाश्वमेधार्थं हयं कामविचारिणम् ।

---

1. ख—अर्धचतुष्टयं नास्ति
2. ङ—इतः सार्धः श्लोको नास्ति
3. क-ख—हयमेधं च धावन्तं हयं कामविहारिणम् ।
ङ—हयमेव च धावन्तं ।

ससार याज्ञियं वीरो विधिवत् स विशाम्पते ॥ ४७

तारामृगमिवाकाशे देवदेवः पिनाकधृक् ॥ ४७॥

स पार्थिवान् वशे कृत्वा तांस्तान् देशान् यथासुखम् ।
विचचार यथाकामं कर्म पार्थस्य वर्धयन् ॥* ४८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥
॥ ९२ ॥ अनुगीतापर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

[ अस्मिन्नध्याये ४८॥ श्लोकाः ]

---

## ॥ द्व्यशीतितमोऽध्यायः ॥

अर्जुनेन मणलूरपुरं प्रति गमनम् ॥ १ ॥ तथा पितृभक्त्या विनयेनागतं चित्राङ्गदायां जातं स्वात्मजं बभ्रुवाहनं प्रति क्षत्रधर्मपरित्यागजरोषादुपालम्भः ॥ २ ॥ तमसहमानया उलूप्या नागलोकादेत्य बभ्रुवाहनस्यार्जुनेन सह युद्धप्रोत्साहनम् ॥ ३ ॥ बभ्रुवाहनेन स्वशरगाढाभिघातेन निपतिते पार्थे पितृमारणशोकेन मोहाधिगमः ॥ ४ ॥ ततश्चित्राङ्गदया रणाङ्गणमेत्य बहुधा विलापः ॥ ५ ॥

---

वैशम्पायनः—

क्रमेण स हयस्त्वेवं विचरन् भरतर्षभ ।
मणलूरुपतेर्देशं उपायात् सहपाण्डवः ॥ १

---

* क-ख—नाष्टाध्यायसमाप्तिर्दृश्यते ।

श्रुत्वा तु नृपतिर्वीरं पितरं बभ्रुवाहनः ।
निर्ययौ विनयेनार्यो ब्राह्मणाग्र्यपुरस्सरः ॥ २

मणलूरेश्वरं त्वेवम् उपयातं धनञ्जयः ।
नाभ्यनन्दत मेधावी क्षत्रधर्ममनुस्मरन् ॥ ३

उवाच चैनं धर्मात्मा समन्युः फल्गुनस्तथा ॥ ३॥

अर्जुनः—

प्रक्रियेयं न ते युक्ता बहिस्त्वं क्षत्रधर्मणः ॥ ४

संरक्ष्यमाणं तुरगं यौधिष्ठिरमुपागतम् ।
याज्ञियं विषयं त्वं मां नायोत्सीः किं नु पुत्रक ॥ ५

धिक् धिक् त्वां तु सुदुर्बुद्धिं क्षत्रधर्माविशारदम् ।
यो मां युधि सुसम्प्राप्तं सान्नैवाथो त्वमग्रहीः ॥ ६

न त्वया पुरुषार्थश्च कश्चिदस्तीह जीवता ।
यस्त्वं स्त्रीवद्युधा प्राप्तं साम्ना मां प्रतिगृह्णथाः ॥ ७

यद्यहं न्यस्तशस्त्रं त्वाम् आगच्छेयं सुदुर्मते ।
प्रक्रियेयं ततो युक्ता भवेत् तव नराधम ॥ ८

वैशम्पायनः—

तमेवमुक्तं भर्त्रा च विदित्वा पन्नगात्मजा ।
अमृष्यमाणा भित्त्वोर्वीम् उलूपी तमुपागमत् ॥ ९

सा ददर्श ततः पुत्रं विमृशन्तमधोमुखम् ।

सन्तर्ज्यमानमसकृद् भर्त्रा युद्धार्थिना विभो ॥ १०

ततस्सा चारुसर्वाङ्गी तमुपेत्योरगात्मजा ।
उलूपी प्राह वचनं क्षत्रधर्मोविशारदम् ॥ ११

उलूपी—

उलूपीं मां निबोध त्वं मातरं पन्नगात्मजाम् ।
कुरुष्व वचनं पुत्र धर्मस्ते भविता महान् ॥ १२

युद्ध्यस्वैनं कुरुश्रेष्ठं धनञ्जयमरिन्दमम् ।
एवमेष पिता प्रीतो भविष्यति न संशयः ॥ १३

वैशम्पायनः—

एवमुद्धर्षितो मात्रा स राजा बभ्रुवाहनः ।
मनश्चक्रे महातेजा युद्धाय भरतर्षभ ॥ १४

सन्नह्य काञ्चनं वर्म शिरस्त्राणं च भानुमत् ।
तूणीरशरसम्बाधम् आरुरोह महारथम् ॥ १५

सर्वोपकरणैर्युक्तं युक्तमश्वैर्मनोजवैः ।
सुचक्रोपस्करं धीमान् हेमभाण्डपरिष्कृतम् ॥ १६

परमार्चितमुच्छ्रित्य ध्वजं हंसं हिरण्मयम् ।
प्रययौ पार्थमुद्दिश्य स राजा बभ्रुवाहनः ॥ १७

ततोऽभ्येत्य हयं वीरो याज्ञियं पार्थरक्षितम् ।
ग्राहयामास पुरुषैर् हयशिक्षाविशारदैः ॥ १८

गृहीतं वाजिनं दृष्ट्वा प्रीतात्मा स धनञ्जयः ।
पुत्रं रथस्थं भूमिष्ठस् सन्न्यवारयदाहवे ॥ १९

ततस्स राजा तं वीरश् शरव्रातैस्सहस्रशः ।
अर्दयामास निशितैर् आशीविषविषोपमैः ॥ २०

तयोस्समभवद्युद्धं पितुः पुत्रस्य चातुलम् ।
देवासुररणप्रख्यम् उभयोः प्रीयमाणयोः ॥ २१

किरीटिनं तु विव्याध शरेणानतपर्वणा ।
जत्रुदेशे नरव्याघ्र प्रहसन् बभ्रुवाहनः ॥ २२

सोऽत्यगात् सह पुङ्खेन वल्मीकमिव पन्नगः ।
विनिर्भिद्य च कौन्तेयं महीतलमुपाविशत् ॥ २३

स गाढवेदनो धीमान् आलम्ब्य धनुरुत्तमम् ।
दिव्यं तेजस्समाविश्य निमीलित इवाबभौ ॥ २४

स संज्ञामुपलभ्याथ प्रशस्य पुरुषर्षभः ।
पुत्रं शक्रात्मजो वाक्यम् इदमाह महीपते ॥ २५

अर्जुनः—

साधु साधु महाबाहो वत्स चित्राङ्गदात्मज ।
सदृशं कर्म ते दृष्ट्वा प्रीतिमानस्मि पुत्रक ॥ २६

विमुञ्चाम्यद्य बाणांश्च युद्धे धीरो भवाद्य वै ॥ २६॥

वैशम्पायनः—

इत्येवमुक्त्वा नाराचैर् अभ्यवर्षदमित्रहा ॥ २७

तांस्तान् गाण्डीवनिर्मुक्तान् वज्राशनिसमस्वनान् ।
नाराचानच्छिनद्राजा सर्वानेव त्रिधा त्रिधा ॥ २८

तस्य पार्थश्शरैस्तीक्ष्णैर् ध्वजं हेमपरिष्कृतम् ।
सुवर्णतालप्रतिमं क्षणेनापाहरद्रथात् ॥ २९

हयांश्चास्य महाकायान् महावेगपराक्रमान् ।
चकार राजन् निर्जीवान् प्रहसन् पाण्डवर्षभः ॥ ३०

स रथादवतीर्याशु राजा परमकोपनः ।
पदातिः पितरं कोपाद् योधयामास पाण्डवम् ॥ ३१

सम्प्रीयमाणः पाण्डूनाम् ऋषभः पुत्रविक्रमात् ।
नात्यर्थं पीडयामास पुत्रं वज्रधरात्मजः ॥ ३२

[1]स हन्यमानोऽभिमुखं पितरं बभ्रुवाहनः ।
शरैराशीविषाकारैः पुनरेवार्दयद्बली ॥ ३३

ततस्स बाल्यात् पितरं विव्याध हृदि पत्रिणा ।
निशितेन सुपुङ्खेन बलवद्बभ्रुवाहनः ॥ ३४

स शरस्तेजसा दीप्तो ज्वलन्निव हुताशनः ।
विवेश पाण्डवं राजन् मर्म भित्त्वाऽतिदुःखकृत् ॥ ३५

1. क-ख—स मन्यमानो विमुखं ।

स तेनातिभृशं विद्धः पुत्रेण कुरुनन्दनः ।
महीं जगाम मोहार्तस् ततो राजन् धनञ्जयः ॥ ३६
तस्मिन् निपतिते वीरे कौरवाणां धुरन्धरे ।
सोऽपि मोहं जगामाशु तत्र चित्राङ्गदात्मजः ॥ ३७
व्यायम्य संयुगे राजा दृष्ट्वा च पितरं हतम् ।
पूर्वमेव च बाणौघैर् गाढविद्धोऽर्जुनेन सः ॥ ३८
भर्तारं निहतं श्रुत्वा पुत्रं च पतितं भुवि ।
चित्राङ्गदा परित्रस्ता प्रविवेश रणाजिरम् ॥ ३९
शोकसन्तप्तहृदया रुदती सा ततश्शुभा ।
मणलूरपतेर्माता ददर्श निहतं पतिम् ॥ ४०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥
॥ ९२ ॥ अनुगीतापर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥
[ अस्मिन्नध्याये ४० श्लोकाः ]

## ॥ द्व्यशीतितमोऽध्यायः ॥

चित्राङ्गदया रणाङ्गणनिपतितपतिपुत्रदर्शनाज्जातेन शोकातिरेकेण मोहाधिगमः ॥ १ ॥ तथा संज्ञोपलम्भे उलूपीं प्रत्युपालम्भगर्भवचनम् ॥२॥

वैशम्पायनः—
ततो बहुविधं भीरुर् विलप्य कमलेक्षणा ।
मुमोह दुःखाद् दुर्धर्षा निपपात च भूतले ॥ १

प्रतिलभ्य च सा संज्ञां देवी दिव्यवपुर्धरा ।
उलूपीं पन्नगसुतां दृष्ट्वेदं वाक्यमब्रवीत् ॥ २

चित्राङ्गदा—

उलूपि पश्य भर्तारं शयानं निहतं रणे ।
त्वत्कृते मम पुत्रेण बाणेन समितिञ्जयम् ॥ ३

ननु त्वमार्या धर्मज्ञा ननु चासि पतिव्रता ।
[1]यत् त्वत्कृतेऽयं पतितः पतिस्ते निहतो रणे ॥ ४

किं नु मन्दोऽपराद्धोऽयं यदि तेऽद्य धनञ्जयः ।
[2]उलूपि याच्यमाना मे सञ्जीवय धनञ्जयम् ॥ ५

ननु त्वमार्या धर्मज्ञा त्रैलोक्यविदितं शुभे ।
यद् घातयित्वा भर्तारं पुत्रेण न हि शोचसि ॥ ६

नाहं शोचामि तनयं निहतं पन्नगात्मजे ।
पतिमेव तु शोचामि यस्यातिथ्यमिदं कृतम् ॥ ७

वैशम्पायनः—

इत्युक्त्वा सा तदा देवीम् उलूपीं पन्नगात्मजाम् ।
भर्तारमभिगम्येदम् इत्युवाच यशस्विनी ॥ ८

चित्राङ्गदा—

उत्तिष्ठ कुरुमुख्य त्वं प्रियकाम मम प्रिय ।

---

1. ब—इतः श्लोकद्वयं नास्ति 2. ख—इदमर्धं नास्ति

अयमश्वो महाबाहो मया ते परिमोक्षितः ॥ ९

ननु नाम त्वया वीर धर्मराजस्य याज्ञियः ।
अयमश्वोऽनुसर्तव्यस् संशेषे किं महीतले ॥ १०

त्वयि प्राणास्समायत्ताः कुरूणां कुरुवर्धन ।
स कस्मात् प्राणदोऽन्येषां प्राणान् सन्त्यक्तवानसि ॥ ११

उल्लूपि साधु सम्पश्य भर्तारं निहतं रणे ।
पुत्रं चैनं समुत्साद्य पातयित्वा न शोचसि ॥ १२

कामं स्वपितु बालोऽयं भूमौ प्रेतगतिं गतः ।
लोहिताक्षो गुडाकेशो विजयस्साधु जीवतु ॥ १३

नापराधोऽस्ति सुभगे नराणां बहुभार्यता ।
नारीणां न भवत्येतन्मा ते भूद् बुद्धिरीदृशी ॥ १४

सख्यं चैतत् कृतं धात्रा शाश्वतं चाव्ययं च तत् ।
सख्यं समभिजानीहि सत्यं सङ्गतमस्तु ते ॥ १५

पुत्रेण पातयित्वेमं पतिं यदि न लज्जसे ।
जीवितं दर्शयस्वाद्य परित्यक्ष्यामि जीवितम् ॥ १६

साऽहं दुःखान्विता भीरुः पतिपुत्रविनाकृता ।
इहैव प्रायमासिष्ये पश्यन्त्यास्ते न संशयः ॥ १७

वैशम्पायनः—

इत्युक्त्वा पन्नगसुतां सपत्नी चैत्रवाहनी ।
ततः प्रायमुपासीना तूष्णीमासीज्जनाधिप ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
[ अस्मिन्नध्याये १८ श्लोकाः ]

---

## ॥ चतुरशीतितमोऽध्यायः ॥

चिराल्लब्धसंज्ञेन बभ्रुवाहनेनात्मानमुलूपीं चोपालभ्य प्रायोपवेशनम् ॥ १ ॥

---

वैशम्पायनः—

तथा विलप्योपरता भर्तुः पादौ प्रगृह्य सा ।
उपविष्टाऽभवद्देवी सोच्छ्वासं पुत्रमीक्षती ॥ १

ततस्संज्ञां पुनर्लब्ध्वा स राजा बभ्रुवाहनः ।
मातरं तामथालोक्य रणभूमावथाब्रवीत् ॥ २

बभ्रुवाहनः—

इतो दुःखतरं किं नु यन्मे माता सुखैधिता ।
भूमौ निपतितं वीरम् अनुशेते पतिव्रता ॥ ३

निहन्तारं रणेऽरीणां सर्वशस्त्रभृतां वरम् ।

मया विनिहतं सङ्ख्ये प्रेक्षते दुर्मरं पतिम् ॥ ४
अहोऽस्या हृदयं देव्या दृढं यन्न विदीर्यते ।
व्यूढोरस्कं महाबाहुं प्रेक्षन्त्याः पतितं पतिम् ॥ ५
दुर्मरं पुरुषेणेह मन्ये काले ह्यनागते ।
यत्र नाहं न मे माता विप्रयुक्तौ स्वजीवितात् ॥ ६
अहो धिक् कुरुवीरस्य किरीटं काञ्चनं भुवि ।
अपविद्धं हतस्येह मया पुत्रेण पश्यता ॥ ७
भो भो पश्यत मे वीरं पितरं ब्राह्मणा भुवि ।
शयानं वीरशयने मया पुत्रेण पातितम् ॥ ८
ब्राह्मणाः कुरुमुख्यस्य प्रयुक्ता हयसारिणः ।
कुर्वन्तु शान्तिकं त्वद्य रणे योऽयं मया हतः ॥ ९
आदिशन्तु च किं विप्राः प्रायश्चित्तमिहाद्य मे ।
सुनृशंसस्य पापस्य पितृहन्तू रणाजिरे ॥ १०
दुश्चरा द्वादश समा हत्वा पितरमद्य वै ।
ममेह सुनृशंसस्य संवीतस्यास्य कर्मणा ॥ ११
शिरःकपाले चास्यैव भुञ्जतः पितुरद्य मे ।
प्रायश्चित्तं हि नास्त्यन्यद्धत्वाऽद्य पितरं मम ॥ १२
पश्य नागोत्तमसुते भर्तारं निहतं मया ।
कृतं प्रियं मया तेऽद्य निहत्य समरेऽर्जुनम् ॥ १३

सोऽहमप्यद्य यास्यामि गतिं पितृनिषेविताम् ।
न शक्नोम्यात्मनाऽऽत्मानम् अहं धारयितुं शुभे ॥ १४

सा त्वं मयि मृते मातस् तथा गाण्डीवधन्वनि ।
भव प्रीतिमती देवि सत्येनात्मानमालभे ॥ १५

वैशम्पायनः—

इत्युक्त्वा स ततो राजा दुःखशोकसमाहतः ।
उपस्पृश्य महाराज दुःखाद्वचनमब्रवीत् ॥ १६

बभ्रुवाहनः—

शृण्वन्तु सर्वभूतानि स्थावराणि चराणि च ।
त्वं च मातर्यथा सत्यं ब्रवीमि भुजगोत्तमे ॥ १७

यदि नोत्तिष्ठति जयः पिता मे भरतर्षभः ।
अस्मिन्नेव रणोद्देशे शाययिष्ये कलेबरम् ॥ १८

न हि मे पितरं हत्वा निष्कृतिर्विद्यते क्वचित् ।
नरकं प्रतिपत्स्यामि ध्रुवं गुरुवधार्दितः ॥ १९

वीरं हि क्षत्रियं हत्वा गोसहस्रेण मुच्यते ।
पितरं तु निहत्यैवं दुष्करा निष्कृतिर्मम ॥ २०

एवं ह्येष महातेजाः पाण्डुपुत्रो धनञ्जयः ।
पिता च मम धर्मात्मा तस्य मे निष्कृतिः कुतः ॥ २१

वैशम्पायनः—

इत्येवमुक्त्वा नृपते धनञ्जयसुतो नृपः ।
उपस्पृश्याभवत् तूष्णीं प्रायोपेतो महामतिः ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
[ अस्मिन्नध्याये २२ श्लोकाः ]

---

## ॥ पञ्चाशीतितमोऽध्यायः ॥

बभ्रुवाहने प्रायोपविष्टे उलूप्या स्मरणमात्रसन्निहितसञ्जीवनमणिनाऽर्जुनस्य समुद्बोधनम् ॥ १ ॥ ततस्सुप्तोत्थितेनैव तेनार्जुनेन बभ्रुवाहनं प्रति चित्राङ्गदादीनां रणाङ्गणागमने कारणप्रश्ने तेनोलूपीं प्रति प्रश्नचोदना ॥ २ ॥

---

वैशम्पायनः—

प्रायोपविष्टे नृपतौ मणलूरेश्वरे तदा ।
पितृशोकसमाविष्टे सह माता परन्तप ॥ १
उलूपी चिन्तयामास तदा सञ्जीवनं मणिम् ॥ १॥
स चोपातिष्ठत तदा पन्नगानां परायणम् ॥ २
तं गृहीत्वा तु कौरव्य पन्नगाधिपतेस्सुता ।
मनःप्रह्लादनीं वाचं सैनिकानामथाब्रवीत् ॥ ३

उलूपी—

उत्तिष्ठ मा शुचः पुत्र नैष जिष्णुस्त्वया हतः ।
अजय्यः पुरुषैरन्यैर् देवैरपि सवासवैः ॥ ४
मया तु मोहनी नाम मायैषा सम्प्रयोजिता ।
प्रियार्थं पुरुषव्याघ्र पितुस्तेऽद्य यशस्विनः ॥ ५
जिज्ञासुर्ह्येष वै पुत्र बलस्य तव कौरवः ।
सङ्ग्रामे युद्ध्यमानस्य सम्प्राप्तः परवीरहा ॥ ६
तस्मादसि मया पुत्र युद्धार्थं परिचोदितः ।
मा पापमात्मनः [1]पुत्र शङ्केथा ह्यण्वपि प्रभो ॥ ७
ऋषिरेष महातेजाः पुरुषश्शाश्वतोऽव्ययः ।
नैनं शक्तो हि सङ्ग्रामे जेतुं शक्रोऽपि पार्थिव ॥ ८
अयं तु मे मणिर्दिव्यस् समानीतो विशाम्पते ।
मृतान् मृतान् पन्नगेन्द्रान् सञ्जीवयति सर्वदा ॥ ९
एनमस्योरसि त्वं च स्थापयाद्य पितुः प्रभो ।
सजीवितं पुनः पुत्र ततो द्रष्टासि पाण्डवम् ॥ १०

वैशम्पायनः—

इत्युक्तस्स्थापयामास तस्योरसि मणिं तदा ।
पार्थस्यामिततेजास्स पितुस्स्नेहादपापकृत् ॥ ११
तस्मिन् न्यस्ते मणौ वीर जिष्णुरुज्जीवितः प्रभुः ।

---

1. क-ख-घ—पुत्र शंसेथास्त्वं रणात् प्रभो ।

सुप्तोत्थित इवोत्तस्थौ स्पष्टलोहितलोचनः ॥ १२

तमुत्थितं महात्मानं लब्धसंज्ञं मनस्विनम् ।
समीक्ष्य पितरं स्वस्थं ववन्दे बभ्रुवाहनः ॥ १३

उत्थिते पुरुषव्याघ्रे [1]पुनर्लक्ष्मीवति प्रिये ।
दिव्यास्सुमनसः पुण्या ववर्ष बलसूदनः ॥ १४

अनाहता दुन्दुभयो प्रणेदुर्मेघनिस्स्वनाः ।
साधु साध्विति चाकाशे बभूव सुमहान् स्वनः ॥ १५

उत्थाय तु महाबाहुः पर्याश्वस्तो धनञ्जयः ।
बभ्रुवाहनमालिङ्ग्य समाजिघ्रत मूर्धनि ॥ १६

ददर्श चाविदूरेऽस्य मातरं शोककर्शिताम् ।
उलूप्या सह तिष्ठन्तीं ततोऽपृच्छद्धनञ्जयः ॥ १७

अर्जुनः—

किमिदं लक्ष्यते सर्वं शोकविस्मयहर्षवत् ।
रणाजिरमिमित्रघ्न यदि जानासि शंस मे ॥ १८

जननी च किमर्थं ते रणभूमिमुपागता ।
नागेन्द्रदुहिता चेयम् उलूपी किमिहागता ॥ १९

जानाम्यहमिदं युद्धं त्वया मद्वचनात् कृतम् ।
स्त्रीणामत्रागमे हेतुम् अहमिच्छामि वेदितुम् ॥ २०

1. क-ख—पुनर्देवपतिः प्रभो । घ—पुनर्देवपतिं प्रभुः । (?)

वैशम्पायनः—

तमुवाच ततः पृष्टो मणल्लूरपतिस्तदा ।
प्रसाद्य शिरसा विद्वान् उलूपी पृच्छ्यतामिति ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
[ अस्मिन्नध्याये २१ श्लोकाः ]

## ॥ षडशीतितमोऽध्यायः ॥

उलूप्याऽर्जुनं प्रति चित्राङ्गदादीनां समराङ्गणागमने कारणाभिधानम् ॥ १ ॥ तथा बभ्रुवाहनेन तस्य पराजये विस्तरेण हेतुकथनम् ॥ २॥

अर्जुनः—

किमागमनकृत्यं ते कौरव्यकुलनन्दिनि ।
मणल्लूरपतेर्मातुस् तथैव च रणाजिरे ॥ १

कच्चित् कुशलकामाऽसि राज्ञोऽस्य भुजगात्मजे ।
मम वा चञ्चलापाङ्गे कच्चित् त्वं सुखमिच्छसि ॥ २

कच्चित् ते पृथुलश्रोणि नाप्रियं शुभदर्शने ।
अकार्षमहमज्ञानाद् अयं वा बभ्रुवाहनः ॥ ३

[1]कच्चिच्च राजपुत्री ते सपत्नी चैत्रवाहनी ।

1. क-ख-घ—इतः श्लोकद्वयं नास्ति

चित्राङ्गदा वरारोहा नापराध्यति किञ्चन ॥ ४

वैशम्पायनः—

तमुवाचोरगपतेर् दुहिता प्रहसन्त्यथ ॥ ४॥

उलूपी—

न मे त्वमपराद्धोऽसि न नृपो बभ्रुवाहनः ।
न जनित्री तथाऽस्येयं मम या प्रेष्यवत् स्थिता ॥ ५॥

श्रूयतां यद्यथा चेदं मया सर्वं विचेष्टितम् ।
न मे कोपस्त्वया कार्यश् शिरसा त्वां प्रसादये ॥ ६॥

त्वत्प्रीत्यर्थं हि कौरव्य कृतमेतन्मयाऽनघ ।
यत् तच्छृणु महाबाहो निखिलेन धनञ्जय ॥ ७॥

महाभारतयुद्धे यत् त्वया शान्तनवो नृपः ।
अधर्मेण हतः पार्थ तस्यैषा निष्कृतिः कृता ॥ ८॥

न हि भीष्मस्त्वया वीर युद्ध्यमानो निपातितः ।
शिखण्डिना तु संसक्तस् तमाश्रित्य हतस्त्वया ॥ ९॥

तस्य शान्तिमकृत्वा तु त्यजेस्त्वं यदि जीवितम् ।
कर्मणा तेन पापेन पतेथा निरये ध्रुवम् ॥ १०॥

एषाऽत्र विहिता शान्तिः पुत्रात् त्वं प्राप्तवानसि ॥ ११

वसुभिर्वसुधापाल गङ्गया च महामते ।
पुरा हि श्रुतमेतद्वै वसुभिः कथितं मम ॥ १२

गङ्गायास्तीरमागम्य हते शान्तनवे नृप ।
आप्लुत्य देवा वसवस् समाप्लुत्य महानदीम् ॥ १३
इदमूचुर्वचो घोरं भागीरथ्या मते तदा ॥ १३॥
"एष शान्तनवो भीष्मो निहतस्सव्यसाचिना ।
अयुद्ध्यमानस्सङ्ग्रामे संसक्तोऽन्येन भामिनि ॥ १४॥
तदनेनाभिषङ्गेण वयमप्यर्जुनं शुभे ।
शापेन योजयामे"ति तथाऽस्त्विति च साऽब्रवीत् ॥ १५॥
तदहं पितुरावेद्य भृशं प्रव्यथितेन्द्रिया ।
अभवं स च तच्छ्रुत्वा विषादमगमत् परम् ॥ १६॥
पिता तु मे वसून् गत्वा त्वदर्थं समयाचत ।
पुनः पुनः प्रसाद्यैनांस् त एनमिदमब्रुवन् ॥ १७॥
"पुत्रोऽस्य तु महाराजो मणलूरेश्वरो युवा ।
स एनं रणमध्यस्थं शरैः पातयिता भुवि ॥ १८॥
एवं कृते स नागेन्द्र मुक्तशापो भविष्यति ।
गच्छे"ति वसुभिश्चोक्तो मम चेदं शशंस सः ॥ १९॥
तच्छ्रुत्वा त्वं मया तस्माच् छापादसि विमोक्षितः ।
[1]न हि त्वां देवराजोऽपि समरेषु पराजयेत् ॥ २०॥
आत्मा पुत्रस्स्मृतस्तस्मात् तेनेहासि पराजितः ।

1. क-ख-घ—इतः सार्धं श्लोकद्वयं नास्ति

नात्र दोषो मम मतः कथं वा मन्यसे विभो ॥ २१॥

वैशम्पायनः—

इत्येवमुक्तो विजयः प्रसन्नात्माऽब्रवीदिदम् ॥ २२

अर्जुनः—

सर्वं मे सुप्रियं देवि यदेतत् कृतवत्यसि ॥ २२॥

वैशम्पायनः—

इत्युक्त्वा सोऽब्रवीत् पुत्रं मणलूरेश्वरं जयः ।
चित्राङ्गदायाश्शृण्वन्त्याः कौरव्यदुहितुस्तथा ॥ २३॥

अर्जुनः—

युधिष्ठिरस्याश्वमेधः परां चैत्रीं भविष्यति ।
तत्रागच्छेस्सहामात्यो मातृभ्यां सहितो नृप ॥ २४॥

वैशम्पायनः—

इत्येवमुक्तः पार्थेन स राजा बभ्रुवाहनः ।
उवाच पितरं धीमान् इदमस्ताविलेक्षणः ॥ २५॥

बभ्रुवाहनः—

उपयास्यामि धर्मज्ञ भवतश्शासनादहम् ।
अश्वमेधमहायज्ञे द्विजातिपरिवेषकः ॥ २६॥

मम त्वनुग्रहार्थं हि प्रविशस्व पुरं स्वकम् ।
भार्याभ्यां सह शत्रुघ्न मा भूत् तेऽत्र विचारणा ॥ २७॥

उषित्वा च विशल्यस्त्वं सुखं वेश्मनि च प्रभो ।
पुनरश्वानुगमनं कर्तासि जयतां वर ॥ २८॥

वैशम्पायनः—

इत्युक्तस्स तु पुत्रेण तदा वानरकेतनः ।
हसन् प्रोवाच कौन्तेयस् तदा चित्राङ्गदासुतम् ॥ २९॥

अर्जुनः—

विदितं ते महाबाहो यथा दीक्षां चराम्यहम् ।
न हि तावत् प्रवेक्ष्यामि पुरं ते पृथुलोचन ॥ ३०॥

यथाकामं प्रयात्वेष याज्ञियश्च तुरङ्गमः ।
स्वस्ति तेऽस्तु गमिष्यामि न स्थानं विद्यते मम ॥ ३१॥

वैशम्पायनः—

स तत्र विधिवत् तेन पूजितः पाकशासनिः ।
भार्याभ्यामभ्यनुज्ञातः प्रायाद्धूरतसत्तमः ॥ ३२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षडशीतितमोऽध्यायः ॥ ८६ ॥

॥ ९२ ॥ अनुगीतापर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥

[ अस्मिन्नध्याये ३२॥ श्लोकाः ]

## ॥ सप्ताशीतितमोऽध्यायः ॥

अर्जुनेनाश्वानुसरणवशान्मगधदेशगमनम् ॥ १ ॥ तत्र जरासन्धपौत्रस्य मेघसन्धेः पराजयपूर्वकं तत्र तत्र म्लेच्छादिपराजयः ॥ २ ॥

वैशम्पायनः—

स तु वाजी समुद्रान्ताम् अभ्येत्य पृथिवीमिमाम् ।
निवृत्तोऽभिमुखो राजन् येन नागाह्वयं पुरम् ॥ १

अनुगच्छन् स तेजस्वी निवृत्तोऽथ किरीटधृक् ।
यदृच्छया समापेदे पुरं राजगृहं तदा ॥ २

तमभ्याशगतं राजा जरासन्धात्मजात्मजः ।
क्षत्रधर्मे स्थितो वीरस् समरायाजुहाव ह ॥ ३

ततः पुरात् स निष्क्रम्य रथी धन्वी तली शरी ।
मेघसन्धिः पदातिं तं धनञ्जयमुपाद्रवत् ॥ ४

आसाद्य तु महातेजा मेघसन्धिर्धनञ्जयम् ।
बालभावान्महाराज प्रोवाचेदं न कौशलात् ॥ ५

मेघसन्धिः—

किमयं चार्यते वाजी स्त्रीमध्य इव कौरव ।
हयमेनं हरिष्यामि प्रयतस्व विमोक्षणे ॥ ६
[1]आर्तो ननु पुरा युद्धे यदि त्वं भ्रातृभिस्सह ।

1. अ—अदत्तानुनयो युद्धे यदि त्वं पितृभिर्मम । [ पाठभेदः ]

करिष्यामि तवातिथ्यं प्रहर प्रहरामि च ॥ ७

वैशम्पायनः—

इत्युक्तः प्रत्युवाचेदं पाण्डवः प्रहसन्निव ॥ ७॥

अर्जुनः—

विघ्नकर्ता मया वार्य इति मे व्रतमाहितम् ।
भ्रात्रा ज्येष्ठेन नृपते तवापि विदितं ध्रुवम् ॥ ८॥
प्रहरस्व यथाशक्ति न मन्युर्विद्यते मम ॥ ९

वैशम्पायनः—

इत्युक्तः प्राहरत् पूर्वं पाण्डवं मगधेश्वरः ।
[1]किरञ्छरसहस्राणि वर्षाणीव सहस्रदृक् ॥ १०
ततो गाण्डीवभृच्छूरो गाण्डीवप्रेरितैः शरैः ।
चकार बाणांस्तान् मोघान् अयत्नाद् भरतर्षभ ॥ ११
स मोघं तस्य बाणौघं कृत्वा वानरकेतनः ।
शरान् मुमोच ज्वलितान् दीप्तास्यानिव पन्नगान् ॥ १२
रथे पताकादण्डे च रथयन्त्रहयेषु च ।
अन्येषु च हयाङ्गेषु न शरीरे न सारथौ ॥ १३
[2]संरक्ष्यमाणः पार्थेन शरीरे फल्गुनेन ह ।
मन्यमानस्स्ववीर्यं तं मागधः प्राहिणोच्छरान् ॥ १४

1. क-ख—इदमर्धं नास्ति
2. क-ख—स रक्ष्यमाणः । ङ—समीक्ष्यमाणः

ततो गाण्डीवभृच्छूरो मागधेन भृशार्दितः ।
बभौ [1]वासन्तिक इव पलाशः पुष्पितो महान् ॥ १५

अवध्यमानस्सोऽभ्यघ्नन्मागधः पाण्डवर्षभम् ।
तेन तस्थौ स कौरव्य लोकवीरस्य दर्शने ॥ १६

सव्यसाची तु सङ्क्रुद्धो विकृष्य बलवद्धनुः ।
हयांश्चकार निर्देहान् सारथेश्च शिरोऽहरत् ॥ १७

[2]धनुश्चास्य महच्चित्रं क्षुरेण विचकर्त ह ।
हस्तावापं पताकां च ध्वजं चास्य न्यवातयत् ॥ १८

स राजा व्यथितो व्यश्वो विधनुष्को विसारथिः ।
गदामादाय कौन्तेयम् अभिदुद्राव वेगवान् ॥ १९

तस्यापतत एवाशु गदां हेमपरिष्कृताम् ।
शरैश्चकर्त निशितैर् बहुभिर्गृध्रवाजितैः ॥ २०

सा गदा शकलीभूता विकीर्णमणिबन्धना ।
व्याली निर्मुच्यमानेव [3]पपात धरणीं प्रति ॥ २१

विरथं तं विधनुषं गदया परिवर्जितम् ।
नैच्छत् ताडयितुं धीमान् अर्जुनस्समराग्रणीः ॥ २२

तत एनं विमनसं क्षत्रधर्मे समास्थितम् ।
सान्त्वपूर्वमिदं वाक्यम् अब्रवीत् कपिकेतनः ॥ २३

---

1. क-ख—वसन्त इव स ।
2. अ—अर्धार्धं नास्ति
3. क-ख—पपातास्य सहस्रधा ।

अर्जुनः—

पर्याप्तः क्षत्रधर्मोऽयं दर्शितः पुत्र गम्यताम् ।
बह्वेतत् समरे कर्म तव बालस्य पार्थिव ॥ २४
युधिष्ठिरस्य सन्देशो न हन्तव्या नृपा इति ।
तेन जीवसि राजंस्त्वम् अपराद्धोऽपि मे रणे ॥ २५

वैशम्पायनः—

इति मत्वा स चात्मानं प्रत्यादिष्टस्स मागधः ।
तथ्यमित्यभिगम्यैनं प्राञ्जलिः प्रत्यपूजयत् ॥ २६
तमर्जुनस्समाश्वास्य पुनरेवेदमब्रवीत् ॥ २६॥

अर्जुनः—

आगन्तव्यं परां चैत्रीम् अश्वमेधे नृपस्य नः ॥ २७

वैशम्पायनः—

इत्युक्तस्स तथेत्युक्त्वा पूजयामास तं हयम् ।
फल्गुनं च युधि श्रेष्ठं विधिवत् सहदेवजः ॥ २८
ततो यथेष्टमगमत् पुनरेव स कौरवः ।
ततस्समुद्रतीरेण वङ्गान् पुण्ड्रान् सकेरलान् ॥ २९
तत्र तत्र च भूरीणि म्लेच्छसैन्यान्यनेकशः ।
विजिग्ये धनुषा राजन् गाण्डीवेन धनञ्जयः ॥ ३०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्ताशीतितमोऽध्यायः ॥ ८७ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥
[ अस्मिन्नध्याये ३० श्लोकाः ]

## ॥ अष्टाशीतितमोऽध्यायः ॥

दक्षिणां दिशमुपागतेनार्जुनेन चेदीशितुः शिशुपालात्मजस्य पूजा-परिग्रहणम् ॥ १ ॥ तथा काशिकोसलादिदेशाधिपतिपराजयपूर्वकं गान्धारदेशगमनम् ॥ २ ॥

वैशम्पायनः—

मागधेनार्चितो राजन् पाण्डवश्श्वेतवाहनः ।
दक्षिणां दिशमास्थाय चारयामास तं हयम् ॥ १

ततस्स पुनरावृत्य हयः कामचरो बली ।
आससाद पुरीं रम्यां चेदीनां शुक्तिसाह्वयाम् ॥ २

शरभेणार्चितस्तत्र शिशुपालात्मजेन सः ।
युद्धपूर्वेण मानेन पूजया च महाबलः ॥ ३

ततोऽर्चितो ययौ राजंश् तदा स तुरगोत्तमः ।
[1]काशीन् मद्रान् कोसलांश्च किरातानथ तङ्कणान् ॥ ४

तत्र पूजां यथान्यायं प्रतिगृह्य स पाण्डवः ।
पुनरागत्य कौन्तेयो दशार्णानचरत् तदा ॥ ५

तत्र चित्राङ्गदो नाम बलवान् वसुधाधिपः ।
तेन युद्धमभूत् तस्य विजयस्यातिभैरवम् ॥ ६

तं चापि वशमानीय किरीटी पुरुषर्षभः ।

1. क-ख—काशीनान्ध्रान् ।

निषादराज्ञो विषयम् एकलव्यस्य जग्मिवान् ॥ ७

एकलव्यसुतश्चैनं युद्धेन जगृहे तदा ।
तत्र चक्रे निषादैश्च सङ्ग्रामं रोमहर्षणम् ॥ ८

ततस्तमपि कौन्तेयस् समरेष्वपराजितः ।
जिगाय समरे वीरो यज्ञविघ्नार्थमुद्यतम् ॥ ९

स तं जित्वा महाराज नैषादिं पाकशासनिः ।
अर्चितः प्रययौ भूयो दक्षिणं सलिलार्णवम् ॥ १०

तत्रापि द्रमिलैरान्ध्रै रौद्रैर्माहिषकैरपि ।
[1]तथा गोल्लगिरेयैश्च युद्धमासीत् किरीटिनः ॥ ११

गोकर्णमथ चासाद्य प्रभासमपि जग्मिवान् ॥ ११॥

ततो द्वारवतीं रम्यां वृष्णिवीराभिरक्षिताम् ।
आससाद हयश्रीमान् कुरुराजस्य याज्ञियः ॥ १२॥

तमुन्मथ्य हयश्रेष्ठं यादवानां कुमारकाः ।
प्रययुस्तांस्तदा राजन्नुग्रसेनो न्यवारयत् ॥ १३॥

ततः पुराद्विनिष्क्रम्य वृष्ण्यन्धकपतिस्तदा ।
सहितो वासुदेवेन मातुलेन किरीटिना ॥ १४॥

तौ समेत्य नरश्रेष्ठं विधिवत् प्रीतिपूर्वकम् ।
परया भरतश्रेष्ठ पूजया समवस्थितौ ॥ १५॥

---

1. अ—अधचतुष्टयं नास्ति

ततस्ताभ्यामनुज्ञातो ययौ येन हयो गतः ॥ १६

ततः पश्चिमदेशेन समुद्रान्तं तदा हयः ।
क्रमेण व्यचरत् स्फीतं ततः पञ्चनदं ययौ ॥ १७

तस्मादपि स कौरव्य गान्धारविषयं हयः ।
विचचार यथाकामं कौन्तेयानुगतस्तथा ॥ १८

तत्र गान्धारराजेन युद्धमासीन्महात्मनः ।
घोरं शकुनिपुत्रेण पूर्ववैरानुकारिणा ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टाशीतितमोऽध्यायः ॥ ८८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥
[ अस्मिन्नध्याये १९ श्लोकाः ]

---

## ॥ एकोननवतितमोऽध्यायः ॥

अर्जुनेन शकुनितनयपराजयपूर्वकं तत्सेनावमर्दनम् ॥ १ ॥ ततः शकुनिभार्यया तेन स्वसुतवधसम्भावनया रणाङ्गणमेत्यार्जुनस्य प्रसादनम् ॥ २ ॥ अर्जुनेन गान्धारीगौरवात् तत्सम्माननपूर्वकं तत्तनयसमाश्वासनम् ॥ ३ ॥

---

वैशम्पायनः—

शकुनेस्तनयो वीरो गान्धाराणां महारथः ।
प्रत्युद्ययौ गुडाकेशं सैन्येन महता वृतः ॥ १

हस्त्यश्वरथपूर्णेन पताकाध्वजमालिना ॥ १॥
अमृष्यमाणास्ते योधा नृपतेरशकुनेर्वधम् ।
अभ्ययुस्सहिताः पार्थं प्रगृहीतशरासनाः ॥ २॥
तानुवाच स धर्मात्मा बीभत्सुरपराजितः ।
युधिष्ठिरस्य वचनं न च ते जगृहुस्तदा ॥ ३॥
वार्यमाणास्तु पार्थेन सान्त्वपूर्वममर्षिताः ।
परिवार्य हयं जह्रुस् ततश्चुक्रोध पाण्डवः ॥ ४॥
ततश्शिरांसि दीप्ताग्रैस् तेषां चिच्छेद पाण्डवः ।
शरैर्गाण्डीवनिर्मुक्तैर् नातियत्नादिवार्जुनः ॥ ५॥
ते वध्यमानाः पार्थेन हयमुत्सृज्य सम्भ्रमात् ।
न्यवर्तन्त महाराज शरवर्षार्दिता भृशम् ॥ ६॥
विरुध्यमानस्तैश्चापि गान्धारैः पाण्डवर्षभः ।
आदिश्यादिश्य तेजस्वी परानेव न्यपातयत् ॥ ७॥
वध्यमानेषु तेष्वाजौ गान्धारेषु समन्ततः ।
स राजा शकुनेः पुत्रः पाण्डवं प्रत्यवारयत् ॥ ८॥
तं युध्यमानं राजानं क्षत्रधर्मे व्यवस्थितम् ।
पार्थोऽब्रवीन्न मे वध्या राजानो राजशासनात् ॥ ९॥
अलं युद्धेन ते वीर न तेऽद्यास्ति पराजयः ॥ १०
इत्युक्तस्तदनादृत्य वाक्यमज्ञानमोहितः ।

स शक्रसमकर्माणं अवाकिरत सायकैः ॥ ११

तस्य पार्थश्शिरस्त्राणम् अर्धचन्द्रेण पत्रिणा ।
अपाहरदमेयात्मा जयद्रथशिरो यथा ॥ १२

तं दृष्ट्वा विस्मयं जग्मुर् गान्धारास्सर्व एव ते ।
इच्छता तेन न हतो राजेत्यपि च ते विदुः ॥ १३

गान्धारराजपुत्रस्तु पलायनकृतक्षणः ।
बभौ तैरेव सहितस् त्रस्तैः क्षुद्रमृगैरिव ॥ १४

तेषां तु तरसा पार्थस् तत्रैव परिधावताम् ।
विजहारोत्तमाङ्गानि भल्लैस्सन्नतपर्वभिः ॥ १५

उच्छ्रितांश्च भुजान् केचिन्नाबुध्यन्त शरैर्हतान् ।
शितैर्गाण्डीवनिर्मुक्तैः पृथुभिः पार्थचोदितैः ॥ १६

सम्भ्रान्त[1]नरनागाश्वम् अथ तद्विद्रुतं बलम् ।
हतविध्वस्तभूयिष्ठम् अवर्तत मुहुर्मुहुः ॥ १७

न ह्यदृश्यन्त वीरस्य केचिदग्रेऽप्यकर्मणः ।
रिपवः पात्यमाना वै ये सहेरन् महाशरान् ॥ १८

ततो गान्धारराजस्य मन्त्रिवृद्धपुरस्सरा ।
जननी निर्ययौ भीता पुरस्कृत्यार्घ्यमुत्तमम् ॥ १९

सा न्यवारयदव्यग्रा तं पुत्रं युद्धदुर्मदम् ।

1. क—रथनागं च मथितं विद्रुतं ।

प्रसादयामास च तं जिष्णुमक्लिष्टकर्मिणम् ॥ २०

तां पूजयित्वा कौन्तेयः प्रसादमकरोत् तदा ।
शकुनेश्चापि तनयं सान्त्वयन्निदमब्रवीत् ॥ २१

अर्जुनः—

न मे प्रियं महाबाहो यत् ते बुद्धिरियं कृता ।
प्रतियोद्धुमभित्रघ्न भ्रातैव त्वं ममानघ ॥ २२

गान्धारीं मातरं स्मृत्वा धृतराष्ट्रकृतेन च ।
तेन जीवसि राजंस्त्वं निहतास्त्वनुगास्तव ॥ २३

मैवं भूरशाम्यतां वैरं मा ते भूद् बुद्धिरीदृशी ।
आगन्तव्यं परां चैत्रीम् अश्वमेधे नृपस्य नः ॥ २४

वैशम्पायनः—

इत्युक्त्वाऽनुययौ पार्थो हयं तं कामचारिणम् ।
[1]ते न्यवर्तन्त गान्धारा हतशिष्टास्स्वकं पुरम् ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥

॥ ९२ ॥ अनुगीतापर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

[ अस्मिन्नध्याये २५ श्लोकाः ]

---

1. क-ख-घ—नास्तीदमर्धम्

## ॥ नवतितमोऽध्यायः ॥

चारमुखादर्जुनस्य तुरगसञ्चारणेन पुनर्नगरं प्रत्यागमनश्रवण-हृष्टस्य युधिष्ठिरस्य निदेशाद्भीमेन यज्ञशालादिनिर्मापणम् ॥ १ ॥ तथा नानादेशेभ्यो ब्राह्मणाद्यानयनं तेषां यथार्हं पूजनं च ॥ २ ॥

वैशम्पायनः—

न्यवर्तत ततो वाजी यत्र नागाह्वयं पुरम् ।
तं निवृत्तं तु शुश्राव चारेणैव युधिष्ठिरः ॥ १
श्रुत्वाऽर्जुनं कुशलिनं स च हृष्टमना ह्यभूत् ॥ १॥
विजयस्य च तत् कर्म गान्धारविषये तदा ।
श्रुत्वा चान्येषु देशेषु स सुप्रीतोऽभवन्नृपः ॥ २॥
एतस्मिन्नेव काले तु द्वादशीं माघ[1]मासिकीम् ।
इष्टं गृहीत्वा नक्षत्रं धर्मराजो युधिष्ठिरः ॥ ३॥
समानाय्य महातेजास् सर्वान् भ्रातॄन् महामनाः ।
भीमं च नकुलं चैव सहदेवं च कौरव ॥ ४॥
प्रोवाचेदं वचः काले तदा धर्मभृतां वरः ॥ ५
आमन्त्र्य वदतां श्रेष्ठो भीमं भीमपराक्रमम् ॥ ५॥

युधिष्ठिरः—

आयाति भीमसेनासौ सहाश्वेन तवानुजः ।

1. क-ख—पक्षिकाम् ।

यथा मे पुरुषाः प्राहुर् ये धनञ्जयसारिणः ॥ ६॥
उपस्थितश्च कालोऽयम् अभितो वर्तते हयः ।
माघी च पौर्णमासीयं [1]मासश्शेषो वृकोदर ॥ ७॥
प्रस्थाप्यन्तां हि विद्वांसो ब्राह्मणा वेदपारगाः ।
वाजिमेधार्थसिद्ध्यर्थं देशं पश्यन्तु याज्ञियम् ॥ ८॥

वैशम्पायनः—

इत्युक्तस्स तु तच्चक्रे भीमो नृपतिशासनम् ।
हृष्टश्श्रुत्वा नरवरैर् आयान्तं सव्यसाचिनम् ॥ ९॥
ततो ययौ भीमसेनः प्राज्ञैस्स्थपतिभिस्सह ।
ब्राह्मणानग्रतः कृत्वा कुशलान् यज्ञकर्मसु ॥ १०॥
[2]तं समासाद्य देशं तु सुप्रतोलीविटङ्किनम् ।
मापयामास कौरव्यो यज्ञवाटं यथाविधि ॥ ११॥
[3]प्रासादशतसम्बाधं मणिप्रवरकुट्टिमम् ।
सदस्सपत्नीसदनं साग्नीध्रमपि चोत्तरम् ॥ १२॥
स्तम्भान् कनकचित्रांश्च तोरणानि बृहन्ति च ।
यज्ञायतनदेशेषु सर्वेष्वेव च काञ्चनम् ॥ १३॥
कारयामास विधिवन्मणिहेमविभूषितम् ॥ १४

1. क-ख—मासश्चैत्रो।
2. अ-ब—तं देशं सवनग्रामं सुप्रतोलीविटङ्कितम्। [ पाठान्तरम् ]
3. क-ख-ब—अर्धद्वयं नास्ति

ब्राह्मणानां तु वेश्मानि नानादेशसमेयुषाम् ।
अन्तःपुराणि राज्ञां च नानादेशनिवासिनाम् ॥ १५

कारयामास [1]धर्मात्मा तत्र तत्र यथाविधि ॥ १५॥

[2]तथा सम्प्रेषयामास दूतान् नृपतिशासनात् ।
भीमसेनो महाराज राज्ञामक्लिष्टकर्मणाम् ॥ १६॥

ते प्रियार्थं कुरुपतेर् आययुर्नृपसत्तमाः ।
रत्नान्यनेकान्यादाय स्त्रियोऽश्वानायुधानि च ॥ १७॥

तेषां निवसतां तेषु शिबिरेषु सहस्रशः ।
नदतस्सागरस्येव शब्दो दिवमिवास्पृशत् ॥ १८॥

प्रत्युद्गम्य नमस्कृत्य ब्राह्मणांश्च न्यवेदयत् ॥ १९

तेषामभ्यागतानां च नानादेशनिवासिनाम् ।
व्यादिदेशान्नपानानि शय्याश्चातीवमानुषाः ॥ २०

वाहनानां च विविधाश् शालाश्शालीक्षुगोरसैः ।
उपेताः पुरुषव्याघ्र व्यादिदेश स धर्मराट् ॥ २१

वर्णाः पृथक्सन्निविष्टा ह्युत्तरोत्तरपूजकाः ।
तथा तस्मिन् महायज्ञे धर्मराजस्य धीमतः ॥ २२

समाजग्मुर्मुनिगणा बहवो ब्रह्मवादिनः ॥ २२॥

---

1. क-ख—भीमश्च विहितानि ह्यनेकशः ।
2. क-ख—दूतः सार्धं श्लोकद्वयं नास्ति

ये च द्विजातिप्रवरास् तत्रासन् पृथिवीपते ।
समाजग्मुस्सशिष्यास्तान् प्रतिजग्राह कौरवः ॥ २३॥

सर्वांश्च तानन्नयद्यौ यावदावसथान्तिकम् ।
स्वयमेव महातेजा [1]दम्भं त्यक्त्वा युधिष्ठिरः ॥ २४॥

ततः कृत्वा स्थपतयश् शिल्पिनोऽन्ये च ते तदा ।
कृत्स्नं यज्ञविधिं राजन् धर्मराज्ञे न्यवेदयन् ॥ २५॥

तच्छ्रुत्वा धर्मराजस्स कृतं सर्वमनिन्दितम् ।
हृष्टरूपोऽभवद्राजा सह भ्रातृभिरच्युतः ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि नवतितमोऽध्यायः ॥ ९० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥
[ अस्मिन्नध्याये २६॥ श्लोकाः ]

---

## ॥ एकनवतितमोऽध्यायः ॥

अश्वमेधसमृद्धिवर्णनम् ॥ १ ॥

वैशम्पायनः—

तस्मिन् यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः ।
हेतुवादान् बहून् प्राहुः परस्परजिगीषवः ॥ १

1. क-ख—दम्भं ।

ददृशुस्तं नृपतयो यज्ञस्य विधिमुत्तमम् ।
देवेन्द्रस्येव विहितं भीमेन कुरुनन्दन ॥ २

ददृशुस्तोरणान्यत्र शातकुम्भमयानि ते ।
शय्यासनविहारांश्च सुबहून् रत्नभूषितान् ॥ ३

घटान् पात्रीः कटाहानि कलशान् वर्धमानकान् ।
न ते किञ्चिदसौवर्णम् अपश्यंस्तत्र पार्थिवाः ॥ ४

यूपांश्च शास्त्रविहितांस् तारवान् हेमभूषितान् ।
उपकॢप्तान् यथाकालं विधिवद्भूरिवर्चसः ॥ ५

स्थलजा जलजा ये च पशवो ये च सम्भृताः ।
सर्वानेव समानीतांस् तानपश्यन्त भूमिपाः ॥ ६

गाश्चैव माहिषीश्चैव तथा वृद्धस्त्रियोऽपि च ।
औदकानि च सत्वानि श्वापदानि वयांसि च ॥ ७

जरायुजान्यण्डजानि स्वेदजान्युद्भिदानि च ।
पर्वतानूपवन्यानि भूतानि ददृशुश्च ते ॥ ८

[1]एवं प्रमुदितं सर्वं पशुगोधनधान्यतः ।
यज्ञवाटं नृपा दृष्ट्वा परं विस्मयमागमन् ॥ ९

अनिशं दीयते च स्म तत्र भोज्यं पृथग्विधम् ।

---

1. क-ख-घ—सर्वे राजन् यथान्यायमानीता नृपशासनात् ।
[ अधिकः पाठः ]

ब्राह्मणानां विशां चैव बहुमृष्टान्नमृद्धिमत् ॥ १०

पूर्णे शतसहस्रे तु विप्राणां तत्र भुञ्जताम् ।
दुन्दुभिर्मेघनिर्घोषो मुहुर्मुहुरताड्यत ॥ ११

विननादासकृत् सोऽथ दिवसे दिवसे तथा ।
एवं स ववृते यज्ञो धर्मराजस्य धीमतः ॥ १२

अन्नस्य सुबहून् राजन्नुत्सर्गान् पर्वतोपमान् ।
दधिकुल्याश्च ददृशुः सर्पिषां च महाह्रदान् ॥ १३

जम्बूद्वीपो हि सकलो नानाजानपदो जनः ।
राजन्नदृश्यतैकस्थो राज्ञस्तस्य महाक्रतौ ॥ १४

तत्र जातिसहस्राणि पुरुषाणां ततस्ततः ।
गृहीत्वा धनमाजग्मुर् बहूनि भरतर्षभ ॥ १५

राजानस्स्नाग्विणश्चापि सुमृष्टमणिकुण्डलाः ।
पर्यवेषन् द्विजाग्र्यांस्तान् शतशोऽथ सहस्रशः ॥ १६

विविधान्यन्नपानानि पुरुषा येऽनुयायिनः ।
तेषां नृपोपभोग्यानि ब्राह्मणानां ददुस्स्म ह ॥ १७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकनवतितमोऽध्यायः ॥ ९१ ॥
॥ ९२ ॥ अनुगीतापर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
[ अस्मिन्नध्याये १७ श्लोकाः ]

## ॥ द्विनवतितमोऽध्यायः ॥

कृष्णेन बलरामादिभिस्सह युधिष्ठिराश्वमेधाय हास्तिनपुरं प्रत्यागमनम् ॥ १ ॥ तथा युधिष्ठिरं प्रति नानादेशेभ्य आगमिष्यतां राज्ञामप्रमादेन यथोचितपूजाया मणलूरादागमिष्यतो बभ्रुवाहनस्य सम्माननस्य च कर्तव्यताप्रतिपादकार्जुनसन्देशनिवेदनम् ॥ २ ॥

---

**वैशम्पायनः—**

समागतान् वेदविदो राज्ञश्च पृथिवीश्वरान् ।
दृष्ट्वा युधिष्ठिरो राजा भीमसेनमथाब्रवीत् ॥ १

**युधिष्ठिरः—**

उपयाता नरव्याघ्रा य इमे जगतीश्वराः ।
[1]एतेषां क्रियतां पूजा पूजार्हा हि नरेश्वराः ॥ २

**वैशम्पायनः—**

इत्युक्तस्स तथा चक्रे नरेन्द्रेण यशस्विना ।
भीमसेनो महाराज यमाभ्यां सह कौरव ॥ ३

अथाभ्यगच्छद्गोविन्दो वृष्णिभिस्सह धर्मजम् ।
बलदेवं पुरस्कृत्य सर्वप्राणभृतां वरम् ॥ ४

युयुधानेन सहितः प्रद्युम्नेन गदेन च ।
निशठेनाथ साम्बेन तथैव कृतवर्मणा ॥ ५

---

1. क-ख—एतेभ्यः ।

तेषामपि परां पूजां चक्रे भीमो महाभुजः ।
विविशुस्ते च वेश्मानि रत्नवन्ति नरर्षभाः ॥ ६

युधिष्ठिरसमीपे तु कथान्ते मधुसूदनः ।
अर्जुनं कथयामास बहुसङ्ग्रामकर्शितम् ॥ ७

स तं पप्रच्छ कौन्तेयः पुनःपुनररिन्दमः ।
धर्मराट् भ्रातरं जिष्णुं स चाचष्ट जगत्पतिः ॥ ८

श्रीभगवान्—

आगमद्वारकावासी ममाप्तः पुरुषो नृप ।
सोऽद्राक्षीत् पाण्डवश्रेष्ठं बहुसङ्ग्रामकर्शितम् ॥ ९

समीपे च महाबाहुम् आचष्ट मम स प्रभो ।
कुरु कार्याणि कौन्तेय हयमेधार्थसिद्धये ॥ १०

वैशम्पायनः—

इत्युक्तः प्रत्युवाचैनं धर्मराजो युधिष्ठिरः ॥ १०॥

युधिष्ठिरः—

दिष्ट्या स कुशली जिष्णुर् उपायातस्स माधव ॥ ११

तव यत् सन्दिदेशासौ पाण्डवानां बलाग्रणीः ।
तदाख्यातुमिहेच्छामि भवता यदुनन्दन ॥ १२

वैशम्पायनः—

इत्युक्तो राजशार्दूल वृष्ण्यन्धकपतिस्तदा ।
प्रोवाचेदं वचो वाग्मी धर्मात्मानं युधिष्ठिरम् ॥ १३

श्रीभगवान्—

इदमाह महाराज पार्थवाक्यं नरेश्वर ।
निवेद्यो युधिष्ठिरः कृष्ण काले वाक्यमिदं मम ॥ १४
आगमिष्यन्ति राजानस् सर्वतः कौरवान् प्रति ।
तेभ्य एकैकशः पूजा कार्येत्येतत् क्षमं हितम् ॥ १५
इत्येतद्वचनाद्राजा विज्ञाप्यो मम मानद ।
ते तदात्ययिकं न स्याद् यदर्घ्यानयनेऽभवत् ॥ १६
कर्तुमर्हति तद्राजा भवांश्चाप्यनुमन्यताम् ।
राजानो न विनश्येयुर् नेमा राजन् प्रजाः पुनः ॥ १७
इदमन्यच्च कौरव्य वचस्स पुरुषोऽब्रवीत् ।
धनञ्जयस्य नृपते तन्मे निगदतश्शृणु ॥ १८
उपायास्यति यज्ञं नो मणलूरपतिर्नृपः ।
पुत्रो मम महातेजा दयितो बभ्रुवाहनः ॥ १९
तं भवान् मदपेक्षार्थं विधिवत् प्रतिपूजयेत् ।
स हि भक्तोऽनुरक्तश्च मम नित्यमिति प्रभो ॥ २०

वैशम्पायनः—

इत्येतद्वचनं श्रुत्वा धर्मराजो युधिष्ठिरः ।
अभिनन्द्य स तद्वाक्यम् इदं वचनमब्रवीत् ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्विनवतितमोऽध्यायः ॥ ९२ ॥
॥ ९२ ॥ अनुगीतापर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

[ अस्मिन्नध्याये २१ श्लोकाः ]

## ॥ त्रिनवतितमोऽध्यायः ॥

युधिष्ठिरेण पाण्डवेभ्यश्चतुर्भ्योऽर्जुनस्यैव विशेषतोऽध्वसञ्चारादि-परिक्लेशसूचकशारीरलक्षणप्रश्ने कृष्णेन तं प्रति तत्कथनम् ॥ १ ॥ मेध्याश्वस्य पृथ्वीसञ्चारणाय गतेनार्जुनेन सहाश्वेन पुनर्नगरं प्रत्यागमनम् ॥ २ ॥

युधिष्ठिरः—

श्रुतं प्रियमिदं कृष्ण यत् त्वया मम भाषितम् ।
तन्मेऽमृतरसप्रख्यं मनो ह्लादयते विभो ॥ १

बहूनि किल युद्धानि विजयस्य नराधिपैः ।
पुनरासन् हृषीकेश तत्र तत्र मया श्रुतम् ॥ २

तन्निमित्तं हि स तदा पार्थस्सुखविवर्जितः ।
अतीव विजयो धीमान् इति मे [1]दूयते मनः ॥ ३

सञ्चिन्तयामि वार्ष्णेय सदा कुन्तीसुतं रहः ॥ ३॥

किं नु तस्य शरीरेऽस्ति सर्वलक्षणपूजिते ।
अनिष्टं लक्षणं कृष्ण येन दुःखान्युपाश्नुते ॥ ४॥

अतीव दुःखभागी स सततं कुन्तिनन्दनः ।
न च पश्यामि बीभत्सोर् निन्द्यं गात्रेषु किञ्चन ॥ ५॥
श्रोतव्यं चेन्मयैतद्वै तन्मे व्याख्यातुमर्हसि ॥ ६

1. क-ख—धीयते मनः ।

वैशम्पायनः—

इत्युक्तस्स हृषीकेशो ध्यात्वा सुमहदन्तरम् ।
राजानं भोजराजन्यवर्धनो विष्णुरब्रवीत् ॥ ७

श्रीभगवान्—

न ह्यस्य नृपते किञ्चिद् अनिष्टमुपलक्षये ।
ऋते पुरुषसिंहस्य [1]पिण्डिकेऽस्याधिके यतः ॥ ८

ताभ्यां स पुरुषव्याघ्रो नित्यमध्वसु युज्यते ।
न ह्यन्यमनुपश्यामि येनासौ दुःखभाग् जयः ॥ ९

वैशम्पायनः—

इत्युक्तस्स कुरुश्रेष्ठस् सत्यं कृष्णेन धीमता ।
प्रोवाच वृष्णिशार्दूलम् एवमेतदिति प्रभुः ॥ १०

कृष्णा तु द्रौपदी कृष्णं तिर्यक् सासूयमैक्षत ।
प्रतिजग्राह तस्यास्तं प्रणयं चापि केशिहा ॥ ११

सख्युस्सखा हृषीकेशस् साक्षादिव धनञ्जयः ॥ ११॥

तत्र भीमादयस्ते तु कुरवो यादवास्तदा ।
विचित्रा रेमिरे श्रुत्वा धनञ्जयकथां विभो ॥ १२॥

तथा कथयतामेव तेषामर्जुनसङ्कथाः ।
उपायाद्वचनान्मर्त्यो विजयस्य महात्मनः ॥ १३॥

सोऽभिगम्य कुरुश्रेष्ठं नमस्कृत्य च बुद्धिमान् ।

---

1. क—सिंहिकेऽस्यात्र कायतः । ख—स्यात्र कायतः ।

उपायातं नरव्याघ्रम् अर्जुनं प्रत्यवेदयत् ॥ १४॥

तच्छ्रुत्वा नृपतिस्तस्मै हर्षबाष्पाकुलेक्षणः ।
प्रियाख्याननिमित्तं वै ददौ बहुधनं तदा ॥ १५॥

ततो द्वितीये दिवसे महान् शब्दोऽभ्यवर्तत ।
आयाति पुरुषव्याघ्रे पाण्डवानां धुरन्धरे ॥ १६॥

ततो रेणुस्समुद्भूतो विबभौ तस्य वाजिनः ।
अभितो वर्तमानस्य यथोच्चैःश्रवसस्तथा ॥ १७॥

तत्र हर्षकला वाचो नराणां शुश्रुवेऽर्जुनः ॥ १८
दिष्ट्या हि पार्थः कुशली धन्यो राजा युधिष्ठिरः ॥ १८॥

कोऽन्यो हि पृथिवीं कृत्स्नाम् [1]अभिजित्य सपार्थिवाम् ।
चारयित्वा हयश्रेष्ठम् उपेयादर्जुनादृते ॥ १९॥

ये व्यतीता महात्मानो राजानस्सगरादयः ।
तेषामपीदृशं कर्म न किञ्चिदपि शुश्रुमः ॥ २०॥

नैतदन्ये करिष्यन्ति भविष्यन्तो नराधिपाः ।
यत् त्वं कुरुकुलश्रेष्ठ दुष्करं कृतवानसि ॥ २१॥

इत्येवं वदतां तेषां नृणां श्रुतिसुखावहाः ।
शृण्वन् विवेश धर्मात्मा फल्गुनो यज्ञसंस्तरम् ॥ २२॥

ततो राजा सहामात्यः कृष्णश्च यदुनन्दनः ।

---

1. क-ख—अपजित्य स ।

धृतराष्ट्रं पुरस्कृत्य ते तं प्रत्युद्ययुस्तदा ॥ २३॥

सोऽभिवाद्य पितुः पादौ धर्मराजस्य धीमतः ।
भीमादींश्चापि सम्पूज्य पर्यष्वजत केशवम् ॥ २४॥

तैस्समेत्यार्चितस्तान् स प्रत्यर्च्यार्थ यथाविधि ।
विशश्राम स धर्मात्मा तीरं लब्ध्वेव पारगः*॥ २५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रिनवतितमोऽध्यायः ॥ ९३ ॥

॥ ९२ ॥ अनुगीतापर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

[ अस्मिन्नध्याये २५॥ श्लोकाः ]

## ॥ चतुर्नवतितमोऽध्यायः ॥

बभ्रुवाहनेनोलूपीचित्राङ्गदाभ्यां सह यागदिदृक्षया हास्तिनपुरं प्रत्यागमनम् ॥ १ ॥ ततः स्वयं समागतव्यासाज्ञया युधिष्ठिरेण ऋत्विग्भिः सहाश्वमेधोपक्रमः ॥ २ ॥

वैशम्पायनः—

एतस्मिन्नेव काले तु स राजा बभ्रुवाहनः ।
मातृभ्यां सहितो धीमान् कुरूनभ्याजगाम ह॥ १

स समेत्य कुरून् सर्वान् सर्वैस्तैरभिनन्दितः ।
प्रविवेश पितामह्याः कुन्त्या भवनमुत्तमम् ॥† २

* क-ख-घ—नाऽत्राध्यायसमाप्तिर्दृश्यते ।
† क-ख-घ—कोशेषु अत्रैव पूर्वतनाध्यायसमाप्तिर्दृश्यते ।

स प्रविश्य यथान्यायं पाण्डवानां निवेशनम् ।
पितामहीमभ्यवदत् साम्ना परमवल्गुना ॥ ३

तथा चित्राङ्गदा देवी कौरवस्यात्मजाऽपि च ।
[1]पृथां कृष्णां च सहिते विनयेनाभिजग्मतुः ॥ ४

सुभद्रां च यथान्यायं याश्चान्याः कुरुयोषितः ॥ ४॥

ददौ कुन्ती ततस्ताभ्यां रत्नानि विविधानि च ।
द्रौपदी च सुभद्रा च याश्चाप्यन्याः कुरुस्त्रियः ॥ ५॥

ऊषतुस्तत्र ते देव्यौ महार्हशयनासने ।
सुपूजिते स्वयं कुन्त्या पार्थस्य प्रियकाम्यया ॥ ६॥

स च राजा महावीर्यः पूजितो बभ्रुवाहनः ।
धृतराष्ट्रं महीपालम् उपतस्थे यथाविधि ॥ ७॥

युधिष्ठिरं च राजानं भीमार्दींश्चापि पाण्डवान् ।
उपगम्य महातेजा विनयेनाभ्यवादयत् ॥ ८॥

स तैः प्रेम्णा परिष्वक्तः पूजितश्च यथाविधि ।
धनं चास्मै ददुर्भूरि प्रीयमाणा महारथाः ॥ ९॥

तथैव स महीपालः कृष्णं चक्रगदाधरम् ।
प्रद्युम्नवद्धृषीकेशं विनयेनोपजग्मिवान् ॥ १०॥

तस्मै कृष्णो ददौ राज्ञे राजार्हमभिपूजितम् ।

1. क—अर्धश्लोकं नास्ति

रथं हेमपरिष्कारं दिव्याश्वयुजमुत्तमम् ॥ ११॥

धर्मराजश्च भीमश्च यमजौ फल्गुनस्तथा ।
पृथक्पृथगर्थैर्वैनं महार्थैरभ्यपूजयन् ॥ १२॥

ततस्तृतीये दिवसे सत्यवत्यास्सुतो मुनिः ।
युधिष्ठिरं समानीय वाग्मी वचनमब्रवीत् ॥ १३॥

व्यासः—

अद्यप्रभृति कौन्तेय [1]यज्ञस्य समयो हि ते ।
मुहूर्तो याज्ञियः प्राप्तश् चोदयन्त्येव याजकाः ॥ १४॥

अहीनो नाम राजेन्द्र क्रतुस्तेऽयं विकल्पवान् ।
बहुत्वात् काञ्चनस्यास्य ख्यातो बहुसुवर्णकः ॥ १५॥

एवमेव महाराज दक्षिणां त्रिगुणां कुरु ।
त्रित्वं व्रजतु ते राजन् ब्राह्मणा ह्यत्र कारणम् ॥ १६॥

त्रीनश्वमेधानव त्वं सम्प्राप्य बहुदक्षिणान् ।
ज्ञातिहत्याकृतं पापं प्रहास्यसि नराधिप ॥ १७॥

पवित्रं परमं ह्येतत् पावनानां च पावनम् ।
यदश्वमेधावभृथं प्राप्स्यसे कुरुनन्दन ॥ १८॥

वैशम्पायनः—

इत्युक्तस्स तु तेजस्वी व्यासेनामितबुद्धिना ।
दीक्षां विवेश धर्मात्मा वाजिमेधाप्तये तदा ॥ १९॥

---

1. क-ख—यजस्व ।

नराधिपः प्रायजत वाजिमेधं महाक्रतुम् ।
[1]विधिवद्दक्षिणं राजा सर्वयज्ञगुणान्वितम् ॥ २०॥

तत्र वेदविदो राजंश् चक्रुः कर्माणि याजकाः ।
[2-3]परिक्रामन्ति शास्त्रज्ञा यथावद्द्विजसत्तमाः ॥ २१॥

न तेषां स्खलितं तत्र नासीदपहुतं तदा ।
क्रमयुक्तं च युक्तं च चक्रुस्तत्र द्विजर्षभाः ॥ २२॥

कृत्वा प्रवर्ग्यं धर्मज्ञा यथावद्द्विजसत्तमाः ।
चक्रुस्ते विधिवद्राजंस् तथैवाभिषवं द्विजाः ॥ २३॥

अभिषूय ततो राजन् सोमं सोमपसत्तमाः ।
सवनान्यानुपूर्व्येण चक्रुश्शास्त्रानुसारिणः ॥ २४॥

न तत्र कृपणः कश्चिन्न दरिद्रो बभूव ह ।
क्षुधितो दुःखितो वाऽपि प्राकृतो वाऽपि मानवः ॥ २५॥

भोजनं भोजनार्थिभ्यो दापयामास सर्वदा ।
भीमसेनो महातेजास् सततं राजशासनात् ॥ २६॥

संस्तरे कुशलाश्चापि सर्वकर्माणि याजकाः ।
दिवसे दिवसे चक्रुर् यथाशास्त्रार्थचक्षुषः ॥ २७॥

---

1. क-ख-घ—नास्तीदमर्धम् ।
2. घ—इतः श्लोकद्वयं नास्ति
3. क-ख—परिक्रमन्तश्शास्त्रज्ञा विधिवत् साधु शिक्षिताः ।

[पाठान्तरम्]

नाषडङ्गविदत्रासीत् सदस्यो नाबहुश्रुतः ।
नात्रतो नानुपाध्यायो [1]न च वादाक्षमो द्विजः ॥ २८॥

यूपोच्छ्रये ततः प्राप्ते षड् बैल्वान् भरतर्षभ ।
खादिरान् [2]बिल्वसहितांस् तावतस्सर्ववर्णिनः ॥ २९॥

देवदारुमयौ द्वौ तु यूपौ कुरुपतेः क्रतौ ।
श्लेष्मातक[3]मयं चैकं याजकास्समकारयन् ॥ ३०॥

सर्वानेतान् यथाशास्त्रं याजकास्समयोजयन् ॥ ३१

शोभार्थं चापरान् यूपान् काञ्चनान् भरतर्षभ ।
स भीमः कारयामास धर्मराजस्य शासनात् ॥ ३२

ते व्यराजन्त राजर्षेर् वासोभिरुपशोभिताः ।
नरेन्द्राभिगता दैवैर् यथा सप्तर्षयो दिवि ॥ ३३

इष्टकाः काञ्चनाश्चात्र चयनार्थं कृता भवन् ।
शुशुभे चयनं तस्य दक्षस्येव प्रजापतेः ॥ ३४

चतुश्चित्यस्स तस्यासीद् अष्टादशकरात्मकः।
स रुक्मपक्षो निचितस् त्रिगुणो गरुडाकृतिः ॥ ३५

ततो नियुक्ताः पशवो यथाशास्त्रं मनीषिभिः ।
तं तं देवं समुद्दिश्य पक्षिणः पशवश्च ये ॥ ३६

---

1. क—नानूचानाक्षमो । ख—नानूचाना - मो ।
2. क-ख—बैल्वसहितांस्ततश्चुस्सर्ववर्धिनः ।
3. क-ख-घ—मयश्चैकः पालाशोदुम्बरस्तथा ।

ऋषभाश्शास्त्रपठितास् तथा जलचराश्च ये ।
सर्वांस्तानभ्ययुञ्जंस्ते तत्राग्निचयकर्मणि ॥ ३७

यूपेषु नियतं चासीत् पशूनां त्रिशतं तथा ।
अश्वरत्नोत्तमं राज्ञः कौन्तेयस्य महात्मनः ॥ ३८

स [1]यज्ञश्शुशुभे तस्य साक्षादेवर्षिसङ्कुलः ।
गन्धर्वगणसङ्कीर्णश् शोभितोऽप्सरसां गणैः ॥ ३९

स किम्पुरुषगीतैश्च [2]किन्नरैरुपशोभितः ।
सिद्धविप्रनिवासैश्च समन्तादभिशोभितः ॥ ४०

तस्मिन् सदसि नित्यास्तु व्यासशिष्या द्विजोत्तमाः ।
सर्वशास्त्रप्रणेतारः कुशला यज्ञकर्मणि ॥ ४१

नारदश्च बभूवात्र तुम्बुरुश्च महाद्युतिः ।
विश्वावसुश्चित्रसेनस् तथाऽन्ये गीतकोविदाः ॥ ४२

गन्धर्वा गीतकुशला नृत्तेषु च विशारदाः ।
रमयन्ति स्म तान् विप्रान् यज्ञकर्मान्तरेष्वथ ॥ ४३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुर्नवतितमोऽध्यायः ॥ ९४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥
[ अस्मिन्नध्याये ४३ श्लोकाः ]

---

1. क-ख--हयः + साक्षादिव जगत्पतेः ।
2. क-ख—पन्नगै ।

## ॥ पञ्चनवतितमोऽध्यायः ॥

युधिष्ठिरेणाश्वमेधसमापनानन्तरं राज्ञां यथोचितं सम्मानपूर्वकं स्वस्वदेशान् प्रति प्रस्थापनम् ॥ १ ॥

वैशम्पायनः—

श्रपयित्वा पशूनन्यान् विधिवद्द्विजसत्तमाः ।
तुरगं तं यथाशास्त्रम् आलभन्त द्विजातयः ॥ १

ततस्संज्ञप्य तुरगं विधिवद्याजकर्षभाः ।
उपसंवेशयाञ्चक्रुस् तत[1]स्तां द्विजसत्तमाः ॥ २
कलाभिस्तिसृभी राजन् यथाविधि समन्विताम् ॥ २॥

उद्धृत्य तु वपां तत्र यथाशास्त्रं द्विजर्षभाः ।
श्रपयामासुरपराश् शास्त्रवद्भरतर्षभ ॥ ३॥

तं वपाधूमगन्धं तु धर्मराजस्सहानुजः ।
उपाजिघ्रद्यथान्यायं सर्वपाप्मापहं तदा ॥ ४॥

शिष्टान्यङ्गानि यान्यासंस् तस्याश्वस्य नराधिप ।
तान्यग्नौ जुहुवुर्धीरास् समस्ताष् षोडशर्त्विजः ॥ ५॥

संस्थाप्यैवं तस्य राज्ञस् तं क्रतुं शक्रतेजसः ।
व्यासस्सशिष्यो भगवान् वर्धयामास तं नृपम् ॥ ६॥

1. अ-ब—स्तां द्रुपदात्मजाम् ।

ततो युधिष्ठिरः प्रादात् सदस्येभ्यो यथाविधि ।
कोटीस्सहस्रं निष्काणां व्यासाय तु वसुन्धराम् ॥ ७॥

प्रतिगृह्य धरां राजन् व्यासस्सत्यवतीसुतः ।
अब्रवीद्भरतश्रेष्ठं धर्मात्मानं युधिष्ठिरम् ॥ ८॥

व्यासः—

पृथिवी भवतस्त्वेषा सन्न्यस्ता राजसत्तम ।
निष्क्रयो दीयतां मह्यं ब्राह्मणा हि धनार्थिनः ॥ ९॥

वैशम्पायनः—

युधिष्ठिरस्तु तान् विप्रान् प्रत्युवाच महामनाः ।
भ्रातृभिस्सहितो धीमान् मध्ये राज्ञां महात्मनाम् ॥ १०॥

युधिष्ठिरः—

अश्वमेधे महायज्ञे पृथिवी दक्षिणा स्मृता ।
अर्जुनेन जिता सेयम् ऋत्विग्भ्यः प्रापिता मया ॥ ११॥

वनं यास्यामि विप्रेन्द्रा विभजध्वं महीमिमाम् ।
चतुर्धा पृथिवीं कृत्वा चातुर्होत्रप्रमाणतः ॥ १२॥

नाहमादातुमिच्छामि ब्रह्मस्वं मुनिसत्तमाः ।
इदं मतं हि मे नित्यं भ्रातॄणां च ममानघाः ॥ १३॥

वैशम्पायनः—

इत्युक्तवति तस्मिंस्ते भ्रातरो द्रौपदी च सा ।
एवमेतदिति प्राहुस् तदभूद्रोमहर्षणम् ॥ १४॥

ततोऽन्तरिक्षे वागासीत् साधु साध्विति भारत ।
तथैव द्विजसङ्घानां शंसतां विबभौ स्वनः ॥ १५॥

द्वैपायनस्तथोक्तस्तु पुनरेव युधिष्ठिरम् ।
उवाच मध्ये विप्राणाम् इदं सम्पूजयन् मुनिः ॥ १६॥

व्यासः—

दत्तैषा भवता मह्यं तां ते प्रतिददाम्यहम् ॥ १८
हिरण्यं दीयतामेभ्यो द्विजातिभ्यो धराऽस्तु ते ॥ १७॥

वैशम्पायनः—

ततोऽब्रवीद्वासुदेवो धर्मराजं युधिष्ठिरम् ॥ १८

श्रीभगवान्—

यथाऽऽह भगवान् व्यासस् तथा त्वं कर्तुमर्हसि ॥ १८॥

वैशम्पायनः—

इत्युक्तस्स कुरुश्रेष्ठः प्रीतात्मा भ्रातृभिस्सह ।
कोटिं कोटिं गवां प्रादाद् दक्षिणां त्रिगुणां क्रतौ ॥ १९॥

न करिष्यति तल्लोके कश्चिदन्यो नराधिपः ।
यत् कृतं कुरुसिंहेन मरुत्तमनुकुर्वता ॥ २०॥

प्रतिगृह्य तु तद्रत्नं कृष्णद्वैपायनः प्रभुः ।
ऋत्विग्भ्यः प्रददौ विद्वांश् चतुर्धा व्यभजंश्च ते ॥ २१॥

पृथिव्या निष्क्रयं दत्त्वा तद्धिरण्यं युधिष्ठिरः ।
धूतपाप्मा जितस्वर्गो मुमुदे भ्रातृभिस्सह ॥ २२॥

ऋत्विजस्तमपर्यन्तं सुवर्णनिचयं तदा ।
व्यभजन्त द्विजातिभ्यो यथोत्साहं यथाविधि ॥ २३॥

यज्ञवाटे तु यत् किञ्चिद्धिरण्यमपि भूषणम् ।
तोरणानि च यूपांश्च घटान् पात्रीस्तथेष्टकाः ॥ २४॥

युधिष्ठिराभ्यनुज्ञातास् तत् सर्वं व्यभजन् द्विजाः ॥ २५
अनन्तरं ब्राह्मणेभ्यः क्षत्रिया जह्विरे वसु ॥ २५॥

तथा विट्शूद्रसङ्घाश्च तथाऽन्ये म्लेच्छजातयः ।
कालेन महता जह्रुस् तत् सुवर्णं ततस्ततः ॥ २६॥

ततस्ते ब्राह्मणास्सर्वे मुदिता जग्मुरालयान् ।
तर्पिता वसुना चैव धर्मराज्ञा महात्मना ॥ २७॥

स्वमंशं भगवान् व्यासः [1]कुन्त्यै पादाभिवादितः ।
[2]प्रददौ तस्य महतो हिरण्यस्य महाद्युतिः ॥ २८॥

श्वशुरात् प्रीतिदानं तत् प्राप्य सा प्रीतमानसा ।
चकार पुण्यं कालेन [3]सुमहद्धि पृथा तथा ॥ २९॥

गत्वा त्ववभृथं राजा विपाप्मा भ्रातृभिस्सह ।
सभाज्यमानश्शुशुभे महेन्द्रो दैवतैरिव ॥ ३०॥

---

1. क-ख—कुन्त्याः पादाभिवादनम् ।
2. क—प्रददौ तस्य च ऋषेः प्रीतिदानमनुत्तमम् । [पाठान्तरम्]
ख-घ—नास्तीदमर्धम् ॥
3. अ—सुमहान्तं पृथा तदा । घ—सुमहर्धि पृथा गता ।

पाण्डवाश्च महीपालैस् समेतैस्संवृतास्तदा ।
अशोभन्त महाराज ग्रहास्तारागणैर्यथा ॥ ३१॥

राजभ्योऽपि ततः प्रादाद् रत्नानि विविधानि च ।
गजानश्वानलङ्कारान् [1]स्त्रीश्च रत्नानि काञ्चनम् ॥ ३२॥

[2]तद्धनौघमपर्यन्तं पार्थः पार्थिवमण्डले ।
विसृजञ्शुशुभे राजन् यथा वैश्रवणस्तथा ॥ ३३॥

आनीय च तथा वीरं राजानं बभ्रुवाहनम् ।
प्रदाय बहुलं वित्तं गृहान् प्रास्थापयत् तदा ॥ ३४॥

दुश्शलायाश्च तं पौत्रं बालकं भरतर्षभ ।
स्वराज्ये पितृभिर्मुक्ते प्रीत्या समभिषेचयत् ॥ ३५॥

राज्ञश्चैवापि तान् सर्वान् सुविभक्तान् सुपूजितान् ।
प्रस्थापयामास वशी कुरुराजो युधिष्ठिरः ॥ ३६॥

एवं बभूव यज्ञस्य धर्मराजस्य धीमतः ।
बह्वन्नधनरत्नौघस् सुरामैरेयसागरः ॥ ३७॥

सर्पिषश्च ह्रदा यत्र बहवश्चान्नपर्वताः ।
[3]रसालकर्दमाः कुल्या बभूवुर्भरतर्षभ ॥ ३८॥

[4]भक्ष्याष्षड्रसरागाणां क्रियतां भुज्यतामिति ।

---

1. अ—स्त्रियोवास्यातिचन्दनम् । ब—स्त्रीस्सरत्नं सकाञ्चनम् ।
2. ख—अर्धश्लोकं नास्ति 3. क-ख—रसानां कर्दमाः ।
4. क-ख—भक्ष्यष्षड्परागाणां ? ।

पशूनां वध्यमानानां नान्तं ददृशिरे जनाः ॥ ३९॥
मत्तोन्मत्तप्रमुदितं प्रगीतवनिताजनम् ।
मृदङ्गशङ्खनादैश्च मनोरममभूत् तदा ॥ ४०॥
दीयतां भुज्यतां चेति तत्र शब्दो महानभूत् ।
पीयतां दीयतां चेति दिवारात्रमवारिताः ॥ ४१॥
तं महोत्सवसङ्काशम् अतिहृष्टजनाकुलम् ।
कथयन्ति स्म पुरुषा नानादेशनिवासिनः ॥ ४२॥
वर्षित्वा धनधाराभिः कामै रत्नैर्धनैस्तथा ।
विपाप्मा भरतश्रेष्ठः कृतार्थः प्राविशत् पुरीम् ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चनवतितमोऽध्यायः ॥ ९५ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥
[ अस्मिन्नध्याये ४३॥ श्लोकाः ]

## ॥ षण्णवतितमोऽध्यायः ॥

वैशम्पायनेन जनमेजयं प्रति नकुलाख्यानकथनारम्भः ॥ १ ॥ अश्वमेधावसाने बिलान्निस्सृतेन कनकपार्श्वेन केनचिन्नकुलेन सदस्यान् प्रति उञ्छवृत्तिब्राह्मणस्य सक्तुप्रस्थदानप्रशंसनपूर्वकं युधिष्ठिराश्वमेधगर्हणम् ॥ २ ॥ तथा सदस्यचोदनया तत्कथनोपक्रमः ॥ ३ ॥

जनमेजयः—

पितामहस्य मे यज्ञे धर्मपुत्रस्य धीमतः ।
यदाश्चर्यमभूत् किञ्चित् तद्भवान् वक्तुमर्हति ॥ १

वैशम्पायनः—

श्रूयतां राजशार्दूल महदाश्चर्यमुत्तमम् ।
अश्वमेधे महायज्ञे निवृत्ते यदभूद्विभो ॥ २

तर्पितेषु द्विजाग्र्येषु ज्ञातिसम्बन्धिबन्धुषु ।
दीनान्धकृपणे चाऽपि तदा भरतसत्तम ॥ ३

घुष्यमाणे महानादे दिक्षु सर्वासु भारत ।
पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्धनि ॥ ४

बिलान्निस्सृत्य नकुलो रुक्मपार्श्वस्तदा नृप ।
वज्राशनिसमं नादम् अमुञ्चत विशाम्पते ॥ ५

सकृदुत्सृज्य तंनादं त्रासयानो मृगद्विजान् ।
मानुषं वचनं प्राह धृष्टो बिलशयो महान् ॥ ६

नकुलः—

सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः ।
उञ्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ॥ ७

वैशम्पायनः—

तस्य तद्वचनं श्रुत्वा नकुलस्य विशाम्पते ।
विस्मयं परमं जग्मुस् सर्वे ते ब्राह्मणर्षभाः ॥ ८

ततस्समेत्य नकुलं पर्यपृच्छन्त ते द्विजाः ॥ ८॥

द्विजाः—

कुतस्त्वं समनुप्राप्तो यज्ञं साधुसमागमम् ॥ ९

किं बलं परमं ते ह किं श्रुतं किं परायणम् ।

कथं भवन्तं विद्याम यो नो यज्ञं विगर्हते ॥ १०

अविलुप्यागमं कृत्स्नं विविधैर्याजकैर्हुतम् ।
यथागमं यथान्यायं कर्तव्यं च तथा कृतम् ॥ ११

पूजार्हाः पूजिताश्चात्र विधिवज्ज्ञानचक्षुषः ।
मन्त्रपूतं हुतश्चाग्निर् दत्तं देयममत्सरम् ॥ १२

तुष्टा द्विजर्षभाश्चात्र दानैर्बहुविधैरपि ।
क्षत्रियाश्च सुयुद्धेन श्राद्धैरपि पितामहाः ॥ १३

पालनेन विशस्तुष्टाः कामैस्तुष्टा वरस्त्रियः ।
अनुक्रोशैस्तथा [1]शूद्रा दानैश्शेषाः पृथग्जनाः ॥ १४

ज्ञातिसम्बन्धिनस्तुष्टाश् शौचेन च नृपस्य नः ।
देवा हविर्भिः पुण्यैश्च रक्षणैश्शरणागताः ॥ १५

यदत्र तथ्यं तद्ब्रूहि सत्यसन्ध द्विजातिषु ।
यथाश्रुतं यथादृष्टं पृष्टो ब्राह्मणकाम्यया ॥ १६

श्रद्धेयवाक्यः प्राज्ञस्त्वं दिव्यरूपं बिभर्षि च ।
समागतश्च विप्रैस्त्वं तत्त्वतो वक्तुमर्हसि ॥ १७

वैशम्पायनः—

इति पृष्टो द्विजैस्तैस्स प्रहस्य नकुलोऽब्रवीत् ॥ १७॥

नकुलः—

नैषा मृषा मया वाणी प्रोक्ता दर्पेण वा द्विजाः ।

---

1. क-ख—शूद्रास्तथा शेषाः ।

यन्मयोक्तमिदं किञ्चिद् युष्माभिश्चाप्युपश्रुतम् ॥ १८॥
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो द्विजर्षभाः ।
[1]उञ्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ॥ १९॥
यद्यवश्यं मयैवैतद् वक्तव्यं द्विजपुङ्गवाः ।
शृणुताव्यग्रमनसस् तन्मे सर्वं द्विजर्षभाः ॥ २०॥
अनुभूतं च दृष्टं च यन्मयाऽद्भुतमुत्तमम् ।
उञ्छवृत्तेर्यथा वृत्तं दानधर्मं च यादृशम् ॥ २१॥
स्वर्गं स्थानं च सम्प्राप्तस् सभार्यस्ससुतस्नुषः ।
[2]यथा चार्धं शरीरस्य ममेदं काञ्चनीकृतम् ॥ २२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षण्णवतितमोऽध्यायः ॥ ९६ ॥
॥ ९२ ॥ अनुगीतापर्वणि अशीतितमोऽध्यायः ॥ ८० ॥
[ अस्मिन्नध्याये २२॥ श्लोकाः ]

## ॥ सप्तनवतितमोऽध्यायः ॥

नकुलेन युधिष्ठिरादीन् प्रति सकुटुम्बस्योञ्छवृत्तेर्ब्राह्मणस्य धर्मपुरुषाय सक्तुप्रस्थदानमहिमवर्णनपूर्वकं पुनस्तत्रैवान्तर्धानम् ॥ १ ॥

नकुलः—
अत्र वो वर्तयिष्यामि दानस्य फलमुत्तमम् ।
न्यायलब्धस्य सूक्ष्मस्य विप्रे दत्तस्य वै द्विजाः ॥ १

1. अ—इतः अर्धत्रयं नास्ति 2. क-ख-ङ—इदमर्धं नास्ति

धर्मक्षेत्रे कुरुक्षेत्रे धर्मज्ञैर्बहुभिर्वृते ।
उञ्छवृत्तिर्द्विजः कश्चित् कापोतिरभवत् पुरा ॥ २

सभार्यस्सह पुत्रेण सस्नुषस्तपसि स्थितः ॥ २॥

वधूचतुर्थो वृद्धस्स धर्मात्मा नियतेन्द्रियः ।
[1]षष्ठे काले सदा विप्रो भुङ्क्ते तैस्सह सुव्रतः ॥ ३॥

षष्ठे काले कदाचित्तु तस्याहारो न विद्यते ।
[2]भुङ्क्तेऽन्यस्मिन् कदाचित् स षष्ठे काले द्विजोत्तमः ॥ ४॥

कपोतधर्मिणस्तस्य दुर्भिक्षे सति दारुणे ।
नाविद्यत तदा विप्रास् सञ्चयस्तन्निबोधत ॥ ५॥

क्षीणौषधिसमावापो द्रव्यहीनोऽभवत् तदा ।
क्षीणे कालेऽस्य सम्प्राप्ते नैवाविद्यत भोजनम् ॥ ६॥

क्षुधापरिगतास्सर्वे प्रातिष्ठन्त तदा तु ते ।
उञ्छं तदा शुक्लपक्षे मध्यं तपति भास्करे ॥ ७॥

उष्णार्तश्च क्षुधार्तश्च विप्रस्तपसि निष्ठितः ।
उञ्छमप्राप्तवानेव सार्धं परिजनेन ह ॥ ८॥

---

1. अ—षष्ठे काले तदा विप्रो द्रव्यहीनोऽभवत् तदा ।
काले कालेऽस्य सम्प्राप्ते नैवाविद्यत भोजनम् ॥ [पाठान्तरम्]
क-ख-घ—श्लोकोऽयं नास्ति । ग—उपरि मुद्रितवत् ।
2. अ—अर्धपञ्चकं नास्ति । क-ख-घ—भुङ्क्ते तस्मिंस्तु सम्प्राप्ते ।

[1]स तथैव क्षुधाविष्टस् स्पृष्ट्वा तोयं यथाविधि ।
[2]क्षपयामास तं कालं सार्धं परिजनेन ह ॥ ९॥

अथ षष्ठे गते काले ते यवप्रस्थमार्जयन् ।
यवप्रस्थं च तत् सक्तून् अकुर्वन्त तपस्विनः ॥ १०॥

कृतजप्याह्निकास्ते तु हुत्वा वह्निं यथाविधि ।
कुडवं कुडवं सर्वे व्यभजन्त तपस्विनः ॥ ११॥

अथागमद्द्विजः [3]कश्चिद् अतिथिर्भुञ्जतां तदा ।
ते तं दृष्ट्वाऽतिथिं तत्र प्रहृष्टमनसोऽभवन् ॥ १२॥

तेऽभिवाद्य सुखप्रश्नं पृष्ट्वा तमतिथिं तदा ।
विशुद्धमनसो दान्ताश् श्रद्धादमसमन्विताः ॥ १३॥

अनसूया गतक्रोधास् साधवो गतमत्सराः ।
[4]त्यक्तात्मानो जितक्रोधा धर्मज्ञा द्विजसत्तमाः ॥ १४॥

स्वं ब्रह्मचर्यं ते गोत्रम् आख्यायाथ परस्परम् ।
कुटीं प्रवेशयामासुः क्षुधार्तमतिथिं तदा ॥ १५॥

[5]इदमर्घ्यं च पाद्यं च बृसी चेयं तवानघ ।
शुचयस्सक्तवश्चेमे नियमोपार्जिताः प्रभो ॥
प्रतिगृह्णीष्व भद्रं ते मया दत्तान् द्विजोत्त-
मर्घम्

1. घ—श्लोकोऽयं नास्ति 2
3. क-ख-घ—कश्चित्, बुभुक्षूणां त
4. अ—इदमर्घं नास्ति

इत्युक्तः प्रतिगृह्याथ सक्तूनां कुडवं द्विजः ।
भक्षयामास राजेन्द्र न च तुष्टिं जगाम सः ॥ १८

स उञ्छवृत्तिस्तं प्रेक्ष्य क्षुधापरिगतं द्विजम् ।
आहारं चिन्तयामास कथं तुष्टो भवेदिति ॥ १९

तस्य भार्योऽब्रवीद्राजन् मद्भागो दीयतामयम् ।
गच्छत्वेष यथाकामं सन्तुष्टो द्विजसत्तमः ॥ २०

इति ब्रुवन्तीं तां साध्वीं धर्मात्मा स द्विजर्षभः ।
क्षुधापरिगतां ज्ञात्वा सक्तूंस्तान् नाभ्यनन्दत ॥ २१

जानन् वृद्धां क्षुधार्तां च श्रान्तां ग्लानां तपस्विनीम् ।
त्वगस्थिभूतां ध्यायन्तीं ततो भार्यामुवाच ताम् ॥ २२

ब्राह्मणः—

अपि कीटपतङ्गानां मृगाणां चैव शोभने ।
स्त्रियो रक्ष्याश्च पोष्याश्च नैवं त्वं वक्तुमर्हसि ॥ २३

[1]अनुकम्प्यो नरः पत्न्या पुष्टो रक्षित एव च ।
[2]मो दीप्तान्न च लोकानवाप्नुयात् ॥ २४

[3]र्मार्थौ तौ समौ मुने ॥ २४॥

[4]ि मे ॥ २५

---

[1]अत एव वा ।

सत्यं रतिश्च धर्मश्च स्वर्गश्च गुणनिर्जितः ।
स्त्रीणां पतिसमाधीनं तपश्चेदं द्विजोत्तम ॥ २६

भ्रातुर्मातुः पितुर्बीजं दैवतं [1]परमं पतिः ।
भर्तुः प्रसादात् स्त्रीणां वै रतिपुत्रफलं तथा ॥ २७

पालानाद्धि पतिस्त्वं मे भर्तोऽसि भरणान्वितः ।
पुत्रप्रदानाद्वरदस् तस्मात् सक्तून् गृहाण मे ॥ २८

[2]जरापरिगतो वृद्धः क्षुधार्तो दुर्बलोऽदृढः ।
उपवासपरिश्रान्तो यदा त्वमपि कर्शितः ॥ २९

**वैशम्पायनः—**

इत्युक्तस्स तया सक्तून् प्रगृह्येदं वचोऽब्रवीत् ॥ २९॥

**भर्ता—**

द्विज सक्तूनिमान् भूयः प्रतिगृह्णीष्व सत्तम ॥ ३०

**वैशम्पायनः—**

स तान् प्रगृह्य भुक्त्वा च न तुष्टिमगमन्मुनिः ।
तमुञ्छवृत्तिरालक्ष्य ततश्चिन्तापरोऽभवत् ॥ ३१

**पुत्रः—**

सक्तूनिमान् प्रगृह्य त्वं देहि विप्राय सत्तम ।

---

1. क-ख—परमा गतिः ।
2. क-ख—जरया पूरितो वृद्धः क्षुधया च तथा दृढम् ।
ङ—क्षुधया तथाऽदृढः ।

इत्येव सुकृतं मन्ये तस्मादेतत् करोम्यहम् ॥ ३२

भवान् हि परिपाल्यो मे सर्वयत्नैर्द्विजोत्तम ।
साधूनां काङ्क्षितं ह्येतत् पितुर्वृद्धस्य पोषणम् ॥ ३३

[1]पुत्रार्थो विहितो ह्येष स्थाविर्ये परिपालनम् ।
श्रुतिरेषा हि विप्रर्षे त्रिषु लोकेषु शाश्वती ॥ ३४

प्राणधारणमात्रेण शक्यं कर्तुं तपस्त्वया ।
प्राणा हि परमो धर्मस् स्थिता देहेषु देहिनाम् ॥ ३५

पिता—

अपि वर्षसहस्रस्त्वं बाल एव मतो मम ।
उत्पाद्य पुत्रं [2]हि पिता कृतकृत्यो भवत्युत ॥ ३६

बालानां क्षुद्रलवती जानाम्येतदहं तव ।
वृद्धोऽहं धारयिष्यामि त्वं बली भव पुत्रक ॥ ३७

जीर्णेन वयसा पुत्र न मां क्षुद्बाधतेऽपि च ।
दीर्घकालं तपस्तप्तं न मे मरणतो भयम् ॥ ३८

पुत्रः—

अपत्यमस्मि ते पुत्रस् त्राणात् पुत्रो हि विश्रुतः ।
आत्मा पुत्रस्स्मृतस्तस्मात् त्राह्यात्मानमिहात्मना ॥ ३९

पिता—

रूपेण सदृशस्त्वं मे शीलेन च बलेन च ।

---

1. घ—इतः श्लोकद्वयं नास्ति
2. क-ख—विहिताः कृतकृत्या भवन्त्युत ।

परीक्षितश्च बहुधा सक्तूनादद्मि ते सुत ॥ ४०

वैशम्पायनः—

इत्युक्त्वाऽऽदाय तान् सक्तून् प्रीतात्मा द्विजसत्तमः ।
प्रहसन्निव विप्राय स तस्मै प्रददौ तदा ॥ ४१

भुक्त्वा तानपि सक्तून् स नैव तुष्टो बभूव ह ।
उञ्छवृत्तिस्तु सव्रीलो बभूव द्विजसत्तमः ॥ ४२

तदा वधूस्थिता साध्वी ब्राह्मणप्रियकाम्यया ।
सक्तूनादाय संहृष्टा गुरुं तं वाक्यमब्रवीत् ॥ ४३

वधूः—

सन्तानात् तव सन्तानं ममापि प्रभविष्यति ।
सक्तूनिमानातिथये गृहीत्वा त्वं प्रयच्छ मे ॥ ४४

तव प्रसवनिर्वृत्या मम लोकाः किलाक्षयाः ।
पौत्रेण तानवाप्नोति यत्र गत्वा न शोचति ॥ ४५

धर्माद्या हि [1]यथा त्रेता वह्नित्रेता तथैव च ।
तथैव पुत्रपौत्राणां स्वर्गे त्रेताः किलाक्षयाः ॥ ४६

[2]पितॄणां तारणात् तस्मात् पुत्र इत्यनुशुश्रुमः ।
पुत्रपौत्रैश्च नियतस् साधुलोकानुपाश्नुते ॥ ४७

श्वशुरः—

वातातपविशीर्णाङ्गीं त्वां विशीर्णां निरीक्ष्य वै ।

1. क-ख—तथा त्रेधा वह्नित्रेधा । 2. अ-घ—पितॄनृणात् तारयति ।

कर्शितां सुव्रताचारैः क्षुधाविह्वलचेतसम् ॥ ४८

कथं सक्तून् ग्रहीष्यामि भूत्वा धर्मोपघातकः ।
कल्याणवृत्ते कल्याणि नैवं त्वं वक्तुमर्हसि ॥ ४९

षष्ठे काले व्रतवतीं शीलशौचतपोन्विताम् ।
कृच्छ्रवृत्तिं निराहारां द्रक्ष्यामि त्वां कथं न्वहम् ॥ ५०

बाला क्षुधार्ता नारी च रक्ष्या त्वं सततं मया ।
उपवासपरिश्रान्ता त्वं हि बान्धवनन्दिनी ॥ ५१

स्नुषा—

गुरोर्मम गुरुस्त्वं हि यतो दैवतदैवतम् ।
देवातिदेवस्तस्मात् त्वं सक्तूनादत्स्व मे विभो ॥ ५२

देहः प्राणाश्च धर्मश्च शुश्रूषार्थमिदं गुरो ।
तव विप्र प्रसादेन लोकान् प्राप्स्याम्यभीप्सितान् ॥ ५३

अवेक्ष्या हीति कृत्वा त्वं दृढभक्तेति मां द्विज ।
चिन्त्या ममेयमिति वा सक्तूनादातुमर्हसि ॥ ५४

श्वशुरः—

अनेन नित्यं साध्वी त्वं शीलवृत्तेन शोभसे ।
यत् त्वं धर्मपथोपेता गुरुवृत्तिमवेक्षसे ॥ ५५

तस्मात् सक्तून् ग्रहीष्यामि वधूर्नार्हसि वञ्चनाम् ।
गणयित्वा महाभागे त्वं हि धर्मभृतां वरे ॥ ५६

वैशम्पायनः—

इत्युक्त्वा तानुपादाय सक्तून् प्रादाद् द्विजातये ।
ततस्तुष्टोऽभवद्विप्रस् तस्य साधोर्महात्मनः ॥ ५७

प्रीतात्मा स तु तं वाक्यम् इदमाह द्विजर्षभम् ।
वाग्मी तदा द्विजश्रेष्ठो धर्मः पुरुषविग्रहः ॥ ५८

ब्राह्मणः—

अनेन सक्तुदानेन न्यायोपेतेन तत्त्वतः ।
यथाशक्ति विमुक्तेन प्रीतोऽस्मि तव सत्तम ॥ ५९

अहो दानं विघुष्टं ते स्वर्गे स्वर्गनिवासिभिः ।
गगनात् पुष्पवर्षं च पश्य त्वं पतितं [1]भुवि ॥ ६०

सुरा देवर्षिगन्धर्वा ये च देवपुरस्सराः ।
स्तुवन्तो देवदूताश्च सिद्धाश्चापि सुविस्मिताः ॥ ६१

ब्रह्मर्षयो विमानस्था ब्रह्मलोकगताश्च ये ।
काङ्क्षन्ते दर्शनं त्वद्य दिवं गच्छ द्विजर्षभ ॥ ६२

पितृलोकगतास्सर्वे तारिताः पितरस्त्वया ।
अनागताश्च बहवस् सुबहूनि युगानि च ॥ ६३

ब्रह्मचर्येण यज्ञेन दानेन तपसाऽथवा ।
अगर्ह्येण धर्मेण तस्माद्गच्छ दिवं द्विज ॥ ६४

श्रद्धया परया यत् त्वं तपश्चरसि सुव्रत ।

---

1. क-ख—द्विज ।

तस्माद्देवास्तवानेन प्रीता द्विजवरोत्तम ॥ ६५

सर्वस्वमेतद्यस्मात् ते त्यक्तं शुद्धेन चेतसा ।
कृच्छ्रकाले ततस्स्वर्गो जितोऽयं तव कर्मणा ॥ ६६

क्षुधा निर्णुदति प्रज्ञां धर्म्यां बुद्धिं व्यपोहति ।
क्षुधापरिगतज्ञानो धृतिं त्यजति चैव हि ॥ ६७

बुभुक्षां जयते यस्तु स स्वर्गं जयते ध्रुवम् ।
यदा दानरुचेर्भावस् तदा धर्मो नु सिद्ध्यति ॥ ६८

अनवेक्ष्य सुतस्नेहं कलत्रस्नेहमेव च ।
धर्ममेव गुरुं ज्ञात्वा तृष्णा न गणिता त्वया ॥ ६९

[1]द्रव्यागमो नृणां सूक्ष्मः पात्रे दानं ततः परम् ।
[2]कालः परतरो दानाच् छ्रद्धा चापि ततः परा ॥ ७०

स्वर्गद्वारं सुसूक्ष्मं हि नरैर्मोहान्न दृश्यते ।
*सङ्गार्गलं लोभकीलं रागगुप्तं दुरासदम् ॥* ७१

तं तु पश्यन्ति पुरुषा जितक्रोधा जितेन्द्रियाः ।
ब्राह्मणास्तपसा युक्ता यथाश्रद्धाप्रदायिनः ॥ ७२

सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च ।
दद्यादपश्च यश्शक्त्या सर्वे तुल्यफलास्स्मृताः ॥ ७३

रन्तिदेवोऽपि नृपतिर् अपः प्रादादकिञ्चनः ।

---

1. क-ख—द्रव्यागमे नृणां सूक्ष्मं पात्रे दानं ।
2. अ—नाखीदमर्धम्

शुद्धेन मनसा विप्र नाकपृष्ठं ततो गतः ॥ ७४

न धर्मः प्रीयते तात दानैर्दत्तैर्महाफलैः ।
न्यायलब्धैर्यथा सूक्ष्मैश् श्रद्धापूतै[1]स्स तुष्यति ॥ ७५

गोप्रदानसहस्राणि द्विजातिभ्यो नृगो नृपः ।
एकं दत्त्वा परस्वं तु नरकं समवाप्तवान् ॥ ७६

आत्ममांसप्रदानेन शिबिरौशीनरो नृपः ।
प्राप्य पुण्यकृताँल्लोकान् मोदते दिवि सुव्रतः ॥ ७७

विभवेन नृणां पुण्यं स्वशक्त्या स्वार्जितं नृणाम् ।
न यज्ञैर्विविधैर्विप्र यथा न्यायेन सञ्चितैः ॥ ७८

क्रोधो दानफलं हन्ति लोभात् स्वर्गं न गच्छति ।
न्यायवृत्तिर्हि तपसा दानवित् स्वर्गमश्नुते ॥ ७९

न राजसूयैर्बहुभिर् इष्ट्वा विपुलदक्षिणैः ।
न चाश्वमेधैर्बहुभिः फलं सममिदं तव ॥ ८०

सक्तुप्रस्थेन हि जितो ब्रह्मलोकस्त्वयाऽनघ ।
विरजो ब्रह्मसदनं गच्छ विप्र यथेप्सितम् ॥ ८१

सर्वेषां वो द्विजश्रेष्ठ दिव्यं यानमुपस्थितम् ।
आरोहत यथाकामं धर्मोऽस्मि द्विजसत्तम ॥ ८२

पावितो हि त्वया देहो लोके कीर्तिस्थिरा च ते ।

---

1. क-ख—स्सुशिष्यते ।

सभार्यस्सहपुत्रश्च सस्नुषश्च दिवं व्रज ॥ ८३

नकुलः—

इत्युक्तवाक्यो धर्मेण यानमारुह्य स द्विजः ।
सभार्यस्सस्नुषश्चापि ससुतश्च दिवं ययौ ॥ ८४

तस्मिन् विप्रे गते स्वर्गं सपुत्रे सस्नुषे तदा ।
भार्याचतुर्थे धर्मज्ञे ततोऽहं निस्सृतो बिलात् ॥ ८५

ततस्तु सक्तुगन्धेन क्लेदेन सलिलस्य च ।
दिव्यपुष्पावमर्दाच्च साधोर्दानलवैश्च तैः ॥ ८६

विप्रस्य तपसा तस्य शिरो मे काञ्चनीकृतम् ॥ ८६॥

तस्य सत्याभिसन्धस्य सूक्ष्मदानेन चैव ह ।
शरीरार्धं च मे विप्राश् शातकुम्भमयं कृतम् ॥ ८७॥

पश्यतेदं सुविपुलं तपसा तस्य धीमतः ।
कथमेवंविधं मे स्यात् अन्यत् पार्श्वमिति द्विजाः ॥ ८८॥

तपोवनानि यज्ञांश्च हृष्टोऽभ्येमि पुनः पुनः ॥ ८९

यज्ञं त्वहमिमं श्रुत्वा कुरुराजस्य धीमतः ।
आशया परया प्राप्तो न चाहं काञ्चनः कृतः ॥ ९०

ततो मयोक्तं तत् पुण्यं प्रशस्य द्विजसत्तमाः ।
सक्तुप्रस्थेन यज्ञोऽयं सम्मितो नेति सर्वथा ॥ ९१

सक्तुप्रस्थलवैस्तैर्हि तदाऽहं काञ्चनीकृतः ।
न हि यज्ञो महानेष सदृशस्तैर्मतो मम ॥ ९२

वैशम्पायनः—

इत्युक्त्वा नकुलस्सर्वान् यज्ञे द्विजवरांस्तदा ।
जगामादर्शनं राजंस् ते च विप्रा ययुर्गृहान् ॥ ९३

[1]एतत् ते सर्वमाख्यातं मया परपुरञ्जय ।
यदाश्चर्यमभूत् तस्मिन्नश्वमेधे महाक्रतौ ॥ ९४

न विस्मयस्ते नृपते यज्ञे कार्यः कथञ्चन ।
ऋषिकोटिसहस्राणि तपोभिर्ये दिवं गताः ॥ ९५

अद्रोहस्सर्वभूतेषु सन्तोषश्शीलमार्जवम् ।
तपो दमश्च सत्यं च [2]प्रदानं चेति सम्मितम् ॥ ९६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥
[ अस्मिन्नध्याये ९६ श्लोकाः ॥

## ॥ अष्टनवतितमोऽध्यायः ॥

जनमेजयेन नकुलस्य यज्ञनिन्दाकारणं पृष्टेन वैशम्पायनेन तं प्रति सत्यदानतपोभिरेव स्वर्गादिसिद्धौ पशुहिंसाहेतुयज्ञस्य नातिप्रशस्ततरत्वमिति नकुलाभिप्रायवर्णनम् ॥ १ ॥

जनमेजयः—

यज्ञे सक्ता नृपतयस् तपस्सक्ता महर्षयः ।
शान्तिव्यवसिता विप्राश् शमे दम इति प्रभो ॥ १

1. क-ख-घ—इतः सार्धं श्लोकद्वयं नास्ति
2. क-ख—दानं चेति समं मतम्

तस्माद्यज्ञफलैस्तुल्यं न किञ्चिदिह विद्यते ।
इति मे वर्तते बुद्धिस् तथा चैतन्न संशयः ॥ २

यज्ञैरिष्ट्वा च बहवो राजानो द्विजसत्तमाः ।
इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमितो गताः ॥ ३

देवराजस्सहस्राक्षः क्रतुभिर्भूरिदक्षिणैः ।
देवराज्यं महातेजाः प्राप्तवानखिलं विभुः ॥ ४

अतो युधिष्ठिरो राजा भीमार्जुनपुरस्सरः ।
सदृशो देवराजेन समृद्ध्या विक्रमेण च ॥ ५

अथ कस्मात् स नकुलो गर्हयामास तं नृपम् ।
अश्वमेधं महायज्ञं राज्ञस्तस्य महात्मनः ॥ ६

वैशम्पायनः—

यज्ञस्य विधिमग्र्यं वै फलं चैव नरर्षभ ।
गदतश्शृणु मे राजन् यथावदिह भारत ॥ ७

पुरा शक्रस्य यजतस् सर्व ऊचुर्महर्षयः ।
ऋत्विक्षु कर्म कुर्वत्सु विततेषु यज्ञकर्मणि ॥ ८

[1]हूयमाने तथा वह्नौ हौत्रे गुणसमन्विते ।
देवेष्वाहूयमानेषु स्थितेषु परमर्षिषु ॥ ९

सुव्रतैस्तैस्तदा विप्रैस् स्वागमैस्सुस्वरैर्नृप ।

1. क—अर्धत्रयं नास्ति

अश्रान्तैश्चापि लघुभिर् अध्वर्युवृषभैस्तथा ॥ १०

आलम्भसमये तस्मिन् गृहीतेषु पशुष्वथ ।
महर्षयो महाराज सम्बभूवुः कृपान्विताः ॥ ११

ततो दीनान् पशून् दृष्ट्वा ऋषयस्ते तपोधनाः ।
ऊचुश्शक्रं समागम्य नायं यज्ञविधिश्शुभः ॥ १२

अपरिज्ञानमेतत् ते महान्तं धर्ममिच्छतः ।
न हि यज्ञे [1]पशुवधो विधिदृष्टः पुरन्दर ॥ १३

[2]धर्मोपघातकस्त्वेष समारम्भस्तव प्रभो ।
नायं धर्मकृते यज्ञो न हिंसा धर्म उच्यते ॥ १४

आगमेनैव ते यज्ञं कुर्वन्तु यदिहेच्छसि ।
विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान् भवेत् ॥ १५

[3]यज बीजैस्सहस्राक्ष त्रिवर्षपरमोत्थितैः ।
एष धर्मो महाञ्छक्र [4]महागुणफलोदयः ॥ १६

शतक्रतुस्तु तद्वाक्यम् ऋषिभिस्तत्त्वदर्शिभिः ।
[5]उक्तं न प्रतिजग्राह मानमोहवशानुगः ॥ १७

तेषां विवादस्सुमहान् जज्ञे शक्रमहर्षिणाम् ।

---

1. अ-क-ग-च—बहुगुणा विधिदृष्टाः ।
2. घ—इतः सार्धं श्लोकत्रयं नास्ति
3. क-ख—यज्ञैर्बीजैः + परमास्थितैः ।
4. क-ख—चिन्तयानोऽथ गम्यते । 5. ग—अर्धचतुष्टयं नास्ति

जङ्गमैस्थावरैश्चापि यष्टव्यमिति भारत ॥ १८

ते तु खिन्ना विवादेन ऋषयस्तत्त्वदर्शिनः ।
अभिसन्धाय शक्रेण पप्रच्छुर्नृपतिं वसुम् ॥ १९

ऋषयः—

महाप्राज्ञ कथं यज्ञेष्वागमो नृपते स्मृतः ।
यष्टव्यं पशुभिर्मेध्यैर् अथो बीजैरजैरिति ॥ २०

वैशम्पायनः—

तच्छ्रुत्वा तु वसुस्तेषाम् अविचार्य बलाबलम् ।
यथोपनीतैर्यष्टव्यम् इति प्रोवाच पार्थिवः ॥ २१

एवमुक्ते स नृपतिः प्रविवेश रसातलम् ।
उक्त्वेह वितथं राजंश् चेदीनामीश्वरः प्रभुः* ॥ २२

अन्यायोपगतं द्रव्यं सततं योऽह्यपण्डितः ।
धर्माभिकाङ्क्षी त्यजति न धर्मफलमश्नुते ॥ २३

धर्मवैतंसिको ह्येष पापात्मा पुरुषाधमः ।
ददाति दानं विप्रेभ्यो लोके विश्वासकारकम् ॥ २४

---

* ग—तस्मात्र बोध्यं ह्येकेन बहुज्ञेनापि संशये ।
प्रजापतिमपाहाय स्वयम्भुवमृते प्रभुम् ॥
तेन दत्तानि दानानि पापेनाशुद्धबुद्धिना ।
तानि सर्वाण्यनादृत्य नश्यन्ति विपुलान्यपि ॥
तस्याधर्मप्रवृत्तस्य हिंसकस्य दुरात्मनः ।
दानेन कीर्तिर्भवति न प्रेत्येह च दुर्मतेः ॥ [अधिकः पाठः]

पापेन कर्मणा विप्रो धनं लब्ध्वा निरङ्कुशः ।
रागमोहान्वितस्सोऽन्ते कलुषां गतिमश्नुते ॥ २५

[1]तेन दानानि दत्तानि पापेन हतबुद्धिना ।
तानि सत्वमनासाद्य नश्यन्ति विपुलान्यपि ॥ २६

तस्याधर्मे प्रवृत्तस्य हिंसकस्य दुरात्मनः ।
एतेनाकीर्तिर्भवति प्रेत्य चेह च दुर्मतेः ॥ २७

अपि संशयबुद्धिर्हि लोभमोहवशानुगः ।
[2]यज्ञं करोति भूतानि हिंसयन् पापचेतनः ॥ २८

[3]एवं लब्ध्वा धनं मोहाद् यजते यो ददाति च ।
स कृत्वा कर्मणा तेन न सिद्ध्यति दुरागमात् ॥ २९

[4]इच्छन् मूलं फलं शाकम् उदपानं तपोधनः ।
दानं विभवतो दत्त्वा ततस्स्वर्याति धार्मिकः ॥ ३०

एष धर्मो महापुण्यो दानं भूतदया तथा ।
ब्रह्मचर्यं तथा सत्यम् अनुक्रोशो धृतिः क्षमा ॥ ३१

सनातनस्य धर्मस्य फलमेतत् सनातनम् ॥ ३१॥

श्रूयन्ते हि पुरा विप्रा विश्वामित्रादयो नृपाः ॥ ३२

विश्वामित्रोऽसितश्चैव जनकश्च महीपतिः ।

---

1. पूर्वपुटे *ग अङ्केन अधिकपाठतया मुद्रितं मूलमातृकायामत्र दृश्यते ।
2. ग—उद्वेजयति भूतानि पापेनाशुभबुद्धिना ।
3. ग—एवं लब्ध्वा धनं मोहाद् यो हि दद्याद्यजेत वा ।
4. ग—उञ्छमूलफलं शाकमुदपात्रं तपोधनाः ।

कक्षसेनार्ष्टिषेणौ च सिन्धुद्वीपश्च पार्थिवः ॥ ३३

एते चान्ये च बहवस् सिद्धिं परमिकां गताः ।
नृपास्सत्यैश्च दानैश्च न्यायलब्धैस्तपोधनाः ॥ ३४

ब्राह्मणाः क्षत्रिया वैश्याश् शूद्रा ये चाश्रितास्तपः ।
दानधर्माश्रिताश्शुद्धास् ते स्वर्गं यान्ति भारत ॥ ३५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥
॥ ९२ ॥ अनुगीतापर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥
[ अस्मिन्नध्याये ३५ श्लोकाः ]

---

## ॥ एकोनशततमोऽध्यायः ॥

---

वैशम्पायनेन जनमेजयं प्रति पशुहिंसां विनैव ध्यानदानादिभिरेव यज्ञफलसंसिद्धौ दृष्टान्ततयाऽगस्त्ययज्ञप्रकारकथनम् ॥ १ ॥

---

जनमेजयः—

धर्मागतेन त्यागेन भगवन् सर्वमस्ति चेत् ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि भाषितुम् ॥ १

तस्योञ्छवृत्तेर्यद्वृत्तं सक्तुदानं महाफलम् ।
कथितं मे महद् ब्रह्मंस् तथ्यमेतदसंशयम् ॥ २

कथं हि सर्वयज्ञेषु निश्चयः परमो भवेत् ।
एतदर्हसि मे वक्तुं निखिलेन द्विजर्षभ ॥ ३

वैशम्पायनः—

अत्राप्युदाहरन्तीमम् इतिहासं पुरातनम् ।
अगस्त्यस्य महायज्ञे पुरा वृत्तमरिन्दम ॥ ४

पुराऽगस्त्यो महातेजा दीक्षां द्वादशवार्षिकीम् ।
प्रविवेश महाराज सर्वभूतहिते रतः ॥ ५

तत्राग्निकल्पा होतारश्चासन् सर्वे महात्मनः ।
मूलाहारा निराहाराश् चाश्मकुट्टा मरीचिपाः ॥ ६

पतिपुष्टिका वैघसिकास् सम्प्रक्षालास्तथैव च ।
यतयो भिक्षवश्चात्र बभूवुः पर्यवस्थिताः ॥ ७

सर्वे प्रत्यक्षधर्माणो जितक्रोधा जितेन्द्रियाः ।
दमे स्थिताश्च सर्वे ते दम्भमोहविवर्जिताः ॥ ८

धृद्धैश्शुद्धैस्तथा नित्यम् इन्द्रियैश्चाप्यवाहिताः ।
उपासते स्म तं यज्ञं भुञ्जानास्ते महर्षयः ॥ ९

यथाशक्त्या भगवता तदन्नं समुपार्जितम् ।
तस्मिन् सत्रे तु यत् किञ्चित् अयोग्यं तत्र नाभवत् ॥ १०

यथा ह्यनेकैर्मुनिभिर् बहवः क्रतवः कृताः ॥ १०॥

एवंविधे त्वगस्त्यस्य वर्तमाने महाध्वरे ।
न ववर्ष सहस्राक्षस् तदा भरतसत्तम ॥ ११॥

ततः कर्मान्तरे राजन्नगस्त्यस्य महात्मनः ।

कथेयमभिनिर्वृत्ता मुनीनां भावितात्मनाम् ॥ १२॥

मुनयः—

अगस्त्यो यजमानोऽयं ददात्यन्नं विमत्सरः ।
न च वर्षति पर्जन्यः कथमन्नं भविष्यति ॥ १३॥

सत्रं चेदं महद्विप्रा मुनेर्द्वादशवार्षिकम् ।
न हि वर्षति देवश्च वर्षाण्येतानि द्वादश ॥ १४॥

एतद्भवन्तस्सञ्चिन्त्य महर्षेरस्य धीमतः ।
अगस्त्यस्यातितपसः कर्तुमर्हन्त्यनुग्रहम् ॥ १५॥

वैशम्पायनः—

इत्येवमुक्ते वचने ततोऽगस्त्यः प्रतापवान् ।
प्रोवाचेदं वचो वाग्मी प्रसाद्य शिरसा मुनीन् ॥ १६॥

अगस्त्यः—

यदि द्वादश वर्षाणि न वर्षिष्यति वासवः ।
चिन्तायज्ञं करिष्यामि विधिरेष सनातनः ॥ १७॥

यदि द्वादश वर्षाणि न च वर्षति वासवः ।
स्पर्शयज्ञं करिष्यामि विधिरेष सनातनः ॥ १८॥

यदि द्वादश वर्षाणि न च वर्षति वासवः ।
ध्यानात्मना हरिष्यामि यज्ञानेतान् यतव्रतः ॥ १९॥

बीजयज्ञो मयाऽयं भो बहुवर्षसमाचितः ।
बीजैः कृतैः करिष्ये च नात्र विघ्नो भविष्यति ॥ २०॥

नेदं शक्यं वृथा कर्तुं मम सत्त्वं कथञ्चन ।
न वर्षिष्यति वा देवो न वा देवो भविष्यति ॥ २१॥
अथवाऽभ्यर्थनामिन्द्रः कुर्यान्न त्विह कामतः ।
स्वयमिन्द्रो भविष्यामि जीवयिष्यामि च प्रजाः ॥ २२॥
यो यदाहारदानश्च स तथैव भविष्यति ।
विशेषं चैव कर्तास्मि पुनः पुनरतीव हि ॥ २३॥
अद्येह स्वर्णमभ्येतु यच्चान्यद्वसु दुर्लभम् ।
त्रिषु लोकेषु यच्चास्ति तदिहागच्छतु स्वयम् ॥ २४॥
दिवि चाप्सरसां सङ्घास् सगन्धर्वास्सकिन्नराः ।
विश्वावसुश्च ये चान्ये ते च युष्मानुपासताम् ॥ २५॥
उत्तरेभ्यः कुरुभ्यश्च यत् किञ्चिद्वसु विद्यते ।
सर्वं तदिह यज्ञे मे स्वयमेवोपतिष्ठताम् ॥ २६॥
स्वर्गस्स्वर्गसदश्चैव धर्मश्च स्वयमेव मे ॥ २७

वैशम्पायनः—

इत्युक्ते सर्वमेवैतद् अभवत् तस्य धीमतः ।
[1]तस्य दीप्ताग्निमहसस् त्वगस्थ्यस्यातितेजसा ॥ २८
ततस्ते मुनयो दृष्ट्वा मुनेस्तस्य तपो बलम् ।
विस्मिता वचनं प्राहुर् इदं सर्वे महार्थवत् ॥ २९

ऋषयः—

प्रीतास्स्म तव वाक्येन न त्विच्छामस्तपोधन ।

---

1. ग-कोश एकस्मिन्नेवेदमर्धं दृश्यते ।

स्वैरेव यज्ञैस्तुष्टास्म न्यायेनेच्छामहे वयम् ॥ ३०

यज्ञदीक्षास्तथा होमान् यच्चान्यन्मृगयामहे ।
[1]तन्नोऽस्तु स्वर्गदैर्यज्ञैर् नान्यतो मृगयामहे ॥ ३१

न्यायेनोपार्जिताहारास् स्वकर्मनिरता वयम् ।
देवांश्च ब्रह्मचर्येण न्यायेन प्रार्थयामहे ॥ ३२

न्यायेन रक्षिताः काले गृहेभ्यो निस्सृता वयम् ।
[2]दृष्टैश्च विधिवद् द्वारैस् तपस्तप्स्यामहे वयम् ॥ ३३

भवतस्सम्यगेषा हि बुद्धिर्हिंसाविवर्जिता ।
एतामहिंसां यज्ञेषु ब्रूयास्त्वं सततं विभो ॥ ३४

प्रीतास्ततो भविष्यामो वयं द्विजवरोत्तम ।
विसर्जितास्समाप्तौ च सत्रादस्माद्व्रजेमहि ॥ ३५

वैशम्पायनः—

तथा कथयतामेवं देवराजः पुरन्दरः ।
ववर्ष सुमहातेजा दृष्ट्वा तस्य तपोबलम् ॥ ३६

असमाप्तौ च यज्ञस्य तस्यामितपराक्रमः ।
निकामवर्षी देवेन्द्रो बभूव जनमेजय ॥ ३७

प्रसादयामास च तम् अगस्त्यं त्रिदशेश्वरः ।
स्वयमभ्येत्य राजर्षे पुरस्कृत्य बृहस्पतिम् ॥ ३८

1. अ—तन्नोसुखोषितैर्यज्ञै । ख—तन्नोऽस्तु सुषुवैर्य । ग-इदमर्धं नास्ति
2. अ-ग—इदमर्धं नास्ति

ततो यज्ञसमाप्तौ तान् विससर्ज महामुनीन् ।
अगस्त्यः परमप्रीतः पूजयित्वा यथाविधि ॥ ३९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
आश्वमेधिकपर्वणि एकोनशततमोऽध्यायः ॥ ९९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥
[ अस्मिन्नध्याये ३९ श्लोकाः ]

---

## ॥ शततमोऽध्यायः ॥

वैशम्पायनेन जनमेजयं प्रति नकुलस्य निजस्वरूपकथनपूर्वकं तस्य नकुलत्वप्राप्तिविमोक्षकारणाभिधानम् ॥ १ ॥

---

जनमेजयः—

कोऽसौ नकुलरूपेण शिरसा काञ्चनेन ह ।
प्राह मानुषया वाचा ह्येतत् पृष्टो वदस्व मे ॥ १

वैशम्पायनः—

एतत् पूर्वं न पृष्टोऽहं न चास्माभिः प्रभाषितम् ।
श्रूयतां नकुलो योऽसौ यथा वाक् चास्य मानुषी ॥ २
श्राद्धं सङ्कल्पयामास जमदग्निः पुरा किल ।
होमधेनुस्तमागच्छत् स्वयं चापि दुदोह ताम् ॥ ३
तत् क्षीरं स्थापयामास [1]हेमभाण्डे शुभे शुचौ ।

---

1. क-ख—नवभाण्डे तथा ।

[1]क्रोधो नकुलरूपेण पितरं पर्यधर्षयत् ॥ ४

जिज्ञासुस्तमृषिश्रेष्ठं किं कुर्याद्विप्रिये कृते ।
इति सञ्चिन्त्य दुर्मेधा धर्षयामास तत् पयः ॥ ५

तमाज्ञाय मुनिः क्रोधं नैवास्मै चुकुपे ततः ।
स तु क्रोधस्तमासाद्य प्राञ्जलिर्मूर्तिमान् स्थितः ॥ ६

जितोऽस्मीति भृगुश्रेष्ठं भृगवो ह्यतिरोषणाः ।
लोके मिथ्याप्रवादोऽयं यत् त्वयाऽस्मि पराजितः ॥ ७

सोऽहं त्वयि स्थितो ह्यद्य क्षमावति महात्मनि ।
बिभेमि तपसस्साधो प्रसादं कुरु मे प्रभो ॥ ८

जमदग्निः—

सम्यग् दृष्टोऽसि मे क्रोध गच्छ त्वं विगतज्वरः ।
न ममापकृतं तेऽद्य न मन्युर्विद्यते त्वयि ॥ ९

यानुद्दिश्य तु सङ्कल्पः पयसोऽद्य कृतो मया ।
पितरस्ते महाभागास् तेभ्यो बुद्ध्यस्व गम्यताम् ॥ १०

वैशम्पायनः—

इत्युक्तो जातसन्त्रासस् तत्रैवान्तरधीयत ।
पितृणामभिषङ्गात् तु नकुलत्वमुपागतः ॥ ११

स तान् प्रसादयामास शापस्यान्तो भवेदिति ।

---

1. ग—तस्य क्रोधस्वरूपेण पितरं धर्म आविशत् ।
अ-क-ख-ङ—तच्च क्रोधस्वरूपेण पितरं पर्यवेषयत् ।

तैश्चाप्युक्तो यदा धर्मं क्षेप्स्यसे मोक्ष्यसे तदा ॥ १२
इत्युक्तो यज्ञियान् देशान् धर्मारण्यानि चैव ह ।
जुगुप्सन् परिधावन् स तं यज्ञं समुपासदत् ॥ १३
धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः ।
मुक्तशापस्ततः क्रोधो धर्मो ह्यासीद्युधिष्ठिरः ॥ १४
एवमेतद्यथा वृत्तं तस्य यज्ञे महात्मनः ।
[1]पश्यतां चापि नस्तत्र नकुलोऽन्तर्हितस्तदा ॥ १५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि शततमोऽध्यायः ॥ १०० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥
[ अस्मिन्नध्याये १५ श्लोकाः ]

## ॥ एकाधिकशततमोऽध्यायः ॥*

युधिष्ठिरेण कृष्णं प्रति वैष्णवधर्मप्रशंसनपूर्वकं तत्कथनप्रार्थना ॥ १ ॥ वसिष्ठादिभिस्तच्छ्रुश्रूषया तत्समीपोपसर्पणम् ॥ २ ॥ कृष्णेन युधिष्ठिरादीन् प्रति वैष्णवधर्मप्रशंसनपूर्वकं स्वमहिमानुबोधनम् ॥ ३ ॥

जनमेजयः—
अश्वमेधे पुरा वृत्ते केशवं केशिसूदनम् ।
धर्मसंशयमुद्दिश्य किमपृच्छत् पितामहः ॥ १

1. क-ख—इदमर्धं नास्ति

* इत आरभ्य आपर्वसमाप्ति प्रत्यध्यायं दाक्षिणात्यमातृकासु सर्वत्र "इत्याश्वमेधिके वैष्णवधर्मशास्त्रे" इति दृश्यते ।

वैशम्पायनः—
पश्चिमेनाश्वमेधेन यदा स्नातो युधिष्ठिरः ।
तदा राजन् नमस्कृत्य केशवं वाक्यमब्रवीत् ॥ २

युधिष्ठिरः—
भगवन् वैष्णवा धर्माः किंफलाः किंपरायणाः ।
किं धर्ममधिकृत्याथ भवतोत्पादिताः पुरा ॥ ३

यदि तेऽहमनुग्राह्यः प्रियो वा मधुसूदन ।
श्रोतव्या यदि वा कृष्ण तान् मे कथय सुव्रत ॥ ४

पवित्राः किल ते धर्मास् सर्वे पापप्रणाशनाः ।
सर्वधर्मोत्तमाः पुण्या भगवंस्त्वन्मुखोद्गताः ॥ ५

यच्छ्रुत्वा ब्रह्महा गोघ्नो मातृहा गुरुतल्पगः ।
पाकभेदी कृतघ्नश्च सुरापो ब्रह्मविक्रयी ॥ ६

मित्रविश्वासघाती च भ्रूणहा वीरहा तथा ।
[1]तपोविक्रायिणश्चैव दानविक्रयिणस्तथा ॥ ७

आत्मविक्रयिणो मूढा जीवेद्यश्च विकर्मभिः ।
पापाचारा नैकृतिका डाम्भिका दूषकास्तथा ॥ ८

रसभेदकरा ये च ये च स्युर्ब्रह्मदूषकाः ।
शूद्रप्रेष्यकराश्चोरा विप्रा ये च पुरोहिताः ॥ ९

निक्षेपहारिणस्स्त्रीघ्नास् तथा ये पारदारिकाः ।

1. ख—अर्धत्रयं नास्ति

एते चान्ये च बहवो मुच्यन्ते तेऽपि किल्बिषात् ॥ १०
तानाचक्ष्व सुरश्रेष्ठ त्वद्भक्तस्य ममाच्युत । १०॥

वैशम्पायनः—

इत्येवं कथिते देवे धर्मपुत्रेण संसदि ।
वसिष्ठाद्यास्तपोयुक्ता मुनयस्तत्त्वदर्शिनः ॥ ११॥
श्रोतुकामाः परं गुह्यं भक्तिमन्तो निरत्यया: ।
तथा भागवताश्चैव ततस्तं पर्यवारयन् ॥ १२॥

युधिष्ठिरः—

[1]तत्त्वतस्तव भावेन पादमूलमुपागतम् ।
यदि जानासि मां भक्तं स्निग्धं वा भक्तवत्सल ॥ १३॥
धर्मे[2]गुह्यानि सर्वाणि वेत्तुमिच्छामि तत्त्वतः ।
धर्मान् कथय देवेश यद्यनुग्रहभागहम् ॥ १४॥
श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा ।
गार्गीया गौतमीयाश्च तथा [3]गोपालकस्य च ॥ १५॥
पराशरकृताः पूर्वं आत्रेयस्य च धीमतः ।
औमा माहेश्वराश्चैव नन्दिधर्माश्च पावनाः ॥ १६॥
ब्रह्मणा कथिता ये च कौमाराश्च श्रुता मया ।

1. अ—इदमर्धं नास्ति 2. क-ख-ग—युक्तानि ।
3. अ—कापालिकस्य च । ब—गोपालितस्य च ।

[1]धूमायनकृता धर्माः काण्डवैश्वानरा अपि ॥ १७॥
भार्गवा याज्ञवल्क्याश्च [2]मार्कण्डेयकृतास्तथा ।
भारद्वाजकृता ये च बृहस्पतिकृताश्च ये ॥ १८॥

कुणेश्च कुणिबाहोश्च विश्वामित्रकृताश्च ये ।
सुमन्तुजैमिनिकृताश् शाकुनेयास्तथैव च ॥ १९॥

पुलस्त्यपुलहोद्गीताः पावकीयास्तथैव च ।
अगस्त्यगीता मौद्गल्याश् शाण्डिल्या[3]श्शलभायनाः ॥ २०॥

वालखिल्यकृता ये च ये च सप्तर्षिभिः कृताः ।
आपस्तम्बकृता धर्माश् शङ्खस्य लिखितस्य च ॥ २१॥

प्राजापत्यास्तथा याम्या माहेन्द्राश्च श्रुता मया ।
वैयाघ्र्यासगीताश्च विभण्डककृताश्च ये ॥ २२॥

नारदीयाश्श्रुता धर्माः कापोताश्च श्रुता मया ।
तथा विदुरवाक्यानि भृगोरङ्गिरसस्तथा ॥ २३॥

क्रौञ्चा मृदङ्गगीताश्च सौर्या हारीतकास्तथा ।
पिङ्गवर्मकृताश्चापि [4]कौन्तपाः पांसुबालिकाः ॥ २४॥

---

1. क-ख-ग—धूम्रायण + काण्वा वैश्वा नरा ।
2. क-ख-घ—माण्डेयाः काश्यपास्तथा ।
ग—माण्डव्याः काश्यपास्तथा ।
3. क-ख—स्सौलभायनाः ।
4. क—क्रादपापस् स । ख—क्रान्तापापाः । अ—गात्तपाहं सुबालिकाः ।

उद्दालककृता धर्मा औशनस्यास्तथैव च ।
वैशम्पायनगीताश्च ये चान्येऽप्येवमादयः ॥ २५॥

एतेभ्यस्सर्वधर्मेभ्यो देव त्वन्मुखनिस्सृताः ।
[1]पावनत्वात् पवित्रत्वाद् विशिष्टा इति मे मतिः ॥ २६॥

तस्माद्धि त्वां प्रपन्नस्य त्वद्भक्तस्य च भावतः ।
युष्मदीयान् परान् धर्मान् पुण्यान् कथय मेऽच्युत ॥ २७॥

वैशम्पायनः—

एवमुक्तस्तु धर्मज्ञो धर्मपुत्रेण माधवः ।
उवाच धर्मान् सूक्ष्मार्थान् धर्मपुत्रस्य धीमतः ॥ २८॥

श्रीभगवान्—

एवं ते यस्य कौन्तेय यत्नो धर्मेषु सुव्रत ।
त्वत्समो दुर्लभो लोके न कश्चिदिह विद्यते ॥ २९॥

धर्मश्श्रुतो वा दृष्टो वा कथितो वा कृतोऽपि वा ।
अनुमोदितो वा राजेन्द्र पुनातीह सदा नरम् ॥ ३०॥

धर्मः पिता च माता च धर्मोऽथ सुहृदस्तथा ।
धर्मो भ्राता सखा चैव धर्मस्स्वामी परन्तप ॥ ३१॥

धर्मादर्थश्च कामश्च धर्माद्भोगास् सुखानि च ।
धर्मादैश्वर्यमेवाग्र्यं धर्मात् स्वर्गगतिः परा ॥ ३२॥

धर्मोऽयं सेवितश्शुद्धस् त्रायते महतो भयात् ।

---

1. ख—अर्धत्रयं नास्ति

द्विजत्वं देवतात्वं च धर्मः प्रापयते नरम् ॥ ३३॥
यदा च क्षीयते पापं कालेन पुरुषस्य तु ।
तदा सञ्जायते बुद्धिर् धर्मं कर्तुं युधिष्ठिर ॥ ३४॥
जन्मान्तरसहस्रैस्तु मानुषत्वं हि दुर्लभम् ।
तल्लब्ध्वाऽपीह यो धर्मं न करोति स वञ्चितः ॥ ३५॥
[1]कुत्सिताश्च दरिद्राश्च विरूपा व्याधितास्तथा ।
[2]परद्वेष्याश्च मूर्खाश्च न तैर्धर्मः कृतः पुरा ॥ ३६॥
ये तु दीर्घायुषश्शूराः पण्डिता भोगिनस्तथा ।
नीरोगा रूपसम्पन्नास् तैर्धर्मास्सुकृताः पुरा ॥ ३७॥
एवं धर्मः कृतस्सद्यो नयते गतिमुत्तमाम् ।
अधर्मस्सेव्यमानस्तु तिर्यग्योनिं नयत्यमुम् ॥ ३८॥
इदं रहस्यं कौन्तेय श्रूयतामिदमुत्तमम् ।
कथयिष्ये परं गुह्यं मम भक्तस्य पाण्डव ॥ ३९॥
इष्टस्त्वमसि मेऽत्यर्थं प्रपन्नश्चासि मां सदा ।
परमार्थमपि ब्रूयां किं पुनर्धर्मसंहिताम् ॥ ४०॥
इदं मे मानुषं जन्म कृतमात्मनि मायया ।
धर्मसंस्थापनायैव दुष्टानां [3]शासनाय च ॥ ४१॥

1. क-ख—कुपिताश्च । ग—कुत्सिता ये ।
2. क-ग—परप्रेष्याश्च । ख—परप्रेक्ष्याश्च ।
3. अ-ङ—नाशनाय च ।

मानुष्यं भावमापन्नं ये मां गृह्णन्त्यवज्ञया ।
संसरन्तीह ते मूढास् तिर्यग्योनिष्वनेकशः ॥ ४२॥

ये च मां सर्वभूतस्थं पश्यन्ति ज्ञानचक्षुषः ।
मद्भक्तांस्तान् सदा युक्तान् मत्समीपं नयाम्यहम् ॥ ४३॥

मद्भक्ता न विनश्यन्ति मद्भक्ता वीतकल्मषाः ।
मद्भक्तानां तु मानुष्ये सफलं जन्म पाण्डव ॥ ४४॥

अपि पापेष्वभिरता मद्भक्ताः पाण्डुनन्दन ।
मुच्यन्ते [1]पातकैस्सर्वैः पद्मपत्रमिवाम्भसा ॥ ४५॥

जन्मान्तरसहस्रेषु तपसा भावितात्मनाम् ।
मद्भक्तिर्विद्यते तात मनुष्याणां न संशयः ॥ ४६॥

यच्च रूपं परं गुह्यं कूटस्थमचलं ध्रुवम् ।
न दृश्यते तथा देवैर् मद्भक्तैर्दृश्यते यथा ॥ ४७॥

अपरं यच्च मे रूपं प्रादुर्भावेषु दृश्यते ।
तदर्चयन्ति सर्वार्थैस् सर्वभूतानि पाण्डव ॥ ४८॥

कल्पकोटिसहस्रेषु व्यतीतेष्वागतेषु च ।
दर्शयामि तु यद्रूपं तत् प्रपश्यन्ति मे सुराः ॥ ४९॥

स्थित्युत्पत्तिप्रवकरं यो मां ज्ञात्वा प्रपद्यते ।
अनुगृह्णाम्यहं तं वै संसारान्मोचयामि च ॥ ५०॥

---

1. क-ख—सर्वपापेभ्यः ।

अहमादिर्हि देवानां सृष्ट्वा ब्रह्मादयो मया ।
प्रकृतिं स्वामवष्टभ्य जगत् सर्वं सृजाम्यहम् ॥ ५१॥

तमोमूलोऽहमव्यक्तो रजोमध्यः प्रतिष्ठितः ।
ऊर्ध्वं सत्त्वविशालोऽहं ब्रह्मादिस्तम्बसंज्ञितः ॥ ५२॥

मूर्धानं मे दिवं विद्धि चन्द्रादित्यौ च लोचने ।
[1]गावोऽग्निर्ब्राह्मणो वक्त्रं मारुतश्चसनं च मे ॥ ५३॥

दिशो मे बाहवश्चाष्टौ नक्षत्राणि विभूषणम् ।
अन्तरिक्षमुरो विद्धि सर्वभूतप्रकाशकम् ॥ ५४॥

मार्गौ मेघानिलाभ्यां तु यन्ममोदरमव्ययम् ॥ ५५

पृथिवीमण्डलं यद्वै द्वीपार्णवनगैर्युतम् ।
सर्वसन्धारणोपेतं पादौ मम युधिष्ठिर ॥ ५६

स्थितो ह्येकगुणः खेऽहं द्विगुणश्चास्मि मारुते ।
त्रिगुणोऽग्नौ स्थितोऽहं वै सलिले तु चतुर्गुणः ॥ ५७

शब्दाद्या ये गुणाः पञ्च महाभूतेषु पञ्चसु ।
तन्मात्रासंस्थितस्सोऽहं पृथिव्यां पञ्चधा स्थितः ॥ ५८

अहं सहस्रशीर्षस्तु सहस्र[2]वदनेक्षणः ।
सहस्रबाहूदरभृत् सहस्राक्षस्सहस्रपात् ॥ ५९

---

1. क-ख-ग—देवाग्निर्ब्राह्मणा वक्त्रं + नश्च मे ।
2. क-ख-ग-घ-ङ—चरणे ।

धृत्वोर्वीं सर्वतस्सम्यग् अत्यतिष्ठद् दशाङ्गुलम् ।
सर्वभूतात्मभूतस्थस् सर्वव्यापी नरो ह्यहम् ॥ ६०

[1]अचिन्त्योऽहमनन्तोऽहम् अजरोऽहमजो ह्यहम् ।
अनाद्योऽहमवध्योऽहम् अप्रमेयोऽहमव्ययः ॥ ६१

निर्गुणोऽहं निगूढात्मा नित्योऽहं निर्ममोऽपि च ।
निर्द्वन्द्वो निर्विकारोऽहं निदानं चामृतस्य ह ॥ ६२

स्वधा चाहं सुधा चाहं स्वाहाकारो नराधिप ॥ ६२॥

तेजसा तपसा चाहं भूतग्रामं चतुर्विधम् ।
स्नेहपाशगुणैर्बद्ध्वा धारयाम्यात्ममायया ॥ ६३॥

चातुराश्रमधर्मोऽहं चातुर्होत्रफलाशनः ।
चतुर्मूर्तिश्चतुर्व्यूहश् चतुराश्रमभाजनम् ॥ ६४॥

संहृत्याहं जगत् सर्वं कृत्वा वै गर्भमात्मनः ।
शयामि दिव्ययोगेन प्रलयेषु युधिष्ठिर ॥ ६५॥

सहस्रयुगपर्यन्तां ब्राह्मीं रात्रिं महार्णवे ।
स्थित्वा सृजामि भूतानि जङ्गमानि स्थिराणि च ॥ ६६॥

कल्पे कल्पे च भूतानि संहरामि सृजामि च ।
न च मां तानि जानन्ति मायया मोहितानि ह ॥ ६७॥

---

1. ख-ब—नास्तीदमर्धम्
ग—अमलोऽहमनाथोऽहम् अचलोऽहमजो ह्यहम् । [पाठान्तरम्]

मम चैवान्धकारस्य मार्गितव्यस्य नित्यशः ।
प्रशान्तस्येव दीपस्य गतिर्नैवोपलभ्यते ॥ ६८॥

न तदस्ति क्वचिद्राजन् यत्राहं न प्रतिष्ठितः ।
न च तद्विद्यते भूतं मयि यन्न प्रतिष्ठितम् ॥ ६९॥

यावन्मात्रं भवेद्भूतं स्थूलसूक्ष्ममिदं जगत् ।
जीवभूतो ह्यहं तस्मिंस् तावन्मात्रप्रतिष्ठितः ॥ ७०॥

किञ्चात्र बहुनोक्तेन सत्यमेतद्ब्रवीमि ते ।
यद्भूतं यद्भविष्यद्वा तत् सर्वमहमेव तु ॥ ७१॥

मया सृष्टानि भूतानि मन्मयानि च पाण्डव ।
मामेव न विजानन्ति मायया मोहितानि मे ॥ ७२॥

एवं सर्वं जगदिदं सदेवासुरमानुषम् ।
मत्तः प्रभवते राजन् मय्येव [1]प्रविलीयते ॥ ७३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकाधिकशततमोऽध्यायः ॥ १०१ ॥*

॥ ९२ ॥ अनुगीतापर्वणि पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

[ अस्मिन्नध्याये ७३॥ श्लोकाः ]

---

1. क-ख-ग—प्रविनाशितम् ।

* इत आरभ्य आपर्वसमाप्ति प्रत्यध्यायं अ-क-ख-ग-घ-च कोशेषु " इत्याश्वमेधिके श्रीवैष्णवधर्मशास्त्रे × × × तमोऽध्यायः " इति वर्तते ।

## ॥ द्व्यधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति चातुर्वर्ण्यधर्मनिरूपणम् ॥ १ ॥

वैशम्पायनः—

[1]एवमात्मोद्भवं सर्वं जगदुद्दिश्य केशवः ।
धर्मान् धर्मात्मजस्यैव [2]पुण्यानकथयत् प्रभुः ॥ १

श्रीभगवान्—

[3]शृणु पाण्डव तत्त्वेन पवित्रं पापनाशनम् ।
कथ्यमानं मया पुण्यं धर्मशास्त्रफलं महत् ॥ २

यश्शृणोति शुचिर्भूत्वा एकचित्तस्तपोयुतः ।
स्वर्ग्यं यशस्यमायुष्यं धर्मं ज्ञेयं युधिष्ठिर ॥ ३

[4]श्रद्दधानस्य तस्येह यत् पापं पूर्वसञ्चितम् ।
विनश्यत्याशु तत् सर्वं मद्भक्तस्य विशेषतः ॥ ४

वैशम्पायनः—

एवं श्रुत्वा वचः पुण्यं [5]सत्यं केशवभाषितम् ।
प्रहृष्टमनसो भूत्वा चिन्तयन्तोऽद्भुतं परम् ॥ ५

---

1. अ—एवं श्रुत्वा वचः पुण्यं सत्यं केशवभाषितम् ।
प्रहृष्टमनसो भूत्वा चिन्तयन्तोऽद्भुतं परम् ॥ [अधिकः पाठः]
2. ख-घ—यत् पापं पूर्वसञ्चितम् ।
3. अ-ख-घ—अर्धचतुष्टयं नास्ति 4. ख-घ—इदमर्धमपि नास्ति
5. इतः पादषट्कं न दृश्यते ।

देवब्रह्मर्षयस्सर्वे गन्धर्वाप्सरसस्तथा ।
भूतयक्षग्रहगणा गुह्यका भुजगास्तथा ॥ ६
वालखिल्या महात्मानो योगिनस्तत्त्वदर्शिनः ।
तथा भागवताश्चापि पञ्चकालमुपासकाः ॥ ७
कौतूहलसमाविष्टाः प्रहृष्टाः परमर्षयः ।
श्रोतुकामाः परं गुह्यं वैष्णवं धर्मशासनम् ॥ ८
हृदि कर्तुं च तद्वाक्यं प्रणेमुश्शिरसा तदा ॥ ८॥
ततस्तान् वासुदेवेन दृष्टान् सौम्येन चक्षुषा ।
विमुक्तपापानालोक्य प्रणम्य शिरसा हरिम् ॥ ९॥
पप्रच्छ केशवं धर्मान् धर्मपुत्रः प्रतापवान् ॥ १०

युधिष्ठिरः—

कीदृशी ब्राह्मणस्याथ कीदृशी क्षत्रियस्य वै ।
वैश्यस्य कीदृशी देव गतिश्शूद्रस्य कीदृशी ॥ ११
कथं बध्येत पापेन ब्राह्मणस्तु यमालये ।
क्षत्रियो वाऽथ वैश्यो वा शूद्रो वा बध्यते कथम् ॥ १२
एतत् कथय देवेश लोकनाथ नमोऽस्तु ते ॥ १२॥

वैशम्पायनः—

स पृष्टः केशवोऽप्येवं धर्मपुत्रेण धीमता ।
उवाच संसारगतिं चातुर्वर्ण्यस्य कर्मजाम् ॥ १३॥

श्रीभगवान्—

शृणु वर्णक्रमेणैव धर्मं धर्मभृतां वर ।
नास्ति किञ्चिन्नरश्रेष्ठ ब्राह्मणस्य तु दुष्कृतम् ॥ १४॥

[1]शिखायज्ञोपवीती स्यात् सन्ध्यां ये चाप्युपासते ।
यैश्च पूर्णाहुतिः प्राप्ता विधिवज्जुह्वते च ये ॥ १५॥

वैश्वदेवं च ये कुर्युः पूजयन्त्यतिथींश्च ये ।
नित्यं स्वाध्यायशीलाश्च [2]जपयज्ञपरास्तथा ॥ १६॥

सायंप्रातर्हुताशाश्च शूद्रभोजनवर्जिताः ।
डम्भानृतविनिर्मुक्तास् स्वदारनिरतास्सदा ॥ १७॥

पञ्चयज्ञपराश्चैव येऽग्निहोत्रमुपासते ॥ १८

[3]दहन्ति दुष्कृतं येषां हूयमानास्त्रयोऽग्नयः ।
नष्टदुष्कृतकर्माणो ब्रह्मलोकं व्रजन्ति ते ॥ १९

ब्रह्मलोके ततः कामं गन्धर्वैर्ब्रह्मगायनैः ।
उपगीयमानाः प्रयतैः पूज्यमानास्स्वयम्भुवा ॥ २०

ब्रह्मलोके प्रमोदन्ते यावदाभूतसम्प्लवम् ॥ २०॥

क्षत्रियोऽपि स्थितो राज्ये स्वधर्मं परिपालयन् ।

---

1. क-ख-घ—ये स्थितास्त्युस्सदाध्यात्मे ।
   ग-घ—नित्यं यज्ञोपवीती स्यात् ।
2. क-ख-ग—पञ्चयज्ञपरायणाः ।
3. अ-ख-ग-घ—इदमर्धं नास्ति

सम्यक् प्रजाः पालयित्वा स्वधर्मनिरतस्सदा ॥ २१॥

यज्ञदानरतो धीरस् स्वदारनिरतश्शुचिः ।
शास्त्रानुकारी तत्त्वज्ञः प्रजाकार्यपरायणः॥ २२॥

विप्रेभ्यः कामदो नित्यं भृत्यानां भरणे रतः ।
सत्यसन्धश्शुचिर्नित्यं लोभडम्भविवर्जितः ॥ २३॥

क्षत्रियोऽप्युत्तमां याति गतिं देवनिषेविताम् ॥ २४

तत्र दिव्याप्सरोभिस्तु गन्धर्वैश्च प्रयत्नतः ।
सेव्यमानो महातेजाः क्रीडते शक्रपूजितः ॥ २५

चतुर्युगानि वै त्रिंशत् क्रीडित्वा दिवि देववत् ।
इह मानुष्यलोके तु चतुर्वेदी द्विजो भवेत् ॥ २६

कृषिगोपालनिरतस् स्वधर्मान्वेषणे रतः ।
दानधर्मैऽपि निरतो विप्रशुश्रूषकस्तथा ॥ २७

सत्यसन्धश्शुचिर्नित्यं लोभडम्भविवर्जितः ।
[1]ऋजुस्स्वदारनिरतो हिंसाद्रोहविवर्जितः ॥ २८

वणिग्धर्मानमुञ्चन् वै देवब्राह्मणपूजकः ।
वणिक् च स्वर्गमाप्नोति पूज्यमानोऽप्सरोगणैः ॥ २९

चतुर्युगानि वै त्रिंशत् क्रीडित्वा दश पञ्च च ।
इह मानुष्यके लोके राजा भवति वीर्यवान् ॥ ३०

1. ख-घ—श्लोकोऽयं नास्ति ग—इदमर्धं परं नास्ति

[1]त्रयाणामपि वर्णानां शुश्रूषानिरतस्सदा ।
विशेषेणैव विप्राणां दासवद्यस्तु तिष्ठति ॥ ३१

अयाचितप्रदाता च सत्यशौचसमन्वितः ।
गुरुदेवार्चनरतः परदारविवर्जितः ॥ ३२

परपीडामकृत्वैव भृत्यवर्गं बिभर्ति यः ।
शूद्रोऽपि स्वर्गमाप्नोति जीवानामभयप्रदः ॥ ३३

स स्वर्गलोके क्रीडित्वा वर्षकोटिं महातपाः ।
इह मानुष्यके लोके वैश्यो धनपतिर्भवेत् ॥ ३४

एवं धर्मात् परं नास्ति महत् संसारमोक्षणम् ।
न च धर्मात् परं किञ्चित् पापकर्मव्यपोहनम् ॥ ३५

तस्माद्धर्मस्सदा कार्यो मानुष्यं प्राप्य दुर्लभम् ।
[2]न हि धर्मानुरक्तानां लोके किञ्चन दुर्लभम् ॥ ३६

स्वयम्भुविहितो धर्मो यो यस्येह नरेश्वर ।
[3]स तेन क्षपयेत् पापं सम्यगाचरितेन च ॥ ३७

सहजं यद्भवेत् कर्म न तत् त्याज्यं हि केन चित् ।
स एव तस्य धर्मो हि तेन सिद्धिं स गच्छति ॥ ३८

---

1. च—सुवर्णकोट्यः पञ्चाशद् रत्नानां च शतं तथा ।
हस्त्यश्वरथसंयुक्तान् महाभोगांश्च सेवते । [ अधिकः पाठः ]
2. ख-घ—इतः सार्धं श्लोकत्रयं नास्ति ग—इदमर्धं नास्ति
3. अ—इदमर्धं नास्ति

निर्गुणोऽपि स्वधर्मस्तु पापकर्म व्यपोहति ।
[1]एवमेव तु धर्मोऽपि क्षीयते पापवर्धनात् ॥ ३९

युधिष्ठिरः—

भगवन् देवदेवेश श्रोतुं कौतूहलं हि मे ।
शुभस्याप्यशुभस्यापि क्षयवृद्धी यथाक्रमम् ॥ ४०

श्रीभगवान्—

शृणु पाण्डव तत् सर्वं धर्मसूक्ष्मं सनातनम् ।
दुर्विज्ञेयतमं नित्यं [2]मम भक्तैर्महात्मभिः ॥ ४१

यथैव शीतमुदकम् उष्णेन बहुना वृतम् ।
भवेत्तु तत्क्षणादुष्णं शीतत्वं च विनश्यति ॥ ४२

यथोष्णं वा भवेदल्पं शीतेन बहुना वृतम् ।
शीतलं तद् भवेत् सर्वम् उष्णत्वं च विनश्यति ॥ ४३

एवं तु यद्भवेद्भूरि सुकृतं वाऽथ दुष्कृतम् ।
तदल्पं क्षपयेच्छीघ्रं नात्र कार्या विचारणा ॥ ४४

समत्वे सति राजेन्द्र तयोस्सुकृतपापयोः ।
गूहितस्य भवेद्वृद्धिः कीर्तितस्य भवेत् क्षयः ॥ ४५

ख्यापनेनानुतापेन प्रायः पापं प्रणश्यति ।
तथा कृतस्तु राजेन्द्र धर्मो नश्यति भारत ॥ ४६

---

1. अ-ग—इदमर्धं नास्ति
2. क-ख-ग—अतिभग्ना महाजनाः । घ—अभिभग्ना महाजनाः ।

तावुभौ गूहितौ सम्यग् वृद्धिं यातौ न संशयः ।
तस्मात् सर्वप्रयत्नेन न पापं गूहयेद्बुधः ॥ ४७

तस्मादेतत् प्रयत्नेन कीर्तनं क्षयकारणम् ।
तस्मात् सङ्कीर्तयेत् पापं नित्यं धर्मं च गूहयेत् ॥ ४८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

॥ ९२ ॥ अनुगीतापर्वणि षडशीतितमोऽध्यायः ॥ ८६ ॥

[ अस्मिन्नध्याये ४८ श्लोकाः ]

---

## ॥ त्र्यधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति जन्मदानजीवितानां वैयर्थ्यापादकाधर्मकथनम् ॥ १ ॥ तथा दानानां सात्विकत्वादिकथनपूर्वकं तत्तत्फलानां त्रैविध्यादिप्रतिपादनम् ॥ २ ॥ तथा दानपात्रलक्षणनिरूपणम् ब्राह्मणमहिमानुवर्णनं च ॥ ३ ॥

---

वैशम्पायनः—

एवं श्रुत्वा वचस्तथ्यं धर्मपुत्रोऽच्युतस्य तु ।
पप्रच्छ पुनरप्यन्यान् धर्मान् धर्मात्मजो नृप ॥ १

युधिष्ठिरः—

वृथा च कति जन्मानि वृथा दानानि वा कति ।
वृथा च जीवनं येषां नराणां पुरुषोत्तम ॥ २

कीदृशासु ह्यवस्थासु दानं दत्तं जनार्दन ।
इह लोके च भजति [1]पुरुषः पुरुषोत्तम ॥ ३

[2]गर्भस्थे कर्म चायाति किं बाल्ये वाऽपि शैशवे ।
यौवने चापि किं कृष्ण वृद्धत्वे चाऽपि किं भवेत् ॥ ४

सात्विकं कीदृशं दानं राजसं कीदृशं भवेत् ।
तामसं कीदृशं देव तर्पयिष्यति किं प्रभो ॥ ५

उत्तमं कीदृशं दानं [3]मध्यमं कीदृशं भवेत् ।
अधमं कीदृशं दानं तेषां यादव किं फलम् ॥ ६

किं दानं नयति ह्यूर्ध्वं किं गतिं मध्यमां नयेत् ।
गतिं जघन्यामथवा देवदेव ब्रवीहि मे ॥ ७

एतदिच्छामि विज्ञातुं परं कौतूहलं हि मे ।
त्वदीयं वचनं सत्यं पुण्यं च मधुसूदन ॥ ८

**वैशम्पायनः—**

एवं धर्मं प्रयत्नेन पृष्टः पाण्डुसुतेन वै ।
उवाच वासुदेवोऽथ धर्मान् धर्मात्मजस्य सः ॥ ९

**श्रीभगवान्—**

शृणु राजन् यथान्यायं वचनं तथ्यमुत्तमम् ।
कथ्यमानं मया पुण्यं सर्वपापव्यपोहनम् ॥ १०

---

1. अ—गतिं किं मध्यमां नयेत् । 2. अ—अर्धषट्कं नास्ति
3. ग—कोश एकस्मिन्नेवेतः पादद्वयं दृश्यते ।

वृथा च दश जन्मानि चत्वारि च नराधिप ।
वृथा दानानि पञ्चाशत् पञ्च चैव यथाक्रमम् ॥ ११

वृथा च जीवितं येषां ते च षट् परिकीर्तिताः ।
अनुक्रमेण सर्वाणि तानि वक्ष्यामि पाण्डव ॥ १२

धर्मघ्नानां तथा जन्म लुब्धानां पापिनां तथा ।
वृथा पाकं च येऽश्नन्ति परदाररताश्च ये ॥ १३

पाकभेदकरा ये च ये च स्युस्सत्यवर्जिताः ॥ १३॥

मृष्टमश्नाति यश्चैको दृश्यमानस्तु बान्धवैः ।
पितरं मातरं चैव उपाध्यायं गुरुं तथा ॥ १४॥

मातुलं मातुलानीं च यो विहन्याच्छपेत वा ॥ १५

ब्राह्मणाश्चैव ये भूतास् सन्ध्योपासनवर्जिताः ।
निस्स्वाहा निस्स्वधाश्चैव यश्च शूद्रान्नभुग् द्विजः ॥ १६

मम वा शङ्करस्यापि ब्रह्मणो वा युधिष्ठिर ।
अथवा ब्राह्मणानां तु ये न भक्ता नराधिप ॥ १७

वृथाजन्मान्यथैतेषां पापिनां विद्धि पाण्डव ॥ १७॥

अश्रद्धया च यद्दत्तम् [1]अवमानेन वाऽपि यत् ।
[2]डम्भार्थमपि यद्दत्तं यत् पाषण्डिहृतं नृप ॥ १८॥

---

1. क-ख-ग-घ—चौर्येणाप्यार्जितं च यत्।
2. क-ख-ग-घ—नास्तीदमधर्मम्।

[1]शूद्राचाराय यद्दत्तं यद्दत्त्वा चानुकीर्तितम् ।
रोषयुक्तं तु यद्दत्तं यद्दत्तमनुशोचितम् ॥ १९॥

डम्भार्जितं च यद्दत्तं यच्च वाऽप्यनृतार्जितम् ।
ब्राह्मणस्वं च यद्दत्तं चौर्येणाप्यार्जितं च यत् ॥ २०॥

अभिशापहृतं यत्तु यद्दत्तं पतिते द्विजे ।
यद्दत्तं स्वैरिणीभर्तुर् बहुकार्यानुवर्तिने ॥ २१॥

[2]निर्ब्रह्माभिहृतं यत्तु यद्दत्तं सर्वयाजके ।
[3]व्रात्ये तु यत् कृतं दत्तं आरूढपतिते च यत् ॥ २२॥

यद्ग्रामयाजकहृतं यत् कृतघ्नहृतं तथा ।
उपपातकिने दत्तं वेदविक्रयिणे च यत् ॥ २३॥

स्त्रीजिताय च यद्दत्तं यद्दत्तं राजसेविने ।
गणकाय च यद्दत्तं यच्चाकारुणिकाय च ॥ २४॥

वृषलीपतये दत्तं यद्दत्तं शस्त्रजीविने ।
भृतकाय च यद्दत्तं यच्च देवलकाय च ॥ २५॥

देवद्रव्याशिने दत्तं यद्दत्तं चित्रकर्मिणे ॥ २६

[4]रङ्गोपजीविने दत्तं यच्च मांसोपजीविने ।

---

1. ग—अर्धचतुष्टयं न दृश्यते ।
2. अ-च—ब्राह्म्यैस्तु यद्धृतं दानम् आरूढपतितैश्च यत् । [ पाठान्तरम् ]
3. अ-च—यद्दत्तं स्वैरिणीभर्तुश् श्वशुरानानुवर्तिनि । [ अधिकः पाठः ]
4. अ—इदमर्धं नास्ति

सेवकाय च यद्दत्तं यद्दत्तं ब्राह्मणब्रुवे ॥ २७
अदेशिने च यद्दत्तं दत्तं वार्धुषिकाय यत् ।
यदनाचारिणे दत्तं यत्तु दत्तमनग्नये ॥ २८
असन्ध्योपासिने दत्तं यच्छूद्रग्रामवासिने ।
यन्मिथ्यालिङ्गिने दत्तं दत्तं सर्वाशिने च यत् ॥ २९
नास्तिकाय च यद्दत्तं धर्मविक्रयिणे च यत् ।
चोरकाय च यद्दत्तं यद्दत्तं कूटसाक्षिणे ॥ ३०
ग्रामकूटाय यद्दत्तं दानं पार्थिवपुङ्गव ।
वृथा भवति तत् सर्वं नात्र कार्या विचारणा ॥ ३१
विप्रनामधरा ह्येते लोलुपा ब्राह्मणाधमाः ।
नात्मानं तारयन्त्येते न दातारं युधिष्ठिर ॥ ३२
एतेभ्यो दत्तमात्राणि दानानि सुबहून्यपि ।
वृथा भवन्ति राजेन्द्र भस्मन्याज्यादुतिर्यथा ॥ ३३
एतेषु यत् फलं किञ्चिद् भविष्यति कथञ्चन ।
राक्षसाश्च पिशाचाश्च तद्विलुम्पन्ति हर्षिताः ॥ ३४
वृथा ह्येतानि दानानि कथितानि समासतः ॥ ३४॥
जीवितं च वृथा येषां तच्छृणुष्व युधिष्ठिर ॥ ३५
ये च मां न प्रपद्यन्ते शङ्करं वा नराधमाः ।
ब्राह्मणान् वा महादेवान् वृथा जीवन्ति ते नराः ॥ ३६

[1]ये च निन्दन्ति मां मूढाः शङ्करं वा नराधमाः ।
ब्राह्मणान् वा द्विजान् वेदान् वृथा जीवन्ति ते नराः ॥ ३७

हेतुशास्त्रेषु ये हृष्टाः कुदृष्टिपथमाश्रिताः ।
वेदान् निन्दन्त्यनाचारा वृथा जीवन्ति ते नराः ॥ ३८

कुशलैः कृतशास्त्राणि पठित्वा ये नराधमाः ।
विप्रान् निन्दन्ति यज्ञांश्च वृथा जीवन्ति ते नराः ॥ ३९

ये च दुर्गां कुमारं वा वायुमग्निं जलं रविम् ।
पितरं मातरं चैव गुरुं नित्यं निशाकरम् ॥ ४०

मूढा निन्दन्त्यनाचारा वृथा जीवन्ति ते नराः ॥ ४०॥

विद्यमाने धने यस्तु दानधर्मविवर्जितः ।
मृष्टमश्नाति यश्चैको वृथा जीवति सोऽप्युत ॥ ४१॥

वृथा जीवितमाख्यातं दानकालं ब्रवीमि ते ॥ ४२

तमोनिविष्टचित्तेन दत्तं दानं तु यद्भवेत् ।
स तस्य फलमश्नाति नरो गर्भगतो नृप ॥ ४३

ईर्ष्यामात्सर्यसंयुक्तो डम्भार्थं चार्थकारणात् ।
ददाति दानं यो मर्त्यो बालभावे तदश्नुते ॥ ४४

[2]भोक्तुं भोगमशक्तस्तु व्याधिभिः पीडितो भृशम् ।

---

1. अ-घ—अर्धषट्कं नास्ति च—अर्धद्वयं नास्ति
2. क-ख-ग—अर्धद्वयं नास्ति च—अर्धचतुष्टयं नास्ति

ददाति दानं यो मर्त्यो वृद्धभावे तदश्नुते ॥ ४५

श्रद्धायुक्तश्शुचिस्स्नातः प्रसन्नेन्द्रियमानसः ।
दानं ददाति यो मर्त्यो यौवने स तदश्नुते ॥ ४६

स्वयं नीत्वा तु यद्दानं भक्त्या पात्रे प्रदीयते ।
तत् सार्वकालिकं विद्धि दानमामरणान्तिकम् ॥ ४७

सात्विकं राजसं चैव तामसं च युधिष्ठिर ।
दानं दानफलं चैव गतिं च त्रिविधां शृणु ॥ ४८

दानं दातव्यमित्येव मतिं कृत्वा द्विजाय वै ।
उपकारवियुक्ताय यद्दत्तं तद्धि सात्विकम् ॥ ४९

श्रोत्रियाय दरिद्राय बहुपुत्राय पाण्डव ।
दीयते यत् प्रहृष्टेन तत् सात्विकमुदाहृतम् ॥ ५०

वेदाक्षरविहीनाय यत्तु पूर्वोपकारिणे ।
समृद्धाय च यद्दत्तं तद्दानं राजसं स्मृतम् ॥ ५१

[1]सम्बन्धिने च यद्दत्तम् अव्रताय च पाण्डव ।
लोभादिभिरपात्राय तद्दानं राजसं स्मृतम् ॥ ५२

वैश्वदेवविहीनाय दानमश्रोत्रियाय यत् ।
दीयते तस्करायापि तद्दानं तामसं स्मृतम् ॥ ५३

सरोषमवधूतं च कोपयुक्तमवज्ञया ।

---

1. ब—श्लोकोऽयं नास्ति

सेवकाय च यद्दत्तं तद्दानं तामसं स्मृतम् ॥ ५४

देवाः पितृगणाश्चैव पितरश्चाग्रयस्तथा ।
सात्विकं दानमश्नन्ति तुष्यन्ति च नरेश्वर ॥ ५५

दानवा दैत्यसङ्घाश्च ग्रहा यक्षाश्च राक्षसाः ।
राजसं दानमश्नन्ति वर्जितं पितृदैवतैः ॥ ५६

[1]पिशाचाः प्रेतसङ्घाश्च कश्मला ये मलीमसाः ।
तामसं दानमश्नन्ति गतिं च त्रिविधां शृणु ॥ ५७

सात्विकानां तु दानानाम् उत्तमं फलमिष्यते ।
मध्यमं राजसानां तु तामसानां तु पश्चिमम् ॥ ५८

अभिगम्योपनीतानां दानानामुत्तमं फलम् ।
मध्यमं तु समानीय जघन्यं याचते फलम् ॥ ५९

अयाचितप्रदाता वै स याति गतिमुत्तमाम् ।
समाहूय तु वै दद्यान्मध्यमां स गतिं व्रजेत् ॥ ६०

याचितो यस्तु वै दद्याज् जघन्यां स गतिं व्रजेत् ॥ ६०॥

उत्तमा दैविकी ज्ञेया मध्यमा मानुषी गतिः ।
जघन्या चैव तिर्यक्षु गतिरेषा त्रिधा मता ॥ ६१॥

पात्रभूतेषु विप्रेषु सुस्थितेष्वाहिताग्निषु ।
यत्तु प्रक्षिप्यते दानम् अक्षय्यं तत् प्रकीर्त्यते ॥ ६२॥

1. अ—अर्धद्वयं नास्ति

श्रोत्रियाणां दरिद्राणां भरणं कुरु पाण्डव ।
समृद्धानां द्विजातीनां कार्यं ते परिरक्षणम् ॥ ६३॥

दरिद्रान् वृत्तिहीनांश्च प्रदानैस्तु सुपूजयेत् ।
आतुरस्यौषधैः कार्यं नीरुजस्य किमौषधैः ॥ ६४॥

पापं प्रतिग्रहीतारं प्रदातुरुपगच्छति ।
प्रतिग्रहीतुर्यत् पुण्यं प्रदातारमुपैति तत् ॥ ६५॥

[1]तस्माद्दानं सदा कार्यं परत्र हितमिच्छता ॥ ६६

वेदविद्यावदातेषु सदा शूद्रान्नवर्जिषु ।
प्रयत्नेन निधातव्यो महादानमयो निधिः ॥ ६७

येषां दाता प्रतीक्षेत सहस्रस्येव लम्भनम् ।
भुक्तशेषस्य भक्तस्य तान् निमन्त्रय भारत ॥ ६८

आमन्त्र्य तु निराशानि न कर्तव्यानि पाण्डव ।
कुलानि सुदरिद्राणि तेषामाशा हता भवेत् ॥ ६९

मद्भक्ता ये नरश्रेष्ठ मद्व्रता मत्परायणाः ।
मद्याजिनो मन्नियमास् तान् प्रयत्नेन पूजयेत् ॥ ७०

तेषां तु पावनायाहं नित्यमेव युधिष्ठिर ।
उभे सन्ध्येऽपि तिष्ठामि ह्यस्कन्नं तद्व्रतं मम ॥ ७१

तस्मादष्टाक्षरं मन्त्रं मद्भक्तैर्वीतकल्मषैः ।

---

1. ध—इतः क्रमेण द्विचत्वारिंशच्छ्लोका नास्मिन् कोशे दृश्यन्ते ॥

सेवकाय च यद्दत्तं तद्दानं तामसं स्मृतम् ॥ ५४

देवाः पितृगणाश्चैव पितरश्चाग्रयस्तथा ।
सात्विकं दानमश्नन्ति तुष्यन्ति च नरेश्वर ॥ ५५

दानवा दैत्यसङ्घाश्च ग्रहा यक्षाश्च राक्षसाः ।
राजसं दानमश्नन्ति वर्जितं पितृदैवतैः ॥ ५६

[1]पिशाचाः प्रेतसङ्घाश्च कश्मला ये मलीमसाः ।
तामसं दानमश्नन्ति गतिं च त्रिविधां शृणु ॥ ५७

सात्विकानां तु दानानाम् उत्तमं फलमिष्यते ।
मध्यमं राजसानां तु तामसानां तु पश्चिमम् ॥ ५८

अभिगम्योपनीतानां दानानामुत्तमं फलम् ।
मध्यमं तु समानीय जघन्यं याचते फलम् ॥ ५९

अयाचितप्रदाता वै स याति गतिमुत्तमाम् ।
समाहूय तु वै दद्यान्मध्यमां स गतिं व्रजेत् ॥ ६०

याचितो यस्तु वै दद्याज् जघन्यां स गतिं व्रजेत् ॥ ६०॥

उत्तमा दैविकी ज्ञेया मध्यमा मानुषी गतिः ।
जघन्या चैव तिर्यक्षु गतिरेषा त्रिधा मता ॥ ६१॥

पात्रभूतेषु विप्रेषु सुस्थितेष्वाहिताग्निषु ।
यत्तु प्रक्षिप्यते दानम् अक्षय्यं तत् प्रकीर्त्यते ॥ ६२॥

1. अ—अर्धद्वयं नास्ति

श्रोत्रियाणां दरिद्राणां भरणं कुरु पाण्डव ।
समृद्धानां द्विजातीनां कार्यं ते परिरक्षणम् ॥ ६३॥

दरिद्रान् वृत्तिहीनांश्च प्रदानैस्तु सुपूजयेत् ।
आतुरस्यौषधैः कार्यं नीरुजस्य किमौषधैः ॥ ६४॥

पापं प्रतिग्रहीतारं प्रदातुरुपगच्छति ।
प्रतिग्रहीतुर्यत् पुण्यं प्रदातारमुपैति तत् ॥ ६५॥

[1]तस्माद्दानं सदा कार्यं परत्र हितमिच्छता ॥ ६६

वेदविद्यावदातेषु सदा शूद्रान्नवर्जिषु ।
प्रयत्नेन निधातव्यो महादानमयो निधिः ॥ ६७

येषां दाता प्रतीक्षेत सहस्रस्येव लम्भनम् ।
भुक्तशेषस्य भक्तस्य तान् निमन्त्रय भारत ॥ ६८

आमन्त्र्य तु निराशानि न कर्तव्यानि पाण्डव ।
कुलानि सुदरिद्राणि तेषामाशा हता भवेत् ॥ ६९

मद्भक्ता ये नरश्रेष्ठ मद्व्रता मत्परायणाः ।
मद्याजिनो मन्नियमास् तान् प्रयत्नेन पूजयेत् ॥ ७०

तेषां तु पावनायाहं नित्यमेव युधिष्ठिर ।
उभे सन्ध्येऽपि तिष्ठामि ह्यस्कन्नं तद्व्रतं मम ॥ ७१

तस्मादष्टाक्षरं मन्त्रं मद्भक्तैर्वीतकल्मषैः ।

---

1. ध—इतः क्रमेण द्विचत्वारिंशच्छ्लोका नास्मिन् कोशे दृश्यन्ते ॥

सन्ध्याकालेषु जप्तव्यं सततं चात्मशुद्धये ॥ ७२
अन्येषामपि विप्राणां किल्बिषं हि प्रणश्यति ।
उभे सन्ध्येऽप्युपासीत तस्माद्विप्रो विशुद्धये ॥ ७३
दैवे श्राद्धे च विप्रस्य नियोक्तव्योऽजुगुप्सितः ।
जुगुप्सितस्तु तच्छ्राद्धं दहत्यग्निरिवेन्धनम् ॥ ७४
[1]पुराणं मानवो धर्मो वेदास्साङ्गाश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥ ७५
न ब्राह्मणान् परीक्षेत दैवे कर्मणि धर्मवित् ।
महान् भवेत् परीवादो ब्राह्मणानां परीक्षणे ॥ ७६
ब्राह्मणानां परीवादं यः कुर्यात् स नराधमः ।
[2]सहसैव शुनां योनिं स गच्छेद्ब्रह्मदूषकः ॥ ७७
श्वत्वं प्राप्नोति निन्दित्वा परीवादात् खरो भवेत् ।
[3]परिभूय कृमिर्भवति कीटो भवति मत्सरी ॥ ७८
दुर्वृत्ता वा सुवृत्ता वा प्राकृता वा सुसंस्कृताः ।
ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः ॥ ७९
क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् ।
नावमन्येत मेधावी कृशानपि कदाचन ॥ ८०

1. अ-क-ख-घ-च—भारतं ।
2. च—रासभानां शुनां+गच्छेत् पुरुषदूषकः ।
3. च—कृमिर्भवत्यभिभवात् कीटो भवति मत्सरी ।

एतत् त्रयं हि पुरुषं निर्दहेदवमानिनम् ।
तस्मादेतत् प्रयत्नेन नावमन्येत बुद्धिमान् ॥ ८१

यथा सर्वास्ववस्थासु पावको दैवतं महत् ।
तथा सर्वास्ववस्थासु ब्राह्मणो दैवतं महत् ॥ ८२

व्यङ्गाः कुब्जाश्च काणाश्च वामनाङ्गास्तथैव च ।
सर्वे दैवे नियोक्तव्या व्यामिश्रा वेदपारगैः ॥ ८३

मन्युं नोत्पादयेत् तेषां न चानिष्टं समाचरेत् ।
मन्युप्रहरणा विप्रा न विप्राश्शस्त्रपाणयः ॥ ८४

मन्युना घ्नन्ति ते शत्रून् वज्रेणेन्द्र इवासुरान् ॥ ८४॥

ब्राह्मणो हि महद्दैवं जातमात्रेण जायते ।
ईश्वरस्सर्वभूतानां [1]धर्मकोशस्य गुप्तये ॥ ८५॥

किं पुनर्ये च कौन्तेय सन्ध्ये नित्यमुपासते ॥ ८६

यस्यास्येन समश्नन्ति हव्यानि त्रिदिवौकसः ।
कव्यानि चैव पितरः किं भूतमधिकं ततः ॥ ८७

उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती ।
स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते ॥ ८८

स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
आनृशंस्याद्ब्राह्मणस्य भुञ्जते हीतरे जनाः ॥ ८९

1. क—धर्मकामस्य । ख—धर्म कामस्य ।

तस्मात् ते नावमन्तव्या मद्भक्ता हि द्विजास्सदा ॥ ८९॥

आरण्यकोपनिषदि ये तु पश्यन्ति मां द्विजाः ।
निगूढं निष्कलावस्थं तान् प्रयत्नेन पूजयेत् ॥ ९०॥

स्वगृहे वा प्रवासे वा दिवा रात्रौ तथैव च ।
श्रद्धया ब्राह्मणाः पूज्या मद्भक्ता ये च पाण्डव ॥ ९१॥

नास्ति विप्रसमं दैवं नास्ति विप्रसमो गुरुः ।
नास्ति विप्रसमो बन्धुर् नास्ति विप्रसमो निधिः ॥ ९२॥

नास्ति विप्रसमं तीर्थं न पुण्यं ब्राह्मणात् परम् ।
[1]न पवित्रं परं विप्रान्न विप्रात् पावनं परम् ॥ ९३॥

नास्ति विप्रात् परो धर्मो नास्ति विप्रात् परा गतिः ॥ ९४

पापकर्मसमाक्षिप्तं पतन्तं नरके नरम् ।
त्रायते दानमप्येकं पात्रभूते द्विजे कृतम् ॥ ९५

बालाहिताग्नयो ये च शान्ताश्शूद्रान्नवर्जिताः ।
मामर्चयन्ति मद्भक्तास् तेभ्यो दत्तं तदक्षयम् ॥ ९६

प्रदानैः पूजितो विप्रो वन्दितो वाऽपि कृत्स्नशः ।
सम्भावितो वा विप्रो वै मद्भक्तो दिवमुन्नयेत् ॥ ९७

ये पठन्ति नमस्यन्ति ध्यायन्ति पुरुषास्तु माम् ।
तांश्च स्पृष्ट्वाऽथवा दृष्ट्वा नरः पापैः प्रमुच्यते ॥ ९८

---

1. अ—इदमर्धं नास्ति

मद्भक्ता मद्गतप्राणा मद्गता मत्परायणाः ।
बीजयोनिविशुद्धा ये श्रोत्रियास्संयतेन्द्रियाः ॥ ९९
शूद्रान्नविरता नित्यं ते पुनन्तीह दर्शनात् ॥ ९९॥
स्वयं नीत्वा विशेषेण दानं तेषां गृहेष्वथ ।
निधापयेत्तु यद्भक्त्या तद्दानं कोटिसम्मितम् ॥ १००॥
जाग्रतस्स्वपतो वाऽपि प्रवासे स्वगृहेऽथवा ।
हृदये न प्रणश्यामि यस्य विप्रस्य भारत ॥ १०१॥
स पूजितो वा दृष्टो वा स्पृष्टो वाऽपि द्विजोत्तमः ।
सम्भाषितो वा राजेन्द्र पुनातीह नरं सदा ॥ १०२॥
एवं सर्वास्ववस्थासु सर्वदानानि पाण्डव ।
मद्भक्तेभ्यः प्रदत्तानि स्वर्गमार्गप्रदानि वै ॥ १०३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्ताशीतितमोऽध्यायः ॥ ८७ ॥
[ अस्मिन्नध्याये १०३॥ श्लोकाः ]

## ॥ चतुरधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति बीजयोन्योः शुद्ध्यशुद्धिनिरूपणम् ॥ १॥ तथा गायत्रीमहिमानुवर्णनम् ॥ २ ॥ ब्राह्मणमहिमप्रशंसनम् । ब्राह्मणावमन्तॄणां नारकयातनानुवर्णनं च ॥ ३ ॥

वैशम्पायनः—
श्रुत्वैवं सात्विकं दानं राजसं तामसं तथा ।
पृथक् पृथक् फलं चैव गतिं चापि पृथक् पृथक् ॥ १

अवितृप्तः प्रहृष्टात्मा पुण्यं धर्मामृतं पुनः ।
युधिष्ठिरो धर्मनित्यः केशवं पुनरब्रवीत् ॥ २

युधिष्ठिरः—

बीजयोनिविशुद्धानां लक्षणानि वदस्व मे ।
बीजदोषेण लोके च जायन्ते च कथं नराः ॥ ३

आचारदोषान् देवेश वक्तुमर्हस्यशेषतः ।
ब्राह्मणानां विशेषं च गुणदोषौ च केशव ॥ ४

चातुर्वर्ण्यस्य [1]कृत्स्नस्य वर्तमानाः प्रतिग्रहे ।
केन विप्रा विशेषेण तरन्ते तारयन्ति च ॥ ५

एतत् कथय देवेश त्वद्भक्तस्य नमोऽस्तु ते ॥ ५॥

श्रीभगवान्—

शृणु राजन् यथातत्त्वं बीजयोनिशुभाशुभम् ।
येन तिष्ठति लोकोऽयं विनश्यति च पाण्डव ॥ ६॥

अविप्लुतब्रह्मचर्यो यस्तु विप्रो यथाविधि ।
स बीजी नाम विज्ञेयस् तस्य बीजं शुभं भवेत् ॥ ७॥

कन्या चाक्षतयोनिर्या कुलीना पितृमातृतः ।
ब्राह्मादिषु विवाहेषु परिणीता यथाविधि ॥ ८॥

सा प्रशस्ता वरारोहा शुद्धयोनिः प्रशस्यते ॥ ९

1. क-ख—लोकस्य । च—कृत्स्नस्य वर्तमानान् प्रतिग्रहे ।

[1]मनसा कर्मणा वाचा या गच्छेत् परपूरुषम् ।
योनिस्तस्या नरश्रेष्ठ गर्भाधानं न चार्हति ॥ १०

स्वैरिण्या यस्तु पापात्मा सन्तानार्थमिहेच्छति ।
स कुलान् पातयत्याशु दश पूर्वान् दशापरान् ॥ ११

दुष्टयोनौ तु यो मोहाद् रेतस्सिञ्चति मूढधीः ।
तद्रेतसा समुत्पन्नष् षडङ्गविदपि द्विजः ॥ १२
साधुभिस्स बहिष्कार्यश् श्वपाक इव पार्थिव ॥ १२॥

कर्मणा मनसा वाचा या भवेत् स्वैरचारिणी ।
सा कुलघ्नीति विज्ञेया तस्यां जातश्श्वपाचकः ॥ १३॥

दैवे पित्र्ये तथा दाने भोजने सह भाषणे ।
शयने सह सम्बन्धे न योग्या दुष्टयोनिजाः ॥ १४॥

न तस्माद्दुष्टयोन्यां तु गर्भमुत्पादयेद्बुधः ।
मोहेन कुरुते यस्तु कुलं हन्ति त्रिपूरुषम् ॥ १५॥

कानीनश्च सहोढश्च तावुभौ कुण्डगोलकौ ।
आरूढ[2]पतिताज्जातः पतितस्यापि यस्सुतः ॥ १६॥
षडेते विप्रचण्डाला निषिद्धाश्श्वपचादपि ॥ १७

यो यत्र तत्र वा रेतस् सिक्त्वा शूद्रासु वा चरेत् ।

---

1. अ-क-ख-ग-घ—त्रयोदशार्धानि न सन्ति ।
2. क-ख—पतितो ज्ञातः ।

कामचारी स पापात्मा बीजं तस्याशुभं भवेत् ॥ १८

अशुभं तद्भवेद्बीजं शुद्धां योनिं न चार्हति ।
शुद्धां हविर्भुजो ज्वालां शुना लीढं हविर्यथा ॥ १९

शूद्रयोनौ पतद्बीजं हाहाशब्दं द्विजन्मनः ।
कुर्यात् पुरीषगर्तेषु पतितोऽस्मीति दुःखितः ॥ २०

मामधः पातयत्येष पापात्मा काममोहितः ।
अधोगतिं व्रजेत् क्षिप्रम् इति शप्त्वा पतेत्तु तत् ॥ २१

आत्मा हि शुक्रमुद्दिष्टं दैवतं परमं महत् ।
तस्मात् सर्वप्रयत्नेन निरुन्ध्याच्छुक्रमात्मनः ॥ २२

आयुस्तेजो बलं वीर्यं प्रज्ञा श्रीश्च महायशः ।
पुण्यं च मत्प्रियत्वं च लभते ब्रह्मचर्यया ॥ २३

अविप्लुतब्रह्मचर्यैर् गृहस्थाश्रममाश्रितैः ।
पञ्चयज्ञपरैर्धर्मस् स्थाप्यते पृथिवीतले ॥ २४

सायं प्रातस्तु ये सन्ध्यां सम्यङ् नित्यमुपासते ।
नावं वेदमयीं कृत्वा तरन्ते तारयन्ति च ॥ २५

यो जपेत् पावनीं देवीं गायत्रीं वेदमातरम् ।
न सीदेत् प्रतिगृह्णानः पृथिवीं च ससागराम् ॥ २६

ये च स्युर्दुस्थिताः केचिद् ग्रहास्सूर्यादयो दिवि ।
ते चास्य सौम्या जायन्ते शिवाश्शुभकरास्तथा ॥ २७

यत्र तत्र स्थिताश्चैव दारुणाः पिशिताशनाः ।
घोररूपा महाकाया धर्षयन्ति न तं द्विजम् ॥ २८

पुनन्तीह पृथिव्यां हि चीर्णवेदव्रता नराः ॥ २८॥

[1]अचीर्णव्रतवेदा ये विकर्मपथमाश्रिताः ।
ब्राह्मणा नाममात्रेण तेऽपि पूज्या नराधिप ॥ २९॥

किं पुनर्यस्तु सन्ध्ये द्वे नित्यमेवोपतिष्ठते ॥ ३०

शीलमध्ययनं दानं शौचं मार्दवमार्जवम् ।
तस्माद्वेदाद् विशिष्टान् वै मनुराह प्रजापतिः ॥ ३१

भूर्भुव[2]स्स्वरिति ब्रह्म यो वेदनिरतो द्विजः ।
स्वदारनिरतो दान्तस् स विद्वान् स च भूसुरः ॥ ३२

सन्ध्यामुपासते विप्रा नियमेन द्विजोत्तमाः ।
ते यान्ति नरशार्दूल ब्रह्मलोकं न संशयः ॥ ३३

सावित्रीमात्रसारोऽपि वरो विप्रस्सुयन्त्रितः ।
नायन्त्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥ ३४

सावित्रीं चैव वेदांश्च तुलयाऽतुलयन् पुरा ।
देवा ऋषिगणाश्चैव सर्वे ब्रह्मपुरस्सराः ॥ ३५

1. च—चतुर्णामपि वेदानां सा हि राजन् गरीयसी । [ अधिकः पाठः ]
2. क-ख-ग—स्सुवरिति ब्रह्म यो वेद परमं द्विजः ।

चतुर्णामपि वेदानां सा हि राजन् गरीयसी ॥ ३५॥
यथा विकसिते पुष्पे मधु गृह्णन्ति षट्पदाः ।
समुत्सृज्य रसं सर्वं निरर्थकमसारवत् ॥ ३६॥
[1]एवं गृहीता सावित्री सर्ववेदे च पाण्डव ॥ ३७
[2]एवं हि सर्ववेदानां सावित्री प्राण उच्यते ।
निर्जीवा हीतरे वेदा विना सावित्रिया नृप ॥ ३८
एवं हि यश्चतुर्वेदी शीलभ्रष्टस्स कुत्सितः ।
शीलवृत्तसमायुक्तस् सावित्रीपाठको वरः ॥ ३९
सहस्रपरमां देवीं शतमध्यां दशावराम् ।
सावित्रीं जप कौन्तेय सर्वपापप्रणाशिनीम् ॥ ४०

युधिष्ठिरः—

[3]त्रैलोक्यनाथ भो कृष्ण सर्वभूतात्मको ह्यसि ।
नानायोगधर श्रेष्ठ तुष्यसे केन कर्मणा ॥ ४१

श्रीभगवान्—

यदि भारसहस्रं तु गुग्गुल्वादि प्रधूपयेत् ।
करोति [4]चेन्नमस्कारम् उपहारं च कारयेत् ॥ ३२
पूजयेत् स्तुतिभिर्मां च ऋग्यजुस्सामभिस्सदा ।
न तोषयति चेद्विप्रान् नाहं तुष्यामि भारत ॥ ४३

---

1. अ-च—कोशयोरेवेदमर्धं दृश्यते ।
2. अ-च—कोशयोर्नास्तीदमर्धम् । 3. च—नास्त्ययं श्लोकः ।
4. क-ख-ग—च नमस्कारमुपकारांश्च ।

ब्राह्मणे पूजिते नित्यं पूजितोऽस्मि न संशयः ।
आक्रुष्टे चाहमाक्रुष्टो भवामि भरतर्षभ ॥ ४४

परा मयि गतिस्तेषां पूजयन्तीह मां हि ते ।
यदहं द्विजरूपेण वसामि वसुधातले ॥ ४५

यस्तान् पूजयति प्राज्ञो मद्गतेनान्तरात्मना ।
तमहं स्वेन रूपेण पश्यामि नरपुङ्गव ॥ ४६

काणाः कुब्जा वामनाश्च दरिद्रा व्याधितास्तथा ।
नावमान्या द्विजाः प्राज्ञैर् मम रूपा हि ते द्विजाः ॥ ४७

ये केचित् सागरान्तायां पृथिव्यां द्विजसत्तमाः ।
मम रूपेषु तेष्वेवम् अर्चितेष्वर्चितोऽस्म्यहम् ॥ ४८

बहवस्तु [1]न जानन्ति नरा ज्ञानबहिष्कृताः ।
यथा हि द्विजरूपेण वसामि वसुधातले ॥ ४९

अवमन्यन्ति ये विप्रान् [2]स्वधर्मात् पातयन्ति च ।
प्रेषयन्ते च सततं शुश्रूषां कारयन्ति च ॥ ५०

मृतांस्तान् करपत्रेण यमदूता महाबलाः ।
निकृन्तन्ति यथाकामं सूत्रमार्गेण शिल्पिनः ॥ ५१

आक्रोशपरिवादाभ्यां ये रमन्ते द्विजातिषु ।

1. क-ख—नरा ज्ञानतिमिरेण । घ—नारा ज्ञानम् इतरेण बहिष्कृताः ।
2. क-ख-ग—विकर्मापादयन्ति च ।

तान् मृतान् यमलोकस्थान् निपात्य धरणीतले ॥ ५२
आक्रम्योरसि पादेन क्रुद्धास्संरक्तलोचनाः ।
[1]अग्निवर्णैस्तु सन्दंशैर् यमो जिह्वां समुद्धरेत् ॥ ५३
ये च विप्रान् निरीक्षन्ते पापाः पापेन चक्षुषा ।
अब्रह्मण्याश्श्रुतेर्बाह्या नित्यं ब्रह्मद्विषो नराः ॥ ५४
तेषां घोरा महाकाया वक्रतुण्डा महाबलाः ।
उद्धरन्ति मुहूर्तेन खगाश्चक्षुर्यमाज्ञया ॥ ५५
यः प्रहारं द्विजेन्द्राय दद्यात् कुर्याच्च शोणितम् ।
अस्थिभङ्गं च यः कुर्यात् प्राणैर्वा विप्रयोजयेत् ॥ ५६
सोऽनुपूर्व्येण यातीमान् नरकानेकविंशतिम् ॥ ५६॥
शूलमारोपितो गत्वा ज्वलनेनापि दह्यते ॥ ५७
बहुवर्षसहस्राणि पच्यमानस्त्ववाक्छिराः ।
नावमुञ्चति दुर्मेधा न तस्य क्षीयते गतिः ॥ ५८
[2]ब्राह्मणायावगूर्यैव व्रजन्ति वधकाङ्क्षया ।
शतवर्षसहस्राणि तामिस्रे परिपच्यते ॥ ५९
उत्पाद्य शोणितं गात्रात् संरम्भान्मतिपूर्वकम् ।
स पर्यायेण यातीमान् नरकानेकविंशतिम् ॥ ६०

1. क-ख-घ—इतः श्लोकद्वयं नास्ति
2. अ-घ—ब्राह्मणान् वा विचार्यैव व्रजन् वै ।
ग—ब्राह्मणायावमानं च कुर्याच्च वध ।

तस्मान्नाकुशलं ब्रूयान्न शुष्कां गिरमीरयेत् ।
न ब्रूयात् परुषां वाणीं न चैवैतानतिक्रमेत् ॥ ६१

ये विप्राञ्छ्रद्धया वाचा पूजयन्ति नरोत्तमाः ।
अर्चितश्च स्तुतश्चैव तैर्भवामि युधिष्ठिर ॥ ६२

तर्जयन्ति च ये विप्रान् क्रोशयन्ति च भारत ।
आक्रुष्टस्तर्जितश्चाहं तैर्भवामि न संशयः ॥ ६३

यश्चन्दनैश्चागरुधूपदीपैर्
अभ्यर्चयेत् काष्ठमयीं ममार्चाम् ।
तेनार्चितो नैव भवामि सम्यग्
विप्रार्चनादर्चितोऽहं भवामि ॥ ६४

[1]विप्रप्रसादाद्धरणीधरोऽहं
विप्रप्रसादादसुराञ्जयामि ।
विप्रप्रसादाच्च सदक्षिणोऽहं
विप्रप्रसादाज्जितोऽहमस्मि ॥ ६५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टाशीतितमोऽध्यायः ॥ ८८ ॥
[ अस्मिन्नध्याये ६५ श्लोकाः ]

---

1. अ—श्लोकोऽयं नास्ति

## ॥ पञ्चाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति सुकृतिदुष्कृतिजनप्राप्यवैवस्वतपुरमार्गादि-प्रतिपादनपूर्वकं तेषां तद्गमनप्रकारानुवर्णनम् ॥ १ ॥

युधिष्ठिरः—

देवदेवेश दैत्यघ्न परं कौतूहलं हि मे ।
एतत् कथय सर्वज्ञ त्वद्भक्तस्य जनार्दन ॥ १

[1]मानुषस्य च लोकस्य यमलोकस्य चान्तरम् ॥ १॥

कीदृशं किम्प्रमाणं वा किमधिष्ठानमेव वा ।
तरन्ति मानवा देव केनोपायेन माधव ॥ २॥

त्वगस्थिमांसनिर्मुक्ते पञ्चभूतविवर्जिते ।
कथयस्व महादेव सुखदुःखमशेषतः ॥ ३॥

जीवस्य यमलोके तु कर्मभिस्तु शुभाशुभैः ।
अनुबद्धस्य तैः पाशैर् नीयमानस्य दारुणैः ॥ ४॥

मृत्युदूतैर्दुराधर्षैर् घोरैर्घोरपराक्रमैः ।
बद्धस्याक्षिप्यमाणस्य विद्रुतस्य यमाज्ञया ॥ ५॥

पुण्यपापकृतस्तिष्ठेत् सुखदुःखमशेषतः ॥ ६

यमदूतैर्दुराधर्षैर् नीयते वा कथं पुनः ।

1. क—मानुष्ये च विनिर्मुक्ते पञ्चभूतविवर्जिते, इति वर्तते, मध्ये अर्ध-त्रयं नास्ति ख-च—मानुष्यस्य च ।

किं वा तत्र महादेव कर्म कुर्वन्ति मानवाः ॥ ७

कथं धर्मरता यान्ति देवताद्विजपूजकाः ।
कथं वा पापकर्माणो यान्ति प्रेतपुरं नराः ॥ ८

किं रूपं किं प्रमाणं वा वर्णः को वाऽस्य केशव ।
जीवस्य गच्छतो नित्यं यमलोकं ब्रवीहि मे ॥ ९

श्रीभगवान्—

शृणु राजन् यथातत्त्वं यन्मां त्वं परिपृच्छसि ।
तत् तेऽहं कथयिष्यामि मद्भक्तस्य नरेश्वर ॥ १०

षडशीतिसहस्राणि योजनानां शतानि च ।
मानुष्यस्य च लोकस्य यमलोकस्य चान्तरम् ॥ ११

न तत्र वृक्षच्छाया वा न तटाकं सरोऽपि वा ।
[1]न वाप्यो दीर्घिका वाऽपि न कूपं वा युधिष्ठिर ॥ १२

न मण्टपं सभा वाऽपि न प्रपा न निवेशनम् ।
न पर्वतो नदी वाऽपि न भूमेर्विवरं क्वचित् ॥ १३

न ग्रामो नाश्रमो वाऽपि नोद्यानं काननानि वा ।
न किञ्चिद्विश्रमस्थानं पथि तस्मिन् युधिष्ठिर ॥ १४

जन्तोस्सम्प्राप्तकालस्य वेदनार्तस्य वै भृशम् ।
करणैस्त्यक्तदेहस्य प्राणैः कण्ठगतैः पुनः ॥ १५

1. ग—अर्धचतुष्टयं नास्ति

[1]शरीराच्चोह्यते जीवो ह्यवशो मातरिश्वना ॥ १५॥

निर्गतो वायुभूतस्तु षट्कोशात्तु कलेबरात् ।
[2]शरीरमन्यत् तद्रूपं तद्वर्णं तत्प्रमाणकम् ॥ १६॥
अदृश्यं सम्प्रविष्टस्तु सोऽप्यदृष्टेन केन चित् ॥ १७

सोऽन्तरात्मा देहवताम् अष्टाङ्गो यस्तु सञ्चरेत् ।
छेदनाद्दाहनाद्भेदात् ताडनाद्वा न नश्यति ॥ १८

नानारूपधरैर्घोरैः प्रचण्डैश्चण्डविक्रमैः ।
ह्रियमाणो दुराधर्षैर् यमदूतैर्यमाज्ञया ॥ १९

पुत्रदारमयैः पाशैस् सन्निरुद्धोऽवशाद् बलात् ।
स्वकर्मभिश्चानुगतैः कृतैस्सुकृतदुष्कृतैः ॥ २०

आक्रन्दमानः करुणं बन्धुभिर्दुःखपीडितैः ।
त्यक्त्वा बन्धुजनं सर्वं निरपेक्षस्तु गच्छति ॥ २१

मातृभिः पितृभिश्चैव भ्रातृभिर्मातुलैस्तथा ।
दारैः पुत्रैर्वयस्यैश्च रुदद्भिस्त्यज्यते नरः ॥ २२

अदृश्यमानस्तैर्दीनैर् अश्रुपूर्णमुखेक्षणैः ।
स्वशरीरं परित्यज्य वायुभूतस्तु गच्छति ॥ २३

अन्धकारमपारं तं महाघोरं तमोवृतम् ।

---

1. क-ख—शरीराच्चयावते । ग—शरीराच्चाक्ष्यते । घ—शरीराच्छायते ।
2. ग—न त्वस्थिस्नायुमज्जानि त्वमांसरुधिराणि च । [अधिकः पाठः]

दुःखान्तं दुष्प्रतारं च दुष्प्रकारं च दुर्गमम् ॥ २४

दुस्सहं यद् दुरन्तं च दुर्निरीक्ष्यं दुरासदम् ।
दुरापमतिदुर्गं च पापिष्ठानां नरोत्तम ॥ २५

ऋषिभिः कथ्यमानं तत् पारम्पर्येण पार्थिव ।
त्रासं जनयति प्रायश् श्रूयमाणः कथास्वपि ॥ २६

अवश्यं चैव [1]गन्तव्यस् तदध्वा तु युधिष्ठिर ।
प्राप्तकालेन सन्त्यज्य बन्धून् भोगान् धनानि च ॥ २७

जरायुजैरण्डजैश्च स्वेदजैरुद्भिजैस्तथा ।
जङ्गमैस्स्थिरसंज्ञैश्च गन्तव्यं हि यमालयम् ॥ २८

देवासुरैर्मनुष्याद्यैर् वैवस्वतवशानुगैः ।
स्त्रीपुंनपुंसकैश्चापि पृथिव्यां जीवसंज्ञितैः ॥ २९

मध्यमैर्युवभिश्चापि बालैर्वृद्धैस्तथैव च ।
जातमात्रैश्च गर्भस्थैर् गन्तव्यस्स महापथः ॥ ३०

पूर्वाह्णे वाऽपराह्णे वा सन्ध्याकालेऽथवा पुनः ।
प्रदोषे वाऽर्धरात्रे वा प्रत्यूषे वाऽप्युपस्थिते ॥ ३१

प्रवासस्थैर्वनस्थैर्वा पर्वतस्थैर्जलस्थितैः ।
क्षेत्रस्थैर्वा नभस्स्थैर्वा गृहमध्यगतैरपि ॥ ३२

भुञ्जद्भिर्वा पिबद्भिर्वा खादद्भिर्वा नरोत्तम ।

---

1. अ-ब-ड—गन्तव्यं तदध्वानं ।

आसीनैर्वा स्थितैर्वाऽपि शयनीयगतैरपि ॥ ३३
जाग्रद्भिर्वा प्रसुप्तैर्वा गन्तव्यस्स महापथः ॥ ३३॥

मृत्युदूतैर्दुराधर्षैः प्रचण्डैश्चण्डविक्रमैः ।
आक्षिप्यमाणा विवशं यान्ति शीघ्रं यमालयम् ॥ ३४॥

क्वचिद्भीतैः क्वचित्त्रस्तैः प्रस्खलद्भिः क्वचित् क्वचित् ।
क्रन्दद्भिर्वेदनार्तैस्तु गन्तव्यं यमसादनम् ॥ ३५॥

निर्भर्त्स्यमानैरुद्विग्नैर् विधृतैर्भयविह्वलैः ।
कल्प्यमानशरीरैस्तु गन्तव्यं स्त्रीजितैस्सदा ॥ ३६॥

कण्टकाकीर्णमार्गेण तप्तवालुकपांसुना ।
दह्यमानैस्तु गन्तव्यो नरैर्दानविवर्जितैः ॥ ३७॥

[1]काष्ठोपलशिलाघातैर् दण्डोल्मुककशाङ्कुशैः ।
हन्यमानैर्यमपुरं गन्तव्यं धर्मवर्जितैः ॥ ३८॥

मेदश्शोणितपूयाद्यैर् वक्त्रैर्गात्रैश्च सव्रणैः ।
[2]दग्धक्षतव्रणाकीर्णैर् गन्तव्यं जीवघातकैः ॥ ३९॥

[3]क्रन्दद्भिश्च रुदद्भिश्च क्रोशद्भिश्चापि विस्वरम् ।
[4]वेदनार्तैः पतद्भिश्च गन्तव्यं जीवघातकैः ॥ ४०॥

भग्नपादोरुहस्ताङ्गैर् भग्नदन्तशिरोधरैः ।

---

1. अ—अर्धद्वयं नास्ति
2. ब—नास्तीदमर्धम् ।
3. अ-ब—नास्तीदमर्धम्
4. अ-क-ख-ग-ब—अर्धपञ्चकं नास्ति

छिन्नकर्णोष्ठनासैश्च गन्तव्यं जीवघातकैः ॥ ४१॥

शक्तिभिर्भिण्डिपालैश्च शङ्कुतोमरसायकैः ।
तुद्यमानैस्तु शूलाग्रैर् गन्तव्यं जीवघातकैः ॥ ४२॥

श्वभिर्व्याघ्रैर्वृकैः कङ्कैर् भक्ष्यमाणास्समन्ततः ।
तुद्यमानाश्च गच्छन्ति राक्षसैर्मांसखादिभिः ॥ ४३॥

[1]महिषैश्च मृगैश्चापि सूकरैर्जम्बुकैस्तथा ।
भक्ष्यमाणैस्तदध्वानं गन्तव्यं मांसखादिभिः ॥ ४४॥

सूचीमुतीक्ष्णतुण्डाभिर् मक्षिकाभिस्समन्ततः ।
तुद्यमानैश्च गन्तव्यं पापिष्ठै[2]र्बालघातकैः ॥ ४५॥

विश्वस्तं स्वामिनं विप्रं स्त्रियं वा घ्नन्ति ये नराः ।
शस्त्रैर्निर्भिद्यमानैस्तु गन्तव्यं तैर्यमक्षयम् ॥ ४६॥

घातयन्ति च ये जीवान् दुःखमापादयन्ति च ।
राक्षसैश्च पिशाचैश्च भक्ष्यमाणा व्रजन्ति ते ॥ ४७॥

ये हरन्तीह वस्त्राणि शय्यां प्रावरणानि च ।
ते यान्ति विद्रुता नग्नाः पिशाचा इव तत्पथम् ॥ ४८॥

गाश्च धान्यं हिरण्यं वा बलात् क्षेत्रं गृहं तथा ।
ये हरन्ति दुरात्मानः परस्वं पापकारिणः ॥ ४९॥

पाषाणैरुल्मुकैर्दण्डैः काष्ठघातैश्च जर्झरैः ।

1. अ—अर्धद्वयं नास्ति 2. क-ग-घ—मंधु ख—मंधुघातिभिः।

हन्यमानैः क्षताकीर्णैर् गन्तव्यं तैर्यमालयम् ॥ ५०॥

ब्रह्मस्वं ये हरन्तीह नरा नरकपातिनः ।
आक्रोशन्तीह ये नित्यं प्रहरन्ति च ये द्विजान् ॥ ५१॥

शुष्ककण्ठा निबद्धास्ते छिन्नजिह्वाक्षिनासिकाः ।
पूयशोणितदुर्गन्धा भक्ष्यमाणाश्च जम्बुकैः ॥ ५२॥

चण्डालैर्निर्घृणैश्चण्डैस् तुद्यमानास्समन्ततः ।
क्रोशन्तः करुणं घोरं गच्छन्ति यमसादनम् ॥ ५३॥

तत्रैव पतिताः पापा विष्ठाकूपेष्वनेकशः ।
मज्जन्ते वर्षकोटीस्तु क्लिश्यन्तो वेदनार्दिताः ॥ ५४॥

ततश्च मुक्ताः कालेन लोके चास्मिन् नराधमाः ।
विष्ठाकृमित्वं गच्छन्ति जन्मकोटिशतं नृप ॥ ५५॥

विद्यमानधनैर्यैस्तु लोभदम्भानृतान्वितैः ।
श्रोत्रियेभ्यो न दत्तानि दानानि बहुधा नृप ॥ ५६॥

[1]ग्रीवापाशनिबद्धास्ते हन्यमानाश्च राक्षसैः ।
क्षुत्पिपासाश्रमार्तास्तु यान्ति प्रेतपुरं नराः ॥ ५७॥

अदत्तदाना गच्छन्ति शुष्ककण्ठास्यतालुकाः ।
अन्नं पानीयसहितं प्रार्थयन्तः पुनः पुनः ॥ ५८॥

स्वामिन् बुभुक्षातृष्णार्ता गन्तुं नैवाद्य शक्नुमः ।

1. क—अर्धत्रयं नास्ति

ममान्नं दीयतां स्वादु पानीयं दीयतामिति ॥ ५९॥
इति ब्रुवाणांस्तान् दूताः प्रापयन्ति यमालयम् ॥ ६०

वैशम्पायनः—

तच्छ्रुत्वा वचनं विष्णोः पपात भुवि पाण्डवः ।
निस्संज्ञो भयसन्त्रस्तो निश्चेष्टो भयविह्वलः ॥ ६१

ततो लब्ध्वा शनैस्संज्ञां समाश्वस्तोऽच्युतेन सः ।
नेत्रे प्रक्षाल्य तोयेन भूयः केशवमब्रवीत् ॥ ६२

युधिष्ठिरः—

भीतोऽस्म्यहं महादेव श्रुत्वा मार्गस्य विस्तरम् ।
केन दानेन तन्मार्गं तरन्ति पुरुषास्सुखम् ॥ ६३

श्रीभगवान्—

इह ये धार्मिका लोके जीवघातविवर्जिताः ।
[1]गुरुशुश्रूषणे युक्ता देवब्राह्मणपूजकाः ॥ ६४

अस्मान्मानुष्यलोकात् ते सभार्यास्सहबान्धवाः ।
[2]यमध्वानं तु गच्छन्ति यथावत् तं निबोध मे ॥ ६५

ब्राह्मणेभ्यः प्रदानानि नानारूपाणि पार्थिव ।
ये प्रयच्छन्ति [3]विप्रेभ्यस् ते सुखं यान्ति तत्पथम् ॥ ६६

---

1. च—अर्धपङ्क्तिकं नास्ति
2. क-ख-ग—यमाध्वानं तु ते यान्ति ।
3. क-ख—विद्वद्भ्यः + पदम् । ग—विद्वद्भ्यस्ते सुख्यं यांन्ति तत्पदम्

अन्नं च ये प्रयच्छन्ति ब्राह्मणेभ्यस्सुसंस्कृतम् ।
श्रोत्रियेभ्यो विशेषेण भक्त्या परमया युताः ॥ ६७
ते विमानैर्महात्मानो यान्ति चित्रैर्यमालयम् ।
सेव्यमाना वरस्त्रीभिर् अप्सरोभिर्महापथि ॥ ६८
ये च नित्यं प्रभाषन्ते प्रियं निष्कल्मषं वचः ।
ते च यान्त्यमलाभ्राभैर् विमानैस्तु यमालयम् ॥ ६९
कपिलादीनि दानानि श्रद्धायुक्ताश्च ये नराः ।
ब्राह्मणेभ्यः प्रयच्छन्ति श्रोत्रियेभ्यो विशेषतः ॥ ७०
ते यान्त्यादित्यवर्णाभैर् विमानैर्हेमभूषणैः ।
वैवस्वतपुरं रम्यम् अप्सरोभिर्निषेवितम् ॥ ७१
उपानहौ च छत्रं च शयनान्यासनानि च ।
विप्रेभ्यो ये प्रयच्छन्ति वस्त्राण्याभरणानि च ॥ ७२
ते [1]यान्त्यश्वैर्वृषैर्वाऽपि कुञ्जरैरप्यलङ्कृताः ।
[2]धर्मराजपुरं रम्यं सौवर्णच्छत्रभूषिताः ॥ ७३
ये च भक्ष्याणि दास्यन्ति भोज्यं पेयं तथैव च ।
स्निग्धान्नं चापि विप्रेभ्यश् श्रद्धया परया युताः ॥ ७४
ते यान्ति काञ्चनैर्यानैस् सुखं वैवस्वतालयम् ।
वरस्त्रीभिर्युवतिभिस् सेव्यमानास्समन्ततः ॥ ७५

1. क-ख—यान्त्यादित्यवर्णाभैः कुञ्जरैश्चाप्य+तैः ।
2. अ-क-ख-ग-घ—धनदस्य

ये च क्षीरं प्रयच्छन्ति घृतं दधि गुडं मधु ।
ब्राह्मणेभ्यः प्रयत्नेन श्रद्दधानास्सुसंस्कृताः ॥ ७६

चक्रवाकप्रयुक्तैस्तु यानै रुक्ममयैश्शुभैः ।
यान्ति गन्धर्ववादित्रैस् सेव्यमाना यमालयम् ॥ ७७

ये फलानि प्रयच्छन्ति पुष्पाणि सुरभीणि च ।
हंसयुक्तैर्विमानैस्तु यान्ति धर्मपुरं नराः ॥ ७८

ये प्रयच्छन्ति विप्रेभ्यो विविधान्नं घृताप्लुतम् ।
ते व्रजन्त्यमलाभ्राभैर् विमानैर्वायुवेगिभिः ॥ ७९
पुरं तत् प्रेतनाथस्य नानाजनसमाकुलम् ॥ ७९॥

पानीयं ये प्रयच्छन्ति सर्वभूतप्रजीवनम् ।
ते सुतृप्तास्सुखं यान्ति विमानैर्हंसचोदितैः ॥ ८०॥

ये तिलांस् तिलधेनुं वा घृतधेनुमथापि वा ।
श्रोत्रियेभ्यः प्रयच्छन्ति सौम्यभावसमन्विताः ॥ ८१॥

सोममण्डलसङ्काशैर् यानैस्ते यान्ति निर्मलैः ।
गीयमानास्तु गन्धर्वैर् वैवस्वतपुरं नराः ॥ ८२॥

येषां वाप्यश्च कूपाश्च तटाकानि सरांसि च ।
दीर्घिकाः पुष्करिण्यश्च सजलाश्च जलाशयाः ॥ ८३॥

यानैस्ते यान्ति चन्द्राभैर् दिव्यघण्टानिनादितैः ।
चामरैस्तालवृन्तैश्च वीज्यमाना महाप्रभाः ॥ ८४॥

नित्यतृप्ता महात्मानो गच्छन्ति यमसादनम् ॥ ८५

येषां देवगृहाणीह [1]चित्राण्यायतनानि च ।
मनोहराणि कान्तानि दर्शनीयानि भान्त्युत ॥ ८६

ते व्रजन्त्यमलाभ्राभैर् विमानैर्वायुवेगिभिः ।
पुरं तत् प्रेतनाथस्य नानाजनसमाकुलम् ॥ ८७

वैवस्वतं च पश्यन्ति सुखचित्तं सुखस्थितम् ।
यमेन पूजिता यान्ति यमसालोक्यतां गताः ॥ ८८

मृतानुद्दिश्य लोकेषु प्रपासु करकोद्धृतम् ।
शीतलं सलिलं रम्यं तृषितेभ्यो दिशन्ति ये ॥ ८९
ते तु तृप्तिं परां प्राप्तास् सुखं यान्ति [2]महापथम् ॥ ८९॥

काष्ठपादुकदा यान्ति तदध्वानं सुखं नराः ।
[3]सुवर्णमणिपीठे तु पादं कृत्वा रथोत्तमे ॥ ९०॥

आरामान् वृक्षषण्डांश्च रोपयन्ति च ये नराः ।
संवर्धयन्ति चान्यग्रा फलपुष्पैश्च शोभिताः ॥ ९१॥

वृक्षच्छायासु रम्यासु शीतलासु स्वलङ्कृताः ।
यान्ति ते वाहनैर्दिव्यैः पूज्यमाना मुहुर्मुहुः ॥ ९२॥

सेव्यमानास्सुरूपाभिर् उत्तमाभिः प्रयत्नतः ।

---

1. क-ख-ग—छत्राण्याभरणानि च ।
2. क-ख—यमालयम् ।
3. अ—अर्धचतुष्टयं नास्ति

स्त्रीभिः कनकवर्णाभिर् यथाकामं यथासुखम् ॥ ९३॥

सुवर्णं रजतं वाऽपि विद्रुमं मौक्तिकं तथा ।
ये प्रयच्छन्ति ते यान्ति विमानैः कनकोज्ज्वलैः ॥ ९४॥

[1]सेव्यमानास्सुरूपाभिर् अकृशाभिः प्रयत्नतः ।
स्त्रीभिः कनकवर्णाभिर् यथाकामं यथासुखम् ॥ ९५॥

अश्वयानं तु गोयानं हस्तियानमथापि वा ।
ये प्रयच्छन्ति विप्रेभ्यो विमानैः कनकोज्ज्वलैः ॥ ९६॥

ते व्रजन्ति वरस्त्रीभिस् सेव्यमाना यथासुखम् ॥ ९७

भूमिदा यान्ति तं लोकं सर्वकामैस्सुतर्पिताः ।
[2]उदितादित्यसङ्काशैर् विमानैस्ते यमालयम् ॥ ९८

कन्यां ये च प्रयच्छन्ति विप्राय श्रोत्रियाय च ।
दिव्यकन्यावृता यान्ति विमानैस्ते यमालयम् ॥ ९९

[3]सुगन्धान् गन्धसंयोगान् पुष्पाणि सुरभीणि च ।
प्रयच्छन्ति द्विजाग्र्येभ्यो भक्त्या परमया युताः ॥ १००

ते सुगन्धास्सुवेषाश्च सुप्रभास्स्रग्विभूषिताः ।
यान्ति धर्मपुरं यानैर् विचित्रैरप्यलङ्कृताः ॥ १०१

---

1. क-ख-घ—नास्तीदं श्लोकद्वयम् ।
   ग—अर्धद्वयं नास्ति
2. घ—नास्तीदमर्धम्
3. ग—ये फलानि प्रयच्छन्ति पुष्पाणि सुरभीणि च । [ अधिकः पाठः ]

दीपदा यान्ति यानैश्च दीपयन्तो दिशो दश ।
आदित्यसदृशाकारैर् दीप्यमाना यथाऽग्नयः ॥ १०२

गृहावसथदातारो गृहैः काञ्चनवेदिकैः ।
व्रजन्ति बालसूर्याभैर् धर्मराजपुरं नराः ॥ १०३

जलभाजनदातारः कुण्डिकाकरकप्रदाः ॥
पूज्यमाना वरस्त्रीभिर् यान्ति तृप्ता महागजैः ॥ १०४

पादाभ्यङ्गं शिरोभ्यङ्गं यानं पादोदकं तथा ।
ये प्रयच्छन्ति विप्रेभ्यस् ते यान्त्यश्वैर्यमालयम् ॥ १०५

विश्रामयन्ति ये विप्राञ् श्रान्तानध्वनि कर्शितान् ।
चक्रावाकप्रयुक्तेन यान्ति यानेन तेऽपि च ॥ १०६

स्वागतेन च यो विप्रं पूजयेदासनेन च ।
स गच्छति तमध्वानं सुखं परमनिर्वृतः ॥ १०७

नमो ब्रह्मण्यदेवाय यो मां दृष्ट्वाऽभिवादयेत् ।
व्रतवत् प्रयतो नित्यं स सुखं याति तत्पथम् ॥ १०८

नमस्सर्वसहाभ्यश्चेत्यभिधाय दिने दिने ।
नमस्करोति गोभ्यो यस् स सुखं याति तत्पथम् ॥ १०९

नमोऽस्तु प्रियदत्तायै तुभ्यं चेति दिने दिने ।
भूमिमाक्रमते प्रातश् शयनादुत्थितस्तु यः ॥ ११०
स सर्वकामतृप्तात्मा सर्वभूषणभूषितः ।

याति यानेन दिव्येन सुखं वैवस्वतालयम् ॥ १११

अनन्तराशिनो ये तु डम्भाहङ्कारवर्जिताः ।
तेऽपि सारसयुक्तेन यान्ति यानेन वै सुखम् ॥ ११२

ये चाप्येकेन भक्तेन वर्तन्ते डम्भवर्जिताः ।
हंसयुक्तैर्विमानैस्तु सुखं यान्ति यमालयम् ॥ ११३

चतुर्थेन हि भक्तेन वर्तन्ते ये जितेन्द्रियाः ।
यान्ति ते धर्मनगरं यानैर्बर्हिणयोजितैः ॥ ११४

तृतीयदिवसेनेह भुञ्जते ये जितेन्द्रियाः ।
तेऽपि हस्तिरथैर्यान्ति तत्पथं कनकोज्ज्वलैः ॥ ११५

षष्ठान्नकालिको यस्तु वर्षमेकं तु वर्तते ।
कामक्रोधविनिर्मुक्तश् शुचिर्नित्यं जितेन्द्रियः ॥ ११६
स याति कुञ्जरस्थस्तु जयशब्दरवैर्युतः ॥ ११६॥

पक्षोपवासिनो यान्ति यानैश्शार्दूलयोजितैः ।
धर्मराजपुरं रम्यं दिव्यस्त्रीगणसेवितम् ॥ ११७॥

ये च मासोपवासं वै कुर्वते संयतेन्द्रियाः ।
तेऽपि सूर्योदयप्रख्यैर् यान्ति यानैर्यमालयम् ॥ ११८॥

अग्निप्रवेशं यश्चापि कुरुते मूढतात्मना ।
स यात्यग्निप्रकाशेन विमानेन यमालयम् ॥ ११९॥

[1]प्राणांस्त्यजति यो विप्रो मां प्रपन्नो ह्यनाशकः ।
स बालार्कप्रकाशेन व्रजेद्यानेन तत्पथम् ॥ १२०॥

प्रविष्टोऽन्तर्जले यस्तु प्राणांस्त्यजति मानवः ।
सोममण्डलयानेन याति यानेन तत्पथम् ॥ १२१॥

स्वशरीरं हि गृध्राणां मन्मना यः प्रयच्छति ।
स याति रथमुख्येन काञ्चनेन यमालयम् ॥ १२२॥

गोकृते स्त्रीकृते चैव [2]हता विप्रकृतेऽपि ये ।
ते यान्त्यमरकन्याभिस् सेव्यमाना रविप्रभाः ॥ १२३॥

ये च कुर्वन्ति मद्भक्त्या तीर्थयात्रां जितेन्द्रियाः ।
ते पन्थानं महात्मानो यानैर्यान्ति सुखं नराः ॥ १२४॥

ये यजन्ति द्विजश्रेष्ठाः क्रतुभिर्भूरिदक्षिणैः ।
हंससारसयुक्तेन यान्ति यानेन तत्पथम् ॥ १२५॥

परपीडामकृत्वैव भृत्यान् बिभ्रति ये नराः ।
तत्पथं ते सुखं यान्ति विमानैः काञ्चनोज्ज्वलैः ॥ १२६॥

ये समास्सर्वभूतेषु जीवानामभयप्रदाः ।
क्रोधलोभविनिर्मुक्ता निगृहीतेन्द्रियास्तथा ॥ १२७॥

पूर्णचन्द्रप्रतीकाशैर् विमानैस्ते महाप्रभाः ।

---

1. अ-ङ-च—अर्धषट्कं नास्ति

2. क-ख-ग—तथा विप्रकृतेऽपि च। अ-घ—हतो विप्रकृतेन च।

यान्ति वैवस्वतपुरं देवगन्धर्वसेविताः ॥ १२८॥

ये मामेकान्तभावेन भक्त्या त्र्यम्बकमेव वा ।

पूजयन्ति नमस्यन्ति स्तुवन्ति च दिने दिने ॥ १२९॥

धर्मराजपुरं यान्ति यानैस्तेऽर्कसमप्रभैः ॥ १३०

पूजितास्तत्र धर्मेण स्वयं माल्यादिभिर्गुणैः ।

यान्त्येव मम लोकं वा रुद्रलोकमथापि वा ॥ १३१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

॥ ५२ ॥ अनुगीतापर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥

[ अस्मिन्नध्याये १३१ श्लोकाः ]

---

## ॥ षडधिकशततमोऽध्यायः ॥

श्रीकृष्णेन युधिष्ठिरं प्रति तोयान्नदानफलकथनम् ॥ १ ॥ तथा तथोरदाने नरकफलकथनं च ॥ २ ॥ अनेकेषां दानानां फलकथनम् ॥ ३ ॥ अतिथिपूजनकथनम् ॥ ४ ॥ अतिथ्यपूजने दोषकथनम् ॥ ५ ॥

---

वैशम्पायनः—

श्रुत्वा यमपुराध्वानं जीवानां गमनं तथा ।

धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥ १

युधिष्ठिरः—

देवदेवेश दैत्यघ्न सदा देवैरभिष्टुत ।

भवान् भवकरश्रीमान् सहस्रादित्यसप्रभ ॥ २

सर्वसम्भव धर्मज्ञ सर्वधर्मप्रवर्तक ।
सर्वदानफलं सौम्य कथयस्व ममाच्युत ॥ ३

[1]दानं कृत्वा कथं कृष्ण कीदृशाय द्विजाय वै ।
कीदृशं वा तपः कृत्वा तत्फलं वाऽथ भुज्यते ॥ ४

वैशम्पायनः—

एवमुक्तो हृषीकेशो धर्मपुत्रेण धीमता ।
उवाच धर्मपुत्राय धर्मान् पुण्यान् महोदयान् ॥ ५

श्रीभगवान्—

शृणुष्वावहितो राजन् पूतं पापघ्नमुत्तमम् ।
सर्वदानफलं सौम्य न श्राव्यं पापकर्मणाम् ॥ ६

यच्छ्रुत्वा पुरुषस्त्री वा नष्टपापास्समाहिताः ।
तत्क्षणात् पूततां यान्ति पापकर्मरता अपि ॥ ७

एकाहमपि कौन्तेय भूमावुत्पादितं जलम् ।
सप्त तारयते पूर्वान् वितृष्णा यत्र गौर्भवेत् ॥ ८

पानीयं परमं लोके जीवानां जीवनं स्मृतम् ।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥ ९

पानीयस्य गुणा दिव्याः परलोके सुखावहाः ॥ ९॥

तत्र पुष्पोदकी नाम नदी परमपावनी ।

---

1. क—अर्धद्वयं नास्ति

कामं ददाति राजेन्द्र तोयदानां यमालये ॥ १०॥

शीतलं सलिलं यस्याम् अक्षय्यममृतोपमम् ।
क्षीरं तोयप्रदातॄणां भवेद्दिव्यं सुखावहम् ॥ ११॥

ये चाप्यतोयदातारः पूयं तेषां विधीयते ॥ १२

प्रशाम्यत्यम्बुपानेन बुभुक्षा च युधिष्ठिर ।
तृषितस्य न चान्नेन पिपासाऽपि प्रणश्यति ॥ १३

तस्मात् तोयं सदा देयं तृषितेभ्यो विजानता ॥ १३॥

अग्नेर्मूर्तिः क्षितेर्योनिर् अमृतस्य च सम्भवः ।
तत् तोयं सर्वभूतानां मूलमित्युच्यते बुधैः ॥ १४॥

अद्भिस्सर्वाणि भूतानि जीवन्ति प्रभवन्ति च ।
तस्मात् सर्वेषु दानेषु तोयदानं विशिष्यते ॥ १५॥

सर्वदानतपोयज्ञैर् यत् प्राप्यं फलमुत्तमम् ।
तत् सर्वं तोयदानेन प्राप्यते नात्र संशयः ॥ १६॥

ये प्रयच्छन्ति विप्रेभ्यस् त्वन्नदानं सुसंस्कृतम् ।
तैस्तु दत्तास्स्वयं प्राणा भवन्ति पुरुषर्षभ ॥ १७॥

अन्नाद्रक्तं च शुक्रं च अन्ने जीवः प्रतिष्ठितः ।
इन्द्रियाणि च बुद्धिश्च पुष्णन्त्यन्नेन नित्यशः ॥ १८॥

अन्नहीनानि सीदन्ति सर्वभूतानि पाण्डव ॥ १९

तेजो बलं च रूपं च सत्वं वीर्यं द्युतिर्धृतिः ।
ज्ञानं मेधा तथाऽऽयुश्च सर्वमन्ने प्रतिष्ठितम् ॥ २०

देवदानवतिर्यक्षु सर्वलोकेषु सर्वदा ।
सर्वकालं हि सर्वेषाम् अन्ने प्राणाः प्रतिष्ठिताः ॥ २१

अन्नं प्रजापते रूपम् अन्नं प्रजननं स्मृतम् ।
सर्वभूतमयं चान्नं जीवश्चान्नमयस्स्मृतः ॥ २२

अन्नेनाधिष्ठितः प्राणो ह्यपानो व्यान एव च ।
उदानश्च समानश्च धारयन्ति शरीरिणम् ॥ २३

शयनोत्थानगमनग्रहणाकर्षणानि च ।
सर्वसत्वकृतं कर्म चान्नादेव प्रवर्तते ॥ २४

चतुर्विधानि भूतानि जङ्गमानि स्थिराणि च ।
अन्नाद्भवन्ति राजेन्द्र सृष्टिरेषा सनातनी ॥ २५

विद्यास्थानानि सर्वाणि सर्वयज्ञाश्च पावनाः
[1]अन्नाद्यस्मात् प्रवर्तन्ते तस्मादन्नं परं स्मृतम्। .. २६

देवा रुद्रादयस्सर्वे पितरोऽप्यग्रयस्तथा ।
यस्मादन्नेन तुष्यन्ति तस्मादन्नं विशिष्यते ॥ २७

यस्मादन्नात् प्रजास्सर्वाः कल्पे कल्पेऽसृजत् प्रभुः ।
तस्मादन्नात् परं दानं न भूतं न भविष्यति ॥ २८

1. च—अर्धचतुष्टयं नास्ति 2. अ-ख—अर्धपञ्चकं नास्ति

यस्मादन्नात् प्रवर्तन्ते धर्मार्थौ काम एव च ।
तस्मादन्नात् परं दानं नामुत्रेह च पाण्डव ॥ २९

यक्षरक्षोगणा नागा भूता दैत्याश्च दानवाः ।
तुष्यन्त्यन्नेन यस्मात्तु तस्मादन्नं परं भवेत् ॥ ३०

[1]परान्नमुपभुञ्जानो यत् कर्म कुरुते शुभम् ।
तच्छुभस्यैकभागस्तु कर्तुर्भवति भारत ॥ ३१

अन्नदस्य त्रयो भागा भवन्ति पुरुषर्षभ ।
तस्मादन्नं प्रदातव्यं ब्राह्मणेभ्यो विशेषतः ॥ ३२

ब्राह्मणाय दरिद्राय योऽन्नं संवत्सरं नृप ।
श्रोत्रियाय प्रयच्छेद्वै पाकभेदविवर्जितः ॥ ३३

डम्भानृतविमुक्तस्तु परां भक्तिमुपागतः ।
स्वधर्मेणार्जितफलं तस्य पुण्यफलं शृणु ॥ ३४

[2]शतवर्षसहस्राणि कामगः कामरूपधृत् ।
मोदतेऽमरलोकस्थः पूज्यमानस्सुरोत्तमैः ॥ ३५

ततश्चापि च्युतः कालान्नरलोके द्विजो भवेत् ॥ ३५॥

अग्रभिक्षां च यो दद्याद् दरिद्राय द्विजातये ।
षण्मासाद्वार्षिकं श्राद्धं तस्य पुण्यफलं शृणु ॥ ३६॥

---

1. अ-घ—अर्धचतुष्टयं नास्ति
2. क-ख-ग-घ—इतः सार्धं श्लोकद्वयं नास्ति

गोसहस्रप्रदानेन यत् पुण्यं समुदाहृतम् ।
तत् पुण्यफलमाप्नोति नरो वै नात्र संशयः ॥ ३७॥

अथ संवत्सरं दद्याद् अग्राभिक्षामयाचते ।
प्रच्छाद्यैव स्वयं नीत्वा तस्य पुण्यफलं शृणु ॥ ३८॥

कपिलानां सहस्रे तु दत्ते यत् पुण्यमुच्यते ।
तत् पुण्यमखिलं प्राप्य शक्रलोके महीयते ॥ ३९॥

स शक्रभवने रम्ये वर्षकोटिशतं नृप ।
यथाकामं महातेजाः क्रीडत्यप्सरसां गणैः ॥ ४०॥

अग्रान्नं यस्तु वै दद्याद् द्विजाय नियतव्रतः ।
दश वर्षाणि राजेन्द्र तस्य पुण्यफलं शृणु ॥ ४१॥

कपिलाशतसहस्रस्य विधिदत्तस्य यत् फलम् ।
तत् पुण्यफलमासाद्य पुरन्दरपुरं व्रजेत् ॥ ४२॥

स शक्रभवने रम्ये कामरूपी यथासुखम् ।
दशकोटिसमा राजन् क्रीडते सुरपूजितः ॥ ४३॥

शक्रलोकावतीर्णश्चेद् [1]इह लोके महाद्युतिः ।
चतुर्वेदी द्विजश्रीमान् जायते राजपूजितः ॥ ४४॥

अध्वश्रान्ताय विप्राय क्षुधितायान्नकाङ्क्षिणे ।
देशकालाभियाताय दीयते पाण्डुनन्दन ॥ ४५॥

1. क-ख-ग—श्च अक्लेशेन ।

याचितोऽन्नं न दद्याद्यो विद्यमाने धनागमे ।
स लुब्धो नरकं याति कृमीणां कालसूत्रकम् ॥ ४६॥

स तत्र नरके घोरे लोभमोहितचेतनः ।
[1]दशवर्षसहस्राणि क्लिश्यते वेदनार्दितः ॥ ४७॥

तस्माच्च नरकान्मुक्तः कालेन महता हि सः ।
दरिद्रो मानुषे लोके चण्डालेष्वेव जायते ॥ ४८॥

यस्तु पांसुलपादश्च दूराध्वश्रमकर्शितः ।
क्षुत्पिपासाश्रमश्रान्तश्च श्रमखिन्नगतिर्द्विजः ॥ ४९॥

पृच्छन् वै ह्यन्नदातारं गृहमभ्येति चाशया ।
तं पूजयेत यत्नेन सोऽतिथिस्स्वर्गसङ्क्रमः ॥ ५०॥

तस्मिंस्तुष्टे नरश्रेष्ठ तुष्टास्स्युस्सर्वदेवताः ॥ ५१

न तथा हविषा होमैर् न पुष्पैर्नानुलेपनैः ।
अग्नयः पार्थ तुष्यन्ति यथा ह्यतिथिपूजनात् ॥ ५२

कपिलायां तु दत्तायां विधिवज्ज्येष्ठपुष्करे ।
न तत् फलमवाप्नोति यत् फलं विप्रभोजनात् ॥ ५३

द्विजपादोदकक्लिन्ना यावत् तिष्ठति मेदिनी ।
तावत् पुष्करपर्णेन पिबन्ति पितरो जलम् ॥ ५४

देवमाल्योपनयनं द्विजोच्छिष्टावमार्जनम् ।

---

1. क-ग-च—शत ।

श्रान्तसंवाहनं चैव तथा पादावसेचनम् ॥ ५५

प्रतिश्रयप्रदानं च तथा शय्यासनस्य च ।
एकैकं पाण्डवश्रेष्ठ गोप्रदानाद्विशिष्यते ॥ ५६

पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम् ।
ये प्रयच्छन्ति विप्रेभ्यो नोपसर्पन्ति ते यमम् ॥ ५७

विप्रातिथ्ये कृते राजन् भक्त्या शुश्रूषितेऽपि च ।
देवाश्शुश्रूषितास्सर्वे त्रयस्त्रिंशद्भवन्त्युत ॥ ५८

अभ्यागतो ज्ञातपूर्वो ह्यज्ञातोऽतिथिरुच्यते ।
तयोः पूजां द्विजः कुर्याद् इति पौराणिकी श्रुतिः ॥ ५९

पादाभ्यङ्गान्नपानैस्तु योऽतिथिं पूजयेन्नरः ।
पूजितस्तेन राजेन्द्र भवाम्येव न संशयः ॥ ६०

शीघ्रं पापाद्विनिर्मुक्तो मया चानुग्रहीकृतः ।
विमानेनेन्दुकल्पेन मम लोकं स गच्छति ॥ ६१

अभ्यागतं श्रान्तमनुव्रजन्ति
देवाश्च सर्वे पितरोऽग्रयश्च ।
तस्मिन् द्विजे पूजिते पूजितास्युर्
गते निराशाः पितरो व्रजन्ति ॥ ६२

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
पितरस्तस्य नाश्नन्ति दश वर्षाणि पञ्च च ॥ ६३

वर्जितः पितृभिर्लुब्धस् स देवैरग्निभिस्सदा ।
निरयं रौरवं गत्वा दश वर्षाणि पच्यते ॥ ६४

ततश्चापि च्युतः कालाद् इह चोच्छिष्टभुग् भवेत् ॥ ६४॥

वैश्वदेवान्तिके प्राप्तम् अतिथिं यो न पूजयेत् ।
स चण्डालत्वमाप्नोति सद्य एव न संशयः ॥ ६५॥

निर्वासयति यो विप्रं देशकालेऽतिथिं गृहात् ।
पतितस्तत्क्षणादेव जायते नात्र संशयः ॥ ६६॥

नरके रौरवे घोरे वर्षकोटिं स पच्यते ॥ ६७

ततश्चापि च्युतः कालाद् इह लोके नराधमः ।
श्वा वै द्वादश जन्मानि जायते क्षुत्पिपासितः ॥ ६८

चण्डालोऽप्यतिथिः प्राप्तो देशकालेऽन्नकाङ्क्षया ।
अभ्युद्गम्यो गृहस्थेन पूजनीयस्स सर्वदा ॥ ६९

अनर्चयित्वा योऽश्नाति लोभमोहितचेतनः ।
स चण्डालत्वमाप्नोति दश जन्मानि पाण्डव ॥ ७०

निराशमतिथिं कृत्वा भुञ्जानो यः प्रहृष्टवान् ।
न जानात्यात्मनाऽऽत्मानं विष्ठाकूपे निपातितम् ॥ ७१

[1]मोघं ध्रुवं प्रोर्णयति मोघमस्य तु पच्यते ।
मोघमन्नं सदाऽश्नाति योऽतिथिं न च पूजयेत् ॥ ७२

1. च—ये यजन्ति न चार्चन्ति गृहेष्वतिथिमागतम्। [अधिकः पाठः]

साङ्गोपाङ्गांस्तु यो वेदान् पठतीह दिने दिने ।
न चातिथिं पूजयति वृथा स पठति द्विजः ॥ ७३

पाकयज्ञमहायज्ञैस् सोमसंस्थाभिरेव च ।
ये यजन्ति न चार्चन्ति गृहेष्वतिथिमागतम् ॥ ७४

[1]तेषां यशोभिकामानां दत्तमिष्टं च यद्भवेत् ।
वृथा भवति तत् सर्वम् आशया हि तया हतम् ॥ ७५

देशं कालं च पात्रं च स्वशक्तिं च निरीक्ष्य च ।
अल्पं समं महद्वाऽपि कुर्यादातिथ्यमात्मवान् ॥ ७६

सुमुखस्सुप्रसन्नात्मा धीमानतिथिमागतम् ।
स्वागतेनासनेनाद्भिर् अन्नाद्येन च पूजयेत् ॥ ७७

प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा ।
प्राप्तो यो वैश्वदेवान्ते सोऽतिथिस्स्वर्गसङ्क्रमः ॥ ७८

क्षुत्पिपासाश्रमार्ताय देशकालागताय च ।
सत्कृत्यान्नं प्रदातव्यं स्वर्गस्य फलमिच्छता ॥ ७९

[2]भोजयेदात्मनश्श्रेष्ठान् विधिवद्धव्यकव्ययोः ।
अन्नं प्राणो मनुष्याणाम् अन्नदः प्राणदो भवेत् ॥ ८०

तस्मादन्नं विशेषेण दातव्यं भूतिमिच्छता ॥ ८०॥

---

1. घ—अल्पं वा सुमहद्वाऽपि कुर्यादातिथ्यमात्मवान् । [अधिकः पाठः]
2. अ—अर्धश्लोकं नास्ति

अन्नदस्सर्वकामैस्तु सुतृप्तस्त्वभ्यलङ्कृतः ।
पूर्णचन्द्रप्रकाशेन विमानेन विराजता ॥ ८१॥
सेव्यमानो वरस्त्रीभिर् देवलोकं स गच्छति ॥ ८२
क्रीडित्वा तु ततस्तस्मिन् वर्षकोटिं यथाऽमरः ।
ततश्चापि च्युतः कालाद् इह लोके महायशाः ॥ ८३
वेदशास्त्रार्थतत्त्वज्ञो भोगवान् ब्राह्मणो भवेत् ॥ ८३॥
यथाश्रद्धं तु यः कुर्यान्मनुष्येषु प्रजायते ।
महाधनपतिश्श्रीमान् वेदवेदाङ्गपारगः ॥ ८४॥
सर्वशास्त्रार्थविद्विद्वान् भोगवान् ब्राह्मणो भवेत् ॥ ८५
[1]सर्वातिथ्यं तु यः कुर्याद् वर्षमेकमकल्मषः ।
धर्मार्जितधनो भूत्वा पाकभेदविवर्जितः ॥ ८६
देवानिव स्वयं विप्रान् अर्चयित्वा पितॄनपि ।
विप्रानग्राशनाशी यस् तस्य पुण्यफलं शृणु ॥ ८७
वर्षेणैकेन यावन्ति पिण्डान्यश्नन्ति ये द्विजाः ।
तावद्वर्षाणि राजेन्द्र मम लोके महीयते ॥ ८८
ततश्चापि च्युतः कालाद् इह लोके महायशाः ।
वेदशास्त्रार्थतत्त्वज्ञो भोगवान् ब्राह्मणो भवेत् ॥ ८९
सर्वातिथ्यं तु यः कुर्याद् यथाश्रद्धं नरेश्वर ।

1. अ—अर्धाष्टकं नास्ति

अकालेनियमेनापि सत्यवादी जितेन्द्रियः ॥ ९०
सत्यसन्धो जितक्रोधश् शाखाधर्मविवर्जितः ।
अधर्मभीरुर्धर्मिष्ठो मायामात्सर्यवर्जितः ॥ ९१
श्रद्दधानश्शुचिर्नित्यं पाकभेदविवर्जितः ॥ ९१॥
स विमानेन दिव्येन दिव्यरूपी महायशाः ।
पुरन्दरपुरं याति गीयमानोऽप्सरोगणैः ॥ ९२॥
मन्वन्तरं तु तत्रैकं क्रीडित्वा देवपूजितः ।
मनुष्यलोकमागम्य भोगवान् ब्राह्मणो भवेत् ॥ ९३॥
दश जन्मानि विप्रत्वं प्राप्नुयाद्राजपूजितः ।
जातिस्मरश्च भवति यत्र यत्रैव जायते ॥* ९४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षडधिकशततमोऽध्यायः ॥ १०६ ॥
॥ ९२ ॥ अनुगीतापर्वणि नवतितमोऽध्यायः ॥ ९० ॥
[ अस्मिन्नध्याये ९४॥ श्लोकाः ]

## ॥ सप्ताधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति भूगोतिलकन्यादानफलप्रतिपादनम् ॥ १ ॥

श्रीभगवान्—

अतः परं प्रवक्ष्यामि भूमिदानमनुत्तमम् ॥ ॥
यः प्रयच्छति विप्राय भूमिं रम्यां सदक्षिणाम् ।

1. क-ख-ग-ङ—नाम्नाध्यायसमाप्तिर्दृश्यते ।

श्रोत्रियाय दरिद्राय साग्निहोत्राय पाण्डव ॥ १॥
स सर्वकामतृप्तात्मा सर्वरत्नविभूषितः ।
सर्वपापविनिर्मुक्तो दीप्यमानोऽर्कवत् सदा ॥ २॥
बालसूर्यप्रकाशेन विचित्रध्वजशोभिना ।
याति यानेन दिव्येन मम लोकं महायशाः ॥ ३॥
तत्र दिव्याङ्गनाभिस्तु सेव्यमानो यथासुखम् ।
कामगः कामरूपी च क्रीडत्यप्सरसां गणैः ॥ ४॥
यावद्बिभर्ति लोकान् वै भूमिः कुरुकुलोद्वह ।
तावद्भूमिप्रदः कामं मम लोके महीयते ॥ ५॥
न हि भूमिप्रदानाद्धि दानमन्यद्विशिष्यते ।
न चापि भूमिहरणात् पापमन्यद्विशिष्यते ॥ ६॥
दानान्यन्यानि हीयन्ते कालेन कुरुपुङ्गव ।
भूमिदानस्य पुण्यस्य क्षयो नैवोपपद्यते ॥ ७॥
ब्राह्मणाय दरिद्राय भूमिं दत्त्वा तु यो नरः ।
न हिंसति नरव्याघ्र तस्य पुण्यफलं शृणु ॥ ८॥
सप्तद्वीपसमुद्रान्ता रत्नधान्यसमाकुला ।
सशैलवनदुर्गाढ्या तेन दत्ता मही भवेत् ॥ ९॥
भूमिं दृष्ट्वा दीयमानां श्रोत्रियायाहिताग्नये ।
सर्वभूतानि मन्यन्ते मां ददातीति हर्षवत् ॥ १०॥

सुवर्णमणिरत्नानि धनधान्यवसूनि च ।
सर्वदानानि वै राजन् ददाति वसुधां ददत् ॥ ११॥
सागरान् सरितश्शैलान् समानि विषमाणि च ।
सर्वगन्धान् रसान् स्नेहान् ददाति वसुधां ददत् ॥ १२॥
ओषधीः फलसम्पन्ना नानापुष्पफलोदकाः ।
कमलोत्पलषण्डांश्च ददाति वसुधां ददत् ॥ १३॥
धर्मं कामं तथा चार्थं वेदान् यज्ञांस्तथैव च ।
स्वर्गमोक्षगतीश्चैव ददाति वसुधां ददत् ॥ १४॥
अग्निष्टोमादिभिर्यज्ञैर् ये यजन्ति सदक्षिणैः ।
न तत् फलं भवेत् तेषां भूमिदानस्य यत् फलम् ॥ १५॥
श्रोत्रियाय महीं दत्त्वा यो न हिंसति पाण्डव ॥ १६
तं जनाः कथयिष्यन्ति यावल्लोकाः प्रतिष्ठिताः ।
तावत् स्वर्गोपभोगानां भोक्तारं पाण्डुनन्दन ॥ १७
[1]सस्यपूर्णां महीं यस्तु श्रोत्रियाय प्रयच्छति ।
पितरस्तस्य तृप्यन्ति यावदाभूतसम्प्लवम् ॥ १८
मम रुद्रस्य सवितुस् त्रिदशानां तथैव च ।
प्रीतये विद्धि राजेन्द्र भूमिर्दत्ता द्विजाय वै ॥ १९
तेन पुण्येन पूतात्मा दाता भूमेर्युधिष्ठिर !

1. अ—श्लोकसप्तकं नास्ति

मम सालोक्यमाप्नोति नात्र कार्या विचारणा ॥ २०

यत् किञ्चित् कुरुते पापं पुरुषो वृत्तिकर्शितः ।
स च गोकर्णमात्रेण भूमिदानेन शुद्ध्यति ॥ २१

मासोपवासे यत् पुण्यं कृच्छ्रे चान्द्रायणेऽपि च ।
भूमिगोकर्णमात्रेण तत् पुण्यं तु विधीयते ॥ २२

[1]वेदानां पारणे यत्तु परं पुण्यमुदाहृतम् ।
भूमिगोकर्णमात्रेण तत् पुण्यं तु विधीयते ॥ २३

सर्वतीर्थाभिषेके च यत् पुण्यं समुदाहृतम् ।
भूमिगोकर्णमात्रेण तत् पुण्यं तु विधीयते ॥ २४

युधिष्ठिरः—

[2]देवदेव नमस्तेऽस्तु वासुदेव सुरेश्वर ।
गोकर्णस्य प्रमाणं वै वक्तुमर्हसि तत्त्वतः ॥ २५

श्रीभगवान्—

शृणु गोकर्णमात्रस्य प्रमाणं पाण्डुनन्दन ॥ २५॥

त्रिंशद्दण्डप्रमाणेन प्रमितं सर्वतोदिशम् ।
प्रत्यक् प्रागपि राजेन्द्र तत् तथा दक्षिणोत्तरम् ॥ २६॥

गोकर्णं तद्विदः प्राहुः प्रमाणं धरणेर्नृप ॥ २७

सवृषं गोशतं यत्र सुखं तिष्ठत्यवन्वितम् ।

---

1. ग-घ-च—अर्धद्वयं नास्ति 2. अ—अर्धत्रयं नास्ति

सवत्सं कुरुशार्दूल तच्च गोकर्णमुच्यते ॥ २८

किङ्करा मृत्युदण्डाश्च कुम्भीपाकाश्च दारुणाः ।
घोराश्च वारुणाः पाशा नोपसर्पन्ति भूमिदम् ॥ २९

निरया रौरवाद्याश्च तथा वैतरणी नदी ।
तीव्राश्च यातनाः कष्टा नोपसर्पन्ति भूमिदम् ॥ ३०

चित्रगुप्तः कलिः कालः कृतान्तो मृत्युरेव च ।
यमश्च भगवान् साक्षात् पूजयन्ति महीप्रदम् ॥ ३१

रुद्रः पशुपतिश्शक्रस् सुरा ऋषिगणास्तथा ।
अहं च प्रीतिमान् राजन् पूजयामि महीप्रदम् ॥ ३२

कृशवृत्तस्य कृशगोः कृशाश्वस्य कृशातिथेः ।
भूमिर्देया नरश्रेष्ठ स निधिः पारलौकिकः ॥ ३३

सीदमानकुटुम्बाय श्रोत्रियायाहिताग्नये ।
व्रतस्थाय दरिद्राय भूमिर्देया नराधिप ॥ ३४

यथा जनित्री क्षीरेण पुत्रं वर्धयति ध्रुवम् ।
दातारमनुगृह्णाति दत्ता ह्येवं वसुन्धरा ॥ ३५

यथा बिभर्ति गौर्वत्सं सृजन्ती क्षीरमात्मनः ।
तथा सर्वगुणोपेता भूमिर्वहति भूमिदम् ॥ ३६

यथा बीजानि रोहन्ति जलसिक्तानि भूतले ।
तथा कामाः प्ररोहन्ति भूमिदस्य दिने दिने ॥ ३७

यथोदयस्तु सूर्यस्य तमस्सर्वं व्यपोहति ।
[1]तथा पापं नरस्येह भूमिदानं व्यपोहति ॥ ३८

[2]दाता दशानुगृह्णाति यो हरेद्दश हन्ति च ।
अतीतान्यागतानीह कुलानि कुरुपुङ्गव ॥ ३९

आश्रुत्य भूमिदानं तु दत्त्वा यो वा हरेत् पुनः ।
स बद्धो वारुणैः पाशैः क्षिप्यते पूयशोणिते ॥ ४०

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम् ।
न तस्य नरकाद्घोराद् विद्यते निष्कृतिः क्वचित् ॥ ४१

ब्राह्मणस्य हृते क्षेत्रे हन्याद्दादश पूर्वजान् ।
स गच्छेत् कृमियोनिं च न च मुच्येत जातु सः ॥ ४२

दत्त्वा भूमिं द्विजेन्द्राय यस्तामेवोपजीवति ।
गवां शतसहस्रस्य हन्तुस्स लभते फलम् ॥ ४३

[3]सोधश्शिरास्तु पापात्मा कुम्भीपाकेषु पच्यते ॥ ४३॥

दिव्यैर्वर्षसहस्रैस्तु कुम्भीपाकाद्विनिस्सृतः ।
इह लोके भवेत् स श्वा शतजन्मानि पाण्डव ॥ ४४॥

दत्त्वा भूमिं द्विजेन्द्राणां यस्तामेवोपजीवति ।
स मूढो याति दुष्टात्मा नरकानेकविंशतिम् ॥ ४५॥

---

1. अ—इदमर्धं नास्ति
2. क-ख-घ—इत आरभ्य द्विषष्टितमश्लोकपर्यन्तं नास्ति
3. अ-क-ख-घ—अर्धचतुष्टयं नास्ति

नरकेभ्यो विनिर्मुक्तश् शुनां योनिं स गच्छति ॥ ४६

हलकृष्टा मही देया सबीजा सस्यशालिनी ।
अथवा सोदका देया दरिद्राय द्विजातये ॥ ४७

एवं दत्ता मही राजन् प्रहृष्टेनान्तरात्मना ।
सर्वान् कामानवाप्नोति मनसा चिन्तितान्यपि ॥ ४८

बहुभिर्वसुधा दत्ता दीयते च नराधिपैः ।
यस्य यस्य यदा भूमिस् तस्य तस्य तदा फलम् ॥ ४९

यः प्रयच्छति कन्यां वै सुरूपां श्रोत्रियाय वै ।
स ब्रह्मदेवो राजेन्द्र तस्य पुण्यफलं शृणु ॥ ५०

बलीवर्दसहस्राणां दत्तानां धुर्यवाहिनाम् ।
यत् फलं लभते राजन् कन्यादानेन तत् फलम् ॥ ५१

गवां शतसहस्रस्य सम्यग् दत्तस्य यत् फलम् ।
तत् फलं समवाप्नोति यः प्रयच्छति कन्यकाम् ॥ ५२

यावन्ति चैव रोमाणि कन्यायाः कुरुपुङ्गव ।
तावद्वर्षसहस्राणि मम लोके महीयते ॥ ५३

ततश्चापि च्युतः कालाद् इह लोके स जायते ।
षडङ्गविच्चतुर्वेदी सर्वदेवार्चितो द्विजः ॥ ५४

यस्सुवर्णं दरिद्राय ब्राह्मणाय प्रयच्छति ।
श्रोत्रियाय सुवृत्ताय बहुपुत्राय पाण्डव ॥ ५५

स मुक्तस्सर्वपापेभ्यो बालसूर्यसमप्रभः ।
विमानं दिव्यमारूढः कामगः कामभोगवान् ॥ ५६
वर्षकोटिं महातेजा मम लोके प्रमोदते ॥ ५६॥
ततः कालावतीर्णश्च सोऽस्मिँल्लोकेऽभिजायते ।
वेदवेदाङ्गविद्विप्रः कोटीधनपतिर्महान् ॥ ५७॥
यश्च रूप्यं प्रयच्छेद्वै दरिद्राय द्विजातये ।
कृशवृत्तये कृशगवे स मुक्तस्सर्वकिल्बिषैः ॥ ५८॥
पूर्णचन्द्रप्रकाशेन विमानेन विराजता ।
कामरूपी यथाकामं स्वर्गलोके महीयते ॥ ५९॥
ततोऽवतीर्णः कालेन लोके चास्मिन् महायशाः ।
सर्वलोकार्चितश्रीमान् राजा भवति वीर्यवान् ॥ ६०॥
तिलपर्वतकं यस्तु श्रोत्रियाय प्रयच्छति ।
विशेषेण दरिद्राय तस्यापि शृणु यत् फलम् ॥ ६१॥
पुण्यं वृषायुतोत्सर्गे यत् प्रोक्तं पाण्डुनन्दन ।
तत् पुण्यं समनुप्राप्तस् तत्क्षणाद्विरजा भवेत् ॥ ६२॥
यथा त्वचं भुजङ्गो वै त्यक्त्वा दिव्यतनुर्भवेत् ।
तथा तिलप्रदानाद्वै पापं त्यक्त्वा विशुद्ध्यति ॥ ६३॥
तिलषण्डप्रयुक्तं च जाम्बूनदविभूषितम् ।
विमानं दिव्यमारूढः पितृलोके महीयते ॥ ६४॥

षष्टिं वर्षसहस्राणि कामरूपी महायशाः ।
तिलप्रदाता रमते पितृलोके यथासुखम् ॥ ६५॥

यः प्रयच्छति विप्राय तिलधेनुं नराधिप ।
श्रोत्रियाय दरिद्राय शृणु तस्यापि यत् फलम् ॥ ६६॥

गोसहस्रप्रदानेन यत् पुण्यं समुदाहृतम् ।
तत्पुण्यफलमाप्नोति तिलधेनुप्रदानतः ॥ ६७॥

तिलानां कुडवैर्यस्तु तिलधेनुं प्रयच्छति ।
तावत् कोटिसमा राजन् स्वर्गलोके महीयते ॥ ६८॥

अष्टाढकतिलैः कृत्वा तिलधेनुं नराधिप ।
द्वात्रिंशन्निष्कसंयुक्तं विषुवे यः प्रयच्छति ॥ ६९॥
मद्भक्त्या मद्गतात्मा वै तस्य पुण्यफलं शृणु ॥ ७०

कन्यादानसहस्रस्य विधिदत्तस्य यत् फलम् ।
तत् पुण्यं समनुप्राप्तो मम लोके महीयते ॥ ७१

मम लोकावतीर्णश्च सोऽस्मिँल्लोकेऽभिजायते ।
ऋग्यजुस्सामवेदानां पारगो ब्राह्मणर्षभः ॥ ७२

गां तु यस्तु दरिद्राय ब्राह्मणाय प्रयच्छति ।
प्रसन्नां क्षीरिणीं पुण्यां सवत्सां कांस्यदोहनीम् ॥ ७३

यत् किञ्चिद्दुष्कृतं कर्म तस्य पूर्वकृतं नृप ।
तत् सर्वं तत्क्षणादेव विनश्यति न संशयः ॥ ७४

यानं च वृषसंयुक्तं दीप्यमानमलङ्कृतम् ।
आरूढः कामगं दिव्यं गोलोकमधिगच्छति ॥ ७५

यावन्ति चैव रोमाणि तस्या गोस्तु नराधिप ।
तावद्वर्षसहस्राणि गवां लोके महीयते ॥ ७६

गोलोकादवतीर्णस्तु लोकेऽस्मिन् ब्राह्मणो भवेत् ।
सत्रयाजी शतायुश्च सर्वराजभिरर्चितः ॥ ७७

तिलं [1]गावस्सुवर्णं चाप्यन्नं कन्या वसुन्धरा ।
तारयन्तीह दत्तानि ब्राह्मणेभ्यो महाभुज ॥ ७८

ब्राह्मणं वृत्तसम्पन्नम् आहिताग्निमलोलुपम् ।
तर्पयेद्विधिवद्राजन् स निधिः पारलौकिकः ॥ ७९

आहिताग्निं दरिद्रं च श्रोत्रियं च जितेन्द्रियम् ।
शूद्रान्नविरतं चैव द्विजं यत्नेन पूजयेत् ॥ ८०

आहिताग्निस्सदा पात्रं साग्निहोत्रश्च वेदवित् ।
पात्राणामपि तत् पात्रं शूद्रान्नं यस्य नोदरे ॥ ८१

यच्च वेदमयं पात्रं यच्च पात्रं तपोमयम् ।
असङ्कीर्णं च यत् पात्रं तत् पात्रं तारयिष्यति ॥ ८२

नित्यस्वाध्यायनिरतास् त्वसङ्कीर्णेन्द्रियाश्च ये ।
पञ्चयज्ञपरा नित्यं पूजितास्तारयन्ति ते ॥ ८३

---

1. क-ख-ग—गां वस्त्रमन्नं च सुवर्णं कन्या ।

ये क्षान्तिदान्ताश्रुतिपूर्णकर्णा
जितेन्द्रियाः प्राणिवधे निवृत्ताः ।
प्रतिग्रहे सङ्कुचिता गृहस्थास्
ते ब्राह्मणास्तारयितुं समर्थाः ॥ ८४

नित्योदकी नित्ययज्ञोपवीती
नित्यस्वाध्यायी वृषलान्नवर्जी ।
ऋतौ गच्छन् विधिवच्चापि जुह्वत्
स ब्राह्मणस्तारयितुं समर्थः ॥ ८५

ब्राह्मणो यस्तु मद्भक्तो मद्याजी मत्परायणः ।
मयि सन्न्यस्तकर्मा च स विप्रस्तारयिष्यति ॥ ८६

द्वादशाक्षरतत्त्वज्ञश् चतुर्व्यूहविभागवित् ।
अच्छिद्रपञ्चकालज्ञस् स विप्रस्तारयिष्यति ॥ ८७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

॥ ९२ ॥ अनुगीतापर्वणि एकनवतितमोऽध्यायः ॥ ९१ ॥

[ अस्मिन्नध्याये ८७ श्लोकाः ]

## ॥ अष्टाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति वृषभगृहशय्यादिदानप्रशंसनम् ॥ १ ॥ तथा गोब्राह्मणरक्षणादिनानाधर्मकथनम् ॥ २ ॥

वैशम्पायनः—

वासुदेवेन दानेषु कथितेषु यथाक्रमम् ।
अवितृप्तस्तु धर्मेषु राजा केशवमब्रवीत् ॥ १

युधिष्ठिरः—

देव धर्मामृतमिदं शृण्वतोऽपि परन्तप ।
न विद्यते सुरश्रेष्ठ मम तृप्तिर्हि माधव ॥ २

अनड्वत्सम्प्रदानस्य यत् फलं तु विधीयते ।
तत् फलं कथयस्वेह तव भक्तस्य मेऽच्युत ॥ ३

यानि चान्यानि दानानि त्वया नोक्तानि कानि चित् ।
तान्याचक्ष्व सुरश्रेष्ठ तेषां चानुक्रमात् फलम् ॥ ४

श्रीभगवान्—

शृणु धर्मामृतं श्रेष्ठं दत्तस्यानड्वहः फलम् ।
पवित्रत्वात् सुपुण्यत्वात् पावनत्वात् तथैव च ॥ ५

दशधेनुसमोऽनड्वान् एकोऽपि कुरुपुङ्गव ।
मेदोमांसविपुष्टाङ्गो नीरोगः कोपवर्जितः ॥ ६

[1]युवा भद्रस्सुशीलश्च सर्वदोषविवर्जितः ।
धुरं [2]धारयतेऽनड्वान् दत्तो विप्राय पाण्डव ॥ ७

स तेन पुण्यदानेन वर्षकोटिं युधिष्ठिर ।
यथाकामं महातेजा गवां लोके महीयते ॥ ८

यश्च दद्यादनड्वाहौ द्वौ युक्तौ तु धुरन्धरौ ।
सुव्रताय दरिद्राय श्रोत्रियाय विशेषतः ॥ ९

तस्य यत् पुण्यमाख्यातं तच्छृणुष्व युधिष्ठिर ॥ ९॥

सहस्रगोप्रदानेन यत् प्रोक्तं फलमुत्तमम् ।
तत् पुण्यफलमाप्नोति याति लोकान् सनातनान् ॥ १०॥

यावन्ति चैव रोमाणि तयोश्चानड्वहोर्नृप ।
तावद्वर्षसहस्राणि मम लोके महीयते ॥ ११॥

दरिद्रायैव दातव्यं न समृद्धाय पाण्डव ।
[3]वर्षाणां हि तटाकेषु फलं नैव पयोधिषु ॥ १२॥

यस्तु [4]दद्यादनड्वहं दरिद्राय द्विजातये ।
स तेन पुण्यदानेन पूतात्मा कुरुपुङ्गव ॥ १३॥

विमानं दिव्यमारूढो दिव्यरूपी यथासुखम् ।

---

1. क-ख—इदमर्धं नास्ति
2. क-ख-ग—धुरं धरति योऽनड्वान्। घ—धुरं धारयते क्षिप्रं।
3. क—अर्धमेतत् नास्ति
4. ग-घ—नैवेशिकं दद्यात्। ख—नैवेधिगं दद्याद्दरिद्राय द्विजाय वै।

मम लोकेषु रमते यावदाभूतसम्प्लवम् ॥ १४॥
गृहं दीपप्रभायुक्तं शय्यासनविभूषितम् ।
भाजनोपस्करैर्युक्तं धान्यपूर्णमलङ्कृतम् ॥ १५॥
दासीगोभूमिसंयुक्तम् अन्यूनं सर्वसाधनैः ॥ १६
[1]ब्राह्मणाय दरिद्राय श्रोत्रियाय युधिष्ठिर ।
दद्यात् सदक्षिणं यस्तु तस्य पुण्यफलं शृणु ॥ १७
देवाः पितृगणाश्चैव ह्यग्नयो ऋषयस्तथा ।
प्रयच्छन्ति प्रहृष्टा वै यानमादित्यसन्निभम् ॥ १८
तेन गच्छेच्छिया युक्तो ब्रह्मलोकमनुत्तमम् ॥ १८॥
स्त्रीसहस्राधृते दिव्ये भवने तत्र काञ्चने ।
मोदते ब्रह्मलोकस्थो यावदाभूतसम्प्लवम् ॥ १९॥
शय्यां प्रस्तरणोपेतां यः प्रयच्छति पाण्डव ।
अर्चयित्वा द्विजं भक्त्या वस्त्रमाल्यानुलेपनैः ॥ २०॥
भोजयित्वा विचित्रान्नं तस्य पुण्यफलं शृणु ॥ २१
धेनुदानस्य यत् पुण्यं विधिदत्तस्य पाण्डव ।
तत् पुण्यं समनुप्राप्य पितृलोके महीयते ॥ २२
[2]स्वल्पमध्ययनं वाऽपि विद्यामन्त्रौषधानि च ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु ॥ २३

1. क—नवार्धानि न सन्ति । 2. अ-ग-घ—शिल्प ।

आहिताग्निसहस्रस्य तर्पितस्येह यत् फलम् ।
तत् पुण्यफलमाप्नोति यस्तु विद्यां प्रयच्छति ॥ २४

छन्दोभिस्सम्प्रयुक्तेन विमानेन विराजता ।
सप्तर्षिलोकान् व्रजति पूज्यते ब्रह्मवादिभिः ॥ २५

चतुर्युगानि वै त्रिंशत् क्रीडित्वा तत्र देववत् ।
इह मानुष्यके लोके विप्रो भवति वेदवित् ॥ २६

विश्रामयति यो विप्रं श्रान्तमध्वनि कर्शितम् ।
विनश्यति तदा पापं तस्य वर्षकृतं नृप ॥ २७

अथ प्रक्षालयेत् पादौ तस्य तोयेन भक्तिमान् ।
दशवर्षकृतं पापं व्यपोहति न संशयः ॥ २८

घृतेन वाऽथ तैलेन पादौ तस्य तु पूजयेत् ।
स द्वादशसमारूढं पापमाशु व्यपोहति ॥ २९

धेनुदानस्य दत्तस्य यच्च पुण्यमुदाहृतम् ।
तत्पुण्यफलमाप्नोति यस्त्वेनं विप्रमर्चयेत् ॥ ३०

स्वागतेन तु यो विप्रं पूजयेदासनेन च ।
प्रत्युत्थानेन वा राजन् स देवानां प्रियो भवेत् ॥ ३१

स्वागतेनाग्नयो राजन्नासनेन शतक्रतुः ।
प्रत्युत्थानेन पितरः प्रीतिं यान्त्यतिथिप्रियाः ॥ ३२

[1]अग्निशक्रपितॄणां च तेषां प्रीत्या नराधिप ।
संवत्सरकृतं पापं तस्य सद्यो विनश्यति ॥ ३३

यः प्रयच्छति विप्राय आसनं माल्यभूषितम् ।
स याति मणियुक्तेन [2]रथेनेन्द्रनिकेतनम् ॥ ३४

[3]पुरन्दरासने तत्र दिव्यनारीविभूषितः ।
षष्टिं वर्षसहस्राणि क्रीडत्यप्सरसां गणैः ॥ ३५

[4]इह लोके तु धनवांश् चतुर्वेदी द्विजो भवेत् ॥ ३५॥

वाहनं यः प्रयच्छेत ब्राह्मणाय युधिष्ठिर ।
स याति रत्नचित्रेण वाहनेन सुरालयम् ॥ ३६॥

स तत्र कामं क्रीडित्वा सेव्यमानोऽप्सरोगणैः ।
इह राजा भवेद्राजन् नात्र कार्या विचारणा ॥ ३७॥

पादपं पल्लवाकीर्णं पुष्पितं सफलं तथा ।
गन्धमाल्यार्चितं कृत्वा वस्त्रभूषणभूषितम् ॥ ३८॥

यः प्रयच्छति विप्राय श्रोत्रियाय सदक्षिणम् ।
भोजयित्वा यथाकामं तस्य पुण्यफलं शृणु ॥ ३९॥

जाम्बूनदविचित्रेण विमानेन विराजता ।
पुरन्दरपुरं याति जयशब्दरवैर्युतः ॥ ४०॥

1. क—अर्धत्रयं नास्ति 2. अ-घ—वाहनेन सुरालयम् ।
3. अ-घ—अर्धचतुष्टयं नास्ति
4. ग—कोश एकस्मिन्नेवेदमर्धं दृश्यते ।

तत्र शक्रपुरे रम्ये तस्य कल्पकपादपः ।
ददाति चेप्सितं सर्वं मनसा यद्यदिच्छति ॥ ४१॥

यावन्ति तस्य पत्राणि पुष्पाणि च फलानि च ।
तावद्वर्षसहस्राणि शक्रलोके महीयते ॥ ४२॥

शक्रलोकावतीर्णश्च मानुष्यं लोकमागतः ।
रथाश्वगजसम्पूर्णं पुरं राज्यं च रक्षति ॥ ४३॥

स्थापयित्वा तु मद्भक्त्या यो मत्प्रतिकृतिं नरः ।
आलयं विधिवत् कृत्वा पूजाकर्माणि कारयेत् ॥ ४४॥
स्वयं वा पूजयेद्भक्त्या तस्य पुण्यफलं शृणु ॥ ४५

अश्वमेधसहस्रस्य यत् फलं समुदाहृतम् ।
तत् फलं समनुप्राप्तो मत्सालोक्यं प्रपद्यते ॥ ४६
न जाने निर्गमं तस्य मम लोकाद्युधिष्ठिर ॥ ४६॥

देवालये विप्रगृहे गोवाटे चत्वरेऽपि वा ।
प्रज्वालयति यो दीपं तस्य पुण्यफलं शृणु ॥ ४७॥

आरुह्य काञ्चनं यानं द्योतयन् सर्वतो दिशम् ।
गच्छेदादित्यलोकं स सेव्य[1]मानस्सुरोत्तमैः ॥ ४८॥

तत्र प्रकामं क्रीडित्वा वर्षकोटिं महायशाः ।
इह लोके भवेद्विप्रो वेदवेदाङ्गपारगः ॥ ४९॥

1. क-ख—मानोऽप्सरोगणैः । ग—मानो द्विजोत्तमैः ।

देवालयेषु वा राजन् ब्राह्मणावसथेषु वा ।
चत्वरे वा चतुष्के वा रात्रौ वा यदि वा दिवा ॥ ५०॥

नानागन्धर्ववाद्यानि धर्मश्रावणिकानि च ।
यस्तु कारयते भक्त्या मद्गतेनान्तरात्मना ॥ ५१॥

तस्य देवा नरश्रेष्ठ पितरश्चापि हर्षिताः ।
सुप्रीतास्सम्प्रयच्छन्ति विमानं कामगं शुभम् ॥ ५२॥

स च तेन विमानेन याति देवपुरं नरः ।
तत्र दिव्याप्सरोभिस्तु सेव्यमानः प्रमोदते ॥ ५३॥

देवलोकावतीर्णस्तु स लोकेऽस्मिन् नराधिप ।
वेदवेदाङ्गतत्वज्ञो भोगवान् ब्राह्मणो भवेत् ॥ ५४॥

चत्वरे वा सभायां वा विस्तीर्णे वा सभाङ्गणे ।
कृत्वाऽग्निकुण्डं विपुलं स्थण्डिलं वा युधिष्ठिर ॥ ५५॥

तत्राग्निं चतुरो मासान् ज्वालयेद्यस्तु भक्तिमान् ।
समाप्तेषु तु मासेषु पौष्यादिषु ततो द्विजान् ॥ ५६॥

भोजयेत् पायसं मृष्टं मद्गतेनान्तरात्मना ।
दक्षिणां च यथाशक्ति ब्राह्मणेभ्यो निवेदयेत् ॥ ५७॥

एवमग्निं तु यः कुर्यान्नित्यमेवार्चयंस्तु माम् ।
तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ॥ ५८॥

तेनाहं शङ्करश्चैव पितरो ह्यग्रयस्तथा ।

यास्यामः परमां प्रीतिं नात्र कार्या विचारणा ॥ ५९॥

षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च ।
सोऽस्मत्प्रीतिकरश्श्रीमान् मम लोके महीयते ॥ ६०॥

मम लोकावतीर्णश्च सोऽस्मिँल्लोके महायशाः ।
वेदवेदाङ्गविद्विप्रो जायते राजपूजितः ॥ ६१॥

यः करोति नरश्रेष्ठ भरणं ब्राह्मणस्य तु ।
श्रोत्रियस्याभिजातस्य दरिद्रस्य विशेषतः ॥ ६२॥

तस्य पुण्यफलं यद्वै तन्निबोध युधिष्ठिर ॥ ६३

गवां कोटिप्रदानेन यत् पुण्यं समुदाहृतम् ।
तत्पुण्यफलमाप्नोति वर्षेणैकेन पाण्डव ॥ ६४

काञ्चनेन विचित्रेण यानेनाम्बरशोभि[illegible]पद्यते ।
स याति मामकं लोकं दिव्यस्त्रीगण[illegible]धिष्ठिर ॥ ६५

गीयमानो वरस्त्रीभिर् वर्षाणां कोटि[illegible]म् ॥ ६५॥

क्रीडित्वा मामके लोके तत्र देवैरभिष्टुतः ।
मानुष्यमवतीर्णस्तु वेदविद्ब्राह्मणो भवेत् ॥ ६६॥

करकं कुण्डिकां वाऽपि महद्वा जलभाजनम् ।
यः प्रयच्छति विप्राय तस्य पुण्यफलं शृणु ॥ ६७॥

[1]ब्रह्मकूर्चेन यत् पीते फलं प्रोक्तं युधिष्ठिर ।

1. क-ख-ग-ङ—ब्रह्मकूर्चे पयः पीते फलं प्रोक्तं यथाविधि ।
च—ब्रह्मकूर्चेन यद् प्रेते फलं + विधि ।

तत्पुण्यफलमाप्नोति जलभाजनदो नरः ॥ ६८॥

सुतृप्तस्सुप्रभस्सौम्यः प्रहृष्टेन्द्रियमानसः ।
हंससारसयुक्तेन विमानेन विराजता ॥ ६९॥

स याति वारुणं लोकं दिव्यगन्धर्वसेवितः ॥ ७०

[1]पानीयं यः प्रयच्छेद्वै जीवानां जीवनं परम् ।
ग्रीष्मकेषु तु मासेषु तस्य पुण्यफलं शृणु ॥ ७१

कपिलाकोटिदानस्य यत् पुण्यं तु विधीयते ।
तत्पुण्यफलमाप्नोति पानीयं यः प्रयच्छति ॥ ७२

पूर्णचन्द्रप्रकाशेन विमानेन विराजता ।
स गच्छेच्चन्द्रसदनं सेव्यमानोऽप्सरोगणैः ॥ ७३

[2]त्रिंशत्कोटिशतं तत्र दिव्यगन्धर्वसेवितः ।
क्रीडित्वा मानुषे लोके चतुर्वेदी द्विजो भवेत् ॥ ७४

शिरोभ्यङ्गप्रदानेन तेजस्वी प्रियदर्शनः ।
[3]सुभगो रूपवाञ्छूरः पण्डितश्च भवेद्द्विजः ॥ ७५

वस्त्रदायी तु पुरुषस् तेजस्वी प्रियदर्शनः ।
सुभगो भवति श्रीमान् स्त्रीणां नित्यं मनोरमः ॥ ७६

[4]उपानहौ च च्छत्रं च यो ददाति नरोत्तमः ॥ ७६॥

---

1. च—इदमादि अर्धसप्तकं नास्ति
2. अ—अर्धपञ्चकं नास्ति
3. ग—अर्धद्वयं नास्ति
4. अ—अर्धपञ्चकं नास्ति

स याति रथमुख्येन काञ्चनेन विराजता ।
शक्रलोकं महातेजास् सेव्यमानोऽप्सरोगणैः ॥ ७७॥

काष्ठपादुकदा यान्ति विमानैर्वृक्षनिर्मितैः ।
धर्मराजपुरं रम्यं सेव्यमानास्सुरोत्तमैः ॥ ७८॥

दन्तकाष्ठप्रदानेन प्रियवाक्यो भवेन्नरः ।
सुगन्धवदनश्श्रीमान् मेधासौभाग्यसंयुतः ॥ ७९॥

क्षीरं दधि घृतं वाऽपि गुडं मधुरसं तथा ।
ये प्रयच्छन्ति विप्रेभ्यः परां भक्तिं गता नराः ॥ ८०॥

ते वृषैरश्वयानैश्च श्वेतस्रग्दामभूषिताः ।
उपगीयमाना गन्धर्वैर् यान्तीश्वरपुरं नराः ॥ ८१॥

तत्र दिव्याप्सरोभिस्तु सेव्यमाना यथासुखम् ।
षष्टिवर्षसहस्राणि मोदन्ते देवसन्निभाः ॥ ८२॥

ततः कालावतीर्णाश्च जायन्ते त्विह मानवाः ।
प्रभूतधनधान्याश्च भोगवन्तो नरोत्तमाः ॥ ८३॥

वैशाखे [1]मासि वैशाखे दिवसे पाण्डुनन्दन ।
वैवस्वतं समुद्दिश्य परां भक्तिमुपागताः ॥ ८४॥

अभ्यर्च्य विधिवद्विप्रांस् तिलान् गुडसमायुतान् ।
ये प्रयच्छन्ति विप्रेभ्यस् तेषां पुण्यफलं शृणु ॥ ८५॥

1. अ-घ-च—माघमासे वा ।

गोप्रदानेन यत् पुण्यं विधिवत् पाण्डुनन्दन ।
तत् पुण्यं समनुप्राप्तो यमलोके महीयते ॥ ८६॥
ततश्चापि च्युतः कालाद् इह राजा भविष्यति ॥ ८७

तस्मिन्नेव दिने विप्रान् भोजयित्वा सदक्षिणम् ।
तोयपूर्णानि दिव्यानि भाजनानि दिशन्ति ये ॥ ८८

ते यान्त्यादित्यवर्णाभैर् विमानैर्वरुणालयम् ।
तत्र दिव्याङ्गनाभिस्तु रमन्ते कामगामिनः ॥ ८९

ततोऽवतीर्णाः कालेन ते चास्मिन् मानुषे पुनः ।
भोगवन्तो द्विजश्रेष्ठा भविष्यन्ति न संशयः ॥ ९०
अनन्तराशी यश्चापि वर्तते व्रतवत् सदा ॥ ९०॥

[1]सत्यवाक् क्रोधरहितस् शुचिस्स्नानरतस्सदा ।
स विमानेन दिव्येन याति शक्रपुरं नरः ॥ ९१॥

[2]तत्र दिव्याप्सरोभिस्तु वर्षकोटिं महातपाः ।
क्रीडित्वा मानुषे लोके जायते वेदविद्द्विजः ॥ ९२॥

[3]एकभुक्तेन यश्चापि वर्षमेकं तु वर्तते ।
ब्रह्मचारी जितक्रोधस् सत्यशौचसमन्वितः ॥ ९३॥

---

1. ग—इदमादि अर्धषट्कं नास्ति
2. क-ख—इदमाद्यर्धपञ्चकं नास्ति
3. घ—इतः सार्धं श्लोकद्वयं नास्ति

स विमानेन दिव्येन याति शक्रपुरं सुखम् ॥ ९४

दशकोटिसमास्तत्र क्रीडित्वाऽप्सरसां गणैः ।
इह मानुष्यके लोके ब्राह्मणो वेदविद् भवेत् ॥ ९५

चतुर्थकाले यो भुङ्क्ते ब्रह्मचारी जितेन्द्रियः ।
वर्तते वर्षमेकं तु तस्य पुण्यफलं शृणु ॥ ९६

चित्रबर्हिणयुक्तेन विचित्रध्वजशोभिना ।
याति यानेन दिव्येन स महेन्द्रपुरं नरः ॥ ९७

अकृशाभिर्वरस्त्रीभिस् सेव्यमानो यथासुखम् ।
तत्र द्वादशकोटिं स समास्सम्यक् प्रमोदते ॥ ९८

शक्रलोकावतीर्णस्तु लोके चास्मिन् नराधिप ।
भवेद्वै ब्राह्मणो विद्वान् क्षमावान् वेदपारगः ॥ ९९

षष्ठकालं तु योऽश्नाति वर्षमेकमकल्मषः ।
ब्रह्मचर्यव्रतैर्युक्तश् शुचिः क्रोधविवर्जितः ॥ १००

तपोयुक्तस्य तस्यापि शृणुष्व फलमुत्तमम् ॥ १००॥

अत्यादित्यप्रकाशेन विमानेनार्कसन्निभः ।
स याति मम लोकान् वै दिव्यनारीनिषेवितः ॥ १०१॥

तत्र साध्यैर्मरुद्भिश्च पूज्यमानो यथासुखम् ।
पश्यन्नेव सदा मां तु क्रीडत्यप्सरसां गणैः ॥ १०२॥

पक्षोपवासं यश्चापि कुरुते मद्गतात्मना ।
समाप्ते तु व्रते तस्मिंस् तर्पयेच्छ्रोत्रियाञ्छुचीन् ॥ १०३॥
सोऽपि गच्छति दिव्येन विमानेन महातपाः ।
द्योतयन् प्रभया व्योम मम लोकं प्रपद्यते ॥ १०४॥
स तत्र मोदते कामं कामरूपी यथासुखम् ॥ १०५
त्रिंशत्कोटिसमा राजन् क्रीडित्वा तत्र देववत् ।
इह मानुष्यके लोके पूजनीयो द्विजोत्तमः ॥ १०६
त्रयाणामपि वेदानां साङ्गानां पारगो भवेत् ॥ १०६॥
यश्च मासोपवासं वै कुरुते मद्गतात्मना ।
जितेन्द्रियो जितक्रोधो जितधीस्स्नानतत्परः ॥ १०७॥
समाप्ते नियमे तत्र भोजयित्वा द्विजोत्तमान् ।
दक्षिणां च ततो दद्यात् प्रहृष्टेनान्तरात्मना ॥ १०८॥
स गच्छति महातेजा ब्रह्मलोकमनुत्तमम् ।
सिंहयुक्तेन यानेन दिव्यस्त्रीगणसेवितः ॥ १०९॥
[1]स तत्र ब्रह्मणो लोके देवर्षिगणसेवितः ।
शतकोटिसमा राजन् यथाकामं प्रमोदते ॥ ११०॥
ततः कालावतीर्णश्च सोऽस्मिँल्लोके द्विजो भवेत् ।
षडङ्गविच्चतुर्वेदी त्रिंशज्जन्मान्यरोगवान् ॥ १११॥

1. क-ख-ग-घ—नास्तीदमर्धम् ।

यस्त्यक्त्वा सर्वकर्माणि शुचिः क्रोधविवर्जितः ।
महाप्रस्थानमेकाग्रो याति मद्गतमानसः ॥ ११२॥

स गच्छेदिन्द्रसदनं विमानेन विराजता ।
महामणिविचित्रेण सौवर्णेन विराजता ॥ ११३॥

शतकोटिसमास्तत्र सुराधिपतिपूजितः ।
नाकपृष्ठे निवसति दिव्यस्त्रीगणसेवितः ॥ ११४॥

शक्रलोकावतीर्णश्च मानुषेषूपजायते ।
राज्ञां राजा महातेजास् सर्वलोकार्चितः प्रभुः ॥ ११५॥

प्रायोपवेशं यः कुर्यान्मद्गतेनान्तरात्मना ॥ ११६

नमो ब्रह्मण्यदेवायेत्युक्त्वा मन्त्रं समाहितः ।
अन्तस्स्वस्थो जितक्रोधस् तस्य पुण्यफलं शृणु ॥ ११७

कामगः कामरूपी च बालसूर्यसमप्रभः ।
स विमानेन दिव्येन याति लोकाननामयान् ॥ ११८

स्वर्गात् स्वर्गं महातेजा गत्वा गत्वा यथासुखम् ।
मम लोकेषु रमते यावदाभूतसम्प्लवम् ॥ ११९

[1]अग्निप्रवेशं यश्चापि कुरुते मद्गतात्मना ।
सोऽपि यानेन दिव्येन मम लोके महीयते ॥ १२०

तत्र सर्वगुणोपेतः पश्यन्नेव स मां सदा ।

1. ग—इत आरभ्य एकादश श्लोका न दृश्यन्ते ।

त्रिंशत्कोटिसमा राजन् मोदते मम सन्निधौ ॥ १२१

ततोऽवतीर्णः कालेन वेदविद्ब्राह्मणो भवेत् ॥ १२१॥

कर्षणं साधयन् यस्तु मां प्रपन्नश्शुचिव्रतः ।
नमो ब्रह्मण्यदेवायेत्येतन्मन्त्रमुदीरयन् ॥ १२२॥

बालसूर्यप्रकाशेन विमानेन विराजता ।
मम लोकं समासाद्य वर्षकोटिं प्रमोदते ॥ १२३॥

मम लोकावतीर्णश्च लोकेऽस्मिन् क्षत्रियो भवेत् ॥ १२४

निवेशयति मन्मूर्त्याम् आत्मानं मद्व्रतश्शुचिः ।
रुद्रदक्षिणमूर्त्यां वा चतुर्दश्यां विशेषतः ॥ १२५

सिद्धैर्ब्रह्मर्षिभिश्चैव देवलोकैश्च पूजितः ।
गन्धर्वैर्भूतसङ्घैश्च गीयमानो महातपाः ॥ १२६

प्रविशेत् स महातेजा मां वा शङ्करमेव वा ।
न स्यात् पुनर्भवो राजन् नात्र कार्या विचारणा ॥ १२७

गोकृते स्त्रीकृते चैव गुरुविप्रकृतेऽपि वा ।
[1]हन्यन्ते ये तु राजेन्द्र शक्रलोकं व्रजन्ति ते ॥ १२८

तत्र जाम्बूनदमये विमाने कामगामिनि ।
मन्वन्तरं प्रमोदन्ते दिव्यनारीनिषेविताः ॥ १२९

आश्रुतस्याप्रदानेन दत्तस्य हरणेन च ।

1. क-ख—हन्यते योऽपि राजेन्द्र शक्रलोके महीयते ।

जन्मप्रभृति यद्दत्तं सर्वं नश्यति भारत ॥ १३०

नागोप्रदास्तत्र पयः पिबन्ति
नाभूमिदा भूमिमथाश्नुवन्ति ।
यान् यान् कामान् ब्राह्मणेभ्यो ददाति
तांस्तान् कामान् स्वर्गलोके स भुङ्क्ते ॥ १३१

यद्यदिष्टतमं द्रव्यं न्यायेनोपार्जितं च यत् ।
तत्तद् गुणवते देयं तदेवाक्षयमिच्छता ॥ १३२

अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्त्वा काञ्चनं गां च दरिद्रो नाम जायते ॥ १३३

दानं यत् तत्फलं नैति श्रोत्रियाय न दीयते ।
श्रोत्रिया यत्र नाश्नन्ति न देवास्तत्र भुञ्जते ॥ १३४

श्रोत्रियेभ्यः परं नास्ति परमं दैवतं महत् ।
निधानं चापि राजेन्द्र नास्माच्छ्रोत्रियभोजनात् ॥ १३५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

॥ ९२ ॥ अनुगीतापर्वणि द्विनवतितमोऽध्यायः ॥ ९२ ॥

[ अस्मिन्नध्याये १३५ श्लोकाः ]

## ॥ नवाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति पञ्चमहायज्ञनिरूपणं, ज्ञानविधिनिरूपणं, वैष्णवलक्षणाभिधानं स्वपूजायोग्यायोग्यपुष्पविवेचनं च ॥ १ ॥

युधिष्ठिरः—

विप्रयोगे शरीरस्य सेन्द्रियस्य विशेषतः ।
अन्तरा वर्तमानस्य गतिः प्राणस्य कीदृशी ॥ १

श्रीभगवान्—

शुभाशुभकृतं सर्वं प्राप्नोतीह फलं नरः ।
न तु सर्वस्य भूतस्य पञ्चत्वं वाऽपि विद्यते ॥ २

पञ्चत्वं पाण्डवश्रेष्ठ भूरिभूतिकरं नृणाम् ॥ २॥

तेषां पञ्च महायज्ञान् ये कुर्वन्ति द्विजोत्तमाः ।
पञ्चत्वं पञ्चभिर्भूतैर् वियोगं सम्प्रचक्षते ॥ ३॥

न जायते न म्रियते पुरुषश्शाश्वतस्सदा ॥ ४

प्रायेण मरणं नाम पापिनामेव पाण्डव ।
येषां तु न गतिः पुण्या तेषां मरणमुच्यते ॥ ५

प्रायेणाकृतकृत्यस्तु मृत्योरुद्विजते जनः ।
कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम् ॥ ६

युधिष्ठिरः—

पञ्च यज्ञाः कथं देव क्रियन्तेऽत्र द्विजातिभिः ।

तेषां नाम च देवेश वक्तुमर्हस्यशेषतः ॥ ७

श्रीभगवान्—

शृणु पञ्च महायज्ञान् कीर्त्यमानान् युधिष्ठिर ।
यैरेव ब्रह्मसालोक्यं लभन्ते गृहमेधिनः ॥ ८

ऋषियज्ञं ब्रह्मयज्ञं भूतयज्ञं च पाण्डव ।
नृयज्ञं पितृयज्ञं च पञ्च यज्ञान् प्रचक्षते ॥ ९

तर्पणं ऋषियज्ञस्यात् स्वाध्यायो ब्रह्मयज्ञकम् ॥ ९॥

भूतयज्ञो बलिर्ज्ञेयो नृयज्ञोऽतिथिपूजनम् ।
पितॄनुद्दिश्य यत् कर्म पितृयज्ञः प्रकीर्तितः ॥ १०॥

हुतं चाप्यहुतं चैव तथा प्रहुतमेव च ।
प्राशितं बलिदानं च [1]पाकयज्ञान् प्रचक्षते ॥ ११॥

वैश्वदेवादयो होमा हुतमित्युच्यते बुधैः ।
अहुतं च भवेद्दत्तं प्रहुतं ब्राह्मणाशितम् ॥ १२॥

प्राणाग्निहोत्रहोमं च प्राशितं विधिवद्विदुः ।
बलिकर्म च राजेन्द्र पाकयज्ञाः प्रकीर्तिताः ॥ १३॥

[2]केचित् पञ्च महायज्ञान् पाकयज्ञान् प्रचक्षते ।
[3]अपरे ब्रह्मयज्ञादीन् महायज्ञविदो विदुः ॥ १४॥

---

1. क-ख-ग—पञ्च य । च—पञ्च यज्ञाः प्रकीर्तिताः ।
2. अ—इदमर्धं नास्ति 3. घ—नास्तीदमर्धम् ।

सर्व एते महायज्ञास् सर्वथा परिकीर्तिताः ।
बुभुक्षितान् ब्राह्मणांस्तु यथाशक्ति न हापयेत् ॥ १५॥
अहन्यहनि ये त्वेतान् अकृत्वा भुञ्जते स्वयम् ।
केवलं मलमश्नन्ति ते नरा न च संशयः ॥ १६॥
तस्मात् स्नात्वा द्विजो विद्वान् कुर्यादेतान् दिने दिने ।
अतोऽन्यथा तु भुञ्जन् वै प्रायश्चित्ती भवेद्द्विजः ॥ १७॥

युधिष्ठिरः—

देवदेव नमस्तेऽस्तु त्वद्भक्तस्य जनार्दन ।
वक्तुमर्हसि देवेश स्नानस्य च विधिं मम ॥ १८॥

श्रीभगवान्—

शृणु पाण्डव तत् सर्वं पवित्रं पापनाशनम् ।
स्नात्वा येन विधानेन मुच्यन्ते किल्बिषाद्द्विजाः ॥ १९॥
मृदं च गोमयं चैव तिलान् दर्भांस्तथैव च ।
पुष्पाण्यपि यथालाभम् आदाय तु जलं व्रजेत् ॥ २०॥
नद्यां सत्यां न च स्नायाद् अन्यत्र द्विजसत्तमः ।
सति प्रभूते पयसि नाल्पे स्नायात् कदाचन ॥ २१॥
[1]गत्वोदकसमीपं तु शुचौ देशे मनोरमे ।
ततो मृद्गोमयादीनि तत्रावेक्ष्य विनिक्षिपेत् ॥ २२॥
बहिः प्रक्षाल्य पादौ च द्विराचम्य प्रयत्नतः ।

1. ग—अर्धपद्यकं नास्ति

प्रदक्षिणं समावृत्य नमस्कुर्यात्तु तज्जलम् ॥ २३॥

न च प्रक्षालयेत् तीर्थम् अद्भिर्विद्वान् कदाचन ।
न च पादेन वा हन्याद्धस्तेनान्येन तज्जलम् ॥ २४॥

[1]सर्वदेवमया ह्यापो मन्मयाः पाण्डुनन्दन ।
तस्मात् तास्तु न हन्तव्यास् त्वद्भिः प्रक्षालयेत् स्थलं ॥ २५॥

केवलं प्रथमं मज्जेन्नाङ्गानि विमृजेद्बुधः ।
तत् तीर्थं स समासाद्य कुर्यादाचमनं पुनः ॥ २६॥

[2]गोकर्णाकृतिवत् कृत्वा करं त्रिः प्रपिबेज्जलम् ॥ २७

द्विस्तत् परिमृजेद्वक्त्रं पादावभ्युक्ष्य चात्मनः ।
शीर्षण्यांस्तु ततः प्राणान् सकृदेव तु संस्पृशेत् ॥ २८

बाहू द्वौ च ततस्पृष्ट्वा हृदयं नाभिमेव च ।
प्रत्यङ्गमुदकं स्पृष्ट्वा मूर्धानं तु ततस्पृशेत् ॥ २९

आपः पुनन्त्वित्युक्त्वा च पुनराचमनं चरेत् ।
सोङ्कारव्याहृतीर्वाऽपि सदसस्पतिमित्यृचम् ॥ ३०

आचम्य मृत्तिकाः पश्चात् त्रिधाकृत्य समालभेत् ॥ ३०॥

ऋचेदं विष्णुरित्यङ्गम् उत्तमाधममध्यमम् ।
आलभ्य वारुणैस्सूक्तैर् नमस्कृत्य जलं ततः ॥ ३१॥

---

1. क-ख-घ—अर्धपञ्चकं नास्ति
2. अ-क-ख-घ-अपुच्छाकृतिवत्। च-गोकर्णवत् करं कृत्वा ब्राह्मणस्त्रिः

स्रवन्त्यां चेत् प्रतिस्रोतः प्रत्यर्कं चान्यवारिषु ।
मज्जेदोमित्युदाहृत्य न च विक्षोभयेज्जलम् ॥ ३२॥

गोमयं च त्रिधा कृत्वा जले पूर्वं समालभेत् ।
सव्याहृतिं सप्रणवां गायत्रीं च पुनर्जपेत् ॥ ३३॥

पुनराचमनं कृत्वा मन्त्रतेनान्तरात्मना ।
आपोहिष्ठेति तिसृभिर् दर्भपूतेन वारिणा ॥ ३४॥

तथा तरत्समन्दीभिस् सिञ्चेच्चतसृभिः क्रमात् ॥ ३५

गोसूक्तेनाश्वसूक्तेन शुद्धवर्गेण चाप्यथ ।
वैष्णवैर्वारुणैस्सूक्तैस् [1]सावित्रैरिन्द्रदेवतैः ॥ ३६

वामदैव्येन चात्मानम् अन्यैर्मन्मयसामभिः ।
स्थित्वाऽन्तस्सलिले सूक्तं जपेद्वाचाऽघमर्षणम् ॥ ३७

सव्याहृतीकां सप्रणवां गायत्रीं वा ततो जपेत् ।
आश्वासमोक्षात् प्रणवं जपेद्वा मामनुस्मरन् ॥ ३८

उत्प्लुत्य तीरमासाद्य धौते शुक्ले च वाससी ।
शुद्धे चाच्छादयेत् कक्षे न कुर्यात् परिपाशके ॥ ३९

पाशेन बद्धा कक्षे यत् कुरुते कर्म वैदिकम् ।
राक्षसा दानवा दैत्यास् तद्विलुम्पन्ति हर्षिताः ॥ ४०

1. क-ख-ग—वैष्णवैरिन्द्र ।

तस्मात् सर्वप्रयत्नेन [1]कच्छपाशे न धारयेत् ॥ ४०॥

ततः प्रक्षाल्य पादौ द्वौ हस्तौ चैव मृदा शनैः ।
आचम्य पुनराचामेत् ततस्सावित्रिया द्विजः ॥ ४१॥

[2]प्राङ्मुखोदङ्मुखो वाऽपि ध्यायन् वेदान् समाहितः ॥ ४२

जले जलगतश्शुद्धस् स्थल एव स्थले स्थितः ।
उभयत्र स्थितस्तस्माद् आचामेदात्मशुद्धये ॥ ४३

दर्भेषु दर्भपाणिस्सन् प्राङ्मुखस्सुसमाहितः ।
प्राणायामांस्ततः कृत्वा मद्रूतेनान्तरात्मना ॥ ४४

सहस्रकृत्वस्सावित्रीं शतकृत्वस्तु वा जपेत् ॥ ४४॥

समाप्ते तु जपे तस्मिन् सावित्र्या चाभिमन्त्रय च ।
मन्देहानां विनाशाय रक्षसां विक्षिपेज्जलम् ॥ ४५॥

उद्वर्गोऽसीत्यथाचान्तः प्रायश्चित्तजलं क्षिपेत् ॥ ४६

अथादाय सुपुष्पाणि तोयान्यञ्जलिना द्विजः ।
प्रक्षिप्य प्रतिसूर्यं च व्योममुद्रां प्रकल्पयेत् ॥ ४७

ततो द्वादशकृत्वस्तु सूर्यस्यैकाक्षरं जपेत् ।
ततष्षडक्षरादीनि त्रिः कृत्वः परिवर्तयेत् ॥ ४८

प्रदक्षिणं परामृश्य मुद्रया स्वमुखं तया ।

---

1. अ-घ—कक्ष्यापाशे । ग-च—कक्ष्यां पा ।
2. क-ख-ग-घ-च—नास्तीदमर्धम् ।

ऊर्ध्वबाहुस्ततो भूत्वा सूर्यमीक्षेत् समाहितः ॥ ४९
तन्मण्डलस्थं मां ध्यायेत् तेजोमूर्तिं चतुर्भुजम् ।
उदुत्यं च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि ॥ ५०
सावित्रीं च यथाशक्ति जप्त्वा सूक्तं च मामकम् ।
मन्मयानि च सामानि पुरुषव्रतमेव च ॥ ५१
ततश्चालोकयेदर्कं हंसश्शुचिषदित्यृचा ॥ ५१॥
प्रदक्षिणं समावृत्य नमस्कृत्य दिवाकरम् ।
ततस्तु तर्पयेदद्भिर् मां ब्रह्माणं च शङ्करम् ॥ ५२॥
प्रजापतिं च देवांश्च तथा देवमुनीनपि ।
साङ्गानपि तथा वेदान् इतिहासान् क्रतूंस्तथा ॥ ५३॥
पुराणानि च दिव्यानि कुलान्यप्सरसां तथा ।
ऋतून् संवत्सरांश्चैव कालान् कालात्मकं तथा ॥ ५४॥
भूतग्रामांश्च भूतानि सरितस्सागरांस्तथा ।
शैलाञ्शैलस्थितान् देवान् ओषधीस्सवनस्पतीः ॥ ५५॥
तर्पयेदुपवीती तु प्रत्येकं तृप्यतामिति ॥ ५६
अन्वारभ्य च सव्येन पाणिना दक्षिणेन तु ।
निवीती तर्पयेत् पश्चाद् ऋषीन् मन्त्रकृतस्तथा ॥ ५७
मरीच्यादिमुनींश्चैव नारदान्तान् समाहितः ॥ ५७॥
प्राचीनावीत्यथैतांस्तु तर्पयेद्देवताः पितॄन् ॥ ५८

ततस्तु कव्यवाडग्निं सोमं वैवस्वतं तथा ।
ततश्चार्यमणं चापि अग्निष्वात्तांस्तथैव च ॥ ५९

सोमपांश्चैव दर्भेषु सतिलैरेव वारिभिः ।
तृप्यतामिति पश्चात्तु स्वपितॄंस्तर्पयेत् ततः ॥ ६०

पितॄन् पितामहांश्चैव तथैव प्रपितामहान् ।
पितामहीस्तथा चापि तथैव प्रपितामहीः ॥ ६१

[1]मातरं चात्मनश्चैव तथा मातामहीमपि ।
मातुर्मातामहीं चैव गुरुमाचार्यमेव च ॥ ६२

उपाध्यायान् सखीन् बन्धूंश्च शिष्यर्त्विग्ज्ञातिपुत्रकान् ।
प्रमीतानानृशंस्यार्थं [2]तर्पयेत् तानमत्सरः ॥ ६३

तर्पयित्वा तथाऽऽचम्य स्नानवस्त्रं प्रपीडयेत् ।
[3]धृद्धिं भृत्यजनस्याहुस् स्नानं पानं च तद्विदः ॥ ६४

अतर्पयित्वा तान् पूर्वं स्नानवस्त्रं न पीडयेत् ॥ ६४॥

पीडये[4]च्चेत् पुरा मोहाद् देवास्सर्षिगणास्तथा ।
पितरश्च निराशास्ते शप्त्वा यान्ति यथागतम् ॥ ६५॥

---

1. क-ग-च—तथा पितृष्वसॄंश्चैव मातृष्वसॄंस्तथैव च । [अधिकः पाठः]
2. ग—तर्पयेज् ज्ञानतत्परः ।
3. क-ख-ग-च—श्लोकोऽयं नास्ति
4. क-ख-ग—च न तन्मोहाद् ।

प्रक्षाल्य च मृदा पादावाचम्य प्रयतः पुनः ।
दर्भेषु दर्भपाणिस्सन् स्वाध्यायं तु समारभेत् ॥ ६६॥
वेदमादौ समारभ्य ततोपर्युपरि क्रमात् ।
यदधीते स्वयं शक्त्या तत् स्वाध्यायं प्रचक्षते ॥ ६७॥
ऋचं वाथ यजुर्वाऽपि [1]सामगाथामथापि च ।
इतिहासपुराणानि यथाशक्ति न हापयेत् ॥ ६८॥
उत्थाय तु नमस्कृत्य दिशो दिग्देवता अपि ।
[2]ब्रह्माणं च ततश्चाग्निं पृथिवीमोषधीस्तथा ॥ ६९॥
वाचं वाचस्पतिं चैव मां चैव सरितस्तथा ।
नमस्कृत्वा तथाऽद्भिस्तु प्रणवादि च पूजयेत् ॥ ७०॥
ततो नमोऽद्य इत्युक्त्वा नमस्कुर्यात्तु तज्जलम् ॥ ७१
घृणिस्सूर्यस्तथाऽऽदि[3]त्यस् त्रिस्स्वमूर्ध्नि ततो जलैः ।
सिक्ताऽवलोकयेदर्कं प्रणवेन समाहितः ॥ ७२
ततो मामर्चयेत् पुष्पैर् मत्प्रियैरेव नित्यशः ॥ ७२॥

युधिष्ठिरः—

त्वत्प्रियाणि प्रसूनानि त्वदनिष्टानि माधव ।
सर्वाण्याचक्ष्व देवेश त्वद्भक्तस्य ममाच्युत ॥ ७३॥

---

1. ग—साम आथर्वमेव च ।
2. ग-घ—ब्राह्मणांश्च ततश्चाग्निं + स्तथा ।
3. क-ख-ग-घ—स्यस्तर्पयेच्च स्वमूर्धनि ।
च—घृणिसूर्य तथाऽऽदित्यान् तत्प्रणम्य स्वमूर्धनि ।

श्रीभगवान्—

शृणुष्वावहितो राजन् पुष्पाणि प्रियकृन्ति मे ॥ ७४

कुमुदं करवीरं च चणकं चम्पकं तथा ।
मल्लिका जातिपुष्पं च नन्द्यावर्तं च नन्दिकम् ॥ ७५

पलाशपुष्पपत्राणि दूर्वा भृङ्गकमेव च ।
वनमाला च राजेन्द्र मत्प्रियाणि विशेषतः ॥ ७६

सर्वेषामपि पुष्पाणां सहस्रगुणमुत्पलम् ।
तस्मात् पद्मं तथा राजन् पद्मात्तु शतपत्रकम् ॥ ७७

तस्मात् सहस्रपत्रं तु पुण्डरीकं ततः परम् ।
पुण्डरीकसहस्रात्तु तुलसी गुणतोऽधिका ॥ ७८

बकपुष्पं ततस्तु स्यात् सौवर्णं तु ततोऽधिकम् ।
सौवर्णात्तु प्रसूनाच्च मत्प्रियं नास्ति पाण्डव ॥ ७९

पुष्पालाभे तुलस्यास्तु पत्रैर्मामर्चयेद्बुधः ।
पत्रालाभे तु शाखाभिश् शाखालाभे शिफाफलैः ॥ ८०

शिफालाभे मृदा तत्र भक्तिमानर्चयेत माम् ॥ ८०॥
[1]येन केन प्रकारेण तुलसीदलपूर्वकैः ।
पुष्पैः फलैर्वाऽप्यन्नाद्यैर् मदाराधनमुत्तमम् ॥ ८१॥
वर्जनीयानि पुष्पाणि शृणु राजन् समाहितः ॥ ८२

1. च—कोश एकस्मिन्नेवार्थे श्लोको लक्ष्यते ।

किङ्किणी मुनिपुष्पं च दुत्तूरं पाटलं तथा ।
तथाऽतिमुक्तकं चैव पुन्नागं नक्तमालिकम् ॥ ८३
यौधिकं क्षीरिकापुष्पं निर्गुण्डी लाङ्गुली जपा ।
कर्णिकारं तथाऽशोकं शाल्मलीपुष्पमेव च ॥ ८४
ककुभाः कोविदाराश्च वैभीतकमथापि च ।
कुरण्टकप्रसूनं च कल्पकं लाङ्गली तथा ॥ ८५
अङ्कोलं गिरिकर्णी च नीलान्येव च सर्वशः ॥
एकवर्णानि चान्यानि सर्वाण्येव विवर्जयेत् ॥ ८६
अर्कपुष्पाणि वर्ज्यानि चार्कपत्रस्थितानि च ।
व्याघातपिचुमन्दानि सर्वाण्येव विवर्जयेत् ॥ ८७
अन्यैस्तु शुक्लपत्रैश्च गन्धवद्भिर्नराधिप ।
अवर्ज्यैस्तैर्यथालाभं मद्भक्तो मां समर्चयेत् ॥ ८८

युधिष्ठिरः—

कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते ।
वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः ॥ ८९

श्रीभगवान्—

शृणु पाण्डव तत् सर्वम् अर्चनाक्रममात्मनः ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ॥ ९०
अष्टाक्षरविधानेन ह्यथवा द्वादशाक्षरैः ।
वैदिकैरथवा मन्त्रैर् मम सूक्तेन वा पुनः ॥ ९१

श्रीभगवान्—

शृणुष्वावहितो राजन् पुष्पाणि प्रियकृन्ति मे ॥ ७४

कुमुदं करवीरं च चणकं चम्पकं तथा ।
मल्लिका जातिपुष्पं च नन्द्यावर्तं च नन्दिकम् ॥ ७५

पलाशपुष्पपत्राणि दूर्वा भृङ्गकमेव च ।
वनमाला च राजेन्द्र मत्प्रियाणि विशेषतः ॥ ७६

सर्वेषामपि पुष्पाणां सहस्रगुणमुत्पलम् ।
तस्मात् पद्मं तथा राजन् पद्मात्तु शतपत्रकम् ॥ ७७

तस्मात् सहस्रपत्रं तु पुण्डरीकं ततः परम् ।
पुण्डरीकसहस्रात्तु तुलसी गुणतोऽधिका ॥ ७८

बकपुष्पं ततस्तु स्यात् सौवर्णं तु ततोऽधिकम् ।
सौवर्णात्तु प्रसूनाच्च मत्प्रियं नास्ति पाण्डव ॥ ७९

पुष्पालाभे तुलस्यास्तु पत्रैर्मामर्चयेद्बुधः ।
पत्रालाभे तु शाखाभिश् शाखालाभे शिफाफलैः ॥ ८०

शिफालाभे मृदा तत्र भक्तिमानर्चयेत माम् ॥ ८०॥
[1]येन केन प्रकारेण तुलसीदलपूर्वकैः ।
पुष्पैः फलैर्वाऽप्यन्नाद्यैर् मदाराधनमुत्तमम् ॥ ८१॥
वर्जनीयानि पुष्पाणि शृणु राजन् समाहितः ॥ ८२

1. च—कोश एकस्मिन्नेवार्थे श्लोको लक्ष्यते ।

किङ्किणी मुनिपुष्पं च दुत्तूरं पाटलं तथा ।
तथाऽतिमुक्तकं चैव पुन्नागं नक्तमालिकम् ॥ ८३
यौधिकं क्षीरिकापुष्पं निर्गुण्डी लाङ्गुली जपा ।
कर्णिकारं तथाऽशोकं शाल्मलीपुष्पमेव च ॥ ८४
ककुभाः कोविदाराश्च वैभीतकमथापि च ।
कुरण्टकप्रसूनं च कल्पकं लाङ्गली तथा ॥ ८५
अङ्कोलं गिरिकर्णी च नीलान्येव च सर्वशः ॥
एकवर्णानि चान्यानि सर्वाण्येव विवर्जयेत् ॥ ८६
अर्कपुष्पाणि वर्ज्यानि चार्कपत्रस्थितानि च ।
व्याघातपिचुमन्दानि सर्वाण्येव विवर्जयेत् ॥ ८७
अन्यैस्तु शुक्लपत्रैश्च गन्धवद्भिर्नराधिप ।
अवर्ज्यैस्तैर्यथालाभं मद्भक्तो मां समर्चयेत् ॥ ८८

युधिष्ठिरः—

कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशास्तु ते ।
वैखानसाः कथं ब्रूयुः कथं वा पाञ्चरात्रिकाः ॥ ८९

श्रीभगवान्—

शृणु पाण्डव तत् सर्वम् अर्चनाक्रममात्मनः ।
स्थण्डिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् ॥ ९०
अष्टाक्षरविधानेन ह्यथवा द्वादशाक्षरैः ।
वैदिकैरथवा मन्त्रैर् मम सूक्तेन वा पुनः ॥ ९१

[1]स्थापितं मां ततस्तस्मिन्नर्चयित्वा विचक्षणः ।
पुरुषं च ततस्सत्यम् अच्युतं च युधिष्ठिर ॥ ९२
अनिरुद्धं च मां प्राहुर् वैखानसविदो जनाः ॥ ९२॥
अन्ये त्वेवं विजानन्ति मां राजन् पाञ्चरात्रिकाः ॥ ९३
वासुदेवं च राजेन्द्र सङ्कर्षणमथापि वा ।
प्रद्युम्नमनिरुद्धं च चतुर्मूर्तिं प्रचक्षते ॥ ९४
एताश्चान्याश्च राजेन्द्र संज्ञाभेदेन मूर्तयः ।
विद्ध्यनर्थान्तरा एवं मामेवं चार्चयेद्बुधः ॥ ९५
[2]अत्यन्तभेदरहितं गुणपूर्णं सदैव हि ॥ ९५॥

युधिष्ठिरः—

त्वद्भक्ताः कीदृशा देव कानि तेषां व्रतानि च ।
एतत् कथय देवेश त्वद्भक्तस्य ममाच्युत ॥ ९६॥

श्रीभगवान्—

अनन्यदेवताभक्ता ये मद्भक्तजनप्रियाः ।
मामेव शरणं प्राप्तास् ते मद्भक्ताः प्रकीर्तिताः ॥ ९७॥
स्वर्ग्याण्यपि यशस्यानि मत्प्रियाणि विशेषतः ।
मद्भक्तः पाण्डवश्रेष्ठ व्रतानीमानि धारयेत् ॥ ९८॥
नान्यदाच्छादयेद्वस्त्रं मद्भक्तो जलतारणे ।

1. ग—इदमर्धं नास्ति 2. ख-घ-ग—नास्तीदमर्धम्।

स्वस्थस्तु न दिवा स्वप्येन्मधुमांसानि वर्जयेत् ॥ ९९॥

प्रदक्षिणं व्रजेद्विप्रान् गामश्वत्थं हुताशनम् ।
न धावेत् पतिते वर्षे नाग्निभिक्षां च लोपयेत् ॥ १००॥

प्रत्यक्षलवणं नाद्यात् सौभाञ्जनकरञ्जनौ ।
ग्रासमुष्टिं गवे दद्याद् धान्याम्लं चैव वर्जयेत् ॥ १०१॥

[1]तथा पर्युषितं चापि पक्वं परगृहागतम् ।
अनिवेदितं च यद्द्रव्यं तत् प्रयत्नेन वर्जयेत् ॥ १०२॥

विभीतककरञ्जानां छायां दूरात्तु वर्जयेत् ।
विप्रदेवपरीवादं न वदेत् पीडितोऽपि सन् ॥ १०३॥

सात्विका राजसाश्चापि तामसाश्चापि पाण्डव ।
मामर्चयन्ति मद्भक्तास् तेषामीदृग्विधा गतिः ॥ १०४॥

तामसास्तिमिरं यान्ति राजसा रज एव तत् ।
सात्विकास्सत्वसम्पन्नास् सत्वमेव प्रयान्ति ते ॥ १०५॥

ये सिद्धास्सन्ति साङ्ख्येन योगसत्वबलेन च ।
नभस्यादित्यचन्द्राभ्यां पश्यन्ति पदविस्तरम् ॥ १०६॥

एकस्तम्भे नवद्वारे त्रिस्थूणे पञ्चधातुके ।
एतस्मिन् देहनगरे राजस्तु सदा भवेत् ॥ १०७॥

उदिते सवितर्याप्य क्रियायुक्तस्य धीमतः ।

---

1. अ-च—अर्धद्वयं नास्ति

चतुर्वेदविदश्चापि देहे षड् वृषलास्स्मृताः ॥ १०८॥

[1]क्षत्रियास्सप्त विज्ञेया वैश्यास्त्वष्टौ प्रकीर्तिताः ।
नियताः पाण्डवश्रेष्ठ शूद्राणामेकविंशतिः ॥ १०९॥

कामः क्रोधश्च लोभश्च मोहश्च मद एव च ।
महामोहश्च इत्येते देहे षड् वृषलास्स्मृताः ॥ ११०॥

गर्वस्तंभो ह्यहङ्कार ईर्ष्या च द्रोह एव च ।
पारुष्यं क्रूरता चेति सप्तैते क्षत्रियास्स्मृताः ॥ १११॥

तीक्ष्णता निकृतिर्माया शाठ्यं डम्भो ह्यनार्जवम् ।
पैशुन्यमनृतं चैव वैश्यास्त्वष्टौ प्रकीर्तिताः ॥ ११२॥

[2]तृष्णा बुभुक्षा निद्रा च ह्यालस्यं चाघृणाऽदया ।
आधिश्चापि विषादश्च प्रमादो हीनसत्वता ॥ ११३॥

भयं विक्लबता जाड्यं पापकं मन्युरेव च ।
आशा चाश्रद्दधानत्वम् अनवस्थाप्यमन्त्रणम् ॥ ११४॥

अशौचं मलिनत्वं च शूद्रा ह्येते प्रकीर्तिताः ॥ ११५
यस्मिन्नेते न दृश्यन्ते स वै ब्राह्मण उच्यते ॥ ११५॥

येषु येषु हि भावेषु यत्कालं वर्तते द्विजः ।
तत्तत्कालं स विज्ञेयो ब्राह्मणो ज्ञानदुर्बलः ॥ ११६॥

---

1. अ—अर्धचतुष्टयं नास्ति
2. अ—अर्धपञ्चकं नास्ति

प्राणानायम्य यत्काले यो मां चापि विचिन्तयेत् ।
तत्काले वै द्विजो ज्ञेयश् शेषकाले ह्यथेतरः ॥ ११७॥

तस्मात्तु सात्विको भूत्वा शुचिः क्रोधविवर्जितः ।
मामर्चयेत्तु सततं मत्प्रियत्वं यदीच्छति ॥ ११८॥

अलोलजिह्वस्समुपस्थितो धृतिं
निधाय चक्षुर्युगमात्रमेव च ।
मनश्च वाचं च निगृह्य चञ्चलं
भयान्निवृत्तो मम भक्त उच्यते ॥ ११९॥

ईदृशा ध्यानिनो ये तु ब्राह्मणा नियतेन्द्रियाः ।
तेषां श्राद्धेषु तृप्यन्ति तेन तृप्ताः पितामहाः ॥ १२०॥

धर्मो जयति नाधर्मस् सत्यं जयति नानृतम् ।
क्षमा जयति न क्रोधः क्षमावान् ब्राह्मणो भवेत् ॥ १२१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि नवाधिकशततमोऽध्यायः ॥ १०९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्रिनवतितमोऽध्यायः ॥ ९३ ॥
[ अस्मिन्नध्याये १२१॥ श्लोकाः ]

## ॥ दशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति दशधा कपिलाविभागकथनपूर्वकं तद्दान-प्रशंसनम् ॥

वैशम्पायनः—

दानपुण्यफलं श्रुत्वा तपः पुण्यफलानि च ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥ १

युधिष्ठिरः—

या चैषा कपिला देव पूर्वमुत्पादिता विभो ।
होमधेनुस्सदा पुण्या चतुर्वक्त्रेण माधव ॥ २

सा कथं ब्राह्मणेभ्यो हि देया कस्मिन् दिनेऽपि वा ।
कीदृशाय च विप्राय दातव्या पुण्यलक्षणा ॥ ३

कति वा कपिलाः प्रोक्तास् स्वयमेव स्वयम्भुवा ।
कैर्वा देयाश्च ता देव श्रोतुमिच्छामि तत्त्वतः ॥ ४

वैशम्पायनः—

एवमुक्तो हृषीकेशो धर्मपुत्रेण संसदि ।
अब्रवीत् कपिलासङ्ख्यां तासां माहात्म्यमेव च ॥ ५

श्रीभगवान्—

शृणु पाण्डव तत्त्वेन पवित्रं पावनं परम् ।
यच्छ्रुत्वा पापकर्माऽपि नरः पापैः प्रमुच्यते ॥ ६

अग्निमध्योद्भवां दिव्याम् अग्निज्वालासमप्रभाम् ।
अग्निज्वालोज्ज्वलच्छृङ्गीं प्रदीप्ताङ्गारलोचनाम् ॥ ७

अग्निपुच्छामग्निखुराम् अग्निरोमप्रभान्विताम् ।
तामाग्नेयीमग्निजिह्वाम् अग्निग्रीवां ज्वलत्प्रभाम् ॥ ८

भुञ्जते कपिलां ये तु शूद्रा लोभेन मोहिताः ।
पतितांस्तान् विजानीयाच् चण्डालसदृशा हि ते ॥ ९

न तेषां ब्राह्मणः कश्चिद् गृहे कुर्यात् प्रतिग्रहम् ।
दूराच्च परिहर्तव्या महापातकिनो हि ते ॥ १०

सर्वकालं हि ते सर्वैर् वर्जिताः पितृदैवतैः ।
ते सदा ह्यप्रतिग्राह्या ह्यसम्भाष्याश्च पापिनः ॥ ११

पिबन्ति कपिलां यावत् तावत् तेषां पितामहाः ।
अमेध्यमुपभुञ्जन्ति भूम्यां वै श्वसृगालवत् ॥ १२

कपिलाया घृतं क्षीरं दधि तक्रमथापि वा ।
ये शूद्रा उपभुञ्जन्ति तेषां गतिमिमां शृणु ॥ १३

कपिलोपजीवी शूद्रस्तु मृतो गच्छति रौरवम् ।
छिद्यते रौरवे घोरे वर्षकोटिशतं वसन् ॥ १४

रौरवाच्च परिभ्रष्टो विष्ठायां जायते क्रिमिः ॥ १४॥

विष्ठागर्तेषु संविष्टो दुर्गन्धेषु सहस्रशः ।
तत्र तत्रोपजायेत नोत्तारं तत्र विन्दति ॥ १५॥

ब्राह्मणश्चैव यस्तेषां गृहे कुर्यात् प्रतिग्रहम् ।
ततः प्रभृति तस्यापि पितरस्युरमेध्यपाः ॥ १६॥

न तेन सार्धं सम्भाषेन्न चाप्येकासनं व्रजेत् ।
स नित्यं वर्जनीयो हि दूरात्तु ब्राह्मणाधमः ॥ १७॥

यस्तेन सह सम्भाषेद् एकशय्यां व्रजेत वा ।
प्राजापत्यं चरेत् कृच्छ्रं स च तेन विशुद्ध्यति ॥ १८॥

कपिलोपजीविनश्शूद्राद् यः करोति प्रतिग्रहम् ।
प्रायश्चित्तं भवेत् तस्य विप्रस्यैतन्न संशयः ॥ १९॥

ब्रह्मकूर्चं प्रकुर्वीत चान्द्रायणमथापि वा ।
मुच्यते किल्बिषात् तस्माद् एतेन ब्राह्मणो हि सः ॥ २०॥

कपिला ह्यग्निहोत्रार्थे यज्ञार्थे च स्वयम्भुवा ।
सर्वतस्तेज उद्धृत्य ब्रह्मणा निर्मिता पुरा ॥ २१॥

पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला पाण्डुनन्दन ॥ २२॥

तपसां तप एवाग्र्यं व्रतानां व्रतमुत्तमम् ।
दानानां परमं दानं निधानं ह्येतदक्षयम् ॥ २३॥

पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
पवित्राणि च रम्याणि सर्वलोकेषु पाण्डव ॥ २४॥

तेभ्यस्तेजस्समुद्धृत्य ब्रह्मणा लोककर्तृणा ।

लोकनिस्तरणायैव निर्मिता कपिला स्वयम् ॥ २५॥

सर्वतेजोमयी ह्येवं कपिला पाण्डुनन्दन ।
सदाऽमृतवहा मेध्या शुचिः पावनमुत्तमम् ॥ २६॥

क्षीरेण कपिलायास्तु दध्ना च सघृतेन वा ।
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ॥ २७॥

कपिलाया घृतेनापि दध्ना क्षीरेण वा पुनः ।
जुह्वते येऽग्निहोत्राणि ब्राह्मणा विधिवत् प्रभो ॥ २८॥

पूजयन्त्यतिथींश्चैव परां भक्तिमुपागताः ।
शूद्रान्नविरता नित्यं डम्भानृतविवर्जिताः ॥ २९॥

ते यान्त्यादित्यसङ्काशैर् विमानैर्द्विजसत्तमाः ।
सूर्यमण्डलमध्येन ब्रह्मलोकमनुत्तमम् ॥ ३०॥

ब्रह्मणो भवने दिव्ये कामगाः कामरूपिणः ।
ब्रह्मणा पूज्यमानास्तु मोदन्ते कल्पमक्षयम् ॥ ३१॥

एवं हि कपिला राजन् [1]पुण्या मन्त्रामृतारणिः ।
आदावेवाग्निमध्यात्तु मैत्रेयी ब्रह्मनिर्मिता ॥ ३२॥

शृङ्गाग्रे कपिलायास्तु सर्वतीर्थानि पाण्डव ।
ब्रह्मणो हि नियोगेन निवसन्ति दिने दिने ॥ ३३॥

प्रातरुत्थाय यो [म]र्त्यः कपिलाशृङ्गमस्तकात् ।

1. क-ख-ग—पुण्यामृतवितारिणी ।

च्युता आपस्तु शीर्षेण धारयेत् प्रयतश्शुचिः ॥ ३४॥

स तेन पुण्यतीर्थेन सहसा दग्धकिल्बिषः ।
वर्षत्रयकृतं पापं प्रदहत्यग्निवत् तृणम् ॥ ३५॥

मूत्रेण कपिलायास्तु यस्तु प्रातरुपस्पृशेत् ।
स्नानेन तेन पुण्येन नष्टपापस्स मानवः ॥ ३६॥

त्रिंशद्वर्षकृतात् पापान्मुच्यते नात्र संशयः ॥ ३७

प्रातरुत्थाय यो भक्त्या प्रयच्छेत् तृणमुष्टिकम् ।
तस्य नश्यति तत् पापं त्रिंश[1]द्रात्रकृतं नृप ॥ ३८

प्रातरुत्थाय मद्भक्त्या कुर्याद्यस्तां प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी नात्र संशयः ॥ ३९

प्रदक्षिणेन चैकेन श्रद्धायुक्तस्य पाण्डव ।
दशरात्रकृतं पापं तस्य तन्नश्यति ध्रुवम् ॥ ४०

[2]कपिलापञ्चगव्येन यस्स्नायात्तु शुचिर्नरः ।
स गङ्गाद्येषु तीर्थेषु स्नातो भवति पाण्डव ॥ ४१

[3]तेन स्नानेन तस्यापि श्रद्धायुक्तस्य पाण्डव ।
दशरात्रकृतं पापं तत्क्षणादेव नश्यति ॥ ४२

दृष्ट्वा तु कपिलां भक्त्या श्रुत्वा हुङ्कारनिस्स्वनम् ।

---

1. क-ख-च—द्वात्रिंकृतं । ग—द्वर्षकृतं ।
2. अ-च—अर्धचतुष्टयं नास्ति
3. च—अर्धद्वयं नास्ति

व्यपोहति नरः पापम् अहोरात्रकृतं नृप ॥ ४३

यत्र वा तत्र वा चाङ्गे कपिलां यस्स्पृशेच्छुचिः ।
संवत्सरकृतं पापं विनाशयति पाण्डव ॥ ४४

गोसहस्रं च यो दद्याद् एकां च कपिलां नरः ।
[1]समं तस्य फलं प्राह ब्रह्मलोके पितामहः ॥ ४५

[2]यस्त्वेकां कपिलां हन्यान्नरः कश्चित् प्रमादतः ।
गोसहस्रं हतं तेन भवेन्नात्र विचारणा ॥ ४६

यस्त्वेकां कपिलां दद्याच् छ्रोत्रियायाहिताग्नये ।
गवां शतसहस्रं तु दत्तं भवति पाण्डव ॥ ४७

दशेह कपिलाः प्रोक्तास् स्वयमेव स्वयम्भुवा ।
यो दद्याच्छ्रोत्रियेभ्यो वै स्वर्गं गच्छति तच्छृणु ॥ ४८

प्रथमा स्वर्णकपिला द्वितीया गौरपिङ्गला ।
तृतीया रक्तपिङ्गाक्षी चतुर्थी गलपिङ्गला ॥ ४९

पञ्चमी बभ्रुवर्णाभा षष्ठी च श्वेतपिङ्गला ।
सप्तमी रङ्गपिङ्गाक्षी त्वष्टमी खुरपिङ्गला ॥ ५०

नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ।

---

1. क-ख-ग—इदमर्धं नास्ति । तत्स्थाने, यस्त्वेकां कपिलां दद्यात् स तस्मात्तु विशिष्यते । [पाठान्तरम्]
2. अ—कपिलापञ्चगव्येन यस्त्रायात्तु शुचिर्नरः ।
स गङ्गादिषु तीर्थेषु स्नातो भवति भारत ॥ [अधिकः पाठः]

[1]दशैताः कपिलाः प्रोक्तास् तारयन्ति नरान् सदा ॥ ५१
मङ्गल्याश्च पवित्राश्च सर्वपापप्रणाशनाः ।
एवमेव ह्यनड्वाहो दश प्रोक्ता नरेश्वर ॥ ५२
ब्राह्मणो वाहयेत् तांस्तु नान्यो वर्णः कथञ्चन ।
[2]न वाहयेच्च कपिलां क्षेत्रे वाऽध्वनि वा द्विजः ॥ ५३
वाहयेद्धुङ्कृतेनैव शाखया वा सपत्रया ।
न दण्डेन न यष्ट्या वा न पाशेन च वा पुनः ॥ ५४
न क्षुत्तृष्णाश्रमश्रान्तान् वाहयेद्विकलेन्द्रियान् ।
सुतृप्तेषु तु भुञ्जीयात् पिबेत् पीतेषु चोदकम् ॥ ५५
शुश्रूषोर्मातरश्चैताः पितरस्ते प्रकीर्तिताः ।
अह्नां पूर्वं त्रिभागे तु धुर्याणां वाहनं स्मृतम् ॥ ५६
विश्रामेन्मध्यमे भागे भागे चान्ते यथासुखम् ॥ ५६॥
यत्र वा त्वरया कृत्यं संशयो यत्र चाध्वनि ।
वाहयेत् तत्र धुर्यांस्तु न स पापेन लिप्यते ॥ ५७॥
अन्यथा वाहयन् राजन् निरयं याति रौरवम् ॥ ५८
रुधिरं वाहयेत् तेषां यस्तु मोहान्नराधिप ।
भ्रूणहत्यासमं पापं तस्य स्यात् पाण्डुनन्दन ॥ ५९
तेन पापेन पापात्मा नरकं यात्यसंशयम् ॥ ५९॥

1. ख—अर्धचतुष्टयं नास्ति 2. क-ख-ग-च—न घातयेत्तु दण्डेन ।

नरकेषु च सर्वेषु समास्स्थित्वा शतं शतम् ।
इह मानुष्यके लोके बलीवर्दो भविष्यति ॥ ६०॥
तस्मात्तु मुक्तिमन्विच्छन् दद्यात्तु कपिलां नरः ॥ ६१

कपिलां वाहयेद्यस्तु वृषलो लोभमोहितः ।
तेन देवास्त्रयस्त्रिंशत् पितरश्चापि वाहिताः ॥ ६२

स देवैः पितृभिर्नित्यं वध्यमानस्सुदुर्मतिः ।
नरकान्नरकं घोरं गच्छेदाप्रलयं नृप ॥ ६३

ब्रह्मा रुद्रस्तथाऽग्निश्च कपिलानां गतिं गताः ।
तस्मात् ते तु न हन्तव्याः पूज्यास्ते तु विशेषतः ॥ ६४

निश्श्वसन्ति यदा श्रान्तास् तदा हन्युश्च तत् कुलम् ॥ ६४॥
यावन्ति तेषां रोमाणि तावद्वर्षशतं नृप ।
नरके परिपच्यन्ते तत्र तद्वाहका नराः ॥ ६५॥

कपिला सर्वयज्ञेषु दक्षिणार्थं विधीयते ।
तस्मात्तद्दक्षिणा देया यज्ञेष्वेव द्विजातिभिः ॥ ६६॥

होमार्थं चाग्निहोत्रस्य यां प्रयच्छेत् प्रयत्नतः ।
श्रोत्रियाय दरिद्राय श्रान्ताय च यतात्मने ॥ ६७॥
तेन दानेन पूतात्मा सोऽग्निलोके महीयते ॥ ६८

यावन्ति चैव रोमाणि कपिलायां नरेश्वर ।

तावद्वर्षसहस्राणि नरस्स्वर्गे महीयते ॥ ६९
सुवर्णखुरशृङ्गीं च कपिलां यः प्रयच्छति ।
विषुवे चायने चापि सोऽश्वमेधफलं लभेत् ॥ ७०
तेनाश्वमेधतुल्येन मम लोकं स गच्छति ॥ ७०॥
स्वर्णशृङ्गीं रूप्यखुरां सवत्सां कांस्यदोहनाम् ।
वस्त्रैरलङ्कृतां पुष्टां गन्धैर्माल्यैश्च शोभिताम् ॥ ७१॥
पवित्रं हि पवित्राणां सुवर्णमिति मे मतिः ।
तस्मात् सुवर्णाभरणा दातव्या चाग्निहोत्रिणे ॥ ७२॥
एवं दत्त्वा तु राजेन्द्र सप्त पूर्वान् परानपि ।
तारयिष्यति राजेन्द्र नात्र कार्या विचारणा ॥ ७३॥
अग्निष्टोमसहस्रस्य वाजपेयं च तत्समम् ।
वाजपेयसहस्रस्य अश्वमेधं च तत्समम् ॥ ७४॥
अश्वमेधसहस्रस्य राजसूयं च तत्समम् ॥ ७५
[1]कपिलानां सहस्रेण विधिदत्तेन पाण्डव ।
राजसूयफलं प्राप्य मम लोके महीयते ॥ ७६
न तस्य पुनरावृत्तिर् विद्यते कुरुपुङ्गव ॥ ७६॥

[2]प्रयच्छते यः कपिलां सचेलां
सकांस्यदोहां कनकाग्र्यशृङ्गीम् ।

1. च—इदमर्धं नास्ति
2. अ-ब—प्रयच्छते यः कपिलां सचेलां कांस्यदोहनाम् ।[ पाठान्तरम् ]

तैस्तैर्गुणैः कामदुघा हि भूत्वा
नरं प्रदातारमुपैति सा गौः ॥ ७७॥

स्वकर्मभिश्चाप्यनुबध्यमानं
तीव्रान्धकारे नरके पतन्तम् ।
महार्णवे नौरिव वायुनीता
दत्ता हि गौस्तारयते मनुष्यम् ॥ ७८॥

पुत्रांश्च पौत्रांश्च कुलं च सर्वम्
आसप्तमं तारयते परत्र ।
यावन्मनुष्यान् पृथिवी बिभर्ति
तावत् प्रदातारमितोऽपरत्र ॥ ७९॥

यथौषधं मन्त्रकृतं नरस्य
प्रयुक्तमात्रं विनिहन्ति रोगान् ।
तथैव दत्ता कपिला सुपात्रे
पापं नरस्याशु निहन्ति सर्वम् ॥ ८०॥

यथैव दृष्ट्वा भुजगास्सुपर्णं
नश्यन्ति दूराद्विवशा भयार्ताः ।
तथैव दृष्ट्वा कपिलाप्रदानं
नश्यन्ति पापानि नरस्य शीघ्रम् ॥ ८१॥

यथा त्वचं स्वां भुजगो विहाय
पुनर्नवं रूपमुपैति पुण्यम् ।
तथैव मुक्तः पुरुषस्त्वपापैर्
विराजते वै कपिलाप्रदानात् ॥ ८२॥

यथाऽन्धकारं नयनेषु लग्नं
दीप्तो हि निर्यातयति प्रदीपः ।
तथा नरे पापमतिप्रलीनं
निर्यातयेद्वै कपिलाप्रदानम् ॥ ८३॥

यावन्ति रोमाणि भवन्ति तस्या
वत्सान्वितायाश्च शरीरजानि ।
तावत् प्रदाता युगवर्षकोटिं
स ब्रह्मलोके रमते मनुष्यः ॥ ८४॥

यस्याहिताग्नेरतिथिप्रियस्य
शूद्रान्नदूरस्य जितेन्द्रियस्य ।
सत्यव्रतस्याध्ययनान्वितस्य
दत्ता हि गौस्तारयते परत्र ॥ ८५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि दशाधिकशततमोऽध्यायः ॥ ११० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

[ अस्मिन्नध्याये ८५॥ श्लोकाः ]

## ॥ एकादशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति कपिलादानप्रशंसनम् ॥ १ ॥ ब्रह्मणाऽग्निकुण्डमध्यात् कपिलासर्जनम् ॥२॥ तदा रुद्रादिदेवैः कपिलायै सर्वपूज्यत्वादिरूपवरदानम् ॥ ३ ॥ देवर्ष्यादिभिः स्वनिवासाय कपिलावयवसमाश्रयणम् ॥४॥ कृष्णेन हव्यकव्यदानकालकथनम् ॥५॥ तथा श्राद्धार्हानर्हब्राह्मणविवेचनम् ॥६॥ तथा स्वर्गनरकप्रापकसुकृतदुष्कृतकथनम् ॥ ७ ॥

वैशम्पायनः—

एवं श्रुत्वा परं पुण्यं कपिलादानमुत्तमम् ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥ १

युधिष्ठिरः—

देवदेवेश कपिला यदा विप्राय दीयते ।
कथं सर्वेषु चाङ्गेषु तस्यास्तिष्ठन्ति देवताः ॥ २
याश्चैताः कपिलाः प्रोक्ता दश चैव त्वया मम।
तासां कति सुरश्रेष्ठ कपिलाः पुण्यलक्षणाः ॥ ३
[1]कथं वाऽनुगृहीतास्तास् सुरैः पितृगणैरपि ।
केन युक्ताश्च वर्णेन श्रोतुं कौतूहलं हि मे ॥ ४

वैशम्पायनः—

युधिष्ठिरेणैवमुक्तः केशवस्सत्यवाक् तदा ।
गुह्यानां परमं गुह्यं वक्तुमेवोपचक्रमे ॥ ५

1. अ—इदमर्धं नास्ति

श्रीभगवान्—

शृणु राजन् पवित्रं वै रहस्यं धर्ममुत्तमम् ।
ग्रहणीयं सत्यमिदं न श्राव्यं हेतुवादिना ॥ ६

यदा वत्सस्य पादौ द्वौ प्रसवे शिरसा सह ।
दृश्येते दानकालं तम् आहुः कालविदो जनाः ॥ ७

अन्तरिक्षगतो वत्सो यावद्भूमिं न यास्यति ।
गौस्तावत् पृथिवी ज्ञेया तस्माद्देया तु तादृशी ॥ ८

यावन्ति धेनो रोमाणि सवत्साया युधिष्ठिर ।
यावन्त्यस्सिकताश्चापि गर्भोदकपरिप्लुताः ॥ ९

तावद्वर्षसहस्राणि दाता स्वर्गे महीयते ॥ ९॥

सुवर्णाभरणां कृत्वा सवत्सां कपिलां तिलैः ।
प्रच्छाद्य तां तु दद्याद्वै सर्वरत्नैरलङ्कृताम् ॥ १०॥

ससमुद्रनदी तेन सशैलवनकानना ।
चतुरन्ता भवेद्दत्ता नात्र कार्या विचारणा ॥ ११॥

पृथिवीदानतुल्येन तेन दानेन मानवः ।
संसारसागरात् तीर्णो याति लोकं प्रजापतेः ॥ १२॥

ब्रह्महा यदि वा गोघ्नो भ्रूणहा गुरुतल्पगः ।
महापातकयुक्तोऽपि दानेनानेन शुद्ध्यति ॥ १३॥

इदं पठति यः पुण्यं कपिलादानमुत्तमम् ।

प्रातरुत्थाय मद्भक्त्या तस्य पुण्यफलं शृणु ॥ १४॥

मनसा कर्मणा वाचा मतिपूर्वं [1]युधिष्ठिर ।
[2]पापं रात्रिकृतं हन्याद् अस्याध्यायस्य पाठकः ॥ १५॥

इदमावर्तमानस्तु श्राद्धे यस्तर्पयेद्द्विजान् ।
तस्याप्यमृतमश्नन्ति पितरोऽत्यन्तहर्षिताः ॥ १६॥

यश्चेदं शृणुयाद्भक्त्या मद्गतेनान्तरात्मना ।
तस्य रात्रिकृतं सर्वं पापमाशु प्रणश्यति ॥ १७॥

अतः परं विशेषं तु कपिलानां ब्रवीमि ते ॥ १८

याश्चैताः कपिलाः प्रोक्ता दश राजन् मया तव ।
तासां चतस्रः प्रवराः पवित्राः पापनाशनाः ॥ १९

[3]सुवर्णकपिला पुण्या तथा रक्ताक्षिपिङ्गला ।
पिङ्गलाक्षी च या गौश्च या स्यात् पिङ्गलपिङ्गला ॥ २०

एताश्चतस्रः प्रवराः पवित्राः पापनाशनाः ।
नमस्कृता वा स्पृष्टा वा घ्नन्ति पापं नरस्य तु ॥ २१

यस्यैताः कपिलास्सन्ति गृहे पापप्रणाशनाः ।
तत्र श्रीर्विजयः कीर्तिस् स्थिरा नित्यं युधिष्ठिर ॥ २२

एतासां प्रीतिमायाति क्षीरेण तु वृषध्वजः ।

---

1. अ—प्रणश्यति
2. अ—अर्धपञ्चकं नास्ति
3. ख—अर्धत्रयं नास्ति

दत्ता च त्रिदशास्सर्वे घृतेन च हुताशनः ॥ २३
पितरः पितामहाश्चैव तथैव प्रपितामहाः ।
सकृद्दत्तेन तुष्यन्ति वर्षकोटिं युधिष्ठिर ॥ २४
कपिलानां घृतं क्षीरं दधि पायसमेव वा ।
श्रोत्रियेभ्यस्सकृद्दत्त्वा नरः पापैः प्रमुच्यते ॥ २५
उपवासं तु यः कृत्वाऽप्यहोरात्रं जितेन्द्रियः ।
कपिलापञ्चगव्यं तु पीत्वा चान्द्रायणात् परम् ॥ २६
सौम्ये मुहूर्ते तत् प्राश्य शुद्धात्मा शुद्धमानसः ।
क्रोधानृतविनिर्मुक्तो मद्गतेनान्तरात्मना ॥ २७
कपिलापञ्चगव्येन समन्त्रेण पृथक् पृथक् ।
यो मत्प्रतिकृतिं वाऽपि शङ्कराकृतिमेव वा ॥ २८
स्नापयेद्विधुवे यस्तु सोऽश्वमेधफलं लभेत् ॥ २८॥
स मुक्तपापः पूतात्मा यानेनाम्बरशोभिना ।
मम लोकं व्रजेन्मुक्तो रुद्रलोकमथापि वा ॥ २९॥
ब्रह्मणा तु पुरा सृष्टा कपिला काञ्चनप्रभा ।
अग्निकुण्डात् परैर्मन्त्रैर् होमधेनुर्महाप्रभा ॥ ३०॥
सृष्टमात्रां तु तां दृष्ट्वा देवा रुद्रादयो दिवि ।
सिद्धा ब्रह्मर्षयश्चैव वेदास्साङ्गास्सहाध्वराः ॥ ३१॥
सागरास्सरितश्चैव पर्वतास्सबलाहकाः ।

गन्धर्वाप्सरसो यक्षाः पन्नगाश्चाप्युपस्थिताः ॥ ३२॥
सर्वे विस्मयमापन्नाश् शिखिमध्ये महाप्रभाम् ।
मन्त्रैश्च विविधैस्सर्वास् तुष्टुवुस्तामनेकशः ॥ ३३॥
कृताञ्जलिपुटास्सर्वे ताम्रशृङ्गीं त्रिलोचनाम् ।
शिरोभिः पतिता भूमौ सवत्साममृतारणिम् ॥ ३४॥
ऊचुः प्राञ्जलयस्सर्वे चतुर्वक्त्रं पितामहम् ॥ ३५

देवताः—

आज्ञापय महादेव किं ते कर्म प्रियं विभो ॥ ३५॥

श्रीभगवान्—

एवमुक्तस्सुरैस्सर्वैर् ब्रह्मा वचनमब्रवीत् ॥ ३६

ब्रह्मा—

भवन्तोऽप्यनुगृह्णन्तु दोग्ध्रीमेनां पयस्विनीम् ॥ ३६॥
होमधेनुरियं यज्ञे ह्यग्नीन् सन्तर्पयिष्यति ।
अतोऽग्निस्तर्पितस्सर्वान् भवतस्तर्पयिष्यति ॥ ३७॥
प्रीताः क्षीरामृतेनास्या जातवीर्यपराक्रमाः ।
जयिष्यथ यथाकामं दानवान् सर्व एव तु ॥ ३८॥
जातवीर्यबलैश्वर्यास् सत्त्ववन्तो जितारयः ।
अदेवमातृकास्सर्वाः पालयिष्यथ वै प्रजाः ॥ ३९॥
पालिताश्च प्रजास्सर्वा भवद्भिरिह धर्मतः ।

पूजयिष्यन्ति वो नित्यं यज्ञैर्विविधदक्षिणैः ॥ ४०॥

श्रीभगवान्—

एवमुक्तास्सुरास्सर्वे ब्रह्मणा परमेष्ठिना ।
ततस्संहृष्टमनसः कपिलायै वरं ददुः ॥ ४१॥

देवताः—

यस्माल्लोकहितायाद्य ब्रह्मणा त्वं विनिर्मिता ।
तस्मात् पूता पवित्रा च भव पापव्यपोहनी ॥ ४२॥

ये त्वां दृष्ट्वा नमस्यन्ति स्पृशन्ति च करैर्नराः ।
तेषां वर्षकृतं पापं त्वद्भक्तानां प्रणश्यति ॥ ४३॥

अकामकृतमज्ञातम् अदृष्टं यत्तु पातकम् ।
त्वां दृष्ट्वा ये नमस्यन्ति नरास्सर्वंसहेति च ॥ ४४॥

तेषां तद्विलयं याति तमस्सूर्योदये यथा ॥ ४५

श्रीभगवान्—

इत्युक्त्वाऽस्यै वरं दत्त्वा प्रययुस्ते यथागतम् ।
लोक[1]निस्तरणार्थाय सा च लोकांश्चचार ह ॥ ४६

तस्यामेव समुद्भूताश् शेषाश्च कपिला नव ।
विचरन्ति महीमेनां लोकानुग्रहकारणात् ॥ ४७

तस्मात्तु कपिला देया परत्र हितमिच्छता ॥ ४७॥

1. क-ख-ग—निस्तारणार्थाय निर्मिता ब्रह्मणा पुरा ।

यदा च दीयते राजन् कपिला ह्यग्निहोत्रिणे ।
तदाऽग्रशृङ्गयोस्तस्या विष्णुरिन्द्रश्च तिष्ठतः ॥ ४८॥
चन्द्रवज्रधरौ चापि तिष्ठतश्शृङ्गमूलयोः ।
शृङ्गमध्ये तथा ब्रह्मा ललाटे गोवृषध्वजः ॥ ४९॥
कर्णयोराश्विनौ देवौ चक्षुषोश्शशिभास्करौ ।
दन्तेषु मरुतो देवा जिह्वायां च सरस्वती ॥ ५०॥
रोमान्ते मुनयस्सर्वे चर्मण्येव प्रजापतिः ।
निश्श्वासेषु स्थिता वेदास् सषडङ्गपदक्रमाः ॥ ५१॥
नासापुटे स्थिता गन्धाः पुष्पाणि सुरभीणि च ।
अधरे वसवस्सर्वे मुखे चाग्निः प्रतिष्ठितः ॥ ५२॥
साध्या देवास्थिताः कक्षे ग्रीवायां पार्वती स्थिता ।
पृष्ठे च नक्षत्रगणाः ककुदेशे नभस्स्थितम् ॥ ५३॥
अपाने सर्वतीर्थानि गोमूत्रे जाह्नवी स्वयम् ।
[1]अष्टैश्वर्यमयी लक्ष्मीर् गोमये वसते तदा ॥ ५४॥
नासिकायां सदा देवी ज्येष्ठा वसति भामिनी ।
श्रोणीतटस्थाः पितरो रोमलाङ्गूलमाश्रिताः ॥ ५५॥
पार्श्वयोरुभयोस्सर्वे विश्वे देवाः प्रतिष्ठिताः ।
तिष्ठत्युरसि तासां तु प्रीतश्शक्तिधरो गुहः ॥ ५६॥
जानुजङ्घोरुदेशेषु पञ्च तिष्ठन्ति वायवः ।

1. अ-क-ख-ग-घ—इष्टतुष्टमयी

खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः ॥ ५७॥
चत्वारस्सागराः पूर्णास् तस्या एव पयोधराः ।
रतिर्मेधा क्षमा स्वाहा श्रद्धा शान्तिर्धृतिस्स्मृतिः ॥ ५८॥
कीर्तिर्दीप्तिः क्रिया कान्तिस् तुष्टिः पुष्टिश्च सन्ततिः ।
दिशश्च विदिशश्चैव सेवन्ते कपिलां सदा ॥ ५९॥
[1]देवाः पितृगणाश्चापि गन्धर्वाप्सरसां गणाः ।
लोका द्वीपार्णवाश्चैव गङ्गाद्यास्सरितस्तथा ॥ ६०॥
[2]ग्रहाः पितृगणाश्चापि वेदास्साङ्गास्सहाध्वरैः ।
वेदोक्तैर्विविधैर्मन्त्रैस् स्तुवन्ति हृषितास्तथा ॥ ६१॥
[3]विद्याधराश्च ये सिद्धा भूतास्तारागणास्तथा ।
पुष्पवृष्टिं च वर्षन्ति प्रनृत्यन्ति च हर्षिताः ॥ ६२॥
ब्रह्मणोत्पादिता देवी वह्निकुण्डान्महाप्रभो ॥ ६३
देवाः—
नमस्ते कपिले पुण्ये सर्वदेवैर्नमस्कृते ॥ ६३॥
कपिलेऽथ महासत्वे सर्वतीर्थमये शुभे ।
दातारं स्वजनोपेतं ब्रह्मलोकं नय स्वयम् ॥ ६४॥
*अहो रत्नमिदं पुण्यं सर्वदुःखघ्नमुत्तमम् ।*

---

1. च—विद्याधराश्च ये सिद्धा येऽपि स्वर्लोकवासिनः ।
देवाः पितृगणाश्चापि सेवन्ते कपिलां सदा ॥ [ अधिकः पाठः ]
2. अ—अर्धत्रयं नास्ति च—इदमेकमर्धं नास्ति
3. ग—इदमर्धं नास्ति

खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः ॥ ५७॥
चत्वारस्सागराः पूर्णास् तस्या एव पयोधराः ।
रतिर्मेधा क्षमा स्वाहा श्रद्धा शान्तिर्धृतिस्स्मृतिः ॥ ५८॥
कीर्तिर्दीप्तिः क्रिया कान्तिस् तुष्टिः पुष्टिश्च सन्ततिः ।
दिशश्च विदिशश्चैव सेवन्ते कपिलां सदा ॥ ५९॥
[1]देवाः पितृगणाश्चापि गन्धर्वाप्सरसां गणाः ।
लोका द्वीपार्णवाश्चैव गङ्गाद्यास्सरितस्तथा ॥ ६०॥
[2]ग्रहाः पितृगणाश्चापि वेदास्साङ्गास्सहाध्वरैः ।
वेदोक्तैर्विविधैर्मन्त्रैस् स्तुवन्ति हृषितास्तथा ॥ ६१॥
[3]विद्याधराश्च ये सिद्धा भूतास्तारागणास्तथा ।
पुष्पवृष्टिं च वर्षन्ति प्रनृत्यन्ति च हर्षिताः ॥ ६२॥
ब्रह्मणोत्पादिता देवी वह्निकुण्डान्महाप्रभो ॥ ६३
देवाः—
नमस्ते कपिले पुण्ये सर्वदेवैर्नमस्कृते ॥ ६३॥
कपिलेऽथ महासत्वे सर्वतीर्थमये शुभे ।
दातारं स्वजनोपेतं ब्रह्मलोकं नय स्वयम् ॥ ६४॥
अहो रत्नमिदं पुण्यं सर्वदुःखघ्नमुत्तमम् ।

---

1. च—विद्याधराश्च ये सिद्धा येऽपि स्वर्लोकवासिनः ।
देवाः पितृगणाश्चापि सेवन्ते कपिलां सदा ॥ [ अधिकः पाठः ]
2. अ—अर्धत्रयं नास्ति च—इदमेकमर्धं नास्ति
3. ग—इदमर्धं नास्ति

अहो धर्मार्जितं शुद्धम् इदमग्र्यं महद् धनम् ॥ ६५॥

श्रीभगवान्—

इत्याकाशस्थितास्ते तु जल्पन्ति च रमन्ति च ॥ ६६

तस्याः प्रतिग्रहीता च भुक्ते यावद्द्विजोत्तमः ।
तावद्देवगणास्सर्वे कपिलामर्चयन्ति वै ॥ ६७

स्वर्णशृङ्गीं रूप्यखुरां गन्धैः पुष्पैस्सुपूजिताम् ॥ ६७॥

वस्त्राभ्यामहताभ्यां तु यावत् तिष्ठत्यलङ्कृता ।
[1]तावद्यदिच्छेत् कपिला मन्त्रपूता सुसंस्कृता ॥ ६८॥

भूलोकवासिनस्सर्वान् ब्रह्मलोकं नयेत् स्वयम् ॥ ६९

भूरग्र्यः कनकं गावो रूप्यमन्नं तिला यवाः ।
दीयमानानि विप्राय प्रहृष्यन्ति दिने दिने ॥ ७०

अथ त्वश्रोत्रियेभ्यो वै तानि दत्तानि पाण्डव ।
तथा निन्दन्त्यथात्मानम् अशुभं किं नु नः कृतम् ॥ ७१

अहो रक्षःपिशाचैश्च लुप्यमानास्समन्ततः ।
यास्यामो निरयं शीघ्रम् इति शोचन्ति तानि वै ॥ ७२

एतान्यपि द्विजेभ्यो वै श्रोत्रियेभ्यो विशेषतः ।
दीयमानानि हृष्यन्ति दातारं तारयन्ति च ॥ ७३

युधिष्ठिरः—

देवदेवेश दैत्यघ्न कालः को हव्यकव्ययोः ।

---

1. ख—इदमर्धं नास्ति

के तत्र पूजामर्हन्ति वर्जनीयाश्च के द्विजाः ॥ ७४

श्रीभगवान्—

दैवं पूर्वाह्णिकं ज्ञेयं पैतृकं चापराह्णिकम् ।
कालहीनं च यद्दानं तद्दानं राजसं विदुः ॥ ७५

[1]अवदृष्टं च यद्भुक्तम् अनृतेन च भारत ।
परामृष्टं शुना वाऽपि तद्भागं राक्षसं विदुः ॥ ७६

यावन्तः पतिता विप्रा जडोन्मत्तादयोऽपि च ।
दैवे च पित्र्ये ते विप्रा राजन् नार्हन्ति सत्क्रियाम् ॥ ७७

[2]क्लीबः प्लीही च कुष्ठी च राजयक्ष्मान्वितश्च यः ।
अपस्मारी च यश्चापि पित्र्ये नार्हति सत्क्रियाम् ॥ ७८

[3]चिकित्सका देवलका वृथा नियमधारिणः ।
सोमविक्रयिणश्चापि श्राद्धे नार्हन्ति सत्कृतिम् ॥ ७९

[4]एकोद्दिष्टे च ये चान्नं भुञ्जते विधिवद्द्विजाः ।
[5]चान्द्रायणमकृत्वा ते पुनर्नार्हन्ति सत्कृतिम् ॥ ८०

गायका नर्तकाश्चैव प्लवका वादकास्तथा ।
कथका यौधिकाश्चैव श्राद्धे नार्हन्ति सत्क्रियाम् ॥ ८१

अनग्नयश्च ये विप्राः प्रेतनिर्यातकाश्च ये ।

---

1. क-ख-च—अवघुष्टं । ग—अवसृष्टं ।
2. ग—अर्धद्वयं नास्ति
3. घ—इतः श्लोकषट्कं नास्ति
4. अ—अर्धद्वयं नास्ति ।
5. च—इदमर्धं नास्ति

स्तेनाश्चापि विकर्मस्था राजन् नार्हन्ति सत्कृतिम् ॥ ८२
[1]अपरिज्ञातपूर्वाश्च गणपुत्रश्च यो द्विजः ।
पुत्रिकापुत्रकाश्चापि श्राद्धे नार्हन्ति सत्क्रियाम् ॥ ८३
[2]रणकर्ता च यो विप्रो यश्च वाणिज्यको द्विजः ।
प्राणिविक्रयवृत्तिश्च श्राद्धे नार्हन्ति सत्कृतिम् ॥ ८४
चीर्णव्रतगुणैर्युक्ता नित्यं स्वाध्यायतत्पराः ।
सावित्रीज्ञाः क्रियावन्तस् ते श्राद्धे सत्कृतिक्षमाः ॥ ८५
श्राद्धस्य ब्राह्मणः कालप्राप्तो दधि घृतं तथा ।
दर्भास्सुमनसः क्षेत्रं तत्काले श्राद्धदो भवेत् ॥ ८६
चारित्रनियता राजन् कृशा ये कृशवृत्तयः ।
अर्थिनश्चोपगच्छन्ति तेभ्यो दत्तं महत् फलम् ॥ ८७
[3]तपस्विनश्च ये विप्रास् तथा भैक्षचराश्च ये ।
अर्थिनः केचिदिच्छन्ति तेषां दत्तं महत् फलम् ॥ ८८
एवं धर्मविदां श्रेष्ठ ज्ञात्वा सर्वात्मना तदा ।
श्रोत्रियाय दरिद्राय प्रयच्छानुपकारिणे ॥ ८९
दानं यत् ते प्रियं किञ्चिच् छ्रोत्रियाणां च यत् प्रियम् ।
तत् प्रयच्छस्व धर्मज्ञ यदीच्छसि [4]तदक्षयम् ॥ ९०

1. क-ख—अर्धचतुष्टयं नास्ति
2. अ-क-ख-घ—अर्धद्वयं नास्ति 3. अ—अर्धद्वयं नास्ति
4. क-ख-ग-घ—महत् फलम् ।

निरयं ये च गच्छन्ति तच्छृणुष्व युधिष्ठिर ॥ ९०॥
गुर्वर्थं वा गवार्थं वा नो चेदन्यत्र पाण्डव ।
वदन्ति येऽनृतं विप्रास् ते वै निरयगामिनः ॥ ९१॥
[1]परदारापहर्तारः परदाराभिमर्शकाः ।
परदारप्रयोक्तारस् ते वै निरयगामिनः ॥ ९२॥
सूचकास्सन्धिभेत्तारः परद्रव्योपजीविनः ।
अकृतज्ञाश्च विप्राणां ते वै निरयगामिनः ॥ ९३॥
वर्णाश्रमाणां ये बाह्याः पाषण्डस्थाश्च पाण्डव ।
उपासते च तानेव ते सर्वे निरयालयाः ॥ ९४॥
वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ।
[2]वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥ ९५॥
रसविक्रयिणो राजन् विषविक्रयिणश्च ये ।
क्षीरविक्रयिणश्चापि ते वै निरयगामिनः ॥ ९६॥
चण्डालेभ्यश्च ये क्षीरं प्रयच्छन्ति नराधमाः ।
अर्थार्थमथवा स्नेहात् ते वै निरयगामिनः ॥ ९७॥
पशूनां दमकाश्चैव तथा नासानुवेधकाः ।
पुंस्त्वहिंसाकराश्चैव ते वै निरयगामिनः ॥ ९८॥
अदातारस्समर्था ये द्रव्याणां लोभकारणात् ।

1. च—इदमादि अर्धद्वयं नास्ति 2. क—वेदावलेपिनश्चापि ।

दीनानन्धान् न पश्यन्ति ते वै निरयगामिनः ॥ ९९॥

क्षान्तान् दान्तान् कृशान् प्राज्ञान् दीर्घकालसहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिनः ॥ १००॥

बालानामपि वृद्धानां श्रान्तानां चापि ये नराः ।
अदत्त्वाऽश्नन्ति ये मृष्टं ते वै निरयगामिनः ॥ १०१॥

एते पूर्वर्षिभिः प्रोक्ता नरा निरयगामिनः ॥ १०२

[1]ये स्वर्गं समनुप्राप्तास् ताञ् छृणुष्व युधिष्ठिर ॥ १०२॥

दानेन तपसा चैव सत्येन च दमेन च ।
ये धर्ममनुवर्तन्ते ते नरास्स्वर्गगामिनः ॥ १०३॥

शुश्रूषयाऽप्युपाध्यायाच् छ्रुतमादाय पाण्डव ।
ये प्रतिग्रहनिस्स्नेहास् ते नरास्स्वर्गगामिनः ॥ १०४॥

मधुमांसासवेभ्यस्तु निवृत्ता वृत्तवत्तु ये ।
परदारनिवृत्ताश्च ते नरास्स्वर्गगामिनः ॥ १०५॥

मातरं पितरं चैव शुश्रूषन्ति च ये नराः ।
भ्रातृणामपि सस्नेहास् ते नरास्स्वर्गगामिनः ॥ १०६॥

ये तु भोजनकाले तु निर्यांताश्चातिथिप्रियाः ।
द्वाररोधं न कुर्वन्ति ते नरास्स्वर्गगामिनः ॥ १०७॥

---

1. क-ख-घ—इतः सार्धं श्लोकद्वयं नास्ति

वैवाहिकं तु कन्यानां दरिद्राणां च ये नराः ।
कारयन्ति च कुर्वन्ति ते नरास्स्वर्गगामिनः ॥ १०८॥

रसानामथ बीजानाम् ओषधीनां तथैव च ।
दातारश्श्रद्धयोपेतास् ते नरास्स्वर्गगामिनः ॥ १०९॥

क्षेमाक्षेमं च मार्गेषु समानि विषमाणि च ।
अर्थिनां ये च वक्ष्यन्ति ते नरास्स्वर्गगामिनः ॥ ११०॥

[1]पर्वद्वये चतुर्दश्याम् अष्टम्यां सन्ध्ययोर्द्वयोः ।
आर्द्रायां जन्मनक्षत्रे विषुवे श्रवणेऽथवा ॥ १११॥

ये ग्राम्यधर्मैर्विरतास् ते नरास्स्वर्गगामिनः ॥ ११२

हव्यकव्यविधानं च नरकस्वर्गगामिनौ ।
धर्माधर्मौ च कथितौ किं भूयश्श्रोतुमिच्छसि ॥ ११३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकादशाधिकशततमोऽध्यायः ॥ १११ ॥
॥ ९२ ॥ अनुगीतापर्वणि पञ्चनवतितमोऽध्यायः ॥ ९५ ॥
[ अस्मिन्नध्याये ११३ श्लोकाः ]

---

1. क—अर्धचतुष्टयं नास्ति

## ॥ द्वादशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति साक्षाद्ब्रह्महत्याया अकरणेऽपि तत्तुल्यफलक-दुष्कृतकथनम् ॥ १ ॥ तथा अभोज्यान्नानां पापिनां लक्षणकथनम् ॥ २ ॥

युधिष्ठिरः—

इदं मे तत्त्वतो देव वक्तुमर्हस्यशेषतः ।
हिंसामकृत्वा यो मर्त्यो ब्रह्महत्यामवाप्नुयात् ॥ १

श्रीभगवान्—

ब्राह्मणं स्वयमाहूय भिक्षार्थं कृशवृत्तिनम् ।
ब्रूयान्नास्तीति यः पश्चात् तमाहुर्ब्रह्मघातकम् ॥ २

मध्यस्थस्येह विप्रस्य योऽनूचानस्य भारत ।
वृत्तिं हरति दुर्बुद्धिस् तमाहुर्ब्रह्मघातकम् ॥ ३

गोकुलस्य तृषार्तस्य जलान्ते वसुधाधिप ।
उत्पादयति यो विघ्नं तमाहुर्ब्रह्मघातकम् ॥ ४

[1]यः प्रवृत्तां श्रुतिं सम्यक् छास्त्रं वा मुनिभिः कृतम् ।
दूषयत्यनभिज्ञाय तमाहुर्ब्रह्मघातकम् ॥ ५

आश्रमे वा वने वाऽपि ग्रामे वा नगरेऽपि वा ।
अग्निं यः प्रक्षिपेत् क्रुद्धस् तमाहुर्ब्रह्मघातकम् ॥ ६

1. क-ख-घ—इतः श्लोकद्वयं नास्ति

चक्षुषा वा विहीनस्य पङ्गोर्वाऽपि जडस्य वा ।
हरेद्वै यस्तु सर्वस्वं तमाहुर्ब्रह्मघातकम् ॥ ७

क्रोधाद्वा यदि वा द्वेषाद् आकृष्टस्तर्जितोऽपि वा ।
ऋतौ स्त्रियं वा नोपेयात् तमाहुर्ब्रह्मघातकम् ॥ ८

यावत्सारो भवेद्दीनस् तन्नाशे यस्य दुस्थितिः ।
तत्सर्वस्वं हरेद्यो वै तमाहुर्ब्रह्मघातकम् ॥ ९

युधिष्ठिरः—

सर्वेषामपि दानानां यत्तु दानं विशिष्यते ।
अभोज्यान्नाश्च ये विप्रास् तान् ब्रवीहि सुरोत्तम ॥ १०

श्रीभगवान्—

अन्नमेव प्रशंसन्ति देवा ब्रह्मपुरस्कराः ।
अन्नेन सदृशं दानं न भूतं न भविष्यति ॥ ११

अन्नमूर्जस्करं लोके अन्नात् प्राणाः प्रतिष्ठिताः ॥ ११॥

अभोज्यान्नान् मया राजन् वक्ष्यमाणान् निबोध मे ॥ १२

दीक्षितस्य कदर्यस्य बद्धस्य निगडेन तु ।
अभिशस्तस्य षण्डस्य पाकभेदकरस्य च ॥ १३

चिकित्सकस्य दूतस्य तथा चोच्छिष्टभोजिनः ॥ १३॥

उग्रान्नं सूतकान्नं च शूद्रोच्छेषणमेव च ।
[1]द्विषदन्नं न भोक्तव्यं पतितान्नं च यच्छ्रुतम् ॥ १४॥

1. अ-ब—अर्धसयं नास्ति

तथा च पिशुनस्यान्नं यज्ञविक्रयिणस्तथा ॥ १५
शैलूषतन्तुवायान्नं कृतघ्नस्यान्नमेव च ॥ १५॥
अम्बष्ठस्य निषादस्य रङ्गावतरकस्य च ॥ १६
सुवर्णकर्तुर्वैणस्य शस्त्रविक्रयिणस्तथा ।
सूतानां शौण्डिकानां च वैद्यस्य रजकस्य च ॥ १७
स्त्रीजितस्य नृशंसस्य तथा माहिषकस्य च ।
अनिर्देशानां प्रेतानां गणिकानां तथैव च ॥ १८
बन्दिनो द्यूतकर्तुश्च तथा द्यूतविदामपि ।
परिवित्तस्य यच्चान्नं परिवेत्तुस्तथैव च ॥ १९
यश्चाग्रेदिधिषुर्विप्रो दिधिषूपपतिस्तथा ।
तयोरप्युभयोरन्नं राज्ञां चापि विवर्जयेत् ॥ २०
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुस्सुवर्णकारान्नं यशश्चर्मावकृन्तिनः ॥ २१
गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ।
पूयं चिकित्सकस्यान्नं शुक्रं तु वृषलीपतेः ॥ २२
विष्ठा वार्धुषिकस्यान्नं तस्मात् तत् परिवर्जयेत् ॥ २२॥
तेषां त्वगस्थिरोमाणि भुङ्क्ते योऽन्नं तु भक्षयेत् ॥ २३
अमात्यान्नमथैतेषां भुक्त्वा तु त्रियहं क्षिपेत् ।
मत्या भुक्त्वा सकृद्वाऽपि प्राजापत्यं चरेद्द्विजः ॥ २४

दानानां च फलं यद्वै शृणु पाण्डव तत्त्वतः ॥ २४॥
जलदस्तृप्तिमाप्नोति सुखमक्षयमन्नदः ॥ २५
[1]तिलदस्तु प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।
भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः ॥ २६
गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ।
वासोदश्चन्द्रसालोक्यम् अश्विसालोक्यमश्वदः ॥ २७
अनड्वद्दश्रियं जुष्टां गोदो गोलोकमश्नुते ।
यानशय्याप्रदो भार्याम् ऐश्वर्यमभयप्रदः ॥ २८
[2]धान्यदश्शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसाम्यताम् ।
सर्वेषामेव दानानां ब्रह्मदानं विशिष्यते ॥ २९
हिरण्यभूगवाश्वाजवस्त्रशय्यासनादिषु ।
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव च ॥ ३०
तावुभौ गच्छतस्स्वर्गं नरकं तु विपर्यये ॥ ३०॥
अनृतं न वदेद्विद्वांस् तपस्तप्त्वा न विस्मयेत् ।
नार्तोऽप्यपवदेद्विप्रान् न दत्त्वा परिकीर्तयेत् ॥ ३१॥
यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ।

---

1. च—अर्धचतुष्टयं नास्ति
2. च—अर्धद्वयं नास्ति किंतु तत्स्थाने ।
तिलदस्तु प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ।
वासोदश्चन्द्रसालोक्यमश्वदस्सूर्यलोकगः ॥ [इति वर्तते]

आयुर्विप्रापवादेन दानं तु परिकीर्तनात् ॥ ३२॥

एकः प्रजायते जन्तुर् एक एव प्रमीयते ।
एकोऽनुभुङ्क्ते सुकृतम् एकश्चाप्नोति दुष्कृतम् ॥ ३३॥

मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥ ३४॥

अनागतानि कार्याणि कर्तुं गणयते मनः ।
शरीरकं समुद्वीक्ष्य स्मयते नूनमन्तकः ॥ ३५॥

तस्माद्धर्मसहायस्तु धर्मं सञ्चिनुयात् सदा ।
धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥ ३६॥

येषां तटाकानि बहूदकानि
सभाश्च कूपाश्च प्रतिश्रयाश्च ।
अन्नप्रदानं मधुरा च वाणी
यमस्य ते निर्विषया भवन्ति ॥ ३७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

॥ ९२ ॥ अनुगीतापर्वणि षण्णवतितमोऽध्यायः ॥ ९६ ॥

[ अस्मिन्नध्याये ३७॥ श्लोकाः ]

## ॥ त्रयोदशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति यज्ञाग्निमहिमानुवर्णनम् ॥ १ ॥ दानपात्र-ब्राह्मणलक्षणकथनम् ॥ २ ॥ तथाऽन्नदानप्रशंसनम् ॥ ३ ॥

युधिष्ठिरः—

अनेकान्तं बहुद्वारं धर्ममाहुर्मनीषिणः ।
किंलक्षणोऽसौ भवति तन्मे ब्रूहि जनार्दन ॥ १

श्रीभगवान्—

शृणु राजन् समासेन धर्मशौचविधिक्रमम् ॥ १॥

अहिंसा सत्यमस्तेयम् आनृशंस्यं दमश्शमः ।
आर्जवं चैव राजेन्द्र निश्चितं धर्मलक्षणम् ॥ २॥

ब्रह्मचर्यं तपः क्षान्तिर् मधुमांसस्य वर्जनम् ।
मर्यादायां स्थितिश्चैव शमश्शौचस्य लक्षणम् ॥ ३॥

बाल्ये विद्यां निषेवेत यौवने दारसङ्ग्रहम् ।
वार्धके मौनमातिष्ठेत् सर्वदा धर्ममाचरेत् ॥ ४॥

ब्राह्मणान् नावमन्येत गुरून् परिवदेन्न च ।
यतीनामनुकूलस्स्याद् एष धर्मस्सनातनः ॥ ५॥

यतिर्गुरुर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
[1]पतिरेव गुरुस्स्त्रीणां सर्वेषां [2]पार्थिवो गुरुः ॥ ६॥

1. च—इदमर्धं नास्ति 2. क-ख—ब्राह्मणो गुरुः ।

यद्गृहस्थार्जितं पापं ज्ञानतोऽज्ञानतोऽपि वा ।
निर्दहिष्यति तत् सर्वम् एकरात्रोषितो यतिः ॥ ७॥

दुर्वृत्ता वा सुवृत्ता वा ज्ञानिनोऽज्ञानिनोऽपि वा ।
गृहस्थैर्यतयः पूज्याः परत्र हितकाङ्क्षिभिः ॥ ८॥

एकदण्डी त्रिदण्डी वा [1]शिखितो मुण्डितोऽपि वा ।
काषायदण्डसारोऽपि यतिः पूज्यो युधिष्ठिर ॥ ९॥

अपूजितो गृहस्थैर्वा तथा चाप्यवमानितः ।
यतिर्वोऽप्यतिथिर्वोऽपि नरके पातयिष्यतः ॥ १०॥

तस्मात्तु यतयः पूज्या मद्भक्ता मत्परायणाः ।
मयि सन्न्यस्तकर्माणः परत्र हितकाङ्क्षिभिः ॥ ११॥

प्रहरेन्न द्विजान् विप्रो गां न हन्यात् कदाचन ।
भ्रूणहत्यासमं चैव उभयं यो निषेवते ॥ १२॥

नाग्निं मुखेनोपधमेन्न च पादौ प्रतापयेत् ।
नाधः कुर्यात् कदाचित्तु न पृष्ठं परितापयेत् ॥ १३॥

नान्तरा गमनं कुर्यान्न चामेध्यं विनिक्षिपेत् ।
उच्छिष्टो न स्पृशेदग्निम् आशौचस्थो न जातुचित् ॥ १४॥

श्वचण्डालादिभिस्स्पृष्टो नाङ्गमग्नौ प्रतापयेत् ।
सर्वदेवमयो वह्निस् तस्माच्छुद्धस्सदा स्पृशेत् ॥ १५॥

प्राप्तमूत्रपुरीषस्तु न स्पृशेद्वह्निमात्मवान् ।

---

1. अ-क-ग-घ-च—शिखण्डी

यावत्तु धारयेद्वेगं तावदप्रयतो भवेत् ॥ १६॥
पचनाग्निं न गृह्णीयात् परवेश्मनि जातुचित् ॥ १७
तेन पक्वेन चान्नेन यत् कर्म कुरुते शुभम् ।
तच्छुभस्य फलं चार्धम् अग्निदस्य भवेन्नृप ॥ १८
तस्माच्छुभतरं कर्म प्रकुर्यादविनाशितम् ॥ १८॥
प्रमादाद्यदि वाऽज्ञानात् तस्य नाशो भविष्यति ।
गृह्णीयात्तु मथित्वा वा श्रोत्रियागारतोऽपि वा ॥ १९॥

युधिष्ठिरः—

कीदृशास्साधवो विप्रास् तेभ्यो दत्तं महाफलम् ।
कीदृशेभ्यो हि दातव्यं तन्मे ब्रूहि जनार्दन ॥ २०॥

श्रीभगवान्—

अक्रोधनास्सत्यपरा धर्मनित्या जितेन्द्रियाः ।
तादृशास्साधवो विप्रास् तेभ्यो दत्तं महत् फलम् ॥ २१॥
अमानिनस्सर्वसहा दृष्टार्था विजितेन्द्रियाः ।
सर्वभूतहिता मैत्रास् तेभ्यो दत्तं महत् फलम् ॥ २२॥
[1]अलुब्धाश्शुचयो वैद्या ह्रीमन्तस्सत्यवादिनः ।
स्वधर्मनिरता ये तु तेभ्यो दत्तं महत् फलम् ॥ २३॥
साङ्गांश्च चतुरो वेदान् योऽधीयेत दिने दिने ।
शूद्रान्नं यस्य देहे न तत् पात्रमृषयो विदुः ॥ २४॥

1. ग—इदमर्धद्वयं नास्ति

प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः ।
तारयेत् तत् कुलं सर्वम् एकोऽपीह युधिष्ठिर ॥ २५॥

गामश्वमन्नं वित्तं वा तद्विधे प्रतिपादयेत् ॥ २६

निशम्य च गुणोपेतं ब्राह्मणं साधुसम्मतम् ।
दूरादाहूय सत्कृत्य तं प्रयत्नेन पूजयेत् ॥ २७

युधिष्ठिरः—
धर्माधर्मविधिर्देव मम भीष्मेण भाषितः ।
भीष्मवाक्यात् सारभूतं वद धर्मं सुरेश्वर ॥ २८

श्रीभगवान्—
अन्नेन धार्यते सर्वं जगदेतच्चराचरम् ।
अन्नात् प्रभवति प्राणः प्रत्यक्षं नास्ति संशयः ॥ २९

कलत्रं पीडयित्वा तु देशकाले च शक्तितः ।
दातव्यं भिक्षवे चान्नम् आत्मनो भूतिमिच्छता ॥ ३०

विप्रमध्वपरिश्रान्तं बालं वृद्धमथापि वा ।
[1]अर्चयेद्गुरुवत् प्रीतो गृहस्थो गृहमागतम् ॥ ३१

क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः ।
अर्चयेदतिथिं प्रीतः परत्र हितभूतये ॥ ३२

अतिथिं नावमन्येत नानृतां गिरमीरयेत् ।
न पृच्छेद्गोत्रचरणं नाधीतं वा कदाचन ॥ ३३

1. ख—अर्धत्रयं नास्ति

चण्डालो वा श्वपाको वा काले यः कश्चिदागतः ।
[1]अन्नेन पूजनीयस्स्यात् परत्र हितमिच्छता ॥ ३४
पिधाय तु गृहद्वारं भुङ्क्ते योऽन्नं प्रहृष्टवान् ।
स्वर्गद्वारपिधानं वै कृतं तेन युधिष्ठिर ॥ ३५
पितॄन् देवानृषीन् विप्रान् अतिथींश्च निराश्रयान् ।
यो नरः प्रीणयत्यन्नैस् तस्य पुण्यफलं महत् ॥ ३६
कृत्वाऽपि पापं बहुशो यो ददात्यन्नमर्थिने ।
ब्राह्मणाय विशेषेण सर्वपापैः प्रमुच्यते ॥ ३७
अन्नदः प्राणदो लोके प्राणदस्सर्वदो भवेत् ।
तस्मादन्नं प्रयत्नेन दातव्यं भूतिमिच्छता ॥ ३८
अन्नं ह्यमृतमित्याहुर् अन्नं प्रजननं स्मृतम् ।
अन्नप्रणाशे सीदन्ति शरीरे पञ्च धातवः ॥ ३९
बलं बलवतो नश्येद् अन्नहीनस्य देहिनः ।
तस्मादन्नं प्रदातव्यं श्रद्धयाऽश्रद्धयाऽपि वा ॥ ४०
आदत्ते हि रसं सर्वम् आदित्यस्स्वगभस्तिभिः ।
वायुस्तस्मात् समादाय रसं मेघेषु धारयेत् ॥ ४१
तत्तु मेघगतं भूमौ शक्रो वर्षति तद्रसम् ।
तेन दिग्धा भवेद्देवी मही प्रीता च पाण्डव ॥ ४२
तस्यां सस्यानि रोहन्ति यैर्जीवन्त्यखिलाः प्रजाः ।
मांसमेदोस्थिमज्जानां सम्भवस्तेभ्य एव हि ॥ ४३

1. अ—अर्धद्वयं नास्ति

[1]एवं सूर्यश्च पवनो मेघश्शक्रस्तथैव च ।
एक एव [2]स्थितो राशिर् यतो भूतानि जज्ञिरे ॥ ४४
भवनानि च दिव्यानि दिवि तेषां महात्मनाम् ।
नानासंस्थानरूपाणि नानाभूतयुतानि च ॥ ४५
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ॥ ४६
[3]अनेकशतसङ्ख्यानि सान्तर्जलवनानि च ।
तत्र पुष्पफलोपेताः कामदास्सुरपादपाः ॥ ४७
[4]वाप्यो दिव्यास्सरःकूपाः दीर्घिकाश्च सहस्रशः ।
भक्ष्यभोज्यमयाश्शैला वासांस्याभरणानि च ॥ ४८
क्षीरस्रवन्त्यस्सरितस् तथा चैवान्नपर्वताः ।
[5]घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ॥ ४९
प्रासादाः पाण्डराश्शुभ्राश् शय्याश्च कनकोज्ज्वलाः ।
अन्नदास्तत्र तिष्ठन्ति तस्मादन्नप्रदो भवेत् ॥ ५०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥
[ अस्मिन्नध्याये ५० श्लोकाः ]

---

1. क-ख—एनमग्निं च सूर्यश्च पवनश्शक्र एव च।
2. क-ख-ग-च—स्मृतो राशिर्यतो भूतश्च्छृणुष्व हि ।
3. ख—इदमर्धं नास्ति
4. क-ख-ग—वाप्यो वीथ्यस्सभाः कूपाः दीर्घिकाश्च सहस्रशः ।
5. ग—इदमर्धं नास्ति ।

## ॥ चतुर्दशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति भोजनविधिकथनम् ॥ १ ॥ तथा गोग्रासदानप्रकारकथनम् ॥ २ ॥ तथा तिलप्रशंसनपूर्वकं तेषामिक्षूणां च ब्राह्मणेन स्वयं यन्त्रे निपीडनप्रतिषेधनम् ॥ ३ ॥

युधिष्ठिरः—

अन्नदानफलं श्रुत्वा प्रीतोऽस्मि मधुसूदन ।
भोजनस्य विधिं वक्तुं देवदेव त्वमर्हसि ॥ १

श्रीभगवान्—

भोजनस्य द्विजातीनां विधानं शृणु पाण्डव ।
स्नातश्शुचिश्शुचौ देशे निर्जने हुतपावकः ॥ २
मण्डलं कारयित्वा तु चतुरश्रं द्विजोत्तमः ।
क्षत्रियश्चेत् ततो वृत्तं वैश्योऽर्धेन्दुसमाकृतिम् ॥ ३
आर्द्रपादस्तु भुञ्जीयात् प्राङ्मुखश्चासने शुचौ ।
पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः ॥ ४
नैकवासास्तु भुञ्जीयान्न चान्तर्धाय वा पुनः ।
न भिन्नभाण्डे भुञ्जीत पर्णपृष्ठे तथैव च ॥ ५
अन्नं पूर्वं नमस्कुर्यात् प्रहृष्टेनान्तरात्मना ।
नान्यदालोकयेदन्नान्न जुगुप्सेत तत्परः ॥ ६
जुगुप्सितं च यच्चान्नं राक्षसा एव भुञ्जते ॥ ६॥

पाणिना जलमुद्धृत्य कुर्यादन्नं प्रदक्षिणम् ।
अपेयं तद्विजानीयात् पीत्वा चान्द्रायणं चरेत् ॥ ७॥

परिवेषजलादन्यत् पेयमेव तु मन्त्रवत् ।
पञ्च प्राणाहुतीः कुर्यात् समन्त्रं तु पृथक् पृथक् ॥ ८॥

यथा रसं न जानाति जिह्वा प्राणाहुतौ नृप ।
तथा समाहितः कुर्यात् प्राणाहुतिमतन्द्रितः ॥ ९॥

[1]वन्दित्वाऽन्नमथान्नादं पञ्च प्राणांश्च पाण्डव ।
यः कुर्यादाहुतीः पञ्च तेनेष्टाः पञ्च वायवः ॥ १०॥

अतोऽन्यथा तु भुञ्जानो ब्राह्मणो ज्ञानदुर्बलः ।
तेनान्नेनासुरान् प्रेतान् राक्षसांस्तर्पयिष्यति ॥ ११॥

वक्त्रप्रमाणान् पिण्डांश्च ग्रसेदेकैकशः पुनः ।
वक्त्राधिकं तु यत् पिण्डम् आत्मोच्छिष्टं तदुच्यते ॥ १२॥

पिण्डावशिष्टमन्यच्च वक्त्रनिस्सृतमेव च ।
अभोज्यं तद्विजानीयाद् भुक्त्वा चान्द्रायणं चरेत् ॥ १३॥

[2]स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते मुक्तभोजनम् ।
चान्द्रायणं चरेत् कृच्छ्रं प्राजापत्यमथापि वा ॥ १४॥

पिबतः पतिते तोये भोजने मुखनिस्सृते ।
अभोज्यं तद्विजानीयाद् भुक्त्वा चान्द्रायणं चरेत् ॥ १५॥

---

1. अ—विदित्वा । 2. अ-ब—अर्धार्धं नास्ति

[1]पीतशेषं तु तन्नाम न पेयं पाण्डुनन्दन ।
पिबेद्यदि हि तन्मोहाद् द्विजश्चान्द्रायणं चरेत् ॥ १६॥

पानीयानि पिबेद्येन तत् पात्रं द्विजसत्तमः ।
अनुच्छिष्टं भवेत् तावद् यावद्भूमौ न निक्षिपेत् ॥ १७॥

मौनी वाऽप्यथवा भूमौ प्रहृष्टस्संयतेन्द्रियः ।
भुञ्जीत विधिवद्विप्रो न [2]चोच्छिष्टं प्रदापयेत् ॥ १८॥

सदा चात्यशनं नाद्यान्नातिहीनं च कर्हिचित् ।
यथाऽन्नेन व्यथा न स्यात् तथा भुञ्जीत नित्यशः ॥ १९॥

उदक्यामपि चण्डालं श्वानं वा [3]शूद्रमेव वा ।
भुञ्जानो यदि वा पश्येत् तदन्नं तु परित्यजेत् ॥ २०॥

भुञ्जानो ह्यत्यजन् मोहाद् द्विजश्चान्द्रायणं चरेत् ॥ २१

केशकीटावपन्नं च मुखमारुतवीजितम् ।
अभोज्यं तद्विजानीयाद् भुक्त्वा चान्द्रायणं चरेत् ॥ २२

उत्थाय च पुनस्स्पृष्टं पादस्पृष्टं च लङ्घितम् ।
अन्नं तद्राक्षसं विद्यात् तस्मात् तत् परिवर्जयेत् ॥ २३

राक्षसोच्छिष्टभुग्विप्रस् सप्त [4]पूर्वान् परानपि ।

---

1. क-ख—अर्धद्वयं नास्ति
2. क-ख—चोच्छिष्टानि दाप । च-ग—चोच्छिष्टानि चाव ।
3. क-ख-ग—शूद्रमेव वा ।
4. क-ख-ग—पूर्वापरानपि । च—दशापूर्वान् दशापरान् ।

निरये रौरवे घोरे स्वपितॄन् पातयिष्यति ॥ २४

तस्मिन्नाचमनं कुर्याद् यस्मिन् भाण्डे स भुक्तवान् । २४॥

यद्युत्तिष्ठत्यनाचान्तो भुक्तवानासनात् ततः ।
स्नानं सद्यः प्रकुर्वीत सोऽन्यथाऽप्रयतो भवेत् ॥ २५॥

युधिष्ठिरः—

तृणमुष्टिविधानं च तिलमाहात्म्यमेव च ।
इक्ष्वोस्सोमसमुद्भूतिं वक्तुमर्हसि मानद ॥ २६॥

श्रीभगवान्—

पितरो वृषभा ज्ञेया गावो लोकस्य मातरः ।
तासां तु पूजया राजन् पूजिताः पितृमातरः ॥ २७॥

सभा प्रपा गृहं चापि देवतायतनानि च ।
शुद्ध्यन्ति शकृता यासां किं भूतमधिकं ततः ॥ २८॥

ग्रासमुष्टिं परगवे दद्यात् संवत्सरं तु यः ।
अकृत्वा स्वयमाहारं व्रतवत् सार्वकालिकम् ॥ २९॥

गावो मे मातरस्सर्वाः पितरश्चैव गोवृषाः ।
ग्रासमुष्टिं मया दत्तं प्रतिगृह्णन्तु मातरः ॥ ३०॥

इत्युक्त्वाऽनेन मन्त्रेण सावित्र्या वा समाहितः ।
अभिमन्त्र्य ग्रासमुष्टिं दद्यात् तस्य फलं शृणु ॥ ३१॥

यत् कृतं दुष्कृतं तेन ज्ञानतोऽज्ञानतोऽपि वा ।

तस्य नश्यति तत् सर्वं दुस्स्वप्नं च विनश्यति ॥ ३२॥

तिलाः पवित्राः पापघ्ना नारायणसमुद्भवाः ।
तिलाञ्श्राद्धे प्रशंसन्ति दानमेतदनुत्तमम् ॥ ३३॥

तिलान् दद्यात् तिलान् भक्ष्यात् तिलान् प्रातरुपस्पृशेत् ।
तिलं तिलमिति ब्रूयात् तिलाः पापहरा हि ते ॥ ३४॥

क्रीताः प्रतिगृहीता वा न विक्रेया द्विजातिभिः ॥ ३५

भोजनाभ्यञ्जनाद्दानाद् योऽन्यत्तु कुरुते तिलैः ।
क्रिमिर्भूत्वा श्वविष्ठायां पितृभिस्सह मज्जति ॥ ३६

तिलान् न पीडयेद्विप्रो यन्त्रचक्रे स्वयं नृप ।
पीडयन् हि द्विजो मोहान्नरकं याति रौरवम् ॥ ३७

इक्षुवंशोद्भवस्सोमस् सोमवंशोद्भवो द्विजः ।
इक्षून् न घातयेत् तस्माद् इक्षुघात्यात्मघातकः ॥ ३८

इक्षुदण्डसहस्राणाम् एकैकेन युधिष्ठिर ।
ब्रह्महत्यामवाप्नोति ब्राह्मणो यन्त्रपीडकः ॥ ३९

तस्मान्न पीडयेदिक्षून् यन्त्रचक्रे द्विजोत्तमः ॥ ३९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥
॥ ९२ ॥ अनुगीतापर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥
[ अस्मिन्नध्याये ३९॥ श्लोकाः ]

## ॥ पञ्चदशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रत्यापद्धर्मकथनम् ॥ १ ॥ तथा प्रशस्ताप्रशस्त-ब्राह्मणलक्षणकथनम् ॥ २ ॥ तथा सामान्यतो नानाधर्मकथनपूर्वकं ब्राह्मण्यसिद्धिप्रकारकथनम् ॥ ३ ॥ तथा गुर्वाचार्योपाध्यायलक्षणकथनम् ॥४ ॥

युधिष्ठिरः—

समुच्चयं तु धर्माणां भोज्याभोज्यं च केशव ।
श्रुतं मया त्वत्प्रसादाद् आपद्धर्मं ब्रवीहि मे ॥ १

श्रीभगवान्—

दुर्भिक्षे राष्ट्रसम्बाधे त्वाशौचे मृतसूतके ।
धर्मकालेऽध्वनि तथा नियमो येन लुप्यते ॥ २

दूराध्वगमनात् खिन्नो द्विजालाभेऽथ शूद्रतः ।
अकृतान्नं तु यत् किञ्चिद् गृह्णीयादात्मवृत्तये ॥ ३

आतुरो दुःखितो वाऽपि भयार्तो वा बुभुक्षितः ।
भुञ्जन्नविधिना विप्रः प्रायश्चित्तीयते न च ॥ ४

निमन्त्रितस्तु यो विप्रो विधिवद्धव्यकव्ययोः ।
मांसादीन्यपि भुञ्जानः प्रायश्चित्तीयते न च ॥ ५

[1]अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ ६

1. अ—अर्धचतुष्टयं नास्ति

अशक्तो विधिवत् कर्तुं प्रायश्चित्तानि यो नरः ।
विदुषां वचनेनापि दानेनापि विशुद्ध्यति ॥ ७

[1]अनृताद्यृतुकाले वा दिवा रात्रौ तथाऽपि वा ।
प्रोषितस्तु स्त्रियं गच्छेत् प्रायश्चित्तीयते न च ॥ ८

युधिष्ठिरः—

प्रशस्याः कीदृशा विप्रा निन्द्याश्चापि सुरेश्वर ।
अष्टकायाश्च कः कालस् तन्मे कथय सुव्रत ॥ ९

श्रीभगवान्—

सत्यसन्धं द्विजं दृष्ट्वा स्थानाद्वेपति भास्करः ।
एष मे मण्डलं भित्त्वा याति ब्रह्म सनातनम् ॥ १०

कुलीनः कर्मकृद्वैद्यस् तथा चाप्यानृशंस्यवान् ।
ह्रीमानृजुस्सत्यवादी पात्रं सर्व इमे द्विजाः ॥ ११

एते चाग्रासनस्थास्ते भुञ्जानाः प्रथमं द्विजाः ।
तस्यां पङ्क्त्यां च ये चान्ये तान् पुनन्त्येव दर्शनात् ॥ १२

मद्भक्ता ये द्विजश्रेष्ठा मद्गता मत्परायणाः ।
तान् पङ्क्तिपावनान् विद्धि पूज्यांश्चैव विशेषतः ॥ १३

निन्द्यान्शृणु द्विजान् राजन्नपि वा वेदपारगान् ।
ब्राह्मणच्छद्मना लोके चरतः पापकारिणः ॥ १४

अनग्निरनधीयानः प्रतिग्रहरुचिस्तु यः ।

1. अ-क-ख-घ—अर्धद्वयं नास्ति

यत्र कुत्र तु भुञ्जानस् तं विद्यात् पङ्क्तिदूषकम् ॥ १५
मृतसूतकपुष्टाङ्गो यश्च शूद्रान्नभुग् द्विजः ॥ १५॥

[1]असूयालुर्दम्भपरो महानहमिति ब्रुवन् ।
अहं चापि न जानामि गतिं तस्य नराधिप ॥ १६॥

शूद्रान्नरसपुष्टाङ्गोऽप्यधीयानो हि नित्यशः ।
जपतो जुह्वतश्चापि गतिरूर्ध्वा न विद्यते ॥ १७॥

आहिताग्निश्च यो विप्रश् शूद्रान्नान्न निवर्तते ।
[2]पञ्च तस्य प्रणश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः ॥ १८॥

शूद्रप्रेषणकर्तुश्च ब्राह्मणस्य विशेषतः ।
भूम्यामन्नं प्रदातव्यं श्वसृगालसमो हि सः ॥ १९॥

प्रेतभूतं तु यश्शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥ २०॥

त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति॥ २१॥
अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजोत्तमाः ।
पदे पदेऽश्वमेधस्य फलं ते प्राप्नुवन्ति हि ॥ २२॥

न तेषामशुभं किञ्चित् पापं वा शुभकर्मणाम् ।
जलावगाहनादेव सद्यश्शौचं विधीयते ॥ २३॥

1. च—कोश एकस्मिन्नेवेदमर्धं दृश्यते। 2. ख—इदमर्धं नास्ति

शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि ।
निर्वृतेन न भोक्तव्यं विद्धि शूद्रान्नमेव तत् ॥ २४॥

विप्राणां भोक्तुकामानाम् अत्यन्तं चान्नकाङ्क्षया ।
यो विघ्नं कुरुते मर्त्यस् ततो नान्योऽस्ति पापकृत् ॥ २५॥

सर्वे च वेदास्सह षड्भिरङ्गैस्
साङ्ख्यं पुराणं च कुले च जन्म ।
नैतानि सर्वाणि गतिर्भवन्ति
शीलव्यपेतस्य नृप द्विजस्य ॥ २६॥

ग्रहोपरागे विषुवेऽयनान्ते
पित्र्ये मघासु स्वसुते च जाते ।
गयेषु [1]सर्वेषु च पाण्डुपुत्र
दत्तं भवेन्निष्कसहस्रतुल्यम् ॥ २७॥

[2]वैशाखमासस्य च या तृतीयाऽ-
नवद्याऽसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य च कृष्णपक्षे
त्रयोदशी पञ्चदशी च माघे ॥ २८॥

उपप्लवे चन्द्रमसो रवेश्च
श्राद्धस्य कालो ह्ययनद्वये च ।

---

1. क-ग-च—पञ्चेषु ।
2. अ-क-ख-घ—अर्धमिदं नास्ति

[1]पानीयमप्यत्र तिलैर्विमिश्रं
दद्यात् पितृभ्यः प्रयतो मनुष्यः ॥ २९॥

यस्त्वेकपङ्क्त्यां विषमं ददाति
स्नेहाद्भयाद्वा यदि वाऽर्थहेतोः ।
क्रूरं दुराचारमनात्मवन्तं
ब्रह्मन्नमेनं मुनयो वदन्ति ॥ ३०॥

इहैवैकस्य नामुत्र अमुत्रैकस्य नो इह ।
[2]इह चामुत्र चैकस्य नामुत्रैकस्य नो इह ॥ ३१॥

धनानि येषां विपुलानि सन्ति
नित्यं रमन्ते परलोकमूढाः ।
तेषामयं शत्रुवरन्नलोको
नान्यत् सुखं देहसुखे रतानाम् ॥ ३२॥

ये योगयुक्तास्तपसि प्रयुक्तास्
स्वाध्यायशीला जरयन्ति देहम् ।
जितेन्द्रिया भूतहिते निविष्टास्
तेषामसौ नाम रिपुन्नलोकः ॥ ३३॥

ये धर्ममेव प्रथमं चरन्ति
धर्मेण लब्ध्वाऽपि धनानि लोके ।

---

1. क-ख-ग-घ—नास्तीदमर्धम् । 2. च—नास्तीदमर्धम्

दारानवाप्य क्रतुभिर्यजन्ते
तेषामयं चैव परश्च लोकः ॥ ३४॥
ये नैव विद्यां न तपो न दानं
न चापि मूढाः प्रजने यतन्ते ।
[1]न चापि गच्छन्ति सुखानि भोगांस्
तेषामयं चैव परश्च नास्ति ॥ ३५॥

युधिष्ठिरः—
नारायण पुराणेश लोकावास नमोऽस्तु ते ।
श्रोतुमिच्छामि कात्स्न्र्येन धर्मसारसमुच्चयम् ॥ ३६॥

श्रीभगवान्—
धर्मसारं महाप्राज्ञ मनुना प्रोक्तमादितः ।
प्रवक्ष्यामि मनुप्रोक्तं पौराणं श्रुतिसंहितम् ॥ ३७॥
अग्निचित् कपिला सत्री राजा भिक्षुर्महोदधिः ।
दृष्टमात्राः पुनन्त्येते तस्मात् पश्येत तान् सदा ॥ ३८॥
गौरेकस्यैव दातव्या न बहूनां युधिष्ठिर ।
सा गौर्विक्रयमापन्ना दहत्यासप्तमं कुलम् ॥ ३९॥
बहूनां न प्रदातव्या गौर्वेश्म शयनं स्त्रियः ।
तादृग्भूतं तु तद्दानं दातारं नोपतिष्ठति ॥ ४०॥
आक्रम्य ब्राह्मणैर्भुक्तम् अनार्याणां तु वेश्मनि ।

1. क-ख-घ—ये चापि गच्छन्ति परस्य भार्यां तेषामयं ।

गोभिश्च पुण्यं तत् तेषां राजसूयाद्विशिष्यते ॥ ४१॥
मा ददात्विति यो ब्रूयाद् गोषु च ब्राह्मणेषु च ।
तिर्यग्योनिशतं गत्वा चण्डालेषूपजायते ॥ ४२॥
ब्राह्मणस्वं तु देवस्वं दरिद्रस्य च यद्धनम् ।
गुरोश्चापि हृतं राजन् स्वर्गस्थमपि पातयेत् ॥ ४३॥
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ।
द्वितीयं धर्मशास्त्राणि तृतीयं लोकसङ्ग्रहः ॥ ४४॥
आसमुद्राच्च यत् पूर्वाद् आसमुद्राच्च पश्चिमात् ।
हिमवद्विन्ध्ययोर्मध्यम् आर्यावर्तं प्रचक्षते ॥ ४५॥
सरस्वतीदृषद्वत्योर् देवनद्योर्यदन्तरम् ।
तद्देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ ४६॥
यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥ ४७॥
कुरुक्षेत्रं च मत्स्याश्च पाञ्चालाश्शूरसेनयः ।
एते ब्रह्मर्षिदेशास्तु ब्रह्मावर्तादनन्तराः ॥ ४८॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं चारित्रं च गृह्णीयुः पृथिव्यां सर्वमानवाः ॥ ४९॥
हिमवद्विन्ध्ययोर्मध्यं यत् प्राग् विनशनादपि ।
प्रत्यगेव प्रयागात्तु मध्यदेशः प्रकीर्तितः ॥ ५०॥

कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो याज्ञियो देशो म्लेच्छदेशस्ततः परः ॥ ५१॥

एतान् विज्ञाय देशांस्तु संश्रयेयुर्द्विजातयः ।
शूद्रस्तु यस्मिन् कस्मिन् वा निवसेद्वृत्तिकर्शितः ॥ ५२॥

[1]आचारः प्रथमो धर्मो ह्यहिंसा सत्यमेव च ।
दानं चैव यथाशक्ति यमाश्च नियमैस्सह ॥ ५३॥

वैदिकैः कर्मभिः पुण्यैर् निषेकादिर्द्विजन्मनाम् ।
कार्यश्शरीरसंस्कारः पावनः प्रेत्य चेह च ॥ ५४॥

गर्भहोमैर्जातकर्मनामचौलोपनायनैः ।
स्वाध्यायैस्तद्व्रतैश्चैव विवाहस्नातकव्रतैः ॥ ५५॥

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥ ५६

धर्मार्थौ यदि न स्यातां शुश्रूषा वाऽपि तद्विधा ।
विद्या तस्मिन् न वप्तव्या शुभं बीजमिवोषरे ॥ ५७

लौकिकं वैदिकं वाऽपि तथाऽऽध्यात्मिकमेव वा ।
यस्माज्ज्ञानमिदं प्राप्तं तं पूर्वमभिवादयेत् ॥ ५८

सव्येन सव्यस्प्रष्टव्यो दक्षिणेन तु दक्षिणः ।
न कुर्यादेकहस्तेन गुरोः पादाभिवादनम् ॥ ५९

निषेकादीनि कर्माणि यः करोति यथाविधि ।

---

1. क-ख—आचारप्रभवो ।

अध्यापयति चैवैनं स विप्रो गुरुरुच्यते ॥ ६०

कृत्वोपनयनं वेदान् योऽध्यापयति नित्यशः ।
सकल्पान् सरहस्यांश्च स चोपाध्याय उच्यते ॥ ६१

साङ्गांश्च वेदानध्याप्य शिक्षयित्वा व्रतानि च ।
विवृणोति च मन्त्रार्थान् आचार्यस्सोऽभिधीयते ॥ ६२

उपाध्यायाद्दशाचार्य आचार्याणां शतं पिता ।
पितुर्दशगुणं माता गौरवेणातिरिच्यते ॥ ६३

तस्मात् तेषां वशे तिष्ठेच् छुश्रूषापरमो भवेत् ।
अवमानाद्धि तेषां तु नरकं स्यान्न संशयः ॥ ६४

हीनाङ्गानतिरिक्ताङ्गान् विद्याहीनान् वयोधिकान् ।
रूपद्रविणहीनांश्च न वाचाऽधिक्षिपेद्बुधः ॥ ६५

शपता यत् कृतं पुण्यं शप्यमानं तु गच्छति ।
शप्यमानस्य यत् पापं शपन्तमनुगच्छति ॥ ६६

नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम् ।
द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् ॥ ६७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥
॥ ९२ ॥ अनुगीतापर्वणि एकोनशततमोऽध्यायः ॥ ९९ ॥
[ अस्मिन्नध्याये ६७ श्लोकाः ]

## ॥ षोडशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रत्यग्निसृष्टिप्रकारकथनम् ॥ १ ॥ आहवनीयादित्वेन तद्विभागकथनपूर्वकं तत्तन्नामनिर्वचनम् ॥ २ ॥ तथा यज्ञाग्निहोत्रप्रशंसनम् ॥ ३ ॥

युधिष्ठिरः—

भगवंस्तव भक्तस्य [1]धर्माधर्ममजानतः ।
धर्मं पुण्यतमं देव पृच्छतः कथयस्व मे ॥ १

श्रीभगवान्—

यदेतदग्निहोत्रं वै सृष्टं वर्णत्रयस्य तु ।
मन्त्रवद्यद्धुतं सम्यग् विधिना चाप्युपासितम् ॥ २
आहिताग्निं नयत्यूर्ध्वं सपत्नीकं सबान्धवम् ॥ २॥

युधिष्ठिरः—

कथं तद्ब्राह्मणैर्देव होतव्यं क्षत्रियैः कथम् ।
वैश्यैर्वा देवदेवेश कथं वा सुहुतं भवेत् ॥ ३॥
कस्मिन् काले ऽथवा कस्मिन्नाधेयोऽग्निस्सुरोत्तम ।
आहितस्य कथं वाऽपि सम्यगाचरणं भवेत् ॥ ४॥
कत्यग्नयः किमात्मानस् स्थानं किं कस्य वा विभो ।
कतरस्मिन् हुते स्थाने कं व्रजेदाग्निहोत्रिकः ॥ ५॥

1. क-ख-ग-च—मम धर्मज्ञनप्रिय ।

अग्निहोत्रनिमित्तं च किमुत्पन्नं पुराऽनघ ।
कथमेवाथ हूयन्ते प्रीयन्ते च सुराः कथम् ॥ ६॥

विधिवन्मन्त्रवद्भक्त्या पूजितास्त्वग्नयः कथम् ।
कां गतिं वदतां श्रेष्ठ नयन्ति ह्यग्निहोत्रिणः ॥ ७॥

दुर्हुताश्चापि भगवन्नविज्ञाताश्चयोऽग्नयः ।
[1]किमाहिताग्नेः कुर्वन्ति दुश्चीर्णा वाऽपि केशव ॥ ८॥

उत्सन्नाग्निस्तु पापात्मा कां योनिं देव गच्छति ॥ ९

एतत् सर्वं समासेन भक्त्या ह्युपगतस्य मे ।
वक्तुमर्हसि सर्वज्ञ सर्वात्मक नमोऽस्तु ते ॥ १०

श्रीभगवान्—

शृणु राजन् महापुण्यम् इदं धर्मामृतं परम् ।
यत्तु तारयते युक्तान् ब्राह्मणानग्निहोत्रिणः ॥ ११

ब्रह्मत्वेनासृजं लोकान् अहमादौ महाद्युते ।
सृष्टोऽग्निर्मुखतः पूर्वं लोकानां हितकाम्यया ॥ १२

यस्मादग्रे स भूतानां सर्वेषां निर्मितो मया ।
तस्मादग्नीत्यभिहितः पुराणज्ञैर्महर्षिभिः ॥ १३

यस्मात्तु सर्वकृत्येषु पूर्वमस्मै प्रदीयते ।
[2]आहुतिर्दीप्यमानाय तस्मादग्नीति कथ्यते ॥ १४

---

1. ख—नाख्यीदमधर्मम्  2. क-ख-ब—नाख्यीदमधर्मम्

[1]यस्माच्च नयति ह्यग्र्यां गतिं विप्रान् सुपूजितः ।
यस्माच्च नयनाद्राजन् देवेष्वग्रीति कीर्त्यते ॥ १५

यस्माच्च दुर्हुतस्सोऽयम् अलं भक्षयितुं क्षणात् ।
यजमानं नरश्रेष्ठ क्रव्यादोऽग्निस्ततस्स्मृतः ॥ १६

सर्वभूतात्मको राजन् देवानामेष वै मुखम् ।
प्रथमं मन्मुखात् सृष्टो लोकार्थे पचनप्रभुः ॥ १७

सृष्टमात्रो जगत् सर्वम् अत्तुमैच्छत् पुरा खलु ।
[2]ततः प्रशमितस्सोऽग्निर् उपासीनो मया पुनः ॥ १८

सततोपासनात् [3]सोऽयम् औपासन इति स्मृतः ॥ १८॥

आहुतिस्सर्वमाख्याता तस्मिन् वसति सोऽनलः ।
आवसथ्य इति ख्यातस् तेनासौ ब्रह्मवादिभिः ॥ १९॥

तस्मिन् पञ्च महायज्ञा वर्तन्ते यस्य धर्मतः ।
सोममण्डलमध्येन गतिस्तस्य द्विजन्मनः ॥ २०॥

तेन सप्तर्षयस्सिद्धास् संयतेन्द्रियबुद्धयः ।
गता ह्यमरसायुज्यम् एकाग्र्यर्चनतत्पराः ॥ २१॥

---

1. अ-क-ख-घ—अर्धद्वयं नास्ति
2. क—आहुत्या शमितस्सोऽग्निरुपास्यत मया पुरा ।
ख-ग-घ—उपास्यत मया पुरः । अ—उपास्यैव मनोप्रभुः ।
3. क-ख—पूर्वमौपासन ।

[1.2]अपरे चावसथ्यं च पचनाग्निं प्रचक्षते ।
तस्मिन् पञ्च महायज्ञा वैश्वदेवश्च वर्तते ॥ २२॥

स्थालीपाकं च गार्हं च सर्वे चास्मिन् प्रतिष्ठिताः ।
गृह्यकर्मवहो यस्मात् तस्माद्गृहपतिस्तु सः ॥ २३॥

औपासनं चावसथ्यं सभ्यं पचनपावकम् ।
आहुर्ब्रह्मविदः केचिन्मतमेतन्ममापि च ॥ २४॥

अग्निहोत्रप्रकारं तु शृणु राजन् समाहितः ।
त्रयाणां गुणनामानि वह्नीनामुच्यते मया ॥ २५॥

गृहाणां हि पतित्वं हि गृहपत्यमिति स्मृतम् ।
गृहपत्यं तु यस्यासीत् तत् तस्माद्गार्हपत्यता ॥ २६॥

यजमानं तु यस्मात्तु दक्षिणां तु गतिं नयेत् ।
[3]दक्षिणाग्निं तमाहुस्ते दक्षिणायतनं द्विजाः ॥ २७॥

आहुतिस्सर्वमाख्याति हव्यं वै वहनं स्मृतम् ।
सर्वहव्यवहो वह्निर् गतश्चाहवनीयताम् ॥ २८॥

[4]यस्त्वावसथ्यं जुहुयान्मूलाग्निं विधिवद्द्विजः ।

---

1. अ—अर्धचतुष्टयं नास्ति 2. च—अर्धद्वयं नास्ति
3. घ—दक्षिणाग्निरिति प्राहुर्दक्षिणत्वाच्च तद्विदः ॥
क-ख—दक्षिणाग्निं तमाहुस्तु दक्षिणत्वाच्च तद्विदः ।
ग-च—दक्षिणाग्निं तमाहुस्तद्दक्षिणायतनं द्विजाः ।
4. क-ख-घ—नास्तीदमर्धम् ।

[1]आवसथ्यं तु तं चाग्निं पचनाग्निं प्रचक्षते ॥ २९॥

तेषां सभागतो वह्निस् सभ्य इत्यभिधीयते ।
आवसथ्यस्तु यो वह्निः प्रथमस्स प्रजापतिः ॥ ३०॥

ब्रह्मा च गार्हपत्योऽग्निस् तस्मादेव तु सोऽभवत् ।
दक्षिणाग्निस्त्वयं रुद्रः क्रोधात्मा चण्ड एव सः ॥ ३१॥

अहमाहवनीयोऽग्निर् आहोमाद्यस्य वै मुखे ।
[2]सभ्योऽग्निः पञ्चमो यस्तु स्कन्द एव नराधिप ॥ ३२॥

पृथिवी गार्हपत्योऽग्निर् अन्तरिक्षं च दक्षिणः ।
स्वर्गेमाहवनीयोऽग्निर् एवमग्नित्रयं स्मृतम् ॥ ३३॥

वृत्तश्च गार्हपत्योऽग्निर् यस्माद्वृत्ता च मेदिनी ।
अर्धचन्द्राकृतिः खं वै दक्षिणाग्निस्तथा भवेत् ॥ ३४॥

चतुरश्रं ततस्स्वर्गं निर्मलं तु निरामयम् ।
तस्मादाहवनीयोऽग्निर् चतुरश्रो भवेन्नृप ॥ ३५॥

जुहुयाद्गार्हपत्यं यो भुवं जयति स द्विजः ।
जुहोति दक्षिणाग्निं यस् स जयत्यन्तरिक्षकम् ॥ ३६॥

पृथिवीमन्तरिक्षं च दिवं चर्षिगणैस्सह ।
जयत्याहवनीयं यो जुहुयाद्भक्तिमान् द्विजः ॥ ३७॥

---

1. ग—आवसथ्य—एतदादि सार्धैकोनचत्वारिंशच्छ्लोकपर्यन्तं नास्ति
2. घ—इतः श्लोकद्वयं नास्ति

आभिमुख्येन होमस्तु यस्य यज्ञेषु वर्तते ।
तेनाप्याहवनीयत्वं गतो वह्निर्महाद्युतिः ॥ ३८॥

आहोमादग्निहोत्रेषु यज्ञैर्वा यत्र सर्वशः ।
यस्मादस्मिन् प्रवर्तन्ते ततो ह्याहवनीयता ॥ ३९॥

यस्त्वावसथ्यं जुहुयान्मूलाग्निं विधिवद्द्विजः ।
स तु सप्तर्षिलोकेषु सपत्नीकः प्रमोदते ॥ ४०॥

यश्चाप्युपासते सभ्यं विधिवत् प्रयतात्मवान् ।
स जयेद्वाङ्मयं सर्वं तथात्वृषिसभामपि ॥ ४१॥

अग्नीनामथवाऽग्नेऽस्तु यस्य होमः प्रदीयते ।
इष्टो भवति सर्वाग्निर् अग्निहोत्रं च यद्भवेत् ॥ ४२॥

त्राणाय यजमानस्य चाग्निहोत्रमिति स्मृतम् ॥ ४३

हो इत्येष विषादो वै विषादो दुःखमुच्यते ।
दुःखं [1]तापत्रयं प्रोक्तं पापं हि नरकं विदुः ॥ ४४
तस्माद्वै त्रायते दुःखाद् यजमानं हुतोऽनलः ।
तस्मात्तु विधिवत् प्रोक्तम् अग्निहोत्रमिति श्रुतौ ॥ ४५

---

1. घ—अत्र महान्विच्छेदः । तदनन्तरं.
.....राहोमाद्यस्य वै मुखम् ।
सभ्याग्निः पञ्चमो यस्तु स्कन्द एव नराधिप ॥
पृथिवीगार्हपत्योऽग्निरन्तरिक्षं तु दक्षिणम् ।
स्वर्गमाहवनीयोऽग्निरेवमग्नित्रयं स्मृतम् ॥
वृत्तं च गार्हपत्योऽग्निस् तापं च नरकं विदुः । [ अधिकः पाठः ]

तदग्निहोत्रं सृष्टं वै ब्रह्मणा लोककर्तृणा ।
वेदाश्चाप्य[1]ग्निहोत्रार्थं जज्ञिरे स्वयमेव तु ॥ ४६

अग्निहोत्रफला वेदास् शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला नारी दत्तभोगफलं धनम् ॥ ४७

त्रिवेदमन्त्रसंयोगाद् अग्निहोत्रं प्रवर्तते ।
ऋग्यजुस्सामभिः पुण्यैस् स्थाप्यते सूत्रसंयुतैः ॥ ४८

वसन्ते ब्राह्मणस्य स्याद् आधेयोऽग्निर्नराधिप ।
वसन्तो ब्राह्मणः प्रोक्तो वेदयोनिस्स उच्यते ॥ ४९

अग्न्याधेयं तु येनाथ वसन्ते क्रियते नृप ।
तस्य श्रीर्ब्रह्मवृद्धिश्च ब्राह्मणस्य विवर्धते ॥ ५०

क्षत्रियस्याग्निराधेयो ग्रीष्मे श्रेष्ठस्स वै नृप ॥ ५०॥

येनाधानं तु वै ग्रीष्मे क्रियते तस्य वर्धते ।
श्रीः प्रजाः पशवश्चैव वित्तं तेजो बलं यशः ॥ ५१॥

शरद्वात्रेऽथ वैश्यस्य ह्याधानीयो हुताशनः ।
शरद्वात्रं स्वयं वैश्यो वैश्ययोनिस्स उच्यते ॥ ५२॥

शरद्याधानमेवं वै क्रियते येन पाण्डव ।
तस्यापि श्रीः प्रजाऽऽयुश्च पशवोऽर्थश्च वर्धते ॥ ५३॥

पशवस्सर्व एवैते त्रिभिर्वेदैरलङ्कृताः ।

1. अ-गा-च—ग्निहोत्रं च

अग्निहोत्रात् प्रवर्तन्ते तैरेव ध्रियते जगत् ॥ ५४॥
ग्राम्यारण्याश्च पशवस् तथा वृक्षास्तृणानि च ।
फलान्योषधयश्चापि अग्निहोत्रकृते हि ताः ॥ ५५॥
रसास्स्नेहास्तथा गन्धा रत्नानि मणयस्तथा ।
काञ्चनानि च लोहानि ह्यग्निहोत्रकृतेऽभवन् ॥ ५६॥
आयुर्वेदो धनुर्वेदो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं च तत् सर्वम् अग्निहोत्रकृते कृतम् ॥ ५७॥
[1]छन्दश्शिक्षा च कल्पाश्च तथा व्याकरणं नृप ।
ज्योतिश्शास्त्रं निरुक्तं चाप्यग्निहोत्रकृते कृतम् ॥ ५८॥
इतिहासपुराणाश्च गाथाश्चोपनिषत् तथा ।
आथर्वणानि कर्माणि चाग्निहोत्रकृते कृतम् ॥ ५९॥
यच्चैतस्यां पृथिव्यां हि किञ्चिदस्ति चराचरम् ।
तत् सर्वमग्निहोत्रस्य कृते सृष्टं स्वयम्भुवा ॥ ६०॥
अग्निहोत्रस्य दर्शस्य पूर्णमासस्य चाप्यथ ।
यूपेष्टिपशुबन्धानां सोमपानक्रियावताम् ॥ ६१॥
तिथिनक्षत्रयोगानां मुहूर्तकरणात्मनाम् ।
कालस्य वेदनार्थं तु ज्योतिर्ज्ञानं कृतं पुरा ॥ ६२॥
[2]ऋग्यजुस्साममन्त्राणां श्लोकतत्त्वार्थचिन्तनात् ।

1. ब—इतः श्लोकद्वयं नास्ति 2. क-ख—अर्धषट्कं नास्ति

प्रत्यापत्तिविकल्पानां छन्दोज्ञानं प्रकल्पितम् ॥ ६३॥

वर्णाक्षरपदार्थानां सन्धिलिङ्गविवक्षितम् ।
नामधातुविवेकार्थं पुरा व्याकरणं कृतम् ॥ ६४॥

यूपवेद्यध्वरार्थं तु प्रोक्षणश्रवणाय तु ।
यज्ञदैवतयोगार्थं शिक्षाज्ञानं प्रकल्पितम् ॥ ६५॥

यज्ञपात्रपवित्रार्थं द्रव्यसम्भारणाय च ।
सर्वयज्ञविकल्पाय पुरा कल्पं प्रकल्पितम् ॥ ६६॥

नामधातुविभक्तीनां तत्त्वार्थनियमाय च ।
सर्ववेदनिरुक्तानां निरुक्तमृषिभिः कृतम् ॥ ६७॥

वेद्यर्थं पृथिवी सृष्टा सम्भारार्थं तथैव च ।
इध्मार्थमथ यूपार्थं ब्रह्मा चक्रे वनस्पतिम् ॥ ६८॥

ग्राम्यारण्याश्च पशवो जायन्ते यज्ञकारणात् ।
मन्त्राणां विनियोगं च प्रेषितश्रवणं तथा ॥ ६९॥

अनुयाजप्रयाजाश्च मरुतां शंसिनस्तथा ।
औद्गात्रं चैव साम्नां वै प्रतिप्रस्थानमेव च ॥ ७०॥

विष्णुक्रमाणां क्रमणं दक्षिणावभृथं तथा ।
[1]त्रिकालमर्चनं चैव स्थानेषूपहृतं तथा ॥ ७१॥

देवताग्रहणं मोक्षं हविषां श्रपणं तथा ।

1. अ—नास्तीदमर्धम्

नावबुद्ध्यन्ति ये विप्रा निन्दन्ति च पशोर्वधम् ॥ ७२॥
ते यान्ति नरकं घोरं रौरवं तमसाऽऽवृतम् ॥ ७३

शतवर्षसहस्राणि तत्र स्थित्वा नराधमाः ।
क्रिमिभिर्भक्ष्यमाणाश्च तिष्ठेयुः पूयशोणिते ॥ ७४

यूपास्तु मन्त्रसंस्कारैर् एषां वै पशवस्तथा ।
यजमानेन सहितास् स्वर्गं यान्ति नरेश्वर ॥ ७५

यावत्कालं हि यज्वा वै स्वर्गलोके महीयते ।
तावत्कालं प्रमोदन्ते पशवो ह्यध्वरे हताः ॥ ७६

वृक्षा यूपत्वमिच्छन्ति पशुत्वं पशवस्तथा ।
तृणानीच्छन्ति बर्हिष्ट्वं ओषध्यश्च हविष्यताम् ॥ ७७

सोमत्वं च लतास्सर्वा वेदित्वं च वसुन्धरा ॥ ७७॥
यस्मात् पशुत्वमिच्छन्ति पशवस्स्वर्गलिप्सया ।
तस्मात् पशुवधे हिंसा नास्ति यज्ञेषु पाण्डव ॥ ७८॥

[1]अहिंसा वैदिकं कर्म ब्रह्मकर्मेति तत्कृतम् ॥ ७९

वेदोक्तं ये न कुर्वन्ति हिंसानुज्ञा क्रतून् द्विजाः ।
सद्यश्शूद्रत्वमायान्ति प्रेत्य चण्डालतामपि ॥ ८०

गावो यज्ञार्थमुत्पन्ना दक्षिणार्थं तथैव च ।
सुवर्णं रजतं चैव पात्रकुम्भार्थमेव च ॥ ८१

1. अ—अर्धचतुष्टयं नास्ति

दर्भास्संस्तरणार्थं तु रक्षसां रक्षणाय च ।
यजनार्थं द्विजास्सृष्टास् तारका दिवि देवताः ॥ ८२

क्षत्रिया रक्षणार्थं तु वैश्या वार्तानिमित्ततः ।
शुश्रूषार्थं त्रयाणां तु शूद्रास्सृष्टास्स्वयम्भुवा ॥ ८३
एवमेतज्जगत् सर्वम् अग्निहोत्रकृते कृतम् ॥ ८३॥

नावबुध्यन्ति ये चैवं नरास्तु तमसा वृताः ।
ते यान्ति नरकं घोरं रौरवं नाम विश्रुतम् ॥ ८४॥

रौरवाद्विप्रयुक्तास्तु क्रिमियोनिं व्रजन्ति ते ॥ ८५

यथोक्तमग्निहोत्राणां शुश्रूषन्ति च ये द्विजाः ।
तैस्तु दत्तं हुतं चेष्टं दत्तमध्यापितं भवेत् ॥ ८६

एवमिष्टं च पूर्तं च यद्विप्रैः क्रियते नृप ।
तत् सर्वं सम्यगाहृत्य चादित्ये स्थापयाम्यहम् ॥ ८७

मया स्थापितमादित्ये लोकस्य सुकृतं हि यत् ।
धारयेत् तत् सहस्रांशुस् सुकृतं ह्यग्निहोत्रिणाम् ॥ ८८

[1-2]यावत्कालं तु तिष्ठन्ति लोके चाप्यग्निहोत्रिणः ।
तावदेव हि पुण्येन दीप्यते रविणाऽम्बरे ॥ ८९

स्वर्गे स्वर्गं गतानां तु वीर्याद्भवति वीर्यवान् ।
तत्र ते ह्युपभुञ्जन्ति ह्यग्निहोत्रस्य तत् फलम् ॥ ९०

1. अ—अर्धषट्कं नास्ति 2. क-ख—इदमर्धं नास्ति

समानरूपा देवानां तिष्ठन्त्याभूतसम्प्लवम् ॥ ९०॥

वृथाग्निना च ये केचिद् दह्यन्ते ह्यग्निहोत्रिणः ।
न तेऽग्निहोत्रिणां लोकं मनसाऽपि व्रजन्ति वै ॥ ९१॥

वीरघ्नास्ते दुराचारा दरिद्रास्तु नराधमाः ।
विकला व्याधिताश्चापि जायन्ते शूद्रयोनिषु ॥ ९२॥

तस्मादप्रोषितैर्नित्यम् अग्निहोत्रं द्विजातिभिः ।
होतव्यं विधिवद्राजन्नूर्ध्वामिच्छन्ति ये गतिम् ॥ ९३॥

आत्मवत् तत्र मन्तव्यम् अग्निहोत्रं युधिष्ठिर ।
न त्याज्यं क्षणमप्येतद् गृहीतव्यं द्विजातिभिः ॥ ९४॥

वृद्धत्वेऽप्यग्निहोत्रं वै गृह्णन्ति विधिवद्द्विजाः ।
शूद्रान्नाद्विरता दान्तास् संयतेन्द्रियबुद्धयः ॥ ९५॥

पञ्चयज्ञपरा नित्यं क्रोधलोभविवर्जिताः ।
द्विकालमतिथींश्चैव पूजयन्ति च भक्तितः ॥ ९६॥

तेऽपि सूर्योदयप्रख्यैर् विमानैर्वायुवेगिभिः ।
मम लोके प्रमोदन्ते दृष्ट्वा मां च युधिष्ठिर ॥ ९७॥

मन्वन्तरं च तत्रैकं मोदिता द्विजसत्तमाः ।
[1]इह मानुष्यके लोके भवन्ति द्विजसत्तमाः ॥ ९८॥

1. क-ख—इदमर्धं नास्ति

बालाहिताग्नयो ये च शूद्रान्नाद्विरतास्सदा ।
क्रोधलोभविनिर्मुक्ताः प्रातस्स्नानपरायणाः ॥ ९९॥

यथोक्तमग्निहोत्रं वै जुह्वते विजितेन्द्रियाः ॥ १००

आतिथेयास्सदा सौम्या द्विकालं मत्परायणाः ।
ते यान्त्यपुनरावृत्तिं भित्त्वा चादित्यमण्डलम् ॥ १०१

मम लोकं सपत्नीका यानैस्सूर्योदयप्रभैः ।
तत्र बालार्कसङ्काशाः कामगाः कामरूपिणः ॥ १०२

ऐश्वर्यगुणसम्पन्नाः क्रीडन्ति च यथासुखम् ।
इत्येषा ह्याहिताग्नीनां विभूतिः पाण्डुनन्दन ॥ १०३

ये च वेदश्रुतिं केचिन्निन्दमानाः ह्यबुद्धयः ।
[1]प्रमाणं न च कुर्वन्ति ते यान्ति ह्यक्षयं तमः ॥ १०४

प्रमाणमितिहासं च वेदान् कुर्वन्ति ये द्विजाः ।
ते यान्त्यमरसायुज्यं नित्यमास्तिक्यबुद्धयः ॥ १०५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

॥ ९२॥ अनुगीतापर्वणि शततमोऽध्यायः ॥ १०० ॥

[ अस्मिन्नध्याये १०५ श्लोकाः ]

---

1. घ—इतः सार्धः श्लोको नास्ति

## ॥ सप्तदशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति चान्द्रायणविधिनिरूपणपूर्वकं तदाचरणफल-कथनम् ॥ १ ॥

युधिष्ठिरः—

चक्रायुध नमस्तेऽस्तु देवेश गरुडध्वज ।
चान्द्रायणविधिं पुण्यम् आख्याहि भगवन् मम ॥ १

श्रीभगवान्—

शृणु पाण्डव तत्त्वेन सर्वपापप्रणाशनम् ।
पापिनो येन शुद्ध्यन्ति तत् ते वक्ष्यामि सर्वशः ॥ २

ब्राह्मणः क्षत्रियो वाऽपि वैश्यो वा चरितव्रतः ।
यथावत् कर्तुकामो यस् तस्येयं प्रथमा क्रिया ॥ ३

शोधयेत्तु शरीरं स्वं पञ्चगव्येन यन्त्रितम् ।
सशिरः कृष्णपक्षे तु ततः कुर्वीत वापनम् ॥ ४

शुद्धवासाश्शुचिर्भूत्वा मौञ्जीं बध्नीत मेखलाम् ।
पालाशदण्डमादाय ब्रह्मचारिव्रते स्थितः ॥ ५

कृतोपवासः पूर्वं तु शुक्लप्रतिपदि द्विजः ।
नदीसङ्गमतीर्थेषु शुचौ देशे गृहेऽपि वा ॥ ६

गोमयेनोपलिप्तेऽथ स्थण्डिलेऽग्निं निधापयेत् ॥ ६॥

आघारावाज्यभागौ च प्रणवं व्याहृतिं तथा ।
वारुणं चैव पञ्चैव हुत्वा सर्वान् यथाक्रमम् ॥ ७॥

सत्याय विष्णवे चेति ब्रह्मर्षिभ्योऽथ ब्रह्मणे ।
विश्वेभ्यश्चैव देवेभ्यस् सप्रजापतये तथा ॥ ८॥

षट्कृत्वो जुहुयात् पश्चात् प्रायश्चित्ताहुतीर्द्विजः ।
ततस्समापयेदग्निं शान्तिं कृत्वाऽथ पौष्टिकम् ॥ ९॥

प्रणम्य चाग्निं सोमं च भस्म धृत्वा तथात्मनि ॥ १०

नदीं गत्वा विविक्तात्मा सोमाय वरुणाय च ।
आदित्याय नमस्कृत्वा ततस्स्नायात् समाहितः ॥ ११

उत्तीर्योदकमाचम्य त्वासीनः पूर्वतोमुखः ।
प्राणायामं ततः कृत्वा पवित्रैरभिषेचनम् ॥ १२

आचान्तस्त्वभिवीक्षेत चोर्ध्वबाहुर्दिवाकरम् ।
[1]कृताञ्जलिपुटः पश्चात् कुर्याच्चैव प्रदक्षिणम् ॥ १३

नारायणं वा रुद्रं वा ब्रह्माणमथवाऽपि वा ।
आरण्यं मम सूक्तं वा प्राग्भोजनमथापि वा ॥ १४

वीरघ्नमृषभं वाऽपि तथा चाप्यघमर्षणम् ।
गायत्रीं मम देवीं वा सावित्रीं वा जपेत् ततः ॥ १५
शतं वाऽष्टशतं वाऽपि सहस्रमथवा परम् ॥ १५॥

1. च—अर्धषट्कं नास्ति

ततो मध्याह्नकाले वै पायसं यावकं हि वा ।
पाचयित्वा प्रयत्नेन प्रयतस्सुसमाहितः ॥ १६॥

[1]पात्रं ततस्समादाय सौवर्णं राजतं तु वा ।
ताम्रं वा मृन्मयं वाऽपि औदुम्बरमथापि वा ॥ १७॥

वृक्षाणां याज्ञियानां तु पर्णैरार्द्रैरकुत्सितैः ।
पुटकेन तु गुप्तेन चरेद्भैक्षं समाहितः ॥ १८॥

ब्राह्मणानां गृहाणां तु सप्तानां नापरं व्रजेत् ।
गोदोहमात्रं तिष्ठेत्तु वाग्यतस्संयतेन्द्रियः ॥ १९॥

[2]न हसेच्च न वीक्षेच्च नाभिभाषेत वा स्त्रिया ।
दृष्ट्वा मूत्रपुरीषं वा चण्डालं वा रजस्वलाम् ॥ २०॥
पतितं च तथा श्वानम् आदित्यमवलोकयेत् ॥ २१

यो हि पादुकमारुह्य सर्वदा प्रचरेद्द्विजः ।
तं दृष्ट्वा पापकर्माणम् आदित्यमवलोकयेत् ॥ २२

ततस्त्वावसथं प्राप्तो भिक्षां निक्षिप्य भूतले ।
प्रक्षाल्य पादावाजानु हस्तावाकूर्परं पुनः ॥ २३
आचम्य वारिणा तेन वह्निं विप्रांश्च पूजयेत् ॥ २३॥

पञ्च सप्ताथवा कुर्याद् भागान् भैक्षस्य तस्य वै ।
तेषामन्यतमं पिण्डम् आदित्याय निवेदयेत् ॥ २४॥

---

1. अ-क-ख-घ—अर्धचतुष्टयं नास्ति 2. घ—नास्तीदमर्धम्

ब्रह्मणे चाग्नये चैव सोमाय वरुणाय च ।
विश्वेभ्यश्चैव देवेभ्यो दद्यादन्नं यथाक्रमम् ॥ २५॥
अवशिष्टमथैकं तु वक्त्रमात्रं प्रकल्पयेत् ॥ २६
अङ्गुल्यग्रे स्थितं पिण्डं गायत्र्या चाभिमन्त्रयेत् ।
[1]अङ्गुलीभिस्त्रिभिः पिण्डं प्राश्नीयात् प्राङ्मुखश्शुचिः ॥ २७
यथा च वर्धते सोमो ह्रसते च यथा पुनः ।
तथा पिण्डाश्च वर्धन्ते ह्रसन्ते च दिने दिने ॥ २८
त्रिकालं स्नानमस्योक्तं द्विकालमथवा सकृत् ।
ब्रह्मचारी सदा वाऽपि न च वस्त्रं प्रपीडयेत् ॥ २९
स्थानेन दिवसं तिष्ठेद् रात्रौ वीरासनं व्रजेत् ।
भवेत् स्थण्डिलशायी वाऽप्यथवा वृक्षमूलकः ॥ ३०
वल्कलं यदि वा क्षौमं शाणं कार्पासकं तथा ।
आच्छादनं भवेत् तस्य वस्त्रार्थं पाण्डुनन्दन ॥ ३१
एवं चान्द्रायणे पूर्णे मासस्यान्ते प्रयत्नवान् ।
ब्राह्मणान् भोजयेद्भक्त्या दद्याच्चैव तु दक्षिणाम् ॥ ३२
चान्द्रायणेन चीर्णेन यत् कृतं तेन दुष्कृतम् ।
तत् सर्वं तत्क्षणादेव भस्मीभवति काष्ठवत् ॥ ३३
ब्रह्महत्या च गोहत्या सुवर्णस्तैन्यमेव च ।

1. अ—इदमर्धं नास्ति

भ्रूणहत्या सुरापानं गुरोर्दारव्यतिक्रमः ॥ ३४

एवमन्यानि पापानि पातकीयानि यानि च ।
चान्द्रायणेन नश्यन्ति वायुना पांसवो यथा ॥ ३५

अनिर्दशाया गोः क्षीरम् औष्ट्रमाविकमेव च ।
मृतसूतकयोश्चान्नं भुक्त्वा चान्द्रायणं चरेत् ॥ ३६

उपपातकिनश्चान्नं पतितान्नं तथैव च ।
[1]शूद्रस्योच्छेषणं चैव भुक्त्वा चान्द्रायणं चरेत् ॥ ३७

[2]आकाशस्थं तु हस्तस्थम् अधस्तस्तं तथैव च ।
परहस्तस्थितं चैव भुक्त्वा चान्द्रायणं चरेत् ॥ ३८

अथाग्रेदिधिषोरन्नं दिधिषूपपतेस्तथा ।
परिवेत्तुस्तथा चान्नं परिवित्तान्नमेव च ॥ ३९

कुण्डान्नं गोलकान्नं च देवलान्नं तथैव च ।
तथा पुरोहितस्यान्नं भुक्त्वा चान्द्रायणं चरेत् ॥ ४०

[3]सुरासवं विषं सर्पिर् लाक्षा लवणमेव च ।
तैलं चापि च विक्रीणन् द्विजश्चान्द्रायणं चरेत् ॥ ४१

[4]एकोद्दिष्टं तु यो भुङ्क्ते जनमध्यगतोऽपि यः ।
भिन्नभाण्डेषु यो भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ॥ ४२

---

1. क—अर्धपञ्चकं नास्ति
2. ख-घ—श्लोकोऽयं नास्ति
3. ग—अर्धद्वयं नास्ति
4. अ—अर्धद्वयं नास्ति

यो भुङ्क्तेऽनुपनीतेन यो भुङ्क्ते च स्त्रिया सह ।
यो भुङ्क्ते कन्यया सार्धं द्विजश्चान्द्रायणं चरेत् ॥ ४३
उच्छिष्टं स्थापयेद्विप्रो यो मोहाद्भोजनान्तरे ।
दद्याद्वा यदि सम्मोहाद् द्विजश्चान्द्रायणं चरेत् ॥ ४४
तुम्बकोशातकं चैव पलाण्डुं गृञ्जनं तथा ।
छत्राकं लशुनं चैव भुक्त्वा चान्द्रायणं चरेत् ॥ ४५
[1]द्विजः पर्युषितं चान्नं पक्वं परगृहागतम् ।
विपक्वं च तथा मांसं भुक्त्वा चान्द्रायणं चरेत् ॥ ४६
उदक्यया शुना वाऽपि चण्डालैर्वा द्विजोत्तमः ।
दृष्टमन्नं तु भुञ्जानो द्विजश्चान्द्रायणं चरेत् ॥ ४७
[2]एतत् पुरा विशुद्ध्यर्थम् ऋषिभिश्चरितव्रतम् ।
पावनं सर्वभूतानां पुण्यं पाण्डव चोदितम् ॥ ४८
एतेन वसवो रुद्राश् चादित्याश्च दिवं गताः ।
एतदद्य परं गुह्यं पवित्रं पापनाशनम् ॥ ४९
यथोक्तमेतद्यः कुर्याद् द्विजः पापप्रणाशनम् ।
[3]स दिवं याति पूतात्मा निर्मलादित्यसन्निभः ॥ ५०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥
॥ ५२ ॥ अनुगीतापर्वणि एकाधिकशततमोऽध्यायः ॥ १०१ ॥
[ अस्मिन्नध्याये ५० श्लोकाः ]

---

1. ख-घ—श्लोकोऽयं नास्ति
2. ग—इदमर्धं नास्ति
3. ग—इदमर्धं नास्ति

## ॥ अष्टादशाधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति कार्तिकादिद्वादशमासेषु एकभुक्तव्रताचरणप्रकारनिरूपणपूर्वकं तत्फलकथनम् ॥ १ ॥

वैशम्पायनः—

केशवेनैवमुक्ते तु चान्द्रायणविधिक्रमे ।
अपृच्छत् पुनरन्यांश्च धर्मान् धर्मात्मजो नृप ॥ १

युधिष्ठिरः—

सर्वभूतपते श्रीमन् सर्वभूतनमस्कृत ।
सर्वभूतहितं धर्मं सर्वज्ञ कथयस्व मे ॥ २

श्रीभगवान्—

यद्दरिद्रजनस्यापि स्वर्ग्यं सुखकरं भवेत् ।
सर्वपापप्रशमनं तच्छृणुष्व युधिष्ठिर ॥ ३

कार्तिकाद्यास्तु ये मासा द्वादशैव प्रकीर्तिताः ।
तेष्वेकभुक्तनियमस् सर्वेषामुच्यते मया ॥ ४

कार्तिके यस्तु वै मासे नन्दायां संयतेन्द्रियः ।
एकभुक्तेन मद्भक्तो माममेकं तु वर्तते ॥ ५

जलं वा न पिबेन्मासे नान्तरा भोजनात् परम् ।
आदित्यरूपं मां नित्यम् अर्चयन् सुसमाहितः ॥ ६

व्रतान्ते भोजयेद्विप्रान् दक्षिणां सम्प्रदाय च ।
क्रोधलोभविनिर्मुक्तस् तस्य पुण्यफलं शृणु ॥ ७

विधिवत् कपिलादाने यत् पुण्यं समुदाहृतम् ।
तत् पुण्यं समनुप्राप्य सूर्यलोके महीयते ॥ ८

ततश्चापि च्युतः कालात् [1]पुरुषेषूपजायते ॥ ८॥

मार्गशीर्षं तु यो मासम् एकभुक्तेन वर्तते ।
कामं क्रोधं च लोभं च परित्यज्य यथाविधि ॥ ९॥

स्नात्वा चादित्यरूपं माम् अर्चयेन्नियतेन्द्रियः ।
जपन्नेव तु गायत्रीं मामिकां वाग्यतश्शुचिः ॥ १०॥

[2]मासे परिसमाप्ते तु भोजयित्वा द्विजाञ्शुचिः ।
तानर्चयति मद्भक्त्या तस्य पुण्यफलं शृणु ॥ ११॥

अग्निहोत्रे कृते पुण्यम् आहिताग्नेश्च यद्भवेत् ।
तत्पुण्यफलमासाद्य यानेनाम्बरशोभिना ॥ १२॥

सप्तर्षिलोके चरति यथाकालं यथासुखम् ॥ १३

ततश्चापि च्युतः कालाद्धरिवर्षेषु जायते ।
तत्र प्रकामं क्रीडित्वा राजा पश्चाद्भविष्यति ॥ १४

पौषमासं क्षिपेदेवम् एकभुक्तेन यो नरः ।
अर्चयन्नेव मां नित्यं मद्गतेनान्तरात्मना ॥ १५

1. क-ख—कुरुष्वेषूप च—इलावर्षेषु 2. अ—इदमर्धं नास्ति

अहिंसासत्यनिरतः क्रोधहर्षविवर्जितः ।
एवं युक्तस्य राजेन्द्र शृणु यत् फलमुत्तमम् ॥ १६

विप्रातिथ्यसहस्रेषु यत् पुण्यं समुदाहृतम् ।
तत् पुण्यं समनुप्राप्य शक्रलोके महीयते ॥ १७

[1]अवतीर्णस्ततः कालाद् इलावर्षे तु जायते ।
तत्र स्थित्वा चिरं कालम् अस्मिन् विप्रो भविष्यति ॥ १८

माघमासं तथा यस्तु वर्तते चैकभक्ततः ।
मदर्चनपरो भूत्वा डम्भक्रोधविवर्जितः ॥ १९

मामिकामपि सावित्रीं सन्ध्यायां तु जपेद्बुधः ॥ १९॥

दत्त्वा तु दक्षिणामन्ते भोजयित्वा द्विजानपि ।
नमस्करोति तान् भक्त्या मद्गतेनान्तरात्मना ॥ २०॥

त्रिकालं स्नानयुक्तस्य तस्य पुण्यफलं शृणु ॥ २१

नीलकण्ठप्रयुक्तेन यानेनाम्बरशोभिना ।
पितृलोकं व्रजेच्छ्रीमान् सेव्यमानोऽप्सरोगणैः ॥ २२

तत्र प्रकामं क्रीडित्वा भद्राश्वेषूपजायते ।
ततश्च्युतश्चतुर्वेदी विप्रो भवति भूतले ॥ २३

यः क्षिपेत् फाल्गुनं मासम् एकभक्तो जितेन्द्रियः ।
नमो ब्रह्मण्यदेवायेत्येतन्मन्त्रं जपेत् सदा ॥ २४

---

1. क-ख—इदमर्धं नास्ति

पायसं भोजयेद्विप्रान् व्रतान्ते संयतेन्द्रियः ।
मदर्चनपरोऽक्रोधस् तस्य पुण्यफलं शृणु ॥ २५

विमानं सारसैर्युक्तम् आरूढः कामगामि च ।
नक्षत्रलोके रमते नक्षत्रसदृशाकृतिः ॥ २६

ततश्चापि च्युतः कालात् केतुमालेषु जायते ।
तत्र प्रकामं क्रीडित्वा मानुषेषु मुनिर्भवेत् ॥ २७

चैत्रमासं तु यो राजन्नेकभक्तेन वर्तते ।
ब्रह्मचारी तु मद्भक्तस् तस्य पुण्यफलं शृणु ॥ २८

यदग्निहोत्रिणः पुण्यं यथोक्तव्रतचारिणः ।
तत्पुण्यफलमासाद्य चन्द्रलोके महीयते ॥ २९

[1]ततोऽवतीर्णो जायेत वर्षे रमणके पुनः ।
भुक्त्वा कामांस्ततस्तस्मिन्निह राजा भविष्यति ॥ ३०

वैशाखे यस्तु वै मासे एकभक्तेन वर्तते ।
द्विजमग्रासने कृत्वा भुञ्जन् भूमौ च वाग्यतः ॥ ३१

नमो ब्रह्मण्यदेवायेत्यर्चयित्वा दिवाकरम् ।
व्रतान्ते भोजयेद्विप्रांस् तस्य पुण्यफलं शृणु ॥ ३२

फलं यद्विधिवत् प्रोक्तम् अग्निष्टोमातिरात्रयोः ।
तत्पुण्यफलमासाद्य देवलोके महीयते ॥ ३३

---

1. क-ख—अर्धाष्टकं नास्ति

ततो हैमवते वर्षे जायते कालपर्ययात् ।
तत्र प्रकामं क्रीडित्वा विप्रः पश्चाद्भविष्यति ॥ ३४

ज्येष्ठमासं तु यो राजन्नेकभक्तेन वर्तते ।
विप्रमग्रासने कृत्वा भूमौ भुञ्जन् यथाविधि ॥ ३५

नमो ब्रह्मण्यदेवायेत्यर्चयन् मां यथाविधि ।
डम्भानृतविनिर्मुक्तस् तस्य पुण्यफलं शृणु ॥ ३६

चीर्णे चान्द्रायणे सम्यग् यत् पुण्यं समुदाहृतम् ।
तत्पुण्यफलमासाद्य देवलोके महीयते ॥ ३७

अथोत्तरकुरुष्वेव जायते निर्गतस्ततः ।
ततश्चापि च्युतः कालाद् इह लोके द्विजो भवेत् ॥ ३८

आषाढमासं यो राजन्नेकभक्तेन वर्तते ।
ब्रह्मचारी जितक्रोधो मदर्चनपरायणः ॥ ३९

विप्रमग्रासने कृत्वा भूमौ भुञ्जञ्जितेन्द्रियः ।
कृत्वा त्रिषवणस्नानम् अष्टाक्षरविधानतः ॥ ४०

व्रतान्ते भोजयेद्विद्वान् पायसेन युधिष्ठिर ।
गुडोदनेन राजेन्द्र तस्य पुण्यफलं शृणु ॥ ४१

कपिलाशतदानस्य यत् पुण्यं पाण्डुनन्दन ।
तत्पुण्यफलमासाद्य देवलोके महीयते ॥ ४२

ततोऽवतीर्णः कालेन शाकद्वीपे प्रजायते ।

ततश्चापि च्युतः कालाद् इह विप्रो भविष्यति ॥ ४३
श्रावणं यः क्षिपेन्मासम् एकभक्तेन संयतः ।
नमो ब्रह्मण्यदेवायेत्युक्त्वा मामर्चयेत् सदा ॥ ४४
विप्रमग्रासने कृत्वा भूमौ भुञ्जन् यथाविधि ॥ ४४॥
पायसेनार्चयन् विप्राञ् जितक्रोधो जितेन्द्रियः ।
लोभमोहविनिर्मुक्तस् तस्य पुण्यफलं शृणु ॥ ४५॥
कपिलादस्य यत् पुण्यं विधिवत् तस्य पाण्डव ।
तत् पुण्यं समनुप्राप्य शक्रलोके महीयते ॥ ४६॥
ततश्चापि च्युतः कालात् कुशद्वीपे प्रजायते ।
तत्र प्रकामं क्रीडित्वा विप्रो भवति मानुषे ॥ ४७॥
यस्तु भाद्रपदं मासम् एकभक्तेन वर्तते ।
ब्रह्मचारी जितक्रोधस् सत्यसन्धो जितेन्द्रियः ॥ ४८॥
विप्रमग्रासने कृत्वा पाकभेदविवर्जितः ।
नमो ब्रह्मण्यदेवायेत्युक्त्वाऽस्य चरणौ स्पृशेत् ॥ ४९॥
तिलान् वाऽपि घृतान् वाऽपि व्रतान्ते दक्षिणां ददत् ।
मद्भक्तस्य नरश्रेष्ठ तस्य पुण्यफलं शृणु ॥ ५०॥
यत् फलं विधिवत् प्रोक्तं राजसूयाश्वमेधयोः ।
तत् पुण्यफलमासाद्य शक्रलोके महीयते ॥ ५१॥
ततश्चापि च्युतः कालाज् जायते धनदालये ।

तत्र प्रकामं क्रीडित्वा राजा भवति मानुषे ॥ ५२॥

यश्चाप्याश्वयुजे मासम् एकभक्तेन वर्तते ॥ ५३

[1]मद्रायर्ची जपेद्भक्त्या मद्गतेनान्तरात्मना ।
द्विसन्ध्यं वा त्रिसन्ध्यं वा शतमष्टोत्तरं तु वा ॥ ५४

नमो ब्रह्मण्यदेवायेत्यसकृन्मां प्रणम्य च ।
[2]विप्रमग्रासने कृत्वा संयतेन्द्रियमानसः ॥ ५५

व्रतान्ते भोजयेद्विप्रांस् तस्य पुण्यफलं शृणु ॥ ५५॥

अश्वमेधस्य यत् पुण्यं विधिवत् पाण्डुनन्दन ।
तत्पुण्यफलमासाद्य मम लोके महीयते ॥ ५६॥

[3]ततश्चापि च्युतः कालाच् छ्वेतद्वीपे प्रजायते ।
तत्र भुक्त्वा महाभोगान् अत्र विप्रवरो भवेत्* ॥ ५७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

॥ ५२ ॥ अनुगीतापर्वणि द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

[ अस्मिन्नध्याये ५७॥ श्लोकाः ]

---

1. अ—हृदमर्धं नास्ति
2. च—कोश एकस्मिन्नेवेदमर्धं दृश्यते ।
3. अ-ग-च—हृदमर्धं नास्ति
* च—नाऽध्यायसमाप्तिर्दृश्यते ।

## ॥ एकोनविंशत्यधिकशततमोऽध्यायः ॥

श्रीकृष्णेन युधिष्ठिरं प्रति एकं संवत्सरं एकभक्तव्रतकरणस्य फल-कथनम् ॥ १ ॥

युधिष्ठिरः—

एवं संवत्सरं पूर्णम् एकभक्तेन यः क्षिपेत् ।
तस्य पुण्यफलं यद्वै तन्ममाचक्ष्व केशव ॥ १

श्रीभगवान्—

शृणु पाण्डव सत्यं मे वचनं पुण्यमुत्तमम् ।
यदकृत्वाऽथवा कृत्वा नरः पापैः प्रमुच्यते ॥ २

एकभक्तेन वर्तेत नरस्संवत्सरं तु यः ।
ब्रह्मचारी ह्यधश्शायी जितक्रोधो जितेन्द्रियः ॥ ३

शुचिस्स्नानरतो व्यग्रस् सत्यवागनसूयकः ।
अर्चयन्नेव मां नित्यं मद्व्रतेनान्तरात्मना ॥ ४

सन्ध्ययोस्तु जपेन्नित्यं मद्गायत्रीं समाहितः ।
नमो ब्रह्मण्यदेवायेत्यसकृन्मां प्रणम्य च ॥ ५

विप्रमग्रासने कृत्वा यावकं भैक्षमेव वा ।
भुक्त्वा तु वाग्यतो भूमावाचान्तस्य द्विजन्मनः ॥ ६
नमोऽस्तु वासुदेवायेत्युक्त्वा तु चरणौ स्पृशेत् ॥ ६॥

मासे मासे समाप्ते तु भोजयित्वा द्विजाञ्शुचीन् ।
संवत्सरे ततः पूर्णे दद्यात्तु व्रतदक्षिणाम् ॥ ७॥

नवनीतमयीं गां वा तिलधेनुमथापि वा ।
विप्रहस्तच्युतैस्तोयैस् साहिरण्यैस्समुक्षितः ॥ ८॥

तस्य पुण्यफलं राजन् कथ्यमानं मया शृणु ॥ ९

दशजन्मकृतं पापं ज्ञानतोऽज्ञानतोऽपि वा ।
तद्विनश्यति तस्याशु नात्र कार्या विचारणा ॥* १०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥
॥ ९२ ॥ अनुगीतापर्वणि त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥
[ अस्मिन्नध्याये १० श्लोकाः ]

---

## ॥ विंशत्यधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति केशवादिभगवन्मूर्त्युपास्तिपूर्वकं मार्गशीर्षादिद्वादशद्वादशीव्रताचरणफलकथनम् ॥ १ ॥ युधिष्ठिरेण विस्तरेण कृष्णस्तवनम् ॥ २ ॥ पुनः कृष्णेन युधिष्ठिराय एकादश्युपवासपूर्वकं द्वादश्यां भगवत्पूजायाः फलकथनम् ॥ ३ ॥

---

युधिष्ठिरः—

सर्वेषामुपवासानां यच्छ्रेयस्सुमहत्फलम् ।
यच्च निश्श्रेयसं लोके तद्भवान् वक्तुमर्हति ॥ १

---

* अ-क-ख-ग-घ—कोशेषु नास्त्यध्यायसमाप्तिर्दृश्यते ।

श्रीभगवान्—

शृणु राजन् मया पूर्वं यथा गीतं तु नारदे ।
तथा ते कथयिष्यामि मद्भक्ताय युधिष्ठिर ॥ २

यस्तु भक्त्या शुचिर्भूत्वा पञ्चम्यां मे नराधिप ।
उपवासव्रतं कुर्यात् त्रिकालं चार्चयंस्तु माम् ॥ ३

सर्वक्रतुफलं लब्ध्वा मम लोके महीयते ॥ ३॥

युधिष्ठिरः—

भगवन् देवदेवेश पञ्चमी नाम का तव ।
तामहं श्रोतुमिच्छामि कथयस्व ममाच्युत ॥ ४॥

श्रीभगवान्—

पर्वद्वयं च द्वादश्यौ श्रवणं च नराधिप ।
मत्पञ्चमीति विख्याता मत्प्रिया च विशेषतः ॥ ५॥

तस्मात्तु ब्राह्मणश्रेष्ठैर् मन्निवेशितबुद्धिभिः ।
उपवासस्तु कर्तव्यो मत्प्रियार्थं युधिष्ठिर ॥ ६॥

द्वादश्यामेव वा कुर्याद् उपवासमशक्नुवन् ।
तेनाहं परमां प्रीतिं यास्यामि नरपुङ्गव ॥ ७॥

अहोरात्रेण द्वादश्यां मार्गशीर्षेण केशवम् ।
उपोष्य पूजयेद्यो मां सोऽश्वमेधफलं लभेत् ॥ ८॥

द्वादश्यां पुष्यमासे तु नाम्ना नारायणं तु माम् ।

उपोष्य पूजयेद्यो मां वाजपेयफलं लभेत् ॥ ९॥

द्वादश्यां माघमासे तु मामुपोष्य तु माधवम् ।
पूजयेद्यस्समाप्नोति राजसूयफलं नृप ॥ १०॥

द्वादश्यां फाल्गुने मासि गोविन्दाख्यमुपोष्य माम् ।
अर्चयेद्यस्समाप्नोति ह्यतिरात्रफलं नृप ॥ ११॥

द्वादश्यां मासि चैत्रे तु मां विष्णुं समुपोष्य यः ।
पूजयन् फलमाप्नोति पौण्डरीकस्य यत् फलम् ॥ १२॥

द्वादश्यां मासि वैशाखे मधुसूदनसंज्ञितम् ।
उपोष्य पूजयेद्यो मां सोऽग्निष्टोमस्य पाण्डव ॥ १३॥

द्वादश्यां ज्येष्ठमासे तु मामुपोष्य त्रिविक्रमम् ।
अर्चयेद्यस्समाप्नोति गवां मेधफलं नृप ॥ १४॥

आषाढे वामनाख्यं मां द्वादश्यां समुपोष्य यः ।
नरमेधस्य स फलं प्राप्नुयान्नरसत्तमः ॥ १५॥

द्वादश्यां श्रावणे मासि श्रीधराख्यमुपोष्य माम् ।
[1]पूजयेद्यस्समाप्नोति पञ्चयज्ञफलं नृप ॥ १६॥

मासि भाद्रपदे यो मां हृषीकेशाख्यमर्चयेत् ।
उपोष्य स समाप्नोति सौत्रामणिफलं नृप ॥ १७॥

द्वादश्यामाश्वयुङ्मासे पद्मनाभमुपोष्य माम् ।

---

1. ग—अर्धचतुष्टयं नास्ति

अर्चयेद्यस्समाप्नोति गोसहस्रफलं नृप ॥ १८॥
द्वादश्यां कार्तिके मासि मां दामोदरसंज्ञितम् ।
उपोष्य पूजयेद्यस्तु सर्वक्रतुफलं लभेत् ॥ १९॥
केवलेनोपवासेन द्वादश्यां पाण्डुनन्दन ।
यत् फलं पूर्वमुद्दिष्टं तस्यार्धं लभते फलम् ॥ २०॥
श्रावणेऽप्येवमेवं मां योऽर्चयेद्भक्तिमान् नरः ।
मम सालोक्यमाप्नोति नात्र कार्या विचारणा ॥ २१॥
मासे मासे समभ्यर्च्य क्रमशो मामतन्द्रितः ।
पूर्णे संवत्सरे कुर्यात् पुनस्संवत्सरार्चनम् ॥ २२॥
एवं द्वादशवर्षं यो मद्भक्तो मत्परायणः ।
अविघ्नमर्चयानस्तु मम सालोक्यमाप्नुयात् ॥ २३॥
अर्चयेत् प्रीतिमान् यो मां द्वादश्यां वेदसंहिताम् ।
स पूर्वोक्तफलं राजँल्लभते नात्र संशयः ॥ २४॥
गन्धं पुष्पं फलं तोयं पत्रं वा [1]मूलमेव वा ।
द्वादश्यां मम यो दद्यात् ततो नान्योऽस्ति मत्प्रियः ॥ २५॥
एतेन विधिना सर्वे देवाश्शक्रपुरोगमाः ।
मद्भक्ता नरशार्दूल स्वर्गभोगांस्तु भुञ्जते ॥ २६॥

वैशम्पायनः—

एवं वदति देवेशे केशवे पाण्डुनन्दनः ।

---

1. अ-क-ख-घ—फलमेव वा। ग—जलमेव वा।

कृताञ्जलिपुटस्तोत्रम् इदं भक्त्याऽभ्युवाच ह ॥ २७॥

युधिष्ठिरः—

सर्वलोकेश देवेश हृषीकेश नमोऽस्तु ते ।
सहस्रशिरसे तुभ्यं सहस्राक्ष नमोऽस्तु ते ॥ २८॥

[1]त्रयीमय त्रयीनाथ त्रयीस्तुत नमो नमः ।
यज्ञात्मन् यज्ञसम्भूत यज्ञनाथ नमो नमः ॥ २९॥

चतुर्मूर्ते चतुर्बाहो चतुर्व्यूह नमो नमः ।
लोकात्मँल्लोककृन्नाथ लोकावास नमो नमः ॥ ३०॥

सृष्टिसंहारकर्त्रे ते नरसिंह नमो नमः ।
[2]भक्तप्रिय नमस्तेऽस्तु भक्तवत्सल ते नमः ॥ ३१॥

ब्रह्मावास नमस्तेऽस्तु ब्रह्मनाथ नमो नमः ॥ ३२

रुद्ररूप नमस्तेऽस्तु [3]रुद्रकर्मरताय ते ।
पञ्चयज्ञ नमस्तेऽस्तु सर्वयज्ञ नमो नमः ॥ ३३

[4]सृष्टिसंहारकर्त्रे ते रुद्रप्रिय नमोऽस्तु ते ।
कृष्ण प्रिय नमस्तेऽस्तु कृष्ण नाथ नमो नमः ॥ ३४

योगावास नमस्तेऽस्तु योगिनाथ नमो नमः ॥ ३४॥

---

1. अ-क-ख-घ-च—अर्धचतुष्टयं नास्ति
2. क-ख-घ—नास्तीदमर्धम्
3. क-ख—रुद्ररूपधराय च।
4. क-ख-ग-घ-च—नास्तीदमर्धम्।

हयवक्त्र नमस्तेऽस्तु चक्रपाणे नमो नमः ।
पञ्चभूत नमस्तेऽस्तु पञ्चायुध नमो नमः ॥ ३५॥

वैशम्पायनः—

भक्तिगद्गदया वाचा स्तुवत्येवं युधिष्ठिरे ।
गृहीत्वा केशवो हस्ते प्रीतात्मा तं न्यवारयत् ॥ ३६॥

निवार्य च पुनर्वाचा भक्तिनम्रं युधिष्ठिरम् ।
वक्तुमेव नरश्रेष्ठ धर्मपुत्रं प्रचक्रमे ॥ ३७॥

श्रीभगवान्—

अन्यवत् किमिदं राजन् मां स्तौषि नरपुङ्गव ।
तिष्ठ पृच्छ यथापूर्वं धर्मानेव युधिष्ठिर ॥ ३८॥

युधिष्ठिरः—

भगवंस्त्वत्प्रसादं तु स्मृत्वा स्मृत्वा पुनः पुनः ।
न शान्तिरस्ति देवेश नृत्यतीव च मे मनः ॥ ३९॥

इदं च मम सम्प्रश्नं वक्तुमर्हसि माधव ।
कृष्णपक्षे तु द्वादश्याम् अर्चनीयः कथं भवान् ॥ ४०॥

श्रीभगवान्—

शृणु राजन् यथातत्त्वं तत् पूर्वं कथयामि ते ।
परमं कृष्णद्वादश्याम् अर्चनायां फलं मम ॥ ४१॥

एकादश्यामुपोष्याथ द्वादश्यामर्चयेत्तु माम् ।
विप्रानपि यथालाभं भोजयेद्भक्तिमान् नरः ॥ ४२॥

स गच्छेद्दक्षिणामूर्तिं मां वा नात्र विचारणा ।
चन्द्रसालोक्यमथवा ग्रहनक्षत्रपूजितः ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥
॥ ९२ ॥ अनुगीतापर्वणि चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
[ अस्मिन्नध्याये ४३॥ श्लोकाः ]

---

## ॥ एकविंशत्यधिकशततमोऽध्यायः ॥

---

कृष्णेन युधिष्ठिरं प्रति विषुवाख्यपुण्यकालस्य महिमानुवर्णनपूर्वकं तत्र दानादिप्रशंसनम् ॥ १ ॥ तथा गायत्रीजपमाहात्म्यकथनम् ॥ २ ॥ अश्वत्थमाहात्म्यकथनम् ॥ ३ ॥ तथा नानाधर्मकथनपूर्वकं शिंशुमाराकृतिनिरूपणम् ॥ ४ ॥ पञ्चगव्यविधानकथनम् ॥ ५ ॥

---

वैशम्पायनः—

केशवेनैवमाख्याते धर्मपुत्रः पुनः प्रभुम् ।
पप्रच्छ दानकालस्य विशेषं च विधिं नृप ॥ १

युधिष्ठिरः—

देव किं फलमाख्यातं दानस्य विषुवेषु च ।
सूर्येन्दूपप्लवे चैव दत्ते दाने च यत् फलम् ॥ २

श्रीभगवान्—

शृणुष्व राजन् विषुवे सोमार्कग्रहणेषु च ।
व्यतीपातेऽयने चैव दानं स्यादक्षयं नृप ॥ ३

राजन् नयनयोर्मध्यं विषुवं सम्प्रचक्षते ॥ ३॥
समे रात्रिदिने तत्र सन्ध्यायां विषुवे नृप ।
ब्रह्माऽहं शङ्करश्चापि तिष्ठामस्सहितास्सकृत् ॥ ४॥
क्रियाकारणकार्याणाम् एकीभावत्वकारणात् ॥ ५
अस्माकमेकीभूतानां निष्कलं तत्पदं परम् ।
तन्मुहूर्ते परं पुण्यं राजन् विषुवसंज्ञितम् ॥ ६
तदेवाद्यक्षरं ब्रह्म परं ब्रह्मेति कीर्तितम् ॥ ६॥
तस्मिन् मुहूर्ते सर्वेऽपि चिन्तयन्तः परं पदम् ॥ ७
देवाश्च पितरो रुद्राः वसवश्चाश्विनौ तथा ।
साध्याश्च विश्वे गन्धर्वास् सिद्धा ब्रह्मर्षयस्तथा ॥ ८
[1]सोमादयो ग्रहाश्चैव सरितस्सागरास्तथा ।
मरुतोऽप्सरसो नागा यक्षराक्षसगुह्यकाः ॥ ९
एते चान्ये च राजेन्द्र विषुवे संयतेन्द्रियाः ।
सोपवासाः प्रयत्नेन भवन्ति ध्यानतत्पराः ॥ १०
अन्नं गावस्तिलान् भूमिं कन्यादानं तथैव च ।
गृहमायतनं धान्यं वाहनं शयनं तथा ॥ ११
यच्चान्यच्च मया प्रोक्तं तत् प्रयच्छ युधिष्ठिर ॥ ११॥
दीयते विषुवेष्वेवं श्रोत्रियेभ्यो विशेषतः ।

1. अ—नास्तीदमर्धम् ।

तस्य दानस्य कौन्तेय क्षयो नैवोपपद्यते ॥ १२॥
वर्धतेऽहरहः पुण्यं तद्दानं कोटिसम्मितम् ॥ १३
विष्णवे स्नपनं यस्तु मम कुर्याद्धरस्य वा ।
अर्चनां च यथान्यायं तस्य पुण्यफलं शृणु ॥ १४
दशजन्मकृतं पापं तस्य सद्यो विनश्यति ।
दशानामश्वमेधानाम् इष्टानां लभते फलम् ॥ १५
विमानं दिव्यमारूढः कामरूपी यथासुखम् ।
स याति मामकं लोकं रुद्रलोकमथापि वा ॥ १६
तत्रस्थैर्देवगन्धर्वैर् गीयमानो यथासुखम् ।
दिव्यवर्षसहस्राणि कोटिमेकं तु मोदते ॥ १७
ततश्चापि च्युतः कालाद् इह लोके द्विजोत्तमः ।
चतुर्णामपि वेदानां पारगो ब्रह्मविद्भवेत् ॥ १८
चन्द्रसूर्यग्रहे वाऽपि मम वा शङ्करस्य वा ।
गायत्रीं मामिकां वाऽपि जपेद्यश्शङ्करस्य वा ॥ १९
शङ्खतूर्यनिनादैश्च कांस्यघण्टास्वनैरपि ।
कारयेत्तु ध्वनिं भक्त्या तस्य पुण्यफलं शृणु ॥ २०
गान्धर्वैर्होमजप्यैश्च शब्दैरुत्कृष्टनादिभिः ।
दुर्बलोऽपि भवेद्राहुस् सोमश्च बलवान् भवेत् ॥ २१
सूर्येन्दूपप्लवे चैव श्रोत्रियेभ्यः प्रदीयते ।

तत् सहस्रसमं भूत्वा दातारमुपतिष्ठति ॥ २२

महापातकयुक्तोऽपि यद्यपि स्यान्नरो नृप ।
निर्लेपस्तत्क्षणादेव तेन दानेन जायते ॥ २३

चन्द्रसूर्यप्रकाशेन विमानेन विराजता ।
याति सोमपुरं रम्यं सेव्यमानोऽप्सरोगणैः ॥ २४

यावदृक्षाणि तिष्ठन्ति गगने शशिना सह ।
तावत्कालं स राजेन्द्र सोमलोके महीयते ॥ २५

ततश्चापि च्युतः कालाद् इह लोके युधिष्ठिर ।
वेदवेदाङ्गविद्विप्रः कोटीधनपतिर्भवेत् ॥ २६

युधिष्ठिरः—

भगवंस्तव गायत्री जप्यते च कथं नृभिः ।
किं वा तस्य फलं देव ममाचक्ष्व सुरेश्वर ॥ २७

श्रीभगवान्—

द्वादश्यां विषुवे चैव चन्द्रसूर्यग्रहे तथा ।
अयने श्रवणे चैव व्यतीपाते तथैव च ॥ २८

अश्वत्थदर्शने चैव तथा मद्दर्शनेऽपि च ।
जप्त्वा तु मम गायत्रीम् अथवाऽष्टाक्षरं नृप । २९
अर्जितं दुष्कृतं तस्य नाशयेन्नात्र संशयः ॥ २९॥

युधिष्ठिरः—

अश्वत्थदर्शनं चैव किं त्वद्दर्शनसम्मितम् ।

एतत् कथय देवेश परं कौतूहलं हि मे ॥ ३०॥

श्रीभगवान्—

अहमश्वत्थरूपेण पालयामि जगत्त्रयम् ।
अश्वत्थो न स्थितो यत्र नाहं तत्र प्रतिष्ठितः ॥ ३१॥

यत्राहं संस्थितो राजन्नश्वत्थश्चापि तत्र वै ।
यस्त्वेनमर्चयेद्भक्त्या स मां साक्षात् समर्चति ॥ ३२॥

यस्त्वेनं प्रहरेत् कोपान्मामेव प्रहरेत्तु सः ।
तस्मात् प्रदक्षिणं कुर्यान्न च्छिन्द्यादेनमन्वहम् ॥ ३३॥

व्रतस्य पारणं तीर्थं सर्वतीर्थेषु पाण्डव ।
[1]देवशुश्रूषणं तीर्थं गुरुशुश्रूषणं तथा ॥ ३४॥
[2]पुत्रस्य पारणं तीर्थम् आर्जवं तीर्थमुच्यते ॥ ३५
[3]देवशुश्रूषणं तीर्थम् अर्थं ज्ञानस्य पारणम् ।
[4]नराणां तोषणं तीर्थं गार्हस्थ्यं तीर्थमुच्यते ॥ ३६
ब्रह्मचर्यं परं तीर्थं त्रेताग्निस्तीर्थमुच्यते ॥ ३६॥

मूलधर्मं तु विज्ञाय मनस्तत्रावधार्यताम् ।
गच्छ तीर्थानि कौन्तेय धर्मो धर्मेण वर्धते ॥ ३७॥

द्विविधं तीर्थमित्याहुस् स्थावरं जङ्गमं तथा ।

---

1. ख—इतः सार्धं श्लोकषट्कं नास्ति
2. ग—इदमर्धं नास्ति
3. क-ख-च—इदं अर्धद्वयमपि नास्ति 4. ग—दाराणां ।

स्थावराज्जङ्गमं श्रेष्ठं ततो ज्ञानपरिग्रहः ॥ ३८॥
कर्मणा हि विशुद्धस्य पुरुषस्येह भारत ।
हृदये सर्वतीर्थानि तीर्थभूतस्स उच्यते ॥ ३९॥
गुरुतीर्थं परं ज्ञानम् अतस्तीर्थं न विद्यते ।
ज्ञानं तीर्थं तपस्तीर्थं ब्रह्म तीर्थं सनातनम् ॥ ४०॥
क्षमा तु परमं तीर्थं सर्वतीर्थेषु पाण्डव ।
क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥ ४१॥
मानितोऽमानितो वाऽपि पूजितोऽपूजितोपि वा ।
आक्रुष्टस्तर्जितो वाऽपि क्षमावांस्तीर्थमुच्यते ॥ ४२॥
क्षमा यशः क्षमा दानं क्षमा सत्यं क्षमा तपः ।
क्षमाऽहिंसा क्षमा धर्मः क्षमा चेन्द्रियनिग्रहः ॥ ४३॥
क्षमा दया क्षमा यज्ञः क्षमयैव धृतं जगत् ।
[1]क्षमावान् ब्राह्मणो देवः क्षमावान् ब्राह्मणो वरः ॥ ४४॥
क्षमावान् प्राप्नुयात् स्वर्गं क्षमावान् प्राप्नुयाद्यशः ।
क्षमावान् प्राप्नुयान्मोक्षं तस्मात् तीर्थं स उच्यते ॥ ४५॥

आत्मा नदी भारतपुण्यतीर्थम्
आत्मा तीर्थं सर्वतीर्थप्रधानम् ।
आत्मा यज्ञस्सर्वमात्मन्यथो वै
स्वर्गो मोक्षस्सर्वमात्मन्यधीनम् ॥ ४६॥

1. क-ख-ग-घ—इदमर्धं नास्ति

आचारवस्त्रान्तरक्षालितेन
सत्यप्रसन्नक्षमशीतलेन ।
ज्ञानाम्बुना स्नाति हि यो हि नित्यं
किं तस्य भूयस्सलिलेन कृत्यम् ॥ ४७॥

युधिष्ठिरः—

भगवन् सर्वपापघ्नं प्रायश्चित्तमदुष्करम् ।
त्वद्वक्तस्य सुरश्रेष्ठ मम वक्तुं त्वमर्हसि ॥ ४८॥

श्रीभगवान्—

रहस्यमिदमत्यर्थम् अश्राव्यं पापकर्मणाम् ।
अधार्मिकाणामश्राव्यं प्रायश्चित्तं ब्रवीमि ते ॥ ४९॥

पावनं ब्राह्मणं दृष्ट्वा मद्भक्तेनान्तरात्मना ।
नमो ब्रह्मण्यदेवायेत्यभिवादनमाचरेत् ॥ ५०॥

प्रदक्षिणं च यः कुर्यात् पुनरष्टाक्षरेण तु ।
तेन तुष्टो नरश्रेष्ठ तत् पापं क्षपयाम्यहम् ॥ ५१॥

यत्र कृष्टां वराहस्य मृत्तिकां शिरसा वहन् ।
प्राणायामशतं कृत्वा नरः पापैः प्रमुच्यते ॥ ५२॥

दक्षिणावर्तशङ्खाद्वा कपिलाशृङ्गतोऽपि वा ।
प्राक्स्रोतसं नदीं गत्वा ममायतनसन्निधौ ॥ ५३॥

सलिलेन तु यस्स्नायात् सकृदेव रविग्रहे ।
तस्य यत् सञ्चितं पापं तत्क्षणादेव नश्यति ॥ ५४॥

मस्तकान्निस्सृतैस्तोयैः कपिलाया युधिष्ठिर ।
गोमूत्रेणापि यस्स्नायाद् रोहिण्यां मम वा दिने ॥ ५५॥
विप्रपादच्युतैर्वाऽपि तोयैः पापं प्रणश्यति ॥ ५६
नमस्येद्यस्तु मद्भक्त्या शिंशुमारं प्रजापतिम् ।
चतुर्दशाङ्गसंयुक्तं तस्य पापं प्रणश्यति ॥ ५७
ततश्चतुर्दशाङ्गानि शृणु तस्य नराधिप ।
शिरो धर्मो हनुर्ब्रह्मा पुच्छावुत्तरदक्षिणौ ॥ ५८
हृदयं तु भवेद्विष्णुर् हस्तौ स्यातां तथाऽश्विनौ ।
अत्रिर्मध्यं भवेद्राजँल्लिङ्गं संवत्सरं भवेत् ॥ ५९
मित्रावरुणकौ पादौ पुच्छमूलं हुताशनः ।
ततः पश्चाद्ध्रुवेदिन्द्रस् ततः पश्चात् प्रजापतिः ॥ ६०
अभयं च ततः पश्चात् स एव ध्रुवसंज्ञितः ।
एतान्यङ्गानि सर्वाणि शिंशुमारप्रजापतेः ॥ ६१
पिबेत्तु पञ्चगव्यं यः पौर्णमास्यामुपोष्य तु ।
तस्य नश्यति यत् पापं तत् पापं पूर्वसञ्चितम् ॥ ६२
तथैव ब्रह्मकूर्चं तु समन्त्रं तु पृथक् पृथक् ।
मासि मासि पिबेद्यस्तु तस्य पापं प्रणश्यति ॥ ६३
पात्रं च ब्रह्मकूर्चं च शृणु मन्त्रं च भारत ।
पालाशं पद्मपत्रं च ताम्रं वाऽथ हिरण्मयम् ॥ ६४

सादयित्वा तु गृह्णीयात् तत्तु पात्रमुदाहृतम् ॥ ६४॥

गायत्र्या गृह्य गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राविण्णेति वै दधि ॥ ६५॥

तेजोऽसि शुक्रमित्याज्यं देवस्य त्वेति कुशोदकम् ।
आपोहिष्ठेति सङ्गृह्य यवपूर्वं यथाविधि ॥ ६६॥

ब्रह्मणे च यथा हुत्वा समिद्धे च हुताशने ।
आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ॥ ६७॥

उद्धृत्य प्रणवेनैव पिबेत्तु प्रणवेन तु ।
महताऽपि स पापेन त्वचेवाहिर्विमुच्यते ॥ ६८॥

भद्रं त इति यः पादं पठेदृक्संहितां तदा ।
अन्तर्जले वाऽभ्यादित्ये तस्य पापं प्रणश्यति ॥ ६९॥

मम सूक्तं जपेद्यस्तु नित्यं मद्गतमानसः ।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥ ७०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्वमेधिकपर्वणि एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

॥ ९२ ॥ अनुगीतापर्वणि पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

[ अस्मिन्नध्याये ७०॥ श्लोकाः ]

## ॥ द्वाविंशत्यधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रति भगवद्भक्तिसौशील्याद्यभावे ब्राह्मणानामपि अग्निहोत्रस्वाध्यायाध्ययनादिसत्कर्मणामपि वैकल्यस्य शूद्राणामपि भक्त्यादिमतां स्वोचितकिञ्चित्कर्मणामपि साफल्यस्य च कथनम् ॥ १ ॥

युधिष्ठिरः—

कीदृशा ब्राह्मणाः पुण्या भावशुद्धास्सुरेश्वर ।
यत् कर्म सफलं नेति कथयस्व ममानघ ॥ १

श्रीभगवान्—

शृणु पाण्डव तत् सर्वं ब्राह्मणानां यथाक्रमम् ।
सफलं निष्फलं चेति तेषां कर्म ब्रवीमि ते ॥ २

त्रिदण्डधारणं मौनं जटाधारणमुण्डनम् ।
वल्कलाजिनसंवासो व्रतचर्याऽभिषेचनम् ॥ ३

अग्निहोत्रं वने वासस् स्वाध्यायो दानसत्क्रिया ।
सर्वाण्येतानि वै मिथ्या यदि भावो न निर्मलः ॥ ४

अग्निहोत्रं वृथा राजन् वृथा वेदास्तथैव च ।
शीलेन देवास्तुष्यन्ति श्रुतयस्तत्र कारणम् ॥ ५

क्षान्तं दान्तं जितक्रोधं जितात्मानं जितेन्द्रियम् ।
तमग्र्यं ब्राह्मणं मन्ये शेषाश्शूद्रा इति स्मृताः ॥ ६

अग्निहोत्रव्रतपरान् स्वाध्यायनिरतान् शुचीन् ।

उपवासरतान् दान्तांस् तान् देवा ब्राह्मणान् विदुः ॥ ७

न जातिः पूज्यते राजन् गुणाः कल्याणकारणम् ।
चण्डालमपि वृत्तस्थं तं देवा [1]ब्राह्मणं विदुः ॥ ८

मनश्शौचं कर्मशौचं कुलशौचं च भारत ।
शरीरशौचं वाक्शौचं शौचं पञ्चविधं स्मृतम् ॥ ९

पञ्चस्वेतेषु शौचेषु हृदि शौचं विशिष्यते ।
हृदयस्य च शौचेन स्वर्गं गच्छन्ति मानवाः ॥ १०

अग्निहोत्रपरिभ्रष्टः प्रसक्तः क्रयविक्रये ।
वर्णसङ्करकर्ता च ब्राह्मणो वृषलैस्समः ॥ ११

यस्य वेदश्रुतिर्नष्टा कर्षकश्चापि यो द्विजः ।
विकर्मसेवी कौन्तेय स वै वृषल उच्यते ॥ १२

वृषो हि धर्मो विज्ञेयस् तस्य यः कुरुते लयम् ।
वृषलं तं विदुर्देवा निकृष्टं श्वपचादपि ॥ १३

स्तुतिभिर्ब्रह्मपूर्वाभिर् यश्शूद्रं स्तौति मानवः ।
न तु मां स्तौति पापात्मा स तु चण्डाल एव च ॥ १४

श्वदतौ तु यथा क्षीरं ब्रह्म वै वृषले तथा ।
दुष्टतामेति तत् सर्वं शुना लीढं हविर्यथा ॥ १५

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।

---

1. अ-क-ख-ब-च—उत्तमं ।

धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश ॥ १६
यान्युक्तानि मया सम्यग् विद्यास्थानानि भारत ।
उत्पन्नानि पवित्राणि पावनार्थं तथैव च ॥ १७
तस्मात् तानि न शूद्रस्य स्पष्टव्यानि युधिष्ठिर ।
सर्वं च शूद्रसंस्पृष्टम् अपवित्रं न संशयः ॥ १८
लोके त्रीण्यपवित्राणि पञ्चामेध्यानि भारत ।
श्वा च शूद्रश्वपाकश्च अपवित्राणि पाण्डव ॥ १९
देवलः कुक्कुटो यूपो ह्युदक्या वृषलीपतिः ।
पञ्चैते स्युरमेध्याश्च स्पष्टव्या न कदाचन ॥ २०
स्पृष्ट्वैतानष्ट वै विप्रस् सचेलो जलमाविशेत् ॥ २०॥
[1]मद्भक्ताञ्शूद्रसामान्याद् अवमन्यन्ति ये नराः ।
नरकेष्वेव तिष्ठन्ति वर्षकोटिं नराधमाः ॥ २१॥
चण्डालमपि मद्भक्तं नावमन्येत बुद्धिमान् ।
अवमत्य पतन्त्येव नरके रौरवे नराः ॥ २२॥
मम मद्भक्तभक्तेषु प्रीतिरभ्यधिका नृप ।
तस्मान्मद्भक्तभक्ताश्च पूजनीया विशेषतः ॥ २३॥
कीटपक्षिमृगाणां च मयि सन्न्यस्तचेतसाम् ।
ऊर्ध्वामेव गतिं विद्धि किं पुनर्ज्ञानिनां नृणाम् ॥ २४॥

1. ख—मद्भक्तं शूद्रमन्यं वा अवमन्यन्ति ।
क—मद्भक्ताञ् शूद्रचण्डालान् अवमन्यन्ति ।

पत्रं वाऽप्यथवा पुष्पं फलं वाऽप्यप एव वा ।
[1]ददाति मम शूद्रोऽपि शिरसा धारयामि तत् ॥ २५॥
विप्रानेवार्चयेद्भक्त्या शूद्रप्रायांश्च मत्प्रियान् ।
तेषां तेनैव रूपेण पूजां गृह्णामि भारत ॥ २६॥
वेदोक्तेनैव मार्गेण सर्वभूतहृदि स्थितम् ।
मामर्चयन्ति ये विप्रा मत्सायुज्यं व्रजन्ति ते॥ २७॥
ब्राह्मणानां हितायैव प्रादुर्भावः कृतो मया ।
प्रादुर्भावाकृतिः काचिद् अर्चनीया युधिष्ठिर ॥ २८॥
आसामन्यतमां मूर्तिं यो मद्भक्त्या समर्चति ।
तेनैव परितुष्टोऽहं भविष्यामि न संशयः ॥ २९॥
मृदा च मणिरत्नैश्च ताम्रेण रजतेन वा ।
[2]कृत्वा प्रतिकृतिं कुर्याद् अर्चनां काञ्चनेन वा ॥ ३०॥
पुण्यं दशगुणं विद्याद् एतेषामुत्तरोत्तरम् ॥ ३१
जयकामोऽर्चयेद्राजा विद्याकामो द्विजोत्तमः ।
वैश्यो वा धनकामो हि शूद्रः पुण्यं फलं स्त्रियः ॥ ३२
सर्वकामास्स्त्रियो वाऽपि सर्वान् कामानवाप्नुयुः ॥ ३२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥
॥ ९२ ॥ अनुगीतापर्वणि षडधिकशततमोऽध्यायः ॥ १०६ ॥
[ अस्मिन्नध्याये ३२॥ श्लोकाः ]

---

1. क-ख—इदमर्धं नास्ति 2. ग—इदमर्धं नास्ति

## ॥ त्रयोविंशत्यधिकशततमोऽध्यायः ॥

कृष्णेन युधिष्ठिरं प्रत्यश्वत्थगोब्राह्मणमहिमप्रशंसनपूर्वकं ब्राह्मण्यभंशकरदुष्कर्मकथनम् ॥ १ ॥

युधिष्ठिरः—

कीदृशानां तु शूद्राणां नानुगृह्णासि चार्चनम् ।
उद्वेगस्तव कस्माद्धि तन्मे ब्रूहि सुरेश्वर ॥ १

श्रीभगवान्—

अव्रतेनाप्यभक्तेन स्पृष्टां शूद्रेण चार्चनाम् ।
तां वर्जयामि राजेन्द्र श्वपाकविहितामिव ॥ २

अहं च शङ्करश्चापि गावो विप्रास्तथैव च ।
अश्वत्थोऽमररूपं च त्रयमेतद्युधिष्ठिर ॥ ३

एतत् त्रयं हि मद्भक्तो नावमन्येत कर्हिचित् ।
अवमानितमेतत्तु दहत्यासप्तमं कुलम् ॥ ४

अश्वत्थो ब्राह्मणा गावो मन्मयास्तारयन्ति हि ।
तस्मादेतत् प्रयत्नेन त्रयं पूजय पाण्डव ॥ ५

युधिष्ठिरः—

ब्राह्मणेनैव देहेन शूद्रत्वं कथमाप्नुयात् ।
ब्रह्म वा नश्यति कथं वक्तुं देव त्वमर्हसि ॥ ६

श्रीभगवान्—

कूपन्नानं तु यो विप्रः कुर्याद्द्वादशवार्षिकम् ।
स तेनैव शरीरेण शूद्रत्वं यात्यसंशयः ॥ ७

यस्तु राजाश्रयेणैव जीवेद्द्वादशवार्षिकम् ।
स शूद्रत्वं व्रजेद्विप्रो वेदानां पारगोऽपि सन् ॥ ८

पत्तने नगरे वाऽपि यो द्वादश समा वसेत् ।
स शूद्रत्वं व्रजेद्विप्रो नात्र कार्या विचारणा ॥ ९

उत्पादयति यः पुत्रं शूद्रायां कामतो द्विजः ।
[1]तस्य कायगतं ब्रह्म सद्य एव विनश्यति ॥ १०

[2]मद्यपस्त्रीमुखं मोहाद् आस्वादयति यो द्विजः ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ॥ ११

यस्सोमलतिकां विप्रः केवलं भक्षयेद्वृथा ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ॥ १२

[3]मैथुनं कुरुते यस्तु जिह्वायां ब्राह्मणो नृप ।
तस्य कायगतं ब्रह्म सद्य एव विनश्यति ॥ १३

विप्रत्वं दुर्लभं प्राप्य दुर्मार्गैरेवमादिभिः ।
विनाशयन्ति ये तत्तु ताञ्शोचामि युधिष्ठिर ॥ १४

---

1. क—इदमर्धं नास्ति
2. अ—अर्धषट्कं नास्ति ; 3. च—अर्धद्वयं नास्ति

तस्मात् सर्वप्रयत्नेन मत्प्रियो यो युधिष्ठिर ।
जातिभ्रंशकरं कर्म न कुर्यादीदृशं द्विजः ॥ १५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम् आश्वमेधिकपर्वणि त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥
[ अस्मिन्नध्याये १५ श्लोकाः ]

---

## ॥ चतुर्विंशत्यधिकशततमोऽध्यायः ॥

---

कृष्णेन युधिष्ठिरं प्रति पालाशविधिप्रकारकथनम् ॥ १ ॥ तथा तीर्थाटनासमर्थानां तत्प्रतिनिधितीर्थानुवर्णनम् ॥ २ ॥ तथा भगवद्भक्तलक्षणकथनपूर्वकं तत्प्रशंसनम् ॥ ३ ॥ तथा स्वस्य सर्वोत्तमत्वकथनपूर्वकं स्वोक्तधर्मश्रवणस्य फलकथनम् ॥ ४ ॥ ततो युधिष्ठिरायामन्त्रणपूर्वकं दारुकोपनीतरथारोहणेन द्वारकां प्रति गमनम् ॥ ५ ॥

---

युधिष्ठिरः—

देशान्तरगते विप्रे संयुक्ते कालधर्मणा ।
शरीरनाशे सम्प्राप्ते कथं प्रेतविकल्पना ॥ १

श्रीभगवान्—

श्रूयतामाहिताग्नेस्तु तथाभूतस्य संक्रिया ॥ १॥
पालाशवृन्तैः प्रतिमा कर्तव्या कल्पचोदिता ।
त्रीणि षष्टिशतान्याहुर् अस्थीन्यस्य नराधिप ॥ २॥
तेषां विकल्पना कार्या यथाशास्त्रविनिश्चयम् ॥ ३

अशीत्यर्धं शिरसि च ग्रीवायां दश एव च ।
बाह्वोश्चापि शतं दद्याद् अङ्गुलीषु पुनर्दश ॥ ४

उरसि त्रिंशतं दद्याज् जठरे चापि विंशतिः ।
वृषणे द्वादशार्धं तु शिश्ने चाष्टार्धमेव च ॥ ५

दद्यात्तु शतमूर्वोस्तु षष्ट्यर्धं जानुजङ्घयोः ।
दश दद्याच्चरणयोर् एषा प्रेतस्य निष्कृतिः ॥ ६

युधिष्ठिरः—
विशेषतीर्थं सर्वेषाम् अशक्तानामनुग्रहात् ।
भक्तानां तारणार्थं वै वक्तुमर्हसि धर्मतः ॥ ७

श्रीभगवान्—
प्रवरं सर्वतीर्थानां सत्यं गायन्ति सामगाः ।
सत्यस्य वचनं तीर्थम् अहिंसा तीर्थमुच्यते ॥ ८

तपस्तीर्थं दया तीर्थं शीलं तीर्थं युधिष्ठिर ।
अल्पसन्तोषणं तीर्थं नारी तीर्थं पतिव्रता ॥ ९

सन्तुष्टो ब्राह्मणस्तीर्थं ज्ञानं वा तीर्थमुच्यते ।
मद्भक्तस्सततं तीर्थं शङ्करस्य विशेषतः ॥ १०

यतयस्तीर्थमित्येवं विद्वांसस्तीर्थमुच्यते ।
शरण्यपुरुषस्तीर्थम् अभयं तीर्थमुच्यते ॥ ११

[1]विद्याविनीतकस्तीर्थं धर्मवक्ता विशेषतः ॥ ११॥

---

1. च—कोश एकस्मिन्नेवेदमर्धं दृश्यते ।

त्रैलोक्येऽस्मिन् निरुद्विग्नो न बिभेमि कुतश्चन ।
न दिवा यदि वा रात्रावुद्वेगश्शूद्रलङ्घनात् ॥ १२॥

न भयं देवदैत्येभ्यो रक्षोभ्यश्चैव मे नृप ।
शूद्रवक्त्राच्च्युतं ब्रह्म भयदं मम सुव्रत ॥ १३॥

तस्मात् सप्रणवं शूद्रो मन्नामापि न कीर्तयेत् ।
प्रणवं हि परं लोके ब्रह्म ब्रह्मविदो विदुः ॥ १४॥

द्विजशुश्रूषणं धर्मश् शूद्राणां भक्तितो मयि ।
तेन गच्छन्ति ते स्वर्गं चिन्तयन्तो हि मां सदा ॥ १५॥

द्विजशुश्रूषया शूद्रः परं श्रेयोऽधिगच्छति ।
द्विजशुश्रूषणादन्यन्नास्ति शूद्रस्य निष्कृतिः ॥ १६॥

रागो द्वेषश्च मोहश्च पारुष्यं चानृशंसता ।
शाठ्यं च दीर्घवैरित्वम् अतिमानमनार्जवम् ॥ १७॥

अनृतं चापवादश्च पैशुन्यमतिलोभता ।
[1]हिंसा स्तेयो मृषावादो वञ्चना द्वेषलोभता ॥ १८॥

अबुद्धिता च नास्तिक्यं भयमालस्यमेव च ।
अशौचं चाकृतज्ञत्वं डम्भता स्तम्भ एव च ॥ १९॥

निकृतिश्चाप्यविज्ञानं जातके शूद्रमाविशेत् ॥ २०

दृष्ट्वा पितामहश्शूद्रम् अभिभूतं तु तामसैः ।

1. ख—इदमर्धं नास्ति

द्विजशुश्रूषणं धर्मं शूद्राणां तु प्रयुक्तवान् ॥ २१

नश्यन्ति तामसा भावाश् शूद्रस्य द्विजभक्तितः ॥ २१॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतं मूर्ध्ना गृह्णामि शूद्रतः ॥ २२॥

अन्त्यजो वाऽपि यः कश्चित् सर्वपापसमन्वितः ।
यदि मां सततं ध्यायेत् सर्वपापैः प्रमुच्यते ॥ २३॥

विद्याविनयसम्पन्ना ब्राह्मणा वेदपारगाः ।
मयि भक्तिं न कुर्वन्ति चण्डालसदृशा हि ते ॥ २४॥

वृथा दत्तं वृथा जप्तं वृथा चेष्टं वृथा हुतम् ।
वृथाऽऽतिथ्यं च तत् तस्य यो न भक्तो मम द्विजः ॥ २५॥

यत् कृतं च हुतं चापि यदिष्टं दत्तमेव च ।
अभक्तिमत्कृतं सर्वं राक्षसा एव भुञ्जते ॥ २६॥

स्थावरे जङ्गमे वाऽपि सर्वभूतेषु पाण्डव ।
समत्वेन यदा कुर्यान्मद्भक्तो मित्रशत्रुषु ॥ २७॥

आनृशंस्यमहिंसा च दमस्सत्यं तथाऽऽर्जवम् ।
अद्रोहश्चैव भूतानां मद्व्रतानां व्रतं नृप ॥ २८॥

नम इत्येव यो ब्रूयान्मद्भक्तं श्रद्धयाऽन्वितः ।
तस्याक्षयो भवेल्लोकश् श्वपाकस्यापि पाण्डव ॥ २९॥

किं पुनर्ये यजन्ते मां [1]याजका विधिपूर्वकम् ।
मद्भक्ता मद्गतप्राणाः कथयन्तश्च मां सदा ॥ ३०॥
[2]बहुवर्षसहस्राणि तपस्तप्यति यो नरः ।
नासौ पदमवाप्नोति मद्भक्तैर्यदवाप्यते ॥ ३१॥
मामेव तस्माद्राजेन्द्र ध्याहि नित्यमतन्द्रितः ।
अवाप्स्यसि ततस्सिद्धिं द्रक्ष्यसे च परं पदम् ॥ ३२॥
अपार्थकं प्रभाषन्ते शूद्रा भागवता इति ॥ ३३
न शूद्रा भगवद्भक्ता विप्रा भागवतास्स्मृताः ।
[3]सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने ॥ ३४
द्वादशाक्षरतत्त्वज्ञश् चतुर्वेदविभागवित् ।
अच्छिद्रपञ्चकालज्ञस् स वै भागवतस्स्मृतः ॥ ३५
[4]ऋग्वेदेनैव होता च यजुषाऽध्वर्युरेव च ।
सामवेदेन चोद्गाता पुण्येनाभिष्टुवन्ति माम् ॥ ३६
अथर्वशिरसा चैव नित्यमाथर्वणा द्विजाः ।
स्तुवन्ति सततं ये मां ते वै भागवतास्स्मृताः ॥ ३७
वेदाधीनास्सदा यज्ञा यज्ञाधीनास्तु देवताः ।

---

1. क-ख-च-साधका ।
2. च—वृथा ज्ञानं वृथा न्यास्यं वृथा योगपरिग्रहः ।
ब्रह्मचर्यं वृथा तस्य यो न भक्तो मयि द्विजः ॥
नाहूयन्ते न पूज्यन्ते न स्थाप्यन्ते कदाचन ।
तेनाग्नयोऽग्निहोत्राणि यो न भक्तो मयि द्विजः ॥ [अधिकः पाठः]
3. अ-ग-ङ—नास्तीदमर्धम् 4. क-ख-ङ—इतः श्लोकद्वयं नास्ति

देवता ब्राह्मणाधीनास् तस्माद्विप्रास्तु देवताः ॥ ३८
अनाश्रित्योच्छ्रयं नास्ति मुख्यमाश्रयमाश्रयेत् ॥ ३८॥
रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः ।
ब्रह्मा मामाश्रितो राजन् नाहं कञ्चिदुपाश्रितः ॥ ३९॥
ममाश्रयो न कश्चित्तु सर्वेषामाश्रयो ह्यहम् ॥ ४०
एवमेतन्मया प्रोक्तं रहस्यमिदमुत्तमम् ।
धर्मप्रियस्य ते राजन् नित्यमेवं समाचर ॥ ४१
इदं पवित्रमाख्यानं पुण्यं वेदैश्च सम्मितम् ।
यः पठेन्मामकं धर्मम् अहन्यहनि पाण्डव ॥ ४२
धर्मो विवर्धते तस्य बुद्धिश्चापि प्रसीदति ।
पापक्षयमुपेत्यैवं कल्याणं च विवर्धते ॥ ४३
एतत् पुण्यं पवित्रं च पापनाशनमुत्तमम् ।
श्रोतव्यं श्रद्धया युक्तैश् श्रोत्रियैश्च विशेषतः ॥ ४४
श्रावयेद्यस्त्विदं भक्त्या प्रयतोऽथ शृणोति वा ।
स गच्छेन्मम सायुज्यं नात्र कार्या विचारणा ॥ ४५
यश्चेदं श्रावयेच्छ्राद्धे मद्भक्तो मत्परायणः ।
पितरस्तस्य तृप्यन्ति यावदाभूतसम्प्लवम् ॥ ४६

वैशम्पायनः—

श्रुत्वा भागवतान् धर्मान् साक्षाद्विष्णोर्जगद्गुरोः ।
प्रहृष्टमनसो भूत्वा चिन्तयन्तोऽद्भुताः कथाः ॥ ४७

ऋषयः पाण्डवाश्चैव प्रणेमुस्तं जनार्दनम् ॥ ४७॥
पूजयामास गोविन्दं धर्मपुत्रः पुनः पुनः ॥ ४८
देवा ब्रह्मर्षयस्सिद्धा गन्धर्वाप्सरसस्तथा ।
भूता यक्षा ग्रहाश्चैव गुह्यका भुजगास्तथा ॥ ४९
वालखिल्या महात्मानो योगिनस्तत्त्वदर्शिनः ।
तथा भागवताश्चापि पञ्चकालमुपासकाः ॥ ५०
कौतूहलसमायुक्ता भगवद्भक्तिमागताः ॥ ५०॥
श्रुत्वा तु परमं पुण्यं वैष्णवं धर्मशासनम् ।
विमुक्तपापाः पूतास्ते संवृत्तास्तत्क्षणेन तु ॥ ५१॥
प्रणम्य शिरसा विष्णुं प्रतिनन्द्य च ताः कथाः ।
द्रष्टारो द्वारकायां वै वयं सर्वे जगद्गुरुम् ॥ ५२॥
इति प्रहृष्टमनसो ययुर्देवगणैस्सह ।
सर्वे ऋषिगणा राजन् ययुस्स्वं स्वं निवेशनम् ॥ ५३॥
गतेषु तेषु सर्वेषु केशवः केशिहा तदा ।
सस्मार दारुकं राजन् स च सात्यकिना सह ॥ ५४॥
समीपस्थोऽभवत्.सूतो याहि देवेति चाब्रवीत् ॥ ५५
ततो विषण्णवदनाः पाण्डवाः पुरुषोत्तमम् ।
अञ्जलिं मूर्ध्नि सन्धाय नेत्रैरश्रुपरिप्लुतैः ॥ ५६
पिबन्तस्सततं कृष्णं नोचुरार्ततरास्तदा ॥ ५६॥

[1]कृष्णोऽपि भगवान् देवः पृथामामन्त्र्य चार्तवत् ।
धृतराष्ट्रं च गान्धारीं विदुरं द्रौपदीं तथा ॥ ५७॥
कृष्णद्वैपायनं व्यासम् ऋषीनन्यांश्च मन्त्रिणः ।
सुभद्रामात्मजयुताम् उत्तरां स्पृश्य पाणिना ॥ ५८॥
निर्गत्य वेश्मनस्तस्माद् आरुरोह महारथम् ॥ ५९
[2]वाजिभिस्सैन्यसुग्रीवमेघपुष्पबलाहकैः ।
युक्तं तु ध्वजभूतेन पतगेन्द्रेण धीमता ॥ ६०
[3]अन्वारुरोह चाप्येनं प्रेम्णा राजा युधिष्ठिरः ।
अपास्य चाशु यन्तारं दारुकं सूतसत्तमम् ॥ ६१
अभीशून् प्रतिजग्राह स्वयं कुरुपतिस्तदा ॥ ६१॥
उपारुह्यार्जुनश्चापि चामरव्यजनं शुभम् ।
रुक्मदण्डं बृहन्मूर्ध्नि दुधावाशु प्रदक्षिणम् ॥ ६२॥
छत्रं शतशलाकं च दिव्यमाल्योपशोभितम् ।
वैडूर्यमणिदण्डं च चामीकरविभूषितम् ॥ ६३॥
दधार तरसा भीमश् छत्रं तच्छार्ङ्गधन्वनः ॥ ६४
भीमसेनोऽर्जुनश्चैव यमावप्यरिसूदनौ ।
माद्रीपुत्रौ तदा राजन् कृष्णस्याप्यरिसूदनौ ॥ ६५
पृष्ठतोऽनुययुः कृष्णं मा शब्द इति हर्षितौ ॥ ६५॥
त्रियोजने व्यतीते तु परिष्वज्य च पाण्डवान् ।
विसृज्य कृष्णस्तान् सर्वान् प्रणतान् द्वारकां ययौ ॥ ६६॥

1. ख—अर्धत्रयं नास्ति 2. अ-च—अर्धद्वयं नास्ति
3. अ—अर्धद्वयं नास्ति

तदा प्रणम्य गोविन्दं तदाप्रभृति पाण्डवाः ।
कपिलाद्यानि दानानि ददुर्धर्मपरायणाः ॥ ६७॥

मधुसूदनवाक्यानि स्मृत्वा स्मृत्वा पुनः पुनः ।
मनसा पूजयामासुर् हृदयस्थानि पाण्डवाः ॥ ६८॥

युधिष्ठिरस्तु धर्मात्मा हृदि कृत्वा जनार्दनम् ।
तद्भक्तस्तन्मना युक्तस् तद्याजी तत्परोऽभवत् ॥ ६९॥

एवमेतत् पुरावृत्तं वैष्णवं धर्मशासनम् ।
मया ते कथितं राजन् पवित्रं पापनाशनम् ॥ ७०॥

तच्छृणुष्व महाराज विष्णुप्रोक्तं कुरूद्वह ।
तेन गच्छसि नान्येन तद्विष्णोः परमं पदम् ॥ ७१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्वमेधिकपर्वणि चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥
॥ ९२ ॥ अनुगीतापर्वणि सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥
[ अस्मिन्नध्याये ७१॥ श्लोकाः ]

॥ अनुगीतापर्व समाप्तम् ॥ ॥ आश्वमेधिकपर्व च समाप्तम् ॥ १४ ॥

॥ अस्मिन्नाश्वमेधिकपर्वणि श्लोकाः ४६१३॥* ॥

---

अतःपरं आश्रमवासिकपर्व भविष्यति तस्यायमाद्यः श्लोकः ॥

जनमेजयः—
राज्यं प्राप्य नरव्याघ्रः पितृपैतामहं महत् ।
कथमासन् महाराजे धृतराष्ट्रे महात्मनि ॥ १

---

* यद्यप्यनुक्रमणिकाध्यायोक्तरीत्या ४४२० श्लोकैर्भाव्यम्; तथाऽप्यत्र ४६१३॥ श्लोका दृश्यन्ते ।

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ १५ ॥ आश्रमवासिकपर्व ॥ १५ ॥

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ आश्रमवासिकपर्व ॥

(आश्रमवासपर्व)

### ॥ प्रथमोऽध्यायः ॥

युधिष्ठिरेण राज्यपरिपालनम् ॥ १ ॥ कुन्तीद्रौपद्यादिभिर्गान्धार्याः श्वश्रूवद्वर्तनम् ॥ २ ॥ भीमवर्जमर्जुनादिभिर्युधिष्ठिरशासनेन विशेषतो धृतराष्ट्रानुवर्तनम् ॥ ३ ॥

जनमेजयः—

राज्यं प्राप्य नरव्याघ्राः पितृपैतामहं महत् ।
कथमासन् महाराजे धृतराष्ट्रे महात्मनि ॥ १

स हि राजा हतामात्यो हतपुत्रो निराश्रयः ।
कथमासीद्वनैश्वर्यो गान्धारी च यशस्विनी ॥ २

कियन्तं चैव कालं ते पितरो मम पूर्वकाः ।
स्थिता राज्ये महात्मानस् तन्मे व्याख्यातुमर्हसि ॥ ३

वैशम्पायनः—

प्राप्य राज्यं महात्मानः पाण्डवा हतशत्रवः ।
धृतराष्ट्रं पुरस्कृत्य पृथिवीं पर्यपालयन् ॥ ४

धृतराष्ट्रमुपातिष्ठद् विदुरस्सञ्जयस्तथा ।
युयुत्सुश्चैव मेधावी वैश्यापुत्रस्स कौरवः ॥ ५

पाण्डवास्सर्वकार्येषु पृच्छन्ति स्म च तं नृपम् ।
चक्रुस्तेनाभ्यनुज्ञाता वर्षाणि दश पञ्च च ॥ ६

सदाऽभिगम्य ते वीराः पर्युपासत तं नृपम् ।
पादाभिवन्दनं कृत्वा युधिष्ठिरमते स्थिताः ॥ ७

तेन ते मूर्ध्नि चाघ्रातास् सर्वकार्याणि चक्रिरे ॥ ७॥

[1]कुन्ती भोजसुता चैव गान्धारीमन्ववर्तत ।
द्रौपदी च सुभद्रा च याश्चान्याः पाण्डवस्त्रियः ॥ ८॥

सतां वृत्तमवर्तन्त तयोश्श्वश्वोर्यथाविधि ॥ ९

शयनानि महार्हाणि वासांस्याभरणानि च ।
सर्वाणि भक्ष्यभोज्यानि विविधानि च सर्वशः ॥ १०

युधिष्ठिरो महाराजो धृतराष्ट्रे ह्युपानयत् ।
तथैव कुन्ती गान्धार्यां गुरुवृत्तिमवर्तत ॥ ११

विदुरस्सञ्जयश्चैव युयुत्सुश्चैव कौरव ।

1. क—तथाविधांश्च तान् दृष्ट्वा धृतराष्ट्रोऽभ्यनन्दत । [ अधिकः पाठः ]

उपासन्ति स्म तं वृद्धं हतपुत्रं नराधिपम् ॥ १२
स्यालो द्रोणस्य यश्चैको दयितो ब्राह्मणो महान् ।
स च तस्मिन् महेष्वासे कृपस्समभवत् तदा ॥ १३
व्यासश्च भगवान् नित्यं वासं चक्रे नृपेण ह ।
कथां कुर्वन् पुराणर्षिर् देवर्षिर्नृपरक्षसाम् ॥ १४
धर्मयुक्तानि कार्याणि व्यवहारान्वितानि च ।
धृतराष्ट्राभ्यनुज्ञातो विदुरस्तान्यकारयत् ॥ १५
कामतो हि प्रियाण्यस्य कार्याणि सुगुरूण्यपि ।
प्राप्यन्तेऽर्थैस्सुलघुभिः प्रभावाद्विदुरस्य वै ॥ १६
अकरोद्बन्धमोक्षांश्च वध्यानां मोक्षणं तथा ॥ १६॥
न च धर्मात्मजो राजा कदाचित् किञ्चिदब्रवीत् ॥ १७
विहारयात्रासु पुनः कुरुराजो युधिष्ठिरः ।
[1]सर्वान् कामानुपस्थाप्य धृतराष्ट्रे न्यवेदयत् ॥ १८
आरालिकास्सूपकारा रागषाडविकास्तथा ।
उपातिष्ठन्त राजानं धृतराष्ट्रं यथापुरम् ॥ १९
वासांसि सुमहार्हाणि माल्यानि विविधानि च ।

---

1. ख—उवाच च स तान् भ्रातॄन् अमात्यांश्च महीपतिः ॥
इति आश्रमवासपर्वणि प्रथमोऽध्यायः
सर्वान् कामानिति १८ तमश्लोकादारभ्य अध्यायान्ते २७॥ तमपर्यन्त-श्लोकाः खकोशे न सन्ति ॥

उपजह्रुर्यथाकालं धृतराष्ट्रस्य पाण्डवाः ॥ २०
मैरेयकाणि मांसानि पानकानि लघूनि च ।
चित्रान् भक्ष्यविकारांश्च चक्रुरस्य यथापुरम् ॥ २१
[1]ये चापि पृथिवीपालास् समाजग्मुस्समन्ततः ।
उपातिष्ठन्त ते सर्वे कौरवेन्द्रं यथापुरम् ॥ २२
कुन्ती च द्रौपदी चैव सात्वती चैव भामिनी ।
उलूपी नागकन्या च देवी चित्राङ्गदा तथा ॥ २३
धृष्टकेतोश्च भगिनी जरासन्धस्य चात्मजा ।
[2]एताश्चान्याश्च बह्व्यो वै योषितः पुरुषर्षभ ॥ २४
किङ्करास्त्मोपतिष्ठन्ति सर्वास्तास्सुबलात्मजाम् ॥ २४॥
यथा पुत्रवियुक्तोऽयं न किञ्चिद्दुःखमाप्नुयात् ।
इति राजाऽन्वशाद्भ्रातॄन् नित्यमेव युधिष्ठिरः ॥ २५॥
एतत् ते धर्मराजस्य श्रुत्वा वचनमर्थवत् ।
सविशेषमवर्तन्त भीममेकं विना तदा ॥ २६॥
न हि तत् तस्य वीरस्य हृदयादपगच्छति ।
धृतराष्ट्रस्य यद्वृत्तं दुर्बुद्धेर्द्यूतमण्डले ॥ २७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥
॥ ९३ ॥ आश्रमवासपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[ अस्मिन्नध्याये २७॥ श्लोकाः ]

---

1. ग-घ—नास्त्ययं श्लोकः ।
2. ग—मास्तीदमर्धम् घ—नास्त्ययं श्लोकः ।

## ॥ द्वितीयोऽध्यायः ॥

युधिष्ठिरेण नागराणां धृतराष्ट्रानुवर्तनानुशासनपूर्वकं सह भ्रातृभिः रप्रमादेन तत्परितोषणम् ॥ १ ॥

वैशम्पायनः—

[1]एवं सम्पूजितो राजा पाण्डवैरम्बिकासुतः ।
विजहार यथापूर्वम् ऋषिभिः पर्युपस्थितः ॥ १

ब्रह्मदेयाग्रहारांश्च प्रददौ कुरुसत्तमः ।
तच्च कुन्तीसुतो राजा सर्वमेवान्वमोदत ॥ २

आनृशंस्यपरो धीमान् प्रीयमाणो युधिष्ठिरः ।
उवाच च स तान् भ्रातॄन् अमात्यांश्च महीपतिः ॥ ३

युधिष्ठिरः—

मया चैव भवद्भिश्च मान्य एव नराधिपः ॥ ३॥

निदेशे धृतराष्ट्रस्य यस्थास्यति स मे सुहृत् ।
विपरीतश्च मे शत्रुर् निरस्यश्च भवेन्नरः ॥ ४॥

परिवृत्तेषु चाहस्सु पुत्राणां श्राद्धकर्मणि ।
ददातु राजा वित्तानि यावदस्य चिकीर्षितम् ॥ ५॥

वैशम्पायनः—

ततस्स राजा कौरव्यो धृतराष्ट्रो महामनाः ।

1. ख—अर्धषट्कं नास्ति

ब्राह्मणेभ्यो यथार्हेभ्यो ददौ वित्तमनेकशः ॥ ६॥

धर्मराजश्च भीमश्च सव्यसाची यमावपि ।
तत् सर्वमन्ववर्तन्त धृतराष्ट्रव्यपेक्षया ॥ ७॥

कथं नु राजा वृद्धस्सन् पुत्रशोकसमाहतः ।
शोकमस्मत्कृतं प्राप्य न म्रियेतेति चिन्त्य वै ॥ ८॥

यावद्धि कुरुमुख्यस्य जीवपुत्रस्य वै सुखम् ।
तावत् सुखमवाप्नोतु भोगांश्चेति व्यवस्थिताः ॥ ९॥

ततस्ते सहितास्सर्वे भ्रातरः पञ्च पाण्डवाः ।
दानशीलास्तथा तस्थुर् धृतराष्ट्रस्य शासने ॥ १०॥

धृतराष्ट्रस्तु तान् वीरान् विनीतान् विनये स्थितान् ।
शिष्यवृत्तौ स्थितान् नित्यं गुरुवत् तानपश्यत ॥ ११॥

गान्धारी चापि पुत्राणां विविधैश्श्राद्धकर्मभिः ।
आनृण्यमगमत् कामं विप्रेभ्यः प्रतिपाद्य वै ॥ १२॥

एवं धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः ।
भ्रातृभिस्सहितो धीमान् पूजयामास तं नृपम्* ॥ १३॥

स राजा सुमहातेजा वृद्धः कुरुकुलोद्वहः ।
नापश्यत तदा किञ्चिद् अप्रियं कुरुनन्दनात् ॥ १४॥

वर्तमानेषु सद्वृत्तिं पाण्डवेषु महात्मसु ।

---

* अ-क-ख-ग-घ—कोशेषु अतैवाध्यायसमाप्तिर्दृश्यते ।

प्रीतिमानभवद्राजा धृतराष्ट्रोऽम्बिकासुतः ॥ १५॥

सौबलेयी च गान्धारी पुत्रशोकमपास्य तम् ।
सदैव प्रीतिमत्यासीत् पाण्डवेषु निजेष्विव ॥ १६॥

प्रियाण्येव तु कौरव्यो नाप्रियाणि कुरूद्वहः ।
वैचित्रवीर्ये नृपतौ समाचरत सर्वदा ॥ १७॥

यद्यद्भूते च किञ्चित् स धृतराष्ट्रो नराधिपः ।
गुरु वा लघु वा कार्यं गान्धारी वा यशस्विनी ॥ १८॥

तत् स राजा नरव्याघ्रः पाण्डवानां धुरन्धरः ।
पूजयित्वा वचस्तत्तद् अकार्षीत् परवीरहा ॥ १९॥

[1]तेन तस्याभवत् प्रीतो वृत्तेन स नराधिपः ॥ २०

[2]अन्वतप्यत संस्मृत्य पुत्रं मन्दमचेतसम् ॥ २०॥

सदा च प्रातरुत्थाय कृतजप्यश्शुचिर्नृपः ।
[3]आशास्ते पाण्डुपुत्राणां समरेष्वपराजयम् ॥ २१॥

ब्राह्मणान् वाचयित्वा च हुत्वा चैव हुताशनम् ।

---

1. क—अर्धत्रयं नास्ति
2. अ—यां प्रीतिं पाण्डुपुत्रेभ्यस् समवाप महीपतिः ।
तां प्रीतिं परमाधत्त पुत्रेषु च नराधिप ॥ [अधिकः पाठः]
3. अ-क-ख-ङ—अर्धपञ्चकं नास्ति

आयूंषि पाण्डुपुत्राणाम् अनुशास्ते स कौरवः ॥ २२॥
स तां प्रीतिं परामाप स्वप्नेभ्यस्स महीपतिः ।
यां प्रीतिं पाण्डुपुत्रेभ्यस् समवाप महीपतिः ॥ २३॥
ब्राह्मणानां च वृद्धानां क्षत्रियाणां च भारत ।
तथा विट्शूद्रसङ्घानाम् अभवत् पाण्डवः प्रियः ॥ २४॥
यच्च किञ्चित् पुरा पापं धृतराष्ट्रसुतैः कृतम् ।
अकृत्वा हृदि तद्राजा तं नृपं सोऽन्ववर्तत ॥ २५॥
यश्च कश्च नरः किञ्चिद् अप्रियं ह्यम्बिकासुते ।
[1]कुरुते द्वेष्यतामेति स कौन्तेयस्य धीमतः ॥ २६॥
न राज्ञो धृतराष्ट्रस्य न च दुर्योधनस्य च ।
अरोचद् दुष्कृतं किञ्चिद् युधिष्ठिरभयान्नृपः ॥ २७॥
तुष्टोऽभूद्धृतराष्ट्रश्च गान्धारी च महायशाः ।
अजातशत्रोर्वृत्तेन न तु भीमस्य पार्थिवः ॥ २८॥
अन्ववर्तत भीमोऽपि [2]निष्टनन् धर्मजं नृपम् ।
धृतराष्ट्रं स सम्प्रेक्ष्य सदा भवति दुर्मनाः ॥ २९॥
राजानमनुगच्छंस्तु धर्मपुत्रं महामतिम् ।
अन्ववर्तत सक्रोधो हृदयेन पराङ्मुखः ॥ ३०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
॥ ९३ ॥ आश्रमवासपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[ अस्मिन्नध्याये ३०॥ श्लोकाः ]

---

1. ग—अर्धचतुष्टयं नास्ति 2. ग—निष्टुरं ।

## ॥ तृतीयोऽध्यायः ॥

भीमसेनपरुषभाषणश्रवणान्निर्वेदमुपगतवता धृतराष्ट्रेण गान्धार्या सह वनगमनाध्यवसायः ॥ १ ॥

वैशम्पायनः—

युधिष्ठिरस्य नृपतेर् दुर्योधनपितुस्तदा ।
नान्तरं ददृशू राजन् पुरुषाः प्रणयं प्रति ॥ १

यदा तु कौरवो राजा पुत्रं सस्मार बालिशम् ।
तदा भीममपध्याति हृदयेनाम्बिकासुतः ॥ २

कौरवश्चैव भीमश्च हृदाऽन्योन्यमदूष्यताम् ।
ध्यायन्तौ श्लक्ष्णया वाचा अन्योन्यमभितिष्ठताम् ॥ ३

अप्रकाशं व्यलीकानि कुरुतेऽस्य वृकोदरः ।
आज्ञां प्रत्यहनच्चैव कृतकैः पुरुषैस्सदा ॥ ४

असकृच्चाप्युवाचेदं हतास्ते मन्दचेतसः ॥ ४॥

अथ भीमस्सुहृन्मध्ये बाहुशब्दमथाऽकरोत् ।
संश्रवे धृतराष्ट्रस्य युद्धं संवर्णयन्निव ॥ ५॥

स्मृत्वा दुर्योधनं शत्रुं कर्णदुश्शासनावपि ।
प्रोवाचेदं सुसंरब्धो भीमस्स परुषं वचः ॥ ६॥

भीमः—

अन्धस्य नृपतेः पुत्रा मया परिघबाहुना ।
[1]नीता लोकममुं सर्वे नानाशस्त्रास्त्रयोधिनः ॥ ७॥

इमौ पीनौ सुवृत्तौ मे नागराजकरोपमौ ।
यावासाद्य रणे मूढा धार्तराष्ट्राः क्षयं गताः ॥ ८॥

ताविमौ चन्दनेनाक्तौ वन्दनीयौ च मे भुजौ ।
याभ्यां दुर्योधनो निन्ये क्षयं ससुतबान्धवः ॥ ९॥

वैशम्पायनः—

एताश्चान्याश्च विविधाश् शल्यभूता जनाधिपः ।
श्रुत्वा निर्वेदमापेदे भीमवाग्बाणचोदितः ॥ १०॥

[2]सा च बुद्धिमती देवी कालपर्यायवेदिनी ।
गान्धारी सर्वधर्मज्ञा तान्यलीकानि शुश्रुवे ॥ ११॥

ततः पञ्चदशे वर्षे समतीते नराधिपः ।
[3]राजा निर्वेदमापेदे भीमवाग्बाणपीडितः ॥ १२॥

[4]सुखासक्तं कृच्छ्रपरं ज्ञात्वा चैव युधिष्ठिरम् ।
तपोयोगात् तपस्तप्तुं मनश्चक्रे महामतिः ॥ १३॥

नान्वबुध्यत तद्राजा कुन्तीपुत्रो युधिष्ठिरः ।

---

1. अ-क-ख-घ—असकृच्चाप्युवाचेदं हतास्ते मन्दचेतसः । [पाठान्तरम्]
2. ग—इदमर्धद्वयं नास्ति　　3. क-ख-ग-घ—अर्धद्वयं नास्ति
4. अ—इदमर्धं नास्ति

श्वेताश्वो वाऽथ कुन्ती वा द्रौपदी वा यशस्विनी ॥ १४॥
माद्रीपुत्रौ च भीमस्य चित्तज्ञावन्वमोदताम् ।
राज्ञस्तु चित्तं रक्षन्तौ नोचतुस्स्वयमप्रियम् ॥ १५॥
ततस्समानयत् सर्वं धृतराष्ट्रस्सुहृज्जनम् ।
बाष्पसन्दिग्धमत्यर्थम् इदमाह वचो भृशम् ॥ १६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
॥ ९३ ॥ आश्रमवासपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[ अस्मिन्नध्याये १६॥ श्लोकाः ]

## ॥ चतुर्थोऽध्यायः ॥

धृतराष्ट्रेण सकलपौरानयनेन तेषु स्वस्य वनगमनाध्यवसायनिवेदनम् ॥१॥ धृतराष्ट्रेण युधिष्ठिरं प्रति स्वस्य वनगमनाभ्यनुज्ञानप्रार्थना ॥२॥

धृतराष्ट्रः—
विदितं भवतामेतद् यथा धृत्तं कुरुक्षयम् ।
ममापराधात् तत् सर्वम् इति ज्ञेयं तु कौरवाः ॥ १
योऽहं दुष्टमतिं मूर्खं ज्ञातीनां भयवर्धनम् ।
दुर्योधनं कौरवाणाम् आधिपत्येऽभ्यषेचयम् ॥ २
यच्चाहं वासुदेवस्य वाक्यं नाश्रौषमर्थवत् ।

बध्यतां साध्वयं पापस् सामात्य इति दुर्मतिः ॥ ३
पुत्रस्नेहाभिभूतश्च हितमुक्तो हितैषिणा ॥ ३॥
विदुरेणाथ भीष्मेण द्रोणेन च कृपेण च ।
पदे पदे भगवता व्यासेन च महात्मना । ४॥
सञ्जयेनाथ गान्धार्या तदिदं तप्यते मया ॥ ५
यच्चाहं पाण्डुपुत्रेषु गुणवत्सु महात्मसु ।
न न्यस्तवान्श्रियं दीप्तां पितृपैतामहीमिमाम् ॥ ६
पश्यन्नपि विनाशं हि सर्वराज्ञां गदाग्रजः ।
एतच्छ्रेयस्स परमम् अमन्यत जनार्दनः ॥ ७
सोऽहमेतान्यतीतानि दुर्वृत्तान्यात्मनस्सदा ।
हृदये शल्यभूतानि धारयामि सहस्रशः ॥ ८
विशेषतस्तु दह्यामि वर्षे पञ्चदशे हि वै ।
अस्य पापस्य शुद्ध्यर्थं नियतोऽस्मि सुदुर्मतिः ॥ ९
चतुर्थे नियते काले कदाचिदपि चाष्टमे ।
तृष्णापनयनं [1]भुङ्क्ते गान्धारी वेद तन्मम ॥ १०
करोत्याहारमिति च सर्वैः परिजनस्सदा ।
युधिष्ठिरभयाद्वेत्ति भृशं तप्येत पाण्डवः ॥ ११
भूमौ शये जप्यपरो दर्भेष्वजिनसंवृतः ।

1. ग—भुङ्क्ते । ख—भुङ्क्ते गान्धारी चेन्मता मम ।

नियमव्यपदेशेन गान्धारी च यशस्विनी ॥ १२

हतं पुत्रशतं वीरं सङ्ग्रामेष्वपलायिनम् ।
नानुतप्ये ह्यहं तच्च क्षत्रधर्मं हि तं विदुः ॥ १३

वैशम्पायनः—

इत्युक्त्वा धर्मराजं सोऽथाभ्यभाषत वीर्यवान् ॥ १३॥

धृतराष्ट्रः—

भद्रं ते यादवीमातर् वाक्यं चेदं निबोध मे ॥ १४

सुखमस्म्युषितः पुत्र त्वया सुपरिपालितः ।
मया दानानि दत्तानि श्राद्धानि च पुनः पुनः ॥ १५

प्रकृष्टं मे वयः पुत्र पुण्यं प्राप्तं यथाबलम् ।
गान्धारी हतपुत्रेयं धैर्येणावेक्षते च माम् ॥ १६

द्रौपद्याशुभकर्तारस् तव चैश्वर्यहारिणः ।
समतीता नृशंसास्ते धर्मेण निहता युधि ॥ १७

न तेषु प्रतिकर्तव्यं पश्यामि कुरुनन्दन ।
सर्वे शस्त्रजिताँल्लोकान् गता ह्यभिमुखा हताः ॥ १८

आत्मनस्तु सतां मुख्य प्रतिकर्तव्यमद्य मे ।
गान्धार्याश्चैव राजेन्द्र तदनुज्ञातुमर्हसि ॥ १९

त्वं हि धर्मभृतां श्रेष्ठस् सततं धर्मवत्सलः ।
राजा गुरुः प्राणभृतां तस्मादेतद्ब्रवीम्यहम् ॥ २०

अनुज्ञातस्त्वया वीर संश्रयेयं वनान्यहम् ।
चीरवल्कलभृद्राजन् गान्धार्या सहितोऽनघ ॥ २१
तवाशिषः प्रयुञ्जानो भविष्यामि वनेचरः ।
उचितं नः कुले तात सर्वेषां भरतर्षभ ॥ २२
पुत्रेष्वैश्वर्यमाधाय वयसोऽन्ते वनं नृप ॥ २२॥
[1]तत्राहं वायुभक्षो वा निराहारोऽपि वा वसन् ।
पत्न्या सहानया वीर चरिष्यामि तपः परम् ॥ २३॥
त्वं चापि फलभुक् तात तपसा पार्थिवो ह्यसि ।
फलभाजो हि राजानः कल्याणस्येतरस्य वा ॥ २४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
॥ ९३ ॥ आश्रमवासपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[ अस्मिन्नध्याये २४॥ श्लोकाः ]

## ॥ पञ्चमोऽध्यायः ॥

युधिष्ठिरेण धृतराष्ट्रानुशोचनपूर्वकं तत्प्रतिषेधने व्यासेन युधिष्ठिरबोधनाय तत्रागमनम् ॥ १ ॥

युधिष्ठिरः—
न मां प्रीणयते राज्यं त्वय्येवं दुःखिते नृप ।
धिङ्मामस्तु सुदुर्बुद्धिं राज्यलुब्धं प्रमादिनम् ॥ १

1. क—अर्धचतुष्टयं नास्ति

वने भवन्तं दुःखार्तम् उपवासकृशं नृप ।
यताहारं भूमिशयं नाविन्दं भ्रातृभिस्सह ॥ २

अहोऽस्मि वञ्चितो मूढो भवता गूढबुद्धिना ।
विश्वासयित्वा पूर्वं मां यदि त्वमिदमुक्तवान् ॥ ३

[1]किं मे राज्येन भोगैर्वा किं यज्ञैः किं फलेन वा ।
यस्य मे त्वं महीपाल दुःखान्येवमवाप्तवान् ॥ ४

पीडितं चापि जानामि राज्यमात्मानमेव च ।
अनेन वचसा तेऽद्य दुःखितोऽस्मि जनेश्वर ॥ ५

भवान् पिता भवान् माता भवान् नः परमो गुरुः ।
भवता विप्रहीणा हि क नु तिष्ठामहे वयम् ॥ ६

औरसो भवतः पुत्रो युयुत्सुस्तरुणोऽपि सन् ।
अस्तु राजा महाराज यं चान्यं मन्यते भवान् ॥ ७

अहं वनं गमिष्यामि भवान् राज्यं प्रशास्त्विदम् ।
न मामयशसा दग्धं भूयस्त्वं दग्धुमर्हसि ॥ ८

नाहं राजा भवान् राजा भवता परवानहम् ।
कथं गुरुं महाराजम् अनुज्ञातुमिहोत्सहे ॥ ९

न मन्युरिह नः कश्चित् सुयोधनकृते नृप ।
भवितव्यं तथा तद्धि वयं ते चैव मोहिताः ॥ १०

---

1. ब—अर्धार्द्धयं नास्ति

वयं हि पुत्रा भवतो यथा दुर्योधनादयः ।
गान्धारी चैव कुन्ती च निर्विशेषे मते मम ॥ ११

यद्येवमपि मां राजन् परित्यज्य गमिष्यसि ।
पृष्ठतस्त्वनुयास्यामि सत्येनात्मानमालभे ॥ १२

इयं हि वसुसम्पूर्णा मही सागरमेखला ।
भवता विप्रहीणस्य न मे प्रीतिकरी भवेत् ॥ १३

भवदीयमिदं सर्वं शिरसा त्वां प्रसादये ।
त्वदधीनास्स्म राजेन्द्र व्येतु ते मानसो ज्वरः ॥ १४

भवितव्यमनुप्राप्तं मन्ये त्वेतज्जनाधिप ।
दिष्ट्या शुश्रूषमाणस्त्वां मोक्ष्यामि मनसो ज्वरम् ॥ १५

धृतराष्ट्रः—
तापस्ये मे मनस्तात वर्तते कुरुनन्दन ।
उचितं हि कुलेऽस्माकम् अरण्यगमनं प्रभो ॥ १६

चिरमस्म्युषितः पुत्र चिरं शुश्रूषितस्त्वया ।
वृद्धं मामभ्यनुज्ञातुं राजन्नर्हसि मा चिरम् ॥ १७

वैशम्पायनः—
एवमुक्त्वा वेपमानं पाण्डुपुत्रं कृताञ्जलिम् ।
उवाच विदुरं राजा धृतराष्ट्रोऽम्बिकासुतः ॥ १८

धृतराष्ट्रः—
सञ्जयं च महामात्रं कृपं चापि महारथम् ।

अनुनेतुमिहेच्छामि भवद्भिः पृथिवीपतिम् ॥ १९

म्लायते हि मनस्तात मुखं च परिशुष्यति ।
वयसा च प्रकृष्टेन व्यायामेनाप्यनेन च ॥ २०

वैशम्पायनः—

इत्युक्त्वा स तु धर्मात्मा वृद्धो राजा कुरूद्वहः ।
गान्धारीं शिश्रिये धीमान् सहसैव गतासुवत् ॥ २१

[1]तं तु दृष्ट्वा तथाऽऽसीनं निश्चेष्टं कुरुपार्थिवम् ।
आर्तिं राजा ययौ तूर्णं कौन्तेयः परवीरहा ॥ २२

युधिष्ठिरः—

यस्य नागसहस्रेण दशसङ्ख्येन वै बलम् ।
सोऽयं नारीं समाश्रित्य शेते राजा गतासुवत् ॥ २३

आयसी प्रतिमा येन भीमसेनस्य वै पुरा ।
चूर्णीकृता बलवता स बलार्थेऽश्रयत् स्त्रियम् ॥ २४

धिगस्तु मामधर्मज्ञं धिग् बुद्धिं धिग् बहुश्रुतम् ।
यत्कृते पृथिवीपालश् शेतेऽयमतथोचितः ॥ २५

अहमप्युपवत्स्यामि यथैवायं गुरुर्मम ।
यदि राजा न भुङ्क्तेऽयं गान्धारी च यशस्विनी ॥ २६

वैशम्पायनः—

ततोऽस्य पाणिना राजा जलशीतेन पाण्डवः ।

---

1. अ-ख-ग-घ—इदमर्धं नास्ति

उरो मुखं चैव शनैः पर्यमार्जत धर्मवित् ॥ २७

तेन रत्नौषधिमता पुण्येन सुखगन्धिना ।
पाणिस्पर्शेन राज्ञस्तु तथा सुखमवाप ह ॥* २८

धृतराष्ट्रः—

स्पृश मां पाणिना भूयः परिष्वज च पाण्डव ।
जीवामीव हि संस्पर्शात् तव राजीवलोचन ॥ २९

मूर्धानं च तवाघ्रातुम् इच्छामि मनुजाधिप ।
पाणिभ्यां च परिस्प्रष्टुं प्राणेन मम चात्मनि ॥ ३०

अष्टमो ह्यद्य कालोऽयम् आहारस्य कृतस्य मे ।
येनाहं कुरुशार्दूल न शक्नोमि विचेष्टितुम् ॥ ३१

व्यायामश्चायमत्यन्तं कृतस्त्वामभियाचता ।
ततो ग्लानमना राजन् नष्टसंज्ञ इवाभवम् ॥ ३२

तवामृतसुखस्पर्शं हस्तस्पर्शमिमं प्रभो ।
लब्ध्वा सञ्जीवितोऽस्मीति मन्ये कुरुकुलोद्वह ॥ ३३

वैशम्पायनः—

एवमुक्तस्तु कौन्तेयः पित्रा ज्येष्ठेन भारत ।
पस्पर्श सर्वगात्रेषु स्नेहार्द्रं तं शनैस्तथा ॥ ३४

उपलभ्य ततः प्राणान् धृतराष्ट्रो महीपतिः ।

---

* अ-क-ख-ग-घ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते ।

बाहुभ्यां सम्परिष्वज्य मूर्ध्नि चाघ्राय पाण्डवम् † ॥ ३५

विदुरादयश्च ते सर्वे रुरुदुर्दुःखिता भृशम् ।
अतिदुःखात्तु राजानं नोचुः किञ्चन पाण्डवाः ॥ ३६

गान्धारी त्वेव धर्मज्ञा मनसोद्वहती तदा ।
दुःखान्यवारयद्राजन् मैवमित्येव चाब्रवीत् ॥ ३७

इतरास्तु स्त्रियस्सर्वाः कुन्त्या सह सुदुःखिताः ।
नेत्रैस्तास्साश्रुविक्लेदैः परिवार्य स्थिता भवन् ॥ ३८

तदाऽब्रवीत् पुनर्वाक्यं धृतराष्ट्रो युधिष्ठिरम् ॥ ३८॥

धृतराष्ट्रः—

अनुजानीहि मां राजंस् तपसे भरतर्षभ ॥ ३९

ग्लायते मे मनस्तात भूयो भूयः प्रजल्पतः ।
न मामितः परं पुत्र परिक्लेष्टुमिहार्हसि ॥ ४०

वैशम्पायनः—

तस्मिंस्तु कौरवश्रेष्ठे तथा ब्रुवति पाण्डवम् ।
सर्वेषामवरोधानाम् आर्तनादो महानभूत् ॥ ४१

दृष्ट्वा कृशं विवर्णं च राजानमतथोचितम् ।
उपवासपरिक्लान्तं त्वगस्थिपरिवारितम् ॥ ४२

धर्मपुत्रस्स्वपितरं परिष्वज्य महाभुजः ।
शोकजं बाष्पमुत्सृज्य पुनर्वचनमब्रवीत् ॥ ४३

† क्वरोदेत्यध्याहारेणान्वयः ।

युधिष्ठिरः—
न कामये नरश्रेष्ठ जीवितं पृथिवीं तथा ।
यथा तव प्रियं राजंश् चिकीर्षामि प्रयत्नतः ॥ ४४
यदि त्वहमनुग्राह्यो भवतो दयितोऽपि वा ।
क्रियतां तावदाहारस् ततो वेत्स्यामहे परम् ॥ ४५

वैशम्पायनः—
ततोऽब्रवीन्महाराजो धर्मराजं स कौरवः ॥ ४५॥

धृतराष्ट्रः—
अनुज्ञातस्त्वया पुत्र भुञ्जीयेति मतिर्मम ॥ ४६

वैशम्पायनः—
इति ब्रुवति राजेन्द्रे धृतराष्ट्रे युधिष्ठिरम् ।
ऋषिस्सत्यवतीपुत्रो व्यासोऽभ्येत्य वचोऽब्रवीत् ॥ ४७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
॥ ९३ ॥ आश्रमवासपर्वणि पञ्चमोऽध्यायः ॥ ५॥
[ अस्मिन्नध्याये ४७ श्लोकाः ]

## ॥ षष्ठोऽध्यायः ॥

व्यासेन युधिष्ठिरं प्रति सहेतूपन्यासं धृतराष्ट्रस्य वनगमनाभ्यनुज्ञानचोदनपूर्वकं स्वाश्रमगमनम् ॥ १ ॥ युधिष्ठिरेण धृतराष्ट्रं प्रति कृष्णेन तदभ्यनुज्ञानाङ्गीकरणम् ॥ २॥

व्यासः—
युधिष्ठिर महाबाहो यथाऽऽह कुरुनन्दनः ।
धृतराष्ट्रो महात्मा त्वं तत् कुरुष्वाविचारयन् ॥ १

अयं हि वृद्धो नृपतिर् हतपुत्रो विशेषतः ।
नेदं कृच्छ्रं चिरगतस् सहेदिति मतिर्मम ॥ २

गान्धारी च महाभागा प्राज्ञा करुणवेदिनी ।
पुत्रशोकं महाराज धैर्येणोद्वहते भृशम् ॥ ३

अहमप्येतदेव त्वां ब्रवीमि कुरु मे वचः ।
अनुज्ञां लभतां राजा मा वृथेह मरिष्यति ॥ ४

स्वस्थो भवत्वयं धीमान् वनेषु मधुगन्धिषु ।
राजर्षीणां पुराणानाम् अनुयातु गतिं नृपः ॥ ५

राजर्षीणां हि सर्वेषाम् अन्ते वनमुपाश्रयः ॥ ५॥

वैशम्पायनः—

इत्युक्तस्स ततो राजा व्यासेनाद्भुतकर्मणा ।
प्रत्युवाच महातेजा धर्मराजो महामुनिम् ॥ ६॥

युधिष्ठिरः—

भगवानेव नो मान्यो भगवानेव नो गुरुः ।
भगवानस्य राज्यस्य कुलस्य च परायणम् ॥ ७॥

अहं तु पुत्रो भगवन् पिता राजा गुरुश्च मे ।
निदेशवर्ती च पितुः पुत्रो भवति धर्मतः ॥ ८॥

वैशम्पायनः—

इत्युक्तस्स तु तं प्राह व्यासो धर्मभृतां वरः ।
युधिष्ठिरं महातेजाः पुनरेव विशाम्पते ॥ ९॥

व्यासः—

एवमेतन्महाबाहो यथा वदसि कौरव ।
राजाऽयं वृद्धतां प्राप्तः प्रमाणे परमे स्थितः ॥ १०॥

सोऽयं मयाऽभ्यनुज्ञातस् त्वया च पृथिवीपतिः ।
करोतु स्वमभिप्रायं माऽस्य विघ्नकरो भव ॥ ११॥

एष एव परो धर्मो राजर्षीणां युधिष्ठिर ।
समरे वा भवेन्मृत्युर् वने वा विधिपूर्वकम् ॥ १२॥

पित्राऽपि तव राजेन्द्र पाण्डुना पृथिवीक्षिता ।
शिष्यभूतेन राजाऽयं गुरुवत् पर्युपासितः ॥ १३॥

क्रतुभिर्दक्षिणाभिश्च रत्नपर्वतशोभितैः ।
महद्भिरिष्टं भोगाश्च भुक्ताः पुत्राश्च लालिताः ॥ १४॥

अत्र संस्थं च विपुलं राज्यं विप्रोषिते त्वयि ।
त्रयोदश समा भुक्तं दत्तं च विपुलं वसु ॥ १५॥

त्वया च पुरुषव्याघ्र गुरुशुश्रूषया नृप ।
आराधितस्सभृत्येन गान्धारी च यशस्विनी ॥ १६॥

अनुजानीहि पितरं समयोऽस्य तपोविधौ ।
न मन्युर्विद्यते चास्य सुसूक्ष्मोऽपि युधिष्ठिर ॥ १७॥

वैशम्पायनः—

एतावदुक्त्वा वचनम् अनुज्ञाप्य च पार्थिवम् ।
तथाऽस्त्विति च तेनोक्तः कौन्तेयेन ययौ वनम् ॥ १८॥

गते भगवति व्यासे राजा पाण्डुसुतस्ततः।
प्रोवाच पितरं वृद्धं मन्दं मन्दमिवानतः ॥ १९॥

युधिष्ठिरः—

यथाऽऽह भगवान् व्यासो यच्चापि भवतो मतम् ।
यथाऽऽह च महेष्वासः कृपो विदुर एव च ॥ २०॥

युयुत्सुस्सञ्जयश्चैव तत् कर्तास्म्यहमञ्जसा ॥ २१
सर्वे ते ह्यनुमान्या मे कुलस्यास्य हितैषिणः ॥ २१॥

इदं तु याचे नृपते त्वामहं शिरसा नतः ।
क्रियतां तावदाहारस् ततो गच्छाश्रमं प्रति ॥ २२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि षष्ठोऽध्यायः॥ ६ ॥

॥ ९३ ॥ आश्रमवासपर्वणि षष्ठोऽध्यायः ॥ ६ ॥

[ अस्मिन्नध्याये २२॥ श्लोकाः ]

---

## ॥ सप्तमोऽध्यायः ॥

---

वनं गियासुना धृतराष्ट्रेण युधिष्ठिराय राजनीत्युपदेशः ॥ १ ॥

---

वैशम्पायनः—

ततो राज्ञाऽभ्यनुज्ञातो धृतराष्ट्रो महामनाः ।
ययौ स्वभवनं राजा गान्धार्याऽनुगतस्तदा ॥ १

[1]मन्दप्राणगतिर्धीमान् कृच्छ्रादिव समुद्धरन् ।
पदातिस्स महीपालो जीर्णो गजपतिर्यथा ॥ २

[2]तमन्वगच्छद्विदुरो विद्वान् सूतश्च सञ्जयः ।
स चैव परमेष्वासः कृपश्शारद्वतस्तदा ॥ ३

[3]प्रविश्य च गृहं राजा कृतपूर्वाह्णिकक्रियः ।
तर्पयित्वा द्विजश्रेष्ठान् आहारमकरोत् तदा ॥ ४

गान्धारी चैव धर्मज्ञा कुन्त्या सह मनस्विनी ।
वधूभिरुपचारेण पूजिताऽभुङ्क्त भारत ॥ ५

कृताहारं कृताहारास् सर्वे ते विदुरादयः ।
पाण्डवाश्च कुरुश्रेष्ठम् उपातिष्ठन्त भारत ॥ ६

ततोऽब्रवीन्महाराजः कुन्तीपुत्रमुपह्वरे ।
निषण्णं पाणिना पृष्ठे संस्पृशन्नम्बिकासुतः ॥ ७

धृतराष्ट्रः—

अप्रमादस्त्वया कार्यस् सर्वथा कुरुनन्दन ।
अष्टाङ्गे राजशार्दूल राज्ये धर्मपुरस्कृते ॥ ८

ननु शक्यं यथा तात रक्षितुं पाण्डुनन्दन ।
राज्यं धर्मं च कौन्तेय विद्वानसि निबोध तत् ॥ ९

विद्यावृद्धान् सदैव त्वम् उपासीथा युधिष्ठिर ।

---

1. ख-घ—अर्धचतुष्टयं नास्ति 2. क—अर्धद्वयं नास्ति
3. ख—इदमर्धं नास्ति

शृणुयास्ते हि यद्ब्रूयुः कुर्याश्चैवाविचारयन् ॥ १०

प्रातरुत्थाय तान् राजन् पूजयित्वा यथाविधि ।
कृच्छ्रकाले समुत्पन्ने पृच्छेथाः कार्यमात्मनः ॥ ११

ते सुसम्मानिता राजंस् त्वया राज्ये हितार्थिना ।
प्रवक्ष्यन्ति हितं तात सर्वं कौरवनन्दन ॥ १२

इन्द्रियाणि च सर्वाणि राज्यवत् परिपालय ।
हिताय वै भविष्यन्ति रक्षितं द्रविणं यथा ॥ १३

अमात्यानुपधातीतान् पितृपैतामहाञ्छुचीन् ।
दान्तान् कर्मसु सर्वेषु मुख्यान् मुख्येषु योजय ॥ १४

साधयेथाश्च सततं चारैरविदितैः परान् ।
परीक्षितैर्बहुविधैस् स्वराष्ट्रेषु परेषु च ॥ १५

पुरं च ते सुगुप्तं स्याद् दृढप्राकारतोरणम् ।
अट्टाट्टालकसम्बाधं षट्पदं सर्वतो दिशम् ॥ १६

तस्य द्वाराणि कार्याणि पर्याप्तानि बृहन्ति च ।
सर्वतस्सुविभक्तानि यन्त्रैरारक्षितानि च ॥ १७

पुरुषैरर्थतत्त्वज्ञैर् विदितैः कुलशीलतः ।
आत्मा च रक्ष्यस्सततं भोजनादिषु भारत ॥ १८

विहारादिषु सर्वेषु माल्यशय्यासनेषु च ॥ १८॥

स्त्रियश्च ते सुगुप्तास्स्युर् वृद्धैरात्तैर्युधिष्ठिर ।

[1]शीलवद्भिः कुलीनैश्च विद्वद्भिश्च युधिष्ठिर ॥ १९॥
मन्त्रिणश्चैव कुर्वीथा द्विजान् विद्याविशारदान् ।
विनीतांश्च कुलीनांश्च धर्मार्थकुशलानृजून् ॥ २०॥
तैस्सार्धं मन्त्रयेथास्त्वं नात्यर्थं बहुभिस्सह ।
समस्तैरपि च व्यस्तैर् व्यपदेशेन केनचित् ॥ २१॥
[2]सुसंवृतं मन्त्रगृहं सौधं चारुह्य मन्त्रयेत् ।
अरण्ये [3]निःशलाके वा न च रात्रौ कदाचन ॥ २२॥
वानराः पक्षिणश्चैव ये मनुष्यानुकारिणः ।
सर्वे मन्त्रगृहे वर्ज्या ये चापि जडपङ्गवः ॥ २३॥
मन्त्रभेदे च ये दोषा भवन्ति पृथिवीक्षिताम् ॥
न ते शक्यास्समाधातुं कथञ्चिदिति मे मतिः ॥ २४॥
दोषांश्च मन्त्रभेदेषु ब्रूयास्त्वं मन्त्रिमण्डले ।
अभेदे च गुणान् राजन् पुनः पुनररिन्दम ॥ २५॥
पौरजानपदानां च शौचाशौचे युधिष्ठिर ।
[4]यथा स्याद्विदितं राजंस् तथा कार्यं कुरूद्वह* ॥ २६॥
व्यवहाराश्च ते तात नित्यमात्तैरनुष्ठिताः ।

---

1. क-ङ—अर्धमिदं नास्ति
2. ग—अर्धषट्कं नास्ति
3. अ-ग—निशि काले वा।
4. क-ख-ग—नास्तीदमर्धम्।
* अ-क-ख-ग-ङ—कोशेषु अत्रैवाध्यायसमाप्तिर्दृश्यते।

योज्यास्तुष्टैर्भृतै राजन् नित्यं चारैरनुष्ठितैः ॥ २७॥
परिमाणं विदित्वा च दण्डं दण्ड्येषु भारत ।
प्रणयेयुर्यथान्यायं पुरुषास्ते युधिष्ठिर ॥ २८॥
आदानरुचयश्चैव चरा ये भीमदर्शनाः ।
उग्रदण्डप्रधानाश्च मिथ्याव्याहारिणस्तथा ॥ २९॥
क्रोष्टारश्चैव लुब्धाश्च हन्तारस्साहसप्रियाः ।
हिंसाविहारभोक्तारो वर्णानां च प्रदूषकाः ॥ ३०॥
हिरण्यदण्ड्या वध्या वा कर्तव्या देशकालतः ॥ ३१
[1]अवरोधभूमौ भृत्यैश्च पानं सह विवर्जयेत् ।
आक्रोशन्त्यनुमत्तास्ते कलत्रं वाऽपि गृह्णते ॥ ३२
जिघांसन्त्यपि शस्त्रेण नष्टाः क्रीडन्ति चोत्कटाः ।
नानाक्षेपा व्याहरन्ति गम्यागम्यं न जानते ॥ ३३
अतिपानेन राजाऽपि सर्वं कोशं विनाशयेत् ।
वितरेद्रायकेभ्यश्च वृथा च द्रव्यसञ्चयम् ॥ ३४
शब्दमात्मनि दोषांश्च पिबेदेकश्च जायया ।
युक्त्या प्रकाशमयति सुवीर्यस्य विवृद्धये ॥ ३५
[2]प्रातरन्यांश्च पश्येथा ये कुर्युः प्रियकर्म ते ।

---

1. अर्धाष्टकं अ-क-ख-ग-घ—कोशेषु नोपलभ्यते । परं तु लक्षालङ्कार-कारैः व्याख्यायते । औत्तराहपाठेषु च नाद्रियते ॥
2. क-ख-ग-घ—इदमर्धं नास्ति

[1]शीलवद्भिः कुलीनैश्च विद्वद्भिश्च युधिष्ठिर ॥ १९॥
मन्त्रिणश्चैव कुर्वीथा द्विजान् विद्याविशारदान् ।
विनीतांश्च कुलीनांश्च धर्मार्थकुशलानृजून् ॥ २०॥
तैस्सार्धं मन्त्रयेथास्त्वं नात्यर्थं बहुभिस्सह ।
समस्तैरपि च व्यस्तैर् व्यपदेशेन केनचित् ॥ २१॥
[2]सुसंवृतं मन्त्रगृहं सौधं चारुह्य मन्त्रयेत् ।
अरण्ये [3]निःशलाके वा न च रात्रौ कदाचन ॥ २२॥
वानराः पक्षिणश्चैव ये मनुष्यानुकारिणः ।
सर्वे मन्त्रगृहे वर्ज्या ये चापि जडपङ्गवः ॥ २३॥
मन्त्रभेदे च ये दोषा भवन्ति पृथिवीक्षिताम् ॥
न ते शक्यास्समाधातुं कथञ्चिदिति मे मतिः ॥ २४॥
दोषांश्च मन्त्रभेदेषु ब्रूयास्त्वं मन्त्रिमण्डले ।
अभेदे च गुणान् राजन् पुनः पुनररिन्दम ॥ २५॥
पौरजानपदानां च शौचाशौचे युधिष्ठिर ।
[4]यथा स्याद्विदितं राजंस् तथा कार्यं कुरूद्वह* ॥ २६॥
व्यवहाराश्च ते तात नित्यमात्तैरनुष्ठिताः ।

---

1. क-ङ—अर्धमिदं नास्ति
2. ग—अर्धषट्कं नास्ति
3. अ-ग—निशि काले वा।
4. क-ख-ग—नास्तीदमर्धम्।

* अ-क-ख-ग-ङ—कोशेषु अस्तैवाध्यायसमाप्तिरिष्यते।

योज्यास्तुष्टैर्भृतै राजन नित्यं चारैरनुष्ठितैः ॥ २७॥
परिमाणं विदित्वा च दण्डं दण्ड्येषु भारत ।
प्रणयेयुर्यथान्यायं पुरुषास्ते युधिष्ठिर ॥ २८॥
आदानरुचयश्चैव चरा ये भीमदर्शनाः ।
उग्रदण्डप्रधानाश्च मिथ्याव्याहारिणस्तथा ॥ २९॥
क्रोष्टारश्चैव लुब्धाश्च हन्तारस्साहसप्रियाः ।
हिंसाविहारभोक्तारो वर्णानां च प्रदूषकाः ॥ ३०॥
हिरण्यदण्ड्या वध्या वा कर्तव्या देशकालतः ॥ ३१
[1]अवरोधभूमौ भृत्यैश्च पानं सह विवर्जयेत् ।
आक्रोशन्त्यनुमत्तास्ते कलत्रं वाऽपि गृह्णते ॥ ३२
जिघांसन्त्यपि शस्त्रेण नष्टाः क्रीडन्ति चोत्कटाः ।
नानाक्षेपा व्याहरन्ति गम्यागम्यं न जानते ॥ ३३
अतिपानेन राजाऽपि सर्वं कोशं विनाशयेत् ।
वितरेद्वायकेभ्यश्च वृथा च द्रव्यसञ्चयम् ॥ ३४
शब्दमात्मनि दोषांश्च पिबेदेकश्च जायया ।
युक्त्या प्रकाशमयति सुवीर्यस्य विवृद्धये ॥ ३५
[2]प्रातरन्यांश्च पश्येथा ये कुर्युः प्रियकर्म ते ।

1. अर्धाष्टकं अ-क-ख-ग-घ—कोशेषु नोपलभ्यते । परं तु लक्षालङ्कारकारैः व्याख्यायते । औत्तराहपाठेषु च नाद्रियते ॥
2. क-ख-ग-घ—इदमर्धं नास्ति

अलङ्कारमथो भोज्यम् अत ऊर्ध्वं समाचर ॥ ३६
पश्येथाश्च ततो योधान् सततं परिहर्षयन् ।
दूतानां च चराणां च प्रदोषस्ते सदा भवेत् ॥ ३७
सदा चापररात्रान्ते भवेत् कार्यविनिर्णयः ।
मध्यरात्रे विहारस्ते मध्याह्ने च सदा भवेत् ॥ ६८
सर्वे त्वात्ययिके कालाः कार्याणां भरतर्षभ ।
तथैव चाचरन् काले तिष्ठेथा भूरिदक्षिणः ॥ ३९
चक्रवत् कर्मणां तात पर्यायो ह्येष नित्यशः ॥ ३९॥
कोशस्य सञ्चये यत्नं कुर्वीथा न्यायतस्सदा ।
विविधस्य महाराज विपरीतं विवर्जयेत् ॥ ४०॥
चारैर्विदित्वा शत्रूंश्च ये ते राज्यान्तरायिणः ।
तानाप्तैः पुरुषैर्दूराद् घातयेथाः परस्परम् ॥ ४१॥
कर्म दृष्ट्वा ततोऽमात्यान् सङ्गृह्णीयाः कुरूद्वह ।
कामयेथाश्च कर्माणि युक्तायुक्तैरनुष्ठितैः ॥ ४२॥
सेनाप्रणेता च भवेत् तव तात दृढव्रतः ।
शूरः क्लेशसहश्चैव प्रियश्च तव मानवः ॥ ४३॥
[1]सर्वे जनपदाश्चैव तव कर्माणि पाण्डव ।
पौरोगवाश्च सभ्याश्च कुर्युर्यानविहारिणः ॥ ४४॥

1. अ—इदमर्धं नास्ति

स्वरन्ध्रं पररन्ध्रं च स्वेषु चैव परेषु च ।
उपलक्षयितव्यं ते नित्यमेव युधिष्ठिर ॥ ४५॥

देशान्तरस्थाश्च नरा विक्रान्तास्सर्वकर्मसु ।
यात्राभिरनुरूपाभिर् अनुग्राह्या हितास्त्वया ॥ ४६॥

गुणानुसम्मतं कार्यं विदुषां राजसत्तम ।
अविचाल्यश्च देशस्स्याद् यथा मेरुर्महागिरिः ॥ ४७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

॥ ९३ ॥ आश्रमवासपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

[ अस्मिन्नध्याये ४७॥ श्लोकाः ]

---

## ॥ अष्टमोऽध्यायः ॥

धृतराष्ट्रेण युधिष्ठिरं प्रति राजनीतिकथनम् ॥ १ ॥

धृतराष्ट्रः—

मण्डलानि च बुध्येथाः परेषामात्मनस्तथा ।
उदासीनगुणानां च मध्यमानां तथैव च ॥ १

चतुर्णां शत्रुजातानां सर्वेषामाततायिनाम् ।
मित्रं चामित्रमित्रं च बोद्धव्यं शत्रुकर्शन ॥ २

तथाऽमात्या जनपदा दुर्गाणि विविधानि च ।

कुरुश्रेष्ठ भवन्त्येषां यथादेशं यथास्वकम् ॥ ३
ते च द्वादश कौन्तेय राजानो विविधात्मकाः ।
मन्त्रप्रधानाश्च गुणाष् षष्टिर्द्वादश च स्मृताः ॥ ४
एतन्मण्डलमित्याहुर् आचार्या नीतिकोविदाः ।
अत्र षाङ्गुण्यमायत्तं युधिष्ठिर निबोध तत् ॥ ५
वृद्धिक्षयौ च [1]विज्ञेयौ स्थानं च कुरुनन्दन ।
द्विसप्तत्या महाबाहो ततष्षाङ्गुण्यचारिणा ॥ ६
यथा स्वपक्षो बलवान् परपक्षस्तथाऽवरः ।
विगृह्य शत्रून् कौन्तेय यायात् क्षितिपतिस्तदा ॥ ७
यदा स्वपक्षस्त्ववरस् तदा सन्धिं समाश्रयेः ।
द्रव्याणां सञ्चये चैव यत्नः कार्यस्तदा भवेत् ॥ ८
[2]यदा समर्थो यानाय नचिरेण च भारत ।
तदा सर्वं विधातव्यं स्थाने चैव विधायकः ॥ ९
भूमिरल्पफला देया विपरीतस्य भारत ॥ ९॥
हिरण्यरूप्यभूयिष्ठम् अमित्रं क्षीणकोशवत् ।
विपरीतं न गृह्णीयात् स्वयं सन्धिविशारदः ॥ १०॥
सख्यार्थं राजपुत्रं वा लिप्सेथा भरतर्षभ ।
विपरीते कृते देयः पुत्रः कस्याञ्चिदापदि ॥ ११॥

1. ग—विज्ञेयौ यत्नः कार्यस्सदा भवेत् । मध्ये अर्धपञ्चकं नास्ति
2. अ-क—समर्थं चैव जनयञ्चिरेण ख-घ—क्षमर्थं चैव जनयन्

तस्य प्रमोक्षे यत्नं च कुर्यास्सोपायमात्मवत् ।
प्रकृतीनां च कौन्तेय राजा दीनान् विभावयेत् ॥ १२॥
क्रमेण युगपद्वृद्धं व्यसनानां बलाबलम् ।
पीडनं स्तम्भनं चैव कोशभङ्गस्तथैव च ॥ १३॥
कार्यं यत्नेन शत्रूणां स्वराष्ट्रं रक्षता स्वयम् ॥ १४
न च हिंस्योऽभ्युपगतस् सामन्तो वृद्धिमिच्छता ।
कौन्तेय तद्धितं ते स्यात् पृथिवीं विजिगीषतः ॥ १५
गुणाभेदेन वै योगं गच्छेथास्सह मन्त्रिभिः ।
आत्मसात्करणे नित्यं पालनानि गृहे तथा ॥ १६
दुर्बलाश्चैव सततं नावष्टभ्या बलीयसा ।
तिष्ठेथा राजशार्दूल वैतसीं वृत्तिमाश्रितः ॥ १७
यद्येवमभियायास्त्वं बलवान् दुर्बलं नृप ।
सामादिभिरुपायैस्तं क्रमेण विनिवर्तय ॥ १८
अशक्नुवंस्तु युद्धाय निष्पतेस्सह मन्त्रिभिः ।
कोशेन पौरैर्दण्डेन ये चान्ये प्रियकारिणः ॥ १९
असम्भवे तु सर्वस्य यथा मुख्येन निष्पतेत् ।
क्रमेणानेन मोक्षस्याच् छरीरमपि केवलम् ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
॥ ९३ ॥ आश्रमवासपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[ अस्मिन्नध्याये २० श्लोकाः ]

## ॥ नवमोऽध्यायः ॥

धृतराष्ट्रेण युधिष्ठिरं प्रति राजनीतिकथनम् ॥ १ ॥

धृतराष्ट्रः—

सन्धिविग्रहमप्यत्र पश्येथा राजसत्तम ।
द्वियोनिं त्रिविधोपायं बहुकल्पं युधिष्ठिर ॥ १

राजेन्द्र पर्युपासीथा नीत्वा द्विविधमात्मना ।
तुष्टपुष्टजनश्शत्रुर् अर्थवानिति च स्मरेत् ॥ २

पर्युपासनकाले तु विपरीतं विधीयते ।
आमर्दकाले राजेन्द्र व्यवसायस्ततोऽपरः ॥ ३

वमनं भेदनं चैव शत्रूणां कारयेत् ततः ।
कर्षणं भीषणं चैव युद्धे चैव बहुक्षयम् ॥ ४

प्रयास्यमानस्तु पुनस् त्रिविधं परिचिन्तयेत् ।
आत्मनश्चैव शत्रोश्च शक्तिं शास्त्रविशारदः ॥ ५

उत्साहप्रभुशक्तिभ्यां मन्त्रशक्त्या च भारत ।
उपपन्नो नृपो यायाद् विपरीतमतोऽन्यथा ॥ ६

आददीत बलं राजा मौलं मित्रबलं तथा ।
अटवीबलं भृतं चैव तथा श्रेणीबलं च यत् ॥ ७

बन्धुमित्रबलं राजन् मौलेन च विशिष्यते ।

श्रेणीबलं प्राकृतं च तुल्यं तेनैव भारत ॥ ८

चोराटविबलं चैव परस्परबलं नृप ।
विज्ञेयं बलकालेषु राज्ञा काल उपस्थिते ॥ ९

आपदश्चैव बोद्धव्या बहुरूपा नराधिप ।
भवन्ति राजन् कौरव्य यास्ताः प्रथमतश्शृणु ॥ १०

विकल्पा बहवो राजन्नापदां पाण्डुनन्दन ।
सामादिभिरुपन्यस्य गमयेत् तान् नृपस्सदा ॥ ११

यात्रां यायाद्बलैर्युक्तो राजा षड्भिः परन्तप ।
संयुक्तो देशकालाभ्यां बलैरात्मगुणैस्तथा ॥ १२

तुष्टपुष्टबलो राजा यायाद्वृद्धुदये धृतः ।
आहूतश्चाप्यथो यायाद् विवृतेन हि पार्थिव ॥ १३

अन्वागतां वाजिरथप्रधानो
महावृक्षां संवृतः कूलरोधाम् ।
पदातिना तैर्बहुकर्दमां च
स्थूलाश्मकां तोयवतीं च यायात् ॥ १४

अथोपपत्त्या शकटं वज्रं चक्रं च भारत ।
उशना वेद यच्छास्त्रं तत्रैतद्विहितं विभो ॥ १५

साधयित्वा परबलं कृत्वा च बलमर्षणम् ।
स्वभूमौ योजयेद्युद्धं परभूमौ तथैव च ॥ १६

लब्धं प्रशमयेद्राजा निक्षिपेद् धनिनो नरान् ।
ज्ञात्वा सुविषयं तं च सामादिभिरुपक्रमात् ॥ १७

सर्वमेतन्महाराज शरीरं धारयेदिह ।
प्रेत्यैव चेह कर्तव्यम् आत्मनिश्रेयसं परम् ॥ १८

एवं कुर्वञ्शुभाचारो लोकेऽस्मिञ्शृणु ते नृप ।
प्रेत्य स्वर्गं तथाऽऽप्नोति प्रजा धर्मेण पालयन् ॥ १९

एवं त्वया कुरुश्रेष्ठ वर्तितव्यं प्रजासु वै ।
उभयोर्लोकयोस्तात प्राप्तये नित्यमेव च ॥ २०

भीष्मेण पूर्वमुक्तोऽसि कृष्णेन विदुरेण च ।
मयाऽप्यवश्यं वक्तव्यं प्रीत्या स्नेहेन चाभिभो ॥ २१

एतत् सर्वं यथान्यायं कुर्वीथा भूरिदक्षिणः ।
प्रियं प्रजानां धर्मज्ञ स्वर्गं सुखमवाप्स्यसि ॥ २२

अश्वमेधसहस्रेण यो यजेत् पृथिवीपतिः ।
पालयेद्वाऽपि धर्मेण प्रजास्तुल्यं फलं लभेत् ॥ २३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्रमवासिकपर्वणि नवमोऽध्यायः ॥ ९ ॥

॥ ९३ ॥ आश्रमवासपर्वणि नवमोऽध्यायः ॥ ९ ॥

[ अस्मिन्नध्याये २३ श्लोकाः ]

## ॥ दशमोऽध्यायः ॥

धृतराष्ट्रेण युधिष्ठिरात् सकलपौरजनानयनेन स्वस्य वनजिगमिषा-निवेदनपूर्वकं तान् प्रति तदभ्यनुज्ञानप्रार्थना ॥ १ ॥

युधिष्ठिरः—

एवमेतत् करिष्यामि यथाऽऽत्थ पृथिवीपते ।
भूयश्चैवानुशास्योऽहं भवता पार्थिवर्षभ ॥ १

भीष्मे स्वर्गमनुप्राप्ते गते च मधुसूदने ।
विदुरे सञ्जये चैव कोऽन्यो मां वक्तुमर्हति ॥ २

यस्तु मामनुशास्त्येवं भवानद्य हिते स्थितः ।
कर्तास्मि तन्महीपाल निर्वृतो भव भारत ॥ ३

वैशम्पायनः—

एवमुक्तस्स राजर्षिर् धर्मराजेन भारत ।
कौन्तेयं समनुज्ञातुम् इयेष भरतर्षभ ॥ ४

धृतराष्ट्रः—

पुत्र विश्राम्यतां तावन्ममापि बलवाञ्श्रमः ॥ ४॥

वैशम्पायनः—

इत्युक्त्वा प्राविशद्राजा गान्धार्या भवनं तदा ॥ ५

तमासनगतं देवी गान्धारी धर्मचारिणी ।
उवाच काले कालज्ञा प्रजापतिसमं पतिम् ॥ ६

गान्धारी—

अनुज्ञातस्त्वयं तेन व्यासेनापि महर्षिणा ।
युधिष्ठिरस्यानुमते कदाऽरण्यं गमिष्यसि ॥ ७

धृतराष्ट्रः—

गान्धार्येहमनुज्ञातस् स्वयं पित्रा महात्मना ।
युधिष्ठिरस्यानुमतेर् गन्तास्मि नचिरादिव ॥ ८

अहं तु तव पुत्राणां तेषां दुर्द्यूतदेविनाम् ।
सर्वेषां दातुमिच्छामि प्रेत्यभावानुगं वसु ॥ ९
सर्वप्रकृतिसान्निध्यं कारयित्वा स्ववेश्मनि ॥ ९॥

वैशम्पायनः—

इत्युक्त्वा प्रेषयामास धर्मराजाय पार्थिव ।
स च तद्वचनात् सर्वं समानिन्ये महीपतिः ॥ १०॥

ततो निष्क्रम्य नृपतिस् तस्मादन्तःपुरात् तदा ।
सर्वं सुहृज्जनं चैव सर्वाः प्रकृतयस्तथा ॥ ११॥

समवेतांश्च तान् सर्वान् पौरजानपदानथ ।
ब्राह्मणांश्च महीपालान् नानादेशसमागतान् ॥ १२॥

ततः प्राह महातेजा धृतराष्ट्रो महीपतिः ॥ १३

धृतराष्ट्रः—

शृण्वन्त्वेकाग्रमनसो ब्राह्मणाः कुरुजाङ्गलाः ।

क्षत्रियाश्चैव वैश्याश्च शूद्राश्चैव समागताः ॥ १४

भवन्तः कुरवश्चैव बहुकालं सहोषिताः ।
परस्परस्य सुहृदः परस्परहिते रताः ॥ १५

यदिदानीमहं ब्रूयाम् अस्मिन् काल उपस्थिते ।
तथा भवद्भिः कर्तव्यम् अविचार्य वचो मम ॥ १६

अरण्यगमने बुद्धिं गान्धारीसहितस्य मे ।
व्यासस्यानुमते राज्ञस् तथा कुन्तीसुतस्य च ॥ १७

भवन्तोऽप्यनुजानन्तु मा वो भूयाद्विचारणा ॥ १७॥

अस्माकं भवतां चैव येयं प्रीतिर्हि शाश्वती ।
न चान्येष्वपि देशेषु राज्ञामिति मतिर्मम ॥ १८॥

श्रान्तोऽस्मि वयसाऽनेन तथा पुत्रैर्विनाकृतः ।
उपवासकृशश्चास्मि गान्धारीसहितोऽनघः ॥ १९॥

युधिष्ठिरगते राज्ये प्राप्तश्चास्मि फलं महत् ।
मन्ये दुर्योधनैश्वर्याद् विशिष्टं बहुभिर्गुणैः ॥ २०॥

मम त्वन्धस्य वृद्धस्य हतपुत्रस्य का गतिः ।
ऋते वनं महाभागास् तदनुज्ञातुमर्हथ ॥ २१॥

वैशम्पायनः—

तस्य तद्वचनं श्रुत्वा सर्वे ते कुरुजाङ्गलाः ।
बाष्पसन्दिग्धवचना रुरुदुर्भरतर्षभ ॥ २२॥

एवमेव महाबाहुर् भीमार्जुनयमैर्वृतः ।
युधिष्ठिरो महातेजा भवतः पालयिष्यति ॥ १४॥

अवश्यमेव वक्तव्यम् इति कृत्वा ब्रवीमि वः ।
एष न्यासो मया दत्तस् सर्वेषां वो युधिष्ठिरः ॥ १५॥

भवन्तो ह्यस्य धीरस्य न्यासभूता मया कृताः ॥ १६

[1]यद्येवं तैः कृतं किञ्चिद् व्यलीकं वा सुतैर्मम ।
यद्यन्येन मदीयेन तदनुज्ञातुमर्हथ ॥ १७

भवद्भिर्हि न मे मन्युः कृतपूर्वः कदाचन ।
अत्यन्तगुरुभक्तानाम् एषोऽञ्जलिरिदं नमः ॥ १८

तेषामपि विबुद्धीनां लुब्धानां कामचारिणाम् ।
कृते याचामि वस्सर्वान् गान्धारीसहितो द्विजाः ॥ १९

वैशम्पायनः—

इत्युक्तास्तेन राज्ञा ते पौरजानपदा जनाः ।
[2]नोचुर्बाष्पकलाः किञ्चिद् वीक्षाञ्चक्रुः परस्परम् ॥ २०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि एकादशोऽध्यायः ॥ ११ ॥

॥ ९३ ॥ आश्रमवासपर्वणि एकादशोऽध्यायः ॥ ११ ॥

[ अस्मिन्नध्याये २० श्लोकाः ]

---

1. ख—इदमर्धं नास्ति
2. क—वृद्धेन राज्ञा कौरव्य नष्टसंज्ञो इवाभवन् । [ अधिकः पाठः ]

## ॥ द्वादशोऽध्यायः ॥

पौरजनैर्ब्राह्मणमुखेन धृतराष्ट्रं प्रति समाश्वासनपूर्वकं कृच्छ्रेण वनगमनाभ्यनुज्ञानम् ॥ १

वैशम्पायनः—

एवमुक्तास्तु ते तेन पौरजानपदा जनाः ।
वृद्धेन राज्ञा कौरव्य नष्टसंज्ञा इवाभवन् ॥ १

तूष्णीम्भूतांस्ततस्तांस्तु बाष्पकण्ठान् महीपतिः ।
धृतराष्ट्रो महीपालः पुनरेवाभ्यभाषत ॥ २

धृतराष्ट्रः—

वृद्धया हतपुत्र्या च धर्मपत्न्या सहानया ।
विलपन्तं बहुविधं कृपणं चैव सत्तमाः ॥ ३

पित्रा चैवाभ्यनुज्ञातं कृष्णद्वैपायनेन वै ।
वनवासाय धर्मज्ञा धर्मजेन नृपेण च ॥ ४

सोऽहं पुनः पुनर्याचे शिरसा च नतोऽनघाः ।
गान्धारीसहितं तस्मात् समनुज्ञातुमर्हथ ॥ ५

वैशम्पायनः—

श्रुत्वा तु कुरुराजस्य वाक्यानि करुणानि ते ।
रुरुदुस्सर्वतो राजन् समेताः कुरुजाङ्गलाः ॥ ६

उत्तरीयैः करैश्चापि सञ्छाद्य वदनानि ते ।

कुरवश्शोकसन्तप्ता मुहूर्तं पितृमातृवत् ॥ ७

हृदयैश्शून्यभूतैस्ते धृतराष्ट्रप्रवासजम् ।
[1]दुःखं सन्धारयन्ति स्म नष्टसंज्ञास्समाहिताः ॥ ८

ते विनीय तमायासं कुरुराजवियोगजम् ।
शनैश्शनैस्तदाऽन्योन्यम् अब्रुवन् स्वमतान्युत ॥ ९

ततस्साञ्चिन्त्य ते सर्वे वाक्यान्यथ समासतः ।
एकस्मिन् ब्राह्मणे कार्यम् आवेश्योचुर्नराधिपम् ॥ १०

ततस्त्वे चरणे वृद्धस् सम्मतोऽर्थविशारदः ।
शाकल्यो बह्वृचो राजन् वक्तुं समुपचक्रमे ॥ ११

अनुमान्य महाराजं सदस्समनुभाष्य च ।
विप्रः प्रगल्भो मेधावी स राजानमुवाच ह ॥ १२

शाकल्यः—

राजन् वाक्यं जनस्यास्य मयि सर्वं समर्पितम् ।
वक्ष्यामि तदहं वीर तज्जुषस्व नराधिप ॥ १३

यथा वदसि राजेन्द्र सर्वमेतत् तथा विभो ।
[2]नात्र मिथ्या वचः किञ्चित् सुहृदश्च परस्परम् ॥ १४

न जात्वस्य तु वंशस्य राज्ञां कश्चित् कदाचन ।
राजाऽऽसीद्यः प्रजापालः प्रजानां न प्रियोऽभवत् ॥ १५

---

1. ख—अर्धचतुष्टयं नास्ति
2. ग—इत आरभ्य पञ्चाशच्छ्लोकपर्यन्तश्लोका न दृश्यन्ते

पितृवन्मातृवच्चैव भवन्तः पालयन्ति नः ।
न च दुर्योधनः किञ्चिद् अयुक्तं कृतवान् नृप ॥ १६
प्रियाणि कुर्वन् सर्वेषाम् अनुवृत्त्यर्थमुद्यतः ।
यथाऽब्रवीत्तु धर्मज्ञो मुनिस्सत्यवतीसुतः ॥ १७
तथा कुरु महाराज स हि नः परमो गुरुः ॥ १७॥
त्यक्ता वयं तु भवता दुःखशोकपरायणाः ।
भविष्यामश्चिरं राजन् भवद्गुणशतैर्हृताः ॥ १८॥
यथा शन्तनुना गुप्ता राज्ञा चित्राङ्गदेन च ।
भीष्मवीर्योपगूढेन पित्रा च तव पार्थिव ॥ १९॥
भवद्बुद्धियुजा चैव पाण्डुना पृथिवीक्षिता ।
तथा दुर्योधनेनापि राज्ञा स्म परिपालिताः ॥ २०॥
न नस्सोऽण्वपि पुत्रस्ते व्यलीकं कृतवान् नृप ॥ २१
पितरीव सुविश्वस्तास् तस्मिन्नपि नराधिपे ।
वयमास्म यथा सम्यग् भवतो विदितं तथा ॥ २२
तथा वर्षसहस्राणि कुन्तीपुत्रेण धीमता ।
पाल्यमाना धृतिमता सुखं विन्दामहे नृप ॥ २३
राजर्षीणां पुराणानां भवतां पुण्यकर्मणाम् ।
कुरुसंवरणादीनां भरतस्य च धीमतः ॥ २४
वृत्तं समनुयात्येष धर्मात्मा भूरिदक्षिणः ॥ २४॥

नात्र वाच्यं महाराज सुसूक्ष्ममपि विद्यते ॥ २५

उषितास्स्म सुखं नित्यं भवता परिपालिताः ।
सुसूक्ष्मं च व्यलीकं ते सपुत्रस्य न विद्यते ॥ २६

यत्तु ज्ञातिविमर्देऽस्मिन्नात्थ दुर्योधनं प्रति ।
भवन्तमनुनेष्यामि तत्रापि कुरुनन्दन ॥ २७

न तद्दुर्योधनकृतं न च तद्भवता कृतम् ।
न कर्णसौबलाभ्यां च कुरवो यत् क्षयं गताः ॥ २८

दैवं तत्तु विजानीमो यन्न शक्यं प्रबाधितुम् ।
दैवं पुरुषकारेण न शक्यमपि बाधितुम् ॥ २९

अक्षौहिण्यो महाराज दशाष्टौ च समागताः ।
अष्टादशाहेन हता दशभिर्योधपुङ्गवैः ॥ ३०

भीष्मद्रोणकृपै राजन् कर्णेन च महात्मना ।
युयुधानेन वीरेण धृष्टद्युम्नेन चाहवे ॥ ३१

चतुर्भिः पाण्डुपुत्रैश्च भीमार्जुनयमैर्नृप ।
जनक्षयोऽयं नृपते कृतो दैवबलात्कृतैः ॥ ३२

[1]अवश्यमेव सङ्ग्रामे क्षत्रियेण विशेषतः ।
कर्तव्यं निधनं लोके क्षत्रेण हतबन्धुना ॥ ३३

यैरियं पुरुषव्याघ्रैर् विद्याबाहुबलान्वितैः ।

1. क—अर्धमयं नास्ति

पृथिवी निहता सर्वा सरथा सहयद्विपा ॥ ३४

[1]न च राजाऽपराध्नोति पुत्रस्तव महामनाः ।
न भवान् न च ते भृत्या न कर्णो न च सौबलः ॥ ३५

यद्विनष्टाः कुरुक्षेत्रे राजानश्च सहस्रशः ।
सर्वे दैवकृते यद्वै कोऽत्र किं वक्तुमर्हति ॥ ३६

गुरुर्मतो भवानस्य कृत्स्नस्य जगतः प्रभुः ।
धर्मात्मानमतस्तुभ्यम् अनुजानीमहे सुतम् ॥ ३७

लभतां वीरलोकं स ससहायो नराधिपः ।
द्विजाग्र्यैस्समनुज्ञातस् त्रिदिवे मोदतां सुखम् ॥ ३८

प्राप्स्यते च भवान् पुण्यं धर्मेण सततं स्थितः ।
वेद धर्मं महाबाहो लौक्यं वैदिकमेव च ॥ ३९

दृष्टापदानाश्चास्माभिः पाण्डवाः पुरुषर्षभाः ।
समर्थास्त्रिदिवस्यापि पालने किं पुनः क्षितेः ॥ ४०

अनुवत्स्यन्ति कौरव्यस् समेषु विषमेषु च ।
प्रजाः कुरुकुलश्रेष्ठ पाण्डवाञ्शीलभूषणान् ॥ ४१

ब्रह्मदेयाग्रहारांश्च परिहारांश्च पार्थिवः ।
पूर्वराजनिसर्गांश्च पालयत्येव पाण्डवः ॥ ४२

दीर्घदर्शी कृतप्रज्ञस् सदा वैश्रवणो यथा ।

---

1. क-च—अर्धचतुष्टयं नास्ति

अक्षुद्रसचिवश्चायं कुन्तीपुत्रो महामनाः ॥ ४३

अप्यमित्रे दयावांश्च शुचिश्च भरतर्षभ ।
ऋजुः पश्यति मेधावी पुत्रवत् पाति नस्सदा ॥ ४४

विप्रियं च जनस्यास्य संसर्गाद् धर्मजस्य वै ।
न करिष्यन्ति राजर्षे तथा भीमार्जुनादयः ॥ ४५

मन्दा मृदुषु कौरव्यास् तीक्ष्णेष्वाशीविषोपमाः ।
वीर्यवन्तो महात्मानः पौराणां च हिते रताः ॥ ४६

न कुन्ती न च पाञ्चाली न चोलूपी न सात्वती ।
अस्मिञ्जने करिष्यन्ति प्रतिकूलानि कर्हिचित् ॥ ४७

भवत्कृतमिदं स्नेहं युधिष्ठिरविवर्धितम् ।
न पृष्ठतः करिष्यन्ति पौरजानपदा जनाः ॥ ४८

अधर्मिष्ठानपि सतः कुन्तीपुत्रा महारथाः ।
मानवान् पालयिष्यन्ति भूत्वा धर्मपरायणाः ॥ ४९

स राजन् मानसं दुःखम् अपनीय युधिष्ठिरात् ।
कुरु कार्याणि धर्माणि नमस्ते भरतर्षभ ॥ ५०

वैशम्पायनः—

तस्य तद्वचनं धर्म्यम् अनुमान्य गुणोत्तरम् ।
साधु साध्विति सर्वस्स जनः प्रतिगृहीतवान् ॥ ५१

धृतराष्ट्रस्तु तद्वाक्यम् अभिपूज्य पुनः पुनः ।

विसर्जयामास तदा सर्वास्तु प्रकृतीश्शनैः ॥ ५२

स तैस्सम्पूजितो राजा शिवेनावेक्षितस्तदा ।
प्राञ्जलिः पूजयामास तं जनं भरतर्षभ ॥ ५३

ततो विवेश भवनं गान्धारीसहितो नृपः ।
आगतायां च शर्वर्यां सुखं शेते नराधिपः ॥ ५४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
॥ ९३ ॥ आश्रमवासपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
[ अस्मिन्नध्याये ५४ श्लोकाः ॥

---

## ॥ त्रयोदशोऽध्यायः ॥

धृतराष्ट्रेण भीष्मदुर्योधनादीनां श्राद्धदानाय विदुरमुखाद्युधिष्ठिरं प्रति धनयाचनम् ॥ १ ॥ तच्छ्रवणेन विमनायमाने भीमे तद्भावज्ञेनार्जुनेन तं प्रति द्रव्ययाचने भीमेन धृतराष्ट्रापनयानुस्मारणपूर्वकं तदनङ्गीकरणम् ॥ २ ॥

---

वैशम्पायनः—

व्युषितायां रजन्यां तु धृतराष्ट्रोऽम्बिकासुतः ।
[1]विदुरं प्रेषयामास युधिष्ठिरनिवेशनम् ॥ १

स गत्वा राजवचनाद् उवाचाच्युतमीश्वरम् ।
युधिष्ठिरं महातेजास् सर्वबुद्धिमतां वरः ॥ २

---

1. ख—अर्धचतुष्टयं नास्ति

विदुरः—

धृतराष्ट्रो महातेजा वनवासाय दीक्षितः ।
गमिष्यति वनं राजा कार्तिकीमागतामिमाम् ॥ ३

स त्वां कुरुकुलश्रेष्ठ किञ्चिदर्थमभीप्सति ।
श्राद्धमिच्छति दातुं स गाङ्गेयस्य महात्मनः ॥ ४

द्रोणस्य सोमदत्तस्य बाह्लीकस्य च धीमतः ।
पुत्राणां चैव सर्वेषां ये चान्ये सुहृदो हताः ॥ ५
यदि वाऽप्यनुजानीषे सैन्धवापशदस्य च ॥ ५॥

वैशम्पायनः—

एतच्छ्रुत्वा तु वचनं विदुरस्य युधिष्ठिरः ।
हृष्टस्सम्पूजयामास गुडाकेशश्च पाण्डवः ॥ ६॥

न तु भीमो दृढक्रोधस् तद्वचो जगृहे तदा ।
विदुरस्य महातेजा दुर्योधनकृतं स्मरन् ॥ ७॥

अभिप्रायं विदित्वा तु भीमसेनस्य फल्गुनः ।
किरीटी किञ्चिदानम्य भीमं वचनमब्रवीत् ॥ ८॥

अर्जुनः—

भीम राजा पिता वृद्धो वनवासाय दीक्षितः ।
दातुमिच्छति सर्वेषां सुहृदामौर्ध्वदैहिकम् ॥ ९॥

भवता निर्जितं वित्तं दातुमिच्छति कौरवः ।

भीष्मादीनां महाबाहो तदनुज्ञातुमर्हसि ॥ १०॥

दिष्ट्या त्वद्य महाबाहो धृतराष्ट्रः प्रयाचति ।
याचितोऽयं पुराऽस्माभिः पश्य कालस्य पर्ययम् ॥ ११॥

योऽसौ पृथिव्याः कृत्स्नाया भर्ता भूत्वा नराधिपः ।
परैर्विनिहतामात्यो वनं गन्तुमभीप्सति ॥ १२॥

मा तेऽन्यत् पुरुषव्याघ्र दानाद्भवतु दर्शनम् ।
अयशस्यमतोऽन्यत् स्याद् अधर्मश्च महाभुज ॥ १३॥

राजानमुपतिष्ठस्व ज्येष्ठं भ्रातरमीश्वरम् ।
अर्हस्त्वमसि दातुं वै नादातुं भरतर्षभ ॥ १४॥

वैशम्पायनः—

एवं ब्रुवाणं कौन्तेयं धर्मराजोऽभ्यपूजयत् ।
भीमसेनस्तु सक्रोधम् उवाच विजयं तदा ॥ १५॥

भीमः—

वयं भीष्मस्य कुर्मो हि प्रेतकार्याणि फल्गुन ।
सोमदत्तस्य नृपतेर् भूरिश्रवस एव च ॥ १६॥

बाह्लीकस्य च राजर्षेर् द्रोणस्य च महात्मनः ।
अन्येषां चैव सुहृदां कुन्ती कर्णाय दास्यति ॥ १७॥

श्राद्धानि पुरुषव्याघ्र मा दात् कौरवको नृपः ।
एवं ते वर्ततां बुद्धिर् मा वो नन्दन्तु शत्रवः ॥ १८॥

कष्टात् कष्टतरं यान्तु सर्वे दुर्योधनादयः ।
यैरियं पृथिवी सर्वा घातिता कुलपांसनैः ॥ १९॥

कुतस्त्वमद्य विस्मृत्य वैरं द्वादशवार्षिकम् ।
अज्ञातवासगमनं द्रौपदीशोकवर्धनम् ॥ २०॥

क्व तदा धृतराष्ट्रस्य स्नेहोऽस्मास्वभवत् तथा ।
कृष्णाजिनोपसंवीतो हृताभरणभूषणः ॥ २१॥

सार्धं पाञ्चालपुत्र्या त्वं राजानमुपजग्मिवान् ॥ २२

क्व तदा द्रोणभीष्मौ तौ सोमदत्तोऽपि वाऽभवत् ।
यत्र द्वादश वर्षाणि वने वन्येन जीवसि ॥ २३

न तदा त्वत्पिता ज्येष्ठः पितृत्वेनाभिवीक्षति ॥ २३॥

किं नु तद्विस्मृतं तेऽद्य यदेष कुलपांसनः ।
दुर्वृत्तो विदुरं प्राह द्यूते किं जितमित्युत ॥ २४॥

वैशम्पायनः—

तमेवंवादिनं राजा कुन्तीपुत्रो युधिष्ठिरः ।
उवाच भ्रातरं धीमान् जोषमास्स्वेति भर्त्सयन् ॥ २५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

॥ ९३ ॥ आश्रमवासपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥

[ अस्मिन्नध्याये २५॥ श्लोकाः ]

## ॥ चतुर्दशोऽध्यायः ॥

भीमे दुर्योधनादिभ्यः श्राद्धदानाय धनदानमरोचयति सति 'युधिष्ठिरेण विदुरं प्रति धृतराष्ट्रे निजगृहकोशाद्धनदाननिवेदनकथनम् ॥ १ ॥

अर्जुनः—

भीम ज्येष्ठो गुरुर्मे त्वं नातोऽन्यद्वक्तुमुत्सहे ।
धृतराष्ट्रोऽपि राजर्षिस् सर्वथा मानमर्हति ॥ १

न स्मरन्त्यपराद्धानि स्मरन्ति सुकृतानि च ।
असम्भिन्नार्थमर्यादास् साधवः पुरुषोत्तमाः ॥ २

युधिष्ठिरः—

इदं मद्वचनात् क्षत्तः कौरवं ब्रूहि पार्थिवम् ।
यावदिच्छति पुत्राणां दातुं तावद्ददाम्यहम् ॥ ३

भीष्मादीनां तु सर्वेषां सुहृदामुपकारिणाम् ।
मम कोशादिविभवे मा भूद्भीमस्सुदुर्मनाः ॥ ४

वैशम्पायनः—

इत्युक्त्वा धर्मराजस्तम् अर्जुनं प्रत्यपूजयत् ।
भीमसेनः कटाक्षेण वीक्षाञ्चक्रे धनञ्जयम् ॥ ५

ततस्स विदुरं धीमान् वाक्यमाह युधिष्ठिरः ॥ ५॥

युधिष्ठिरः—

न भीमसेने कोपं स नृपतिः कर्तुमर्हति ॥ ६

परिक्लिष्टो हि भीमस्तु हिमवातातपादिभिः ।

दुःखैर्बहुविधैर्धीमान् अरण्ये विदितं तव ॥ ७

किं तु मद्वचनाद्ब्रूहि राजानं भरतर्षभम् ।
यद्यदिच्छति यावच्च गृह्यतां मे गृहादिति ॥ ८

यन्मात्सर्यमयं भीमः करोति भृशदुःखितः ।
न तन्मनसि कर्तव्यम् इति वाच्यस्स पार्थिवः ॥ ९

यन्ममास्ति धनं किञ्चिद् अर्जुनस्य च वेश्मनि ।
तस्य स्वामी महाराज इति वाच्यश्च पार्थिवः ॥ १०

ददातु राजा विप्रेभ्यो यथेष्टं क्रियतामिति ।
पुत्राणां भुतरां चैव गच्छत्वानृण्यमद्य सः ॥ ११

[1]इदं चापि शरीरं मे तत्रायत्तं जनाधिप ।
धनानि चेति विद्धि त्वं क्षत्तर्नास्त्यत्र संशयः ॥ १२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
॥ ९३ ॥ आश्रमवासपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
[ अस्मिन्नध्याये १२ श्लोकाः ]

## ॥ पञ्चदशोऽध्यायः ॥

विदुरेण धृतराष्ट्रं प्रति युधिष्ठिरेण भीष्मादीनां श्राद्धदानाय धनदानाङ्गीकरणनिवेदनम् ॥ १ ॥

वैशम्पायनः—

एवमुक्तस्तु राज्ञा स विदुरो बुद्धिसत्तमः ।
धृतराष्ट्रमुपेत्यैवं वाक्यमाह यथार्थवत् १

1. ब—अर्धद्वयं नास्ति

विदुरः—

उक्तो युधिष्ठिरो राजा भवद्वचनमादितः ।
स च संश्रुत्य वाक्यं ते प्रशशंस महीपतिः ॥ २

बीभत्सुश्च महातेजा निवेदयति ते गृहान् ।
वसु तच्च गृहे यच्च प्राणानपि च केवलान् ॥ ३

धर्मराजस्तु पुत्रस्ते राज्यं प्राणान् धनानि च ।
अनुजानाति राजर्षे यच्चान्यदपि किञ्चन ॥ ४

भीमस्तु सर्वदुःखानि संस्मृत्य बहुलान्युत ।
कृच्छ्रादिव महाबाहुर् अनुजज्ञे विनिःश्वसन् ॥ ५

स राज्ञा धर्मशीलेन भ्रात्रा बीभत्सुना तथा ।
अनुनीतो महाबाहुस् सौहृदे स्थापितोऽपि च ॥ ६

न च मन्युस्त्वया कार्य इति त्वां प्राह धर्मराट् ।
संस्मृत्य भीमस्तद्वैरं यदन्यायवदाचरेत् ॥ ७

एवम्प्रायो हि धर्मोऽयं क्षत्रियाणां नराधिप ।
शुद्धेन क्षत्रधर्मेण निरतोऽयं वृकोदरः ॥ ८

वृकोदरकृते चाहम् अर्जुनश्च पुनः पुनः ।
प्रसादयाव नृपते भवान् प्रभुरिहास्ति यः ॥ ९

प्रददातु भवान् वित्तं यावदिच्छति पार्थिव ।
त्वमीश्वरो नो राज्यस्य प्राणानां चैव भारत ॥ १०

ब्रह्मदेयाग्रहारांश्च पुत्राणां चौर्ध्वदेहिकम् ।
इतो रत्नानि गाश्चैव दासीदासमजाविकम् ॥ ११
अर्चयित्वा कुरुश्रेष्ठो ब्राह्मणेभ्यः प्रयच्छतु ।
दीनान्धकृपणेभ्यश्च तत्र तत्र नृपाज्ञया ॥ १२
बहुन्नरसपानाढ्यं सर्वं विदुर कारय ।
गवां निपानान्यन्यच्च विविधं पुण्यकर्म यत् ॥ १३
इति मामब्रवीद्राजा पार्थश्चैव धनञ्जयः ।
यदत्रानन्तरं कार्यं तद्भवान् वक्तुमर्हति ॥ १४

वैशम्पायनः—

इत्युक्तो विदुरेणाथ धृतराष्ट्रोऽभिनन्द्य तम् ।
मनश्चक्रे महादाने कार्तिक्यां जनमेजय ॥ १५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
॥ ९३ ॥ आश्रमवासपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
[ अस्मिन्नध्याये १५ श्लोकाः ]

## ॥ षोडशोऽध्यायः ॥

धृतराष्ट्रेण भीष्मदुर्योधनाद्युद्देश्यकश्राद्धे धनवस्त्राद्यादिना ब्राह्मणादि-सन्तर्पणम् ॥ १ ॥

वैशम्पायनः—

विदुरेणैवमुक्तस्तु धृतराष्ट्रो जनाधिपः ।
प्रीतिमानभवद्राजा राज्ञो जिष्णोश्च कर्मणा ॥ १

ततोऽभिरूपान् भीष्माय ब्राह्मणानृषिसत्तमान् ।
पुत्रार्थे सुहृदां चैव स समीक्ष्य सहस्रशः ॥ २

कारयित्वाऽन्नपानानि यानान्याच्छादनानि च ।
सुवर्णमणिरत्नानि दासीदासपरिच्छदान् ॥ ३

कम्बलानि च रत्नानि ग्रामान् क्षेत्राण्यजाविकान् ।
अलङ्कारानथाश्वांश्च काम्याश्चैव वरस्त्रियः ॥ ४

आदिश्यादिश्य विप्रेभ्यो स ददौ नृपसत्तमः ॥ ४॥

द्रोणं सङ्कीर्त्य भीष्मं च सोमदत्तं च बाह्लिकम् ।
दुर्योधनं च राजानं पुत्रांश्चैव पृथक् पृथक् ॥ ५॥

जयद्रथपुरोगाणां सुहृदां चैव सर्वशः ।
[1]स श्राद्धयज्ञो वधृते बहुगोपशुदक्षिणः ॥ ६॥

अनेकधनरत्नौघो युधिष्ठिरमते तदा ॥ ७

अनिशं यत्र पुरुषा गणका लेखकास्तथा ।
युधिष्ठिरस्य वचनाद् आपृच्छन्ति स्म तं नृपम् ॥ ८

आज्ञापय त्वमेतेभ्यः प्रदेयं दीयतामिति ॥ ८॥

तदुपस्थितमेवात्र वचनान्ते प्रदृश्यते ॥ ९

शते देये दशशतं सहस्रे चायुतं तथा ।
दीयते वचनाद्राज्ञः कुन्तीपुत्रस्य धीमतः ॥ १०

1. ख-घ—दश श्लोका न सन्ति

एवं स वसुधाराभिर् वर्षमाणो नृपाम्बुदः ।
तर्पयामास विप्रांस्तान् वर्षाद् भूमिमिवाम्बुदः ॥ ११

ततोऽनन्तरमेवान्न सर्ववर्णान् महामतिः ।
अन्नपानरसौघेण प्लावयामास पार्थिवः ॥ १२

सवस्त्रौघेन रत्नौघो मृदङ्गनिनदध्वनिः ।
गवाश्वमहिषावर्तो नानारत्नमहाकरः ॥ १३

ग्रामाग्रहारकुल्याढ्यो मणिहेमजलार्णवः ।
जगत् सम्प्लावयामास धृतराष्ट्रोडुपो ध्रुवम् ॥ १४

एवं स पुत्रपौत्राणां पितॄणामात्मनस्तदा ॥ १४॥
गान्धार्यपि महाराज प्रददौ चौर्ध्वदेहिकम् ॥ १५

परिश्रान्तो यदासीत् स ददद्दानान्यनेकशः ।
ततो निवर्तयामास दानयज्ञं कुरूद्वहः ॥ १६

एवं स राजा कौरव्यश् चक्रे दानमहोत्सवम् ।
नटनर्तप्रगीताढ्यं बह्वन्नरसदक्षिणम् ॥ १७

दशाहमेव दानानि दत्त्वा राजाऽम्बिकासुतः ।
बभूव पुत्रपौत्राणाम् अनृणो भरतर्षभ ॥ १८

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि षोडशोऽध्यायः ॥ १६ ॥
॥ ९३ ॥ आश्रमवासपर्वणि षोडशोऽध्यायः ॥ १६ ॥
[ अस्मिन्नध्याये १८ श्लोकाः ]

## ॥ सप्तदशोऽध्यायः ॥

धृतराष्ट्रेण कुन्तीस्कन्धावसक्तहस्तया गान्धार्या अंसावलम्बनेन सशोकैः पौरैर्युधिष्ठिरादिभिश्चानुगम्यमानेन सता वनं प्रति प्रस्थानम् ॥१॥

वैशम्पायनः—

ततः प्रभाते राजा स धृतराष्ट्रोऽम्बिकासुतः ।
आदाय पाण्डवान् वीरान् वनवासे कृतक्षणः ॥ १
गान्धारीसहितो धीमान् अभिनन्द्य यथाविधि ।
कार्तिक्यां कारयित्वेष्टिं ब्राह्मणैर्वेदपारगैः ॥ २
अग्निहोत्रं पुरस्कृत्य वल्कलाजिनसंवृतः ।
वधूपरिवृतो राजा निर्ययौ भवनात् ततः ॥ ३

ततस्स्त्रियः कौरवपाण्डवानां
याश्चाप्यन्याः कौरवराजवंश्याः ।
तासां नादः प्रादुरासीत् तदानीं
वैचित्रवीर्ये नृपतौ प्रयाते ॥ ४

[1]ततो लाजैस्सुमनोभिश्च राजा
विचित्राभिस्तद्गृहं पूरयित्वा ।
संयोज्यार्थैर्भृत्यजनं च सर्वं
समुत्सृज्य प्रययौ कौरवेयः ॥ ५

ततो राजा प्राञ्जलिर्वेपमानो
युधिष्ठिरस्सस्वरं बाष्पकण्ठः ।

1. अ—श्लोकोऽयं नास्ति

विनद्योच्चैर्हा महाराज साधो
क्व गन्तासीत्यपतत् तत्र भूमौ ॥ ६
ततोऽर्जुनस्तीव्रदुःखाभितप्तो
मुहुर्मुहुर्निश्श्वसन् भारताग्र्यः ।
युधिष्ठिरं मैवमित्येवमुक्त्वा
प्रगृह्याथो दीनतरो बभूव ॥ ७
वृकोदरः फल्गुनश्चैव वीरौ
माद्रीपुत्रौ विदुरस्सञ्जयश्च ।
वेश्यापुत्रस्सहितो गौतमेन
धौम्यो विप्राश्चान्वयुर्बाष्पकण्ठाः ॥ ८
कुन्ती गान्धारीमनुभर्तृ व्रजन्तीं
स्कन्धासक्तं हस्तमथोद्वहन्ती ।
राजा गान्धारीस्कन्धदेशेऽवसज्य
पाणिं ययौ धृतराष्ट्रः प्रतीतः ॥ ९
तथा कृष्णा द्रौपदी यादवी च
बालापत्या चोत्तरा कौरवी च ।
चित्राङ्गदा याश्च काश्चित् कुरूणां
सार्धं राज्ञा प्रस्थितास्ता वधूभिः ॥ १०
तासां नादो रुदतीनां तदाऽऽसीद्
राजन् दुःखात् कुररीणामिवोच्चैः ।

ततो निष्पेतुर्ब्राह्मणक्षत्रियाणां
विट्शूद्राणां चैव नार्यस्समन्तात् ॥ ११
तन्निर्याणे दुःखितः पौरवर्गो
गजाह्वयेऽतीव बभूव राजन् ।
यथापूर्वं गच्छतां पाण्डवानां
द्यूते राजन् कौरवाणां सभायाम् ॥ १२
या नापश्यच्चन्द्रमा नैव सूर्यो
रामाः काश्चित् तास्तु तस्मिन् नरेन्द्रे ।
महावनं गच्छति कौरवेन्द्रे
शोकेनार्ता राजमार्गं प्रपेदुः ॥ १३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
॥ ९३ ॥ आश्रमवासपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[ अस्मिन्नध्याये १३ श्लोकाः ]

## ॥ अष्टादशोऽध्यायः ॥

धृतराष्ट्रस्य वनप्रस्थानसमये विदुरसञ्जयाभ्यामपि वनवासाय तेन सह प्रस्थानम् ॥ १ ॥ तथा कुन्त्याऽपि युधिष्ठिरादिभिर्बहुधा प्रार्थनाभिः प्रतिषेधनेऽपि तत्समाश्वासनपूर्वकं गान्धार्या सह वनं प्रति प्रस्थानम् ॥ २ ॥

वैशम्पायनः—
ततः प्रासादहर्म्येषु वसुधायां च पार्थिव ।
स्त्रीणां च पुरुषाणां च सुमहान् निस्स्वनोऽभवत् ॥ १

स राजा राजमार्गेण नृनारीसङ्कुलेन च ।
कथञ्चिन्निर्ययौ धीमान् वेपमानः कृताञ्जलिः ॥ २

स वर्धमानद्वारेण निर्ययौ गजसाह्वयात् ।
विसर्जयामास तदा तं जनौघं मुहुर्मुहुः ॥ ३

राज्ञा सह वनं गन्तुं विदुरो धृतनिश्चयः ।
सञ्जयश्च महामात्रस् सूतो गावल्गणिस्तथा ॥ ४

कृपं निवर्तयामास युयुत्सुं च महारथम् ।
धृतराष्ट्रो महाराज कुन्तीपुत्रं युधिष्ठिरम् ॥ ५

निवृत्ते पौरवर्गे तु राजा सान्तःपुरस्तदा ।
धृतराष्ट्राभ्यनुज्ञातो निवर्तितुमियेष सः ॥ ६

सोऽब्रवीन्मातरं कुन्तीम् उपेत्य भरतर्षभ ॥ ६॥

युधिष्ठिरः—

अहं राजानमन्विष्ये भवती विनिवर्तताम् ।
वधूपरिवृता राज्ञि नगरं गन्तुमर्हसि ॥ ७॥

राजा यात्वेष धर्मात्मा तपसे धृतनिश्चयः ॥ ८

वैशम्पायनः—

इत्युक्ता धर्मराजेन बाष्पव्याकुललोचना ।
जगादैवं तदा कुन्ती गान्धारीं परिगृह्य ह ॥ ९

कुन्ती—

सहदेवे महाराज मा प्रमादं कृथाः क्वचित् ।

एष मामनुरक्तो हि राजंस्त्वां चैव सर्वदा ॥ १०

कर्णं स्मरेथास्सततं सङ्ग्रामेष्वपलायिनम् ।
अवकीर्णो हि स मया वीरो दुष्प्रज्ञया तदा ॥ ११

आयसं हृदयं नूनं मन्दाया मम पुत्रक ।
यत् सूर्यजमपश्यन्त्याश् शतशो यन्न दीर्यते ॥ १२

एवं कृते तु किं शक्यं मया कर्तुमरिन्दम ।
मम दोषोऽयमत्यर्थं [1]ख्यापितो यन्न सूर्यजः ॥ १३

तन्निमित्तं महाबाहो दानं दद्यास्त्वमुत्तमम् ।
सदैव भ्रातृभिस्सार्धं अग्रजस्यारिमर्दन ॥ १४

[2]द्रौपद्याश्च प्रिये नित्यं स्थातव्यमरिकर्शन ॥ १४॥

भीमसेनार्जुनौ चैव नकुलश्च कुरूद्वह ।
समाधेयास्त्वया धीमंस् त्वं ह्येव कुलधूर्गतः ॥ १५॥

श्वश्रूश्वशुरयोः पादौ शुश्रूषन्ती वने त्वहम् ।
गान्धारीसहिता वत्स्ये तापसी मलपङ्किनी ॥ १६॥

वैशम्पायनः—

एवमुक्तस्स धर्मात्मा भ्रातृभिस्सहितो वशी ।
विषादमगमत् तीव्रं न च किञ्चिदुवाच ताम् ॥ १७॥

---

1. ख-ग-घ—ख्यापितोऽयं स सूर्यजः ।
2. अ-ख—इदमर्धं नास्ति

स मुहूर्तमिव ध्यात्वा धर्मराजो युधिष्ठिरः ।
उवाच मातरं दीनश् चिन्ताशोकपरायणः ॥ १८॥

युधिष्ठिरः—

किमिदं ते व्यवसितं नैव त्वं वक्तुमर्हसि ।
न त्वामभ्यनुजानामि प्रसादं कर्तुमर्हसि ॥ १९॥

व्यरोचयः पुराऽस्माकम् उत्साहं शुभदर्शने ।
विदुलाया वचोभिस्त्वं नास्मान् सन्त्यक्तुमर्हसि ॥ २०॥

[1]निहत्य पृथिवीपालान् राज्यं प्राप्तमिदं मया ।
तव प्रज्ञामुपश्रुत्य वासुदेवान्नरर्षभात् ॥ २१॥

क्व सा बुद्धिरियं चाद्य भवत्या या श्रुता मया ।
क्षत्रधर्मे स्थितं त्यक्त्वा न प्रयातुमिहार्हसि ॥ २२॥

अस्मानुत्सृज्य राज्यं च स्नुषां चेमां यशस्विनीम् ।
कथं वत्स्यसि शून्येषु वनेष्वम्ब प्रसीद मे ॥ २३॥

वैशम्पायनः—

इति बाष्पकला वाचः कुन्ती पुत्रस्य शृण्वती ।
जगामैवाश्रुपूर्णाक्षी भीमस्तामिदमब्रवीत् ॥ २४॥

भीमः—

यदा राज्यमिदं कुन्ति भोक्तव्यं पुत्रसाद्गतम् ।
प्राप्तव्या दानधर्माश्च यथेयं ते कुतो मतिः ॥ २५॥

1. घ—अर्धचतुष्टयं नास्ति

किं वयं कारिताः पूर्वं भवत्या पृथिवीक्षयम् ।
कस्य हेतोः परित्यज्य राज्यं गन्तुमिहार्हसि ॥ २६॥

वनात् तस्मात् किमानीता भवत्या बालका वयम् ।
दुःखशोकसमाविष्टौ माद्रीपुत्राविमौ तदा ॥ २७॥

प्रसीद मातर्मा गास्त्वं वनमद्य यशस्विनि ।
श्रियं यौधिष्ठिरीं तावद् भुङ्क्ष्व पार्थबलार्जिताम् ॥ २८॥

वैशम्पायनः—

इति सा निश्चितैवाथ वनवासकृतक्षणा ।
लालप्यतां बहुविधं पुत्राणां नाकरोद्वचः ॥ २९॥

द्रौपदी चान्वयाच्छ्वश्रूं विषण्णवदना तदा ।
वनवासाय गच्छन्तीं रुदन्ती भद्रया सह ॥ ३०॥

सा पुत्रान् रुदतस्सर्वान् मुहुर्मुहुरुदीक्षती ।
जगामैव महाभागा वनाय धृतनिश्चया ॥ ३१॥

अन्वयुः पाण्डवास्तत्र सभृत्यान्तःपुरास्तदा ।
ततः प्रमृज्य साऽश्रूणि पुत्रान् वचनमब्रवीत् ॥ ३२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
॥ ९३ ॥ आश्रमवासपर्वणि अष्टादशोऽध्यायः ॥ १८.॥
[ अस्मिन्नध्याये ३२॥ श्लोकाः ]

## ॥ एकोनविंशोऽध्यायः ॥

कुन्त्या स्वस्य वनगमनाध्यवसायेन विषीदतो युधिष्ठिरादीन् प्रति सहेतूपन्यासं समाश्वासनम् ॥ १ ॥

कुन्ती—

एवमेतन्महाबाहो यथा वदसि पाण्डव ।
कृतमुद्धर्षणं पूर्वं मया वस्सीदतां नृप ॥ १

द्यूतापहृतराज्यानां पतितानां सुखादपि ।
ज्ञातिभिः परिभूतानां कृतमुद्धरणं मया ॥ २

कथं पाण्डोर्न नश्येद्धि सन्ततिः पुरुषर्षभ ।
यशश्च वो न नश्येद्धि इति चोद्धरणं कृतम् ॥ ३

[1]यूयमिन्द्रसमास्सर्वे देवतुल्यपराक्रमाः ।
मा परेषां मुखप्रेक्षास् स्युरित्येवं कृतं मया ॥ ४

कथं धर्मभृतां श्रेष्ठो राजा त्वं वासवोपमः ।
पुनर्वनं न गच्छेथा इति चोद्धरणं कृतम् ॥ ५

[2]नागायुतसमप्राणः ख्यातविक्रमपौरुषः ।
नायं भीमोऽत्ययं गच्छेद् इति चोद्धरणं कृतम् ॥ ६

भीमसेनादवरजस् तथाऽयं वासवोपमः ।

1. क-ख-ग-घ—अर्धचतुष्टयं नास्ति
2. अ—अर्धषट्कं नास्ति

विजयो नावसीदेत इति चोद्धरणं कृतम् ॥ ७

नकुलस्सहदेवश्च तथेमौ गुरुवर्तिनौ ।
क्षुधा कथं न सीदेताम् इति चोद्धरणं कृतम् ॥ ८

[1]इयं च बृहती श्यामा श्रीमत्यायतलोचना ।
[2]तथा सभातले क्लिष्टा मा भूदिति च तत् कृतम् ॥ ९

पश्यन्त्या मे तथा ह्रीमां वेपन्तीं कदलीमिव ।
स्त्रीधर्मिणीमनिन्द्याङ्गीं तथा द्यूतपराजिताम् ॥ १०

दुश्शासनस्तां मौर्ख्यात्तु दासीवत् पर्यकर्षत ॥ १०॥
तदैव विदितं मह्यं परिभूतमिदं कुलम् ॥ ११

विषण्णाः कुरवश्चैव तदा मे श्वशुरादयः ।
यथैषा नाथमिच्छन्ती प्रालपत् कुररी यथा ॥ १२

केशपक्षे परामृष्टा पापेन हतबुद्धिना ।
यदा दुश्शासनेनैषा तदा मुह्याम्यहं नृप ॥ १३

युष्मत्तेजोविवृद्ध्यर्थं मया ह्युद्धरणं कृतम् ।
[3]तदानीं विदुलावाक्यैर् इति तद्वित्त पुत्रकाः ॥ १४

कथं न राजवंशोऽयं नश्येत् प्राप्य सुतान् मम ।
पाण्डोरिति मया पुत्रास् तस्मादुद्धरणं कृतम् ॥ १५

---

1. ख—अर्धद्वयं नास्ति 2. ग—इदमर्धं नास्ति
3. अ-क—अर्धत्रयं नास्ति

न तस्य पुत्राः पौत्रा वा कुत एव स पार्थिवः ।
लभते सुकृताँल्लोकान् यस्माद्वंशः प्रणश्यति ॥ १६

भुक्तं राज्यफलं तात भर्तुर्मे विपुलं पुरा ।
महादानानि दत्तानि पीतास्सोमा यथाविधि ॥ १७

साऽहं नात्मफलार्थं वै वासुदेवमचूचुदम् ।
विदुलायाः प्रलापैस्तैः प्लावनार्थं तु तत् कृतम् ॥ १८

नाहं राज्यफलं पुत्राः कामये भर्तृवर्जितम् ।
पतिलोकानहं पुण्यान् कामये तपसा विभो ॥ १९

श्वश्रूश्वशुरयोः कृत्वा शुश्रूषां वनवासिनोः ।
तपसा शोषयिष्यामि युधिष्ठिर कलेबरम् ॥ २०

निवर्तस्व कुरुश्रेष्ठ भीमसेनादिभिस्सह ।
धर्मे ते धीयतां बुद्धिर् मनसो महदस्तु ते ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

॥ ९३ ॥ आश्रमवासपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥

[ अस्मिन्नध्याये २१ श्लोकाः ]

## ॥ विंशोऽध्यायः ॥

कुन्त्या कृच्छ्रेण प्रतिनिवर्तितैर्युधिष्ठिरादिभिः कृच्छ्रात् पुनर्नगरं प्रत्यागमनम् ॥ १ ॥ धृतराष्ट्रेण विदुरादिभिस्सह वनमेत्य गङ्गातीरे सन्ध्योपास्त्यादिना रात्रियापनम् ॥ २ ॥

वैशम्पायनः—

कुन्त्यास्तु वचनं श्रुत्वा पाण्डवा राजसत्तम ।
व्रीडितास्सन्न्यवर्तन्त पाञ्चाल्या सह भारत ॥ १

ततश्शब्दो महानासीत् सर्वेषामेव भारत ।
अन्तःपुराणां रुदतां दृष्ट्वा कुन्तीं तथा गताम् ॥ २

प्रदक्षिणमुपावृत्य राजानं पाण्डवास्तदा ।
अभिवाद्य निवर्तन्त पृथां तामनिवर्त्य ते ॥ ३

तामब्रवीन्महाराजो धृतराष्ट्रोऽम्बिकासुतः ।
गान्धारीं विदुरं चैव समाभाष्य निगृह्य च ॥ ४

धृतराष्ट्रः—

युधिष्ठिरस्य जननी देवी साऽपि निवर्त्यताम् ।
तथा युधिष्ठिरः प्राह तत् सर्वं सत्यमेव हि ॥ ५

पुत्रैश्वर्यं महदिदम् अपहाय महाफलम् ।
का गच्छेत वनं दुर्गं पुत्रानुत्सृज्य मूढवत् ॥ ६

राज्यस्थया तपश्चर्तुं नानाव्रतकृतं महत् ।
अनया शक्यमद्येह श्रूयतां च वचो मम ॥ ७

गान्धारि परितुष्टोऽस्मि वध्वाश्चुश्रूषणेन वै ।
तस्मात् त्वमेनां धर्मज्ञे समनुज्ञातुमर्हसि ॥ ८

वैशम्पायनः—

इत्युक्ता सौबलेयी तु राज्ञा कुन्तीमुवाच ह ।
तत्सर्वं राजवचनं स्वं च वाक्यं विशेषवत् ॥ ९

न च सा वनवासाय देवी कृतमतिस्तदा ।
शक्ता ह्युपावर्तयितुं कुन्ती धर्मपरा सती ॥ १०

तस्यास्तु तं स्थिरं ज्ञात्वा व्यवसायं कुरुस्त्रियः ।
निवृत्ताश्च कुरुश्रेष्ठ दृष्ट्वा प्ररुरुदुस्तदा ॥ ११

उपावृत्तेषु पार्थेषु सर्वेष्वन्तःपुरेषु च ।
ययौ राजा महाप्राज्ञो धृतराष्ट्रो वनं तदा ॥ १२

पाण्डवा अपि दीनास्ते दुःखशोकपरायणाः ।
यानैस्स्त्रीसहितास्सर्वे पुरं प्रविविशुस्तदा ॥ १३

तदहृष्टमिवाकूजं गतोत्सवमिवाभवत् ।
नगरं हास्तिनपुरं सस्त्रीवृद्धकुमारकम् ॥ १४

सर्वे चासन् निरुत्साहाः पाण्डवा जातमन्यवः ।
कुन्त्या हीनास्सुदुःखार्ता वत्सा इव निवारिताः ॥ १५

धृतराष्ट्रस्तु तेनाह्ना गत्वा सुमहदन्तरम् ।
ततो भागीरथीतीरे निवासमकरोत् प्रभुः ॥ १६

प्रादुष्कृता यथान्यायम् अग्नयो वेदपारगैः ।

व्यराजन्त द्विजश्रेष्ठैस् तत्र तत्र तपोधनैः ॥ १७
प्रादुष्कृताग्निरभवत् स च वृद्धो नराधिपः ॥ १७॥
स राजाऽग्नीन् पर्युपास्य हुत्वा च विधिवत् तदा ।
सन्ध्यागतसहस्रांशुम् उपातिष्ठत भारत ॥ १८॥
विदुरस्सञ्जयश्चैव राज्ञश्शय्यां कुशैस्ततः ।
चक्रतुः कुरुवीरस्य गान्धार्याश्चाविदूरतः ॥ १९॥
गान्धार्यास्सन्निकर्षे तु निषसाद कुशेष्वथ ।
युधिष्ठिरस्य जननी कुन्ती साधुव्रते स्थिता ॥ २०॥
तेषां संश्रवणे चापि निषेदुर्विदुरादयः ।
याजकाश्च यथोद्देशं द्विजा ये चानुयायिनः ॥ २१॥
प्राधीतद्विजमुख्या सा सम्प्रज्वलितपावका ।
बभूव तेषां रजनी ब्राह्मीव प्रीतिवर्धनी ॥ २२॥
ततो रात्र्यां व्यतीतायां कृतपूर्वाह्णिकक्रियाः ।
हुत्वाऽग्निं विधिवत् सर्वे प्रययुस्ते यथाक्रमम् ॥ २३॥
उदङ्मुखा निरीक्षन्त उपवासपरायणाः ॥ २४
स तेषामतिदुःखोऽभून्निवासः प्रथमेऽहनि ।
शोचतां वदतां चापि पौरजानपदानपि ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि विंशोऽध्यायः ॥ २० ॥
॥ ९३ ॥ आश्रमवासपर्वणि विंशोऽध्यायः ॥ २० ॥
[ अस्मिन्नध्याये २५ श्लोकाः ]

## ॥ एकविंशोऽध्यायः ॥

धृतराष्ट्रेण विदुरादिभिस्सह गङ्गातीरात् कुरुक्षेत्रमेत्य तत्र शतयूपाश्रमे व्यासाज्ञया तदुपदिष्टविधिना तपश्चरणम् ॥ १ ॥

वैशम्पायनः—

ततो भागीरथीतीरे मध्ये पुण्यजनोचिते ।
निवासमकरोद्राजा विदुरस्य मते स्थितः ॥ १

तत्रैनं पर्युपातिष्ठन् ब्राह्मणा राष्ट्रवासिनः ।
क्षत्रविट्शूद्रसङ्घाश्च बहवो भरतर्षभ ॥ २

स तैः परिवृतो राजा कथाभिरभिनन्द्य तान् ।
अनुजज्ञे सशिष्यान् वै विधिवत् प्रतिपूज्य च ॥ ३

सायाह्ने स महीपालस् ततो गङ्गामुपेत्य च ।
चकार विधिवच्छौचं गान्धारी च यशस्विनी ॥ ४

तथैवान्ये पृथक् सर्वे तीर्थेष्वाप्लुत्य भारत ।
चक्रुस्सर्वाः क्रियास्तत्र पुरुषा विदुरादयः ॥ ५

कृतशौचं ततो वृद्धं श्वशुरं कुन्तिभोजजा ।
गान्धारीं च पृथा राजन् गङ्गातीरमुपानयत् ॥ ६

राज्ञस्तु याजकैस्तत्र कृतो वेदीपरिस्तरः ।
जुहाव तत्र वह्नीन् स नृपतिस्सत्यसङ्गरः ॥ ७

ततो भागीरथीतीरात् कुरुक्षेत्रं जगाम सः ।
सानुगो नृपतिर्विद्वान् नियतस्संयतेन्द्रियः ॥ ८

तत्राश्रमपदं श्रीमान् अभिगम्य स पार्थिवः ।
आससादाथ राजर्षिं शतयूपं मनीषिणम् ॥ ९

स हि राजा महानासीत् केकयेषु परन्तपः ।
स्वपुत्रं मनुजैश्वर्ये निवेश्य वनमाविशत् ॥ १०

तेनासौ सहितो राजा ययौ व्यासाश्रमं तदा ।
तत्रैवं विधिवद्राजन् प्रत्यगृह्णात् कुरूद्वहम् ॥ ११

स दीक्षां तत्र सम्प्राप्य राजा कौरवनन्दनः ।
शतयूपाश्रमे तस्मिन् निवासमकरोत् तदा ॥ १२

तस्मै सर्वं विधिं राजन्नाचख्यौ स नृपस्तदा ।
आरण्यकं महाराज व्यासस्यानुमते तदा ॥ १३

एवं स तपसा राजा धृतराष्ट्रो महामनाः ।
योजयामास चात्मानं तांश्चाप्यनुचरांस्तदा ॥ १४

तथैव देवी गान्धारी वल्कलाजिनवासिनी ।
कुन्त्या सह महाराज समानव्रतचारिणी ॥ १५

कर्मणा मनसा वाचा चक्षुषा चापि ते नृप ।
सन्नियम्येन्द्रियग्रामम् आस्थिताः परमं तपः ॥ १६

त्वगस्थिशेषः परिशुष्कमांसो
जटाजिनी वल्कलसंवृताङ्गः ।
[1]स पार्थिवस्तत्र तपश्चचार
राजर्षिवत् तीव्रमपेतमोहः ॥ १७
क्षत्ता च धर्मार्थविदग्र्यबुद्धिस्
ससञ्जयस्तं नृपतिं सदारम् ।
उपाचरद्घोरतपा महात्मा
तदा कृशो वल्कलचीरवासाः ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
॥ ९३ ॥ आश्रमवासपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
[ अस्मिन्नध्याये १८ श्लोकाः ]

## ॥ द्वाविंशोऽध्यायः ॥

नारदपर्वतादिभिर्धृतराष्ट्रादिदिदृक्षया शतयूपाश्रमं प्रत्यागमनम् ॥ १ ॥ नारदेन धृतराष्ट्रं प्रति तत्तपोवनस्य सहस्रचित्यादिराजर्षीणां स्वर्गप्रापकत्वमहिमोक्तिपूर्वकं विदुरादिभिस्सह तस्यापि भविष्यत्सिद्धिप्रदत्वकथनम् ॥ २ ॥

वैशम्पायनः—

ततस्तस्मिन् मुनिश्रेष्ठा राजानं द्रष्टुमभ्ययुः ।
नारदः पर्वतश्चैव देवलश्च महातपाः ॥ १

1. ख—सार्धश्लोको न दृश्यते ।

द्वैपायनस्सशिष्यश्च सिद्धाश्चान्ये महर्षयः ।
शतयूपश्च राजर्षिर् वृद्धः परमधार्मिकः ॥ २

तेषां कुन्ती महाराज पूजां चक्रे यथाविधि ।
तस्यास्ते तुष्टुवुस्सर्वे तापसाः परिचर्यया ॥ ३

तत्र धर्म्याः कथास्तात चक्रुस्ते परमर्षयः ।
रमयन्तो महात्मानं धृतराष्ट्रं जनाधिपम् ॥ ४

कथान्तरे तु कस्मिंश्चिद् देवर्षिर्नारदस्तदा ।
कथामिमामकथयत् सर्वप्रत्यक्षदर्शिवान् ॥ ५

नारदः—

पुरा प्रजापतिसमो राजाऽऽसीदकुतोभयः ।
सहस्रचित्य इत्युक्तश् शतयूपपितामहः ॥ ६

[1]स पुत्रे राज्यमासज्य ज्येष्ठे परमधार्मिके ।
[2]वनं विवेश धर्मात्मा शतचित्यो महीपतिः ॥ ७

स गत्वा तपसः पारं दीप्तस्स पृथिवीपतिः ।
पुरन्दरस्य संस्थानं प्रतिपेदे महामनाः ॥ ८

दृष्टपूर्वस्स बहुशो राजा सम्पतता मया ।
महेन्द्रसदने राजा तपसा दग्धकिल्बिषः ॥ ९

तथा शैलालयो राजा भगदत्तपितामहः ।

1. अ-ख—इदमर्धं नास्ति 2. अ—अर्धसप्तकं नास्ति

तपोबलेनैव नृपो महेन्द्रसदनं गतः ॥ १०

[1]तथा पृषध्रो नामासीद् राजा वज्रधरोपमः ।
स चापि तपसा लेभे नाकपृष्ठमितो गतः ॥ ११

अस्मिन्नरण्ये नृपतिर् मान्धातुरनघात्मजः ।
पुरुकुत्सस्तपस्सिद्धिं महतीं समवाप्तवान् ॥ १२

भार्या समभवद्यस्य नर्मदा सरितां वरा ।
सोऽस्मिन्नरण्ये नृपतिस् तपस्तप्त्वा दिवं गतः ॥ १३

शशलोमा च राजाऽऽसीद् राजन् परमधार्मिकः ।
स चाप्यस्मिन् वने तप्त्वा ततो दिवमवाप्तवान् ॥ १४

द्वैपायनप्रसादाच्च त्वमपीदं तपोवनम् ।
राजन्नवाप्य दुष्प्रापां सिद्धिमग्र्यां गमिष्यसि ॥ १५

त्वं चापि राजेन्द्र तथा तपसोऽन्ते श्रिया वृतः ।
गान्धारीसहितो गन्ता गतिं तेषां महात्मनाम् ॥ १६

पाण्डुस्स्मरति नित्यं च बलहन्तुस्समीपतः ।
त्वां सदैव महीपालस् स त्वा श्रेयसि योक्ष्यते ॥ १७

तव शुश्रूषया चैव गान्धार्याश्च यशस्विनी ।
भर्तुस्सलोकतां कुन्ती गमिष्यति वधूस्तव ॥ १८

---

1. क-ख-ङ—तथा प्रबुद्धो । ग—तथा वृषध्रुवे नाम ।

युधिष्ठिरस्य जननी स हि धर्मस्सनातनः ॥ १८॥
वयमेवं प्रपश्यामो नृपते दिव्यचक्षुषा ॥ १९

प्रवेक्ष्यति स्वमात्मानं विदुरस्तु युधिष्ठिरम् ।
सञ्जयस्तदनुध्यानात् सूतस्स्वर्गमवाप्स्यति ॥ २०

वैशम्पायनः—

एतच्छ्रुत्वा कौरवेन्द्रो महात्मा
सहैव पत्न्या प्रीतिमान् प्रत्यगृह्णात् ।
विद्वान् वाक्यं नारदस्य प्रशस्य
चक्रे पूजां चातुलां नारदाय ॥ २१

तदा सर्वे नारदं विप्रसङ्घास्
सम्पूजयामासुरतीव राजन् ।
राज्ञः प्रीता धृतराष्ट्रस्य ते वै
पुनःपुनस्सम्प्रहृष्टास्तदानीम् ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥

॥ ९३ ॥ आश्रमवासपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥

[ अस्मिन्नध्याये २२ श्लोकाः ]

## ॥ त्रयोविंशोऽध्यायः ॥

शतयूपपृष्टेन नारदेन तं प्रति धृतराष्ट्रस्य वर्षशतादूर्ध्वं गान्धार्या सह कुबेरलोकप्राप्तिकथनम् ॥ १ ॥

वैशम्पायनः—

नारदस्य तु तद्वाक्यं प्रशशंसुर्द्विजोत्तमाः ।
शतयूपस्तु राजर्षिर् नारदं वाक्यमब्रवीत् ॥ १

शतयूपः—

अहो भगवता राज्ञः प्रीतिरस्य विवर्धिता ।
सर्वस्य च जनस्यास्य मम चैव महाद्युते ॥ २

अस्ति काचिद्विवक्षा तु मम तां गदतश्शृणु ।
धृतराष्ट्रं प्रति नृपं देवर्षे लोकपूजितम् ॥ ३

लोकवृत्तान्ततत्त्वज्ञो भवान् दिव्येन चक्षुषा ।
युक्तः पश्यतु देवर्षे गतयो विविधा नृणाम् ॥ ४

उक्तवान् नृपतीशांस्त्वं महेन्द्रसमलोकगान् ।
न त्वस्य नृपतेर्लोकाः कथितास्ते महामुने ॥ ५

स्थानमस्य क्षितिपतेश् श्रोतुमिच्छाम्यहं विभो ।
त्वत्तः कीदृक् कदा चेति तन्ममाचक्ष्व पृच्छतः ॥ ६

वैशम्पायनः—

इत्युक्तो नारदस्तेन वाक्यं सर्वमनोनुगम् ।

व्याजहार सतां मध्ये दिव्यदर्शी महातपाः ॥ ७

नारदः—

यदृच्छया शक्रसदो गत्वा शक्रं शचीपतिम् ।
दृष्टवानस्मि राजेन्द्र तत्र पाण्डुं नृपं तदा ॥ ८

तत्रेयं धृतराष्ट्रस्य कथा समभवन्नृप ।
[1]तपसो दुश्चरस्यास्य यदयं तप्यते नृपः ॥ ९

तत्राहमिदमश्रौषं शक्रस्य वदतो दिवि ।
वर्षाणि त्रीणि शिष्टानि राज्ञोऽस्य परमायुषः ॥ १०

ततः कुबेरभवनं गान्धारीसहितो नृपः ।
विहर्ता धृतराष्ट्रोऽयं राजराजाभिपूजितः ॥ ११

कामगेन विमानेन दिव्याभरणभूषितः ।
ऋषिपुत्रो महाभागस् तपसा दग्धकिल्बिषः ॥ १२

सञ्चरिष्यति लोकांश्च देवगन्धर्वरक्षसाम् ।
स्वच्छन्देनेति धर्मात्मा व्यासस्य तु तपोबलात् ॥ १३

देवगुह्यमिदं प्रीत्या मया वः कथितं महत् ।
भवन्तो हि श्रुतधनास् तपसा दग्धकिल्बिषाः ॥ १४

वैशम्पायनः—

इति ते तस्य तच्छ्रुत्वा देवर्षेर्मधुरं वचः ।

---

1. ख-घ—इदमर्धं नास्ति

[1]सर्वे सुमनसः प्रीता बभूवुस्स च पार्थिवः ॥ १५

एवं कथाभिरन्वास्य धृतराष्ट्रं मनीषिणम् ।
विप्रजग्मुर्यथाकामं ते सिद्धगतिमास्थिताः ॥ १६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥
॥ ९३ ॥ आश्रमवासपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥
[ अस्मिन्नध्याये १६ श्लोकाः ]

## ॥ चतुर्विंशोऽध्यायः ॥

युधिष्ठिरादिभिः कुन्तीधृतराष्ट्रादीनां प्रव्रजनशोकेनाभिमन्युप्रभृतिबन्धुजनानुस्मरणशोकेन च स्वस्वव्यापारेष्वप्यनादरणम् ॥ १ ॥

वैशम्पायनः—

एवं गते कौरवेन्द्रे दुःखशोकसमाहताः ।
बभूवुः पाण्डवा राजन् मातृशोकेन चार्दिताः ॥ १

तथा पौरजनास्सर्वे शोचन्तस्तं नराधिपम् ॥ १॥

तत्र तत्र कथा ह्यासन् द्विजानां कौरवान् प्रति ॥ २

द्विजाः—

कथं नु राजा वृद्धस्स वने वसति निर्जने ।
गान्धारी च महाभागा सा च कुन्ती पृथा कथम् ॥ ३
सुखार्हस्स हि राजर्षिर् असुखी तन्महावनम् ।

1. अ—इदमर्धं नास्ति

किमवस्थस्समासाद्य प्रज्ञाचक्षुर्महामनाः ॥ ४

सुदुष्करं कृतवती कुन्ती पुत्रानपास्य सा ।
राज्यश्रियं च सन्त्यज्य वनवासमरोचयत् ॥ ५

विदुरः किमवस्थश्च भ्रातुश्शुश्रूषुरात्मवान् ।
स च गावल्गणिर्धीमान् भर्तृपिण्डानुपालकः ॥ ६

वैशम्पायनः—

आकुमारं च पौरास्ते चिन्ताशोकपरायणाः ।
तत्र तत्र कथाश्चक्रुस् समासाद्य परस्परम् ॥ ७

पाण्डवाश्चापि ते सर्वे भृशं शोकपरायणाः ।
शोचन्तो मातरं वृद्धाम् ऊषुर्नीतिचिरं पुरे ॥ ८

तथैव वृद्धं पितरं हतपुत्रं जनेश्वरम् ।
गान्धारीं च महाभागां विदुरं च महामतिम् ॥ ९

तेषां भोगेष्वभूत् प्रीतिर् न तांश्चिन्तयतां तदा ।
न राज्ये न च नारीषु न वेदाध्ययने तथा ॥ १०

परं निर्वेदमगमंश् चिन्तयन्तो नराधिपम् ।
तं च ज्ञातिवधं घोरं संस्मरन्तः पुनः पुनः ॥ ११

अभिमन्योश्च बालस्य विनाशं रणमूर्धनि ।
कर्णस्य च महाबाहोस् सङ्ग्रामेष्वपलायिनः ॥ १२

तथैव द्रौपदेयानाम् अन्येषां सुहृदामपि ।

संस्मृत्य ते वीरा नातिप्रमनसोऽभवन् ॥ १३

प्रवीरां पृथिवीं हृतरत्नां च भारत ।
सदैव चिन्तयन्तस्ते न निद्रामुपलेभिरे ॥ १४

द्रौपदी हतपुत्रा च सुभद्रा चैव भामिनी ।
नातिप्रीतियुते देव्यौ तदाऽऽस्तामप्रहृष्टवत् ॥ १५

वैराट्यास्तु सुतं दृष्ट्वा पितरं ते परीक्षितम् ।
धारयन्ति स्म ते प्राणांस् तव पूर्वपितामहाः ॥ १६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

॥ ९३ ॥ आश्रमवासपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

[ अस्मिन्नध्याये १६ श्लोकाः ]

---

## ॥ पञ्चविंशोऽध्यायः ॥

युधिष्ठिरेण वनस्थकुन्तीधृतराष्ट्रादिदिदृक्षया द्रौपद्यादिभिः पौरैर्भ्रातृभिश्च सह वनं प्रति प्रस्थानम् ॥ १ ॥

---

वैशम्पायनः—

[1]एवं ते पुरुषव्याघ्राः पाण्डवा मातृनन्दनाः ।
स्मरन्तो मातरं वीरा बभूवुर्भृशदुःखिताः ॥ १

1. अ-ब—इदमर्धं नास्ति

ये राजकार्येषु पुरा नामाद्यन्त क्वचिन्नृप ।
ते राजकार्याणि तदा नाकार्षुर्मनसा पुरे ॥ २
आविष्टा इव शोकेन नाभ्यनन्दन्त किञ्चन ।
सम्भाष्यमाणा अपि ते न किञ्चित् प्रत्यपूजयन् ॥ ३
ते स्म वीरा दुराधर्षा गाम्भीर्ये सागरोपमाः ।
शोकोपहतविज्ञाना नष्टसंज्ञा इवाभवन् ॥ ४
अनुस्मरन्तो जननीं ततस्ते कुरुनन्दनाः ॥ ४॥

पाण्डवाः—

कथं नु वृद्धमिथुनं वहत्यद्य पृथा कृशा ॥ ५
कथं च स महीपालो हतपुत्रो निराश्रयः ।
पत्न्या सह वसत्येको वने श्वापदसेविते ॥ ६
सा च देवी महाभागा गान्धारी हतबान्धवा ।
पतिमन्धं कथं वृद्धम् अन्वेति विजने वने ॥ ७

वैशम्पायनः—

एवं तेषां कथयताम् औत्सुक्यमभवत् तदा ।
गमने चाभवद्बुद्धिर् धृतराष्ट्रदिदृक्षया ॥ ८
सहदेवस्तु राजानं प्रणिपत्येदमब्रवीत् ॥ ८॥

सहदेवः—

अहो नु भवतो दृष्टं हृदयं गमनं प्रति ॥ ९
न हि त्वा गौरवेणाहम् अशकं वक्तुमात्मना ।
गमनं प्रति राजेन्द्र तदिदं प्रत्युपस्थितम् ॥ १०

दिष्ट्या द्रक्ष्यामि तां कुन्तीं वर्तमानां तपस्विनीम् ।
जटिलां तापसीं वृद्धां कुशकाशपरिक्षताम् ॥ ११

प्रासादहर्म्यसंवृद्धाम् अत्यन्तसुखभागिनीम् ।
कदा नु जननीं श्रान्तां द्रक्ष्यामि भृशदुःखिताम् ॥ १२

अनित्याः खलु मर्त्यानां गतयो भरतर्षभ ।
कुन्ती राजसुता यत्र वसत्यसुखिनी वने ॥ १३

वैशम्पायनः—

सहदेववचश्श्रुत्वा द्रौपदी योषितां वरा ।
उवाच देवी राजानम् अभिपूज्याभिनन्द्य च ॥ १४

द्रौपदी—

द्रक्ष्यामि तां कदा देवीं यदि जीवति सा पृथा ।
जीवन्त्या ह्यद्य नः प्रीतिर् भविष्यति नराधिप ॥ १५

एषा तेऽस्तु मतिर्नित्यं धर्मे ते रमतां मनः ।
योऽद्य त्वमस्मान् राजेन्द्र श्रेयसा योजयिष्यसि ॥ १६

अग्रपादस्थितमिदं विद्धि राजन् वधूजनम् ।
काङ्क्षितं दर्शनं कुन्त्या गान्धार्याश्श्वशुरस्य च ॥ १७

वैशम्पायनः—

इत्युक्तस्स नृपो देव्या पाञ्चाल्या भरतर्षभ ।
सेनाध्यक्षान् समानाय्य सर्वानिदमथाब्रवीत् ॥ १८

युधिष्ठिरः—

निर्यापयत सेनां मे प्रभूतरथकुञ्जराम् ।

द्रक्ष्यामो वनवासस्थं धृतराष्ट्रं महीपतिम् ॥ १९

वैशम्पायनः—

अध्यक्षांश्चात्रवीद्राजा यानानि विविधानि मे ।
सज्जीक्रियन्तां सर्वाणि शिबिकाश्च सहस्रशः ॥ २०

शकटापणवेशाश्च कोशाश्चिशल्पिन एव च ।
निर्यान्तु कोशपालाश्च कुरुक्षेत्राश्रमं प्रति ॥ २१

यश्च पौरजनः कश्चिद् द्रष्टुमिच्छति पार्थिवम् ।
अनावृतस्सुविहितस् स च यातु सुरक्षितः ॥ २२

सूदाः पौरोगवाश्चैव सर्वं चैव महानसम् ।
विविधं भक्ष्यभोज्यं च शकटैरुह्यतां मम ॥ २३

प्रयाणं घुष्यतामद्य श्वोभूत इति मा चिरम् ।
क्रियतां पथि चाप्यत्र वेश्मानि विविधानि च ॥ २४

एवमाज्ञाप्य राजा स भ्रातृभिस्सह पाण्डवः ।
श्वोभूते निर्ययौ राजा सस्त्रीबालपुरस्कृतः ॥ २५

स बहिर्दिवसानेव जनौघं परिपालयन् ।
न्यवसन्नृपतिः पञ्च ततोऽगच्छद्वनं प्रति ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां आश्रमवासिकपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥

॥ ९३ ॥ आश्रमवासपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
[ अस्मिन्नध्याये २६ श्लोकाः ]

## ॥ षड्विंशोऽध्यायः ॥

युधिष्ठिरेण नानायानारूढैः पौरैर्भ्रातृभिश्च सह धृतराष्ट्रादिदिदृक्षया शतयूपाश्रमवनप्रवेशः ॥ १ ॥

वैशम्पायनः—

तत आज्ञापयामास सेनां भरतसत्तमः ।
अर्जुनप्रमुखैर्गुप्तां लोकपालोपमैर्नरैः ॥ १

योगो योग इति प्रीत्या ततश्शब्दो महानभूत् ।
क्रोशतां सादिनां तत्र युज्यतां युज्यतामिति ॥ २

केचिद्यानैर्जना जग्मुः केचिदश्वैर्मनोजवैः ।
रथैश्च [1]नगराकारैः प्रदीप्तज्वलनोपमैः ॥ ३

गजेन्द्रैर्गर्जितैः केचित् केचिदुष्ट्रैर्नराधिप ।
पदातयश्च पुरुषाः नखरप्रासयोधिनः ॥ ४

[2]पौरजानपदाश्चैव यानैर्बहुविधैस्तथा ।
अन्वयुः कुरुराजानं धृतराष्ट्रदिदृक्षया ॥ ५

स चापि राजवचनाद् आचार्यो गौतमः कृपः ।
सेनामादाय सेनानीः प्रययावाश्रमं प्रति ॥ ६

ततो द्विजैर्धृतश्श्रीमान् कुरुराजो युधिष्ठिरः ।
संस्तूयमानो मुनिभिस् सूतमागधवन्दिभिः ॥ ७

1. ग—कनकाकारैः। 2. ग—इदमर्धं नास्ति

पाण्डरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
रथानीकेन महता निर्ययौ कुरुनन्दनः ॥ ८

गजैश्चाचलसङ्काशैर् भीमकर्मा महाभुजः ।
सञ्जयन्त्रायुधोपेतैः प्रययौ मारुतात्मजः ॥ ९

माद्रीपुत्रावपि तथा हयारोहौ सुसंवृतौ ।
जग्मतुश्शीघ्रगमनौ सन्नद्धकवचध्वजौ ॥ १०

अर्जुनश्च महातेजा रथेनादित्यवर्चसा ।
वशी श्वेतैर्हयैर्दिव्यैर् युक्तेनान्वगमन्नृपम् ॥ ११

द्रौपदीप्रमुखाश्चापि स्त्रीसङ्घाश्शिबिकागताः ।
स्वध्यक्षगुप्ताः प्रययुर् विसृजन्तोऽमितं वसु ॥ १२

समृद्धरथनागाश्वं वेणुवीणानुनादितम् ।
शुशुभे पाण्डवं सैन्यं तत् तदा भरतर्षभ ॥ १३

नदीतीरेषु रम्येषु सरस्सु च विशाम्पते ।
वासं कृत्वा क्रमेणाथ जग्मुस्ते कुरुपुङ्गवाः ॥ १४

युयुत्सुश्च महातेजा धौम्यश्चैव पुरोहितः ।
युधिष्ठिरस्य वचनात् पुरगुप्तिं प्रचक्रतुः ॥ १५

ततो युधिष्ठिरो राजा कुरुक्षेत्रमवातरत् ।
क्रमेणोत्तीर्य यमुनां नदीं परमपावनीम् ॥ १६

स ददर्शाश्रमं दूराद् राजर्षेस्तस्य धीमतः ।

शतयूपस्य कौरव्य धृतराष्ट्रस्य चैव हि ॥ १७

ततः प्रमुदितस्सर्वो जनस्तद्वनमञ्जसा ।
विवेश सुमहानादैर् आपूर्य भरतर्षभ ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

॥ ९३ ॥ आश्रमवासपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥

[ अस्मिन्नध्याये १८ श्लोकाः ]

---

## ॥ सप्तविंशोऽध्यायः ॥

युधिष्ठिरादिभिः शतयूपाश्रमे धृतराष्ट्रादीनुपेत्य स्वस्वनामकीर्तन-पूर्वकं तत्पादाभिवादनम् ॥ १ ॥ धृतराष्ट्रेण स्वावस्थादर्शनेन शोचतां तेषां समाश्वासनम् ॥ २ ॥

---

वैशम्पायनः—

ततस्ते पाण्डवा दूराद् अवतीर्य पदातयः ।
अभिजग्मुर्नरपतेर् आश्रमं विनयान्विताः ॥ १

[1]स च सेनाजनस्सर्वो ये च राष्ट्रनिवासिनः ।
स्त्रियश्च कुरुमुख्यानां पद्भिरेवान्वयुस्तदा ॥ २

तत्राश्रममुपाजग्मुर् धृतराष्ट्रस्य पाण्डवाः ।
शून्यं मृगगणाकीर्णं कदलीवनशोभितम् ॥ ३

---

1. ब—अर्धत्रयं नास्ति

ततस्तत्र समाजग्मुस् तापसा विविधव्रताः ।
पाण्डवानागतान् द्रष्टुं कौतूहलसमन्विताः ॥ ४

तानपृच्छत् ततो राजा कासौ कौरववंशभृत् ।
पिता ज्येष्ठो गतोऽस्माकम् इति बाष्पपरिप्लुतः ॥ ५

तमूचुस्ते ततो वाक्यं यमुनामवगाहितुम् ।
पुष्पाणामुदकुम्भस्य चार्थे गत इति प्रभो ॥ ६

तैराख्यातेन मार्गेण ततस्ते प्रययुस्तदा ।
ददृशुश्चाविदूरे तान् सर्वानथ पदातयः ॥ ७

ततस्ते सत्वरा जग्मुः पितुर्दर्शनकाङ्क्षिणः ।
सहदेवस्तु वेगेन प्राधावद्यत्र सा पृथा ॥ ८

सस्वरं प्रारुदद् धीमान् मातुः पादावुपस्पृशन् ।
सा तु बाष्पाकुलमुखी तं ददर्श प्रियं सुतम् ॥ ९

बाहुभ्यां सम्परिष्वज्य समुन्नाम्य च भारत ।
गान्धार्याः कथयामास सहदेवमुपस्थितम् ॥ १०

अनन्तरं च राजानं भीमसेनमथार्जुनम् ।
नकुलं च पृथा दृष्ट्वा त्वरमाणोपचक्रमे ॥ ११

सा ह्यग्रे गच्छति तयोर् दम्पत्योर्हतपुत्रयोः ।
कर्षन्ती तौ ततस्ते तां दृष्ट्वैव न्यपतन् भुवि ॥ १२

तयोस्तु पादयो राजन् न्यपतन् हतपुत्रयोः ॥ १२॥

तान् राजा स्वरयोगेन स्पर्शेन च महामनाः ।
प्रत्यभिज्ञाय मेधावी समाश्वासयत प्रभुः ॥ १३॥
ततस्ते बाष्पमुत्सृज्य गान्धारीसहितं नृपम् ।
उपतस्थुर्महात्मानो मातरं च यथाविधि ॥ १४॥
सर्वेषां तोयकलशान् जगृहुस्ते स्वयं तथा ।
पाण्डवा लब्धसंज्ञास्ते मात्रा चाश्वासिता भृशम् ॥ १५॥
ततो नार्यो नृसिंहानां स च योधजनस्तथा ।
पौरजानपदाश्चैव ददृशुस्तं नराधिपम् ॥ १६॥
निवेदयामास ततो जनं तं गोत्रनामतः ।
युधिष्ठिरो नरपतिस् स चैनान् प्रत्यपूजयत् ॥ १७॥
स तैः परिवृतो मेने हर्षबाष्पाविलेक्षणः ।
राजाऽऽत्मानं गृहगतं पुरेव गजसाह्वये ॥ १८॥
अभिवादितो वधूभिश्च कृष्णाद्याभिस्स पार्थिवः ।
गान्धारीसहितो धीमान् कुन्त्या च प्रत्यनन्दत ॥ १९॥
ततस्त्वाश्रममागच्छत् सिद्धचारणसेवितम् ।
दिदृक्षुभिस्समाकीर्णं नभस्तारागणैरिव ॥ २०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥

॥ ९३ ॥ आश्रमवासपर्वणि सप्तविंशोऽध्यायः ॥ २७॥

[ अस्मिन्नध्याये २०॥ श्लोकाः ]

## ॥ अष्टाविंशोऽध्यायः ॥

सञ्जयेन तापसान् प्रति युधिष्ठिरादीनां द्रौपद्यादिस्त्रीणां चाङ्गुलि-निर्देशेन नामनिर्देशः ॥ १ ॥

वैशम्पायनः—

स तैस्सह नरव्याघ्रैर् भ्रातृभिर्भरतर्षभ ।
राजा रुचिरपद्माक्षैर् आसाञ्चक्रे तदाश्रमे ॥ १

तापसैश्च महाभागैर् नानादेशसमागतैः ।
द्रष्टुं कुरुपतेः पुत्रान् पाण्डवान् पृथुवक्षसः ॥ २

[1]तेऽब्रुवन्ज्ञातुमिच्छामः कतमोऽत्र युधिष्ठिरः ।
भीमार्जुनयमाश्चैव द्रौपदी सा यशस्विनी ॥ ३

तानाचख्यौ तदा सूतस् तेषां नाम प्रधानतः ।
सञ्जयो द्रौपदीं चैव सर्वाश्च भरतस्त्रियः ॥ ४

सञ्जयः—

य एष जाम्बूनदशुद्धगौर-
तनुर्महासिंह इव प्रबृद्धः ।
प्रचण्डघोणः पृथुदीर्घनेत्रस्
ताम्रायताक्षः कुरुराज एषः ॥ ५

1. घ—अर्धत्रयं नास्ति

अयं बृहन्मत्तगजेन्द्रगामी
विशुद्धचामीकरराशिगौरः ।
पीनायतांसो गुरुदीर्घबाहुर्
वृकोदरः पश्यत पश्यतैनम् ॥ ६

य एष पार्श्वेऽस्य महाधनुष्मान्
श्यामो युवा वारणयूथपाभः ।
सिंहोन्नतांसो गजखेलगामी
पद्मायताक्षोऽर्जुन एष वीरः ॥ ७

कुन्तीसमीपे पुरुषोत्तमौ तु
यमाविमौ विष्णुमहेन्द्रकल्पौ ।
मनुष्यलोके वपुषा समोऽस्ति
ययोर्न रूपे न बले न शीले ॥ ८

इयं पुनः पद्मदलायताक्षी
मध्यं वयः किञ्चिदिव स्पृशन्ती ।
नीलोत्पलाभा पुरदेवतेव
कृष्णा स्थिता मूर्तिमतीव लक्ष्मीः ॥ ९

अस्यास्तु पार्श्वे कनकोपमत्वग्
एषा स्थिता मूर्तिमतीव गौरी ।
सत्ये स्थितैषा भगिनी द्विजाग्र्याश्
चक्रायुधस्याप्रतिमस्य तस्य ॥ १०

इयं च जाम्बूनदशुद्धगौरी
पार्थस्य भार्या भुजगेन्द्रकन्या ।
चित्राङ्गदा चैव नरेन्द्रकन्या
यैषा सवर्णाऽऽर्द्रमधूकपुष्पैः ॥ ११

इयं स्वसा राजचमूपतेस्तु
प्रबुद्धनीलोत्पलदामवर्णा ।
पस्पर्ध कृष्णेन नृपस्सदा यो
वृकोदरस्यैष परिग्रहोऽग्र्यः ॥ १२

इयं च राज्ञो मगधाधिपस्य
सुता जरासन्ध इति श्रुतस्य ।
यवीयसो माद्रवतीसुतस्य
भार्या मता चम्पकदामगौरी ॥ १३

इन्दीवरश्यामतनुस्थिता तु
यैषा पराऽऽसन्नतरोर्लतेव ।
भार्या मता माद्रवतीसुतस्य
याऽसौ विशुद्धाम्बुजपत्रनेत्रा ॥ १४

इयं तु निष्टप्तसुवर्णगौरी
राज्ञो विराटस्य सुता सपुत्रा ।
भार्याऽभिमन्योर्निहतो रणे यो
द्रोणादिभिस्तैर्विरथो रथस्थैः ॥ १५

एतास्तु सीमन्तशिरोरुहा याश्
शुक्लोत्तरीया नरराजकन्याः ।
राज्ञोऽस्य वृद्धस्य परं शताख्यास्
स्नुषा नृवीराहतपुत्रनाथाः ॥ १६

एता यथामुख्यमुदाहृता वो
ब्रह्मण्यभावाद्दजुबुद्धिसत्वात् ।
सर्वे भवन्तोऽपि तपोबलाढ्याः
क्षान्ताश्च दान्ताश्च कुलोद्गताश्च ॥ १७

वैशम्पायनः—

एवं स राजा कुरुवृद्धवर्यस्
समागतस्तैर्नरदेवपुत्रैः ।
पप्रच्छ चैनान् कुशलं तदानीं
गतेषु सर्वेष्वथ तापसेषु ॥ १८

योधेषु चाप्याश्रममण्डलं त-
न्मत्वा निविष्टेषु विमुच्य पार्थान् ।
स्त्रीबालवृद्धांश्च सुसन्निविष्टान्
यथार्हतस्तान् कुशलं ह्यपृच्छत् ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
॥ ९३ ॥ आश्रमवासपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
[ अस्मिन्नध्याये १९ श्लोकाः ]

## ॥ एकोनत्रिंशोऽध्यायः ॥

धृतराष्ट्रयुधिष्ठिराभ्यां परस्परकुशलप्रश्नादिपूर्वकं संलापः ॥ १ ॥ युधिष्ठिरेण धृतराष्ट्रं प्रति विदुरः केति प्रश्ने तत्रत्येन केनचिद्यदृच्छया धृतराष्ट्रमुपसर्पतो जनावलोकनेन प्रतिनिवर्तमानस्य च तस्य प्रदर्शनम् ॥ २ ॥ ततो युधिष्ठिरेणानुधावनेन तत्समीपगमनम् ॥ ३ ॥ ततो विदुरस्य योगात् स्वशरीरत्यागेन युधिष्ठिरशरीरे प्रवेशः ॥ ४ ॥ युधिष्ठिरेण धृतराष्ट्रादिषु तदद्भुतनिवेदनम् ॥ ५ ॥

धृतराष्ट्रः—

युधिष्ठिर महाबाहो कच्चित् तात कुशल्यसि ।
सहितो भ्रातृभिस्सर्वैः पौरजानपदैस्तथा ॥ १

ये च त्वामनुजीवन्ति कच्चित् तेऽपि निरामयाः ।
सचिवा भृत्यवर्गाश्च गुरवश्चैव ते विभो ॥ २

कच्चिद्वर्तसि पौराणीं वृत्तिं राजर्षिसेविताम् ।
कच्चिदायाननुच्छिद्य कोशस्तेऽभिप्रपूर्यते ॥ ३

अरिमध्यस्थमित्रेषु वर्तसे चानुरूपतः ।
ब्राह्मणानग्रहारैर्वा यथावदनुपश्यसि ॥ ४

कच्चित् ते परितुष्यन्ति शीलेन भरतर्षभ ।
शत्रवोऽपि कुतः पौरा भृत्या वा स्वजनोऽपि वा ॥ ५

कच्चिदर्चसि राजेन्द्र श्रद्धावान् पितृदेवताः ।

अतिथींश्चान्नपानेन कच्चिदर्चसि भारत ॥ ६

कच्चिच्च विषये विप्रास् स्वकर्मनिरतास्तव ।
[1]क्षत्रिया वैश्यवर्णा वा शूद्रा वाऽपि कुटुम्बिनः ॥ ७

कच्चित् स्त्रीबालवृद्धं ते न शोचति न याचति ।
जामयः पूजिताः कच्चित् तव गेहे च पार्थिव ॥ ८

कच्चिद्राजर्षिवंशोऽयं त्वामासाद्य नराधिप ।
यथोचितं महाराज यशसो नावसीदति ॥ ९

वैशम्पायनः—

इत्येवंवादिनं सन्तं न्यायवत् प्रत्यभाषत ।
कुशलप्रश्नसंयुक्तं कुशलो वाक्यमब्रवीत् ॥ १०

युधिष्ठिरः—

अपि ते वर्धते राजंस् तपो मन्द्रश्रमश्च ते ॥ १०॥

अपि मज्जननी चेयं शुश्रूषुर्विगतक्लमा ।
अप्यस्यास्सफलो राजन् वनवासो भविष्यति ॥ ११॥

इयं च माता ज्येष्ठा मे शीतवाताध्वकर्शिता ।
घोरेण तपसा युक्ता देवी कच्चिन्न शोचति ॥ १२॥

गतान् पुत्रान् महावीर्यान् क्षत्रधर्मपरायणान् ॥ १३
नापध्यायति वा कच्चिद् अस्मान् पापकृतस्सदा ॥ १३॥

---

1. ग—अर्धपङ्क्तिकं नास्ति

क्व चासौ विदुरो राजन् नैनं पश्यामहे वयम् ।
सञ्जयः कुशली चापि कच्चित् तपसि च स्थिरः ॥* १४॥

वैशम्पायनः—

इत्युक्तः प्रत्युवाचैनं धृतराष्ट्रो जनाधिपः ॥ १५

धृतराष्ट्रः—

कुशली विदुरः पुत्र तपो घोरं समास्थितः ॥ १५॥
वायुभक्षो निराहारः कृशो धमनिसन्ततः ॥ १६
कदाचिद्दृश्यते विप्रैश् शून्येऽस्मिन् कानने क्वचित् ॥ १६॥

वैशम्पायनः—

इत्येवं वदतस्तस्य [1]जटादिग्धमुखः कृशः ।
दिग्वासा मलदिग्धाङ्गो वनरेणुसमुक्षितः ॥ १७॥
दूरादालक्षितः क्षत्ता तत्राख्यातो महीपते ।
[2]विदुरस्त्वेष धर्मात्मा जनं दृष्ट्वा निवर्तते ॥ १८॥
निवर्तमानं सहसा जनं दृष्ट्वाऽऽश्रमं प्रति ।
तमन्वधावन्नृपतिर् एक एव युधिष्ठिरः ॥ १९॥
प्रविशन्तं वनं घोरं लक्ष्यालक्ष्यं क्वचित् क्वचित् ॥ २०
भो भो विदुर राजाऽहं दयितस्ते युधिष्ठिरः ।

---

* क-ग—अत्रैवाध्यायसमाप्तिर्दृश्यते ।
1. क-ग—जटीदग्धमुखः कृशः । ख—जटीमुण्डामुखाकृतिः ।
2. अ-क-ख—इदमर्धं नास्ति

इति ब्रुवन् नरपतिर् यत्नात् तमनुजग्मिवान् ॥ २१
ततो विविक्त एकान्ते तस्थौ बुद्धिमतां वरः ।
विदुरो वृक्षमाश्रित्य कञ्चित् तस्मिन् वनान्तरे ॥ २२
तं राजा क्षीणभूयिष्ठम् आकृतीमात्रसूचितम् ।
अभिजज्ञे महाबुद्धिं महाबुद्धिर्युधिष्ठिरः ॥ २३
युधिष्ठिरोऽहमस्मीति वाक्यमुक्त्वाऽग्रतस्थितः ।
विदुरस्याश्रमे राजा स च प्रत्याह संज्ञया ॥ २४
ततस्सोऽनिमिषो भूत्वा राजानं समुदैक्षत ।
संयोज्य विदुरस्तस्मिन् दृष्ट्या दृष्टिं समाहितः ॥ २५
विवेश विदुरो धीमान् गात्रैर्गात्राणि चैव हि ।
प्राणान् प्राणेषु च दधद् इन्द्रियाणीन्द्रियेषु च ॥ २६
स योगबलमास्थाय विवेश नृपतेस्तनुम् ।
विदुरो धर्मराजस्य तेजसा प्रज्वलन्निव ॥ २७
विदुरस्य शरीरं तु तथैव स्तब्धलोचनम् ।
वृक्षाश्रितं तदा राजा ददर्श गतचेतनम् ॥ २८
बलस्थमपि चात्मानं मेने बहुगुणं तदा ।
धर्मराजो महाराजस् तं च सस्मार पाण्डवः ॥ २९
पौराणमात्मनस्सर्वं भविष्यं च नराधिप ।
योगधर्मं महातेजा व्यासेन कथितं तथा ॥ ३०

धर्मराजस्तु तत्रैनं सञ्चस्कारयिषुस्तदा ।
दग्धुकामोऽभवद्विद्वान् अथाकाशे वचोऽब्रवीत् ॥ ३१

वाक्--

भो भो राजन् न दग्धव्यम् एतद्विदुरसंज्ञकम् ।
कलेवरमिहैतत् ते नैष धर्मस्सनातनः ॥ ३२

लोकवैलक्षणो नाम भविष्यत्यस्य पार्थिव ।
[1]यतिधर्ममवाप्तोऽसौ न शोच्यो भरतर्षभ ॥ ३३

वैशम्पायनः—

इत्युक्तो धर्मराजस्तु विनिधृत्य महामनाः ।
राज्ञो वैचित्रवीर्यस्य तत् सर्वं प्रत्यवेदयत् ॥ ३४

ततस्स राजा धृतिमान् स च सर्वो जनस्तदा ।
भीमसेनादयश्चैव परं विस्मयमागताः ॥ ३५

तच्छ्रुत्वा प्रीतिमान् राजन् भूत्वा धर्मजमब्रवीत् । ३५॥

धृतराष्ट्रः—

आपो मूलं फलं चैव ममैव प्रतिगृह्यताम् ।
यदन्नो हि नरो राजंस् तदन्नोऽस्यातिथिर्मतः ॥ ३६॥

वैशम्पायनः—

इत्युक्तस्स तथेत्येव प्राह धर्मात्मजो नृपम् ।
फलमूलं च बुभुजे राज्ञा दत्तं सहानुजः ॥ ३७॥

---

1. ख—अर्धचतुष्टयं नास्ति

ततस्ते वृक्षमूलेषु कृतवासपरिग्रहाः ।
तां रात्रिं न्यवसन् सर्वे फलमूलकृतव्रताः ॥ ३८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि एकोनत्रिंशोऽध्यायः॥ २९ ॥
॥ ९३ ॥ आश्रमवासपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥
[ अस्मिन्नध्याये ३८॥ श्लोकाः ]

## ॥ त्रिंशोऽध्यायः ॥

युधिष्ठिरेण धृतराष्ट्राभ्यनुज्ञया भ्रात्रादिभिस्सह महर्षीणामाश्रमदर्शनम् ॥ १ ॥ शतयूपादिभिः सशिष्येण व्यासेन च युधिष्ठिरादिभिः परिवृतस्य धृतराष्ट्रस्याश्रमं प्रत्यागमनम् ॥ २ ॥

वैशम्पायनः—

एवं सा रजनी तेषाम् आश्रमे पुण्यकर्मणाम् ।
शिवा नक्षत्रविद्योता व्यतियाता कुरूद्वह ॥ १

तत्र तत्र कथाश्चासंस् तेषां धर्मार्थलक्षणाः ।
विचित्रपदसञ्चारा नानाश्रुतिभिरन्विताः ॥ २

पाण्डवास्त्वभितो मातुर् धरण्यां सुषुपुस्तदा ।
उत्सृज्य सुमहार्हाणि शयनानि नराधिप ॥ ३

यदाहारोऽभवद्राजा धृतराष्ट्रो महामनाः ।
तदाहारा नृवीरास्ते न्यवसंस्तां निशां तदा ॥ ४

व्यतीतायां तु शर्वर्यां कृतपौर्वाह्णिकक्रियः ।
भ्रातृभिस्सह कौन्तेयो ददर्शाश्रममण्डलम् ॥ ५

सान्तःपुरपरीवारस् सभृत्यस्सपुरस्सरः ।
यथासुखं यथोद्देशं धृतराष्ट्राभ्यनुज्ञया ॥ ६

ददर्श तत्र वेदीस्स सम्प्रज्वलितपावकाः ।
कृताभिषेकैर्मुनिभिर् हुताग्निभिरुपस्थिताः ॥ ७

वानेयपुष्पनिकरैर् आज्यधूमोत्करैरपि ।
ब्राह्मेण वपुषा युक्ता युक्ता मुनिजनस्य ताः ॥ ८

मृगयूथैरनुद्विग्नैस् तत्र तत्र समाश्रितैः ।
अशङ्कितैः पक्षिगणैः प्रगीतैरिव च प्रभो ॥ ९

केकाभिर्नीलकण्ठानां दात्यूहानां च कूजितैः ।
कोकिलानां चित्रवैश् शुभैश्श्रुतिमनोहरैः ॥ १०

प्राधीतद्विजघोषैश्च क्वचित् क्वचिदलङ्कृतम् ।
फलमूलसमुद्वाहैर् महद्भिश्चोपशोभितम् ॥ ११

ततस्स राजा प्रददौ तापसार्थमुदाहृतान् ।
कलशान् काञ्चनान् राजंस् तथैवौदुम्बराण्यपि ॥ १२

अजिनानि प्रवेणीश्च स्रुक्स्रुवं च महीपतिः ।
कमण्डलूंस्तथा स्थालीं पिठराणि च भारत ॥ १३

भाजनानि च लौहानि पात्रीश्च विविधास्तथा ।

यद्यदिच्छति यावच्च यदन्यदपि काङ्क्षितम् ॥ १४

[1]एवं स राजा धर्मात्मा परीत्याश्रममण्डलम् ।
वसु विश्राण्य तत् सर्वं पुनरायान्महीपतिः ॥ १५

कृताह्निकं च राजानं धृतराष्ट्रं महीपतिम् ।
ददर्शासीनमव्यग्रं गान्धारीसहितं तदा ॥ १६

मातरं चाविदूरस्थां शिष्यवत् प्रणतां स्थिताम् ।
कुन्तीं ददर्श धर्मात्मा सततं धर्मचारिणीम् ॥ १७

स तमभ्यर्च्य राजानं नाम संश्राव्य चात्मनः ।
निषीदेत्यभ्यनुज्ञातो वृस्यामुपविवेश ह ॥ १८

भीमसेनादयश्चैव पाण्डवा कौरवर्षभ ।
अभिवाद्योपसङ्गृह्य निषेदुः पार्थिवाज्ञया ॥ १९

स तैः परिवृतो राजा शुशुभेऽतीव कौरवः ।
बिभ्रद्ब्राह्मीं श्रियं दीप्तां देवैरिव बृहस्पतिः ॥ २०

तेषु तत्रोपविष्टेषु समाजग्मुर्महर्षयः ।
शतयूपप्रभृतयः कुरुक्षेत्रनिवासिनः ॥ २१

व्यासश्च भगवान् विप्रो देवर्षिगणपूजितः ।
वृतश्शिष्यैर्महाराज दर्शयामास तं नृपम् ॥ २२

1. ग—एवं स राजा धर्मात्मा सततं धर्मचारिणीम् ।
इति विद्यते । मध्ये अर्धपञ्चकं नास्ति ।

ततस्स राजा कौरव्यः कुन्तीपुत्रश्च धर्मराट् ।
भीमसेनादयश्चैव समुत्थायाभ्यपूजयन् ॥ २३

समागतस्ततो व्यासश् शतयूपादिभिस्तदा ।
धृतराष्ट्रं महीपालम् आस्यतामित्यभाषत ॥ २४

नवं तु विष्टरं कौशं कृष्णाजिनकुशोत्तरम् ।
प्रतिपेदे तदा व्यासस् तदर्थमुपकल्पितम् ॥ २५

ते च सर्वे द्विजश्रेष्ठा विष्टरेषु समन्ततः ।
द्वैपायनाभ्यनुज्ञाता निषेदुर्विपुलौजसः ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

॥ ५३ ॥ आश्रमवासपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥

[ अस्मिन्नध्याये २६ श्लोकाः ]

---

## ॥ एकत्रिंशोऽध्यायः ॥

---

व्यासेन धृतराष्ट्रं प्रति कुशलादिप्रश्नपूर्वकं विदुरस्य वास्तवस्वरूपादिप्रतिपादनम् ॥ १ ॥ तथा इतरमहर्षिदुष्कर धृतराष्ट्राभीष्टाश्चर्यकर्मकरणप्रतिज्ञानम् ॥ २ ॥

---

वैशम्पायनः—

तथा समुपविष्टेषु पाण्डवेषु महात्मसु ।
व्यासस्सत्यवतीपुत्रः प्रोवाचामन्त्र्य पार्थिवम् ॥ १

व्यासः—

धृतराष्ट्र महाबाहो कच्चित् ते वर्धते तपः ।
कच्चिन्मनस्ते प्रीणाति वनवासे नराधिप ॥ २

कच्चिद्धृदि न ते शोको राजन् पुत्रविनाशजः ।
कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि तवानघ ॥ ३

कच्चिद्बुद्धिं दृढां कृत्वा चरस्यारण्यकं विधिम् ।
कच्चिद्वधूश्च गान्धारी न शोकेनाभिभूयते ॥ ४

महाप्राज्ञी बुद्धिमती देवी धर्मार्थदर्शिनी ।
आगमापायतत्त्वज्ञा कच्चिदेषा न शोचति ॥ ५

कच्चित् कुन्ती महाभागा शुश्रूषुरनहङ्कृता ।
या परित्यज्य राज्यं स्वं गुरुशुश्रूषणे रता ॥ ६

कच्चिद्धर्मसुतो राजा त्वया प्रीत्याऽभिनन्दितः ।
भीमार्जुनयमाश्चैव कच्चिदेतेऽपि सान्त्विताः ॥ ७

कच्चिन्नन्दसि दृष्ट्वैतान् कच्चित् ते निर्मलं मनः ।
कच्चिद्विशुद्धभावोऽसि जातज्ञानो नराधिप ॥ ८

एतद्धि त्रितयं श्रेष्ठं सर्वभूतेषु भारत ।
[1]निर्वैरता महाराज सत्यमद्रोह एव च ॥ ९

कच्चित् ते नानुतापोऽस्ति वनवासेन भारत ।

1. ख—अर्धचतुष्टयं नास्ति

स्वदते वन्यमन्नं वा मुनिवासांसि वा विभो ॥ १०

विदितं चापि मे राजन् विदुरस्य महात्मनः ।
गमनं विधिना येन धर्मस्य सुमहात्मनः ॥ ११

माण्डव्यशापाद्धि स वै धर्मो विदुरतां गतः ।
महाबुद्धिर्महायोगी महात्मा स महामनाः ॥ १२

बृहस्पतिर्वा देवेषु शुक्रो वाऽप्यसुरेषु यः ।
न तथा बुद्धिसम्पन्नो यथा स पुरुषर्षभः ॥ १३

तपोबलव्ययं कृत्वा सुमहच्चिरसम्भृतम् ।
माण्डव्येनर्षिणा धर्मो ह्यभिभूतस्सनातनः ॥ १४

नियोगाद्ब्रह्मणः पूर्वं मया स्वेन बलेन च ।
वैचित्रवीर्यके क्षेत्रे जातस्स सुमहामतिः ॥ १५

भ्राता तव महात्मा च देवदेवस्सनातनः ।
[1]धारणाच्छ्रेयसो ध्यानाद् यं धर्मं कवयो विदुः ॥ १६

सत्येन वर्धते यो हि दमेन नियमेन च ।
अहिंसया च दानेन तपसा च सनातनः ॥ १७

येन योगबलाज्ज्ञातः कुरुराजो युधिष्ठिरः ।
धर्म इत्येव नृपते प्राज्ञेनामितबुद्धिना ॥ १८

यथा ह्यग्निर्यथा वायुर् यथाऽऽपः पृथिवी यथा ।

1. क—अर्धमयं नास्ति

यथाऽऽकाशं तथा धर्म इह चामुत्र च स्थितः ॥ १९

सर्वगश्चैव कौरव्य सर्वं व्याप्य चराचरम् ।
दृश्यते देवदेवस्य सिद्धैर्निर्दग्धकिल्बिषैः ॥ २०

यो हि धर्मस्य विदुरो विदुरो यस्य पाण्डवः ।
स एष राजन् वश्यस्ते पाण्डवः प्रेष्यवत् स्थितः ॥ २१

प्रविष्टस्सर्वमात्मानं भ्राता ते बुद्धिसम्मतः ।
दृष्ट्वा महात्मा कौन्तेयं महायोगबलान्वितः ॥ २२

त्वां चापि श्रेयसा योक्ष्ये नचिराद्भरतर्षभ ।
संशयच्छेदनार्थं हि प्राप्तं मां विद्धि पुत्रक ॥ २३

न कृतं यत् पुरा कैश्चित् कर्म लोके मनीषिभिः ।
आश्चर्यभूतं तपसः फलं सन्दर्शयामि वः ॥ २४

किमिच्छसि महीपाल मत्तः प्राप्तुममानुषम् ।
द्रष्टुं स्प्रष्टुमथ श्रोतुं वद कर्तास्मि तं नृप ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥

॥ ९३ ॥ आश्रमवासपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥

[ अस्मिन्नध्याये २५ श्लोकाः ]

[ आश्रमवासिकपर्व समाप्तम् ]

## ॥ द्वात्रिंशोऽध्यायः ॥

[ पुत्रदर्शनपर्व ]

धृतराष्ट्राश्रमे भ्रात्रादिभिः सैन्येन च सह मासमेकं निवसति युधिष्ठिरे कदाचन व्यासधृतराष्ट्रौ परिवार्य नारदादिभिर्गान्धार्यादिभिः पाण्डवैश्च समुपवेशनम् ॥ १ ॥ व्यासेन धृतराष्ट्राय स्वतपोबलेनाभीष्टसम्पादनशंसनम् ॥ २ ॥ धृतराष्ट्रेण व्यासाय स्वस्य बन्धुजनमरणजनितदुःखनिवेदनम् ॥ ३ ॥

जनमेजयः—

वनवासं गते विप्र धृतराष्ट्रे महीपतौ ।
सभार्ये नृपशार्दूले वध्वा कुन्त्या समन्विते ॥ १

विदुरे चापि धर्मज्ञे धर्मराजं व्यपाश्रिते ।
वसत्सु पाण्डुपुत्रेषु सर्वेष्वाश्रममण्डले ॥ २

यत् तदाश्चर्यमिति वै करिष्यामीत्युवाच ह ।
व्यासः परमतेजस्वी महर्षिस्तद्वदस्व मे ॥ ३

वनवासे च कौरव्यः कियन्तं कालमच्युतः ।
युधिष्ठिरो नरपतिर् न्यवसत् सजनो द्विज ॥ ४

किमाहाराश्च ते तत्र ससैन्या न्यवसन् प्रभो ।
सान्तःपुरा महात्मान एतदिच्छामि वेदितुम् ॥ ५

वैशम्पायनः—

वनवासगतं राजन् धृतराष्ट्रं महीपतिम् ।

युधिष्ठिरोऽभ्ययाद्द्रष्टुं ससैन्यो भ्रातृभिस्सह ॥ ६
प्रथमे दिवसे चैषाम् आपो मूलं फलं तथा ।
भोजनं भूमिशय्या च तत्रासीद्भरतर्षभ ॥ ७
तेऽनुज्ञातास्ततो राजन् कुरुराजेन पाण्डवाः ।
विविधान्यन्नपानानि शय्याश्चान्वभवन् वने ॥ ८
मासमेकं विजह्रुस्ते ससैन्यान्तःपुरा वने ।
अथ तत्रागमद्व्यासो यथोक्तं ते मयाऽनघ ॥ ९
तथा तु तेषां सर्वेषां कथाभिर्नृपसन्निधौ ।
व्यासमन्वासतां राजन्नाजग्मुर्मुनयोऽपरे ॥ १०
नारदः पर्वतश्चैव देवलश्च महातपाः ।
विश्वावसुस्तुम्बुरुश्च चित्रसेनश्च भारत ॥ ११
तेषामपि यथान्यायं पूजां चक्रे महामनाः ।
धृतराष्ट्राभ्यनुज्ञातः कुरुराजो युधिष्ठिरः ॥ १२
निषेदुस्ते ततस्सर्वे पूजां तां प्राप्य भारत ।
आसनेष्वथ पुण्येषु बर्हिष्केषु शुभेषु च ॥ १३
तेषु तत्रोपविष्टेषु स नृपस्सुमहातपाः ।
पाण्डुपुत्रैः परिवृतो निषसाद कुरूद्वहः ॥ १४
गान्धारी चाथ कुन्ती च द्रौपदी सात्वती तथा ।
स्त्रियस्सर्वास्तथाऽन्यान्यास् सहोपविविशुस्तदा ॥ १५

तेषां तत्र कथा दिव्या धर्मिष्ठाश्चाभवन् नृप ।
राजर्षीणां पुराणानां देवासुरविमिश्रिताः ॥ १६

ततः कथान्ते व्यासस्तं प्रज्ञाचक्षुषमीश्वरम् ।
प्रोवाच वदतां श्रेष्ठः पुनरेव स तद्वचः ॥ १७

प्रीयमाणो महातेजास् सर्ववेदविदां वरः ॥ १७॥

व्यासः—

विदितं मम राजेन्द्र यत् ते हृदि विवक्षितम् ।
दह्यमानस्य शोकेन पुत्रपौत्रकृतेन वै ॥ १८॥

गान्धार्याश्चैव यद्दुःखं हृदि तिष्ठति पार्थिव ।
कुन्त्याश्चैव कुरुश्रेष्ठ द्रौपद्याश्च हृदि स्थितम् ॥ १९॥

[1]यच्च धारयते दुःखं तीव्रं पुत्रविनाशजम् ।
सुभद्रा कृष्णभगिनी तच्चापि विदितं मम ॥ २०॥

श्रुत्वा समागममिमं सर्वेषां वस्ततो नृप ।
संशयच्छेदनार्थाय प्राप्तः कौरवनन्दन ॥ २१॥

इमे च देवगन्धर्वास् सर्वे चैव महर्षयः ।
पश्यन्तु तपसो वीर्यम् अद्य मे चिरसम्भृतम् ॥ २२॥

तदुच्यतां महाबाहो कं कामं प्रदिशामि ते ।
प्रवणोऽस्मि वरं दातुं पश्य मे तपसो बलम् ॥ २३॥

1. अ—अर्धषट्कं नास्ति

वैशम्पायनः—
एवमुक्तस्य राजेन्द्रो व्यासेनामितबुद्धिना ।
मुहूर्तमिव निश्चित्य वचनायोपचक्रमे ॥ २४॥

धृतराष्ट्रः—
धन्योऽस्म्यनुगृहीतोऽस्मि सफलं जीवितं च मे ।
यन्मे समागमोऽद्येह भवद्भिस्सह साधुभिः ॥ २५॥
अद्य चाप्यवगच्छामि गतिमिष्टां महात्मनः ।
भवद्भिर्ब्रह्मकल्पैर्यत् समेतोऽहं तपोधनाः ॥ २६॥
दर्शनादेव भवतां पूतोऽहं नात्र संशयः ।
विद्यते न भयं चापि परलोके ममानघाः ॥ २७॥
किं तु तस्य सुदुर्बुद्धेर् मन्दस्यापनयैर्भृशम् ।
दूयते मे मनो नित्यं शोचतः पुत्रगर्धिनः ॥ २८॥
अपापाः पाण्डवा येन निरस्ताः पापबुद्धिना ।
घातिता पृथिवी चेयं सहया सरथद्विपा ॥ २९॥
राजानश्च महात्मानो नानाजनपदेश्वराः ।
आगम्य मम पुत्रार्थे ते च मृत्युवशं गताः ॥ ३०॥
ये ते पुत्रांश्च दारांश्च प्राणांश्च मनसः प्रियान् ।
[1]परित्यज्य गताश्शूराः प्रेतराजनिवेशनम् ॥ ३१॥
[2]का नु तेषां गतिर्ब्रह्मन् मित्रार्थे ये हता मृधे ।

1. क—भोगांश्च विविधांस्तात दृष्टापूर्तांस्तथैव च । [अधिकःपाठः]
2. क-ख—अर्धाष्टकं नास्ति

तथैव पुत्रपौत्राणां मम ये निहता युधि ॥ ३२॥
[1]दूयते मे मनोऽतीव घातयित्वा महाबलम् ।
भीष्मं शान्तनवं वृद्धं द्रोणं च द्विजसत्तमम् ॥ ३३॥
मम पुत्रेण मूढेन पापेन च सुहृद्द्विषा ।
क्षयं नीतं कुलं दीप्तं पृथिवीराज्यमिच्छता ॥ ३४॥
एते मदर्थे पुत्रांश्च दारांश्च मनसः प्रियान् ।
भोगांश्च विविधांस्तात इष्टापूर्तांस्तथैव च ॥ ३५॥
परित्यज्य गताश्शूराः प्रेतराजनिवेशनम् ॥ ३६
एतत् सर्वमनुस्मृत्य दह्यमानो दिवानिशम् ।
न शान्तिमुपगच्छामि पुत्रशोकसमाहतः ॥ ३७
इति मे चिन्तयानस्य पितश्शर्म न विद्यते ॥ ३७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
॥ ९४ ॥ पुत्रदर्शनपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[ अस्मिन्नध्याये ३७॥ श्लोकाः ]

## ॥ त्रयस्त्रिंशोऽध्यायः ॥

तत्र गान्धार्या व्यासं प्रति धृतराष्ट्रस्य पुत्रदिदृक्षानिवेदने व्यासेन कुन्तीं प्रति तदभीष्टनिवेदनचोदना ॥ १ ॥

वैशम्पायनः—
तच्छ्रुत्वा वदतस्तस्य राजर्षेः परिदेवितम् ।
पुनर्नवीकृतश्शोको गान्धार्याः पुरुषर्षभ ॥ १

1. ब—इदमर्धं नास्ति

कुन्त्या द्रुपदकन्यायास् सुभद्रायाश्च पार्थिव ।
तासां च वरनारीणां वधूनां कौरवस्य ह ॥ २

पुत्रशोकसमाविष्टा गान्धारी त्वब्रवीदिदम् ।
श्वशुरं बद्धनयना देवी प्राञ्जलिरुत्थिता ॥ ३

गान्धारी—

लोकान्तरगतान् पुत्रान् अयं काङ्क्षति मानद ।
तच्चास्य मानसं ज्ञातं भगवंस्तपसा त्वया ॥ ४

षोडशेमानि वर्षाणि गतानि मुनिपुङ्गव ।
तस्य राज्ञो हतान् पुत्राञ् शोचतो मम चापि भो ॥ ५

पुत्रशोकसमाविष्टो निश्श्वसन् ह्येष भूमिपः ।
न शेते वसतीस्सर्वा धृताराष्ट्रो महामुने ॥ ६

लोकानन्यान् समर्थोऽसि स्रष्टुं सर्वांस्तपोबलात् ।
किमु लोकान्तरगतान् राज्ञो दर्शयितुं सुतान् ॥ ७

इयं च द्रौपदी कृष्णा हतज्ञातिसुता तदा ।
शोचत्यतीव साध्वी ते स्नुषया दयिता स्नुषा ॥ ८

तथा कृष्णस्य भगिनी सुभद्रा भद्रभाषिणी ।
सौभद्रवधसन्तप्ता भृशं तप्यति भामिनी ॥ ९

इयं च भूरिश्रवसो भार्या परमदुःखिता ।
भर्तृव्यसनशोकार्ता न शेते वसतीः प्रभो ॥ १०

यस्यास्तु श्वशुरो धीमान् बाह्लिकस्स कुरूद्वहः ।
निहतस्सोमदत्तश्च पित्रा सह महारणे ॥ ११

श्रीमच्चास्य महाबुद्धेस् सङ्ग्रामेष्वपलायि तत् ।
पुत्रस्य ते पुत्रशतं निहतं यद्रणाजिरे ॥ १२

तस्य भार्याशतमिदं दुःखशोकसमाहतम् ।
पुनः पुनर्वर्धयते शोकं राज्ञो ममैव च ॥ १३

महता शोकभारेण मामुपास्ते महामुने ॥ १३॥

[1]ये च शूरा महात्मानश् श्वशुरा मे महारथाः ।
सोमदत्तप्रभृतयः का नु तेषां गतिः प्रभो ॥ १४॥

तव प्रसादाद्भगवन् विशोकोऽयं महीपतिः ।
कुर्यात् कालमहं चेयं वधूस्तव महामुने ॥ १५॥

वैशम्पायनः—

इत्युक्तवत्यां गान्धार्यां कुन्ती व्रतकृशानना ।
प्रच्छन्नजातं पुत्रं तं सस्मारादित्यसन्निभम् ॥ १६॥

तामृषिर्वरदो व्यासो दूरश्रवणदर्शनः ।
अपश्यद्दुःखितां देवीं मातरं सव्यसाचिनः ॥ १७॥

तामुवाच ततो व्यासो यत् ते कार्यं विवक्षितम् ।
तद्ब्रूहि त्वं महाप्राज्ञे यत् ते मनसि वर्तते ॥ १८॥

---

1. ग—अर्धचतुष्टयं नास्ति

ततः कुन्ती श्वशुरयोः प्रणम्य शिरसा तदा ।
उवाच वाक्यं सव्रीडा विवृण्वाना पुरा कृतम् ॥ १९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ ९४ ॥ पुत्रदर्शनपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[ अस्मिन्नध्याये १९॥ श्लोकाः ]

## ॥ चतुस्त्रिंशोऽध्यायः ॥

कुन्त्या व्यासं प्रति स्वस्मिन् दुर्वासःप्रसादेन सूर्यात् कर्णस्योत्पत्ति-कथनपूर्वकं स्वस्य तद्दिदृक्षानिवेदनम् ॥ १ ॥ व्यासेन कुन्तीं प्रति हेतूपन्यासेन तत्प्रयुक्तदोषशङ्कानिरसनम् ॥ २ ॥

कुन्ती—

भगवञ्श्वशुरो मेऽसि दैवतस्यापि दैवतम् ।
त्वं मे देवातिदेवस्त्वं शृणु सत्यां गिरं मम ॥ १

तपस्वी कोपनो विप्रो दुर्वासा नाम मे पितुः ।
भिक्षामुपगतो भोक्तुम् अहं तं पर्यतोषयम् ॥ २

शौचेन स्वागतेनैव शुद्धेन मनसा तथा ।
कोपस्थानेष्वपि महत्स्वकुप्यन्त्या कदाचन ॥ ३

स मे वरमदात् प्रीतः कृतकृत्याऽहमब्रुवम् ।
अवश्यं ते ग्रहीतव्यम् इति मां सोऽब्रवीद्वचः ॥ ४

ततश्शापभयाद्विप्रम् अवोचं पुनरेव तम् ।
एवमस्त्विति स प्राह पुनरेव च मां द्विजः ॥ ५

दुर्वासाः—

धर्मस्य जननी भद्रे भवित्री त्वं शुभानने ।
वशे स्थास्यन्ति देवास्ते यांस्त्वमावाहयिष्यसि ॥ ६

कुन्ती—

इत्युक्त्वाऽन्तर्हितो विप्रस् ततोऽहं विस्मिताऽभवम् ।
न च सर्वास्ववस्थासु स्मृतिर्मे विप्रणश्यति ॥ ७

अथ हर्म्यतलस्थाऽहं रविमुद्यन्तमीक्षती ।
संस्मृत्य तद्दर्षेर्वाक्यं स्पृहयन्ती दिवाकरम् ॥ ८

स्थिताऽहं बालभावेन तत्र दोषमबुद्ध्यती ॥ ८॥
अथ देवस्सहस्रांशुर् मत्समीपगतोऽभवत् ।
द्विधा कृत्वाऽऽत्मनो देहं भूमौ च गगनेऽपि च ॥ ९॥
तताप लोकानेकेन द्वितीयेनागमच्च माम् ॥ १०

स मामुवाच वेपन्तीं वरं मत्तो वृणीष्व वै ।
गम्यतामिति तं चाहं प्रणम्य शिरसाऽवदम् ॥ ११

स मामुवाच तिग्मांशुर् वृथाऽऽह्वानं न मे क्षमम् ।
धक्ष्यामि त्वां च विप्रं च येन दत्तो वरस्तव ॥ १२

तमहं रक्षती विप्रं शापादनपराधिनम् ॥

पुत्रो मे त्वत्समो देव भवेदिति ततोऽब्रवम् ॥ १३

ततो मां तेजसाऽऽविश्य मोहयित्वा च भानुमान् ।
उवाच भविता पुत्रस् तवेत्यभ्यगमद्दिवम् ॥ १४

ततोऽहमन्तर्भवने पितुश्चित्तानुरक्षिणी ।
गूढोत्पन्नं सुतं बालं जले कर्णमवासृजम् ॥ १५

[1]नूनं तस्यैव देवस्य प्रसादात् पुनरेव तु ।
कन्याऽहमभवं विप्र यथा प्राह स मामृषिः ॥ १६

स मया मूढया पुत्रो ज्ञायमानोऽप्युपेक्षितः ।
तन्मां दहति विप्रर्षे तत् सर्वं विदितं त्वया ॥ १७

यदि पापमपापं वा तवैतद्विधृतं मया ।
तन्मे दहन्तं भगवन्नपनेतुमिहार्हसि ॥ १८

यच्चास्य राज्ञो विज्ञातं हृदिस्थं भगवंस्त्वया ।
तं चायं लभतां कामम् अद्यैव मुनिसत्तम ॥ १९

वैशम्पायनः—

इत्युक्तः प्रत्युवाचैनां व्यासो वेदविदां वरः ॥ १९॥

व्यासः—

साधु सर्वमिदं तथ्यम् एवमेतद्यथाऽऽत्थ माम् ॥ २०

अपराधश्च ते नास्ति कन्याभावगता ह्यसि ।

---

1. ख—अर्धचतुष्टयं नास्ति

देवा आश्चर्यवन्तो हि शरीराण्याविशन्ति वै ॥ २१

सन्ति देवनिकायाश्च सङ्कल्पाज्जनयन्ति ये ।
वाचा दृष्ट्या तथा स्पर्शात् सङ्घर्षेणेति पञ्चधा ॥ २२

मनुष्यधर्मो दैवेन धर्मेण न हि युज्यते ।
इति कुन्ति विजानीहि व्येतु ते मानसो ज्वरः ॥ २३

[1]सर्वं बलवतां पथ्यं सर्वं बलवतां शुचि ।
सर्वं बलवतां धर्म्यं सर्वं बलवतां स्वकम् ॥ २४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
॥ ९४ ॥ पुत्रदर्शनपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[ अस्मिन्नध्याये २४ श्लोकाः ]

## ॥ पञ्चत्रिंशोऽध्यायः ॥

व्यासेन गान्धारीं प्रति समरहतानां दुर्योधनादीनां सर्वेषां रात्रौ प्रदर्शनप्रतिज्ञानपूर्वकं धृतराष्ट्रादीनां विशिष्य गन्धर्वाद्यंशत्वकथनम् ॥ १ ॥ धृतराष्ट्रादिभिर्व्यासवचनाद्गङ्गातीरमेत्य बन्धुदर्शनौत्कण्ठ्येन कृष्णाद-इर्यापनम् ॥ २ ॥

व्यासः—

भद्रे द्रक्ष्यसि गान्धारि पुत्रान् भ्रातॄन् सुहृद्गणान् ।
वधूश्च पतिभिस्सार्धं निशि सुप्तोत्थितानिव ॥ १

1. ग—इदमर्धं नास्ति

कर्णं द्रक्ष्यति कुन्ती च सौभद्रं चापि यादवी ॥
द्रौपदी पञ्च पुत्रांश्च पितॄन् भ्रातॄंस्तथैव च ॥ २
पूर्वमेवैष हृदये व्यवसायोऽभवन्मम ।
अथास्मि चोदितो राज्ञा भवत्या पृथयैव च ॥ ३
न ते शोच्या महात्मानस् सर्व एव नरर्षभाः ।
क्षत्रधर्मरतास्सन्तस् तथा हि निधनं गताः ॥ ४
भवितव्यमवश्यं तत् सुरकार्यमनिन्दिते ।
अवतेरुस्ततस्सर्वे देवा भागैर्महीतलम् ॥ ५
गन्धर्वाप्सरसश्चैव सिद्धा देवर्षयोऽपि च ।
ततो देवगणाश्चैव पिशाचा गुह्यकास्तथा ॥ ६
दैत्याश्च दानवाश्चैव तथा ब्रह्मर्षयोऽमलाः ।
त एव निधनं प्राप्ताः कुरुक्षेत्रे रणाजिरे ॥ ७
गन्धर्वराजो यो धीमान् धृतराष्ट्र इति श्रुतः ।
स एव मानुषे लोके धृतराष्ट्रः पतिस्तव ॥ ८
पाण्डुं मरुद्गणं विद्धि विशिष्टतममच्युतम् ।
धर्मस्यांशोऽभवत् क्षत्ता राजा चायं युधिष्ठिरः ॥ ९
कलिं दुर्योधनं विद्धि शकुनिं द्वापरं नृपम् ।
दुश्शासनादीन् विद्धि त्वं राक्षसान् शुभदर्शने ॥ १०
मरुद्गणाद्भीमसेनं बलवन्तमरिन्दमम् ।

विद्धि च त्वं नरमृषिम् इमं पार्थं धनञ्जयम् ॥ ११
नारायणं हृषीकेशम् अश्विनौ यमजावुभौ ॥ ११॥

द्विधा कृत्वाऽऽत्मनो देहम् आदित्यं तपतां वरम् ।
लोकांश्च तापयानं वै विद्धि कर्णं पृथासुतम् ॥ १२॥

यस्य वैरार्थमुद्भूतस् सङ्क्रर्षजननस्तथा ।
तं कर्णं विद्धि कल्याणि भास्करं शुभदर्शने ॥ १३॥

यश्च पाण्डवदायादो हतष्षड्भिर्महारथैः ।
स सोम एव सौभद्रो योगादेवाभवद्द्विधा ॥ १४॥

द्रौपद्या सह सम्भूतो धृष्टद्युम्नोऽथ पावकात् ।
अग्नेर्भागश्शिखण्डी तु पौलस्त्यानां महारथः ॥ १५॥

द्रोणं बृहस्पतेर्भागं विद्धि द्रौणिं च रुद्रजम् ।
गाङ्गेयो वसुवीर्येण देवो मानुषतां गतः ॥ १६॥

एवमेते महाप्रज्ञे देवा मानुष्यमेत्य ह ।
ततः पुनर्गतास्स्वर्गं कृते कर्मणि शोभने ॥ १७॥

[1]यच्च वो हृदि सर्वेषां दुःखमेतच्चिरं स्थितम् ।
तदद्य व्यपनेष्यामि परलोककृताद्भयात् ॥ १८॥

सर्वे भवन्तो गच्छन्तु नदीं भागीरथीं प्रति ।
तत्र द्रक्ष्यथ सर्वांस्तान् ये हतास्तत्र संयुगे ॥ १९॥

1. ब—हृदमध नास्ति

वैशम्पायनः—

इति व्यासस्य वचनं सर्वे श्रुत्वा जनास्तदा ।
महता सिंहनादेन गङ्गामभिमुखा ययुः ॥ २०॥

धृतराष्ट्रश्च सामात्यः प्रययौ सह पाण्डवैः ।
सहितो मुनिशार्दूलैर् गन्धर्वैश्च समागतैः ॥ २१॥

ततो गङ्गां समासाद्य क्रमेण स जनार्णवः ।
निवासमकरोत् सर्वो यथाप्रीति यथावयः ॥ २२॥

राजा च पाण्डवैस्सार्धम् इष्टे देशे सहानुगः ।
निवेशमकरोद्धीमान् सस्त्रीवृद्धपुरस्सरः ॥ २३॥

जगाम तदहश्चापि तेषां वर्षशतं यथा ।
निशां प्रतीक्षमाणानां दिदृक्षूणां सुतान् मृतान् ॥ २४॥

ततः पुण्यं गिरिवरम् अस्तमभ्यगमद्रविः ।
[1]ततः कृताभिषेकास्ते नैशं कर्म समारभन् ॥ २५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

॥ ९४ ॥ पुत्रदर्शनपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

[ अस्मिन्नध्याये २५॥ श्लोकाः ॥

---

1. क—व्यासमभ्यागमन् सर्वे ये तत्रासन् समागताः । [अधिकः पाठः]

## ॥ षट्त्रिंशोऽध्यायः ॥

व्यासेन निशायां गङ्गाजलावगाहनेन समाह्वाने पुरा समरनिहतैः कुरुपाण्डवोभयपक्षीयैः सर्वैः स्वस्वाभरणायुधवाहनादिभिः सह सलिलादुद्गम्य तीरोत्तरणम् ॥ १ ॥ धृतराष्ट्रेण व्यासप्रसादलब्धदिव्यचक्षुषा दुर्योधनादीनां सर्वेषामवलोकनम् ॥ २ ॥

वैशम्पायनः—

ततो निशायां प्राप्तायां कृतसायाह्निकक्रियाः ।
व्यासमभ्यगमन् सर्वे ये तत्रासन् समागताः ॥ १

धृतराष्ट्रस्तु धर्मात्मा पाण्डवैस्सहितस्तदा ।
शुचिरेकमनास्सार्धम् ऋषिभिस्तैरुपाविशत् ॥ २

गान्धार्या सह नार्यस्तु सहितास्समुपाविशन् ।
[1]पौरजानपदश्चैव जनस्सर्वो यथावयः ॥ ३

ततो व्यासो महातेजाः पुण्यं भागीरथीजलम् ।
अवतीर्योजुहावाथ सर्वाँल्लोकान् महामुनिः ॥ ४

पाण्डवानां च ये योधाः कौरवाणां च सर्वशः ।
राजानश्च महाभागा नानादेशनिवासिनः ॥ ५

[2]प्रतीक्ष्य तस्थुस्ते सर्वे तेषामागमनं प्रति ॥ ५॥

ततस्तु तुमुलश्शब्दो जलान्ते जनमेजय ।

1. ग—अर्धचतुष्टयं नास्ति 2. अ-ख-ग-ङ—इदमर्धं नास्ति

प्रादुरासंश्चथायोगं कुरुपाण्डवसेनयोः ॥ ६॥

ततस्ते पार्थिवास्सर्वे भीष्मद्रोणपुरस्सराः ।
ससैन्यास्सलिलात् तस्मात् समुत्तस्थुस्सहस्रशः ॥ ७॥

विराटद्रुपदौ चोभौ सहपुत्रौ ससैनिकौ ।
सौभद्रो द्रौपदेयाश्च राक्षसश्च घटोत्कचः ॥ ८॥

कर्णदुर्योधनौ योऽसौ शकुनिश्च महारथाः ।
दुश्शासनादयश्चैव धार्तराष्ट्रा महारथाः ॥ ९॥

जारासन्धिर्भगदत्तो जलसन्धिश्च पार्थिवः ।
भूरिश्रवाश्शलश्शल्यो वृषसेनस्सहानुजः ॥ १०॥

[1]लक्ष्मणो राजपुत्रश्च धृष्टद्युम्नस्सहानुजः ।
शिखण्डिपुत्रास्सर्वे च धृष्टकेतुस्सहानुजः ॥ ११॥

अचलो राजकश्चैव राक्षसश्चाप्यलम्बुसः ।
बाह्लिकस्सोमदत्तश्च चेकितानश्च पार्थिवः ॥ १२॥

एते चान्ये च बहवो बहुत्वाद्ये न कीर्तिताः ।
सर्वे भास्वरदेहास्ते समुत्तस्थुर्जलाशयात् ॥ १३॥

यस्य वीरस्य यो वेषो यो ध्वजो यश्च वाहनः ।
यद्वर्मे यत् प्रहरणं तेन तेन स दृश्यते ॥ १४॥

दिव्याम्बरधरास्सर्वे सर्वे भ्राजिष्णुकुण्डलाः ।

1. क—अर्धमिदं नास्ति

निर्वैरा निरहङ्कारा विगतक्रोधमन्यवः ॥ १५॥

गन्धर्वैरुपगीयन्तस् स्तूयमानाश्च वन्दिभिः ।
दिव्यमाल्यस्रजोपेतास् तथा दिव्याप्सरोवृताः ॥ १६॥

धृतराष्ट्रस्य तु तदा दिव्यं चक्षुर्नराधिप ।
मुनिस्सत्यवतीपुत्रः प्रीतः प्रादात् तपोबलात् ॥ १७॥

दिव्यज्ञानबलोपेता गान्धारी च यशस्विनी ।
ददर्श सर्वान् पुत्रांस्तान् ये चान्येऽपि मृधे हताः ॥ १८॥

तदद्भुतमचिन्त्यं च सुमहद्रोमहर्षणम् । गीता -अ७
विस्मितस्स जनस्सर्वो ददर्शानिमिषेक्षणः ॥ १९॥

तदुत्सवमहोदग्रं हृष्टनारीनराकुलम् ।
ददृशे बलमायान्तं चित्रं पटगतं यथा ॥ २०॥

धृतराष्ट्रस्तु तान् सर्वान् पश्यन् दिव्येन चक्षुषा ।
मुमुदे भरतश्रेष्ठः प्रसादात् तस्य वै मुनेः ॥ २१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥

॥ ९४ ॥ पुत्रदर्शनपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

[ अस्मिन्नध्याये २१॥ श्लोकाः ]

## ॥ सप्तत्रिंशोऽध्यायः ॥

धृतराष्ट्रयुधिष्ठिरादिभिर्व्यासप्रसादोज्जीवितैर्हतपूर्वबन्धुभिः सह संलापादिना तस्यां रात्रौ सुखविहरणम् ॥ १ ॥

वैशम्पायनः—

ततस्ते भरतश्रेष्ठास् समाजग्मुः परस्परम् ।
विगतक्रोधमात्सर्यास् सर्वे विगतकल्मषाः ॥ १

विधिं परममास्थाय ब्रह्मर्षिविहितं शुभम् ।
सम्प्रीतमनसस्सर्वे देवलोक इवामराः ॥ २

पित्रा पुत्राश्च मात्रा च भार्याश्च पतिभिस्सह ।
भ्राता भ्रात्रा सखा चैव सख्या राजन् समागताः ॥ ३

पाण्डवाश्च महेष्वासाः कर्णं सौभद्रमेव च ।
सम्प्रहृष्टास्समाजग्मुर् द्रौपदेयांश्च सर्वशः ॥ ४

ततस्ते प्रीयमाणा वै कर्णेन सह पाण्डवाः ।
समेत्य पृथिवीपालास् सौहृदे च स्थिता भवन् ॥ ५

ऋषिप्रसादात् तेऽन्येच क्षत्रिया नष्टमन्यवः ।
असौहृदं परित्यज्य सौहृदे पर्यवस्थिताः ॥ ६

एवं समागतास्सर्वे गुरुभिर्ब्राह्मणैस्तथा ।
पुत्रैश्च पुरुषव्याघ्राः कुरवोऽन्ये च मानवाः ॥ ७

तां रात्रिमेकां कृत्स्नां ते विहृत्य प्रीतमानसाः ।
मेनिरे परितोषेण नृपास्स्वर्गगता यथा ॥ ८

नात्र शोको भयं त्रासो नारतिर्नायशोऽभवत् ।
परस्परं समागम्य योधानां भरतर्षभ ॥ ९

समागतास्ताः पितृभिर् भ्रातृभिः पतिभिस्सुतैः ।
मुदं परमिकां प्राप्य नार्यो दुःखान्यथात्यजन् ॥ १०

देवलोकं गता ये च ये च ब्रह्मसदो गताः ।
ये चापि वारुणं लोकं ये च गोलोकमाश्रिताः ॥ ११

तथा वैवस्वतं लोकं ये च यक्षानुपागताः ।
राक्षसांश्च पिशाचांश्च कुरूंश्चापि तथोत्तरान् ॥ १२

विचित्राश्च गतीरन्ये ये प्राप्ताः कर्मभिर्नराः ।
सर्वे ते तद्वयोरूपवेषास्तत्र समभ्ययुः ॥ १३

एकां रात्रिं विहृत्यैवं ते वीरास्ताश्च योषितः ।
आमन्त्र्यान्योन्यमाश्लिष्य ततो जग्मुर्यथागतम् ॥ १४

ततो विसर्जयामास लोकांस्तान् मुनिपुङ्गवः ।
क्षणेनान्तर्हिताश्चैव प्रेक्षतामेव तेऽभवन् ॥ १५

अवगाह्य महात्मानः पुण्यां त्रिपथगां नदीम् ।
सविमानास्सहस्त्यश्वास् स्वानि स्थानानि भेजिरे ॥ १६

देवलोकं ययुः केचित् केचिद्ब्रह्मसदस्तदा ।

केचिच्च वारुणं लोकं केचित् कौबेरमाप्नुवन् ॥ १७

तथा वैवस्वतं लोकं केचिदेव नृपा ययुः ।
राक्षसांश्च पिशाचांश्च केचिच्चाप्युत्तरान् कुरून् ॥ १८

विचित्रगतयश्चान्या या या यस्य नरस्य ह ।
ते जग्मुश्च महात्मानम् सवाहनपदानुगाः ॥ १९

गतेषु तेषु सर्वेषु सलिलस्थो महामुनिः ।
धर्मशीलो महातेजाः कुरूणां हितकृत् सदा ॥ २०
ततः प्रोवाच तास्सर्वाः क्षत्रिया निहतेश्वराः ॥ २०॥

व्यासः—

या याः पतिकृताँल्लोकान् इच्छन्ति परमस्त्रियः ।
ता जाह्नवीजलं क्षिप्रम् अवगाहन्त्वतन्द्रिताः ॥ २१॥

वैशम्पायनः—

ततस्तस्य वचश्श्रुत्वा श्रद्दधाना वराङ्गनाः ।
श्वशुरं समनुज्ञाप्य विविशुर्जाह्नवीजलम् ॥ २२॥

विमुक्ता मानुषैर्देहैस् ततस्ता भर्तृभिस्सह ।
समाजग्मुस्तथा साध्व्यस् सर्वा एव विशाम्पते ॥ २३॥

एवं क्रमेण सर्वास्ताश् शीलवत्यः कुरुस्त्रियः ।
प्रविश्य तोयं निर्मुक्ता जग्मुर्भर्तृसलोकताम् ॥ २४॥

दिव्यरूपसमायुक्ता दिव्याभरणभूषिताः ।
दिव्यमाल्याम्बरधरा यथा स्वपतयस्तथा ॥ २५॥

ताद्दशीलसत्त्वसम्पन्ना वितमस्का गतक्लमाः ।
सर्वास्सर्वगुणैर्युक्तास् स्वस्थानं प्रतिपेदिरे ॥ २६॥
यस्य यस्य च यः कामस् तस्मिन् कालेऽभवत् तदा ।
तं तं विसृष्टवान् व्यासो वरदो धर्मवत्सलः ॥ २७॥
तं दृष्ट्वा नरदेवानां पुनरागमनं नराः ।
जह्रुषुर्मुदिताश्चासन् नानादेशगता अपि ॥ २८॥
ते नष्टभयसङ्कल्पा नरा विगतकल्मषाः ।
बभूवुः पौरवास्सर्वे तं दृष्ट्वाऽऽश्चर्यमुत्तमम् ॥ २९॥
प्रियैस्समागमं तेषां इमं यश्शृणुयान्नरः ।
प्रियाणि लभते नित्यम् इह चैव परत्र च ॥ ३०॥
इष्टबान्धवसंयोगम् अनायासमनामयम् ।
य इमं श्रावयेद्विद्वान् स सिद्धिं प्राप्नुयात् पराम् ॥ ३१॥
स्वाध्याययुक्ता पुरुषाः क्रियायुक्ताश्च ये नराः ।
अध्यात्मयोगतृप्ताश्च तपस्तृप्ताश्च मानवाः ॥ ३२॥
पुनस्ते दर्शनं प्राप्ताः पुनश्च परिकीर्तिताः ।
पुनः पुनः प्रयच्छन्ति शृण्वतामभयं सदा ॥ ३३॥
श्रुत्वा पर्वस्विदं नित्यं अवाप्स्यन्ति परां गतिम् ॥ ३४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ ९३ ॥ पुत्रदर्शनपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[ अस्मिन्नध्याये ३४ श्लोकाः ]

## ॥ अष्टात्रिंशोऽध्यायः ॥

त्यक्तदेहानामपि कुरुपाण्डवपक्षीयाणां कथं पुनरागमनमिति जनमेजयप्रश्नस्य वैशम्पायनेन सोपपत्तिकमुत्तरदानम् ॥ १ ॥

सूतः—

एतच्छ्रुत्वा नृपो विद्वान् हृष्टोऽभूज्जनमेजयः ।
पितामहानां सर्वेषां गमनागमनं तदा ॥ १
अब्रवीच्च मुदा युक्तः पुनरागमनं प्रति ॥ १॥

जनमेजयः—

कथं नु त्यक्तदेहानां पुनस्तद्रूपदर्शनम् ॥ २

सूतः—

इत्युक्तस्स द्विजश्रेष्ठो व्यासशिष्यः प्रतापवान् ।
प्रोवाच वदतां श्रेष्ठस् तं नृपं जनमेजयम् ॥ ३

वैशम्पायनः—

अविप्रणाशस्सर्वेषां कर्मणामिति निश्चयः ।
कर्मजानि शरीराणि शरीराकृतयस्तथा ॥ ४
महाभूतानि नित्यानि भूताधिपतिसंश्रयात् ।
तेषां च नित्यं संवासो न विनाशो वियुज्यताम् ॥ ५
अनाशया कृतं कर्म तस्य चेष्टः फलागमः ।
आत्मा चैभिस्समायुक्तस् सुखदुःखमुपाश्नुते ॥ ६

अविनाशी तथा नित्यः क्षेत्रज्ञ इति निश्चयः ।
भूतानामात्मभावो यो ध्रुवोऽसौ संविजानताम् ॥ ७

यावन्न क्षीयते कर्म तावदस्य स्वरूपता ।
संक्षीणकर्मा पुरुषो रूपान्यत्वमुपाश्नुते ॥ ८

नानाभूतास्तथैकत्वं शरीरं प्राप्य संहताः ।
भवन्ति ते तथा नित्याः पृथग्भावं विजानताम् ॥ ९

अश्वमेधश्रुतिश्चेयम् अश्वसंज्ञपनं प्रति ।
लोकान्तरगता नित्यं प्राणा नित्या हि वाजिनः ॥ १०

अहं हितं वदाम्येतत् प्रियं च तव मानद ।
देवयाना हि पन्थानश् श्रुतास्ते यज्ञसंस्तरे ॥ ११

सुकृतो यत्र ते यज्ञस् तत्र देवा हितास्तव ॥ ११॥

यदा समन्विता देवाः पशूनां गमनेश्वराः ।
गतिमन्तश्च तेनेष्टा नान्ये नित्या भवन्ति ते ॥ १२॥

नित्येऽस्मिन् पञ्चके वर्गे नित्ये चात्मनि यो नरः ।
अस्य नाशं समायोगं यः पश्यति वृथामतिः ॥ १३॥

वियोगे शोचतेऽत्यर्थं स बाल इति मे मतिः ॥ १४

वियोगे दोषदर्शी यस् स योगमिह वर्जयेत् ।
असङ्गे सङ्गमो नास्ति दुःखं भावि वियोगजम् ॥ १५

परापरज्ञस्तु नरो नातिमानादुदीक्षितः ।

अपरज्ञः परां बुद्धिं स्पृष्ट्वा मोहाद्विमुच्यते ॥ १६

अदर्शनादापतितः पुनश्चादर्शनं गतः ।
नासौ मानादहङ्काराच्च वेत्ति विरागताम् ॥ १७

येन कर्मशरीरेण करोत्ययमनीश्वरः ।
मानसं मनसाऽऽप्नोति शारीरं तु शरीरवान् ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ ९३ ॥ पुत्रदर्शनपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
[ अस्मिन्नध्याये १८ श्लोकाः ]

---

## ॥ एकोनचत्वारिंशोऽध्यायः ॥

जनमेजयेन परीक्षित्प्रदर्शने प्रार्थिते व्यासेन परीक्षितः शमीकमहर्षेः शृङ्गिणश्च प्रदर्शनम् ॥ १ ॥ जनमेजयेनावभृथस्नानानन्तरमास्तिकपूजनपूर्वकं वैशम्पायनं प्रति कथावशेषकथनप्रार्थना ॥ २ ॥

---

वैशम्पायनः—

स दृष्ट्वा तु नृपः पुत्रान् तथा सम्बन्धिबान्धवान् ।
ऋषिप्रसादात् पुत्राणां सरूपाणां कुरूद्वहः ॥ १

स राजा राजधर्मांश्च ब्रह्मोपनिषदं तथा ।
अवाप्तवान् नरश्रेष्ठो बुद्धिनिश्चयमेव च ॥ २

विदुरश्च महाप्राज्ञो ययौ सिद्धिं तपोबलात् ।

धृतराष्ट्रस्समासाद्य व्यासं चापि तपस्विनम् ॥ ३

जनमेजयः—

मम[1]पि वरदो व्यासो दर्शयेत् पितरं यदि ।
तद्रूपवेषवयसं श्रद्दध्यां सर्वमेव तत् ॥ ४
प्रियं मे स्यात् कृतार्थश्च स्यामहं कृतनिश्चयः ।
प्रसादाद्दृषिमुख्यस्य मम कामस्समृद्ध्यताम् ॥ ५

सूतः—

इत्युक्तवचने तस्मिन् नृपे व्यासः प्रतापवान् ।
प्रसादमकरोद्धीमान् आनयच्च परीक्षितम् ॥ ६
ततस्तद्रूपवयसम् आगतं नृपतिं दिवः ।
श्रीमन्तं पितरं राजा ददर्श स परीक्षितम् ॥ ७
[1]शमीकं च महाभागं पुत्रं चाप्यस्य शृङ्गिणम् ।
अमात्या ये च निहता राज्ञस्तांश्च ददर्श सः ॥ ८
ततस्सोऽवभृथे राजा मुदितो जनमेजयः ।
पितरं स्नापयामास स्वयं स्नातौ च पार्थिवः ॥ ९
[2]परीक्षिदपि तत्रैव बभूव स तिरोहितः ॥ ९॥
स्नात्वा च भरतश्रेष्ठो ह्यास्तीकमिदमब्रवीत् ।
यायावरकुलोद्भूतं जरत्कारुसुतं तदा ॥ १०॥

जनमेजयः—

आस्तीक विविधाश्चर्यो यज्ञोऽयमिति मे मतिः ।

---

1. क—इदमर्धं नास्ति 1. अ-ख-ग-घ—इदमर्धं नास्ति

यदद्यायं पिता प्राप्तो मम शोकप्रणाशनः ॥ ११॥

आस्तीकः—

ऋषिर्द्वैपायनो यत्र पुराणस्तपसो निधिः ।
यज्ञे कुरुकुलश्रेष्ठ तस्य लोकावुभौ जितौ ॥ १२॥

श्रुतं विचित्रमाख्यानं त्वया पाण्डवनन्दन ।
सर्पाश्च भस्मसान्नीता गताश्च पदवीं पितुः ॥ १३॥

कथञ्चित् तक्षको मुक्तस् सत्यत्वात् तव पार्थिव ।
ऋषयः पूजितास्सर्वे गतिं दृष्ट्वा महात्मनः ॥ १४॥

प्राप्तस्सुविपुलो धर्मश् श्रुत्वा पापविनाशनम् ।
विमुक्तो हृदयग्रन्थिर् उदारजनदर्शनात् ॥ १५॥

ये च पक्षधरा धर्मे सद्वृत्तरुचयश्च ये ।
यान् दृष्ट्वा त्यजते पापं तेभ्यः कार्या नमस्क्रिया ॥ १६॥

सूतः—

एतच्छ्रुत्वा द्विजश्रेष्ठात् स नृपो जनमेजयः ।
पूजयामास तमृषिम् अनुमान्य पुनः पुनः ॥ १७॥

पप्रच्छ तमृषिं राजा वैशम्पायनमच्युतम् ।
कथावशेषं धर्मज्ञो वनवासस्य सत्तमः ॥ १८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
॥ ९४ ॥ पुत्रदर्शनपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[ अस्मिन्नध्याये १८॥ श्लोकाः ]

## ॥ चत्वारिंशोऽध्यायः ॥

धृतराष्ट्रेण पुत्रदर्शनानन्तरं युधिष्ठिरादिभिस्सह पुनः स्वाश्रमं प्रत्यागमनम् ॥ १ ॥ व्यासेन धृतराष्ट्रं प्रति युधिष्ठिरादीनां नगरप्रस्थापनचोदना ॥ २ ॥ नगरं प्रति पुनरागमनमनिच्छताऽपि युधिष्ठिरेण धृतराष्ट्रस्य कुन्तीगान्धार्योश्च निदेशनिर्बन्धेन पुनः सर्वैस्सह हास्तिनपुरं प्रत्यागमनम् ॥ ३ ॥

जनमेजयः—

दृष्ट्वा पुत्रांस्तथा पौत्रान् सानुबन्धाञ्जनाधिपः ।
धृतराष्ट्रः किमकरोद् राजा चैव युधिष्ठिरः ॥ १

वैशम्पायनः—

तद्दृष्ट्वा महदाश्चर्यं पुत्राणां दर्शनं पुनः ।
गतशोकस्स राजर्षिः पुनराश्रममागमत् ॥ २
[1]इतरस्तु जनस्सर्वस् ते चैव परमर्षयः ।
प्रतिजग्मुर्यथाकामं धृतराष्ट्राभ्यनुज्ञया ॥ ३
पाण्डवास्तु महात्मानो लघुभूयिष्ठसैनिकाः ।
अनुजग्मुर्महात्मानं सदारं तं महीपतिम् ॥ ४
तमाश्रमगतं धीमान् ब्रह्मर्षिर्लोकपूजितः ।
[2]द्वैपायन उपागम्य राजानमिदमब्रवीत् ॥ ५

व्यासः—

[3]धृतराष्ट्र महाबाहो शृणु कौरवनन्दन ॥ ५॥

1. अ—अर्धषट्कं नास्ति 2. ख—इदमर्धं नास्ति
3. ख—अर्धत्रयं नास्ति

श्रुतास्ते ज्ञानवृद्धानाम् ऋषीणां पुण्यकर्मणाम् ।
शुद्धाभिजनवृद्धीनां वेदवेदाङ्गवेदिनाम् ॥ ६॥
धर्मज्ञानां पुराणानां वदतां विविधाः कथाः ॥ ७
मा स्म शोके मनः कार्षीर् दिष्टे न व्यथते बुधः ।
श्रुतं देवरहस्यं ते नारदाद्देवदर्शनात् ॥ ८
गतास्ते क्षत्रधर्मेण शस्त्रपूतां गतिं शुभाम् ।
यथा दृष्टास्त्वया पुत्र यथाकामविहारिणः ॥ ९
युधिष्ठिरस्त्वयं धीमान् भवन्तमनुरुध्यते ।
सहितो भ्रातृभिस्सर्वैस् सदारस्ससुहृज्जनः ॥ १०
विसर्जयैनं यात्वेष स्वराज्यमनुशास्तु वै ।
मासस्समधिको ह्येषाम् अतीतो वसतां वने ॥ ११
एतद्धि नित्यं यत्नेन पदं रक्ष्यं परन्तप ।
बहुप्रत्यर्थिकं ह्येतद् राज्यं नाम जनाधिप ॥ १२

वैशम्पायनः—

इत्युक्तः कौरवो राजा व्यासेनामितबुद्धिना ।
युधिष्ठिरमथाहूय वाग्मी वचनमब्रवीत् ॥ १३

धृतराष्ट्रः—

अजातशत्रो भद्रं ते शृणु मे भ्रातृभिस्सह ।
त्वत्प्रसादान्महीपाल शोको नास्मान् प्रबाधते ॥ १४

रमे चाहं त्वया पुत्र पुरा नागपुरे यथा ।
नाथेनानुगतो विद्वन् प्रियेषु [1]परिवर्तता ॥ १५

प्राप्तं पुत्रफलं त्वत्तः प्रीतिर्मे विपुला त्वयि ।
न मे मन्युर्महाबाहो गम्यतां मा चिरं कृथाः ॥ १६

भवन्तं चैव सम्प्रेक्ष्य तपो मे परिहीयते ।
उपयुक्तं शरीरं च त्वां दृष्ट्वा धारितं पुनः ॥ १७

मातरौ ते तथैवेमे शीर्णपर्णकृताशने ।
मम तुल्यव्रते पुत्र न चिरं वर्तयिष्यतः ॥ १८

दुर्योधनप्रभृतयो दिष्ट्या लोकान्तरं गताः ।
व्यासस्य तपसो वीर्याद् भवता च समागमात् ॥ १९

प्रयोजनं चिरं वृत्तं जीवितस्य च मेऽनघ ।
उग्रं तपस्समास्थास्ये तदनुज्ञातुमर्हसि ॥ २०

त्वय्यद्य पिण्डः कीर्तिश्च कुलं चेदं प्रतिष्ठितम् ।
श्वो वाऽद्य वा महाबाहो गम्यतां मा चिरं कृथाः ॥ २१

राजनीतिस्सुबहुशश् श्रुता ते भरतर्षभ ।
सन्देष्टव्यं न पश्यामि कृतमेतावता विभो ॥ २२

वैशम्पायनः—

इत्युक्तवचनं तातं नृपो राजानमब्रवीत् । २२॥

---

1. ब—परिवर्तितः । अ—परिवर्धताम् ।

युधिष्ठिरः—

न मामर्हसि धर्मज्ञ परित्यक्तुमनागसम् ।
कामं गच्छन्तु मे सर्वे भ्रातरोऽनुचरास्तथा ॥ २३॥
भवन्तमहमन्वेष्ये मातरौ च यतव्रतः ॥ २४

वैशम्पायनः—

तमुवाचाथ गान्धारी मैवं पुत्र शृणुष्व मे ।
त्वय्यधीनं कुरुकुलं पिण्डश्च श्वशुरस्य मे ॥ २५
गम्यतां पुत्र पर्याप्तम् एतावत् पूजिता वयम् ।
राजा यदाह तत् कार्यं त्वया पुत्र पितुर्वचः ॥ २६

वैशम्पायनः—

इत्युक्तस्स तु गान्धार्या कुन्तीमिदमुवाच ह ।
स्नेहबाष्पाकुले नेत्रे परिमृज्य विनीतवत् ॥ २७

युधिष्ठिरः—

विसर्जयति मां राजा गान्धारी च यशस्विनी ।
भवत्यां बद्धचित्तस्तु कथं यास्यामि दुःखितः ॥ २८
न चोत्सहे तपोविघ्नं कर्तुं ते धर्मचारिणि ।
तपसो हि परं नास्ति तपसा विन्दते महत् ॥ २९
ममापि न तथा राज्ञि राज्ये बुद्धिर्यथा पुरा ।
तपस्येवानुरक्तं मे मनस्सर्वात्मना तथा ॥ ३०
शून्येयं च मही सर्वा न मे प्रीतिकरी शुभे ।

बान्धवा नः परिक्षीणा बलं नो न यथापुरम् ॥ ३१

पाञ्चालास्सुभृशं क्षीणाः कन्यामात्रावशेषिताः ।
न तेषां कुलकर्तारं कञ्चित् पश्याम्यहं शुभे ॥ ३२

सर्वेऽपि भस्मसाज्जीताः द्रोणेनैव च संयुगे ।
[1]अवशेषाश्च निहता द्रोणपुत्रेण वै निशि ॥ ३३

चेदयश्चैव मत्स्याश्च दृष्टपूर्वास्तथैव नः ॥ ३३॥

केवलं वृष्णिचक्रं तु वासुदेवपरिग्रहात् ।
यं दृष्ट्वा स्थातुमिच्छामि धर्मार्थं नान्यहेतुकम् ॥ ३४॥

शिवेन पश्य नस्सर्वान् दर्शनं दुर्लभं तव ।
भविष्यत्यम्ब राजा हि तीव्रमारप्स्यते तपः ॥ ३५॥

वैशम्पायनः—

एतच्छ्रुत्वा महाबाहुस् सहदेवो युधाम्पतिः ।
युधिष्ठिरमुवाचेदं बाष्पव्याकुललोचनः ॥ ३६॥

सहदेवः—

न सहामि परित्यक्तुं मातरं पार्थिवर्षभ ।
प्रतियातु भवान् क्षिप्रं तपस्तप्स्याम्यहं वने ॥ ३७॥

इहैव शोषयिष्यामि तपसाऽहं कलेवरम् ।
पादशुश्रूषणे युक्तो राज्ञो मातुस्तथाऽनघ ॥ ३८॥

---

1. ब—इदमर्धं नास्ति

वैशम्पायनः—

तमुवाच ततः कुन्ती परिष्वज्य महाभुजम् ॥ ३९

कुन्ती—

गम्यतां पुत्र मैवं त्वं वोचः कुरु वचो मम ।
आगमा वश्शिवास्सन्तु स्वस्था भवत पुत्रकाः ॥ ४०

उपरोधो भवेन्नैवम् अस्माकं तपसः कृतः ।
त्वत्स्नेहपाशबद्धा हि हीयेयं श्रेयसः परात् ॥ ४१
तस्मात् पुत्रक गच्छ त्वं शिष्टमल्पं हि नः प्रभो ॥ ४१॥

वैशम्पायनः—

एवं संस्तम्भितं वाक्यैः कुन्त्या बहुविधैर्मनः ।
सहदेवस्य राजेन्द्र राज्ञश्चैव विशेषतः ॥ ४२॥

ते मात्रा समनुज्ञाता राज्ञा च कुरुपुङ्गवाः ।
अभिवाद्य कुरुश्रेष्ठम् आमन्त्रयितुमारभन् ॥ ४३॥

युधिष्ठिरः—

राज्यं प्रति गमिष्यामश् शिवेन प्रतिनन्दिताः ।
अनुज्ञातास्त्वया राजन् गमिष्यामो ह्यकल्मषाः ॥ ४४॥

एवमुक्तस्स राजर्षिर् धर्मराज्ञा महात्मना ।
अनुजज्ञे जयाशीर्भिः पूजयित्वा युधिष्ठिरम् ॥ ४५॥

भीमं च बलिनां श्रेष्ठं सान्त्वयामास पार्थिवः ।
स चास्य सम्यङ्मोधावी प्रत्यपद्यत वीर्यवान् ॥ ४६॥

अर्जुनं च समाश्लिष्य यमौ च भरतर्षभौ ।
अनुजज्ञे स कौरव्यः परिष्वज्याभिनन्द्य च ॥ ४७॥

गान्धार्या चाभ्यनुज्ञाताः कृतपादाभिवादनाः ।
जनन्या समुपाघ्राताः परिष्वक्ताश्च ते नृपम् ॥ ४८॥

चक्रुः प्रदक्षिणं सर्वे वत्सा इव निवारणे ।
पुनः पुनर्निरीक्षन्तः प्रजग्मुस्ते प्रदक्षिणम् ॥ ४९॥

तथैव द्रौपदी भद्रा पाण्ड्यजा भुजगेन्द्रजा ।
न्यायतश्श्वशुरे वृत्तिं प्रयुज्य प्रययुस्तदा ॥ ५०॥

श्वश्रूभ्यां समनुज्ञाताः परिष्वज्याभिनन्दिताः ।
सन्दिष्टाश्चेतिकर्तव्यं प्रययुर्भर्तृभिस्सह ॥ ५१॥

ततः प्रजज्ञे निनदस् सूतानां युज्यतामिति ।
उष्ट्राणां क्रोशतां चैव हयानां हेषतामपि ॥ ५२॥

ततो युधिष्ठिरो राजा सदारस्सहसैनिकः ।
नगरं हास्तिनपुरं पुनरायात् सबान्धवः ॥ ५३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥

॥ ५४ ॥ पुत्रदर्शनपर्वणि नवमोऽध्यायः ॥ ९ ॥

[ अस्मिन्नध्याये ५३॥ श्लोकाः ]

[ पुत्रदर्शनपर्व समाप्तम् ]

## ॥ एकचत्वारिंशोऽध्यायः ॥

[ नारदागमनपर्व ]

कदाचन हास्तिनपुरमुपागतेन नारदेन पाण्डवान् प्रति धृतराष्ट्रादीनां स्वर्गप्राप्तिनिवेदनम् ॥ १ ॥ धृतराष्ट्रे गान्धारीकुन्तीसञ्जयैस्सह गङ्गायामाप्लुत्य स्नात्वाश्रममागच्छति सति मध्येमार्गं दावाग्निना तत्परिवेष्टनम् ॥ २ ॥ धृतराष्ट्रेण सञ्जयं प्रत्यग्निहोत्रे दूरापसरणप्रेरणापूर्वकं कुन्तीगान्धारीभ्यां सह वह्नौ प्रवेशनम् ॥ ३ ॥ ततस्सञ्जयेन हिमवत्पर्वतं प्रति गमनम् ॥ ४ ॥

---

वैशम्पायनः—

तेषु चोपनिवृत्तेषु पाण्डवेषु यदृच्छया ।
[1]देवर्षिर्नारदो राजन्नाजगाम युधिष्ठिरम् ॥ १

[2]तमभ्यर्च्य महाबाहुः कुरुराजो युधिष्ठिरः ।
आसीनं परिविश्वस्तं प्रोवाच वदतां वरः ॥ २

युधिष्ठिरः—

चिरात्तु नानुपश्यामि भगवन्तमुपस्थितम् ।
[3]कच्चित् सुकुशलं विप्र शुभं वा पर्युपस्थितम् ॥ ३

[4]के देशाः भवता दृष्टाः कार्यं किञ्च करोमि ते ।
तद्ब्रूहि द्विजमुख्य त्वं ह्यस्माकं च प्रियोऽतिथिः ॥ ४

---

1. ग—कदाचिच्चगरे नागसाह्वये च यदृच्छया । [ अधिकः पाठः ]
2. अ—अर्धमयं नास्ति ३. ख—अर्धद्वयं नास्ति
4. अ-क—अभिवाद्याब्रवीद्राजन् भ्रातृभिस्सह पाण्डवः । [ अधिकः पाठः ]

नारदः—

चिरदृष्टोऽसि मे राजन्नागतोऽहं तपोवनात् ।
परिदृष्टानि तीर्थानि गङ्गा चैव मया नृप ॥ ५

युधिष्ठिरः—

वदन्ति पुरुषा मेऽद्य गङ्गातीरनिवासिनः ।
धृतराष्ट्रं महात्मानम् आस्थितं परमं तपः ॥ ६

अपि दृष्टस्त्वया तत्र कुशली स कुरूद्वहः ।
गान्धारी च पृथा चैव सूतपुत्रश्च सञ्जयः ॥ ७

कथं वर्तयते चाद्य स पिता मम पार्थिवः ।
श्रोतुमिच्छामि भगवन् यदि दृष्टस्त्वया नृपः ॥ ८

नारदः—

स्थिरो भूत्वा महाराज शृणु सर्वं यथातथम् ।
यथा श्रुतं यथा दृष्टं मया तस्मिंस्तपोवने ॥ ९

वनवासाग्निवृत्तेषु भवत्सु कुरुनन्दन ।
कुरुक्षेत्रात् पिता तुभ्यं गङ्गाद्वारं ययौ नृपः ॥ १०

गान्धार्या सहितो धीमान् वध्वा कुन्त्या समन्वितः ।
सञ्जयेन च सूतेन साग्निहोत्रस्सयाजकः ॥ ११

तत्रोग्रं तप आस्थाय धृतराष्ट्रो महामनाः ।
[1]ततो विधिं समास्थाय वायुभक्षोऽभवन्मुनिः ॥ १२

1. अ—मुखे पिण्डं समास्थाय । क – मुखेन तत्समाधाय ।

वने स मुनिभिस्सर्वैः पूज्यमानो महातपाः ।
त्वगस्थिमात्रावशेषष् षण्मासानभवन्नृपः ॥ १३
गान्धारी तु जलाहारा कुन्ती मासोपवासिनी ।
सञ्जयष्षष्ठभुक्तेन वर्तयामास भारत ॥ १४
अग्नींस्तु याजकास्तत्र जुहुवुर्विधिवत् प्रभो ।
दृश्यतोऽदृश्यतश्चैव वने तस्मिन् नृपस्य ह ॥ १५
अनिकेतो हि राजाऽसौ बभूव वनगोचरः ।
ते चापि सहिते देव्यौ सञ्जयश्च तमन्वयुः ॥ १६
सञ्जयो नृपतेर्नेता समेषु विषमेषु च ।
गान्धार्याश्च पृथा राजंश् चक्षुरासीदनिन्दिता ॥ १७
ततः कदाचिद्गङ्गायां गच्छत्सु कुरुसत्तम ।
गङ्गायामाप्लुतो धीमान् आश्रमाभिमुखो ययौ ॥ १८
अथ वायुस्समुद्भूतो दवाग्निरभवन्महान् ।
ददाह च वनं सर्वं परिगृह्य समन्ततः ॥ १९
[1]दह्यत्सु मृगयूथेषु विह्वलेषु समन्ततः ।
वराहाणां च यूथेषु संश्रयत्सु जलाशयान् ॥ २०
सम्प्रदीप्ते वने तस्मिन् प्राप्तो व्यसनमुत्तमम् ।
निराहारतया राजा मन्दप्राणविचेष्टितः ॥ २१
असमर्थोऽपसरणे सुकृशे मातरौ च ते ॥ २१॥

1. ब—इदमर्धं नास्ति

ततस्स नृपतिर्दृष्ट्वा वह्निमायान्तमन्तिकात् ।
इदमाह वचस्सूतं सञ्जयं पृथिवीपते ॥ २२॥

धृतराष्ट्रः—

गच्छ सञ्जय यत्राग्निर् न त्वां दहति कर्हिचित् ।
वयमप्यग्निसंयुक्ता गमिष्यामः परां गतिम् ॥ २३॥

नारदः—

तमुवाच किलोद्विग्नस् सञ्जयो वदतां वरः ॥ २४

सञ्जयः—

राजन् मृत्युरनिष्टोऽयं भविता ते यथाऽग्निना ।
न चोपायं प्रपश्यामि मोक्षणे जातवेदसः ॥ २५
यदत्रानन्तरं कार्यं तद्भवान् वक्तुमर्हति ॥ २५॥

नारदः—

इत्युक्तस्सञ्जयेनेदं पुनराह स पार्थिवः ॥ २६

धृतराष्ट्रः—

नैष मृत्युरनिष्टो नो निस्सृता हि गृहाद्वयम् ॥ २६॥
जलमग्निस्तथा वायुर् अथवाऽपि विकर्षणम् ।
तापसानां प्रशस्यन्ते गच्छ सञ्जय मा चिरम् ॥ २७॥

नारदः—

इत्युक्त्वा सञ्जयं राजा समाधाय मनस्तथा ।
प्राङ्मुखस्सह गान्धार्या कुन्त्या चोपाविशत् तदा ॥ २८॥

सञ्जयस्तं तथा दृष्ट्वा प्रदक्षिणमथाकरोत् ।
उवाच चैनं मेधावी युज्यस्वेति नराधिपम् ॥ २९॥

ऋषिपुत्रो मनीषी स राजा चक्रेऽस्य तद्वचः ।
सन्निरुध्येन्द्रियग्रामम् आसीत् काष्ठोपमस्तदा ॥ ३०॥

गान्धारी च महाप्राज्ञा जननी च पृथा तव ।
दावाग्निना समायुक्ते स च राजा पिता तव ॥ ३१॥

सञ्जयस्तु महाप्राज्ञस् तस्माद्दावादमुच्यत ।
गङ्गाकूले मया दृष्टस् तापसैः परिवारितः ॥ ३२॥

स तानामन्त्र्य तेजस्वी निवेद्यैतच्च सर्वशः ।
प्रययौ सञ्जयस्सूतो हिमवन्तं महागिरिम् ॥ ३३॥

एवं स निधनं प्राप्तः कुरुराजो महामनाः ।
गान्धारी च पृथा चैव जननी ते नराधिप ॥ ३४॥

यदृच्छया तु व्रजता मया राज्ञः कलेवरम् ।
तयोश्च देव्योरुभयोर् दृष्टानि भरतर्षभ ॥ ३५॥

ततस्तपोवने तस्मिन् समाजग्मुस्तपोधनाः ।
श्रुत्वा राज्ञस्तथा निष्ठाम् अन्वशोचन् गतिं च ते ॥ ३६॥

तत्राश्रौषमहं सर्वम् एतत् पुरुषसत्तम ।
यथा च नृपतिर्दग्धो तथा देव्यौ च पाण्डव ॥ ३७॥

न शोचितव्यो राजेन्द्र स्वर्गस्थः पृथिवीपतिः ।

प्राप्तवानग्निसंयोगाद् गान्धारी जननी च ते ॥ ३८॥

वैशम्पायनः—

एतच्छ्रुत्वा तु सर्वेषां पाण्डवानां महात्मनाम् ।
निर्याणं धृतराष्ट्रस्य शोकस्समभवन्महान् ॥ ३९॥

अन्तःपुराणां च तदा महानार्तस्वरोऽभवत् ।
पौराणां च महाराज श्रुत्वा राज्ञस्तथा गतिम् ॥ ४०॥

अहो धिगिति राजा च विक्रुश्य भृशदुःखितः ।
ऊर्ध्वबाहुस्स्मरन् मातुः प्ररुरोद युधिष्ठिरः ॥ ४१॥

भीमसेनपुरोगाश्च भ्रातरस्सर्व एव ते ।
'रुरुदुर्दुःखसन्तप्ता वर्णयन्तः पृथां तदा ॥ ४२॥

अन्तःपुरेषु सुमहांस् ततो रुदितनिस्वनः ।
प्रादुरासीन्महाराज पृथां श्रुत्वा तथागताम् ॥ ४३॥

तपोधृद्धं तथा दग्धं हतपुत्रं वनेचरम् ।
अन्वशोचन्त ते सर्वे गान्धारीं च यशस्विनीम् ॥ ४४॥

तस्मिन्नुपरते शब्दे मुहूर्तादिव भारत ।
निगृह्य बाष्पं धैर्येण धर्मराजोऽब्रवीदिदम् ॥ ४५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥
॥ ९५ ॥ नारदागमनपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[ अस्मिन्नध्याये ४५॥ श्लोकाः ]

## ॥ द्विचत्वारिंशोऽध्यायः ॥

युधिष्ठिरेण धृतराष्ट्रादिनिधनश्रवणेन भ्रातृभिः सह सकरुणं परिदेवनपूर्वकं सति संस्कृताग्नौ तेषां वृथाग्निना दाहं प्रत्यनुशोचनम् ॥ १ ॥ नारदेन युधिष्ठिरं प्रति धृतराष्ट्रादिदाहकाग्नेर्मन्त्रपूतत्वकथनम् ॥ २ ॥ युधिष्ठिरेण युयुत्सुपुरस्कारेण गान्धारीधृतराष्ट्रयोरुदकदानपूर्वकं कुन्त्याश्च विधिवच्छ्राद्धदानम् ॥ ३ ॥ ततो नारदगमनानन्तरं प्रजापालनेन निजनगरे भ्रात्रादिभिः सह सुखविहारः ॥ ४ ॥

युधिष्ठिरः—

तथा महात्मनस्तस्य तपस्युग्रे च तस्थुषः ।
अनाथस्येव निधनं तिष्ठत्स्वस्मासु बन्धुषु ॥ १

दुर्विज्ञेया हि गतयः पुरुषाणां मता मम ।
यत्र वैचित्रवीर्यो हि [1]दह्यतैवं दवाग्निना ॥ २

यस्य पुत्रशतं श्रीमद् अभवद्बाहुशालिनः ।
नागायुतसमप्राणस् स दग्धो हि दवाग्निना ॥ ३

यं पुरा पर्यवीजन्त तालवृन्तैर्वरस्त्रियः ।
तं गृध्राः पर्यवीजन्त दवाग्निप्रतिकूलितम् ॥ ४

सूतमागधसङ्घैश्च शयने यः प्रबोध्यते ।
धरण्यां स नृपश्शेते विकृष्टो गृध्रवायसैः ॥ ५

न तु शोचामि गान्धारीं हतपुत्रां यशस्विनीम् ।

1. अ—दह्यते वडवाग्निना ।

पतिलोकमनुप्राप्तां तथा भर्तृव्रते स्थिताम् ॥ ६

पृथामेव तु शोचामि या पुत्रैश्वर्यमृद्धिमत् ।
उत्सृज्य सुमहद्दीप्तं वनवासमरोचयत् ॥ ७

[1]धिग् राज्यमिदमस्माकं धिग् बलं धिक् पराक्रमम् ।
क्षत्रधर्मं च धिग् यस्मान्मृता जीवामहे वयम् ॥ ८

सुसूक्ष्मा किल लोकस्य गतिर्द्विजवरोत्तम ।
यत् समुत्सृज्य राज्यं सा वनवासमरोचयत् ॥ ९

युधिष्ठिरस्य जननी भीमस्य विजयस्य च ।
अनाथवत् कथं दह्येद् इति मुह्यामि चिन्तयन् ॥ १०

वृथा सन्तर्पितो वह्निः खाण्डवे सव्यसाचिना ।
उपकारमजानन् स कृतघ्न इति मे मतिः ॥ ११

यत्रादहत् स भगवान् मातरं सव्यसाचिनः ।
कृत्वा यो ब्राह्मणच्छद्म भैक्षार्थी तमुपागतः ॥ १२

धिगग्निं धिक् च पार्थस्य विश्रुतां सत्यसन्धताम् ॥ १२॥

इदं कष्टतरं चान्यद् भगवन् प्रतिभाति मे ।
वृथाग्निना समायोगो यदभूत् पृथिवीपतेः ॥ १३॥

तथा तपस्विनस्तस्य राजर्षेः कौरवस्य च ।
कथमेवं गतो मृत्युः प्रशास्य पृथिवीमिमाम् ॥ १४॥

---

1. ख—अर्धचतुष्टयं नास्ति

तिष्ठत्सु मन्त्रपूतेषु तस्याग्निषु महावने ।
स वृथाग्निसमायुक्तो निष्ठां प्राप्तः पिता मम ॥ १५॥

मन्ये पृथा वेपमाना कृशा धमनिसन्तता ।
हा तात धर्मराजेति मामाक्रन्दन्महाभये ॥ १६॥

भीम पर्याप्नुहि भयाद् इति चैवाभियाचती ।
समन्ततः परिक्षिप्ता माता मेऽभूद् दवाग्निना ॥ १७॥

सहदेवः प्रियस्तस्याः पुत्रेभ्योऽधिकमेव तु ।
न चैनां मोक्षयामास वीरो माद्रवतीसुतः ॥ १८॥

वैशम्पायनः—

तच्छ्रुत्वा रुरुदुस्सर्वे समालिङ्ग्य परस्परम् ।
पाण्डवाः पञ्च दुःखार्ता भूतानीव युगक्षये ॥ १९॥

तेषां तु पुरुषेन्द्राणां रुदतां रुदितस्वनः ।
प्रासादभागसंरुद्धो रोदसी समरुन्धत ॥ २०॥

नारदः—

नासौ वृथाग्निना दग्धो यथा तत्र श्रुतं मया ।
वैचित्रवीर्यो नृपतिर् न ते शोच्यो नराधिप ॥ २१॥

वनं प्रविशताऽनेन वायुभक्षेण धीमता ।
अग्नयः कारयित्वेष्टिम् उत्सृष्टा इति नश्श्रुतम् ॥ २२॥

याजकास्तानथैतस्य तदानीं निर्जने वने ।

समुत्सृज्य यथाकामं ययुर्भरतसत्तम ॥ २३॥

स विवृद्धस्तदा वह्निर् वने तस्मिन्नभूत् किल ।
तेन तद्वनमादीप्तम् इति ते तापसा ब्रुवन् ॥ २४॥

स राजा जाह्नवीतीरे यथा ते कथितं मया ।
तेनाग्निना समायुक्तस् स्वेनैव भरतर्षभ ॥ २५॥

एवमावेदयामासुर् मुनयस्ते ममानघ ।
ये ते भागीरथीतीरे मया दृष्टा युधिष्ठिर ॥ २६॥

एवं स्वेनाग्निना राजा समायुक्तो महीपते ।
मा शोचिथास्तं नृपतिं गतस्स परमां गतिम् ॥ २७॥

गुरुशुश्रूषया चैव जननी तव पाण्डव ।
गतिं प्राप्ता सुमहतीम् इति मे नास्ति संशयः ॥ २८॥

कर्तुमर्हसि कौरव्य तेषां त्वमुदकक्रियाम् ।
भ्रातृभिस्सहितस्सर्वैर् एतदत्र विधीयते ॥ २९॥

**वैशम्पायनः—**

ततस्स पृथिवीपालः पाण्डवानां धुरन्धरः ।
निर्ययौ सह सोदर्यैस् सदारो भरतर्षभ ॥ ३०॥

पौरजानपदाश्चैव राजभक्तिमुपाश्रिताः ।
गङ्गां प्रजग्मुरभितो वाससैकेन संवृताः ॥ ३१॥

ततोऽवगाह्य सलिलं सर्वे ते कुरुपुङ्गवाः ।

युयुत्सुमग्रतः कृत्वा ददुस्तोयं महात्मने ॥ ३२॥

[1]गान्धार्याश्च पृथायाश्च विधिवन्नामगोत्रतः ।
शोचन्तो वर्तयन्तस्ते तत्रोषुर्नगराद्बहिः ॥ ३३॥

प्रेषयामास च नरान् विधिज्ञानाप्तकारिणः ।
गङ्गाद्वारे कुरुश्रेष्ठो यत्र दग्धोऽभवन्नृपः ॥ ३४॥

तत्रैव तेषां कुल्यानि गङ्गाद्वारेऽन्वशात् तदा ।
कर्तव्यानीति पुरुषान् दत्तदेयान् महीपतिः ॥ ३५॥

द्वादशेऽहनि तेभ्यश्च कृतशौचो नराधिपः ।
ददौ श्राद्धानि विधिवद् दक्षिणावन्ति पाण्डवः ॥ ३६॥

धृतराष्ट्रं समुद्दिश्य ददौ स पृथिवीपतिः ।
सुवर्णं रजतं गाश्च शय्याश्च सुमहाधनाः ॥ ३७॥

गान्धार्याश्चैव तेजस्वी पृथायाश्च पृथक् पृथक् ।
सङ्कीर्त्य नामनी राजा ददौ दानमनुत्तमम् ॥ ३८॥

यो यदिच्छति यावच्च तावत् स लभते द्विजः ।
शयनं भोजनं यानं मणिरत्नमथो धनम् ॥ ३९॥

पानमाच्छादनं भोगान् दासीश्च परिचारकाः ।
ददौ राजा समुद्दिश्य तयोर्मात्रोर्महीपतेः ॥ ४०॥

ततस्स पृथिवीपालो दत्त्वा श्राद्धान्यनेकशः ।

1. क—अर्धचतुष्टयं नास्ति

प्रविवेश पुनर्धीमान् पुरं वारणसाह्वयम् ॥ ४१॥
ते चापि राजवचनात् पुरुषा ये गता भवन् ।
सङ्कल्प्य तेषां कुल्यानि पुनः प्रत्यागमंस्ततः ॥ ४२॥
[1]माल्यैर्गन्धैश्च विविधैः पूजयित्वा यथाविधि ।
कुल्यानि तेषां संयोज्य तदाचख्युर्महीपतेः ॥ ४३॥
समाश्वास्य तु राजानं धर्मात्मानं युधिष्ठिरम् ।
नारदोऽप्यगमत् प्रीतः परमर्षिर्यथेप्सितम् ॥ ४४॥
एवं वर्षाण्यतीतानि धृतराष्ट्रस्य धीमतः ।
वनवासे तथा त्रीणि नगरे दश पञ्च च ॥ ४५॥
हतपुत्रस्य सङ्ग्रामे दानानि ददतस्सदा ।
नृपतेः पुत्रपौत्राणां मित्राणां स्वजनस्य च ॥ ४६॥
युधिष्ठिरस्तु नृपतिर् नातिप्रीतमनास्तदा ।
धारयामास तद्राज्यं निहतज्ञातिबान्धवः ॥ ४७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
आश्रमवासिकपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ ९५ ॥ नारदागमनपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[ अस्मिन्नध्याये ४७॥ श्लोकाः ]

॥ नारदागमनपर्व समाप्तम् ॥ ॥ आश्रमवासिकपर्व च समाप्तम् ॥

॥ अस्मिन्नाश्रमवासिकपर्वणि श्लोकाः ११०८॥* ॥

---

1. क-ख-घ—सङ्कल्प्य कृत्वा कुल्यानि निवापानि च सर्वशः ।
[ अधिकः पाठः पुनरुक्तश्च ]

* यद्यप्यनुक्रमणिकाध्यायोक्तरीत्या १५०६ श्लोकैर्भाव्यम् तथाऽपि ११०८॥ श्लोका एव उपलभ्यन्ते ।

अतः परं मौसलपर्व भविष्यति तस्यायमाद्यः श्लोकः ॥

वैशम्पायनः—

षट्त्रिंशे त्वथ सम्प्राप्ते वर्षे कौरवनन्दनः ।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः ॥ १

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ १६ ॥ मौसलपर्व ॥ १६ ॥

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ मौसलपर्व ॥

(मौसलपर्व)

### ॥ प्रथमोऽध्यायः ॥

प्रजापालनेन निजनगरे भ्रातृभिस्सह सुखनिवासिना युधिष्ठिरेण कदाचनाशुभसूचकोत्पातदर्शनम् ॥ १ ॥ ततः काळान्तरे सबलकृष्णानां सर्वयादवानां परस्परं मौसलप्रहारेण निःशेषनिधनश्रवणम् ॥ २ ॥ वैशम्पायनेन जनमेजयं प्रति यादवानां मौसलेन निधनप्रकारकथनारम्भः ॥ ३ ॥ कदाचन विश्वामित्रादिमहर्षिषु द्वारकामागतेषु कैश्चन यादवैः साम्बस्य स्त्रीवेषपरिकल्पनेन मुनीन् प्रति गर्भिणीयं किंरूपमपत्यं प्रसविष्यतीति प्रश्नः ॥ ४ ॥ ततो रुष्टैर्महर्षिभिः स्वकुलविनाशकमायसं मुसलं प्रसविष्यतीति शापदानम् ॥ ५ ॥ ततः परेद्युः साम्बेन मुसले प्रसूते भीतैस्तै राजाज्ञया तस्य चूर्णीकरणेन समुद्रे प्रक्षेपणम् ॥ ६ ॥

वैशम्पायनः—

षट्त्रिंशे त्वथ सम्प्राप्ते वर्षे कौरवनन्दनः ।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः ॥ १

ववुर्वातास्सनिर्घाता रूक्षाश्शर्करवर्षिणः ।

अपसव्यानि शकुना मण्डलानि प्रचक्रिरे ॥ २

प्रत्यगृह्णन्महानद्यो दिशो नीहारसंवृताः ।
उल्काश्चाङ्गारवर्षिण्यः प्रपेतुर्गगनाद्भुवि ॥ ३

आदित्यो रजसा राजन् समवच्छन्नमण्डलः ।
विरश्मिरुदये नित्यं कबन्धैस्समलङ्कृतः ॥ ४

परिवेषाश्च दृश्यन्ते दारुणाश्चन्द्रसूर्ययोः ।
विवर्णाश्च्यामरूक्षान्तास् तथा भस्मारुणप्रभाः ॥ ५

एते चान्ये च बहव उत्पाता भयशंसिनः ।
दृश्यन्ते जगतो नाशं दिवमारोढुमिच्छति ॥ ६

यस्य प्रसादाद्धर्मोऽयं कृते यद्वत् कलावपि ।
पाण्डवास्तु महाभाग युक्तास्तु यशसाऽनघाः ॥ (७

कस्य चित्त्वथ कालस्य कुरुराजो युधिष्ठिरः ।
शुश्राव वृष्णिचक्रस्य मुसलोत्सादनं कृतम् ॥ ८

वियुक्तं वासुदेवं च श्रुत्वा रामं च पाण्डवः ।
समानीयाब्रवीद्भ्रातॄन् किं करिष्याम इत्युत ॥ ९

परस्परं समासाद्य ब्रह्मदण्डबलात्कृतान् ।
वृष्णीन् विनष्टान् श्रुत्वा ते व्यथिताः पाण्डवा भृशम् ॥ १०

निधनं वासुदेवस्य समुद्रस्येव शोषणम् ।
वीरः न श्रद्दधुस्तस्य विनाशं शार्ङ्गधन्वनः ॥ ११

मौसलं ते परिश्रुत्य दुःखशोकसमन्विताः ।
विषण्णा हतसङ्कल्पाः पाण्डवास्समुपाविशन्* ॥ १२

जनमेजयः—

कथं विनष्टा भगवन्नन्धका वृष्णिभिस्सह ।
पश्यतो वासुदेवस्य भोजाश्चैव महारथाः ॥ १३

1वैशम्पायनः—

षट्त्रिंशेऽथ गते वर्षे वृष्णीनामनयो महान् ।
अन्योन्यं मुसलैस्ते तु निजघ्नुः कालचोदिताः ॥ १४

जनमेजयः—

केनानुशप्तास्ते वीराः क्षयं वृष्ण्यन्धका ययुः ।
भोजाश्च द्विजवर्य त्वं विस्तरेण वदस्व तत् ॥ १५

वैशम्पायनः—

विश्वामित्रं च कण्वं च नारदं च तपोधनम् ।
सारणप्रमुखा वीरा ददृशुर्द्वारकागतान् ॥ १६

ते वै साम्बं पुरस्कृत्य भूषयित्वा स्त्रियं यथा ।
अब्रुवन्नुपसङ्गृह्य दैवदण्डनिपीडिताः ॥ १७

वीराः—

इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः ।
ऋषयस्साधु जानीत किमियं जनयिष्यति ॥ १८

---

* अ-क-ख-घ—कोशेषु अतैवाध्यायसमाप्तिर्दृश्यते ॥

1. अ—एतन्नवम्तं पृच्छामि समुद्रस्येव शोषणम् । [ अधिकः पाठः ]

वैशम्पायनः—

इत्युक्तास्ते महाराज विप्रलम्भप्रधर्षिताः ।
प्रत्यब्रुवंस्तान् मुनयो यत्तच्छृणु नराधिप ॥ १९

ऋषयः—

वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम् ।
वासुदेवस्य दायादस् साम्बोऽयं जनयिष्यति ॥ २०

येन यूयं सुदुर्वृत्ता नृशंसा जातमन्यवः ।
उच्छेत्तारः कुलं सर्वम् ऋते रामजनार्दनौ ॥ २१

समुद्रं यास्यति श्रीमांस् त्यक्त्वा देहं हलायुधः ।
व्याधः कृष्णं महाभागम् शयानं भुवि वेत्स्यति ॥ २२

वैशम्पायनः—

इत्यब्रुवंस्ततो राजन् प्रलब्धास्तैर्महर्षयः ।
तथोक्त्वा मुनयस्ते तु यथागतमथो ययुः ॥ २३

अथाब्रवीत् तदा वृष्णीन् श्रुत्वैतन्मधुसूदनः ।
अन्तज्ञो मतिमांस्तस्य भवितव्यं तथेति तान् ॥ २४

एवमुक्त्वा हृषीकेशः प्रविवेश पुनर्गृहान् ।
कृतान्तमन्यथा नैच्छत् कर्तुं स जगतः प्रभुः ॥ २५

श्वोभूते तु ततस्साम्बो मुसलं तदसूयत ।
वृष्ण्यन्धकविनाशाय किङ्करप्रतिमं महत् ॥ २६
प्रसूतं शापजं घोरं तच्च राज्ञे न्यवेदयन् ॥ २६॥

विवर्णरूपस्तद्राजा सूक्ष्मचूर्णमकारयत् ।
प्राक्षिपन् सागरे तच्च पुरुषा राजशासनात् ॥ २७॥
अघोषयंश्च नगरे वचनादाहुकस्य ह ।
जनार्दनस्य रामस्य बभ्रोश्चैव महात्मनः ॥ २८॥
अद्यप्रभृति सर्वेषु वृष्ण्यन्धकगृहेष्वथ ।
सुरासवो न कर्तव्यस् सर्वैर्नगरवासिभिः ॥ २९॥
यश्च नो विदितं कुर्यात् पेयं किञ्चित् क्वचिन्नरः ।
जीवन् स शूलमारोहेत् क्षयं कृत्वा सबान्धवः ॥ ३०॥
ततो राजभयात् सर्वे नियमं चक्रिरे तदा ।
नराइशासनमाज्ञाय तस्य राज्ञो महात्मनः ॥ ३१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
मौसलपर्वणि प्रथमोऽध्यायः ॥ १ ॥
॥ ९६ ॥ मौसलपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[ अस्मिन्नध्याये ३१॥ श्लोकाः ]

---

## ॥ द्वितीयोऽध्यायः ॥

---

द्वारकायां नानोत्पातप्रादुर्भावः ॥ १॥ तत्तद्दर्शनात् कृष्णेन गान्धारी-शापदानानुस्मरणेन तस्य सत्यताचिकीर्षया भटैः सर्ववृष्ण्यादीनां तीर्थ-यात्रोद्घोषणम् ॥ २ ॥

---

वैशम्पायनः—

एवं प्रयतमानानां वृष्णीनामन्धकैस्सह ।
कालो गृहाणि सर्वाणि परिचक्राम नित्यशः ॥ १

करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः ।
गृहाण्यावेष्ट्य वृष्णीनां नादृश्यत पुनः क्वचित् ॥ २

उत्पेदिरे महावाता दारुणाश्च दिने दिने ।
वृष्ण्यन्धकविनाशाय बहवो रोमहर्षणाः ॥ ३

प्रवृद्धमूषिका रथ्या विभिन्नमणिकास्तथा ।
वीची कूचीति व्याहरन्त शारिका वृष्णिवेश्मसु ॥ ४

नोपशाम्यति शब्दश्च स दिवारात्रमेव हि ॥ ४॥

अन्वकुर्वन्नुलूकानां सारसा वृष्णिवेश्मसु ।
अजाश्शिवानां च रुतम् अन्वकुर्वन्त भारत ॥ ५॥

पाण्डरा रक्तपादाश्च विहगाः कालचोदिताः ।
वृष्ण्यन्धकानां गेहेषु कपोता व्यचरंस्तथा ॥ ६॥

अजा गोषु व्यजायन्त करभाश्चाश्वतरीषु च ।
शुनीष्वपि बिडालाश्च मूषिका नकुलीष्वपि ॥ ७॥

नापत्रपन्त पापानि कुर्वन्तो वृष्णयस्तथा ।
अर्दयन् ब्राह्मणांश्चापि पितृदेवांस्तथैव च ॥ ८॥

गुरूंश्चाप्यवमन्यन्त न तु रामजनार्दनौ ।
भार्याः पतीनुच्चरन्ति भार्याश्च पुरुषास्तथा ॥ ९॥

विभावसुः प्रज्वलितो वामं विपरिवर्तते ।
नीललोहितमञ्जिष्ठा विसृजन्नार्चिषः पृथक् ॥ १०॥

उदयास्तमये नित्यं पुर्यां तस्यां दिवाकरः ।
व्यदृश्यतासकृत् पुम्भिः कबन्धैः परिवारितः ॥ ११॥

महानसेषु सिद्धेऽन्ने ससूपेऽतीव भारत ।
अवतार्यमाणाः क्रिमयो ह्यदृश्यन्त नराधिप ॥ १२॥

पुण्याहे वाच्यमाने च जपत्सु च महात्मसु ।
अभिधावमाना दृश्यन्ते न चादृश्यत कश्चन ॥ १३॥

परस्परं तु नक्षत्रं हन्यमानं पुनः पुनः ।
ग्रहैरपश्यन् सर्वे ते नात्मनस्तु कथञ्चन ॥ १४॥

नदन्तं पाञ्चजन्यं च वृष्ण्यन्धकपुरस्कृतम् ।
समन्तात् प्रत्यदृश्यन्त रासभा दारुणस्वनाः ॥ १५॥

अपश्यत् स हृषीकेशस् सम्प्राप्तं कालपर्ययम् ।
त्रयोदशीममावास्यां तान् दृष्ट्वा प्राब्रवीदिदम् ॥ १६॥

श्रीभगवान्—

त्रयोदशी पञ्चदशी कृतेयं राहुणा पुनः ।
तथा च भारते युद्धे प्राप्ता चाद्य क्षयाय नः ॥ १७॥

वैशम्पायनः—

विमृशन्नेव कालं तं परिचिन्त्य जनार्दनः ।
[1]मेने प्राप्तं स षट्त्रिंशं वर्षं तु मधुसूदनः ॥ १८॥

श्रीभगवान्—

पुत्रशोकाभिसन्तप्ता गान्धारी हतबान्धवा ।

---

1. क—इदमर्धं नास्ति

यदनुव्याजहारार्तो तदिदं समुपस्थितम् ॥ १९॥
इदं च समनुप्राप्तम् अब्रवीद्यधुधिष्ठिरः ।
पुरा व्यूढेष्वनीकेषु दृष्ट्वोत्पातान् सुदारुणान् ॥ २०॥

वैशम्पायनः—

इत्युक्त्वा वासुदेवस्तु चिकीर्षन् सत्यमेव तत् ।
आज्ञापयामास तदा तीर्थं घोषयतेति च ॥ २१॥
अघोषयन्त पुरुषास्तत्र केशवशासनात् ।
तीर्थयात्रा समुद्रे वः कार्येति पुरुषर्षभाः ॥ २२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां मौसलपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
॥ ९६ ॥ मौसपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[ अस्मिन्नध्याये २२॥ श्लोकाः ]

## ॥ तृतीयोऽध्यायः ॥

द्वारकायां वृष्ण्यन्धकादिभिरनर्थसूचकदुःस्वप्नानुभवः ॥ १ ॥ ततः कृष्णाज्ञया सस्त्रीबालवृद्धैः प्रभासक्षेत्रगमनम् ॥ २ ॥ तत्र नृत्तगानादिमहोत्सवानुभवपूर्वकं मद्यादिपानम् ॥ ३ ॥ तत्र सभायां सात्यकिना स्यमन्तकमणिहरणादिममोद्घाटनपूर्वकं कृतवर्मगर्हणम् ॥ ४ ॥ मणिवृत्तान्तश्रवणखिन्नसत्यभामामनःप्रसादनाय सात्यकिना खड्गेन कृतवर्मणः शिरश्छेदनम् ॥ ५ ॥ ततः कृतवर्मसात्यकिपक्षीयैर्मौसलतृणैः परस्परप्रहारेण परस्परमारणम् ॥ ६ ॥

वैशम्पायनः—

काली स्त्री पाण्डुरैर्दन्तैः प्रविश्य हसती निशि ।
स्त्रियस्त्वप्रेषु मुष्णन्ती द्वारकां परिधावति ॥ १

अग्निहोत्रनिकेतेषु वास्तुमध्येषु वेश्मसु ।
वृष्ण्यन्धकानखादन्त स्वप्नेषूल्का भयानकाः ॥ २

अलङ्काराश्च शस्त्राणि ध्वजाश्च कवचानि च ।
ह्रियमाणा ह्यदृश्यन्त रक्षोभिस्सुभयानकैः ॥ ३

तच्चाग्निदत्तं कृष्णस्य वज्रनाभमयस्मयम् ।
दिवमारूढवच्चक्रं वृष्णीनां पश्यतां तदा ॥ ४

[1]युक्तं रथं दिव्यमादित्यवर्णं
हया हरन् पश्यतो दारुकस्य ।
ते सागरस्योपरिष्टादगच्छन्
मनोजवा मेघपुष्पादिवाहाः ॥ ५

तालस्सुपर्णश्च महाध्वजौ तौ
सुपूजितौ रामजनार्दनाभ्याम् ।
उच्चैर्जहुरप्सरसश्च देवा
ऊचुर्दिव्या गम्यतां तीर्थयात्रा ॥ ६

भगवद्दर्शनस्पर्शक्लेदैर्विजितभोगिनाम् ।
दिवः प्रवेशनार्थं ते विमानैर्दिवमाययुः ॥ ७

ततो जिगमिषन्तस्ते वृष्ण्यन्धकमहारथाः ।

---

1. क—हयैर्युक्तो रथो दिव्यो रविवर्णो हरेर्जवैः ।
पश्यतो दारुकस्यैव सागरस्योपरि स्थितः ॥
गच्छन् मनोजवो मेघपुष्पसैन्यादिवाहितः । [ पाठान्तरम् ]

सान्तःपुरास्तीर्थयात्राम् ईहन्तः पुरुषर्षभाः ॥ ८
ततो मनोहरा हृष्टाः पेयं मांसं मधूनि च ।
बहु नानाविधं चक्रुस् त्वरिताः कालचोदिताः ॥ ९
ततस्सीधुषु सक्ताश्च निर्ययुर्नगराद्बहिः ।
यानैरश्वैर्गजैश्चैव श्रीमन्तस्तिग्मतेजसः ॥ १०
ततः प्रभासे न्यवसन् यथोद्दिष्टं यथागृहम् ।
प्रभूतभक्ष्यपेयास्ते सदारा यादवास्तदा ॥ ११
निविष्टांस्तान् निशाम्याथ समुद्रान्ते स योगवित् ।
जगामामन्त्र्य तान् सर्वान् उद्धवोऽर्थविशारदः ॥ १२
तं प्रस्थितं महात्मानम् अभिवाद्य कृताञ्जलिः ।
जानन् विनाशं वृष्णीनां नैच्छद्वारयितुं हरिः ॥ १३
ततः कालपरीतास्ते वृष्ण्यन्धकमहारथाः ।
अपश्यन्नुद्धवं यान्तं तेजसाऽऽवृत्य रोदसी ॥ १४
ब्राह्मणार्थं तु यत् सिद्धम् अन्नं तेषामुपागतम् ।
तद्वानरेभ्यः प्रददू रसगन्धसमन्वितम् ॥ १५
ततस्तूर्यशताकीर्णं नटनर्तकसङ्कुलम् ।
प्रावर्तत महापानं प्रभासे तिग्मतेजसाम् ॥ १६
कृष्णस्य सन्निधौ कामं सहितः कृतवर्मणा ।
अपिबद्युयुधानश्च गदो बभ्रुस्तथैव च ॥ १७

ततः परिषदो मध्ये युयुधानो मदोत्कटः ।
अब्रवीत् कृतवर्माणम् अवहास्यावमत्य च ॥ १८

कः क्षत्रियो हन्यमानस् सुप्तान् हन्यान्मृतानिव ।
तन्न मृष्यन्ति हार्दिक्य यादवा यत् त्वया कृतम् ॥ १९

इत्युक्ते युयुधानेन पूजयामास तद्वचः ।
प्रद्युम्नो रथिनां श्रेष्ठो हार्दिक्यमवमत्य च ॥ २०

न तन्मृष्यति हार्दिक्यो यदवोचत् तदा रुषा ।
निर्दिशन्निव सावज्ञं तदा सव्येन पाणिना ॥ २१

भूरिश्रवाश्छिन्नबाहुर् युद्धे प्रायगतस्त्वया ।
वधेन सुनृशंसेन कथं वीरेण पातितः ॥ २२

इति श्रुत्वा वचस्तस्य केशवः परवीरहा ।
तिर्यक् सरोषं दृष्ट्वा च वीक्षाञ्चक्रे स मन्युमान् ॥ २३

मणिं स्यमन्तकं चैव यस्स लाजितोऽभवत् ।
तां कथां स्मारयामास सात्यकिर्मधुसूदनम् ॥ २४

तच्छ्रुत्वा केशवस्याङ्कम् अगमद्रुदती तदा ।
सत्यभामा प्रकुपिता कोपयन्ती जनार्दनम् ॥ २५

तत उत्थाय सक्रोधस् सात्यकिर्वाक्यमब्रवीत् ॥ २५॥

सात्यकिः—

पञ्चानां द्रौपदेयानां धृष्टद्युम्नशिखण्डिनोः ।

एष गच्छामि पदवीं सत्येन च महाद्युते ॥ २६॥
सौप्तिके ये च निहतास् सुप्ताऽनेन दुरात्मना ।
द्रोणपुत्रसहायेन पापेन कृतवर्मणा ॥ २७॥
[1]समाप्तमायुरस्याद्य यशश्चापि सुमध्यमे ॥ २८

वैशम्पायनः—

इत्येवमुक्त्वा खड्गेन केशवस्य समीपतः ।
अभिसृत्य शिरस्तस्य चिच्छेद कृतवर्मणः ॥ २९
तथाऽन्यानभिनिघ्नन्तं युयुधानं समन्ततः ।
अभ्यधावद्वृषीकेशो विनिवारयिषुस्तदा ॥ ३०
एकीभूतास्ततस्सर्वे कालपर्यायचोदिताः ।
भोजान्धका महाराज शैनेयं पर्यवारयन् ॥ ३१
तान् दृष्ट्वा पततस्तूर्णम् अभिक्रुद्धो जनार्दनः ।
अचुक्रुधन्महातेजा जानन् कालस्य पर्ययम् ॥ ३२
ते तु पानमदाविष्टाश् चोदिताश्चैव मन्युना ।
युयुधानमथाभ्यघ्नन्नुच्छिष्टैर्भाजनैस्तथा ॥ ३३
पात्यमाने तु शैनेये क्रुद्धो रुक्मिणिनन्दनः ।
तदन्तरमुपाधावन्मोक्षयिष्यन्शिनेस्सुतम् ॥ ३४
स भोजैस्सह संयुक्तस् सात्यकिश्चान्धकैस्सह ।
व्यायच्छमानौ तौ वीरौ बाहुद्रविणशालिनौ ॥ ३५
बहुत्वात् तौ हतौ वीरावुभौ कृष्णस्य पश्यतः ॥ ३५॥

1. ख—अर्धत्रयं नास्ति

हतं दृष्ट्वा च शैनेयं पुत्रं च यदुनन्दनः ।
एरकाणां ततो मुष्टिं कोपाज्जग्राह केशवः ॥ ३६॥
तदभून्मुसलं घोरं वज्रकल्पमयस्मयम् ।
जघान तेन कृष्णस्तान् येऽस्य प्रमुखतोऽभवन् ॥ ३७॥
ततोऽन्धकाश्च भोजाश्च शिनयो वृष्णयस्तथा ।
न्यघ्नन्नन्योन्यमाक्रन्दन् मुसलैः कालचोदिताः ॥ ३८॥
यस्तेषामेरकां कश्चिज् जग्राह रुषितो नृप ।
वज्रभूतेव सा तस्य व्यदृश्यत तदा विभो ॥ ३९॥
तृणं च मुसलीभूतम् अपि तत्र व्यदृश्यत ।
ब्रह्मदण्डकृतं सर्वम् इति तद्विद्धि पार्थिव ॥ ४०॥
आविध्याविध्य ते राजन् प्रहरन्ति स्म तैस्तृणैः ।
तद्वज्रभूतं मुसलं व्यदृश्यत तदा दृढम् ॥ ४१॥
अवधीत् पितरं पुत्रः, पिता पुत्रं च भारत ।
मत्ताः परिपतन्ति स्म योधयन्तः परस्परम् ॥ ४२॥
पतङ्गा इव चाग्नौ ते न्यपतन् कुकुरान्धकाः ।
नासीत् पलायने बुद्धिर् वध्यमानस्य कस्यचित् ॥ ४३॥
तत्तु पश्यन् महाबाहुर् जानन् कालस्य पर्ययम् ।
मुसलं समवष्टभ्य तस्थौ स मधुसूदनः ॥ ४४॥
साम्बं च निहतं दृष्ट्वा चारुदेष्णं च माधवः ।
प्रद्युम्नमनिरुद्धं च ततश्चुक्रोध मन्युमान् ॥ ४५॥

गदं वीक्ष्य शयानं च भृशं शोकसमन्वितः ।
स निःशेषं तदा चक्रे शार्ङ्गचक्रगदाधरः ॥ ४६॥
तं निघ्नन्तं महातेजा बभ्रुः परपुरञ्जयः ।
दारुकश्चैव दाशार्हम् ऊचतुस्तन्निबोध मे ॥ ४७॥
भगवन् संहृतं सर्वं त्वया भूयिष्ठमच्युत ।
रामस्य पदमन्विच्छ तत्र गच्छाम यत्र सः ॥ ४८॥

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां मौसलपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
॥ ९६ ॥ मौसलपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[ अस्मिन्नध्याये ४८॥ श्लोकाः ]

## ॥ चतुर्थोऽध्यायः ॥

सर्वयादवेषु निहतेषु बभ्रुदारुकाभ्यां सह बलभद्रमन्वेषमाणेन कृष्णेन वने वृक्षाश्रितस्य तस्य दर्शनम् ॥ १ ॥ ततः कृष्णेन पाण्डवान् प्रति दारुकप्रेषणम् ॥ २ ॥ बलभद्रेण योगात् सर्पशरीरस्वीकारेण समुद्रप्रवेशः ॥ ३ ॥ कृष्णेन शरीरत्यागाय योगेन शयनम् ॥ ४ ॥ व्याधेन मृगबुद्ध्या कृष्णस्य पादतले सायकेन गाढवेधनम् ॥ ५ ॥ पश्चात् समीपमेत्य पश्चात्तापेन व्याधस्य कृष्णप्रणामः ॥ ६ ॥ देवैः कृष्णस्य स्वर्गप्रापणम् ॥ ७ ॥ ततः शरीरत्यागपूर्वकं दिवं गतेन कृष्णेन देवैः पुष्पवर्षणपूर्वकं स्तुत्या प्रत्युद्गम्यमानेन सता निजपरधामप्रवेशः ॥ ८ ॥

वैशम्पायनः—

ततो ययुर्दारुकः केशवश्च
बभ्रुश्च रामस्य पदं नयन्तः ।

अथापश्यद्रामममनन्तवीर्यं
वृक्षाश्रितं चिन्तयानं विविक्ते ॥ १
ततस्समासाद्य महानुभावः
कृष्णस्तदा दारुकमन्वशासत् ॥ १॥

श्रीभगवान्—
गत्वा कुरून् सर्वमिमं महान्तं
पार्थाय शंसस्व वधं यदूनाम् ।
ततोऽर्जुनः क्षिप्रमिहोपयातु
श्रुत्वा मृतान् यादवान् ब्रह्मशापात् ॥ २॥

वैशम्पायनः—
इतीदमुक्तस्स ययौ रथेन
कुरूंस्तदा दारुको नष्टचेताः ।
ततो गते दारुके केशवोऽथ
दृष्ट्वाऽग्रतो बभ्रुमुवाच वाक्यम् ॥ ३॥

श्रीभगवान्—
स्त्रियो भवान् रक्षितुं यातु शीघ्रं
नैता हिंस्युर्दस्यवो वित्तभावात् ॥ ४

वैशम्पायनः—
स प्रस्थितः केशवेनानुशिष्टो
मदातुरो ज्ञातिवधार्दितश्च ॥ ४॥
तं वै यान्तं सन्निधौ केशवस्य
त्वरन्तमेकं सहसैव बभ्रुम् ।

ब्रह्मानुशप्तमवधीन्महद्वै
कूटे युक्तं मुसलं लुब्धकस्य ॥ ५॥

ततो दृष्ट्वा निहतं बभ्रुमाह
कृष्णो वाक्यं भ्रातरमग्रजं तु ॥ ६

श्रीभगवान्—
इहैव त्वं मां प्रतीक्षस्व राम
यावत् स्त्रियो ज्ञातिवशाः करोमि ॥ ६॥

वैशम्पायनः—
ततः पुरीं द्वारवतीं प्रविश्य
जनार्दनः पितरं प्राह वाक्यम् ॥ ७

श्रीभगवान्—
सर्वं भवान् रक्षतु नस्समग्रं
धनञ्जयस्यागमनं प्रतीक्षन् ।
रामो वनान्ते प्रतिपालयन् माम्
आस्तेऽद्याहं तेन समागमिष्ये ॥ ८

दृष्टं मयेदं निधनं यदूनां
राज्ञां च पूर्वं कुरुपुङ्गवानाम् ।
[1]नाहं विहीनो यदुभिर्नृवीर
पुरीमिमां द्रष्टुमिहाद्य शक्तः ॥ ९

1. क—नाहं विहीनो मधुभिस्सुवीरैः स्थातुं न शक्तः क्षणमात्रमद्य ।
ख—नाहं विहीनां मधुभिर्नृवीर । ग—नाहं विहीनं मधुभिश्च वीर ।

तपश्चरिष्यामि निबोध तद्वै
रामेण सार्धं वनमभ्युपेतः ॥ ९॥

**वैशम्पायनः—**

इतीदमुक्त्वा शिरसा च पादौ
प्रगृह्य कृष्णोऽथ जगाम तूर्णम् ।
ततश्शब्दो दारुणः प्रादुरासीत्
सस्त्रीकुमारस्य जनस्य तस्य ॥ १०॥

ततोऽब्रवीत् केश[1]वस्तन्निवृत्य
शब्दं श्रुत्वा योषितां क्रोशतीनाम् ॥ ११

**श्रीभगवान्—**

पुरीमिमामेष्यति सव्यसाची
स वो दुःखान्मोचयिता नराभ्यः ॥ ११॥

**वैशम्पायनः—**

ततो गत्वा केशवस्तं ददर्श
रामं तमेकं स्थितमेक एव ॥ १२

अथापश्यद्योगयुक्तस्य तस्य
नागं मुखान्निस्सरन्तं महान्तम् ।
श्वेतं ययौ स च तं वीक्ष्य वीक्ष्य
महार्णवे येन महानुभावः ॥ १३

1. क—वस्तन्निशम्य । ख-ब—वस्तं निवृत्य ।

सहस्रशीर्षा पर्वताभोगवर्ष्मा
रक्ताननस्त्वां तनुं तां विसृज्य ॥ १३॥
सन्दृश्य तं सागरान्तं विशन्तं
सम्यक् तदा सागरः प्रत्यगृह्णात् ॥ १४
नागा दिव्यास्सरितश्चैव सर्वाः
कार्कोटको वासुकिस्तक्षकश्च ।
पृथुश्रवा अरुणः कुञ्जरश्च
मिश्री शङ्खः कुमुदः पुण्डरीकः ॥ १५
तथा नागो धृतराष्ट्रो महात्मा
ह्रादः क्रोधहिंशानिपृष्ठो निकेतुः ।
तथा नागौ चक्रमन्दातिषण्डौ
नाग[1]श्रेष्ठो विमुखश्चाश्वधिश्च ॥ १६
स्वयं राजा वरुणश्चाह देवैः
प्रत्युद्गम्य स्वागतेनाभ्यनन्दत् ॥ १६॥
तेऽपूजयंश्चार्यविधिक्रियाभिस्
सङ्कर्षणं भूधरं शुद्धसत्त्वम् ॥ १७
ततो गते भ्रातरि वासुदेवो
जानन् सर्वा गतयो दिव्यदृष्टिः ।

1. क—श्रेष्ठो दुर्मुखश्चाश्वतीश्च । ख—श्रेष्ठो दुर्मुखश्चाधिगश्च ।
ग—श्रेष्ठो दुर्मुखाश्वधीश्च ।

वने शून्ये विचरंश्चिन्तयानो
भूमौ ततस्संविवेशाप्रमेयतेजाः ॥ १८

सर्वं हि तेन प्राक् तदा प्राप्तमासीद्
गान्धार्या यद्वाक्यमुक्तं स्वधर्मात् ।
दुर्वाससा पायसोच्छिष्टलिप्तो
यच्चाप्युक्तं तच्च सस्मार कृष्णः ॥ १९

[1]-[2]कुलस्त्रीणां सुव्रतानां गवां च
द्विजेन्द्राणां बलमाधाय धर्मे ।
योनिर्लोकानां वरदो ब्रह्मदेवो
गोविन्दाख्यो वासुदेवोऽथ नित्यः ॥ २०

सञ्चिन्तयानोऽन्धकवृष्णिनाशं
कुरुक्षयं चैव महानुभावः ।
मेने ततस्सङ्क्रमणस्य कालं
ततश्चकारेन्द्रियसन्निरोधम् ॥ २१

यथा च लोकस्थितिपालनार्थं
दुर्वासवाक्यप्रतिपालनार्थम् ।
देवोऽपि वा देहविमोक्षहेतोर्
निमित्तमैच्छत् सकलार्थतत्त्ववित् ॥ २२

---

1. क—अर्धद्वयं नास्ति
2. क—स चिन्तयानोऽन्धकवृष्णिनाशम् । [ एकः पादोऽधिकः

स सन्निरुद्धेन्द्रियवाङ्मनास्तु
शिश्ये महायोगमुपेत्य कृष्णः ।
जरश्च तं देशमुपाजगाम
लुब्धस्तदानीं मृगलिप्सुरुग्रः ॥ २३

कृष्णं शयानं स विकृष्य बाणं
विव्याध पादे मृगशङ्कया च ॥ २३॥

अथापश्यत् पुरुषं योगयुक्तं
पीताम्बरं लुब्धकोऽनेकबाहुम् ।
मत्वाऽऽत्मानं त्वपराद्धं तु तस्य
जग्राह पादौ शिरसा चार्तरूपः ॥ २४॥

[1]आश्वासितः पुण्यफलेन भक्त्या
तथाऽनुतापात् कर्मणो जन्मनश्च ।
दृष्ट्वा तथा देवमनन्तवीर्यं
देवैस्स्वर्गं प्रापितस्त्यक्तदेहः ॥ २५॥

गणैर्मुनीनां पूजितस्तत्र कृष्ण
ऊर्ध्वं गच्छन् प्राप्य लोकान् स्वलक्ष्म्या ॥ २६
दिवि प्राप्तं वसवोऽथाश्विनौ च
रुद्रादित्या मरुतो विश्वसङ्घाः ।

2. क—अयं श्लोको नास्ति

प्रत्युद्गमन्नृषयश्चापि सिद्धास्
सब्रह्मकाः पतयश्च प्रजानाम् ॥ २७

ततो राजन् भगवानुग्रतेजा
नारायणः प्रभवश्चाव्ययश्च ।
योगाचार्यो रोदसी व्याप्य लक्ष्म्या
स्थानं चाग्र्यं मण्डलं प्राप योगात् ॥ २८

ततस्समेतैर्मधुसूदनस्तैर्
देवैस्सर्वैर्ऋषिभिश्चारणैश्च ।
गन्धर्वाग्र्यैरप्सरोभिर्वराभिस्
सिद्धैस्साध्यैस्सन्नतैः पूज्यमानः ॥ २९

तं वै देवं प्रत्यनन्दन्त राजन्
मुनिश्रेष्ठा वाग्भिरानर्चुरीशम् ।
गन्धर्वाश्चाप्युपतस्थुस्तुवन्तः
प्रीत्या चैनं पुरुहूतोऽभ्यनन्दत् ॥ ३०

पुरुहूतः—

[1]नमो नमस्ते भगवन् शार्ङ्गधन्वन्
धर्मस्थित्या प्रादुरासीर्धरायाम् ।
कंसाख्यादीन् देवशत्रूंश्च सर्वान्
हत्वा भूमिस्स्थापिता भारतघ्ना ॥ ३१

1. ब—श्लोकचतुष्टयं नास्ति

दिव्यं स्थानमजरं चाप्रमेयं
दुर्विज्ञेयं चागमैर्गम्यमग्र्यम् ।
गच्छ प्रभो रक्ष चार्तिं प्रपन्नान्
कल्पे कल्पे जायमानस्स्वमूर्त्या ॥ ३२

वैशम्पायनः—

इत्येवमुक्त्वा देवसङ्घोऽनुगम्य
श्रिया युक्तं पुष्पवृष्ट्या ववर्ष ।
वाणी ह्यासीत् संश्रिता रूपिणी सा
भानोर्मध्ये प्रविश स्वं च राजन् ॥ ३३

श्रीभगवान्—

भुजैश्चतुर्भिस्समुपेतं ममेदं
रूपं विशिष्टं दिवि वै संस्थितं च ।
भूमौ गतं पूजयताप्रमेयं
सदा हि तस्मिन् निवसामि देवाः ॥ ३४

वैशम्पायनः—

देवा निवृत्तास्तत् पदं नाप्नुवन्तो
बुद्ध्या देवं संस्मरन्तः प्रतीताः ।
ब्रह्माद्यास्ते तद्गुणान् कीर्तयन्तश्
शुभाँल्लोकान् स्वान् प्रपेदुस्सुरेन्द्राः ॥ ३५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
मौसलपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
॥ ५६ ॥ मौसलपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[ अस्मिन्नध्याये ३५ श्लोकाः ]

## ॥ पञ्चमोऽध्यायः ॥

दारुकेण हास्तिनपुरमेत्य पाण्डवेषु सर्वयादवक्षयनिवेदनम् ॥ १ ॥ अर्जुनेन द्वारकामेत्य रुक्मिण्यादिपरिसान्त्वनपूर्वकं वसुदेवगृहं प्रति गमनम् ॥ २ ॥

वैशम्पायनः—

दारुकस्तु कुरून् गत्वा दृष्ट्वा पार्थं स्थितं तदा ।
आचष्ट मुसलैर्वृष्णीन् अन्योन्येनाभिसंहतान् ॥ १

श्रुत्वा विनष्टान् वार्ष्णेयान् सभोजान् जनमेजय ।
पाण्डवाश्शोकसन्तप्ता विव्रस्तमनसोऽभवन् ॥ २

ततोऽर्जुनस्तानामन्त्र्य केशवस्य प्रियस्सखा ।
प्रययौ मातुलं द्रष्टुं नेदमस्तीति चाब्रवीत् ॥ ३

स वृष्णिनिलयं गत्वा दारुकेण सह प्रभो ।
ददर्श द्वारकां वीरो मृतनाथामिव स्त्रियम् ॥ ४

यास्स्म ता लोकनाथेन नाथवत्यः पुराऽभवन् ।
तास्स्मानाथास्तदा नाथं पार्थं दृष्ट्वा विचुक्रुशुः ॥ ५

षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहाः ।
तासामासीन्महान् नादो दृष्ट्वैवार्जुनमागतम् ॥ ६

तास्तु दृष्ट्वा स कौरव्यो बाष्पेण पिहितोऽर्जुनः ।
हीनाः पुत्रैश्च कृष्णेन नाशकत् सोऽभिवीक्षितुम् ॥ ७

तां स्म वृष्ण्यन्धकजलां हयमीनां रथोडुपाम्
वादित्रस्वननिर्घोषां वेश्मतीर्थमहाग्रहाम् ॥ ८
रत्नशैवलसङ्घाटां वप्रप्राकारमालिनीम् ।
रथ्यास्रोतोजलावर्तां चत्वरस्तिमितह्रदाम् ॥ ९
रामकृष्णमहाग्राहां द्वारकां सरितं तदा ।
कालपाशग्रहां घोरां नदीं वैतरणीमिव ॥ १०
तां ददर्शार्जुनो धीमान् विहीनां वृष्णिपुङ्गवैः ।
गतश्रियं निरानन्दां पद्मिनीं शिशिरे यथा ॥ ११
तां दृष्ट्वा द्वारकां पार्थस् ताश्च कृष्णस्य योषितः ।
सस्वरं बाष्पमुत्सृज्य निपपात महीतले ॥ १२
साम्बाजिती सत्यभामा रुक्मिणी च विशाम्पते ।
अभिपत्य प्ररुरुदुः परिवार्य धनञ्जयम् ॥ १३
ततस्तं काञ्चने पीठे समुत्थाप्योपवेश्य च ।
अभिनन्द्य महात्मानं परिवार्योपतस्थिरे ॥ १४
ततस्संस्तूय गोविन्दं कथयित्वा च पाण्डवः ।
आश्वास्य तास्स्त्रियश्चापि मातुलं द्रष्टुमागमत् ॥ १५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां मौसलपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

॥ ९६ ॥ मौसलपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

[ अस्मिन्नध्याये १५ श्लोकाः ]

## ॥ षष्ठोऽध्यायः ॥

वसुदेवेन स्वगृहमागतेऽर्जुने यादवक्षयनिदाननिवेदनपूर्वकं कृष्णानुस्मरणेन परिशोचनम् ॥ १ ॥ तथा तं प्रति कृष्णवचननिवेदनेन राज्यस्त्रीधनादिसमर्पणपूर्वकं स्वेन स्वप्राणत्यजनप्रतिज्ञानम् ॥ २ ॥

---

वैशम्पायनः—

तं शयानं महात्मानं वीरमानकदुन्दुभिम् ।
पुत्रशोकाभिसन्तप्तं ददर्श कुरुनन्दनः ॥ १

तस्याश्रुपरिपूर्णाक्षो व्यूढोरस्को महाभुजः ।
आर्तस्यार्ततरः पार्थः पादौ जग्राह भारत ॥ २

तस्य मूर्धानमाघ्रातुम् इयेषानकदुन्दुभिः ।
स्वस्रीयस्य महाबाहुर् न शशाक च शत्रुहन् ॥ ३

समालिङ्ग्यार्जुनो वृद्धं स भुजाभ्यां महाभुजः ।
रुरोदाथ स्मरञ्छौरिं विललाप सुविह्वलः ॥ ४

भ्रातॄन् पुत्रांश्च पौत्रांश्च दौहित्रांश्च तथैव च ॥ ४॥

वसुदेवः—

यैर्जिता भूमिपालाश्च दैत्याश्च शतशोऽर्जुन ।
तान् दृष्ट्वा नेह पश्यामि जीवाम्यर्जुन दुर्मनाः ॥ ५॥

यौ तावर्जुन शिष्यौ ते प्रियौ बहुमतौ सदा ।
तयोरपनये पार्थ वृष्णयो निधनं गताः ॥ ६॥

यौ तौ वृष्णिप्रवीराणां द्वावेवातिरथौ स्मृतौ ।
प्रद्युम्नो युयुधानश्च कथयन् कत्थसे च यौ ॥ ७॥
नित्यं त्वं कुरुशार्दूल कृष्णश्च मम पुत्रकः ।
तावेव वृष्णिनाशस्य मुखमास्तां धनञ्जय ॥ ८॥
न तु गर्हामि शैनेयं हार्दिक्यं चाहमर्जुन ।
अक्रूरं रौक्मिणेयं च शापो ह्येवात्र कारणम् ॥ ९॥
केशिनं यस्तु कंसं च विक्रम्य हतवान् प्रभुः ।
[1]विदेहमकरोत् पार्थ चैद्यं च मधुसूदनः ॥ १०॥
नैषादिमेकलव्यं च पत्तिं कालिङ्गमागधान् ।
गान्धारान् काशिराजं च मरुभूमौ च पार्थिवान् ॥ ११॥
प्राच्यांश्च दाक्षिणात्यांश्च पार्वतीयांस्तथा नृपान् ॥ १२
सोऽभ्युपेक्षितवान नूनम् अनयान् मधुसूदनः ॥ १२॥
त्वं हि तं नारदश्चैव मुनयश्च सनातनम् ।
गोविन्दमनघं देवम् अभिजानीध्वमच्युतम् ॥ १३॥
प्रत्यपश्यच्च स विभुर् ज्ञातिक्षयमधोक्षजः ।
समुपेक्षितवान् नित्यं स्वयं स मम पुत्रकः ॥ १४॥
गान्धार्या वचनं यत्तद् ऋषीणां च परन्तप ।
तन्नूनमन्यथा कर्तुं नैच्छत् स जगतः प्रभुः ॥ १५॥
प्रत्यक्षं भवतश्चापि तव पौत्रः परन्तप ।

1. क—अर्धश्लोकं नास्ति

अश्वत्थाम्ना हतश्चापि जीवितस्तस्य तेजसा ॥ १६॥
इमांस्तु नैच्छत् स्वान् ज्ञातीन् रक्षितुं स सखा तव ॥ १७
ततस्स पुत्रान् पौत्रांश्च भ्रातॄनथ सखीनपि ।
शयानान् निहतान् दृष्ट्वा कृष्णो मामिदमब्रवीत् ॥ १८

श्रीभगवान्—

सम्प्राप्तोऽद्यायमस्यान्तकालस्स पुरुषर्षभ ।
आगमिष्यति बीभत्सुर् इमां द्वारवतीं पुरीम् ॥ १९
आख्येयं तस्य यद्वृत्तं वृष्णीनां वैशसं महत् ॥ १९॥
सखा नूनं महातेजाश् श्रुत्वैनमनयं प्रभो ।
आगन्ता क्षिप्रमेवेह न मेऽत्रास्ति विचारणा ॥ २०॥
योऽहं तमर्जुनं विद्धि फल्गुनं विद्धि मामिति ।
स यद् ब्रूयात् तथा कार्यम् इति बुद्ध्यस्व माधव ॥ २१॥
स स्त्रीषु प्राप्तकालं वः पाण्डवो बालकेषु च ।
प्रतिपत्स्यति बीभत्सुर् भवतां चौर्ध्वदैहिकम् ॥ २२॥
इमां हि नगरीं सद्यः प्रतियाते धनञ्जये ।
प्राकाराट्टालकोपेतां समुद्रः प्लावयिष्यति ॥ २३॥
अहं हि देशे कस्मिंश्चित् पुण्ये नियममास्थितः ।
कालं काङ्क्षे सद्य एव रामेण प्रहितं हि मे ॥ २४॥

वसुदेवः—

एवमुक्त्वा हृषीकेशो मामचिन्त्यपराक्रमः ।
हित्वा मां बालकैस्सार्धं दिशं कामप्यगात् प्रभो ॥ २५॥

सोऽहं तौ च महात्मानौ चिन्तयन् रामकेशवौ ।
घोरं ज्ञातिवधं चैव न भुञ्जे शोककर्शितः ॥ २६॥
न च भोक्ष्ये न जीविष्ये दिष्ट्या दृष्टोऽसि पाण्डव ।
यदुक्तं पार्थ कृष्णेन तत् सर्वमखिलं कुरु ॥ २७॥
एतत् ते पार्थ राज्यं च स्त्रियो रत्नानि चैव ह ।
इष्टान् प्राणानहं हीमांस् त्यक्ष्यामि रिपुसूदन ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
मौसलपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
॥ ९६ ॥ मौसलपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[ अस्मिन्नध्याये २८॥ श्लोकाः ]

## ॥ सप्तमोऽध्यायः ॥

अर्जुनेन वसुदेवसमाश्वासनपूर्वकं सकलपौरान् प्रति नातिचिरादेव द्वारकायाः समुद्रेण समाप्लावननिवेदनपूर्वकं सर्वेषामिन्द्रप्रस्थं प्रति प्रयाणसन्नाहसञ्चोदना ॥ १ ॥ तथा परेद्युर्योगेन शरीरं त्यक्तवतो वसुदेवस्य पत्नीभिस्सह संस्करणपूर्वकं रामकृष्णशरीरयोर्दाहनम् ॥ २ ॥ ततो वज्रार्जुनपुरस्कारेण सकलपौरजने पुरःपुरः प्रयाते समुद्रेण पश्चाद्भागे पौरजनमुक्ततत्तद्भागस्य कृष्णमन्दिरं विना स्वजलेन समाक्रमणम् ॥ ३ ॥ अर्जुनेन मध्येमार्गं चोरापहृतावशिष्टयादवकलत्रादिभिः सह स्वदेशमेत्य युधिष्ठिराज्ञया वज्रस्येन्द्रप्रस्थराज्येऽभिषेचनम् ॥ ४ ॥ तथा सात्यकिसुतादीनां तत्र तत्र राज्येऽभिषेचनम् ॥ ५ ॥ रुक्मिण्यादिभिः कामिभिरग्निप्रवेशनम् ॥ ६ ॥ सत्यभामादिभिः कामिश्चन तपसे वनगमनम् ॥ ७ ॥

वैशम्पायनः—

एवमुक्तस्ततः पार्थो मातुलेन परन्तप ।
दुर्मना दीनमनसं वसुदेवमुवाच ह ॥ १

अर्जुनः—

नाहं वृष्णिप्रवीरेण मधुभिश्चैव मातुल ।
विहीनां पृथिवीं द्रष्टुं शक्तश्चिरमिह प्रभो ॥ २

राजा च भीमसेनश्च सहदेवश्च पाण्डवः ।
नकुलो याज्ञसेनी च षडेकमनसो वयम् ॥ ३

राज्यसङ्क्रमणे चापि कामोऽयं नित्यमेव हि ।
तमिमं विद्धि सम्प्राप्तं कालं कालविदां वर ॥ ४

सर्वथा वृष्णिदारांस्तु बालवृद्धांस्तथैव च ।
नयिष्ये परिगृह्याहम् इन्द्रप्रस्थमरिन्दम ॥ ५

वैशम्पायनः—

इत्युक्त्वा दारुकमिदं वाक्यमाह स्नुषाः ॥ ५॥

अर्जुनः—

अमात्यान् वृष्णिवीराणां द्रष्टुमिच्छामि मा चिरम् ॥ ६

वैशम्पायनः—

इत्युक्त्वा वृष्णिसिंहानां सुधर्मां यादवीं सभाम् ।
प्रविवेशार्जुनश्शूरश् शोचमानो महाभुजः ॥ ७

तमासनगतं तत्र सर्वाः प्रकृतयस्तथा ।
ब्राह्मणा नागराश्चैव परिवार्योपतस्थिरे ॥ ८

तान् दीनमनसस्सर्वान् निर्भग्नहृतचेतसः ।
उवाचेदं वचः पार्थस् स्वयं दीनतरस्तथा ॥ ९

अर्जुनः—

शक्रप्रस्थमहं नेष्ये वृष्ण्यन्धकजनं स्वयम् ।
इदं हि नगरं सर्वं समुद्रः प्लावयिष्यति ॥ १०

सज्जीकुरुत यानानि रत्नानि विविधानि च ।
वज्रस्तु भवतां राजा शक्रप्रस्थे भविष्यति ॥ ११

सप्तमे दिवसेऽपेते रवौ विमल उद्यते ।
बहिर्वत्स्यामहे सर्वे सज्जीभवत मा चिरम् ॥ १२

वैशम्पायनः—

इत्युक्तास्तेन ते पौराः पार्थेनाक्लिष्टकर्मणा ।
सर्वमाशु तदा चक्रुस् संसिद्ध्यर्थं समुत्सुकाः ॥ १३

तां रात्रिमवसत् पार्थः केशवस्य निवेशने ।
महता शोकमोहेन सहसाऽभिपरिप्लुतः ॥ १४

श्वोभूते तु ततश्शौरिर् वसुदेवः प्रतापवान् ।
युक्त्वाऽऽत्मानं महातेजा जगाम गतिमुत्तमाम् ॥ १५

ततश्शब्दो महानासीद् वसुदेवस्य वेश्मनि ।
दारुणः क्रोशतीनां च रुदतीनां च योषिताम् ॥ १६

प्रकीर्णमूर्धजास्सर्वा विमुक्ताभरणस्रजः ।
उरांसि बाहुभिर्घ्नन्त्यो व्यलपन् करुणं स्त्रियः ॥ १७

तं देवकी च भद्रा च मदिरा रोहिणी तथा ।

अन्वारोहुं व्यवसिता भर्तारं योषितां वराः ॥ १८

[1]ततश्शौरिं नृयुक्तेन बहुमूल्येन भारत ।
यानेन महता पार्थो बहिर्निष्क्रामयत् तदा ॥ १९

तमन्वयुस्तत्र तत्र दुःखशोकसमन्विताः ।
द्वारकावासिनः पौरास् सर्व एव नरर्षभ ॥ २०

तस्याश्वमेधिकास्सर्वे दीप्यमानाश्च पावकाः ।
पुरतस्तस्य यानस्य याजकाश्च समाययुः ॥ २१

अनुजग्मुश्च तं वीरं देव्यस्ता वै स्वलङ्कृताः ।
स्त्रीसहस्रैः परिवृता वधूभिश्च सहस्रशः ॥ २२

यस्तु देशः प्रियस्तस्य जीवतोऽभून्महात्मनः ।
तत्रैनमुपसङ्कल्प्य पितृमेधं प्रचक्रिरे ॥ २३

तं चिताग्निगतं वीरं शूरपुत्रं वराङ्गनाः ।
ततोऽन्वारुरुहुः पत्न्यश् चतस्रः पतिलोकगाः ॥ २४

तं वै चतसृभिस्स्त्रीभिर् अन्वितं पाण्डुनन्दनः ।
अदाहयच्चन्दनैश्च गन्धैरुच्चावचैरपि ॥ २५

ततः प्रादुरभूच्छब्दस् समिद्धस्य विभावसोः ।
सामगानां च निर्घोषो नराणां रुदतामपि ॥ २६

ततो वज्रप्रधानास्ते वृष्णिवीराः कुमारकाः ।

1. ब—इतः सार्धं श्लोकद्वयं नास्ति

सर्व एवोदकं चक्रुस् स्त्रियश्चैव महात्मनः ॥ २७

अलुप्तधर्मं तद्धर्मं कारयित्वा स फल्गुनः ।
जगाम वृष्णयो यत्र विनष्टाः पुरुषर्षभाः ॥ २८

स तान् दृष्ट्वा निपतितान् भूतले दुःखितो भृशम् ।
बभूवातीव कौरव्यः प्राप्तकालं चकार ह ॥ २९

यथाप्रधानकं चैषां चक्रे सर्वास्तथा क्रियाः ।
ये हता ब्रह्मशापेन मुसलैरेरकोद्भवैः ॥ ३०

ततो भगवतो देहं दृष्ट्वाऽऽश्लिष्य प्रलप्य च ।
स्मृत्वा तद्वचनं सर्वं मोहशोकोपबृंहितः ॥ ३१

ततश्शरीरे रामस्य वासुदेवस्य चोभयोः ।
अन्वीक्ष्य दाहयामास पुरुषैराप्तकारिभिः ॥ ३२

[1]स तेषां विधिवत् कृत्वा प्रेतकार्याणि पाण्डवः ।
सप्तमे दिवसे प्रायाद् रथमारुह्य सत्वरः ॥ ३३

अश्वयुक्तै रथैश्चापि गोखरोष्ट्ररथैरपि ।
स्त्रियश्च वृष्णिवीराणां रुदन्त्यश्शोककर्शिताः ॥ ३४

अनुजग्मुर्महात्मानं पाण्डुपुत्रं धनञ्जयम् ।
भृत्यास्त्वन्धकवृष्णीनां सादिनो रथिनश्च ये ॥ ३५

---

1. क—अष्टौ महिष्यः कृष्णस्य रुक्मिणीप्रमुखा नृप ।
रेवती च महाभागा विविशुर्जातवेदसः ॥
तयोश्शरीरमेक्यैतत् सत्सङ्गाह्लादशीतले ॥ [ अधिकः पाठः ]

[1]वीरहीना वृद्धबालाः पौरजानपदास्तथा ।
ययुस्ते परिवार्याथ कलत्रं पार्थशासनात् ॥ ३६

कुञ्जरैश्च गजारोहा ययुश्शैलनिभैस्तथा ।
सपादरक्षैस्संयुक्तास् सोत्तरायुधिका ययुः ॥ ३७

पुत्राश्चान्धकवृष्णीनां सर्वे पार्थमनुव्रताः ।
ब्राह्मणाः क्षत्रिया वैश्याश् शूद्राश्चैव महाधनाः ॥ ३८

दश षट् च सहस्राणि वासुदेवावरोधनम् ।
पुरस्कृत्य ययुर्वज्रं [2]पौत्रं कृष्णस्य धीमतः ॥ ३९

बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च ।
भोजवृष्ण्यन्धकस्त्रीणां हतनाथानि निर्ययुः ॥ ४०

तत् सागरसमप्रख्यं वृष्णिचक्रं महर्द्धिमत् ।
उवाह रथिनां श्रेष्ठः पार्थः परपुरञ्जयः ॥ ४१

निर्यांते तु जने तस्मिन् सागरो मकरालयः ।
द्वारकां रत्नसम्पूर्णां जलेनाप्लावयत् तदा ॥ ४२

यद्यद्धि पुरुषव्याघ्रो भूमेस्तस्या व्यमुञ्चत ।
तत्तत् सम्प्लावयामास सलिलेन स सागरः ॥[3] ४३

---

1. ब—अर्धपद्यकं नास्ति 2. क-ख-ङ—गोत्रं ।
3. क—वासुदेवस्य भवनं न प्लावयति सागरः ।
सहस्रपादमद्यापि दृश्यते तन्महार्णवे ॥ [अधिकः पाठः]

तदद्भुतमभिप्रेक्ष्य द्वारकानिलयो जनः ।
तूर्णात् तूर्णतरं प्रायाद् अहो दैवमिति ब्रुवन् ॥ ४४

तान् वनेषु च रम्येषु पर्वतेषु नदीषु च ।
निवसन्नानयामास वृष्णिवीरान् धनञ्जयः ॥ ४५

स पञ्चनदमासाद्य श्रीमानतिसमृद्धिमत् ।
देशे गोपशुधान्याढ्ये निवेशमकरोत् प्रभुः ॥ ४६

ततः कामस्समभवद् दस्यूनां निहतेश्वराः ।
दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन भारत ॥ ४७

ततस्ते पापकर्माणो लोभोपहतचेतसः ।
आभीरा मन्त्रयामासुस् समेत्याशुभदर्शनाः ॥ ४८

अयमेकोऽर्जुनो योद्धा वृद्धबालं हतेश्वरम् ।
नयत्यस्मानतिक्रम्य योधाश्चेमे हतौजसः ॥ ४९

[1]ततो यष्टिप्रहरणा दस्यवस्ते सहस्रशः ।
अन्वधावन्त वृष्णीनां जनं तं लोप्त्रहारिणः ॥ ५०

महता सिंहनादेन प्राद्रवन्तः पृथक् पृथक् ।
अभिपेतुर्धनार्थं ते कालपर्यायचोदिताः ॥ ५१

ततो निधृत्य कौन्तेयस् सहसा सपदानुगः ।

1. क—भीष्मद्रोणमुखान् हत्वा निवातकवचानपि ।
जित्वा शक्रं च रुद्रं च सोऽज्ञानाद्भयमन्यते ॥ [ अधिकः पाठः ]

उवाच तान् महाबाहुर् अर्जुनः प्रहसन्निव ॥ ५२

अर्जुनः—

निवर्तध्वमधर्मज्ञा यदि स्थ न मुमूर्षवः ।
नेदानीं शरनिर्दग्धाश् शेष्यध्वं निहता मया ॥ ५३

वैशम्पायनः—

तथोक्तास्तेन वीरेण कदर्थीकृत्य तद्वचः ।
अभिपेतुर्जनं मूढा वार्यमाणाः पुनः पुनः ॥ ५४

ततोऽर्जुनो धनुर्दिव्यं गाण्डीवमजयं युधि ।
आरोपयितुमारेभे यत्नादिव कथञ्चन ॥ ५५

चकार सज्यं कृच्छ्रेण सम्भ्रमे तुमुले सति ।
[1]चिन्तयामास चास्त्राणि न च सस्मार तान्यपि ॥ ५६

वैकृतं तन्महद्दृष्ट्वा भुजवीर्ये तथा [2]युधि ।
दिव्यानां च तथाऽस्त्राणां विनाशाद्व्रीडितोऽभवत् ॥ ५७

वृष्णियोधाश्च ते सर्वे गजाश्वरथयोधिनः ।
न शेकुरावर्तयितुं ह्रियमाणं स्वकं धनम् ॥ ५८

कलत्रस्य बहुत्वात्तु सम्पतन् स ततस्ततः ।
प्रयत्नमकरोत् पार्थो जनस्य परिरक्षणे ॥ ५९

1. क—त्वकृमिवज्रशराश्चकुरस्त्रा गाण्डीवधन्वना । [ अधिकः पाठः ]
2. क-ख-घ—युधे ।

मिषतां सर्वयोधानां ततस्ताः प्रमदोत्तमाः ।
समन्ततो ह्यकर्षन्त कामाद्यान्याः प्रदुद्रुवुः ॥ ६०

ततो गाण्डीवनिर्मुक्तैश् शरैः पार्थो धनञ्जयः ।
जघान दस्यून् सोद्वेगो वृष्णिभृत्यैस्समाहितः ॥ ६१

क्षणेन तस्य ते राजन् क्षयं जग्मुः पतत्रिणः ।
अक्षयाश्च पुरा भूत्वा क्षीणाः क्षतजभोजनाः ॥ ६२

स शरक्षयमासाद्य दुःखशोकसमाहतः ।
धनुष्कोट्या तदा दस्यून् अवधीद्भरतर्षभ ॥ ६३

धनञ्जयस्तदा दैवं निश्चित्य मनसा प्रभुः ।
दुःखशोकसमाविष्टो निश्श्वासपरमोऽभवत् ॥ ६४

अस्त्राणां तु विनाशेन भुजवीर्यस्य च क्षयात् ।
धनुषश्चाविधेयत्वाच् छराणां प्रक्षयेण च ॥ ६५

बभूव विमना राजन् दैवमेव विचिन्तयन् ॥ ६५॥

ततस्सशेषमादाय कलत्रस्य महामतिः ।
हतभूयिष्ठरत्नस्य कुरुक्षेत्रमवातरत् ॥ ६६॥

---

1. क-घ—न्यवर्तत ततो राजन् नेदमस्तीति चाब्रवीत् ॥
[ अधिकः पाठः ]

[1]युधिष्ठिरस्यानुमते तत्र तत्र कुमारकान् ।
न्यवेशयत कौरव्यस् तत्र तत्र समन्ततः ॥ ६७॥

हार्दिक्यतनयं पार्थो नगरे मृत्तिकावते ।
दग्धेऽत्र खाण्डवारण्ये राष्ट्रे तं संन्येवशयत् ॥ ६८॥

भोजराजकलत्रं च भृत्यांश्चैषां नरोत्तमः ॥ ६९

तथा वृद्धांश्च बालांश्च स्त्रियश्चादाय पाण्डवः ।
विधेर्विहीनान् स तदा शक्रप्रस्थे न्यवेशयत् ॥ ७०

युधां वरं सरस्वत्यां पुत्रं सात्यकिनः प्रियम् ।
न्यवेशयत धर्मात्मा वृद्धबालपुरस्कृतम् ॥ ७१

इन्द्रप्रस्थे ददौ राज्यं वज्रस्य परवीरहा ।
वज्रेणाक्रूरदारास्तु वार्यमाणाः प्रवव्रजुः ॥ ७२

[2]रुक्मिणी त्वथ गान्धारी [3]शैब्याख्या नाग्नजित्यपि ।
देवी जाम्बवती चैव विविशुर्जातवेदसम् ॥ ७३

सत्यभामा तथा चान्या देव्यः कृष्णस्य सम्मताः ।
वनं प्रविविशुस्सर्वास् तपसे कृतनिश्चयाः ॥ ७४

द्वारकावासिनो ये च पुरुषाः पार्थमन्वयुः ।
यथार्हं संविभज्यैतान् वज्राय प्रददौ जयः ॥ ७५

1. अ—एवं कलत्रमादाय वृष्णीनां हतशेषितम् । [ अधिकः पाठः ]
2. क—श्लोकद्वयं न दृश्यते ।
3. ख-घ—वैशाखी हेमवत्यपि ।

स तत् कृत्वा प्राप्तकालं विनिश्चित्य शुचाऽन्वितः ।
कृष्णद्वैपायनं व्यासं ददर्शासीनमाश्रमे ॥[1] ७६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
मौसलपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

॥ ७६ ॥ मौसलपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

[ अस्मिन्नध्याये ७६ श्लोकाः ]

---

## ॥ अष्टमोऽध्यायः ॥

अर्जुनेन व्यासाश्रमे तद्दर्शनम् ॥ १ ॥ तस्मिन् द्वारकावृत्तान्तनिवेदनम् ॥ २ ॥ व्यासेनार्जुनं प्रति युधिष्ठिरादीनामपि स्वर्गगमनसूचनम् ॥ ३ ॥ ततोऽर्जुनेन हास्तिनपुरमेत्य युधिष्ठिरे द्वारकावृत्तान्तादिनिवेदनम् ॥ ४ ॥

---

वैशम्पायनः—

प्रविश्य त्वर्जुनो राजन्नाश्रमं सत्यवादिनः ।
ददर्शासीनमेकान्ते मुनिं सत्यवतीसुतम् ॥ १

स तमासाद्य धर्मज्ञम् उपतस्थे महाव्रतम् ।
अर्जुनोऽस्मीति नाम्ना वै निवेद्याभ्यवदत् तदा ॥ २

---

1. क—तदुपाश्रित्य यद्वृत्तं परीक्षिदभिमन्युजः ।
दस्यून् सर्वान् जघानाशु स्त्रियो मुक्त्वा प्रवव्रजुः ।
तस्य प्रीता बभूवुस्ते पाण्डवास्सुहृदृणाः ।
अमन्यन्त तदा वीरं स राज्यं ..... ॥ [ अधिकः पाठः ]

स्वागतं तेऽस्त्विति प्राह स मुनिस्सत्यसङ्गरः ।
आस्यतामिति चोवाच प्रसन्नात्मा महामुनिः ॥ ३

तमप्रतीतमनसं निश्श्वसन्तं पुनः पुनः ।
निर्विण्णमनसं दृष्ट्वा पार्थं व्यासोऽब्रवीद्वचः ॥ ४

व्यासः—

नखकेशदशाकुम्भवारिणा किं समुक्षितः ।
आभीरजोऽभियातस्ते ब्राह्मणो निहतस्त्वया ॥ ५

पराजितो वा युद्धेऽपि गतश्रीरिव लक्ष्यसे ।
न वा प्रत्यभिजानामि किमिदं भरतर्षभ ॥ ६
श्रोतव्यं चेन्मया पार्थ शंस मे कुरुपुङ्गव ॥ ६॥

अर्जुनः—

यस्स मेघवपुश्श्रीमान् बृहत्पङ्कजलोचनः ।
स कृष्णस्सह रामेण त्यक्त्वा देहं दिवं गतः ॥ ७॥

तदनुस्मृत्य सम्मोहं सदा शोकं महामते ।
प्रयामि सर्वदा मह्यं मुमूर्षा चोपजायते ॥ ८॥

तद्वाक्यस्पर्शनालोकसुखं त्वमृतसन्निभम् ।
संस्मृत्य देवदेवस्य प्रमुह्याम्यूतमात्मनः ॥ ९॥

मौसले वृष्णिवीराणां विनाशो ब्रह्मशापजः ।
[1]बभूव वीरान्तकरः प्रभासे रोमहर्षणः ॥ १०॥

1. अ—अर्धार्धकं नास्ति

एते शूरा महात्मानस् सिंहदर्पा महाबलाः ।
भोजवृष्ण्यन्धका ब्रह्मन्नन्योन्यं तैर्हतं युधि ॥ ११॥

गदापरिघशक्तीनां सहाः परिघबाहवः ।
त एरकाभिर्निहताः पश्य कालस्य पर्ययम् ॥ १२॥

हतं पञ्चशतं तेषां सहस्रं बाहुशालिनाम् ।
निधनं समरे प्राप्तास् समासाद्य परस्परम् ॥ १३॥

पुनः पुनर्न मृष्यामि विनाशममितौजसाम् ।
चिन्तयानो यदूनां च कृष्णस्य च महात्मनः ॥ १४॥

शोषणं सागरस्येव मन्दरस्येव चालनम् ।
नभसः पतनं चैव शैत्यमग्नेस्तथैव च ॥ १५॥

अश्रद्धेयमहं मन्ये विनाशं सर्वसात्वताम् ।
न चेह स्थातुमिच्छामि लोके कृष्णविनाकृतः ॥ १६॥

अतः कष्टतरं चान्यच् छृणु मे त्वं महामुने ।
मनो मे दीर्यते येन चिन्तयानस्य वै मुहुः ॥ १७॥

प्रेक्षमाणस्य वै ब्रह्मन् वृष्णिदारास्सहस्रशः ।
आभीरैरभिहत्याजौ हृताः पञ्चनदालयैः ॥ १८॥

तत्राहं धनुरादाय न शक्नोमि प्रपूरणे ।
यथा पुरा च मे वीर्यं भुजयोर्न तथाऽभवत् ॥ १९॥

अस्त्राणि मे प्रनष्टानि विविधानि महामुने ।

शराश्च क्षयमापन्नाः क्षणेनैव पुनर्मम ॥ २०॥
पुरुषश्चाप्रमेयात्मा शङ्खचक्रगदाधरः ।
चतुर्भुजः पीतवासाश् श्यामः पद्मायतेक्षणः ॥ २१॥
यस्स याति पुरस्तान्मे रथस्य सुमहाद्युतिः ।
प्रदहन् रिपुसैन्यानि न पश्याम्यहमद्य तम् ॥ २२॥
येन पूर्वं प्रदग्धानि शत्रुसैन्यानि तेजसा ।
शरैर्गाण्डीवनिर्मुक्तैर् अहं पश्चाद्व्यशातयम् ॥ २३॥
तमपश्यन् विरक्तोऽस्मि मुह्यामीव च सत्तम ।
परिनिर्विण्णचेताश्च शान्तिं नोपलभे मुने ॥ २४॥
[1]देवकीनन्दनं देवं वासुदेवमजं प्रभुम् ।
विना जनार्दनं वीरं नाहं जीवितुमुत्सहे ॥ २५॥
श्रुत्वैव हि गतं कृष्णं ममापि मुमुहुर्दिशः ।
प्रनष्टज्ञानवीर्यस्य शून्यस्य परिधावतः ॥ २६॥
उपदेष्टुं मम श्रेयो भवानर्हति सत्तम ॥ २७

व्यासः—

[2]देवांशा देवदेवेन सम्भूतास्ते गतास्सह ।
धर्मव्यवस्थारक्षार्थं देवेन समुपेक्षिताः ॥ २८
ब्रह्मशापविनिर्दग्धा वृष्ण्यन्धकमहारथाः ।

1. क—इदमर्धं नास्ति 2. क—अर्धद्वयं नास्ति

याता जनार्दनेनैव न ताञ्शोचितुमर्हसि ॥ २९
भवितव्यं तथा तद्धि दिष्टमेतन्महात्मना ।
उपेक्षितं च कृष्णेन शक्तेनापि व्यपोहितुम् ॥ ३०
त्रैलोक्यमपि कृष्णो हि कृत्स्नं स्थावरजङ्गमम् ।
प्रभुरेतान् वृथा कर्तुं किमु शापं मनीषिणाम् ॥ ३१
स्त्रियश्च ताः पुरा शप्ताः प्रहासकुपितेन वै ।
अष्टावक्रेण मुनिना तदर्थं त्वद्बलक्षयः ॥ ३२
रथस्य पुरतो याति यस्स चक्रगदाधरः ।
तव स्नेहात् पुराणर्षिर् वासुदेवश्चतुर्भुजः ॥ ३३
कृत्वा भारावतरणं पृथिव्याः पृथुलोचनः ।
मोहयित्वा जगत् सर्वं गतस्स्वस्थानमुत्तमम् ॥ ३४
त्वया त्विह महत् कर्म देवानां पुरुषर्षभ ।
कृतं भीमसहायेन यमाभ्यां च महाभुज ॥ ३५
कृतकृत्यांश्च वो मन्ये संसिद्धान् कुरुपुङ्गव ।
गमनं प्राप्तकालं वस् तद्धि श्रेयो मतं मम ॥ ३६
बलं बुद्धिश्च तेजश्च प्रतिपत्तिश्च भारत ।
भवन्ति भावकालेषु विपद्यन्ति विपर्यये ॥ ३७
कालमूलमिदं विद्धि सर्वं भरतसत्तम ।
काल एव समादत्ते पुनरेतद्यदृच्छया ॥ ३८

स एव बलवान् भूत्वा पुनर्भवति दुर्बलः ।
स एवेशश्च भूत्वा हि परैराज्ञाप्यते पुनः ॥ ३९

कृतकृत्यानि चास्त्राणि गतान्यद्य यथागतम् ।
पुनरेष्यन्ति ते हस्तं यदा कालो भविष्यति ॥ ४०

कालो गन्तुं गतिं मुख्यां भवतामपि भारत ।
एतच्छ्रेयो हि वो मन्ये परमं भवतां ध्रुवम् ॥ ४१

वैशम्पायनः—

एवं वचनमाज्ञाय व्यासस्यामिततेजसः ।
अनुज्ञातो ययौ पार्थो नगरं नागसाह्वयम् ॥ ४२

प्रविश्य च पुरीं वीरस् समासाद्य युधिष्ठिरम् ।
आचष्ट तद्यथावृत्तं वृष्ण्यन्धकजनं प्रति ॥ ४३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां मौसलपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

॥ ९६ ॥ मौसलपर्वणि अष्टमोऽध्यायः ॥ ८ ॥

[ अस्मिन्नध्याये ४३ श्लोकाः ]

॥ मौसलपर्व समाप्तम् ॥ ॥ मौसलपर्व च समाप्तम् ॥

---

॥ अस्मिन् मौसलपर्वणि श्लोकाः ३०० ॥

---

अतःपरं महाप्रस्थानिकं पर्व भविष्यति तस्यायमाद्यः श्लोकः ॥

जनमेजयः—

एवं वृष्ण्यन्धककुले श्रुत्वा मौसलमाहवम् ।
पाण्डवाः किमकुर्वन्त तथा कृष्णे दिवं गते ॥ १

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ १७ ॥ महाप्रस्थानिकपर्व ॥ १७ ॥

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ महाप्रस्थानिकपर्व ॥

[ महाप्रस्थानपर्व ]

### ॥ प्रथमोऽध्यायः ॥

भ्रातृभिर्द्रौपद्या च सह स्वर्गं जिगमिषुणा युधिष्ठिरेण युयुत्सौ राज्यभारनिवेशनपूर्वकं परीक्षितो राज्येऽभिषेचनम् ॥ १ ॥ तथा कृष्णात् पौरानुमतिसम्पादनेन वज्रकलधारणादिपूर्वकं शुना सह गृहात् प्रस्थानम् ॥ २ ॥ अर्जुनेन मध्यमार्गमग्निवचसा सनिधङ्गस्य गाण्डीवस्य वरुणोद्देशेन समुद्रे प्रक्षेपणम् ॥ ३ ॥

जनमेजयः—

एवं वृष्ण्यन्धककुले श्रुत्वा मौसलमाहवम् ।
पाण्डवाः किमकुर्वन्त तथा कृष्णे दिवं गते ॥ १

वैशम्पायनः—

श्रुत्वैवं कौरवो राजा वृष्णीनां कदनं महत् ।
प्रस्थाने मतिमास्थाय वाक्यमर्जुनमब्रवीत् ॥ २

युधिष्ठिरः—

कालः पचति भूतानि सर्वाण्येव महामते ।
कर्मन्यासमहं मन्ये त्वमपि द्रष्टुमर्हसि ॥ ३

वैशम्पायनः—

एवमुक्तस्स कौन्तेयः कालः काल इति ब्रुवन् ।
अन्वपद्यत तद्वाक्यं भ्रातुर्ज्येष्ठस्य वीर्यवान् ॥ ४

अर्जुनस्य मतं ज्ञात्वा भीमसेनो यमौ तथा ।
अन्वपद्यन्त तद्वाक्यं यदुक्तं सव्यसाचिना ॥ ५

ततो युयुत्सुमानाय्य प्रव्रजन् धर्मकाम्यया ।
अभ्यषिञ्चत् स्वराज्ये तु तं राजानं परीक्षितम् ॥ ६

राज्यं परिददौ सर्वं वैश्यापुत्रे युधिष्ठिरः । 7
दुःखार्तो चाब्रवीद्राजा सुभद्रामपराजितः ॥ ७

युधिष्ठिरः—

एष पुत्रस्य ते पुत्रः कुरुराजो भविष्यति ।
यदूनां परिशेषस्य वज्रो राजा कृतश्च ह ॥ ८

अभिषिच्य हास्तिनपुरे शक्रप्रस्थे च यादवः ।
वज्रो राजा त्वया रक्ष्यो मा चाधर्मे मनः कृथाः ॥ ९

वैशम्पायनः—

इत्युक्त्वा धर्मराजस्तां वासुदेवस्य धीमतः ।
मातुलस्य च वृद्धस्य रामादीनां तथैव च ॥ १०

भ्रातृभिस्सह धर्मात्मा कृत्वोदकमतन्द्रितः ।
श्राद्धान्युद्दिश्य सर्वेषां चकार विधिवत् तदा ॥ ११

[1]द्वैपायनं नारदं च मार्कण्डेयं तपोधनम् ।
भारद्वाजं याज्ञवल्क्यं हरिमुद्दिश्य यत्नवान् ॥ १२
अभोजयत् स्वादु भोज्यं कीर्तयित्वा च शार्ङ्गिणम् ॥ १२॥

ददौ रत्नानि वासांसि ग्रामानश्वान् रथानपि ।
कन्याश्च द्विजमुख्येभ्यो गा वै शतसहस्रशः ॥ १३॥

कृपमर्च्य महेष्वासम् अर्थमानपुरस्कृतम् ।
[2]आहूय भरतश्रेष्ठ सन्निवेश्यासने तदा ॥ १४॥

शिष्यं परीक्षितं तस्मै ददौ सम्पूज्य सत्तमः ॥ १५

ततस्तु प्रकृतीस्सर्वास् समानीय युधिष्ठिरः ।
सर्वमाचष्ट राजर्षिश् चिकीर्षितमथात्मनः ॥ १६

ते श्रुत्वैव वचस्तस्य पौरजानपदा जनाः ।
भृशमुद्विग्नमनसो नाभ्यनन्दन्त तद्वचः ॥ १७

नैवं कर्तव्यमिति ते तदोचुस्तं नराधिपम् ।
न च राजा तथाऽकार्षीत् कालपर्यायवित् तदा ॥ १८

ततोऽनुमान्य धर्मात्मा पौरजानपदं जनम् ।

---

1. क-ख-घ—सार्धश्लोकः नास्ति
2. घ—कोश एवेदमर्धं दृश्यते

गमनाय मतिं चक्रे कृष्णस्य गमनादपि ॥ १९

वर्तमाने विवादे तु वास्तुविक्रयणं प्रति ।
धनेच्छा युगपत् प्राप्ता क्रेतृतत्स्वामिभूभृताम् ॥ २०

प्राप्तं कलियुगं ज्ञात्वा सहदेवो हसन्निव ।
राज्ञस्तु कथयामास धर्मो नष्टस्तु सङ्करः ॥ २१

श्रुत्वा सुदुर्मना राजा पर्याप्तं जीवितं मम ।
इति स्म राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः ॥ २२

उत्सृज्याभरणान्यङ्गाज् जगृहे वल्कलान्युत ॥ २२॥

भीमार्जुनौ यमौ चैव द्रौपदी च यशस्विनी ।
तथैव सर्वे जगृहुर् वल्कलानि जनाधिप ॥ २३॥

विधिवत् कारयित्वेष्टिं नैष्ठिकीं भरतर्षभाः ।
[1]समुत्सृज्याप्सु सर्वेऽग्नीन् प्रतस्थुर्भरतर्षभाः ॥ २४॥

ततः प्ररुरुदुस्सर्वास् स्त्रियो दृष्ट्वा नरर्षभान् ।
प्रस्थितान् द्रौपदीषष्ठान् पुरा द्यूतजितानिव ॥ २५॥

हर्षो बभूव भ्रातॄणां सर्वेषां गमनं प्रति ।
युधिष्ठिरमतिं ज्ञात्वा वृष्णिक्षयमवेक्ष्य च ॥ २६॥

भ्रातरः पञ्च कृष्णा च षष्ठी श्वा चैव सप्तमः ।
आत्मना सप्तमो राजा निर्ययौ नागसाह्वयात् ॥ २७॥

1. क-ख—इदमर्धं नास्ति

पौरैरनुगतो दूरं सर्वैरन्तःपुरैस्तथा ॥ २८
न चैनमशकत् कश्चिन्निवर्तस्वेति भाषितुम् ।
न्यवर्तन्त ततस्सर्वे जना नगरवासिनः ॥ २९
कृपप्रभृतयश्चैव युयुत्सुं पर्यवारयन् ।
[1]विवेश गङ्गां कौरव्य कौरव्यभुजगात्मजा ॥ ? ३०
चित्राङ्गदा ययौ चापि मणल्लूरुपुरं प्रति ।
शिष्टाः परीक्षितं त्वन्या मातरः पर्यवारयन् ॥ ३१
पाण्डवाश्च महात्मानो द्रौपदी च यशस्विनी ।
कृतोपवासाः कौरव्याः प्रययुः प्राङ्मुखास्तदा ॥ ३२
योगयुक्ता महात्मानस् त्यागधर्ममुपेयुषः ।
अभिजग्मुर्बहून् देशान् सरितस्सागरांस्तथा ॥ ३३
युधिष्ठिरो ययावग्रे भीमस्तु तदनन्तरम् ।
अर्जुनस्तस्य चान्वेव यमौ चैव यथाक्रमम् ॥ ३४
पृष्ठतस्तु वरारोहा श्यामा पद्मायतेक्षणा ।
द्रौपदी योषितां श्रेष्ठा ययौ भरतसत्तम ॥ ३५
श्वा चैवानुययौ चैतान् पाण्डवान् प्रस्थितान् वने ।
क्रमेण ते ययुर्वीरा लौहित्यं सलिलार्णवम् ॥ ३६
गाण्डीवं च धनुर्दिव्यं न मुमोच धनञ्जयः ।

1. क—अर्धश्लोकं नास्ति

रत्नलोभान्महाराज तावक्षय्यौ महेषुधी ॥ ३७

अग्निं ततस्ते ददृशुर् दीप्तं शैलमिवाग्रतः ।
मार्गमावृत्य तिष्ठन्तं साक्षात् पुरुषविग्रहम् ॥ ३८

ततो देवस्स सप्तार्चिः पाण्डवानिदमब्रवीत् ॥ ३८॥

अग्निः—

भो भो पाण्डुसुता वीराः पावकं मां निबोधत ॥ ३९

युधिष्ठिर महाबाहो भीमसेन परन्तप ।
अर्जुनाश्विसुतौ वीरौ निबोधत वचो मम ॥ ४०

अहमग्निः कुरुश्रेष्ठा मया दग्धं च खाण्डवम् ।
अर्जुनस्य प्रतापेन तस्य नारायणस्य च ॥ ४१

अयं वः फल्गुनो भ्राता गाण्डीवं परमायुधम् ।
परित्यज्य वनं यातु नानेनार्थोऽस्ति कश्चन ॥ ४२

चक्रं पूर्वं हि यत् कृष्णे स्थितमासीन्महात्मनि ।
गतं चैतत् पुनर्हस्ते कालेनैष्यति तस्य च ॥ ४३

वरुणादाहृतं पूर्वं मयैतत् पार्थकारणात् ।
गाण्डीवं कार्मुकश्रेष्ठं वरुणायैव दीयताम् ॥ ४४

वैशम्पायनः—

ततस्ते भ्रातरस्सर्वे धनञ्जयमचोदयन् ।
स जले प्राक्षिपत् तत्तु तथाऽक्षय्ये महेषुधी ॥ ४५

यथा घनस्य गगने शब्दो भवति भारत ।
सलिले क्षिप्यमाणस्य गाण्डीवस्य तथा ह्यभूत् ॥ ४६

ततोऽग्निर्भरतश्रेष्ठ तत्रैवान्तरधीयत ।
ययुश्च पाण्डवा वीरास् ततस्ते दक्षिणामुखाः ॥ ४७

ततस्ते त्वन्तरेणैव तीरेण लवणाम्भसः ।
जग्मुर्भरतशार्दूल दिशं दक्षिणपश्चिमाम् ॥ ४८

ततः पुनस्समावृत्ताः पश्चिमां दिशमाश्रिताः ॥ ४८॥

ददृशुर्द्वारकां चापि सागरेण परिप्लुताम् ।
हरिपादाङ्कविन्यासतीर्थीकृतमहाभुवम् ॥ ४९॥

मनोभिः पूजयन्तश्च जनार्दनमनिन्दिताः ।
[1]विलोकयन्तः प्रासादम् उपस्थानगृहं हरेः ॥ ५०॥

उदीचीं पुनरावृत्य ययुर्भरतसत्तमाः ।
प्रदक्षिणं चिकीर्षन्तः पृथिव्या योगधर्मिणः॥ ५१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
महाप्रस्थानिकपर्वणि प्रथमोऽध्यायः ॥ १ ॥

॥ ५७ ॥ महाप्रस्थानपर्वणि प्रथमोऽध्यायः ॥ १ ॥

[ अस्मिन्नध्याये ५१॥ श्लोकाः ]

---

1. क—कोश एकस्मिन्नेवेदमर्धं दृश्यते

## ॥ द्वितीयोऽध्यायः ॥

मेरुगिरिं प्रति गच्छन्तं युधिष्ठिरं ज्यैष्ठ्यक्रमादनुगच्छत्सु द्रौपद्यादिषु योगभ्रंशात् क्रमेण भूमौ निपतत्सु भीमप्रभृतं तं प्रति युधिष्ठिरेण तेषां पतने हेतुकथनम् ॥ १ ॥ तथा ततश्शुना केवलमनुगम्यमानेन सता पुरोगमनम् ॥ २ ॥

वैशम्पायनः—

ततस्ते नियतात्मान उदीचीं दिशमास्थिताः ।
ददृशुर्योगयुक्ताश्च हिमवन्तं महागिरिम् ॥ १

तं चाप्यतिक्रमन्तस्ते ददृशुर्वालुकार्णवम् ।
अवेक्षन्तो महामेरुं शैलं शिखरिणां वरम् ॥ २

तेषां तु गच्छतां शीघ्रं सर्वेषां योगधर्मिणाम् ।
याज्ञसेनी भ्रष्टयोगा निपपात महीतले ॥ ३

तां तु प्रपतितां दृष्ट्वा भीमसेनो महाबलः ।
उवाच धर्मराजानं याज्ञसेनीमवेक्ष्य ताम् ॥ ४

भीमः—

नाधर्मश्चरितः कश्चिद् राजपुत्र्या परन्तप ।
कारणं किं नु तद्राजन् यत् कृष्णा पतिता भुवि ॥ ५

युधिष्ठिरः—

पक्षपातो महानस्या विशेषेण धनञ्जये ।
तस्येह फलमद्यैषा भुङ्क्ते पुरुषसत्तम ॥ ६

वैशम्पायनः—

एवमुक्त्वाऽनवेक्ष्यैनां ययौ धर्मसुतो नृप ।
समाधाय मनो विद्वान् धृतात्मा पुरुषर्षभः ॥ ७
सहदेवस्ततो धीमान् निपपात महीतले ।
तं चापि पतितं दृष्ट्वा भीमो राजानमब्रवीत् ॥ ८

भीमः—

योऽयमस्मासु सर्वेषु शुश्रूषुरनहङ्कृतः ।
सोऽयं माद्रवतीपुत्रः कस्मान्निपतितो भुवि ॥ ९

युधिष्ठिरः—

आत्मना सदृशं प्राज्ञो नैषोऽमन्यत कञ्चन ।
तेन दोषेण पतितो विद्वानेष नृपात्मजः ॥ १०

वैशम्पायनः—

इत्युक्त्वा तं समुत्सृज्य सहदेवं ययौ तदा ।
भ्रातृभिस्सह कौन्तेयश् शुना चैव युधिष्ठिरः ॥ ११
कृष्णां निपतितां दृष्ट्वा सहदेवं च पाण्डवम् ।
आर्तो बन्धुप्रियश्शूरो नकुलो निपपात ह ॥ १२
तस्मिन् निपतिते वीरे नकुले चारुदर्शने ।
पुनरेव तदा भीमो राजानमिदमब्रवीत् ॥ १३

भीमः—

योऽयमक्षुद्रकर्मा ते भ्राता वचनकारकः ।

रूपेणाप्रतिमो लोके नकुलः पतितो भुवि ॥ १४

वैशम्पायनः—

इत्युक्तो भीमसेनेन प्रत्युवाच युधिष्ठिरः ।
नकुलं प्रति धर्मात्मा सर्वबुद्धिमतां वरः ॥ १५

युधिष्ठिरः—

रूपेण मत्समो नास्ति कश्चिदित्यस्य दर्शनम् ।
सुरूपश्चाहमेवैक इत्यस्य मनसि स्थितम् ॥ १६

नकुलः पतितस्तस्माद् आगच्छ त्वं वृकोदर ।
यस्य यद्धितं भीम सोऽवश्यं तदुपाश्नुते ॥ १७

वैशम्पायनः—

तांस्तु प्रपतितान् दृष्ट्वा पाण्डवश्श्वेतवाहनः ।
पपात शोकसन्तप्तस् ततो नु परवीरहा ॥ १८

तस्मिंस्तु पुरुषव्याघ्रे पतिते शक्रतेजसि ।
म्रियमाणे दुराधर्षे भीमो राजानमब्रवीत् ॥ १९

भीमः—

अनृतं न स्मराम्यद्य स्वैरेष्वपि महात्मनः ।
अथ कस्य विकारोऽयं येनायं पतितोऽर्जुनः ॥ २०

युधिष्ठिरः—

एकाह्ना निर्दहेयं वै शत्रूनित्यर्जुनोऽब्रवीत् ।
न च तत् कृतवानेष शूरमानी ततोऽपतत् ॥ २१

अवमेने धनुर्ग्राहान् एष सर्वांस्तु फल्गुनः ।
यथा चोक्तं तथा चैव कर्तव्यं भूतिमिच्छता ॥ २२

वैशम्पायनः—

इत्युक्त्वा प्रस्थितो राजा भीमोऽथ निपपात ह ।
पतितश्चाब्रवीद्भीमो धर्मराजं युधिष्ठिरम् ॥ २३

भीमः—

भो भो राजन्नवेक्षस्व पतितं मां प्रियं तव ।
किंनिमित्तं च पतनं ब्रूहि मे यदि वेत्थ ह ॥ २४

युधिष्ठिरः—

अतिभुक्तं च भवता प्राणेन च विकत्थसे ।
अनवेक्ष्य परं पार्थ तेनासि पतितः क्षितौ ॥ २५

वैशम्पायनः—

इत्युक्त्वा तं महाबुद्धिर् जगामानवलोकयन् ।
श्वा त्वेकोऽनुययौ यस्ते बहुशः कथितो मया ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्याम्
महाप्रस्थानिकपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

॥ ५७ ॥ महाप्रस्थानपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

[ अस्मिन्नध्याये २६ श्लोकाः ]

## ॥ तृतीयोऽध्यायः ॥

शुना सह गच्छन्तं युधिष्ठिरं प्रति इन्द्रेण स्वर्गगमनाय निजरथारोहणचोदना ॥ १ ॥ युधिष्ठिरे शुना विना रथारोहणमशोचयमाने यमेन निजस्वरूपप्रकाशनेन तत्प्रशंसनम् ॥ २ ॥ ततो यमेन्द्रादिभी रथेन स्वर्गं प्रापितेन युधिष्ठिरेण तत्र भीमाद्यदर्शनादिन्द्रं प्रति भ्रात्रादीन् विना स्वस्य स्वर्गेऽप्यनभिरुचिकथनपूर्वकं तत्समीपगमनेच्छानिवेदनम् ॥ ३ ॥

वैशम्पायनः—

ततस्सन्नादयञ्शक्रो दिवं भूमिं च सर्वशः ।
रथेनोपययौ पार्थम् आरोहेत्यब्रवीत् तदा ॥ १

स्वभ्रातॄन् पतितान् दृष्ट्वा धर्मराजो युधिष्ठिरः ।
अब्रवीच्छोकसन्तप्तस् सहस्राक्षमिदं वचः ॥ २

युधिष्ठिरः—

भ्रातरः पतिता मेऽत्र आगच्छेयुर्मया सह ।
न विना भ्रातृभिस्स्वर्गम् इच्छेयं त्रिदशाधिप ॥ ३

सुकुमारी सुखार्हा च राजपुत्री पुरन्दर ।
साऽस्माभिस्सह गच्छेत तद्भवाननुमन्यताम् ॥ ४

इन्द्रः—

भ्रातॄन् द्रक्ष्यसि पुत्रांस्त्वम् अग्रतस्त्रिदिवं गतान् ।
कृष्णया सहितान् सर्वान् मा शुचो भरतर्षभ ॥ ५

[1]निक्षिप्य मानुषं देहं गतास्ते भरतर्षभ ।
अनेन त्वं शरीरेण स्वर्गं गन्ता न संशयः ॥ ६

युधिष्ठिरः—

अयं श्वा भूतभव्येश मद्भक्तो नित्यमेव ह ।
स गच्छेत मया सार्धम् आनृशंस्ये हि मे मतिः ॥ ७

इन्द्रः—

अमर्त्यत्वं मत्समत्वं च राजन्
श्रेयः कृत्स्नं महतीं चैव कीर्तिम् ।
सम्प्राप्तोऽसि स्वर्गसुखानि च त्वं
त्यज श्वानं नात्र नृशंसमस्ति ॥ ८

युधिष्ठिरः—

अनार्यमार्येण सहस्रनेत्र
शक्यं कर्तुं दुष्करमेतदद्य ।
मम श्रिया सङ्गमो नानयाऽस्तु
यस्याः कृते भक्तमहं त्यजेयम् ॥ ९

इन्द्रः—

स्वर्गे लोके श्ववतां नास्ति धिष्ण्यम्
इष्टापूर्तं क्रोधवशा हरन्ति ।
ततो विद्वन् नरदेवाविचार्यं
त्यज श्वानं नात्र विचार्यमस्ति ॥ १०

1. अ-क—इदमर्धं नास्ति

युधिष्ठिरः—

भक्तत्यागं प्राहुरत्यन्तपापं
तुल्यं लोके ब्रह्महत्याकृतेन ।
तस्मान्नाहं ज्ञातिकल्पं त्यजेयं
भक्तं श्वानं स्वर्गसुखार्थमिन्द्र ॥ ११

भीतं भक्तं नान्यदस्तीति चार्तं
प्राप्तं क्षीणं रक्षणे प्राणलिप्सुम्
प्राणत्यागादप्यहं नैव मोक्तुं
यतेयं वै नित्यमेतद्व्रतं मे ॥ १२

इन्द्रः—

शुना दृष्टं क्रोधवशा हरन्ति
दत्तं भुक्तमिष्टमाशीःप्रदानम् ।
तस्माच्छुनस्त्यागमिमं कुरुष्व
शुनस्त्यागादाप्स्यसि देवलोकम् ॥ १३

त्यक्त्वा भ्रातॄन् दयितां चैव कृष्णां
प्राप्तो ह्येकः कर्मणा स्वेन वीर ।
श्वानं चैनं न त्यजसे कथं नु
त्यागं कृत्वा मुह्यसे संस्थितोऽद्य ॥ १४

युधिष्ठिरः—

न विद्यते सदृशैरथापि विग्रहो
मृतैर्मर्त्यानामिति लोकेषु निष्ठा ।

न ते मया जीवयितुं हि शक्यास्
तस्मात् त्यागस्तेषु कृतास्सुरेन्द्र ॥ १५

प्रतिप्रदानं शरणागतस्य
स्त्रिया वधो ब्राह्मणस्वापहारः ।
मित्रद्रोहस्तानि चत्वारि शक्र
भक्तत्यागश्चैव समं मतं मे ॥ १६

वैशम्पायनः—

तद्धर्मराजस्य निशम्य वाक्यं
धर्मस्वरूपी भगवानुवाच ।
युधिष्ठिरं प्रीतियुक्तो नरेन्द्रं
श्लक्ष्णैर्वाक्यैस्संस्तवसम्प्रयुक्तैः ॥ १७

धर्मः—

अनुमान्योऽसि राजेन्द्र सद्वृत्तेन च मेधया ।
अनुक्रोशेन चैतेन सर्वभूतेषु भारत ॥ १८

पुरा द्वैतवने चासि मया पुत्र परीक्षितः ।
पानीयार्थमपक्रान्ता यदा ते भ्रातरो हताः ॥ १९

भीमार्जुनौ परित्यज्य यत्र त्वं भ्रातरावुभौ ।
मात्रोस्सममभीप्सन् वै नकुलं जीवमिच्छसि ॥ २०

अयं श्वा भक्त इत्येव त्यक्तो देवरथस्त्वया ।
तस्मात् स्वर्गे न तुल्यस्ते कश्चिदस्ति नराधिपः ॥ २१

अतस्त्वमक्षयान् लोकान् स्वशरीरेण भारत ।
प्राप्तोऽसि वीरस्थानानि दिव्यां च गतिमुत्तमाम् ॥ २२

वैशम्पायनः—

ततो धर्मश्च शक्रश्च मरुतश्चाश्विनावपि ।
देवा देवर्षयश्चैव रथमारोप्य पाण्डवम् ॥ २३

प्रययुस्त्वैर्विमानैस्ते सिद्धाः कामविहारिणः ॥ २३॥

सर्वे विरजसः प्रीताः पुण्यवाग्बुद्धिकर्मिणः ॥ २४

स तं रथं समास्थाय राजा कुरुकुलोद्वहः ।
ऊर्ध्वमाचक्रमे शीघ्रं तेजसाऽऽवृत्य रोदसी ॥ २५

ततो देवनिकेतस्थो नारदस्सर्वलोकवित् ।
उवाचोच्चैस्तदा वाक्यं बृहद्बादी बृहत्तपाः ॥ २६

नारदः—

ये तु राजर्षयः पूर्वे ये चापि समुपस्थिताः ।
कीर्तिं प्रच्छाद्य तेषां वै कुरुराजोऽधितिष्ठति ॥ २७

लोकानावृत्य यशसा तेजसा वृत्तसम्पदा ।
स्वशरीरेण सम्प्राप्तं नान्यं शुश्रुम पाण्डवात् ॥ २८

तेजांसि यानि दृष्टानि भूमिष्ठेन त्वया विभो ।
वेश्मानि भुवि देवानां पश्यामूनि सहस्रशः ॥ २९

वैशम्पायनः—

[1]नारदस्य वचश्श्रुत्वा राजा वचनमब्रवीत् ।
भ्रातॄनपश्यन् धर्मात्मा स्वपक्षांश्चैव पार्थिवान् ॥ ३०

युधिष्ठिरः—

शुभं वा यदि वा पापं भ्रातॄणां स्थानमद्य मे ।
तदेव प्राप्तुमिच्छामि लोकानन्यान् न कामये ॥ ३१

वैशम्पायनः—

राज्ञस्तु वचनं श्रुत्वा देवराजः पुरन्दरः ।
आनृशंस्यसमायुक्तं प्रत्युवाच युधिष्ठिरम् ॥ ३२

इन्द्रः—

स्थानेऽस्मिन् वस राजेन्द्र कर्मभिर्निर्जिते शुभे ।
किं तन्मानुष्यकं स्नेहम् अद्यापि न विमुञ्चसि ॥ ३३

सिद्धिं प्राप्तोऽसि परमां यथा नान्यः पुमान् क्वचित् ।
नैतत् ते भ्रातरस्थानं सम्प्राप्ताः कुरुनन्दन ॥ ३४

अद्यापि मानुषो भावस् स्पृशति त्वां नराधिप ।
स्वर्गोऽयं पश्य राजर्षीन् सिद्धांश्च त्रिदशालयान् ॥ ३५

वैशम्पायनः—

युधिष्ठिरस्तु देवेन्द्रम् एवंवादिनमीश्वरम् ।
पुनरेवाब्रवीद्धीमान् इदं वचनमर्थवत् ॥ ३६

---

1. ख-घ—इतः श्लोकद्वयं नास्ति

युधिष्ठिरः—

तैर्विना नोत्सहे वस्तुम् इह दैत्यनिबर्हण ।
गन्तुमिच्छामि तत्राहं यत्र मे भ्रातरो गताः ॥ ३७

यत्रासौ बृहती श्यामा बुद्धिसत्त्वसमन्विता ।
द्रौपदी योषितां श्रेष्ठा यत्र चैव सुता मम ॥ ३८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
महाप्रस्थानिकपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

॥ ९७ ॥ महाप्रस्थानपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[ अस्मिन्नध्याये ३८ श्लोकाः ]

॥ महाप्रस्थानपर्व समाप्तम् ॥ ॥ महाप्रस्थानिकं पर्व च समाप्तम् ॥

---

॥ अस्मिन् महाप्रस्थानिकपर्वणि श्लोकाः ११५॥* ॥

---

अतः परं स्वर्गारोहणपर्व भविष्यति । तस्यायमाद्यः श्लोकः ॥

---

जनमेजयः—

स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे ॥ १

---

* यद्यप्यनुक्रमणिकाध्यायोक्तरीत्याऽस्मिन् पर्वणि १२० श्लोकैर्भाव्यम् तथाऽपि ११५॥ श्लोका एवोपलभ्यन्ते ॥

॥ श्रीः ॥

# ॥ महाभारतम् ॥

## ॥ १८ ॥ स्वर्गारोहणपर्व ॥ १८ ॥

॥ श्रीः ॥

# ॥ महाभारतम् ॥

# ॥ स्वर्गारोहणपर्व ॥

[ स्वर्गारोहणपर्व ]

## ॥ प्रथमोऽध्यायः ॥

स्वर्गं गतेन युधिष्ठिरेण तत्र महासमुच्छ्रयेण शोभमानदुर्योधन-दर्शनम् ॥ १ ॥ तथा तदुत्कर्षासहिष्णुतया तदीयदोषोद्घाटनेन तेन सह स्वेन स्वर्गवासानभिरोचननिवेदनपूर्वकं नारदं प्रति स्वस्य भ्रात्रादिदिदृक्षा-निवेदनम् ॥ २ ॥

जनमेजयः—

स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे ॥ १

एतदिच्छाम्यहं श्रोतुं सर्वं विद्धीति मे मतिः ।
महर्षिणाऽभ्यनुज्ञातो व्यासेनामितकर्मणा ॥ २

वैशम्पायनः—

स्वर्गं त्रिविष्टपं प्राप्य तव पूर्वपितामहाः ।

युधिष्ठिरप्रभृतयो यदकुर्वन्त तच्छृणु ॥ ३

स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः ।
दुर्योधनं श्रिया युक्तं ददर्शासीनमासने ॥ ४

भ्राजमानं महावीर्यं वीरलक्ष्म्याऽभिसंवृतम् ।
देवैर्भ्राजिष्णुभिस्साध्यैस् सहितं पुण्यकर्मभिः ॥ ५

ततो युधिष्ठिरो राजा दुर्योधनममर्षितः ।
सहसा सन्निवृत्तोऽभूद् दृष्ट्वा दुर्योधनश्रियम् ॥ ६

ब्रुवन्नुच्चैर्वचस्तान् वै नाहं दुर्योधनेन वै ।
[1]सहितः कामयेयं वै लुब्धेनादीर्घदर्शिना ॥ ७

यत्कृते पृथिवी सर्वा सुहृदो बान्धवास्तथा ।
हतास्माभिः प्रसह्याजौ क्लिष्टैः पूर्वं [2]महावने ॥ ८

द्रौपदी च सभामध्ये पाञ्चाली धर्मचारिणी ।
परिक्लिष्टाऽनवद्याङ्गी गुरुमध्ये तपस्विनी ॥ ९

स्वस्ति देवा न मे कामस् सुयोधनमुदीक्षितुम् ।
तत्राहं गन्तुमिच्छामि यत्र ते भ्रातरो मम ॥ १०

मैवमित्यब्रवीत् तं तु नारदः प्रहसन्निव ॥ १०॥

नारदः—

[3]स्वर्गे निवासे राजेन्द्र विरुद्धं चापि नश्यति ॥ ११

1. ख—अर्धत्रयं नास्ति 2. क—महाहवे। 3. ख—इदमर्धं नास्ति

युधिष्ठिर महाबाहो मैवं वोचः कथञ्चन ।
दुर्योधनं प्रति नृपं शृणु राजन् वचो मम ॥ १२

एष दुर्योधनो राजा पूज्यते त्रिदशैस्सह ।
सद्भिश्च राजप्रवरैर् य इमे स्वर्गवासिनः ॥ १३

वीरलोकगतिं प्राप्तो युद्धे हुत्वाऽऽत्मनस्तनुम् ।
यूयं सर्वे सुरसमा तदेवानेन हिंसिताः ॥ १४

स एष क्षत्रधर्मेण स्थानमेतदवाप्तवान् ।
भये महति योऽभीतो बभूव पृथिवीपतिः ॥ १५

नैतन्मनसि कर्तव्यं पुत्र यद् द्यूतकारितम् ।
द्रौपद्यास्तु परिक्लेशं न चिन्तयितुमर्हसि ॥ १६

ये चान्येऽपि परिक्लेशा युष्माकं द्यूतकारिताः ।
सङ्ग्रामेष्वथवाऽन्यत्र न तान् संस्मर्तुमर्हसि ॥ १७

स्वर्गं गच्छ यथान्यायं राज्ञा दुर्योधनेन च ।
स्वर्गोऽयं नास्ति वैराणि भवन्ति मनुजाधिप ॥ १८

वैशम्पायनः—

नारदेनैवमुक्तस्तु कुरुराजो युधिष्ठिरः ।
भ्रातॄन् पप्रच्छ मेधावी वाक्यं चेदमुवाच ह ॥ १९

युधिष्ठिरः—

यदि दुर्योधनस्यैते वीरलोकास्सनातनाः ।
अधर्मज्ञस्य पापस्य पृथिवीसुहृदां द्रुहः ॥ २०

यत्कृते पृथिवी नष्टा सहया सरथद्विपा ।
वयं च मन्युभिर्दग्धा वैरं प्रतिजिहीर्षवः ॥ २१

ये ते वीरा महात्मानो भ्रातरो मे महाव्रताः ।
सत्यप्रतिज्ञा लोकस्य शूरा वै सत्यवादिनः ॥ २२

तेषामिदानीं ये लोका द्रष्टुमिच्छामि तानहम् ॥ २२॥

कर्णं चैव महात्मानं कौन्तेयं सत्यसङ्गरम् ।
धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान् ॥ २३॥

ये च शस्त्रैर्वधं प्राप्ताः क्षत्रधर्मेण पार्थिवाः ।
क्व नु ते पार्थिवान् ब्रह्मन्नेतान् पश्यामि नारद ॥ २४॥

[1]विराटं द्रुपदं चैव धृष्टकेतुमुखांश्च तान् ।
शिखण्डिनं च पाञ्चाल्यं द्रौपदेयांश्च सर्वशः ॥ २५॥

अभिमन्युं च दुर्धर्षं द्रष्टुमिच्छामि नारद ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां स्वर्गारोहणपर्वणि प्रथमोऽध्यायः ॥ १ ॥

॥ ९८ ॥ स्वर्गारोहणपर्वणि प्रथमोऽध्यायः ॥ १ ॥

[ अस्मिन्नध्याये २६ श्लोकाः ]

---

1. अ-क-ख—ब्रह्मन् न तान् प्रपश्यामि स्वर्गलोकेऽत्र कर्हिचित् ॥
[ अधिकः पाठः ]

## ॥ द्वितीयोऽध्यायः ॥

स्वर्गे कर्णादिबन्धुजनानपश्यता युधिष्ठिरेण देवान् प्रति यत्र कुत्रापि बन्धुजनैस्सहैव स्वस्य निवासेच्छानिवेदनम् ॥ १ ॥ देवैर्युधिष्ठिराय बन्धुजनप्रदर्शनं चोदितेन देवदूतेन तस्य नरकप्रदेशप्रापणम् ॥ २ ॥ दुर्दर्शनरकदर्शनासहिष्णुतया सह दूतेन प्रतिनिवर्तमानेन युधिष्ठिरेण श्रुतपूर्वकण्ठध्वनिश्रवणम् ॥ ३ ॥ ततो युधिष्ठिरपृष्टैस्तैस्तं प्रति स्वेषां कर्णभीमादित्वकथनम् ॥ ४ ॥ ततस्तेन दूतं प्रति इन्द्रे स्वस्य तत्समीपं प्रत्यनागमनचोदना ॥ ५ ॥ दूतेनेन्द्रे युधिष्ठिरचिकीर्षितनिवेदनम् ॥ ६ ॥

---

युधिष्ठिरः—

नेह पश्यामि विबुधा राधेयमितौजसम् ।
भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ ॥ १
जुहुवुर्ये शरीराणि रणवह्नौ महारथाः ।
राजानो राजपुत्राश्च ये मदर्थे हता रणे ॥ २
क्व ते महारथास्सर्वे शार्दूलसमविक्रमाः ।
तैरप्ययं जितो लोकः क्वचित् पुरुषसत्तमैः ॥ ३
यदि लोकानिमान् प्राप्तास् ते च सर्वे महारथाः ।
[1]स्थितं वित्त हि मां देवास् सहितं तैर्महात्मभिः ॥ ४
कच्चिन्न तैरवाप्तोऽयं नृपैर्लोकोऽक्षयश्शुभः ।
न तैरहं विना वत्स्ये बन्धुभिर्भ्रातृभिस्तथा ॥ ५
मातुर्मे वचनं श्रुत्वा तदा सलिलकर्मणि ।

---

1. ब—इदमर्धं नास्ति

कर्णस्य क्रियतां तोयम् इति तप्यामि तेन वै ॥ ६
इदं च परितप्यामि पुनः पुनरहं सुराः ॥ ६॥
यन्मातुस्सदृशौ पादौ तस्याहममितौजसः ।
दृष्ट्वैव तं नानुगतः कर्णं परबलार्दनम् ॥ ७॥
न ह्यस्मान् कर्णसहितान् जयेच्छक्रोऽपि संयुगे ॥ ८
तमहं यत्र तत्रस्थं द्रष्टुमिच्छामि सूर्यजम् ।
अविज्ञानान्मया योऽसौ घातितस्सव्यसाचिना ॥ ९
भीमं च भीमविक्रान्तं प्राणेभ्योऽपि प्रियं मम ।
अर्जुनं चेन्द्रसङ्काशं यमौ चापि महाबलौ ॥ १०
द्रष्टुमिच्छामि तां चापि पाञ्चालीं धर्मचारिणीम् । १०॥
न चेह स्थातुमिच्छामि सत्यमेतद् ब्रवीमि वः ॥ ११
किं मे भ्रातृविहीनस्य स्वर्गेण सुरसत्तमाः ।
यत्र ते स मतस्स्वर्गो नायं स्वर्गो मतो मम ॥ १२

देवाः—

यदि तत्र तव श्रद्धा गम्यतां तत्र मा चिरम् ।
प्रिये हि तव वर्तामो देवराजस्य शासनात् ॥ १३

वैशम्पायनः—

इत्युक्त्वा ते ततो देवा देवदूतमथाब्रुवन् ।
युधिष्ठिरस्य सुहृदो दर्शयेति परन्तप ॥ १४
ततः कुन्तीसुतो राजा देवदूतश्च जग्मतुः ।
सहितौ राजशार्दूल यत्र ते पुरुषर्षभाः ॥ १५

अग्रतो देवदूतश्च ययौ राजा च पृष्ठतः ।
पन्थानमशुभं दुर्गं सेवितं पापकर्मभिः ॥ १६
तमसा संवृतं घोरं केशशैवलशाद्वलम् ।
पूक्तं पापकृतां गन्धैर् मांसशोणितकर्दमम् ॥ १७
दंशोत्थानं सझल्लीकं मक्षिकामशकान्वितम् ।
इतश्चेतश्च कुणपैस् समन्तात् परिवारितम् ॥ १८
अस्थिकेशसमाकीर्णं कृमिकीटसमाकुलम् ।
ज्वलनेन प्रदीप्तेन समन्तात् परिवारितम् ॥ १९
अयोमुखैश्च काकोलैः गृध्रैश्चैव समन्वितम् ।
सूचीमुखैस्तथा प्रेतैर् विन्ध्यशैलोपमैर्वृतम् ॥ २०
मेदोरुधिरसम्पृक्तैर् भिन्नजानूरुबाहुभिः ।
निकृत्तोदरपादैश्च तत्र तत्र प्रवेशितैः ॥ २१
स तं कुणपदुर्गन्धम् अशिवं रोमहर्षणम् ।
जगाम राजा धर्मात्मा मध्येन बहु चिन्तयन् ॥ २२
सुदुर्गमां वैतरणीं पापपूर्णां ददर्श ह ।
असिपत्रवनं चैव निशितं क्षुरसंवृतम् ॥ २३
करम्भवालुकास्तप्ताः पृथुलाश्च शिलाः पृथक् ।
लोहकुम्भीश्च तैलस्य काथ्यमानास्समन्ततः ॥ २४
कूटशाल्मलिनं चैव दुस्स्पर्शं तीक्ष्णकण्टकम् ।
ददर्श चान्याः कौन्तेयो यातनाः पापकर्मिणाम् ॥ २५

स तं दुर्गन्धमालक्ष्य पुरुषं तमुवाच ह ॥ २५॥

युधिष्ठिरः—

कियदध्वानमस्माभिर् गन्तव्यमिदमीदृशम् ।
क च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि ॥ २६॥
देशोऽयं कश्च देवानाम् एतदिच्छामि वेदितुम् ॥ २७

वैशम्पायनः—

स तं निवृते श्रुत्वा धर्मराजस्य भाषितम् ।
[1]देवदूतोऽब्रवीच्चैनम् एतावद्गमनं तव ॥ २८
निवर्तितव्यो हि मया तथाऽसम्युक्तो दिवौकसैः ।
यदिश्रान्तोऽसि राजेन्द्र त्वमथागन्तुमर्हसि ॥ २९
युधिष्ठिरस्तु निर्विण्णस् तेन गन्धेन मूर्छितः ।
निवर्तने धृतमनाः पर्यवर्तत भारत ॥ ३०
स सन्निवृत्तो धर्मात्मा दुःखशोकसमन्वितः ।
शुश्राव तत्र वदतां दीना वाचस्समन्ततः ॥ ३१

वाचः—

भो भो धर्मज राजर्षे पुण्याभिजन पाण्डव ।
अनुग्रहार्थमस्माकं तिष्ठ तावन्मुहूर्तकम् ॥ ३२
आयाति त्वयि दुर्धर्षे वाति पुण्यस्समीरणः ।
तव गन्धानुगस्तात तेनास्मान् सुखमागतम् ॥ ३३
ते वयं पार्थ दीर्घस्य कालस्य पुरुषर्षभ ।

---

1. ख—अर्धचतुष्टयं नास्ति

सुखमासादयिष्यामस् त्वां दृष्ट्वा राजसत्तम ॥ ३४
सन्तिष्ठस्व महाबाहो मुहूर्तमिह भारत ।
त्वयि तिष्ठति कौरव्य यातनाऽस्मान् न बाधते ॥ ३५

वैशम्पायनः—

[1]एवं बहुविधा वाचः कृपणा वेदनावताम् ।
तस्मिन् देशे स शुश्राव समन्ताद्वदतां नृप ॥ ३६
तेषां तु वचनं श्रुत्वा दयावान् दीनभाषितम् ।
अहो कृच्छ्रमिति प्राह तस्थौ च स युधिष्ठिरः ॥ ३७
स ता गिरः पुरस्ताद्वै श्रुतपूर्वाः पुनः पुनः ।
ग्लानानां दुःखितानां च नाभ्यजानत पाण्डवः ॥ ३८
अबुध्यमानस्ता वाचो धर्मराजो युधिष्ठिरः ।
उवाच के भवन्तो वै किमर्थं चेह तिष्ठथ ॥ ३९
इत्युक्तास्ते ततस्सर्वे समन्तादपि भाषिरे ॥ ३९॥
कर्णोऽहं भीमसेनोऽहम् अर्जुनोऽहमिति प्रभो ।
नकुलस्सहदेवोऽहं धृष्टद्युम्नोऽहमित्युत ॥ ४०॥
द्रौपदी द्रौपदेयाश्च इत्येवं तत्र चुक्रुशुः ॥ ४१
ता वाचस्स तदा श्रुत्वा तथैव सदृशीर्नृप ।
रोषाद् विममृशे राजा किं न्विदं दैवकारितम् ॥ ४२
किं नु तत् कलुषं कर्म कृतमेभिर्महात्मभिः ॥ ४२॥

1. क—शकुनिप्रमुखानां तु तथा शृण्वन् वचो नृपः । [ अधिकः पाठः ]

कर्णश्च द्रौपदेयाश्च पाञ्चाली च सुमध्यमा ।
त इमे पापगन्धेऽस्मिन् देशे सन्नास्सुदारुणे ॥ ४३॥
न हि जानामि सर्वेषां दुष्कृतं पुण्यकर्मणाम् ॥ ४४
किं कृत्वा धृतराष्ट्रस्य पुत्रो राजा सुयोधनः ।
तथा श्रिया धृतः पापस् सह सर्वैस्सहानुगैः ॥ ४५
महेन्द्र इव लक्ष्मीवान् आस्ते परमपूजितः ।
कस्येदानीं विकारोऽयं य इमे नरकं गताः ॥ ४६
सर्वे धर्मविदश्शूरास् सत्यागमपरायणाः ।
क्षत्रधर्मपराः प्राज्ञा यज्वानस्सत्यसङ्गराः ॥ ४७
किं नु सुप्तोऽस्मि जागर्मि खेदवानश्च चिन्तये ।
अहो चित्तविकारोऽयं स्याद्वा मे चित्तविभ्रमः ॥ ४८
एवं बहुविधं राजा विममर्श युधिष्ठिरः ।
दुःखशोकसमाविष्टश् चिन्ताव्याकुलितेन्द्रियः ॥ ४९
क्रोधमाहारयच्चैव तीव्रं धर्मसुतो नृप ।
देवांश्च गर्हयामास धर्मं चैव महामतिः ॥ ५०
स तीव्रशोकसन्तप्तो देवदूतमुवाच ह ॥ ५०॥

युधिष्ठिरः—

गम्यतां भद्र येषां त्वं दूतस्तेषामुपान्तिकम् ।
न ह्यहं तत्र यास्यामि स्थितोऽस्मीति निवेद्यताम् ॥ ५१॥
मत्संश्रयादिमे दूत सुखिनो भ्रातरो हि मे ॥ ५२

वैशम्पायनः—

इत्युक्तस्स तदा दूतः पाण्डुपुत्रेण धीमता ।
जगाम तत्र यत्रास्ते देवराजश्शतक्रतुः ॥ ५३
निवेदयामास च तद् धर्मराजचिकीर्षितम् ।
यथोक्तं धर्मपुत्रेण सर्वमेव जनाधिप ॥ ५४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां स्वर्गारोहणपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

॥ ५८ ॥ स्वर्गारोहणपर्वणि द्वितीयोऽध्यायः ॥ २ ॥

[ अस्मिन्नध्याये ५४ श्लोकाः ]

---

## ॥ तृतीयोऽध्यायः ॥

तत्रैवावस्थानपरीक्षया परितुष्टेषु यमेन्द्रादिषु युधिष्ठिरसमीपमुपागतेषु तदृष्टपूर्वनरकादीनां क्षणेनान्तर्धानम् ॥ १ ॥ धर्मेण युधिष्ठिरं प्रति सप्रशंसनं तदृष्टनरकस्य परीक्षणायेन्द्रमायासृष्टत्वकथनम् ॥ २ ॥ ततो युधिष्ठिरेण गङ्गायामवगाहनान्मानुषशरीरपरित्यागपूर्वकं दिव्यशरीरपरिग्रहणेन महर्ष्यादिभिः स्तूयमानेन सता सह देवैर्भ्रातृभिरधिष्ठितदिव्यस्थानगमनम् ॥ ३ ॥

---

वैशम्पायनः—

स्थिते मुहूर्तं पार्थे तु धर्मराजे युधिष्ठिरे ।
आजग्मुस्तत्र कौरव्य देवाश्शक्रपुरोगमाः ॥ १
स्वयं विग्रहवान् धर्मो राजानं सम्परीक्ष्य तम् ।
तत्राजगाम यत्रास्ते कुरुराजो युधिष्ठिरः ॥ २

तेषु भास्वरदेहेषु पुण्याभिजनकर्मसु ।
समागतेषु देवेषु व्यगमत् तत् तमो नृप ॥ ३

नाददृश्यत तदा यत्र यातनाः पापकर्मणाम् ।
नदीं वैतरणीं चैव कूटशाल्मलिना सह ॥ ४

लोहकुम्भीदृशलाश्चैव मशकान् दंशकानपि ।
विकृतानि शरीराणि यानि तत्र समन्ततः ॥ ५

ददर्श राजा कौन्तेयस् तान् सर्वान् सुमहाप्रभान् ॥ ५॥

तत्र वायुस्सुखस्पर्शः पुण्यगन्धवहश्शुचिः ।
ववौ देवसमीपस्थश् शीतलो मृदुसम्मितः ॥ ६॥

मरुद्भिस्सह शक्रेण वसवस्तु महाग्निना ।
साध्या रुद्रास्तथाऽऽदित्या ये चान्येऽपि दिवौकसः ॥ ७॥

सर्वे तत्र समाजग्मुस् सिद्धाश्च परमर्षयः ।
यत्र राजा महातेजास् स्थितो धर्मसुतोऽभवत् ॥ ८॥

ततश्शक्रस्सुरपतिश् श्रिया परमया युतः ।
युधिष्ठिरमुवाचेदं सान्त्वपूर्वं हि मानयन् ॥ ९॥

इन्द्रः—

युधिष्ठिर महाबाहो प्रीता देवगणास्त्वया ।
एह्येहि पुरुषव्याघ्र कृतमेतावता विभो ॥ १०॥

सिद्धिः प्राप्ता त्वया राजँल्लोकाश्चाप्यक्षयास्तव ।

भ्रातॄणां सुहृदां चैव गतिर्नित्या सुपूजिता ॥ ११॥
अवश्यं नरकस्तात द्रष्टव्यस्सर्वराजभिः ।
न च मन्युस्त्वया कार्यश् शृणु चेदं वचः परम् ॥ १२॥
शुभानामशुभानां च द्वौ राशी पुरुषर्षभ ॥ १३
यः पूर्वं सुकृतं भुङ्क्ते पश्चान्निरयमेति सः ।
पूर्वं निरयभाग् यश्च पश्चात् स्वर्गमुपैति सः ॥ १४
भूयिष्ठपापकर्मा यस् स पूर्वं स्वर्गमश्नुते ।
भूयिष्ठशुभकर्मा त्वम् अल्पं जिह्मं तवाच्युत ॥ १५
तेन त्वमेवं गमितो मया श्रेयोर्थिना नृप ॥ १५॥
व्याजेन हि त्वया द्रोण उपचीर्णस्सुतं प्रति ।
व्याजेनैव ततो राजन् दर्शितं नरकं तव ॥ १६॥
यथैव त्वं तथा भीमस् तथा पार्थो यमौ तथा ।
तथैव द्रौपदी कृष्णा व्याजेन नरकं गताः ॥ १७॥
आगच्छ नरशार्दूल मुक्तास्ते चापि किल्बिषात् ॥ १८
स्वपक्ष्याश्चैव ये तुभ्यं पार्थिवा निहता रणे ।
सर्वे स्वर्गमनुप्राप्तास् तान् पश्य च नरोत्तम ॥ १९
कर्णश्चैव महेष्वासस् सर्वास्त्रविदुषां वरः ।
स गतः परमां सिद्धिं यदर्थं परितप्यसे ॥ २०
तं पश्य पुरुषव्याघ्रम् आदित्यतनयं विभो ।

स्वस्थो भव महाबाहो जहि शोकं ततो नृप ॥ २१
भ्रातॄन् पुत्रांस्तथा पश्य स्वपक्षांश्चैव पार्थिवान् ।
स्वं स्वं स्थानमनुप्राप्तान् व्येतु ते मानसो ज्वरः ॥ २२
अनुभूय पूर्वं तं कृच्छ्रम् इतः प्रभृति कौरव ।
विहरस्व मया सार्धं गतशोको निरामयः ॥ २३
कर्मणां तव पुण्यानां ज्ञानानां तपसां तथा ।
दानानां च महाभाग फलं प्राप्नुहि पाण्डव ॥ २४
अद्य त्वां देवगन्धर्वा दिव्याश्चाप्सरसो दिवि ।
उपसेवन्तु कल्याण्यो विरजोऽम्बरभूषणाः ॥ २५
राजसूयजितॉंल्लोकान् अश्वमेधाभिवर्धितान् ।
प्राप्नुहि त्वं महाबाहो तपसश्च फलं महत् ॥ २६
उपर्युपरि राज्ञां वै तव लोका युधिष्ठिर ।
हरिश्चन्द्रसमः पार्थ येषु त्वं विचरिष्यसि ॥ २७
मान्धाता यत्र राजर्षिर् यत्र राजा भगीरथः ।
दौष्यन्तिर्भरतो यत्र तत्र त्वं विहरिष्यसि ॥ २८
एषा पुण्या देवनदी पार्थ त्रैलोक्यपावनी ।
आकाशगङ्गा राजेन्द्र तत्राप्लुत्य गमिष्यसि ॥ २९
अत्र स्नातस्य भावस्ते मानुषो विगमिष्यति ।
गतशोको निरायासो मुक्तवैरो भविष्यसि ॥ ३०

वैशम्पायनः—

एवं ब्रुवति देवेन्द्रे कौरवेन्द्रं युधिष्ठिरम् ।
धर्मो विग्रहवान् साक्षाद् उवाच सुतमात्मनः ॥ ३१

धर्मः—

भो भो राजन् महाप्राज्ञ प्रीतोऽस्मि तव पुत्रक ।
मद्भक्त्या सत्यवाक्यैश्च शमेन च दमेन च ॥ ३२

एषा तृतीया जिज्ञासा तव राजन् कृता मया ।
न शक्यसे चालयितुं स्वभावात् पार्थ हेतुभिः ॥ ३३

अत्र स्नातस्य ते भावो मानुषोऽथ गमिष्यति ।
गतशोको निरायासो मुक्तसङ्गो भविष्यति ॥ ३४

पूर्वं परीक्षितोऽसि त्वं प्रभाद्वैतवने मया ।
अरणीसहितस्यार्थे तच्च निस्तीर्णवानसि ॥ ३५

सोदर्येषु विनष्टेषु द्रौपद्यां चैव भारत ॥ ३५॥

स्वरूपधारिणा पुत्र पुनस्त्वं मे परीक्षितः ।
इदं तृतीयं भ्रातॄणाम् अर्थे यत् स्थातुमिच्छसि ॥ ३६॥

विशुद्धोऽसि महाभाग सुखी विगतकल्मषः ॥ ३७

न च ते भ्रातरः पञ्च नरकार्हा विशाम्पते ।
मायैषा देवराजेन महेन्द्रेण प्रयोजिता ॥ ३८

अवश्यं नरकं तात द्रष्टव्यं सर्वराजभिः ।

ततस्त्वया प्राप्तमिदं मुहूर्तं दुःखमुत्तमम् ॥ ३९

सव्यसाची भीमसेनो यमौ वा सुकुमारकौ ।
कर्णो वा सत्यवाक् छूरो नरकार्हाश्चिरं न च ॥ ४०

न कृष्णा राजपुत्री सा नरकार्हा युधिष्ठिर ।
एह्येहि भरतश्रेष्ठ पश्य चेमांस्त्रिलोकगान् ॥ ४१

वैशम्पायनः—

एवमुक्तस्स राजर्षिस् तव पूर्वपितामहः ।
जगाम सह धर्मेण सर्वैश्च त्रिदशालयैः ॥ ४२

गङ्गां देवनदीं पुण्यां पावनीमृषिसंस्कृताम् ।
अवगाह्य तु तां राजा तनुं तत्याज मानुषीम् ॥ ४३

ततो दिव्यवपुर्भूत्वा धर्मराजो युधिष्ठिरः ।
निर्वैरो गतसन्तापो जले तस्मिन् समाप्लुतः ॥ ४४

ततो ययौ धृतो देवैः कुरुराजो युधिष्ठिरः ।
धर्मेण सहितो धीमान् स्तूयमानो महर्षिभिः ॥ ४५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां स्वर्गारोहणपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

॥ ९८ ॥ स्वर्गारोहणपर्वणि तृतीयोऽध्यायः ॥ ३ ॥

[ अस्मिन्नध्याये ४५ श्लोकाः ]

## ॥ चतुर्थोऽध्यायः ॥

युधिष्ठिरेण स्वर्गे निवसतां कृष्णकर्णादीनां दर्शनम् ॥ १ ॥ इन्द्रेण युधिष्ठिराय द्रौपदेयादीनां तत्तत्स्थानगतानां पृथक्पृथक्प्रदर्शनम् ॥ २ ॥

वैशम्पायनः—

ततो युधिष्ठिरो राजा देवैस्सर्षिमरुद्गणैः ।
पूज्यमानो ययौ तत्र यत्र ते कुरुपुङ्गवाः ॥ १

ददर्श तत्र गोविन्दं ब्राह्मेण वपुषाऽन्वितम् ।
तेनैव दृष्टपूर्वेण सादृश्येनैव पूजितम् ॥ २

दीप्यमानं स्ववपुषा दिव्यैर्वस्त्रैरुपासितम् ॥ २॥

चक्रप्रभृतिभिर्देवैर् दिव्यैः पुरुषविग्रहैः ।
उपास्यमानं विष्णुं च फल्गुनं च सुवर्चसम् ॥ ३॥

तथास्वरूपं कौन्तेयो ददर्श मधुसूदनम् ॥ ४

तावुभौ पुरुषव्याघ्रौ समुद्वीक्ष्य युधिष्ठिरम् ।
यथावत् प्रतिपेदाते पूजया देवपूजितौ ॥ ५

अपरस्मिन् वरोद्देशे कर्णं शस्त्रभृतां वरम् ।
द्वादशादित्यसहितं ददर्श कुरुनन्दनः ॥ ६

अपरस्मिंस्ततो देशे मरुद्गणवृतं प्रभुम् ।
भीमसेनमथापश्यत् तेनैव वपुषाऽन्वितम् ॥ ७

अश्विनोस्तु तथा स्थाने दीप्यमानौ स्वतेजसा ।
नकुलं सहदेवं च ददर्श कुरुनन्दनः ॥ ८

तथा ददर्श पाञ्चालीं कृष्णामुत्पलगन्धिनीम् ।
वपुषा स्वर्गमाक्रम्य तिष्ठन्तीं सूर्यवर्चसम् ॥ ९

तत्रैनां सहसा राजा स्प्रष्टुमैच्छद्युधिष्ठिरः ।
ततोऽस्य भगवानिन्द्रः कथयामास देवराट् ॥ १०

इन्द्रः—

श्रीरेषा द्रौपदीरूपा त्वदर्थं मानुषीकृता ।
लक्ष्मीर्देवी लोककान्ता पुण्यगन्धा युधिष्ठिर ॥ ११

रत्यर्थं भवतां ह्येषा निर्मिता शूलपाणिना ।
द्रुपदस्य कुले जाता भवद्भिश्चोपजीविता ॥ १२

एते पञ्च महाभागा गन्धर्वाः पावकप्रभाः ।
द्रौपद्यास्तनया राजन् युष्माकं चामितौजसः ॥ १३

पश्य गन्धर्वराजानं धृतराष्ट्रं च पार्थिवम् ।
एतदर्थं विजानीहि भ्रातरं पूर्वजं पितुः ॥ १४

अयं ते पूर्वजो भ्राता कौन्तेयः पावकद्युतिः ।
सूर्यपुत्रोऽग्रजश्रेष्ठो राधेय इति विश्रुतः ॥ १५

आदित्यसहितो भाति पश्यैनं पुरुषर्षभम् ॥ १५॥

साध्यानामपि देवानां वसूनां मरुतामपि ।

गणेषु पश्य राजेन्द्र वासुदेवपदानुगान् ॥ १६॥

सात्यकिप्रमुखान् वीरान् भोजांश्चैव महारथान् ॥ १७

सोमेन सहितं पश्य सौभद्रमपराजितम् ।
अभिमन्युं महेष्वासं निशाकरसमद्युतिम् ॥ १८

एष पाण्डुर्महेष्वासः कुन्त्या माद्र्या च सङ्गतः ।
विमानेन सहाभ्येति पिता तव ममान्तिकम् ॥ १९

वसुभिस्सहितं पश्य भीष्मं शान्तनवं नृपम् ।
द्रोणं बृहस्पतेः पार्श्वे गुरुपुत्रं निशामय ॥ २०

एते चान्ये महीपाला योधास्तव च पाण्डव ।
गन्धर्वसहिता यान्ति यक्षैः पुण्यजनैस्तथा ॥ २१

[1]गुह्यकानां गतिं चापि केचित् प्राप्ता नृसत्तम ।
त्यक्तदेहा जितस्वर्गाः पुण्यवाग्बुद्धिसत्तमाः ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
स्वर्गारोहणपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

॥ ९८ ॥ स्वर्गारोहणपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

[ अस्मिन्नध्याये २२ श्लोकाः ]

---

1. अ—धृष्टकेतुर्जयत्सेनो राजा चैव स सत्यजित् । [ अधिकः पाठः ]

## ॥ पञ्चमोऽध्यायः ॥

वैशम्पायनेन जनमेजयं प्रति भीष्मद्रोणादीनां स्वस्वसुकृतफलत्वेन स्वर्गभोगानन्तरं स्वैस्स्वैरंशिभिः सहैक्यप्राप्तिकथनम् ॥ १ ॥ जनमेजयेन पञ्चान्ते सबहुमानमास्तिकादिप्रेषणपूर्वकं तक्षशिलातो हास्तिनमेत्य प्रजापालनपूर्वकं सुखनिवासः ॥ २ ॥ सूतेन शौनकादीन् प्रति जनमेजयाय वैशम्पायनोक्तभारतकथाकथनसमापनपूर्वकं भारतमहिमप्रशंसनम् ॥३॥

जनमेजयः—

भीष्मद्रोणौ महात्मानौ धृतराष्ट्रश्च पार्थिवः ।
विराटद्रुपदौ चोभौ शङ्खश्चैवोत्तरस्तथा ॥ १

धृष्टकेतुर्जयत्सेनो राजा चैव स सत्यजित् ।
दुर्योधनश्च कर्णश्च शकुनिश्चैव सौबलः ॥ २

कर्णपुत्राश्च विक्रान्ता राजा चैव जयद्रथः ।
घटोत्कचादयश्चैव ये चान्ये नानुकीर्तिताः ॥ ३

एते वै कीर्तिता विप्र राजानो दीप्तमूर्तयः ।
स्वर्गे कालं कियन्तं च तस्थुस्तत्रापि शंस मे ॥ ४

आहोस्विच्छाश्वतं स्थानं तेषां तत्र द्विजोत्तम ।
अन्ते वा कर्मणः कां ते गतिं प्राप्ता नरर्षभाः ॥ ५

एत[1]दिच्छाम्यहं श्रोतुं प्रोच्यमानं त्वया द्विज ।

1. क-ख-ङ—इच्छामि भगवन् ।

तपसा हि प्रदीप्तेन सर्वं त्वमनुपश्यसि ॥ ६

सूतः—

इत्युक्तस्स तु विप्रर्षिर् अनुज्ञातो महात्मना ।
व्यासेन तस्य नृपतेर् आख्यातुमुपचक्रमे ॥ ७

वैशम्पायनः—

गन्तव्यं कर्मणामन्ते सर्वेषां मनुजाधिप ।
शृणु गुह्यमिदं राजन् देवानां भरतर्षभ ॥ ८

त्रैलोक्यदर्शी योगी च दिव्यचक्षुः प्रतापवान् ।
मुनिः पुराणः कौरव्य पाराशर्यो महाव्रतः ॥ ९

अगाधबुद्धिस्सर्वज्ञो गतिज्ञस्सर्वकर्मणाम् ॥ ९॥
वसूनेव महातेजा भीष्मः प्राप महाद्युतिः ।
अष्टावेव हि दृश्यन्ते वसवो भरतर्षभ ॥ १०॥

बृहस्पतिं विवेशाथ द्रोणो ह्यङ्गिरसां वरः ।
कृतवर्मा च हार्दिक्यः प्रविवेश मरुद्गणान् ॥ ११॥

सनत्कुमारं प्रद्युम्नः प्रविवेश यथागतम् ।
धृतराष्ट्रो धनेशस्य लोकान् प्राप दुरासदान् ॥ १२॥

धृतराष्ट्रेण सहिता गान्धारी च यशस्विनी ।
पत्नीभ्यां सहितः पाण्डुर् महेन्द्रसदनं ययौ ॥ १३॥

विराटद्रुपदौ चोभौ धृष्टकेतुश्च पार्थिवः ।

निशठाक्रूरसाम्बाश्च भानुः कण्वो विदूरथः ॥ १४॥
भूरिश्रवाश्शलश्चैव भूरिश्च पृथिवीपतिः ।
उग्रसेनस्तथा राजा वसुदेवश्च वीर्यवान् ॥ १५॥
उत्तरश्च सह भ्रात्रा शङ्खेन नरपुङ्गवः ।
विश्वेषां देवतानां ते गणमाविविशुर्नृप ॥ १६॥
[1]यस्सुवर्चा इति ख्यातस् सोमपुत्रोऽथ वीर्यवान् ।
अभिमन्युर्महाबाहुः फल्गुनस्य सुतोऽभवत् ॥ १७॥
स युद्ध्वा क्षत्रधर्मेण यथा नान्यः पुमान् क्वचित् ।
विवेश सोमं धर्मात्मा अभिमन्युर्महारथः ॥ १८॥
आविवेश रविं कर्णः पितरं पुरुषर्षभ ।
द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकम् ॥ १९॥
धृतराष्ट्रात्मजास्सर्वे यातुधानान् प्रपेदिरे ।
धर्ममेवाविशत् क्षत्ता राजा चैव युधिष्ठिरः ॥ २०॥
अनन्तो भगवान् रामः प्रविवेश रसातलम् ।
पितामहनियोगाद्धि यो योगाद्रामधारयत् ॥ २१॥
यस्स नारायणो नाम देवदेवस्सनातनः ।
तस्यांशो वासुदेवस्तु कर्मणोऽन्ते विवेश ह ॥ २२॥
षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहाः ।

1. क-ख-ब—इतस्सार्धः श्लोको नास्ति

न्यमज्जन्त सरस्वत्यां कालेन जयतां वर ॥ २३॥

ताश्चाप्यप्सरसो राजन् वासुदेवमुपागमन् ॥ २४

हतास्तस्मिन् महायुद्धे ये वीरास्तु महारथाः ।
घटोत्कचादयस्सर्वे देवान् यक्षांश्च भेजिरे ॥ २५

दुर्योधनसहायास्तु पार्थिवा येऽनुकीर्तिताः ।
[1]ते दानवान् गुह्यकांश्च गन्धर्वांश्च तथाऽविशन् ॥ २६

भवनं च महेन्द्रस्य कुबेरस्य च धीमतः ।
वरुणस्य तथा लोकान् विविशुः पुरुषर्षभाः ॥ २७

एतत् ते सर्वमाख्यातं विस्तरेण महाद्युते ।
कुरूणां चरितं कृत्स्नं पाण्डवानां च धीमताम् ॥ २८

सूतः—

एतच्छ्रुत्वा द्विजश्रेष्ठात् स राजा जनमेजयः ।
विस्मितोऽभवदत्यर्थं यज्ञकर्मान्तरेषु च ॥ २९

ततस्समापयामासुः कर्मान्तं तस्य याजकाः ।
आस्तिकश्चाभवत् प्रीतः परिमोक्ष्य भुजङ्गमान् ॥ ३०

ततो द्विजातीन् सर्वांस्तान् दक्षिणाभिरतोषयत् ।
पूजिताश्चापि ते राज्ञा ततो जग्मुर्यथागतम् ॥ ३१

विसर्जयित्वा विप्रांस्तान् स राजा जनमेजयः ।

---

1. ब—इतः श्लोकद्वयं नास्ति

दृष्टस्तक्षशिलायास्तु पुनरायाद्राजाहुयम् ॥ ३२
एतद्वस्सर्वमाख्यातं व्यासशिष्येण धीमता ।
व्यासाज्ञया समाख्यातं सर्पसत्रे नृपस्य ह ॥ ३३
पुण्योऽयमितिहासाख्यः पवित्रं चेदमुत्तमम् ।
कृष्णेन मुनिना विप्र रचितं सत्यदर्शिना ॥ ३४
सर्वज्ञेन विधिज्ञेन सर्वज्ञानवता सता ।
अतीन्द्रियेण शुचिना तपसा भावितात्मना ॥ ३५
ऐश्वर्ये वर्तता चैव साङ्ख्ययोगविदा तथा ।
नैकतत्त्वविबुद्धेन दृष्टतत्त्वेन चक्षुषा ॥ ३६
कीर्तिं प्रथयता लोके पाण्डवानां महात्मनाम् ।
अन्येषां क्षत्रियाणां च भूरिद्रविणतेजसाम् ॥ ३७
क्रीडां च वासुदेवस्य देवदेवस्य शार्ङ्गिणः ।
विश्वेषां देवभागानां जन्म सायुज्यमेव च ॥ ३८
य इदं शृणुयाद्विद्वान् पर्वसु द्विजसत्तमः ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय गच्छति ॥ ३९
कार्ष्णं वेदमिमं सर्वं शृणुयाद्यस्समाहितः ।
ब्रह्महत्याकृतं पापं तत्क्षणादेव नश्यति ॥ ४०
यश्चेदं श्रावयेत् पुण्यं ब्राह्मणान् पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ॥ ४१

अह्ना यदेनः कुरुते इन्द्रियैर्मनसाऽपि वा ।
महाभारतमाख्याय सर्वपापैः प्रमुच्यते ॥ ४२

त्रिभिर्वर्षैर्महत् सर्वं कृष्णद्वैपायनः प्रभुः ।
निखिलं भारतं चेदं चकार भगवानृषिः ॥ ४३

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥ ४४

वाच्यते यत्र सततं जयाख्यं भारतं महत् ।
यशः कीर्तिश्च विद्या च भवन्ति मुदितास्सदा ॥ ४५

जयो नामेतिहासोऽयं श्रोतव्यो जयमिच्छता ।
राज्ञा राज्ञस्सुतैश्चैव गर्भिण्या चैव योषिता ॥ ४६

यद्यदिष्टतमं कामं लभते श्रद्धयाऽन्वितः ।
शृणुयान्मुदितो भूत्वा आस्तिको बुद्धिसंयुतः ॥ ४७

[1]अप्येकपादश्रवणाद् ब्रह्महत्या विनश्यति ।
भक्त्या द्विपादश्रवणाद् अश्वमेधफलं लभेत् ॥ ४८

त्रिपादश्रवणाद्भक्त्या पठनाद्वा तथैव च ।
पुनरावृत्तिरहितांल्लभेद् ब्रह्मगतिं शुभाम् ॥ ४९

वासुदेवं स्मरन् विद्वान् पुण्डरीकायतेक्षणम् ।
इतिहासमिमं पुण्यं महार्थं वेदसम्मितम् ॥ ५०

1. क-ङ—नास्ति श्लोकद्वयम्

श्रावयेद्यस्तु वर्णांस्त्रीन् कृत्वा ब्राह्मणमग्रतः ।
सर्वपापविशुद्धात्मा शुचिस्तद्गतमानसः ॥ ५१

इह कीर्तिं महत् प्राप्य भोगवान् सुखमश्नुते ।
[1]व्यासप्रसादेन पुनस् स्वर्गलोकं स गच्छति ॥ ५२

एतद्विदित्वा सर्वं तु सर्ववेदार्थविद्भवेत् ।
पूजनीयश्च सततं माननीयो भवेद्द्विजः ॥ ५३

इति श्रीमन्महाभारते शतसहस्रिकायां संहितायां वैयासिक्यां स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

॥ ५८ ॥ स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

[ अस्मिन्नध्याये ५३ श्लोकाः ]

॥ स्वर्गारोहणपर्वं समाप्तम् ॥ ॥ स्वर्गारोहणपर्वं च समाप्तम् ॥

---

॥ अस्मिन् स्वर्गारोहणपर्वणि श्लोकाः २०० ॥

---

इति श्रीमन्महाभारतं समाप्तम् ॥

---

॥ श्रीरस्तु ॥

# महाभारतस्य आश्वमेधिकपर्वस्थानां विषयाणाम्

## ॥ अक्षरमातृकाक्रमेण सूचनम् ॥


| | अध्यायः-पुटम् |
|---|---|
| अग्निमहिमानुवर्णनम् | ११३-५४३ |
| अग्निसृष्टिप्रकारः | ११६-५६३ |
| अग्निशब्दप्रवृत्तिनिमित्तम् | ११६-५६३ |
| अग्निना पुनरिन्द्रमेत्य मरुत्तेन स्वसन्देशापरिग्रहनिवेदनम् | ९—३८ |
| अङ्गिरसः पुत्रेण संवर्तेनाकारणवैरिणः स्वाग्रजन्मनः बृहस्पतेरुपद्रवासहनेन सर्वस्वत्यागपूर्वकमरण्यप्रवेशः | ५—१५ |
| अतिथ्यपूजने दोषकथनम् | १०६-४६६ |
| अतिथिपूजनकथनम् | १०६-४६६ |
| अतिथिपूजनफलकथनम् | १०६-४६९ |
| अनुगीतोपदेशानन्तरं कृष्णार्जुनाभ्यां हास्तिनपुरमुद्दिश्य प्रस्थानम् | ५५-२१५ |
| अनेकदानधर्मफलप्रतिपादनम् | १०८-४८६ |
| अन्नदानप्रशंसनम् | ११२-५३८ |
| अन्नदानप्रशंसनम् | ११३-५४५ |
| अभोज्यान्नानां पापिनां लक्षणनिरूपणम् | ११२-५३८ |
| अर्जुनस्य व्यासानुमत्या मेध्याश्वरक्षणे सन्दिश्य नियोजनम | ७५-३०१ |
| अर्जुनस्य सैन्धवैर्बाणगणैर्विदारणेन मोहगमनेन देवर्ष्यादिभिर्जपादिना तस्य तेजोदीपनम् | ८०-३१९ |
| अर्जुनस्य सैन्धवैस्सह पुनर्युद्धम् | ८०-३२१ |
| अर्जुनस्य पुनरश्वमेधाश्वानुसरणम् | ८१-३२७ |
| अर्जुनस्य मणलूरपुरगमनम् | ८२-३२८ |
| अर्जुनस्य नागलोकस्थसञ्जीवनमणिस्पर्शेन संज्ञामुपलभ्य बभ्रुवाहनं प्रति चित्राङ्गदादीनां रणाङ्गणागमनकारणप्रश्नः | ८५-३४० |

अध्यायः-पुटम्

अर्जुनस्य मेध्याश्वेन सह पुनर्नगरं प्रत्यागमनम् ९३-३६७
अर्जुनस्य चारमुखात् तुरगसञ्चारणेन पुनर्नगरं प्रत्यागमन-श्रवणहृष्टस्य युधिष्ठिरस्य निदेशाद्भीमेन यज्ञशालादि-निर्मापणम् ९७-३५७
अर्जुनस्याश्वानुगमनेन दक्षिणदेशगमने तत्र चेदीशितुः शिशुपालात्मजस्य पूजापरिग्रहः ८८-३५१
अर्जुनस्याश्वानुगमने काशिकोसलादिदेशाधिपतिजयेन द्वारकां गत्वा तत्र वसुदेवेन समागत्य गान्धारदेशगमनम् ८८-३५१
अर्जुनागमनश्रवणमात्रेण जयद्रथसुते मृते दुश्शलायास्स्वसुतमादाय शमायार्जुनाभिसरणम् ८१-३२५
अर्जुनेन कृष्णमुद्दिश्य पूर्वोपदिष्टगीतार्थस्य विस्मरणमुक्त्वा पुनस्तदुपदेशप्रार्थना १७-७२
अर्जुनेन कृष्णं प्रति युधिष्ठिराभ्यनुज्ञानसम्पादनपूर्वकगमनानुज्ञानम् ५४-२१४
अर्जुनेन कृष्णं स्तुत्वा व्यासनारदादिभ्यः स्वस्य कृष्णयाथात्म्यावगमनिवेदनम् ५५-२१६
अर्जुनेन युधिष्ठिरनियोगाद् ब्राह्मणैः क्षत्रियैश्च सह प्रथममुक्तरक्षिभिरश्वसञ्चारणेन रक्षणाय तदनुसरणम् ७६-३०५
अर्जुनेन त्रैगर्तानां पराजयः ७७-३०७
अर्जुनेन प्राग्ज्योतिषपुरमेत्याश्वरक्षणाय भगदत्तसुतेन वज्रदत्तेन सहायोधनम् ७८-३१२
अर्जुनेन भगदत्तात्मजपराजयः ७९-३१४
अर्जुनेन सैन्धवानां पराजयः ८१-३२२
अर्जुनेन दुश्शलाप्रार्थनया तस्यां बहुमानेन युद्धादुपरमः ८१-३२६
अर्जुनेन बभ्रुवाहनस्य पितृभक्त्या विनयेनागतस्य क्षत्रधर्मपरित्यागजरोषादुपालम्भः ८२-३२९
अर्जुनेन उलूप्याः क्षीणामपि समराङ्गणागमनकारणप्रश्नः ८५-३४२
अर्जुनेन शकुनितनयं पराजित्य तत्सेनावमर्दनम् ८९-३५३
अर्जुनेन गान्धारीगौरवात् शकुनितनयसमाश्वासनम् ८९-३५६

अध्यायः-पुटम्

अर्जुनेनाश्वानुसरणवशात् सिन्धुदेशं गत्वा सैन्धवैस्सह महदा-
योधनम् ८०-३१८
अर्जुनेनाश्वानुसरणवशान्मगधदेशगमनम् ८७-३४७
अश्वत्थमाहात्म्यशंसनम् १२१-५५९
अश्वत्थगोब्राह्मणमहिमानुवर्णनम् १२३-६०८
अश्वमेधयज्ञाय नानादेशेभ्यः ब्राह्मणक्षत्रियाद्यानयनं तेषां
यथार्हं पूजनं च ९०-३५९
अश्वमेधसमृद्धिवर्णनम् ९१-३६०
अश्वमेधप्रक्रियावर्णनम् ९४-३७२
अश्वमेधावसाने बिलाग्निस्सूतेन कनकपार्श्वेन केन चिन्नकुलेन
सदस्यान् प्रति उञ्छवृत्तिब्राह्मणस्य सक्तुप्रस्थदानं
प्रशस्य युधिष्ठिराश्वमेधगर्हणम् ९६-३८१
अष्टाक्षरमन्त्रजपविधानम् १०३-४३१
आधानकालः ११६-५६८
आपद्धर्मनिरूपणम् ११५-५५३
आहवनीयादिविभागमुक्त्वा तत्तन्नामनिर्वचनम् ११६-५६४
इन्द्रप्रेरितेनाग्निना मरुत्तमेत्य याजनाय बृहस्पतिस्वीकरण-
रूपेन्द्रसन्देशकथनम् १—३५
इन्द्रेण स्वातिशायिनि मरुत्ते राजनि स्पर्धया बृहस्पतिसावि-
ध्येन ततोऽप्यतिशयलिप्सया मरुत्तपुरोहितस्य बृहस्प-
तेर्भेदोपायेन वशीकरणम् ५—१६
इन्द्रेण संवर्तस्य मरुत्ताय यागकरणप्रतिज्ञाश्रवणनिर्विण्णस्य
बृहस्पतेस्समीपं प्रत्यागमनम् ८—३२
इन्द्रेण पुनर्मरुत्ते स्वसन्देशनिवेदनचोदनम् ९—३९
इन्द्रेण धृतराष्ट्रनामगन्धर्वराजमुखाद् याजनाय बृहस्पतिवरणं
चोदितेनापि मरुत्तेन तदनङ्गीकारे इन्द्रस्य मरुत्तयज्ञ-
विघाताय साटोपं यज्ञवाटं प्रत्यागमनम् १०-४३
इन्द्रेण संवर्तानुवर्तनेन सभानिर्मापणादिना यज्ञं निर्वर्त्य
देवैस्सह हविर्ग्रहणम् १०-४८

अध्यायः-पुटम्

उत्तरया सूतिकागृहे कृष्णसमीपे बहुधा विलप्य पुत्रो-
जीवनप्रार्थना　　७१-२८८

उत्तरया पुनर्बहुधा विलापः　　७२-२८९

उदङ्कदर्शनकाल एव चण्डालवेषस्येन्द्रस्य तिरोधानेन परि-
तप्यमानमुदङ्कं प्रति तत्र सन्निहितेन कृष्णेन इन्द्रकृत-
वञ्चनां निवेद्य मरुप्रदेशे पिपासाकाले उदङ्कमेघा इति
ख्याता मेघाः प्रादुर्भविष्यन्तीति वरदानम्　　५८-२३४

उदङ्ककृतपरिचर्याविशेषतुष्टेन गौतमेन तस्मै प्रीत्यतिशयेन
चिरादपि गृहगमनायानुज्ञानम्　　५९-२३७

उदङ्केन कदाचन गौतमशासनेन काष्ठभाराहरणे काष्ठल-
ग्नजरापलितनिजकेशावलोकनेन परिदेवनम्　　५९-२३७

उदङ्काहृतमणिकुण्डले उरगवरेण केनचित् अपहृत्य नाग-
लोकगमनम्　　६१-२४९

उदङ्कायाश्वापानधमनजातधूमपटलपीडितैस्सर्पैः कुण्डलप्रत्यर्पणम्६१-२५२

उदङ्केन कौरवादिविनाशे कृष्णोपेक्षाया एव हेतुत्वधिया कृष्णाय
शापदानोद्यमः　　५६-२२५

उदङ्केन कृष्णस्य विश्वरूपदर्शनेन स्तुतिः　　५८-२३२

उदङ्केन गुरुदक्षिणायै गुरुपत्नीप्रार्थने तया निर्बन्धकुपितया
सौदासपत्नीविधृतकुण्डलाहरणाय प्रेरणेन सौदासस-
मीपगमनम्　　५९-२४०

उदङ्केन सौदासवचसा तत्पत्न्याः कुण्डलयाचने तया तस्मै
मणिकुण्डलमहिमादिकमुक्त्वा राज्ञाभिज्ञानानयनचोदना ६०-२४४

उदङ्केन सौदासं प्रति अभिज्ञानयाचने तेन तस्य दानम्　　६१-२४६

उदङ्केन छलेन स्वप्रत्यागमनाय सौदासस्य प्रश्नः　　६१-२४७

उदङ्केन क्षुधाविष्टेन मध्येमार्गं विल्वतरुमारुह्य शाखायां
कृष्णाजिनस्थे कुण्डले आसज्य अवस्थाने विशीर्ण-
बन्धनस्य कृष्णाजिनस्य भुवां पतनम्　　६१-२४८

उदङ्केन गुरुपत्न्यै कुण्डलप्रदानम्　　६१-२५३

अध्यायः-पुटम्

उदङ्केनाभिज्ञाननिवेदनेन मदयन्तीतः कुण्डले परिगृह्य प्रतिनिवर्तनम् ६१-२४८

उदङ्केन गुरवे निजरोदनकारणनिवेदने गुरुणा तस्मै यौवनं प्रदाय निजकन्याया दानम् ५९-२३८

उदङ्केनेन्द्रसाहाय्याद्भूविदारणेन नागलोकं गत्वा तक्षाश्ववचसा तदपानदेशधमनम् ६१-२५०

उदङ्कोपाख्यानस्य जनमेजयाय वैशम्पायनेन कथनारम्भः ५९-२३६

उलूप्याऽर्जुनाय बभ्रुवाहनेन समरेऽर्जुनस्य पराजये कारणकथनम् ८६-३४३

उलूप्याऽर्जुनाय चित्राङ्गदादीनां समराङ्गणागमने कारणाभिधानम् ८६-३४३

एकभक्तव्रताचरणस्य एकसंवत्सरपर्यन्तानुष्ठितस्य फलोक्तिः ११९-५८८

एकभुक्तव्रताचरणस्य कार्तिकादिद्वादशमासेषु कर्तव्यतायास्तत्फलस्य च प्रतिपादनम् ११८-५८१

कन्यादानफलोक्तिः १०७-४७६

कपिलवृषभवाहनप्रकारः ११०-५१८

कपिलाधेनुप्रशंसनम् ११०-५१२

कपिलाया विभागं दशधेति प्रतिपाद्य तद्दानप्रशंसनम् ११०-५१७

कपिलादानप्रशंसनम् १११-५२३

कपिलाया ब्रह्मणाऽग्निकुण्डमध्यात् सृष्टिः १११-५२६

कपिलायै सर्वैर्देवैर्वरदानम् १११-५२७

कपिलायां सर्वासां देवतानामवस्थानम् १११-५२९

कामस्य शक्तिकथनेन दुर्जयत्वमुक्त्वा तज्जयोपायकथनम् १३-५९

कार्तवीर्यार्जुनेन दर्पात् समुद्रस्यास्तैरर्दनेन समुद्रेणापि परशुरामसुहृदर्जुनस्य गमनचोदनम् ३२-१३१

कार्तवीर्यार्जुनानुयायिभिर्जमदग्नेर्हननम् ३२-१३२

कृष्णयुधिष्ठिरयोर्धर्मसंवादं भाविनं ज्ञात्वा देवब्रह्मर्ष्यादीनामागमनम् १०२-४१७

कृष्णद्वादश्यां भगवदर्चनफलकथनम् १२०-५९४

अध्यायः-पुटम्

कृष्णस्य युधिष्ठिरानुमत्या सुभद्रामानीय सात्यकिना सह द्वारकां प्रति प्रस्थानम् ५५-२२०

कृष्णस्य हास्तिनपुराद् द्वारकागमनकाले मध्येमार्गमुदङ्केन सह संवादः ५६-२२४

कृष्णस्य उदङ्काय स्वमाहात्म्यकथनाय तस्यानुनयः ५६-२२७

कृष्णस्य परीक्षित्सूतिकागृहप्रवेशः ७१-२८६

कृष्णस्य युधिष्ठिरादीनामभ्यर्च्य दारुकोपनीतरथमारुह्य द्वारकागमनम् १२४-६१६

कृष्णस्यार्जुनेन सह हास्तिनपुरमेत्य धृतराष्ट्रादिभ्यः पादाभिवादनम् ५५-२१८

कृष्णार्जुनयोः कुरुविजयानन्तरं हास्तिनपुरे विहारवर्णनम् १६-६८

कृष्णेन युधिष्ठिराय शरीरस्थशत्रुजयार्थमिन्द्रवृत्रासुरयुद्धप्रकारकथनम् ११-५२

कृष्णेन युधिष्ठिराय शारीरमानसभेदेन व्याधेर्द्वैविध्यमभिधाय तत्परिहारोपायकथनम् १२-५५

कृष्णेन युधिष्ठिराय अहङ्कारममकारनिवृत्तेरावश्यकत्वकथनम् १३-५७

कृष्णेन युधिष्ठिरादिभ्यो वैष्णवधर्मप्रशंसनं विधाय स्वमहिमानुबोधनम् १०१-४११

कृष्णेन स्वभवनमागत्य मातापित्रोरभिवादनम् ६२-२५६

कृष्णेन वसुदेवं प्रति कुरुपाण्डवयुद्धप्रकारकथनम् ६३-२५७

कृष्णेन सभार्यां वसुदेवायाभिमन्युनिधनाकथनेन सुभद्रया कृष्णं प्रत्यभिमन्युनिधनं परिचोद्य शोकाद्भुवि पतनम् ६४-२६२

कृष्णेन वसुदेवस्य परिसान्त्वनम् ६४-२६४

कृष्णेन बलरामसुभद्रादिभिस्सह यज्ञार्थं हास्तिनपुरं प्रत्यागमनम् ६९-२८०

कृष्णेन सशपथं संस्पर्शनेन परीक्षित्तस्समुज्जीवनम् ७२-२९१

कृष्णेन बलरामादिभिस्सह युधिष्ठिराश्वमेधाय हास्तिनपुरागमनम् ९२-३६३

अध्यायः-पुटम्

कृष्णेन युधिष्ठिराय नानादेशेभ्य आगमिष्यतां राज्ञामप्रमादेन यथोचितपूजाया मणलूरादागमिष्यतो बभ्रुवाहनस्य सम्माननस्य च कर्तव्यताप्रतिपादकार्जुनसन्देशनिवेदनम् ९२-३६४

कृष्णेनाभिमन्युसुतस्य सञ्जीवनेन सर्वेषां सन्तोषः ७३-२९३

कृष्णेनाभिमन्युसुतस्य पदप्रवृत्तिनिमित्तकथनपूर्वकं नामकरणम् ७३-२९४

कृष्णेनार्जुनाय युधिष्ठिरे स्वस्य निजनगरजिगमिषानिवेदनायोक्तिः १६-६९

कृष्णेनार्जुनाय स्वस्मै ब्राह्मणोक्तसिद्धकाश्यपसंवादानुवादः १७-७३

कृष्णेनार्जुनाय मोक्षसाधनादिप्रतिपादकसिद्धकाश्यपसंवादानुवादः २०-८९

कृष्णेनार्जुनाय योगशास्त्रोपदेशः २०-९१

कृष्णेनार्जुनायानुगीताया रहस्यत्वोक्तिः २१-९५

कृष्णेनार्जुनाय भूतप्राणादिसृष्ट्यादिप्रतिपादक ब्राह्मणदम्पतिसंवादानुवादः २२-९९

कृष्णेनार्जुनाय गर्भोत्पत्तिक्रमस्य वाङ्मनसयोरुत्पत्तिक्रमस्य तयोश्श्रेष्ठत्वाश्रेष्ठत्वयोः प्रतिपादकब्राह्मणदम्पतिसंवादानुवादः २३-१०१

कृष्णेनार्जुनाय घ्राणादीन्द्रियाणां पृथग्गुणप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः २४-१०५

कृष्णेनार्जुनाय मनसो बाह्येन्द्रियाणां च विवादप्रतिपादकसंवादानुवादः २५-१०७

कृष्णेनार्जुनाय प्राणापानादीनां स्वस्वश्रैष्ठ्यविषयविवादादिप्रतिपादक ब्राह्मणदम्पतिसंवादानुवादः २६-१०९

कृष्णेनार्जुनाय ब्राह्मणेन ब्राह्मणीं प्रत्युक्तप्राणापानादिसृष्ट्यादिप्रतिपादकनारददेवतमसंवादानुवादः २७-११४

कृष्णेनार्जुनाय कर्तृकर्मादिप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः २८-११७

कृष्णेनार्जुनाय हृष्छ्मश्रुस्य परब्रह्मोपदेशे देवर्षिपन्नगादीनां स्वस्वयोग्यतानुसारेण नानार्थावगमप्रतिपादकब्राह्मणदम्पतिसंवादानुवादः २९-११९

अध्यायः-पुटम्

कृष्णेनार्जुनाय ब्राह्मणीब्राह्मणशब्दनिर्दिष्टयोः क्रमेण बुद्धि मनस्त्वकथनम् ३७-१४५

कृष्णेनार्जुनाय परब्रह्मस्वरूपतत्प्राप्तिसाधनादिप्रतिपादकगुरुशिष्यसंवादानुवादः ३८-१४७

कृष्णेनार्जुनाय मुक्त्युपायप्रतिपादकगुरुशिष्यसंवादानुवादं समाप्य स्वस्य निजनगरव्रजगमिषानिवेदनम् ५४-२११

कृष्णेनार्जुनाय विद्याब्रह्मणोररण्यत्वरूपणपरब्राह्मणदम्पतिसंवादानुवादः ३०-१२२

कृष्णेनार्जुनाय यागीयहिंसाया अधर्म्यत्वाभावप्रतिपादकाध्वर्युयतिसंवादानुवादः ३१-१२६

कृष्णेनोदङ्काय स्वमाहात्म्यं प्रकाश्य कुरूणां स्ववचनातिक्रमणादिरूपस्वापराधेनैव निधनोक्तिः ५७-२२८

कृष्णेनोदङ्कप्रार्थनया तस्मै विश्वरूपप्रदर्शनम् ५८-२३१

कृष्णेनोदङ्काय पिपासाकाले जलाभरूपवरदानम् ५८-२३२

कृष्णेनोदङ्कायामृततदानं चोद्दिश्येन्द्रेण कदाचिद्वनमध्ये पिपासुमुदङ्कं प्रति चण्डालरूपेण जलस्वीकारप्रार्थने उदङ्केन चण्डालत्ववुद्ध्या तदधिक्षेपः ५८-२३३

कृष्णेनोदङ्काय वरदानात् परं द्वारकागमने मध्ये रैवतकपर्वतप्रवेशः ६२-२५४

गायत्रीमहिमानुवर्णनम् १०४-४३८

गायत्रीजपमाहात्म्यप्रतिपादनम् १२१-५०८

गुर्वाचार्योपाध्यायलक्षणकथनम् ११५-५६१

गोदानकीर्तनम् १०७-४७८

गोग्रासदानप्रकारकथनम् ११४-५११

चान्द्रायणविधिं प्रतिपाद्य तदाचरणफलकथनम् ११७-५७५

चित्राङ्गदया पतिपुत्रयोर्मोहश्रवणेन रणाजिरमागत्य विलापः ८२-३३३

चित्राङ्गदाया मोहाधिगमः ८३-३३३

चित्राङ्गदायास्संज्ञोपलम्भेन उलूपीं प्रत्युपालम्भगर्भवचनम् ८३-३३४

चित्राङ्गदाया अर्जुनमुद्दिश्य विलापः ८३-३३५

अध्यायः-पुटम्

जनमेजयेन वैशम्पायनं प्रति नकुलस्य यज्ञनिन्दाकारणप्रश्नः ९८-३९५
जन्मदानजीवितानां वैयर्थ्यापादकाधर्मकथनम् १०३-४२३
जरासन्धपौत्रस्य मेघसन्धेः पराजयपूर्वकं तत्र तत्र म्लेच्छादि पराजयः ८७-३४८
तपः प्रशंसनम् ५४-२१०
तिलदानोक्तिः १०७-४७७
तिलान् प्रशस्य तेषामिक्षूणां च ब्राह्मणेन स्वयं यन्त्रे निपीडनप्रतिषेधः ११४-५५२
तीर्थाटनासमर्थानां तत्प्रतिनिधितीर्थानुवर्णनम् १२४-६११
तोयान्नदानफलकथनम् १०६-४५९
तोयान्नयोरदाने नरकफलकथनम् १०६-४६५
दानकालतत्फलानुभवकालकथनम् १०३-४२८
दानपात्रब्राह्मणलक्षणकथनम् ११३-५४४
दानफलकथनम् ११२-५४०
दुष्कृतिनां यमलोकप्राप्तिकथनम् १०५-४४५
देवर्षिपितृतर्पणम् १०९-५०३
देवर्ष्यादीनां श्रीकृष्णमभ्यर्च्य गमनम् १२४-६१६
दैवपित्र्यकालकथनम् १११-५३२
दैवे कर्मणि ब्राह्मणपरीक्षानिषेधः १०३-४३२
धर्मनाशप्रकारशंसनम् ११२-५४०
धर्मप्रशंसनम् ११२-५४१
धर्मशौचलक्षणम् ११३-५४२
धृतराष्ट्रेण गङ्गायां भीष्मायोदकदानानन्तरं बन्धुशोकविषण्णं युधिष्ठिरं प्रति समाश्वासनम् १---१
धृतराष्ट्रेण युधिष्ठिरं प्रति स्वस्य विदुरवचनानादरेण पुताद्दशानर्थप्राप्तिकथनम् १---२
नकुलस्य जमदग्निक्रोधरूपत्वस्य पितृदेवताशापान्नकुलत्वप्राप्तेर्युधिष्ठिरयागे धर्मक्षेपेण निजरूपप्राप्तेश्च कथनम् १००-४०५
नकुलाख्यानकथनारम्भः ९६-३८०

अध्यायः-पुटम्

नकुलेन युधिष्ठिरयागसदस्यब्राह्मणेभ्यस्सकुटुम्बस्योञ्छवृत्तेर्ब्राह्मणस्य धर्मपुरुषाय सक्तुप्रस्थदानेन स्वर्गगमनमभिधाय तेनैव स्वस्यापि शरीरार्धं काञ्चनीकृतं युधिष्ठिरयज्ञेनाहं तथा कृत इत्युक्त्वा नकुलस्य तत्रैवान्तर्धानम् ९७-३८३
नरकगामिप्राणिप्रतिपादनम् १११-५३४
नानाधर्मकथनम् १२१-५९९
पञ्चमहायज्ञनिरूपणम् १०९-४९७
पञ्चगव्यविधानम् १२१-६०२
परमात्मदर्शनोपायतत्फलकथनम् ४५-१७३
परशुरामेण कार्तवीर्यार्जुनस्य हननम् ३२-१३२
परशुरामेण स्वपितृहननक्रुद्धेन त्रिस्सप्तकृत्वः सर्वक्षत्रियहनने तत्पितृभी रामस्य परिसान्त्वनप्रयतनम् ३२-१३३
परशुरामाय तत्पितृभिः क्षत्रियवधान्निवर्तनाय अलर्काख्यराजोपाख्यानकथनम् ३३-१३४
परशुरामेणालर्कराजोपाख्यानश्रवणाद्धिंसातो निवृत्त्य तपश्चरणम् ३३-१३८
परीक्षित उत्तरायां हास्तिनपुरे जननम् ६९-२८१
परीक्षितोऽश्वत्थामास्त्रेण दाहाज्जननकाल एव शवभूतस्य उज्जीवनाय कुन्त्यादिभिःश्रीकृष्णप्रार्थना ६९-२८१
पाखण्डविधिप्रकारकथनम् १२४-६१०
पित्र्ये वर्ज्यब्राह्मणनिरूपणम् १११-५३२
प्रशस्ताप्रशस्तब्राह्मणलक्षणवचनम् ११५-५५४
बभ्रुवाहनस्यार्जुनकृतमुपालम्भमसहमानया उलूप्या नागलोकादेत्य तस्यार्जुनेन सह युद्धप्रोत्साहनम् ८२-३२९
बभ्रुवाहनस्यार्जुनेन सह युद्धम् ८२-३३१
बभ्रुवाहनेन स्वशरगाढाभिघातेन निपतिते पार्थे पितृमारणशोकेन मोहाधिगमः ८२-३३२
बभ्रुवाहनेन चिरात् संज्ञां प्राप्य आत्मानमुलूपीं चोपालम्य प्रायोपवेशनम् ८४-३३६

अध्यायः-पुटम्

बभ्रुवाहने प्रायोपविष्टे उलूप्या स्मरणमात्रसन्निहितसञ्जीवनमणिनाऽर्जुनस्य समुद्बोधनम् ८५-३३९

बभ्रुवाहनेनार्जुनं प्रति उलूप्याः प्रश्नकरणचोदना ८५-३४२

बभ्रुवाहनार्जुनसंवादः ८६-३४५

बभ्रुवाहनेनोलूपीचित्राङ्गदाभ्यां सह यागदिदृक्षया हास्तिनपुरागमनम् ९४-३६९

बीजयोन्योश्शुक्लशुद्धिनिरूपणम् १०४-४३५

बृहस्पतिनेन्द्राय स्वेन मरुत्तस्ययाजनप्रतिज्ञानम् ५—१७

बृहस्पतिना इन्द्रे स्वेन मरुत्तस्ययाजनप्रतिज्ञानश्रवणामर्षिणा मरुत्तेन स्वयाजनप्रार्थने तत्प्रत्याख्यानम् ६—१८

बृहस्पतिना इन्द्राय स्वानुजेन संवर्तेन मरुत्तस्य याजनविघटनचोदना ९—३४

ब्रह्मचारिवनस्थधर्मान् निरूप्य तदनुष्ठानस्य श्रेयस्साधनत्वोक्तिः ४९-१८७

ब्रह्मणा काश्यपादिमहर्षीन् प्रति तमोगुणकार्यनिरूपणम् ३९-१५३

ब्रह्मणा महर्षीन् प्रति रजोगुणकार्यनिरूपणम् ४०-१५७

ब्रह्मणा महर्षीनुद्दिश्य सत्वगुणकार्यनिरूपणम् ४१-१६०

ब्रह्मणा महर्षीनुद्दिश्य सत्वादिगुणत्रयनिरूपणम् ४२-१६२

ब्रह्मणा महर्षीनुद्दिश्य महत्तत्त्वनिरूपणम् ४३-१६५

ब्रह्मणा महर्षीनुद्दिश्य अहङ्कारतत्त्वनिरूपणम् ४४-१६७

ब्रह्मणा महर्षिभ्यः अहङ्कारतत्त्वान्महाभूतादिसृष्टिप्रकारकथनम् ४५-१६८

ब्रह्मणा महर्षिभ्यो मनुष्येषु क्षत्रियाणां रजोगुणकार्यबलप्रधानतया तेषां सत्वप्रधानब्राह्मणरक्षणस्य कर्तव्यत्वकथनप्रसङ्गेन तत्तज्जातिश्रेष्ठवस्तुकथनम् ४६-१७६

ब्रह्मणा महर्षिभ्योऽहिंसादिरूपधर्मादिप्रतिपादनम् ४६-१७८

ब्रह्मणा महर्षीनुद्दिश्य स्वस्वजातिषु श्रेष्ठवस्तूनि प्रतिपाद्य ज्ञानस्याविनाशित्वकथनेन तस्यैव श्रेयस्साधनत्वोक्तिः ४७-१८१

ब्रह्मणा महर्षिभ्यश्शरीरस्य कालचक्रवत् स्थित्या हेयत्वज्ञानेन समीचीनगतिप्राप्तिमभिधाय गृहस्थधर्मानुष्ठानस्य श्रेयस्साधनत्वोक्तिः ४८-१८४

अध्यायः-पुटम्

ब्रह्मणा महर्षिभ्यो योगिनां चातुर्विध्यादिकथनपूर्वकं मुमुक्षु-वेद्यनानार्थकथनम् ५१-१५६

ब्रह्मणा महर्षीनुद्दिश्य धर्मप्रदर्शनपूर्वकं तदनुष्ठानसहकृतज्ञानस्यैव दृष्टान्तप्रदर्शनेन परमपुरुषार्थसाधनत्वोक्तिः ५३-२०१

ब्रह्मयज्ञकथनम् १०९-५०५

ब्रह्महत्यातुल्यफलकदुष्कृतकथनम् ११२-५३७

ब्राह्मणेन कृष्णाय प्राणिनां जननमरणादिप्रतिपादकसिद्धकाश्यपसंवादानुवादः १८-७८

ब्राह्मणेन कृष्णाय जीवस्य गर्भप्रवेशादिप्रतिपादकसिद्धकाश्यपसंवादानुवादः १९-८४

ब्राह्मणेन स्वभार्यां प्रति हिंसाया अकर्तव्यत्वे महर्षिवचसां प्रमाणीकरणोपयोगितया परशुरामचरितकथनारम्भः ३२-१३०

ब्राह्मणेन स्वभार्यां प्रति कामक्रोधादिपरित्यागपूर्वकभगवदवबोधस्य परमपुरुषार्थसाधनतावबोधकाम्बरीषगीतगाथाकथनम् ३४-१३९

ब्राह्मणेन स्वभार्यायै ममतावर्जनस्य पुरुषार्थसाधनतायां दृष्टान्ततया ब्राह्मणजनकसंवादानुवादः ३५-१४०

ब्राह्मणेन स्वभार्यायै स्वमाहात्म्यप्रकाशनम् ३६-१४४

ब्राह्मणावमाननिषेधः १०३-४३२

ब्राह्मणप्रशंसनम् १०३-४३३

ब्राह्मणपूजने भगवत्पूजनं भवतीति कथनम् १०४-४४०

ब्राह्मणावमन्तॄणां नरकयातनानुवर्णनम् १०४-४४१

ब्राह्मण्यसिद्धिप्रकारकथनम् ११५-५६०

ब्राह्मणानां भावशुद्धावेव साफल्यप्रतिपादनम् १२२-६०४

ब्राह्मण्यभ्रंशकरदुष्कर्मप्रतिपादनम् १२३-६०९

भक्तिरहितशूद्रार्चनाया अस्वीकारः १२३-६०८

भगवद्भक्तपूजनकथनम् १०३-४३१

भगवद्भक्तप्रशंसनम् १०३-४३४

भगवद्याज्ञयनिमंत्रणतत्प्रतिष्ठार्चनादिफलप्रशंसनम् १०८-४८६

| | अध्यायः-पृष्ठम् |
|---|---|
| भगवत्पूजायोग्यायोग्यपुष्पविवेचनम् | १०९-५०६ |
| भगवदाराधनक्रमस्य सङ्क्षेपेणोक्तिः | १०९-५०७ |
| भगवत्पञ्चमीस्वरूपकथनम् | १२०-५९० |
| भगवत्पञ्चम्यामुपवासविधानम् | १२०-५९० |
| भगवद्भक्तश्रैष्ठ्यप्रतिपादनम् | १२२-६०६ |
| भगवन्मूर्त्यर्चनप्रशंसनम् | १२२-६०७ |
| भगवद्भक्तलक्षणं कथयित्वा तत्प्रशंसनम् | १२४-६१३ |
| भगवतस्सर्वोत्तमत्वकथनम् | १२४-६१५ |
| भागवतलक्षणनिरूपणम् | १०९-५०८ |
| भूदानफलकथनम् | १०७-४७० |
| भूमेर्गोकर्णमात्रायाः परिमाणप्रतिपादनम् | १०७-४७३ |
| भूमिहरणदोषवचनम् | १०७-४७५ |
| भोजनविधिप्रतिपादनम् | ११४-५४८ |
| मनुप्रोक्तधर्मसारसमुच्चयोक्तिः | ११५-५५८ |
| मरणप्रकारशंसनम् | १०९-४९७ |
| मरुत्तस्य बृहस्पतिसकाशात् प्रतिनिवर्तने मध्येमार्गं नारदेन समागमः | ६—१९ |
| मरुत्तसंवर्तविषये अग्नीन्द्रसंवादः | ९—३९ |
| मरुत्तेन नारदचोदनया वाराणसीद्वारे स्वेन स्थापितकुणपावलोकनेन पलायमानस्य संवर्तस्यानुगमनम्... | ६—२० |
| मरुत्तेन महादेवं प्रसाद्य बहुद्रव्याहरणेन शिल्पिभिः यागोपयोगिभाण्डनिर्माणम् | ८—३२ |
| मरुत्तेनाग्न्युक्तेन्द्रसन्देशप्रत्याख्यानम् | ९—३६ |
| मरुत्तेन राज्ञा हिमवदुत्तरपार्श्वे सौवर्णैरेव कुण्डभाण्डाद्युपकरणैर्यज्ञारम्भः | ४—१३ |
| महर्षिभिर्ब्रह्मणं प्रति धर्मविषये नानाविधवादिविप्रतिपत्तिमभिधाय तत्प्रयुक्तस्वीयसंशयनिवर्तनप्रार्थना | ५२-१५८ |
| माध्याह्निकनिरूपणम् | १०९-५०२ |
| मार्गशीर्षादिद्वादशद्वादशीषु केशवादिभगवन्मूर्त्युपासनं कृत्वा व्रताचरणस्य फलप्रशंसनम् | १२०-५८९ |

# अक्षरमातृकाक्रमेण विषयसूचनम्


| | अध्यायः-पुटम् |
|---|---|
| मूलप्रकृतिप्रभृति पृथिव्यादिभूतगुणादिप्रतिपादनम् | ५३-२०५ |
| यतिमहिमानुवर्णनम् | ११३-५४३ |
| यमलोकस्य मनुष्यलोकस्य च दूरकथनम् | १०५-४४४ |
| यज्ञस्य पशुहिंसाहेतुत्वेन स्वर्गस्य सत्यदानतपोभिरेव सिद्धा यज्ञस्य नातिप्रशस्ततरत्वमिति नकुलाभिप्रायवर्णनम् | ९८-३९६ |
| यज्ञाग्निहोत्रप्रशंसनम् | ११६-५६७ |
| युधिष्ठिरकृतकृष्णस्तवनम् | १२०-५९३ |
| युधिष्ठिरस्य धृतराष्ट्रेण समाश्वासनेऽपि तूष्णीमवस्थानेन पुनः कृष्णेन परिसान्त्वनम् | २---४ |
| युधिष्ठिरस्य प्रजापालनकाले प्रजादीनामभ्युदयप्रकारवर्णनम् | १५-६४ |
| युधिष्ठिरस्य हिमालये ब्राह्मणचोदनया तैस्सहोपवासादिव्रताचरणपूर्वकं निशायापनम् | ६७-२७५ |
| युधिष्ठिरस्याश्वमेधदीक्षा | ७६-३०४ |
| युधिष्ठिरादीनां हिमालयात् स्वर्णभारानयनेन हास्तिनपुरप्रत्यागमनश्रवणेन नागरिकैर्नगरस्यालङ्कारः | ७३-२९४ |
| युधिष्ठिरादीनां कृष्णादिभिः प्रत्युद्गमनेन स्वर्णभारान् पुरस्कृत्य हास्तिनपुरप्रवेशः | ७४-२९६ |
| युधिष्ठिराश्वमेधसदस्यचोदनया नकुलेन उञ्छवृत्तिब्राह्मणस्य सक्तुप्रस्थदानकथनोपक्रमः | ९६-३८२ |
| युधिष्ठिरे पुनर्भीष्मद्रोणकर्णमारणानुस्मरणविषादेनारण्यगमनाय कृष्णानुज्ञानमाकाङ्क्षमाणे पुनस्तस्य व्यासेन समाश्वासनम् | २---५ |
| युधिष्ठिरेण व्यासाय अश्वमेधाहरणाय तावद्द्रव्याभावनिवेदनम् | ३---८ |
| युधिष्ठिरेण भीष्मादीनामौर्ध्वदैहिकं कृत्वा हास्तिननगरप्रवेशः | १४-६३ |
| युधिष्ठिरेण व्यासाज्ञया भीमादिभिस्सहाळोक्य यज्ञार्थधनाहरणाय भ्रात्रादिभिस्सह हिमवत्पार्श्वं प्रति प्रस्थानम् | ६६-२७० |
| युधिष्ठिरेण हिमवद्गिरिमेखलासेनानिवेशनम् | ६७-२७४ |

अध्यायः-पुटम्
युधिष्ठिरेण विधिवन्नानाबलिहरणादिना सपरिचरमहेश्वरपरितोषणेन विविधकनकभाण्डाहरणेन पुनर्नगराय प्रत्यागमनम् ६८-२७७
युधिष्ठिरेण पाण्डवेभ्यश्चतुर्भ्योऽर्जुनस्यैव विशेषतो युद्धपरिक्लेशादिसूचकशारीरलक्षणप्रश्ने कृष्णेन तं प्रति तत्कथनम् ९३-३६६
युधिष्ठिरेण व्यासाज्ञया ऋत्विग्भिस्सहाश्वमेधोपक्रमः ९४-३७१
युधिष्ठिरेण ऋत्विग्भ्यो दक्षिणादानम् ९५-३७६
युधिष्ठिरेण राज्ञां यथोचितं सम्माननेन स्वस्वदेशान् प्रतिप्रस्थापनम् ९५-३७९
युधिष्ठिरेण कृष्णस्य वैष्णवधर्मान् प्रशस्य तत्कथनप्रार्थना १०१-४०७
युधिष्ठिरेण कृष्णायानेकेषां धर्माणां श्रवणमुक्त्वा सर्वेभ्योधर्मेभ्यस्तन्मुखोद्गतस्य धर्मस्य श्रैष्ठ्यात् कथनप्रार्थना १०१-४०९
युधिष्ठिरेण श्रीकृष्णस्य चतुर्णां वर्णानां यमालये केनापराधेन बन्ध इति प्रश्नः १०२-४१८
युधिष्ठिरेणाश्वमेधे कृष्णस्य दीक्षास्वीकरणप्रार्थने कृष्णेन युधिष्ठिरस्यैव दीक्षास्वीकारविधानम् ७४-२५८
युधिष्ठिरेणाश्वमेधसमापनम् ९५-३७५
रैवतकोत्सववर्णनम् ६२-२५४
वर्णचतुष्टयधर्मनिरूपणम् १०२-४१९
वसुदेवस्याभिमन्युमरणेन विलापः ६४-२६३
वसुदेवादिभिरभिमन्यवे श्राद्धदानम् ६५-२६७
वस्त्रधारणविधिः १०९-५०१
विषुवादिपुण्यकालमहिमानमनुवर्ण्य तेषु दानफलकथनम् १२१-५९५
विकर्मसु स्थितानां ब्राह्मणानां वैफल्यकथनम् १२२-६०५
वृषभगृहशय्यादिदानप्रशंसनम् १०८-४८१
वैशम्पायनेन जनमेजयाय पशुहिंसां विनैव दानध्यानादिभिरेव यज्ञफलसंसिद्धौ दृष्टान्ततयाऽगस्त्ययज्ञप्रकारकथनम् ९९-४००
वैष्णवधर्मशुश्रूषया वसिष्ठादिभिः कृष्णसमीपोपसर्पणम् १०१-४०९

| | अध्यायः-पुटम् |
|---|---|
| वैष्णवधर्मशास्त्रश्रवणफलकथनम् | १२४-६१५ |
| व्यासेन युधिष्ठिराय पुरुषकर्मणामीश्वरप्रेरणायत्ततया दोषाणामपादकत्वं कथयित्वा दोषाभ्युपगमनेऽपि पापापनोदनायाश्वमेधादिविधानम् | ३—७ |
| व्यासेन युधिष्ठिरस्य हिमालये विद्यमानमरुत्तयागावशिष्टद्रव्यानयनेनाश्वमेधकरणचोदना | ३—९ |
| व्यासेन युधिष्ठिराय संवर्तमरुत्तीयोपाख्यानकथनारम्भः | ४—१० |
| व्यासेन युधिष्ठिराय मरुत्तस्य वंशपरम्पराकथनम् | ४—११ |
| व्यासेन युधिष्ठिराय अविक्षितः करन्धम इति नामप्राप्तिकथनम् | ४—१२ |
| व्यासेन युधिष्ठिराय मरुत्तयज्ञप्रवृत्तिप्रकारं कथयित्वा तच्छिष्टद्रव्याहरणेनाश्वमेधकरणविधानम् | १०-५१ |
| व्यासनारदकृष्णादिभिर्बन्धुजननिधनपरिशोचिनो युधिष्ठिरस्य समाश्वासनेन ऋषीणां तत्रैवान्तर्धानम् | १४-६१ |
| व्यासेन हास्तिनपुरमेत्य कुन्त्युत्तरादिस्त्रियः परिसान्त्व्य युधिष्ठिरमश्वमेधकरणाय सञ्चोद्य पुनरन्तर्धानम् | ६५-२६८ |
| व्यासेन हास्तिनपुरमेत्य युधिष्ठिरायाश्वमेधं प्रशस्य तत्करणविधानम् | ७४-२९७ |
| व्यासेन युधिष्ठिरस्य पृथिवीसञ्चाराय मेध्याश्वोत्सर्जनचोदना | ७५-३०० |
| व्यासेन युधिष्ठिरदत्तयागदक्षिणायाः कुन्त्यै प्रीत्या दानम् | ९५-३७८ |
| व्रतनियमफलकथनम् | १०८-४९१ |
| शकुनिभार्यया उर्जुनेन स्वसुतवधसम्भावनया रणाङ्गणमेत्यार्जुनस्य प्रसादनम् | ८९-३५५ |
| शुभाशुभयोस्सदृष्टान्तप्रदर्शनं बुद्धिक्षयनिरूपणम् | १०२-४२२ |
| शूद्राद्विरतब्राह्मणस्य पात्रत्वसङ्कीर्तनम् | १०७-४७९ |
| शूद्रजन्मस्वरूपं प्रतिपाद्य तस्य कर्तव्यधर्मनिरूपणम् | १२४-६१२ |
| शिशुमाराकृतिनिरूपणम् | १२१-६०२ |
| श्राद्धकालनिरूपणम् | ११५-५५६ |
| सङ्क्षेपेण परमात्मस्वरूपकथनम् | २२-९८ |
| सन्न्यासिधर्मनिरूपणम् | ४९-१८९ |

| | अध्यायः—पुटम् |
|---|---|
| सन्यासज्ञानतपसां परमपुरुषार्थसाधनत्वोक्तिः | ५०–१५४ |
| सात्विकराजसतामसदानकथनं तेषां गतिनिरूपणं च | १०३–४२९ |
| सुकृतिनां यमलोकप्राप्तिप्रकारकथनम् | १०५–४५१ |
| सुभद्रया श्रीकृष्णस्य माहात्म्यं संस्तूय परीक्षितुज्जीवनप्रार्थना | ७०–२८४ |
| सुवर्णादीनामनेकेषां दानानां फलप्रतिपादनम् | १०७–४७७ |
| सौदासेनोदङ्मुखभक्षणोद्यमे उदङ्मुखेन पुनः प्रत्यागमनं प्रतिज्ञाय सौदासं प्रति गुरुपत्न्यर्थं कुण्डलयाचनम् | ६०–२४१ |
| सौदासेनोदङ्मुखाय अनागमनमेव तव श्रेय इत्युक्तिः | ६१–२४८ |
| संवर्तमरुत्तसंवादः | ७—२३ |
| संवर्ततपोभयादग्निना मरुत्ते इन्द्रसन्देशनिवेदनानङ्गीकरणम् | ९—४२ |
| संवर्तेन मरुत्तस्य निवर्तनाय पांसुकर्दमष्ठीवनादिप्रक्षेपेऽप्यनिवर्तमानं तमवलोक्य विजने न्यग्रोधमूले समुपवेशः | ६—२२ |
| संवर्तेन मरुत्ताय समयबन्धनपूर्वकं याजनप्रतिज्ञानम् | ७—२५ |
| संवर्तेन मरुत्ताय हिमवत्सन्निहिते मुञ्जवति गिरौ महादेवस्य सन्निधानेन स्वोक्तस्तोत्रेण तं स्तुत्वा तत्प्रसादने नगायया तत्तत्यबहुसुवर्णाहरणचोदना | ८—२७ |
| संवर्तेन मरुत्तप्रार्थनया विद्याबलेनेन्द्रादीनां स्तम्भनम् | १०—४५ |
| स्नानविधिनिरूपणम् | १०९–४९९ |
| स्नानवस्त्रनिष्पीडनम् | १०९ ५०४ |
| स्वर्गगामिसुकृतिशंसनम् | १११–५३५ |
| क्षेत्रक्षेत्रज्ञसम्बन्धकथनम् | ५३ २०२ |
| क्षेत्रज्ञस्वरूपज्ञानस्यावश्यकत्वकथनम् | ५४ २०८ |

॥ श्रीरस्तु ॥

# महाभारतस्य आश्रमवासिकपर्वस्थानां विषयाणाम्

## ॥ अक्षरमातृकाक्रमेण सूचनम् ॥


| | अध्यायः-पुटम् |
|---|---|
| कुन्तीद्रौपद्यादिभिर्गान्धार्या श्वश्रूवद्वर्तनम् | १—२ |
| कुन्त्या वनगमनस्य युधिष्ठिरादिभिर्बहुधा प्रतिषेधनेऽपि तान् समाश्वास्य गान्धार्या सह वनप्रस्थानम् | १७—६० |
| कुन्त्या स्वस्य वनगमनाध्यवसायेन विषीदतो युधिष्ठिरादीन् प्रति सहेतूपन्यासं समाश्वासनम् | १९—६४ |
| कुन्त्या कृच्छ्रेण प्रतिनिवर्त्तितैर्युधिष्ठिरादिभिः कृच्छ्रात् पुनर्नगरं प्रत्यागमनम् | २०—६७ |
| कुन्त्या व्यासं प्रति स्वस्यां दुर्वासःप्रसादेन सूर्यात् कर्णस्योत्पत्तिं कथयित्वा स्वस्यास्तद्दिदक्षानिवेदनम् | ३४-११२ |
| गान्धार्या व्यासाय धृतराष्ट्रस्य पुत्रदिदक्षानिवेदनम् | ३६-११० |
| जनमेजयेन परीक्षित्प्रदर्शने प्रार्थिते व्यासेन परीक्षितश्शमीकमहर्षेः शृङ्गिणश्च प्रदर्शनम् | ३९-१२८ |
| जनमेजयेनावभृथस्नानानन्तरमास्तीकं सम्पूज्य वैशम्पायनं प्रति कथावशेषकथनप्रार्थना | ३९-१३० |
| त्यक्तदेहानामपि कुरुपाण्डवपक्षीयाणां कथं पुनरागमनमिति जनमेजयप्रश्नस्य वैशम्पायनेन सोपपत्तिकमुत्तरदानम् | ३८-१२६ |
| दुर्योधनादीनां हतानां व्यासप्रसादादागतानां पुनर्गङ्गायामेव यथागतं स्वस्वलोकप्राप्तिः | ३७-१२३ |
| धृतराष्ट्रस्य भीमसेनपरुषभाषणश्रवणान्निर्वेदमुपगम्य गान्धार्या सह वनगमनाध्यवसायः | १—५ |
| धृतराष्ट्रस्य वनगमनाभ्यनुज्ञादानाय युधिष्ठिरानुनयाय व्यासागमनम् | ५—१० |

अध्यायः-पृष्ठम्
धृतराष्ट्रस्य युधिष्ठिराय राजनीत्युपदेशानन्तरं विश्रमाय गान्धारीगृहप्रवेशः १०—३५
धृतराष्ट्रस्य गान्धार्या कदा वनगमनमिति प्रश्नः १०—३६
धृतराष्ट्रधनयाचनश्रवणेन भीमस्य कोपे अर्जुनेन तस्यानुनयः १३—४८
धृतराष्ट्रस्य वनप्रस्थानसमये विदुरसञ्जयाभ्यामपि वनवासाय तेन सह प्रस्थानम् १८—५९
धृतराष्ट्रदिदृक्षया नारदपर्वतादिभिश्शतयूपाश्रमागमनम् २२—७२
धृतराष्ट्रयुधिष्ठिरादीनां परस्परकुशलप्रश्नादिपूर्वकं संल्लापः २९—७३
धृतराष्ट्रयुधिष्ठिरादिभिर्व्यासप्रसादादागतैर्हतपूर्वबन्धुभिस्सह संल्लापादिना तस्यां रात्रौ सुखविहरणम् ३७-१२२
धृतराष्ट्रादिभिर्व्यासवचनाद्गङ्गातीरमेत्य बन्धुदर्शनौत्कण्ठ्येन कृच्छ्रादहर्यापनम् ३५-११८
धृतराष्ट्रे गान्धारीकुन्तीसञ्जयैस्सह गङ्गायामाप्लुत्य स्वाश्रममागच्छति सति मध्येमार्गं दावाग्निना तत्परिवेष्टनम् ४१-१४०
धृतराष्ट्रेण सकलपौरानयनेन तेभ्यः स्वस्य वनगमनाध्यवसायनिवेदनम् ४—११
धृतराष्ट्रेण युधिष्ठिरं प्रति स्वस्य वनगमनाभ्यनुज्ञानप्रार्थना ४—१३
धृतराष्ट्रेण युधिष्ठिराय वनगमनकाले राजनीत्युपदेशः ७—२३
धृतराष्ट्रेण युधिष्ठिराय राजनीतिकथनम् ८—२९
धृतराष्ट्रेण युधिष्ठिरद्वारा सकलपौरजनानयनेन स्वस्य तेभ्यो वनजिगमिषां निवेद्य तदभ्यनुज्ञानप्रार्थना ... १०—३७
धृतराष्ट्रेण पैरान् प्रति दुर्योधनपक्षपातेन स्वकृतापनयक्षमापणम् ११—३८
धृतराष्ट्रेण भीष्मदुर्योधनादीनां श्राद्धदानाय विदुरमुखाद् युधिष्ठिरं प्रति धनयाचनम् १३—४७
धृतराष्ट्रेण भीष्मदुर्योधनाद्युद्देश्यकश्राद्धे धनवस्त्राद्यादिना ब्राह्मणसन्तर्पणम् १६—५४
धृतराष्ट्रेण कुन्तीस्कन्धावसक्तहस्तायां गान्धार्यां अंसावलम्बनेन सशोकैः पौरैः पाण्डवैश्चानुगम्यमानेन सता वनं प्रति प्रस्थानम् १७—५७

अध्यायः-पुटम्

धृतराष्ट्रेण गान्धारीमुखेन कुन्तीनिवर्तनोपाये कृतेऽपि कुन्त्या तदनङ्गीकारः २७—६७

धृतराष्ट्रेण विदुरादिभिस्सह वनमेत्य गङ्गातीरे सन्ध्योपास्त्या दिना रात्रियापनम् २०—६८

धृतराष्ट्रेण विदुरादिभिस्सह गङ्गातीरात् कुरुक्षेत्रमेत्य तत्र शतयूपाश्रमे व्यासाज्ञया तदुपदिष्टविधिना तपश्चरणम् २१—७०

धृतराष्ट्रेण स्वावस्थादर्शनेन शोचतां पाण्डवानां समाश्वासनम् २७—८८

धृतराष्ट्रेण व्यासाय स्वस्य बन्धुजनमरणजनितदुःखनिवेदनम् ३२-१०८

धृतराष्ट्रेण व्यासप्रसादलब्धदिव्यचक्षुषा दुर्योधनादीनां सर्वेषां दर्शनम् ३६-१२१

धृतराष्ट्रेण पुत्रदर्शनानन्तरं युधिष्ठिरादिभिस्सह पुनः स्वाश्रमं प्रत्यागमनम् ४०-१३१

धृतराष्ट्रेण सञ्जयं प्रति अग्नितो दूरापसरणं विधाय कुन्ती-गान्धारीभ्यां सह वह्नौ प्रवेशनम् ४१-१४१

नारदेन धृतराष्ट्राय शतयूपाश्रमस्य सहस्रचित्यादिराजर्षीणां स्वर्गप्रापकत्वमभिधाय विदुरादिभिस्सह धृतराष्ट्रस्य भविष्यत्सिद्धिकथनम् २२—७३

नारदेन कदाचन हास्तिनपुरमेत्य पाण्डवेभ्यो धृतराष्ट्रादीनां-स्वर्गप्राप्तिनिवेदनम् ४१-१३८

नारदेन युधिष्ठिराय धृतराष्ट्रादिदाहकाग्नेर्मन्त्रपूतत्वकथनम् ४२-१४६

पुत्रदर्शनपर्वश्रवणफलकथनम् ३७-१२५

पौरजनैरशाक्यब्राह्मणमुखेन धृतराष्ट्रं समाश्वास्य कृच्छ्रेण वनगमनाभ्यनुज्ञानम् १२—४१

भीमेनार्जुनस्य धृतराष्ट्रापनयानुस्मारणं कृत्वा धृतराष्ट्राय धन दानानङ्गीकरणम् १३—४९

भीमेन दुर्योधनादिभ्यः श्राद्धदानाय धनदानानङ्गीकारे युधिष्ठिरेण विदुरमुद्दिश्य धृतराष्ट्राय निजगृहकोशाद्धनदान-निवेदनकथनम् १४—५१

युधिष्ठिरशासनेन भीमवर्जमर्जुनादिभिः धृतराष्ट्रानुवर्तनम् १—४

अध्यायः-पृष्ठम्

युधिष्ठिरस्य धृतराष्ट्रेण पौरेषु न्यासत्वेन समर्पणं कृत्वा स्वस्य वनगमनाभ्यनुज्ञानप्रार्थना ११—३९

युधिष्ठिरस्य धृतराष्ट्रादिभ्य उदकदानानन्तरं निजनगरे प्रजापालनेन भ्रात्रादिभिस्सह सुखविहारः ४२-१४९

युधिष्ठिरादीनां कुन्तीधृतराष्ट्रादिप्रव्रजनशोकेनाभिमन्युप्रभृतिबन्धुजनानुस्मरणशोकेन च स्वस्मिन्व्यापारेष्वप्यनादरणम् २४—७८

युधिष्ठिरादिभिश्शतयूपाश्रमे धृतराष्ट्रादीनदृष्ट्वा तत्रत्येभ्यो यमुनां गत इति श्रुत्वा तत्र गत्वा स्वस्वनामानि सङ्कीर्त्य तत्पादाभिवादनम् २७—८६

युधिष्ठिरादीनां शतयूपादिभिस्सशिष्येण व्यासेन च परिवृतस्य धृतराष्ट्रस्याश्रमं प्रत्यागमनम् ३०-१००

युधिष्ठिरादीनां धृतराष्ट्राश्रमे रात्रौ फलमूलादिना कालयापनम् २९—९७

युधिष्ठिरे धृतराष्ट्राश्रमे भ्रात्रादिभिस्सैन्येन च मासमेकं निवसति व्यासधृतराष्ट्रौ परिवार्य नारदादिभिर्गान्धार्यादिभिः पाण्डवैश्च समुपवेशनम् ३२-१०५

युधिष्ठिरे पुनर्नगरजिगमिषाशून्ये सति धृतराष्ट्रस्य कुन्तीगान्धार्योश्च निदेशनिर्बन्धेन तस्य पुनस्सर्वैस्सह हास्तिनपुरगमनम् ४०-१३३

युधिष्ठिरेण धृतराष्ट्रानुमत्या राज्यपरिपालनम् ... १—१

युधिष्ठिरेण धृतराष्ट्रानुशोचनपूर्वकं तत्प्रतिषेधने धृतराष्ट्रस्य मोहः ५—१४

युधिष्ठिरेण धृतराष्ट्रस्य स्वहस्तेन संस्पर्शः ५—१७

युधिष्ठिरेण धृतराष्ट्रस्याहारस्वीकरणप्रार्थना ५—२०

युधिष्ठिरेण धृतराष्ट्रस्य कृष्णेन वनगमनाभ्यनुज्ञानम् ६—२२

युधिष्ठिरेण वनस्थकुन्तीधृतराष्ट्रादिदिदृक्षया द्रौपद्यादिभिः पौरैर्भ्रातृभिश्च सह वनाय प्रस्थानम् २५—८०

युधिष्ठिरेण नानायानारूढैः पौरैर्भ्रातृभिश्च सह धृतराष्ट्रादिदिदृक्षया शतयूपाश्रमवनप्रवेशः २६—८४

अध्यायः-पुटम्

युधिष्ठिरेण धृतराष्ट्रं प्रति विदुरः केति प्रश्ने तत्तत्येन केनचिद्यदृच्छया धृतराष्ट्रमुपसर्पतो विदुरस्य जनावलोकनेन प्रतिनिवर्तमानस्य प्रदर्शनम् २९—९५

युधिष्ठिरेण धृतराष्ट्रादिषु विदुरस्य स्वशरीरप्रवेशरूपाद्भुत निवेदनम् २९—९७

युधिष्ठिरेण धृतराष्ट्रानुज्ञया भ्रात्रादिभिस्सह महर्षीणामाश्रम दर्शनम् ३०—९८

युधिष्ठिरेण भ्रात्रादिभिस्सह धृतराष्ट्रादिनिधनश्रवणेन सकरुणं परिदेवनपूर्वकं सति संस्कृताग्नौ तेषां वृथाग्निना दाहं प्रत्यनुशोचनम् ४२-१४४

युधिष्ठिरेण युयुत्सुपुरस्कारेण गान्धारीधृतराष्ट्रयोरुदकं प्रदाय कुन्त्याश्च विधिवच्छ्राद्धदानम् ४२-१४७

युधिष्ठिरेणामात्यानां नागराणां च धृतराष्ट्रानुवर्तनमनुशास्य भ्रातृभिस्सहाप्रमादेन तत्परितोषणम् २—५

युधिष्ठिरेणाश्रमपदे विदुरानुधावनेन तत्समीपगमनम् २९—९५

राजनीतिकथनम् ९—३२

विदुरस्य योगात् स्वशरीरत्यागेन युधिष्ठिरशरीरे प्रवेशः... २९—९६

विदुरस्य युधिष्ठिरेण मन्त्रपूर्वकसंस्कारः कर्तव्यः उत केवलदाहो वेति संशये अशरीरिवाचा संस्कारकरणम् २९—९७

विदुरेण धृतराष्ट्राय युधिष्ठिरेण भीष्मादीनां श्राद्धदानाय धनदानाङ्गीकरणनिवेदनम् १५—५२

व्यासेन सहेत्पन्यासं युधिष्ठिरं प्रति धृतराष्ट्रस्य वनगमनाभ्यनुज्ञानंनियम्य स्वाश्रमगमनम् ६—२१

व्यासेन धृतराष्ट्राय कुशलादिप्रश्नपूर्वकं विदुरस्य वास्तवस्वरूपादिप्रतिपादनम् ३१-१०१

व्यासेन धृतराष्ट्राय इतरमहर्षिदुष्करधृतराष्ट्राभीष्टाश्चर्यकर्मकरणप्रतिज्ञानम् ३१-१०४

व्यासेन धृतराष्ट्राय स्वतपोबलेनाभीष्टसम्पादनशंसनम् ३२-१०७

व्यासेन कुन्त्या अभीष्टनिवेदनचोदना ३३-१११

अध्यायः-पृष्ठम्

व्यासेन कुन्त्यास्सहेतूपन्यासं सूर्यात् कर्णजननप्रयुक्तदोष-शङ्कानिरसनम् ३४-११४

व्यासेन गान्धारीं प्रति समरहतानां दुर्योधनादीनां सर्वेषां रात्रौ प्रदर्शनं प्रतिज्ञाय धृतराष्ट्रादीनां विशिष्य गन्धर्वांशत्वकथनम् ३५-११५

व्यासेन निशायां गङ्गाजलावगाहनेन समाह्वाने पुरा समरे निहतैः कुरुपाण्डवोभयपक्षीयैस्सर्वैः स्वस्वाभरणायुध-वाहनादिभिस्सह सलिलादुद्गम्य तीरोत्तरणम् ३६-११९

व्यासेन दुर्योधनादिपत्नीनां गङ्गाजलावगाहनेन स्वस्वपति-लोकप्रापणम् ३७-१२४

व्यासेन धृतराष्ट्रं प्रति युधिष्ठिरादीनां नगरप्रस्थापनचोदना ४०-१३२

शतयूपपृष्टेन नारदेन तं प्रति धृतराष्ट्रस्य गान्धार्या सह वत्सर-त्रयादूर्ध्वं कुबेरलोकप्राप्तिकथनम् २३—७६

सञ्जयस्य धृतराष्ट्रदेहत्यागकाले दावाग्नितोऽपसृत्य हिमवत्पर्वत-गमनम् ४१-१४२

सञ्जयेन तापसान् प्रति युधिष्ठिरादीनां द्रौपद्यादिस्त्रीणां चाङ्गु-लिनिर्देशेन नामनिर्देशः २८—८९

॥ श्रीरस्तु ॥

# महाभारतस्य मौसलपर्वस्थानां विषयाणाम्

## ॥ अक्षरमातृकाक्रमेण सूचनम् ॥


अध्यायः-पुटम्

अर्जुनेन द्वारकामेत्य रुक्मिण्यादिपरिसान्त्वनपूर्वकं वसुदेवगृहं प्रति गमनम् ५-२४

अर्जुनेन वसुदेवं समाश्वास्य सकलपौरेभ्यः नातिचिरादेव द्वारकायास्समुद्रेण समाप्लावनं निवेद्य सर्वेषामिन्द्रप्रस्थं प्रति प्रयाणसन्नाहसञ्चोदना ७-२९

अर्जुनेन मध्येमार्गं चोरापहृतावशिष्टयादवकलत्रादिभिस्सह स्वदेशमेत्य युधिष्ठिराज्ञया वज्रस्येन्द्रप्रस्थराज्येऽभिषेचनम् ७-३४

अर्जुनेन व्यासाश्रमे व्यासस्य दर्शनम् ८-३८

अर्जुनेन व्यासाय द्वारकावृत्तान्तनिवेदनम् ८-३९

अर्जुनेन हास्तिनपुरमेत्य युधिष्ठिराय व्यासोक्तस्य निवेदनम् ८-४३

उद्धवगमनम् ३-१०

कृतवर्मसात्यकिपक्षीयैर्मौसलतृणैः परस्परप्रहारेण परस्परमारणम् ३-१२

कृष्णस्य पुनर्द्वारकां प्रविश्य स्त्रियो वसुदेवसात्कृत्य यावदर्जुनागमनं रक्षणीया इत्युक्त्वा पुनर्बलरामसमीपागमनम् ४-१६

कृष्णस्य देवैः स्वर्गप्रापणम् ४-२०

कृष्णस्य निर्याणकाले देवेन्द्रं प्रति भूमौ निजदिव्यरूपपूजनविधानम् ४-२२

कृष्णाज्ञया द्वारकावासिनां सस्त्रीबालवृद्धानां प्रभासक्षेत्रगमनम् ३-१०

कृष्णेन उत्पातानामनेकेषां दर्शनेन गान्धारीशापदानानुस्मरणेन च तस्य सत्यताचिकीर्षया भटैः सर्ववृष्ण्यादीनां तीर्थयात्रोद्घोषणम् २—७

अध्यायः-पृष्ठम्

कृष्णेन सर्वयादवनिधननिवेदनाय पाण्डवान् प्रति दारुकप्रेषणम् ४-१५
कृष्णेन शरीरत्यागाय योगेन शयनम् ४-१९
कृष्णेन शरीरं त्यक्त्वा स्वर्गगमनेन देवैः पुष्पवर्षणपूर्वकं स्तुत्या प्रत्युद्गम्यमानेन सता निजपरमधामप्रवेशः ४-२१
दारुकेण हास्तिनपुरमेत्य पाण्डवेषु सर्वयादवक्षयनिवेदनम् ५-२३
द्वारकायां नानोत्पातप्रादुर्भावः २—५
द्वारकायां वृष्ण्यन्धकादिभिरनर्थसूचकदुस्वप्नानुभवः ३—८
वभ्रोः स्त्रीरक्षणार्थं कृष्णेन प्रेषितस्य मध्येमार्गं केनचिद्बुधः ४-१५
बलभद्रेण योगात् सर्पशरीरस्वीकारेण समुद्रप्रवेशः ४-१७
बलरामश्रीकृष्णादीनां सर्वेषां यादवानां च मौसलप्रहारेण-निःशेषनिधनश्रवणम् १—२
यादवकुलविनाशकं मुसलं प्रसविष्यतीति महर्षिभिःशापदानम् १—४
यादवानां प्रभासक्षेत्रे नृत्तगानादिमहोत्सवमनुभूय मद्यादि-पानम् ३-१०
यादवेषु सर्वेषु निहतेषु वभ्रुदारुकाभ्यां सह बलभद्रमन्वेष-माणेन कृष्णेन वने वृक्षाश्रितस्य तस्य दर्शनम् ४-१४
युधिष्ठिरेण हास्तिननगरे प्रजापालनकाले षट्त्रिंशे वत्सरेऽशु-भसूचकोत्पातदर्शनम् १—१
रुक्मिण्यादिभिः काभिश्चनाग्निप्रवेशः ७-३७
वज्रार्जुनपुरस्कारेण सकलपौरजने इन्द्रप्रस्थं प्रति पुरः पुरः प्रयाते समुद्रेण पञ्चाद्भागे पौरजनमुक्ततत्तद्भागस्य कृष्णमन्दिरं विना स्वजलेन समाक्रमणम् ७-३३
वसुदेवेन स्वगृहमागतायार्जुनाय यादवक्षयनिदानं निवेद्य-कृष्णानुस्मरणेन परिशोचनम् ६-२५
वसुदेवेनार्जुनाय कृष्णवचनं निवेद्य राज्यस्त्रीधनादिकं समर्प्य स्वेन स्वप्राणत्यजनप्रतिज्ञानम् ६-२७
वसुदेवं परेद्यवि योगेन शरीरं त्यक्तवन्तं पत्नीभिस्सह संस्कृत्य रामकृष्णशरीरयोर्दाहनम् ७-३०

अध्यायः-पुटम्

विश्वामित्रादिमहर्षिषु कदाचन द्वारकामागतेषु कैश्चन यादवैस्साम्बस्य स्त्रीवेषपरिकल्पनेन मुनीन् प्रति गार्भिणीयं किंरूपमपत्यं प्रसविष्यतीति प्रश्नः १—३

वैशम्पायनेन जनमेजयं प्रति यादवानां मौसलेन निधनप्रकारकथनारम्भः १—३

व्याधस्य कृष्णसमीपमेत्य पश्चात्तापेन तस्य प्रणामः ४–२०

व्याधेन मृगबुद्ध्या कृष्णस्य पादतले साथकेन गाढवेधनम् ४–२०

व्यासेनार्जुनाय युधिष्ठिरादीनामपि स्वर्गगमनसूचनम् ८–४२

सत्यभामादिभिः काभिश्चन तपसे वनगमनम् ७–३७

सात्यकिना सभायां स्यमन्तकमणिहरणादिममर्मण्युद्घाट्य कृतवर्मगर्हणम् ३–११

सात्यकिना स्यमन्तकमणिवृत्तान्तश्रवणखिन्नसत्यभामामनःप्रसादनाय खड्गेन कृतवर्मणः शिरश्छेदनम् ३–१२

सात्यकिपुत्रादीनां तत्र तत्र राज्येऽभिषेचनम् ७–३७

साम्बेन यादवकुलविनाशके मुसले प्रसूते राजाज्ञया तस्य चूर्णीकरणेन समुद्रे प्रक्षेपणम् १—५

॥ श्रीस्तु ॥

# महाभारतस्य महाप्रस्थानिकपर्वस्थानां विषयाणाम्

## ॥ अक्षरमातृकाक्रमेण सूचनम् ॥


अध्यायः—पुटम्

अर्जुनेन मध्येमार्गमग्निवचसा सनिषङ्गस्य गाण्डीवस्य वरुणो देशेन समुद्रे प्रक्षेपणम् १—६

इन्द्रेण युधिष्ठिरं प्रति बहुधा शुनस्त्यागः कर्तव्य इत्युक्तावपि युधिष्ठिरस्याश्रितपक्षपातेन त्यागानङ्गीकरणम् ३—१३

पाण्डवेषु महाप्रस्थाने मेरुगिरिं गच्छत्सु द्रौपद्यादीनां कानिष्ठ्यक्रमेण योगभ्रंशाद् भूमौ पतनम् २—८

भीमेन युधिष्ठिरस्य क्रमेण द्रौपद्यादिपतनकारणप्रश्ने-युधिष्ठिरेण तेषां पतने प्रत्येकं हेतुकथनम् २—८

महाप्रस्थानकाले वास्तुविक्रयणविषये वास्तुस्वामिक्रेतृराजानां युगपत् तद्वनेच्छोदयः १—४

महाप्रस्थाने युधिष्ठिरस्य शुनैकेन केवलमनुगमनम् २—११

यमेन शुनकरूपं विहाय स्वस्वरूपेण सप्रत्यभिज्ञानं युधिष्ठिरप्रशंसनम् ३—१५

युधिष्ठिरस्य शुना विना स्वस्य स्वर्गगमनाय रथारोहणतिरस्कारः ३—१३

युधिष्ठिरस्य यमेन्द्रादिभी रथेन स्वर्गप्रापणम् ३—१६

युधिष्ठिरस्य स्वर्गे नारदेन प्रशंसनम् ३—१६

युधिष्ठिरस्य स्वर्गे स्वभ्रात्राद्यदर्शनेन इन्द्रं प्रति भ्रात्रादीन् विना स्वस्य स्वर्गेऽप्यरुचिं कथयित्वा स्वभ्रात्रादिसमीपगमनेच्छानिवेदनम् ३—१७

युधिष्ठिरेण वृष्णीनां मौसलमाहवं निशम्य महाप्रस्थानाय भ्रातृभिस्सहालोच्य युयुत्सौ राज्यभारं निवेश्य परीक्षितो राज्येऽभिषेचनम् १—१

| | अध्यायः-पृष्ठम् |
|---|---|
| युधिष्ठिरेण सुभद्रायाः एवं कर्तव्यमिति शासनम् | १—२ |
| युधिष्ठिरेण वासुदेवादीनां श्राद्धदानम् | १—३ |
| युधिष्ठिरेण कृपमभ्यर्च्य परीक्षितस्तस्मै शिष्यत्वेन प्रतिपादनम् | १—३ |
| युधिष्ठिरेण महाप्रस्थानाय पौरैरननुमतावपि प्रस्थाननिश्चयः | १—३ |
| युधिष्ठिरेण मध्येमार्गं मेरोः पतितानां स्वभ्रात्रादीनां शोकेन भ्रात्रादिभिर्विना स्वर्गगमनानादरोक्त्या इन्द्रेण तत्समाधानम् | ३—१२ |
| वास्तुविक्रयणेऽक्रमेण विवादे कलियुगं प्राप्तमिति निश्चित्य युधिष्ठिरेण भ्रातृभिर्द्रौपद्या च सह आभरणान्युत्सृज्य वल्कलानि धृत्वा शुना सह गृहात् प्रस्थानम् | १—४ |
| शुना सह महाप्रस्थानं गच्छन्तं युधिष्ठिरं प्रति इन्द्रेण स्वर्गगमनाय निजरथारोहणचोदना | ३—१२ |

॥ श्रीरस्तु ॥

# महाभारतस्य स्वर्गारोहणपर्वस्थानां विषयाणाम्

## ॥ अक्षरमातृकाक्रमेण सूचनम् ॥


अध्यायः—पुटम्

इन्द्रेण युधिष्ठिरस्य नरकदर्शनकारणं भीमादीनां नरकप्राप्तिकारणं च प्रतिपाद्य आकाशगङ्गायां स्नानेन युधिष्ठिरस्य मानुषभावविगमप्रतिपादनम् ३—१२

इन्द्रेण युधिष्ठिराय भीमादीनां तत्तत्स्थानगतानां पृथक् पृथक् प्रदर्शनम् ४—१०

जनमेजयेन यज्ञान्ते सबहुमानमास्तिकं सम्प्रेष्य तक्षशिलातो हास्तिननगरमेत्य प्रजापालनपूर्वकं सुखनिवासः ५—२३

देवदूतेनेन्द्रे युधिष्ठिरचिकीर्षितनिवेदनम् २—११

यमेन युधिष्ठिरं प्रति सप्रशंसनं तदृष्टनरकस्य परीक्षणायेन्द्रमायासृष्टत्वकथनम् ३—१५

युधिष्ठिरस्य बन्धुजनप्रदर्शनाय देवैश्चोदितेन देवदूतेन तस्य नरकप्रदेशप्रापणम् २—६

युधिष्ठिरस्य नरक एवावस्थानपरीक्षां यमेन्द्रादिषु कृतवत्सु तस्य तत्रैव स्थित्या परितुष्टेषु युधिष्ठिरसमीपमागतेषु तदृष्टनरकादीनां क्षणेनान्तर्धानम् ३—११

युधिष्ठिरेण स्वर्गे महासमुच्छ्रयेण शोभमानस्य दुर्योधनस्य दर्शनम् १—२

युधिष्ठिरेण स्वर्गे दुर्योधनोत्कर्षासहिष्णुतया तदीयदोषोद्घाटनेन दुर्योधनेन सह स्वस्य स्वर्गवासानभिरुचिं निवेद्य नारदं प्रति स्वस्य भ्रात्रादिदिदृक्षानिवेदनम् १—३

युधिष्ठिरेण दुर्दर्शनरकदर्शनासहिष्णुतया देवदूतेन सह प्रतिनिवर्तने श्रुतपूर्वकण्ठध्वनिश्रवणम् २—७

अध्यायः-पुटम्

युधिष्ठिरेण नरके के यूयमिति पृष्टैस्तैस्स्वेषां कर्णभीमाद्वित्वकथनम् २—९

युधिष्ठिरेण नरके देवदूतं प्रति इन्द्रे स्वस्य तत्समीपं प्रत्यनागमननिवेदनचोदना २—१०

युधिष्ठिरेण गङ्गायामवगाहनान्मानुषशरीरं परित्यज्य दिव्यशरीरं परिगृह्य देवैस्सह भ्रात्राद्यधिष्ठितदिव्यस्थानगमनम् ३—१६

युधिष्ठिरेण स्वर्गे निवसतां कृष्णकर्णादीनां दर्शनम् ४—१७

वैशम्पायनेन जनमेजयं प्रति भीष्मद्रोणादीनां स्वस्वसुकृतफलत्वेन स्वर्गभोगानन्तरं स्वैस्स्वैरंशिभिः सहैक्यप्राप्तिकथनम् ५—२०

सूतेन शौनकादीन् प्रति जनमेजयाय वैशम्पायनोक्तभारतकथाकथनं परिसमाप्य भारतमहिमप्रशंसनम् ५—२४

स्वर्गे कर्णादिबन्धुजनानपश्यता युधिष्ठिरेण देवान् प्रति यत्र कुत्रापि बन्धुजनैस्सहैव स्वस्य निवासेच्छानिवेदनम् २—५

## ॥ निवेदनम् ॥

| | पुटे. | पङ्क्तौ. | |
|---|---|---|---|
| महाप्रस्थाने | २ | ९ | अर्धम् |
| | ७ | ९ | अर्धद्वयम् |
| | १४ | ६ | ,, |
| | १६ | १७ | ,, |
| स्वर्गारोहणे | ५ | १३ | अर्धचतुष्टयम् |
| | ८ | ९ | अर्धद्वयम् |

एतानि त्रयोदशार्धानि—अ-क-ख-घ कोशेषु नोपलभ्यन्ते। परं तु सन्दर्भे एतेषामावश्यकत्वात्—ग-कोशादुद्धृत्य संयोजितानीत्यवगन्तव्यम् ॥

॥ श्रीः ॥

## महाभारत आश्वमेधिकपर्वस्थानामशुद्धानां शोधनम्

| पुटम् | पङ्क्तिः | अशुद्धम् | शोधनम् |
|---|---|---|---|
| १३ | ३ | यज्ञशीलो कर्मरतो | यज्ञशीलःकर्मरतो |
| २४ | १५ | कथञ्चिद्वै | कथञ्चिद्वै |
| २७ | ४ | संवर्तेन | मरुत्तेन |
| ३१ | ११ | स्तत्व- | स्तत्त्व |
| ५२ | ७ | ज्ञातिपबान्धवम् | ज्ञातिबान्धवम् |
| ७२ | १ | — | वैशम्पायनः |
| ७७ | १५ | मा तेऽभूदत्र | मा ते भूदत्र |
| १०३ | ६ | — | ब्राह्मणः— |
| १०९ | १४ | विषयाविवदादि | विषयविवादादि |
| १४८ | ८ | श्रीभगवान् | — |
| १६७ | ११ | — | ब्रह्मा— |
| १९५ | २ | इह लोकस्थ | इहलोकस्थ |
| २५० | १५ | शतकुम्भ | शातकुम्भ |
| २५२ | १७ | प्रायच्छत् | प्रायच्छन् |
| २५८ | ६ | शक्योन्यब्द | शक्यान्यब्द |
| २६५ | २० | नम्नस्मि | नाम्नास्मि |
| ३४९ | ८ | न्यवातयत् | न्यपातयत् |
| ३५२ | १९ | अध | अर्ध |
| ३६६ | २ | सम्ब्भारादि | सम्भारादि |

| पुटम् | पङ्क्तिः | अशुद्धम् | शोधनम् |
|---|---|---|---|
| ३९८ | १२ | योऽह्यपण्डितः. | यो ह्यपण्डितः |
| ४०३ | १७ | तपो बलम् | तपोबलम् |
| ४१३ | ६ | मद्भाक्तानां | मद्भक्तानां |
| ४१६ | ६ | तस्मिस् | तस्मिंस् |
| ४३५ | १८ | मन्तणां | मन्तॄणां |
| ४४३ | १ | मरियेत् | मीरयेत् |
| ४४५ | ७ | पृछसि | पृच्छसि |
| ४५६ | १० | चक्रावाक | चक्रवाक |
| ६०३ | ३ | दधिक्राविण्णेति | दधिक्राव्णेति |
| ६१५ | ११ | विवर्धत | विवर्धते |
| ६१८ | १३ | सप्ताधिक १०७ | अष्टाधिक १०८ |

महाभारत आश्रमवासिकपर्वस्थानामशुद्धानां शोधनम्

| | | | |
|---|---|---|---|
| ३५ | २ | युधिष्ठिरात् | युधिष्ठिरेण |
| ५५ | ७ | विप्रेभ्यो स ददौ | विप्रेभ्यस्स ददौ |
| ५६ | ३ | ततोऽनन्तर | ततोऽनन्तर |
| १२९ | ३ | ममपि | ममापि |
| | ४ | तद्रूपवषे | तद्रूपवेष |
| १३४ | १० | वैशम्पायनः- | — |
| १३६ | १७ | — | वैशम्पायनः |

| पुटम् | पङ्क्तिः | अशुद्धम् | शोधनम् |
|---|---|---|---|
| १३८ | ६ | सञ्चयं | सञ्जयं |
| | १७ | देशाः भवता | देशा भवता |
| १४२ | १८ | दग्धो तथा | दग्धस् तथा |
| १४८ | ३ | शोचन्तो वर्तयन्तस्ते | शोकं निवर्तयन्तस्ते |

महाभारतस्वर्गारोहणपर्वस्थाशुद्धशोधनम्

| | | | |
|---|---|---|---|
| ८ | ९ | तथाऽसम्युक्तो | तथाऽस्म्युक्तो |

PRINTED BY V. RAMASWAMY SASTRULU & SONS
AT THE 'VAVILLA' PRESS, MADRAS.—1933.

# RAMAYANA OF VALMIKI

WITH

## COMMENTARIES

EDITED BY

**Rao Bahadur Dr. S. KRISHNASWAMI AIYANGAR,**

M.A., Ph.D., M.R.A.S., F.R.Hist.S., F.A.S.B.

We have projected the publication of Sri Ramayana of Valmiki, together with the most useful of the ancient commentaries thereon. The following commentaries will be published *in extenso :*

1. **Govinda Rajiyam**
2. **Tirtiyam**
3. **Tilakam**
4. **Katakam**
5. **Sarvarthasaram**
6. **Ramanujiyam**
7. **Vivekatilakam**

& 8. **Dipika**

The publication will be issued in eight volumes: Ayodhya and Yuddha *Kandas*, comprising two volumes each, and the other *Kandas* covering each one volume.

For further information, apply to:—

V. RAMASWAMY SASTRULU & SONS,

**Printers & Publishers,**

**292, Esplanade, MADRAS.**

